.. 1. Adiparva Kumbhaghonam Edition ..
॥ १. आदिपर्व ॥

आदिपर्व - अध्याय ००१
॥ श्रीः ॥
१.१. अध्यायः १

(अनुक्रमणिकापर्व ॥ १ ॥)
Mahabharata - Adi Parva - Chapter Topics
आदौ मङ्गलाचरणं ॥ १ ॥
नैमिशारण्ये दीर्घसत्रे शौनकादीन्प्रति सौतेरागमनम् ॥ २ ॥
तत्र शौनकादिभिः सौतिं प्रति भारतकथनचोदना ॥ ३ ॥
सौतिना श्रीमन्नारायणनमस्कारपूर्वकं व्यासस्य भारतनिर्माणकथनम् ॥ ४ ॥
पर्वानुक्रमणिका ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१-० (०)
॥ श्रीवेदव्यासाय नमः ॥ १-१-०क्ष् (०)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव(व्यासं) ततो जयमुदीरयेत् ॥ १-१-१ (१)
ग्नारायणं सुरगुरुं जगदेकनाथं'
भक्तप्रियं सकललोकनमस्कृतं च ।
त्रैगुण्यवर्जितमजं विभुमाद्यमीशं
वन्दे भवघ्नममरासुरसिद्धवन्द्यम्'॥ १-१-२ (२)
ग्नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान्'॥ १-१-३ (३)
ॐ नमो भगवते वासुदेवाय ।
ॐ नमः पितामहाय । ॐ नमः प्रजापतिभ्यः ।
ॐ नमः कृष्णद्वैपायनाय ।
ॐ नमः सर्वविघ्नविनायकेभ्यः ॥ १-१-४ (४)
रोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको
नैमिशारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे १-१-५ (५)

सुखासीनानभ्यगच्छद्ब्रह्मर्षीन्संशितव्रतान् ।
विनयावनतो भूत्वा कदाचित्सूतनन्दनः ॥ १-१-६ (६)
तमाश्रममनुप्राप्य नैमिशारण्यवासिनः ।
ग्उवाच तानृषीन्सर्वान्धन्यो वोऽस्म्यद्यदर्शनात् १-१-७ (७)
वेद वैयासिकीः सर्वाः कथा धर्मार्यैसंहिताः ।
वक्ष्यामि वो द्विजश्रेष्ठाः शृण्वन्त्वद्य तपोधनाः १-१-८ (८)
तस्य तद्वचनं श्रुत्वा नैमिशारण्यवासिनः ।
चित्रा श्रोतुं कथास्तत्र परिव्रुस्तपस्विनः ॥ १-१-९ (९)
अभिवाद्य मुनींस्तांस्तु सर्वानेव कुताञ्जलिः ।
अपृच्छत्स तपोवृद्धिं सद्भिश्चैवाभिपूजितः ॥ १-१-१० (१०)
अथ तेषूपविष्टेषु सर्वेष्वेव तपस्विषु ।
निर्दिष्टमासनं भेजे विनयाद्रौमहर्षणिः ॥ १-१-११ (११)
सुखासीनं ततस्तं तु विश्रान्तमुपलक्ष्य च ।
अथापृच्छदृषिस्तत्र कश्चित्प्रस्तावयन्कथाः ॥ १-१-१२ (१२)
कुत आगम्यते सौते क्वचायं विहृतस्त्वया ।
कालः कमलपत्राक्ष शंसैतत्पृच्छतो मम ॥ १-१-१३ (१३)
एवं पृष्टोऽब्रवीत्सम्यग्यथावद्रौमहर्षणिः ।
वाक्यं वचनसंपन्नस्तेषां च चरिताश्रयम् ॥ १-१-१४ (१४)
तस्मिन्सदसि विस्तीर्णे मुनीनां भावितात्मनाम्। १-१-१५ (१५)
सौतिरुवाच ।
जनमेजयस्य राजर्षेः सर्पसत्रे महात्मनः ॥ १-१-१५क्ष् (१)
समीपे पार्थिवेन्द्रस्य सम्यक्पारिक्षितस्य च ।
कृष्णद्वैपायनप्रोक्ताः सुपुण्या विविधाः कथाः १-१-१६ (१६)
कथिताश्चापि विधिवद्या वैशम्पायनेन वै ।
श्रुत्वाऽहं ता विचित्रार्था महाभारतसंश्रिताः ॥ १-१-१७ (१७)
वहूनि संपरिक्रम्य तीर्थान्यायतनानि च ।
समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितम् ॥ १-१-१८ (१८)
गतवानस्मि तं देशं युद्धं यत्राभवत्पुरा ।
कुरूणां पाण्डवानां च सर्वेषां चहीक्षिताम् ॥ १-१-१९ (१९)
दिदृक्षुंरागतस्तस्मात्समीपं भावतामिह ।
आयुष्मन्तः सर्व एव ब्रह्मभाता हि मे मताः ॥
अस्मिन्यज्ञे महाभङ्गाः सूर्यपावकवर्चसः ॥ १-१-२० (२०)
कृताभिषेकाः शुचयः कृतजप्या हुताग्नयः ।
भवन्त आसते स्वस्था ब्रवीमि किमहं द्विजाः १-१-२१ (२१)
पुराणसंहिताः पुण्याः कथा धर्मार्थसंश्रिताः ।
इतिवृत्तं नरेन्द्राणामृषीणां च महात्मनाम् ॥ १-१-२२ (२२)

ऋषय ऊचुः।१-१-२३क्ष् (२)
द्वैपायनेन यत्प्रोक्तं पुराणं परमर्षिणा ।
सुरैर्ब्रह्मर्षिभिश्चैव श्रुत्वा यदभिपूजितम् ॥१-१-२३ (२३)
तस्याख्यानवरिष्ठस्य विचित्रपदपर्वणः ।
सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥१-१-२४ (२४)
भारतस्येतिहासस्य पुण्यां ग्रन्थार्थसंयुताम् ।
संस्कारोपगतां ब्राह्मीं नानाशास्त्रोपबृंहिताम् ॥१-१-२५ (२५)
जनमेजयस्य यां राज्ञो वैशम्पायन उक्तवान् ।
यथावत्स ऋषिः पृष्टः सत्रे द्वैपायनाज्ञया ॥१-१-२६ (२६)
वेदैश्चतुर्भिः सयुक्तां व्यासस्याद्भुतकर्मणः ।
संहितां श्रोतुमिच्छामः पुण्यां पापभयापहाम् ॥१-१-२७ (२७)
सौतिरुवाच।१-१-२८क्ष् (३)
आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥१-१-२८ (२८)
असच्च सच्चैव च यद्विश्वं सदसतः परम्
परावराणां स्रष्टारं पुराणं परमव्ययम् ॥ १-१-२९ (२९)
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥१-१-३० (३०)
महर्षेः पूजितस्येह सर्वलोकैर्महात्मनः ।
प्रवक्ष्यामि मतं पुण्यं व्यासस्याद्भुतकर्मणः ॥१-१-३१ (३१)
ॽनमो भगवते तस्मै व्यासायामिततेजसे ।
यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ॥१-१-३२ (३२)
सर्वाश्रमाभिशमनं सर्वतीर्थावगाहनम् ।
न तथा फलद सूते नारायणकथा यथा ॥१-१-३३ (३३)
नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान्साधयाम्यहम्'॥१-१-३४ (३४)
आचख्युः कवयः केचित्संप्रत्याचक्षते परे ।
आख्यास्यन्ति तथैवान्य इतिहासमिमं भुवि ॥१-१-३५ (३५)
इदं तु त्रिषु लोकेषु महज्ज्ञानं प्रतिष्ठितम् ।
विस्तरैश्च समासैश्च धार्यते यद्द्विजातिभिः ॥१-१-३६ (३६)
अलङ्कृतं शुभैः शब्दैः समयैर्दिव्यधनुषैः ।
छन्दोवृत्तैश्च विविधैरन्वितं विदुषांप्रियम् ॥१-१-३७ (३७)
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीसुतः ॥१-१-३८ (३८)
ॽपुण्ये हिमवतः पादे मेध्ये गिरिगुहालये ।
विशोध्य देहं धर्मात्मा दर्भसंस्तरमाश्रितः ॥१-१-३९ (३९)

शुचिः सनियमो व्यासः शान्तात्मातपसि स्थितः
भारतस्येतिहासस्य धर्मेणान्वीक्ष्य तां गतिम् ॥ १-१-४० (४०)
प्रविश्य योगं ज्ञानेन सोऽपश्यत्सर्वमन्ततः ॥ १-१-४१ (४१)
निष्प्रभेऽस्मिन्निरालोके सर्वतस्तमसा वृते ।
बृहदण्डमभूदेकं प्रजानां बीजमव्ययम् ॥१-१-४२ (४२)
युगस्यादिनिमित्तं तन्महद्दिव्यं प्रचक्षत ।
व्यस्मिंस्तच्छ्रूयते सत्यंज्योतिर्ब्रह्म सनातनम् ॥१-१-४३ (४३)
अद्भुतं चाप्यचिन्त्यं च सर्वत्र समतां मतम् ।
अव्यक्तं कारणं सूक्ष्मं यत्तत्सदसदात्मकम् ॥१-१-४४ (४४)
यस्मिन्पितामहो जज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥१-१-४५ (४५)
प्राचेतसस्तथा दक्षो दक्षपुत्राश्च सप्तवै ।
ततः प्रजानां पतयः प्राभवन्नेकविंशतिः ॥१-१-४६ (४६)
पुरुषश्चाप्रमेयात्मा यं सर्वऋषयो विदु ।
विश्वेदेवास्तथाऽऽदित्या वसवोऽथाश्विनावपि ॥१-१-४७ (४७)
यक्षाः साध्याः पिशाचाश्च गुह्यकाः पितरस्तथा ।
ततः प्रसूता विद्वांसः शिष्टा ब्रह्मर्षिसत्तमाः ॥१-१-४८ (४८)
महर्षयश्च बहवः सर्वैः समुदिता गुणैः ।
आतो द्यौः पृथिवी वायुरन्तरिक्षं दिशस्तया ॥१-१-४९ (४९)
संवत्सरर्तवो मासाः पक्षाहोरात्रयः क्रमात् ।
यच्चान्यदपि तत्सर्वं संभूतं लोकसाक्षिकम् ॥१-१-५० (५०)
यदिदं दृश्यते किंचिद्भूतं स्थावरजङ्गमम् ।
पुनःसंक्षिप्यते सर्वं जगत्प्राप्ते युगक्षये ॥१-१-५१ (५१)
यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥१-१-५२ (५२)
एवमेतदनाद्यन्तं भूतसंघातकारकम् ।
अनादिनिधनं लोके चक्रं संपरिवर्तते ॥१-१-५३ (५३)
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतानि च ।
त्रयस्त्रिंशच्च देवनां सृष्टिः संक्षेपलक्षणा ॥१-१-५४ (५४)
दिवः पुत्रो बृहद्भानुश्चक्षुरात्मा विभावसुः ।
सविता स ऋचीकोऽर्को भानुराशावहो रविः ॥१-१-५५ (५५)
पुत्रा विवस्वतः सर्वे मनुस्तेषां तथाऽवरः ।
देवभ्राट् तनयस्तस्य सुभ्राडिति ततः स्मृतः ॥१-१-५६ (५६)
सुभ्राजस्तु त्रयः पुत्राः प्रजावन्तो बहुश्रुताः ।
दशज्योतिः शतज्योतिः सहस्रज्योतिरेव च ॥१-१-५७ (५७)
दशपुत्रसहस्राणि दशज्योतेर्महात्मनः ।

ततो दशगुणाश्चान्ये शतज्योतेरिहात्मजाः ॥१-१-५८ (५८)
भूयस्ततो दशगुणाः सहस्रज्योतिषः सुताः ।
तेभ्योऽयं कुरुवंशश्च यदूनां भरतस्य च ॥१-१-५९ (५९)
ययातीक्ष्वाकुवंशश्च राजर्षीणां च सर्वशः ।
संभूता बहवो वंशा भूतसर्गाः सुविस्तराः ॥१-१-६० (६०)
भूतस्थानानि सर्वाणि रहस्यं त्रिविधं च यत् ।
वेदा योगः सविज्ञानो धर्मोऽर्थः काम एव च ॥१-१-६१ (६१)
धर्मार्थकामयुक्तानि शास्त्राणि विविधानि च ।
लोकयात्राविधान च सर्व तद्दृष्टवानृषिः ॥१-१-६२ (६२)
ग्नीतिर्भरतवंशस्य विस्तारश्चैव सर्वशः।'
इतिहासाः सहव्याख्या विविधाश्रुतयोऽपि च ॥ १-१-६३ (६३)
इह सर्वमनुक्रान्तमुक्तं ग्रन्थस्य लक्षणम् ।
ग्संक्षेपेणेतिहासस्य ततो वक्ष्यति विस्तरम् ॥' १-१-६४ (६४)
विस्तीर्यैतन्महज्ज्ञानमृषिः संक्षिप्य चाब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥१-१-६५ (६५)
मन्वादि भारतं केचिदास्तीकादि तथाऽपरे ।
तथोपरिचराद्यन्ये विप्राः सम्यगधीयिरे ॥१-१-६६ (६६)
विविधं संहिताज्ञानं दीपयन्ति मनीषिणः ।
व्याख्यातुं कुशलाः केचिद्ग्रन्थान्धारयितुं परे ॥१-१-६७ (६७)
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवतीत्सुतः ॥१-१-६८ (६८)
पराशरात्मजो विद्वान्ब्रह्मर्षिः संशितव्रतः ।
मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः ॥१-१-६९ (६९)
क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा ।
त्रीनग्नीनिव कौरव्याञ्जनयामास वीर्यवान् ॥१-१-७० (७०)
उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च ।
जगाम तपसे धीमान्पुनरेवाश्रमं प्रति ॥१-१-७१ (७१)
तेषु जातेषु वृद्धेषु गतेषु परमां गतिम् ।
अब्रवीद्भारतं लोके मानुषेऽस्मिन्महानृषिः ॥१-१-७२ (७२)
जनमेजयेन पृष्टः सन्ब्राह्मणैश्च सहस्रशः ।
शशास शिष्यमासीनं वैशम्पायनमन्तिके ॥१-१-७३ (७३)
स सदस्यैः सहासीनं श्रावयामास भारतम् ।
कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनः पुनः ॥१-१-७४ (७४)
विस्तारं कुरुवंशस्य गान्धार्या धर्मशीलताम् ।
क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सम्यग्द्वैपायनोब्रवीत् ॥१-१-७५ (७५)
वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यताम् ।

दुर्वृत्तं धार्तराष्ट्राणामुक्तवान्भगवानृषिः ॥ १-१-७६ (७६)
इदं शतसहस्रं तु श्लोकानां पुण्यकर्मणाम् ।
उपाख्यानैः सह ज्ञेयं श्राव्यं भारतमुत्तमम् ॥ १-१-७७ (७७)
चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् ।
उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः ॥ १-१-७८ (७८)
ततोऽध्यर्धशतं भूयः संक्षेपं कृतवानृषिः ।
अनुक्रमणिकाध्यायं वृत्तान्तं सर्वपर्वणाम् ॥ १-१-७९ (७९)
तस्याख्यानवरिष्ठस्य कृत्वा द्वैपायनः प्रभुः ।
कथमध्यापयानीह शिष्यानित्यन्वचिन्तयत् ॥ १-१-८० (८०)
तस्य तच्चिन्तितं ज्ञात्वा ऋषेर्द्वैपायनस्य च ।
तत्राजगाम भगवान्ब्रह्मा लोकगुरुः स्वयम् ॥ १-१-८१ (८१)
प्रीत्यर्थं तस्य चैवर्षेर्लोकानां हितकाम्यया ।
तं दृष्ट्वा विस्मितो भूत्वा प्राञ्जलिः प्रणतः स्थितः ॥ १-१-८२ (८२)
आसनं कल्पयामास सर्वैर्मुनिगणैर्वृतः ॥ १-१-८३ (८३)
हिरण्यगर्भमासीनं तस्मिंस्तु परमासने ।
परिवृत्यासनभ्याशे वासवेयः स्थितोऽभवत् ॥ १-१-८४ (८४)
अनुज्ञातोऽथ कृष्णस्तु ब्रह्मणा परमेष्ठिना ।
निषसादासनाभ्याशे प्रीयमाणः शुचिस्मितः ॥ १-१-८५ (८५)
उवाच स महातेजा ब्रह्माणं परमेष्ठिनम् ।
कृतं मयेदं भगवन्काव्यं परमपूजितम् ॥ १-१-८६ (८६)
ब्रह्मन्वेदरहस्य च यच्चान्यत्स्थापितं मया ।
साङ्गोपनिषदां चैव वेदानां विस्तरक्रिया ॥ १-१-८७ (८७)
इतिहासपुरापानामुन्मेषं निमिषं च यत् ।
भूतं भव्यं भविष्यच्च त्रिविधं कालसंज्ञितम् ॥ १-१-८८ (८८)
जरामृत्युभयव्याधिभावाभावविनिश्चयः ।
विविधस्य च धर्मस्य ह्याश्रमाणां च लक्षणम् ॥ १-१-८९ (८९)
चातुर्वर्ण्यविधानं च पुराणानां च कृत्स्नशः ।
तपसो ब्रह्मचर्यस्य पृथिव्याश्चन्द्रसूर्ययोः ॥ १-१-९० (९०)
ग्रहनक्षत्रताराणां प्रमाणं च युगैः सह ।
ऋचो यजूषि सामानि वेदाध्यात्मं तथैव च ॥ १-१-९१ (९१)
न्यायशिक्षा चिकित्सा च दानं पाशुपतं तथा ।
इति नैकाश्रयं जन्म दिव्यमानुषसंज्ञितम् ॥ १-१-९२ (९२)
तीर्थानां चैव पुण्यानां देशानां चैव कीर्तनम् ।
नदीनां पर्वतानां च वनानां सागरस्य च ॥ १-१-९३ (९३)
पुराणां चैव दिव्यानां कल्पानां युद्धकौशलम् ।
वाक्यजातिविशेषाश्च लोकयात्राक्रमश्च यः ॥ १-१-९४ (९४)

यच्चापि सर्वगं वस्तु तच्चैव प्रतिपादितम् ।
परं न लेखकः कश्चिदेतस्य भुवि विद्यते ॥१-१-९५ (९५)
ब्रह्मोवाच। १-१-९६क्ष् (४)
तपोविशिष्टदपि वै वसिष्ठान्मुनिपुंगवात् ।
मन्ये श्रेष्ठव्यं त्वां वै रहस्यज्ञानवेदनात् ॥१-१-९६ (९६)
जन्मप्रभृति सत्यां ते वेद्मि गां ब्रह्मवादिनीम् ।
त्वयाच काव्यमित्युक्तं तस्मात्काव्यं भविष्यति ॥१-१-९७ (९७)
अस्य काव्यस्य कवयो न समर्था विशेषणे ।
विशेषणे गृहस्थस्य शेषास्त्रय इवाश्रमाः ॥१-१-९८ (९८)
ग्जडान्धबधिरोन्मत्तं तमोभूतं जगद्भवेत् ।
यदि ज्ञानहुताशेन त्वया नोज्ज्वलियं भवेत् ॥१-१-९९ (९९)
तमसान्धस्य लोकस्य वेष्टितस्य स्वकर्मभिः ।
ज्ञानाञ्जनशलाकाभिर्बुद्धिनेत्रोत्सवः कृतः'॥१-१-१०० (१००)
धर्मार्थकाममोक्षार्थैः समासव्यासकीर्तनैः ।
त्वया भारतसूर्येण नृणां विनिहतं तमः ॥१-१-१०१ (१०१)
पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाप्रकाशिना ।
नृणां कुमुदसौम्यानां कृतं बुद्धिप्रसादनम् ॥१-१-१०२ (१०२)
इतिहासप्रदीपेन मोहावरणघातिना ।
लोकगर्भगृहं कृत्स्नं यथावत्संप्रकाशितम् ॥१-१-१०३ (१०३)
संग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान् ।
संभवस्कन्धविस्तारः सभापर्वविटङ्कवान् ॥१-१-१०४ (१०४)
आरण्यपर्वरूपाढ्यो विराटोद्योगसारवान् ।
भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ॥१-१-१०५ (१०५)
कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगन्धिभिः ।
स्त्रीपर्वैषीकविश्रामः शान्तिपर्वमहाफलः ॥१-१-१०६ (१०६)
अश्वमेधामृतसस्त्वाश्रमस्थानसंश्रयः ।
मौसलश्रुतिसंक्षेपः शिष्टद्विजनिषेवितः ॥१-१-१०७ (१०७)
सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति ।
पर्जन्यइव भूतानामक्षयो भारद्रुमः ॥१-१-१०८ (१०८)
काव्यस्य लेखनार्थाय गणेशः स्मर्यतां मुने। १-१-१०९ (१०९)
सौतिरुवाच। १-१-११०क्ष् (५)
एवमाभाष्य तं ब्रह्मा जगाम स्वं निवेशनम् ।
भगवान्स जगत्स्रष्टा ऋषिदेवगणैः सह ॥१-१-११० (११०)
ततः सस्मार हेरम्बं व्यासः सत्यवतीसुतः ॥ १-१-१११ (१११)
स्मृतमात्रो गणेशानो भक्तचिन्तितपूरकः ।
तत्राजगाम विघ्नेशो वेदव्यासो यतः स्थितः ॥१-१-११२ (११२)

पूजितश्चोपविष्टश्च व्यासेनोक्तस्तदानघ ।
लेखको भारतस्यास्य भव त्वं गणनायक ॥
मयैव प्रोच्यमानस्य मनसा कल्पितस्य च ॥ १-१-११३ (११३)
श्रुत्वैतत्प्राह विघ्नेशो यदि मे लेखनी क्षणम् ।
लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहम् ॥ १-१-११४ (११४)
व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ।
ओमित्युक्त्वा गणेशोपि बभूव किल लेखकः ॥ १-१-११५ (११५)
ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात् ।
यस्मिन्प्रतिज्ञया प्राह मुनिर्द्वैपायनस्त्विदम् ॥ १-१-११६ (११६)
अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च ।
अहं वेद्मि शुको वेत्ति संजयो वेत्ति वा न वा ॥ १-१-११७ (११७)
तच्छ्लोककूटमद्यापि ग्रथितं सुदृढं मुने ।
भेत्तुं न शक्यतेऽर्थस्यं गूढत्वात्प्रश्रितस्य च ॥ १-१-११८ (११८)
सर्वज्ञोपि गणेशो यत्क्षणमास्ते विचारयन् ।
तावच्चकार व्यासोपि श्लोकानन्यान्बहूनपि ॥ १-१-११९ (११९)
तस्य वृक्षस्य वक्ष्यामि शाखापुष्पफलोदयम् ।
स्वादुमेध्यरसोपेतमच्छेद्यममरैरपि ॥ १-१-१२० (१२०)
अनुक्रमणिकाध्यायं वृत्तान्तं सर्वपर्वणाम् ।
इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकम् ॥ १-१-१२१ (१२१)
ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ प्रभु
षष्टिं शतसहस्राणि चकारान्यां स संहिताम् ।
त्रिंशच्छतसहस्रं च देवलोके प्रतिष्ठितम् ॥ १-१-१२२ (१२२)
पित्र्ये पञ्चदश प्रोक्तं रक्षोयक्षे चतुर्दश ।
एकं शतसहस्रं तु मानुषेषु प्रतिष्ठितम् ॥ १-१-१२३ (१२३)
नारदोऽश्रावयद्देवानसितो देवलः पितृन् ।
गन्धर्वयक्षरक्षांसि श्रावयामास वै शुकः ॥ १-१-१२४ (१२४)
ग्वैशम्पायनविप्रर्षिः श्रावयामास पार्थिवम् ।
पारिक्षितं महात्मानं नाम्ना तु जनमेजयम्'॥ १-१-१२५ (१२५)
अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् ।
शिष्यो व्यासस्य धर्मात्मा सर्ववेदविदां वरः ॥ १-१-१२६ (१२६)
एकं शतसहस्रं तु मयोक्तं वै निबोधत ॥ १-१-१२७ (१२७)
दुर्योधनो मन्युमयो महाद्रुमः
कर्णः स्कन्धः शकुनिस्तस्य शाखाः ।
दुश्शासनः पुष्पफले समृद्धे
मूलं राजा धृतराष्ट्रोऽमनीषि। १-१-१२८ (१२८)
युधिष्ठिरे धर्ममयो महाद्रुमः

स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः ।
माद्रीसुतौ पुष्पफले समृद्धे
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ॥ १-१-१२९ (१२९)
पाण्डुर्जित्वा बहून्देशान्युधा विक्रमणेन च ।
अरण्ये मृगयाशीलो न्यवसत्सजनस्तथा ॥ १-१-१३० (१३०)
मृगव्यवायनिधनात्कृच्छ्रां प्राप स आपदम् ।
जन्मप्रभृति पार्थानां तत्राचारविधिक्रमः ॥ १-१-१३१ (१३१)
मात्रोरभ्युपपत्तिश्च धर्मोपनिषदं प्रति ।
धर्मानिलेन्द्रांस्ताभिः साऽऽजुहाव सुतवाञ्छया ॥ १-१-१३२ (१३२)
ग्ततो धर्मोपनिषदं भूत्वा भर्तुः प्रिया पृथा ।
धर्मानिलेन्द्रांस्ताभिः साऽऽजुहाव सुतवाञ्छया ॥ १-१-१३३ (१३३)
तद्दत्तोपनिषन्माद्री चाश्विनावाजुहाव च ।
जाताः पार्थास्ततः सर्वे कुन्त्या माद्र्याश्च मन्त्रतः ।'
तापसैः सह संवृद्धा मातृभ्यां परिरक्षिताः ॥ १-१-१३४ (१३४)
मेध्यारण्येषु पुण्येषु महतामाश्रमेषु च ।
ग्तेषु जातेषु सर्वेषु पाण्डवेषु महात्मसु ॥ १-१-१३५ (१३५)
माद्र्या तु सह संगम्य ऋषिशापप्रभावतः ।
मृतः पाण्डुर्महापुण्ये शतशृङ्गे महागिरौ ॥' १-१-१३६ (१३६)
ऋषिभिश्च समानीता धार्तराष्ट्रान्प्रति स्वयम् ।
शिशवश्चाभिरूपाश्च जटिला ब्रह्मचारिणः ॥ १-१-१३७ (१३७)
पुत्राश्च भ्रातरश्चेमे शिष्याश्च सुहृदश्च वः ।
पाण्डवा एत इत्युक्त्वा मुनयोऽन्तर्हितास्ततः ॥ १-१-१३८ (१३८)
तांस्तैर्निवेदितान्दृष्ट्वा पाण्डवान्कौरवास्तदा ।
शिष्टाश्च वर्णाः पौरा ये ते हर्षाच्चुक्रुशुर्भृशम् ॥ १-१-१३९ (१३९)
आहुः केचिन्न तस्यैते तस्यैत इति चापरे ।
यदा चिरमृतः पाण्डुः कथं तस्येतदि चापरे ॥ १-१-१४० (१४०)
स्वागतं सर्वथा दिष्ट्या पाण्डोः पश्याम सन्ततिम् ।
उच्यतां स्वागतमिति वाचोऽश्रूयन्त सर्वशः ॥ १-१-१४१ (१४१)
तस्मिन्नुपरते शब्दे दिशः सर्वा निनादयन् ।
अन्तर्हितानां भूतानां निःस्वनस्तुमुलोऽभवत् ॥ १-१-१४२ (१४२)
पुष्पवृष्टिः शुभा गन्धाः शङ्खदुन्दुभिनिःस्वनाः ।
आसन्प्रवेशे पार्थानां तदद्भुतमिवाभवत् ॥ १-१-१४३ (१४३)
तत्प्रीत्या चैव सर्वेषां पौराणां हर्षसंभवः ।
शब्द आसीन्महांस्तत्र दिवस्पृक्कीर्तिवर्धनः ॥ १-१-१४४ (१४४)
तेऽधीत्य निखिलान्वेदाञ्शास्त्राणि विविधानि च ।
न्यवसन्पाण्डवास्तत्र पूजिता अकुतोभयाः ॥ १-१-१४५ (१४५)

युधिष्ठिरस्य शौचेन प्रीताः प्रकृतयोऽभवन् ।
धृत्या च भीमसेनस्य विक्रमेणार्जुनस्य च ॥ १-१-१४६ (१४६)
गुरुशुश्रूषया कुन्त्या यमयोर्विनयेन च ।
तुतोष लोकः सकलस्तेषां शौर्यगुणेन च ॥ १-१-१४७ (१४७)
समवाये ततो राज्ञां कन्यां भर्तृस्वयंवराम् ।
प्राप्तवानर्जुनः कृष्णां कृत्वा कर्म सुदुष्करम् ॥ १-१-१४८ (१४८)
ततः प्रभृति लोकेऽस्मिन्पूज्यः सर्वधनुष्मताम् ।
आदित्य इव दुष्प्रेक्ष्यः समरेष्वपि चाभवत् ॥ १-१-१४९ (१४९)
स सर्वान्पार्थिवाञ्जित्वा सर्वांश्च महतो गणान् ।
आजहारार्जुनो राज्ञो राजसूयं महाक्रतुम् ॥ १-१-१५० (१५०)
अन्नवान्दक्षिणावांश्च सर्वैः समुदितो गुणैः ।
युधिष्ठिरेण संप्राप्तो राजसूयो महाक्रतुः ॥ १-१-१५१ (१५१)
सुनयाद्वासुदेवस्य भीमार्जुनबलेन च ।
घातयित्वा जरासन्धं चैद्यं च बलगर्वितम् ॥ १-१-१५२ (१५२)
दुर्योधनं समागच्छन्नर्हणानि ततस्ततः ।
मणिकाञ्चनरत्नानि गोहस्त्यश्वधनानि च ॥ १-१-१५३ (१५३)
विचित्राणि च वासांसि प्रावारावरणानि च ।
कम्बलाजिनरत्नानि राङ्कवास्तरणानि च ॥ १-१-१५४ (१५४)
समृद्धां तां तथा दृष्ट्वा पाण्डवानां तदा श्रियम् ।
ईर्ष्यासमुत्थः सुमहांस्तस्य मन्युरजायत ॥ १-१-१५५ (१५५)
विमानप्रतिमां तत्र मयेन सुकृतां सभाम् ।
पाण्डवानामुपहृतां स दृष्ट्वा पर्यतप्यत ॥ १-१-१५६ (१५६)
तत्रावहसितश्चासीत्प्रस्कन्दन्निव संभ्रमात् ।
प्रत्यक्षं वासुदेवस्य भीमेनानभिजातवत् ॥ १-१-१५७ (१५७)
स भोगान्विविधान्भुञ्जन्रत्नानि विविधानि च ।
कथितो धृतराष्ट्रस्य विवर्णो हरिणः कृशः ॥ १-१-१५८ (१५८)
अन्वजानात्ततो द्यूतं धृतराष्ट्रः सुतप्रियः ।
तच्छ्रुत्वा वासुदेवस्य कोपः समभवन्महान् ॥ १-१-१५९ (१५९)
नातिप्रीतमनाश्चासीद्विवादांश्चान्वमोदत ।
द्यूतादीननयान्घोरान्विविधांश्चाप्युपैक्षत ॥ १-१-१६० (१६०)
निरस्य विदुरं भीष्मं द्रोणं शारद्वतं कृपम् ।
विग्रहे तुमुले तस्मिन्दहन्क्षत्रं परस्परम् ॥ १-१-१६१ (१६१)
जयत्सु पाण्डुपुत्रेषु श्रुत्वा सुमहदप्रियम् ।
दुर्योधनमतं ज्ञात्वा कर्णस्य शकुनेस्तथा ॥ १-१-१६२ (१६२)
धृतराष्ट्रश्चिरं ध्यात्वा संजयं वाक्यमब्रवीत् ।
शृणु संजय सर्वं मे नचासूयितुमर्हसि ॥ १-१-१६३ (१६३)

श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसंमतः ।
न विग्रहे मम मतिर्न च प्रीये कुलक्षये ॥ १-१-१६४ (१६४)
न मे विशेषः पुत्रेषु स्वेषु पाम्डुसुतेषु वा ।
वृद्धं मामभ्यसूयन्ति पुत्रा मन्युपरायणाः ॥ १-१-१६५ (१६५)
अहं त्वचक्षुः कार्पण्यात्पुत्रप्रीत्या सहामि तत् ।
मुह्यन्तं चानुमुह्यामि दुर्योधनमचेतनम् ॥ १-१-१६६ (१६६)
राजसूये श्रियं दृष्ट्वा पाण्डवस्य महौजसः ।
तच्चावहसनं प्राप्य सभारोहणदर्शने ॥ १-१-१६७ (१६७)
अमर्षितः स्वयं जेतुमशक्तः पाण्डवान्रणे ।
निरुत्साहश्च संप्राप्तुं सुश्रियं क्षत्रियोऽपि सन् ॥ १-१-१६८ (१६८)
गान्धारराजसहितश्छद्मद्यूतममन्त्रयत् ।
तत्र यद्यद्यथा ज्ञातं मयां संजय तच्छृणु ॥ १-१-१६९ (१६९)
श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः ।
ततो ज्ञास्यसि मां सौते प्रज्ञाटचक्षुषमित्युत ॥ १-१-१७० (१७०)
यदाऽश्रौषं धनुरायम्य चित्रं
विद्धं लक्ष्यं पातितं वै पृथिव्याम् ।
कृष्णां हृतां प्रेक्षतां सर्वराज्ञां
तदा नाशंसे विजयाय संजय ॥ १-१-१७१ (१७१)
यदाऽश्रौषं द्वारकायां सुभद्रां
प्रसह्योढां माधवीमर्जुनेन ।
इन्द्रप्रस्थं वृष्णिवीरौ च यातौ
तदा नाशंसे विजयाय संजय ॥ १-१-१७२ (१७२)
यदाऽश्रौषं देवराजं प्रवृष्टं
शरैर्दिव्यैर्वारितं चार्जुनेन ।
अग्निं तथा तर्पितं खाण्डवे च
तदा नाशंसे विजयाय संजय ॥ १-१-१७३ (१७३)
यदाऽश्रौषं जातुषाद्वेश्मनस्ता-
न्मुक्तान्पार्थान्पञ्च कुन्त्या समेतान् ।
युक्तं चैषां विदुरं स्वार्थसिद्ध्यै
तदा नाशंसे विजयाय संजय ॥ १-१-१७४ (१७४)
यदाऽश्रौषं द्रौपदीं रङ्गमध्ये
लक्ष्यं भित्त्वा निर्जितामर्जुनेन ।
शूरान्पञ्चालान्पाण्डवेयांश्च युक्तां-
स्तदा नाशंसे विजयाय संजय ॥ १-१-१७५ (१७५)
यदाऽश्रौषं मागधानां वरिष्ठं
जरासन्धं क्ष्वमध्ये ज्वलन्तम् ।

दोर्भ्यां हतं भीमसेनेन गत्वा
तदा नाशंसे विजयाय संजय ॥ १-१-१७६ (१७६)
यदाऽश्रौषं दिग्जये पाण्डुपुत्रै-
र्वशीकृतान्भूमिपालान्प्रसह्य ।
महाक्रतुं राजसूयं कृतं च
तदा नाशंसे विजयाय संजय ॥ १-१-१७७ (१७७)
यदाऽश्रौषं द्रौपदीमश्रुकण्ठीं
सभां नीतां दुःखितामेकवस्त्राम् ।
रजस्वलां नाथवतीमनाथव-
त्तदा नाशंसे विजयाय संजय ॥ १-१-१७८ (१७८)
यदाऽश्रौषं वाससां तत्र राशिं
समाक्षिपत्कितवो मन्दबुद्धिः ।
दुःशासनो गतवान्नैवं चान्तं
तदा नाशंसे विजयाय संजय ॥ १-१-१७९ (१७९)
यदाऽश्रौषं हृतराज्यं युधिष्ठिरं
पराजितं सौबलेनाक्षवत्याम् ।
अन्वागतं भ्रातृभिरप्रमेयै-
स्तदा नाशंसे विजयाय संजय ॥ १-१-१८० (१८०)
यदाश्रौषं विविधास्तत्र चेष्टा
धर्मात्मनां प्रस्थितानां वनाय ।
ज्येष्ठप्रीत्या क्लिश्यतां पाण्डवानां
तदा नाशंसे विजयाय संजय ॥ १-१-१८१ (१८१)
यदाऽश्रौषं स्नातकानां सहस्रै-
रन्वागतं धर्मराजं वनस्थम् ।
भिक्षाभुजां ब्राह्मणानां महात्मनां
तदा नाशंसे विजयाय संजय ॥ १-१-१८२ (१८२)
ग्यदाऽश्रौषं वनवासेन पार्था-
न्समागतान्महर्षिभिः पुराणैः ।
उपास्यमानान्सगणैर्जातसख्यां-
स्तदा नाशंसे विजयाय संजर्य ॥' १-१-१८४ (१८३)
यदाश्रौषं त्रिदिवस्थं धनंजयं
शक्रात्साक्षाद्दिव्यमस्त्रं यथावत् ।
अधीयानं शंसितं सत्यसन्धं
तदा नाशंसे विजयाय संजय ॥ १-१-१८५ (१८४)
यदाऽश्रोषं कालकेयास्ततस्ते
पौलोमानो वरदानाच्च दृप्ताः ।

देवैरजेया निर्जिताश्चार्जुनेन
तदा नाशंसे विजयाय संजय ॥ १-१-१८६ (१८५)
यदाऽश्रौषमसुराणां वधार्थे
किरीटिनं यान्तममित्रकर्शनम् ।
कृतार्थं चाप्यागतं शक्रलोका-
त्तदा नाशंसे विजयाय संजय ॥ १-१-१८७ (१८६)
ग्यदाऽश्रौषं तीर्थयात्राप्रवृत्तं
पाण्डोः सुतं सहितं लोमशेन ।
बृहदश्वादक्षहृदयं च प्राप्तं
तदा नाशंसे विजयाय संजय ॥' १-१-१८८ (१८७)
यदाऽश्रौषं वैश्रवणेन सार्धं
समागतं भीमन्यांश्च पार्थान् ।
तस्मिन्देशे मानुषाणामगम्ये
तदा नाशंसि विजयाय संजया ॥ १-१-१८९ (१८८)
यदाऽश्रौषं घोषयात्रागतानां
बन्धं गन्धर्वैर्मोक्षणं चार्जुनेन ।
स्वेषां सुतानां कर्णबुद्धौ रतानां
तदा नाशंसे विजयाय संजय ॥ १-१-१९० (१८९)
यदाऽश्रौषं यक्षरूपेण धर्मं
समागतं धर्मराजेन सूत ।
प्रश्नान्कांश्चिद्विब्रुवाणं च सम्यक्
तदा नाशंसे विजयाय संजय ॥ १-१-१९१ (१९०)
यदाऽश्रौषं न विदुर्मामकास्तान्
प्रच्छन्नरूपान्वसतः पाण्डवेयान् ।
विराटराष्ट्रे सह कृष्णया च
तदा नाशंसे विजयाय संजय ॥ १-१-१९२ (१९१)
ग्यदाऽश्रौषं कीचकानां वरिष्ठं
निषूदितं भ्रातृशतेन सार्धम् ।
द्रौपद्यर्थे भीमसेनेन सङ्ख्ये
तदा नाशंसे विजयाय संजय ॥' १-१-१९३ (१९२)
यदाऽश्रौषं मामकानां वरिष्ठा-
न्धनंजयेनैकरथेन भग्नान् ।
विराटराष्ट्रे वसता महात्मना
तदा नाशंसे विजयाय संजय ॥ १-१-१९४ (१९३)
यदाऽश्रौषं सत्कृतं मत्स्यराज्ञा
सुतां दत्तामुत्तरामर्जुनाय ।

तां चार्जुनः प्रत्यगृह्णात्सुतार्थे
तदा नाशंसे विजयाय संजय ॥ १-१-१९५ (१९४)
यदाऽश्रौषं निर्जितस्याधनस्य
प्रव्राजितस्य स्वजनात्प्रच्युतस्य ।
अक्षौहिणीः सप्त युधिष्ठिरस्य
तदा नाशंसे विजयाय संजय ॥१९६ ॥ १-१-१९६ (१९५)
यदाऽश्रौषं माधवं वासुदेवं
सर्वात्मना पाण्डवार्थे निविष्टम् ।
यस्येमां गां विक्रममेकमाहु-
स्तदा नाशंसे विजयाय संजय ॥ १-१-१९७ (१९६)
यदाऽश्रौषं नरनारायणौ तौ
कृष्णार्जुनौ वदतो नारदस्य ।
अहं द्रष्टा ब्रह्मलोके च सम्यक्
तदा नाशंसे विजयाय संजय ॥ १-१-१९८ (१९७)
यदाऽश्रौषं लोकहिताय कृष्णं
शमार्थिनमुपयातं कुरूणाम् ।
शमं कुर्वाणमकृतार्थं च यातं
तदा नाशंसे विजयाय संजय ॥१९९ ॥ १-१-१९९ (१९८)
यदाऽश्रौषं कर्णदुर्योधनाभ्यां
बुद्धिं कृतां निग्रहे केशवस्य ।
तं चात्मानं बहुधा दर्शयानं
तदा नाशंसे विजयाय संजय ॥ १-१-२०० (१९९)
यदाऽश्रौषं वासुदेवे प्रयाते
रथस्यैकामग्रतस्तिष्ठमानाम् ।
आर्तां पृथां सान्त्वितां केशवेन
तदा नाशंसे विजयाय संजय ॥ १-१-२०१ (२००)
यदाऽश्रौषं मन्त्रिणं वासुदेवं
तथा भीष्मं शान्तनवं च तेषाम् ।
भारद्वाजं चाशिषोऽनुब्रुवाणं
तदा नाशंसे विजयाय संजय ॥ १-१-२०२ (२०१)
यदा कर्णो भीष्ममुवाच वाक्यं
नाहं योत्स्ये युध्यमाने त्वयीति ।
हित्वा सेनामपचक्राम चापि
तदा नाशंसे विजयाय संजय ॥ १-१-२०३ (२०२)
यदाऽश्रौषं वासुदेवार्जुनौ तौ
तथा धनुर्गाण्डिवमप्रमेयम् ।

त्रीण्युग्रवीर्याणि समागतानि
तदा नाशंसे विजयाय संजय ॥ १-१-२०४ (२०३)
यदाऽश्रौषं कश्मलेनाभिपन्ने
रथोपस्थे सीदमानेऽर्जुने वै ।
कृष्णं लोकान्दर्शयानं शरीरे
तदा नाशंसे विजयाय संजय ॥ १-१-२०५ (२०४)
यदाऽश्रौषं भीष्ममित्रकर्शनं
निघ्नन्तमाजावयुतं रथानाम् ।
नैषां कश्चिद्वध्यते ख्यातरूप-
स्तदा नाशंसे विजयाय संजय ॥ १-१-२०६ (२०५)
यदाऽश्रौषं चापगेयेन सङ्ख्ये
स्वयं मृत्युं विहितं धार्मिकेण ।
तच्चाकार्षुः पाण्डवेयाः प्रहृष्टा-
स्तदा नाशंसे विजयाय संजय ॥ १-१-२०७ (२०६)
यदाऽश्रौषं भीष्ममत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
शिखण्डिनं पुरतः स्थापयित्वा
तदा नाशंसे विजयाय संजय ॥ १-१-२०८ (२०७)
यदाऽश्रौषं शरतल्पे शयानं
वृद्धं वीरं सादितं चित्रपुङ्खैः ।
भीष्मं कृत्वा सोमकानल्पशेषां-
स्तदा नाशंसे विजयाय संजय ॥ १-१-२०९ (२०८)
यदाऽश्रौषं शान्तनवे शयाने
पानीयार्थे चोदितेनार्जुनेन ।
भूमिं भित्त्वा तर्पितं तत्र भीष्मं
तदा नाशंसे विजयाय संजय ॥ १-१-२१० (२०९)
यदाश्रौषं शुक्रसूर्यौ च युक्तौ
कौन्तेयानामनुलोमौ जयाय ।
नित्यं चास्माञ्श्वापदा भीषयन्ति
तदा नाशंसे विजयाय संजय ॥ १-१-२११ (२१०)
यदा द्रोणो विविधानस्त्रमार्गा-
न्निदर्शयन्समरे चित्रयोधी ।
न पाण्डवाञ्श्रेष्ठतरान्निहन्ति
तदा नाशंसे विजयायं संजय ॥ १-१-२१२ (२११)
यदाऽश्रौषं चास्मदीयान्महारथा-
न्व्यवस्थितानर्जुनस्यान्तकाय ।

संशप्तकान्निहतानर्जुनेन
तदा नाशंसे विजयाय संजय ॥ १-१-२१३ (२१२)
यदाऽश्रौषं व्यूहमभेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् ।
भित्त्वा सौभद्रं वीरमेकं प्रविष्टं
तदा नाशंसे विजयाय संजय ॥ १-१-२१४ (२१३)
यदाऽभिमन्युं परिवार्य बालं
सर्वे हत्त्वा हृष्टरूपा बभूवुः ।
महारथाः पार्थमशक्नुवन्त-
स्तदा नाशंसे विजयाय संजय ॥ १-१-२१५ (२१४)
यदाऽश्रौषमभिमन्युं निहत्य
हर्षान्मूढान्क्रोशतो धार्तराष्ट्रान् ।
क्रोधादुक्तं सैन्धवे चार्जुनेन
तदा नाशंसे विजयाय संजय ॥ १-१-२१६ (२१५)
यदाऽश्रौषं सैन्धवार्थे प्रतिज्ञां
प्रतिज्ञातां तद्वधायार्जुनेन ।
सत्यां तीर्णां शत्रुमध्ये च तेन
तदा नाशंसे विजयाय संजय ॥ १-१-२१७ (२१६)
यदाऽश्रौषं श्रान्तहये धनंजये
मुक्त्वा हयान्पाययित्वोपवृत्तान् ।
पुनर्युक्त्वा वासुदेवं प्रयातं
तदा नाशंसे विजयाय संजय ॥ १-१-२१८ (२१७)
यदाऽश्रौषं वाहनेष्वक्षमेषु
रथोपस्थे तिष्ठता पाण्डवेन ।
सर्वान्योधान्वारितानर्जुनेन
तदा नाशंसे विजयाय संजय ॥ १-१-२१९ (२१८)
यदाऽश्रौषं नागबलैः सुदुःसहं
द्रोणानीकं युयुधानं प्रमथ्य ।
यातं वार्ष्णेयं यत्र तौ कृष्णपार्थौ
तदा नाशंसे विजयाय संजय ॥ १-१-२२० (२१९)
यदाऽश्रौषं कर्णमासाद्य मुक्तं
वधाद्भीमं कुत्सयित्वा वचोभिः ।
धनुष्कोट्याऽऽतुद्य कर्णेन वीरं
तदा नाशंसे विजयाय संजय ॥ १-१-२२१ (२२०)
यदा द्रोणः कृतवर्मा कृपश्च
कर्णो द्रौणिर्मद्रराजश्च शूरः ।

अमर्षयन्सैन्धवं वध्यमानं
तदा नाशंसे विजयाय संजय ॥ १-१-२२२ (२२१)
यदाऽश्रौषं देवराजेन दत्तां
दिव्यां शक्तिं व्यंसितां माधवेन ।
घटोत्कचे राक्षसे घोररूपे
तदा नाशंसे विजयाय संजय ॥ १-१-२२३ (२२२)
यदाऽश्रौषं कर्णघटोत्कचाभ्यां
युद्धे मुक्तां सूतपुत्रेण शक्तिम् ।
यया वध्यः समरे सव्यसाची
तदा नाशंसे विजयाय संजय ॥ १-१-२२४ (२२३)
यदाऽश्रौषं द्रोणमाचार्यमेकं
धृष्टद्युम्नेनाभ्यतिक्रम्य धर्मम् ।
रथोपस्थे प्रायगतं विशस्तं
तदा नाशंसे विजयाय संजय ॥ १-१-२२५ (२२४)
यदाऽश्रौषं द्रौणिना द्वैरथस्थं
माद्रीसुतं नकुलं लोकमध्ये ।
समं युद्धे मण्डलेभ्यश्चरन्तं
तदा नाशंसे विजयाय संजय ॥ १-१-२२६ (२२५)
यदा द्रोणे निहते द्रोणपुत्रो
नारायणं दिव्यमस्त्रं विकुर्वन् ।
नैषामन्तं गतवान्पाण्डवानां
तदा नाशंसे विजयाय संजय ॥ १-१-२२७ (२२६)
यदाऽश्रौषं भीमसेनेन पीतं
रक्तं भ्रातुर्युधि दुःशासनस्य ।
निवारितं नान्यतमेन भीमं
तदा नाशंसे विजयाय संजय ॥ १-१-२२८ (२२७)
यदाऽश्रौषं कर्णमत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
तस्मिन्भ्रातृणां विग्रहे देवगुह्ये
तदा नाशंसे विजयाय संजय ॥ १-१-२२९ (२२८)
यदाऽश्रौषं द्रोणपुत्रं च शूरं
दुःशासनं कृतवर्माणमुग्रम् ।
युधिष्ठिरं धर्मराजं जयन्तं
तदा नाशंसे विजयाय संजय ॥ १-१-२३० (२२९)
यदाऽश्रौषं निहतं मद्रराजं
रणे शूरं धर्मराजेन सूत ।

सदा सङ्ग्रामे स्प्रधते यस्तु कृष्णं
तदा नाशंसे विजयाय संजय ॥ १-१-२३१ (२३०)
यदाऽश्रौषं कलहद्यूतमूलं
मायाबलं सौबलं पाण्डवेन ।
हतं सङ्ग्रामे सहदेवेन पापं
तदा नाशंसे विजयाय संजय ॥ १-१-२३२ (२३१)
यदाऽश्रौषं श्रान्तमेकं शयानं
ह्रदं गत्वा स्तम्भयित्वा तदम्भः ।
दुर्योधनं विरथं भग्नशक्तिं
तदा नाशंसे विजयाय संजय ॥ १-१-२३३ (२३२)
यदाऽश्रौषं पाण्डवांस्तिष्ठमानान्
गत्वा ह्रदे वासुदेवेन सार्धम् ।
अमर्षणं धर्षयतः सुतं मे
तदा नाशंसे विजयाय संजय ॥ १-१-२३४ (२३३)
यदाऽश्रौषं विविधांश्चित्रमार्गान्
गदायुद्धे मण्डलशश्चरन्तम् ।
मिथ्या हतं वासुदेवस्य बुद्ध्या
तदा नाशंसे विजयाय संजय ॥ १-१-२३५ (२३४)
यदाऽश्रौषं द्रोणपुत्रादिभिस्तै-
र्हतान्पञ्चालान्द्रौपदेयांश्च सुप्तान् ।
कृतं बीभत्समयशस्यं च कर्म
तदा नाशंसे विजयाय संजय ॥ १-१-२३६ (२३५)
यदाऽश्रौषं भीमसेनानुयाते-
नाश्वत्थाम्ना परमास्त्रं प्रयुक्तम् ।
क्रुद्धेनैषीकमवधीद्येन गर्भं
तदा नाशंसे विजयाय संजय ॥ १-१-२३७ (२३६)
यदाऽश्रौषं ब्रह्मशिरोऽर्जुनेन
स्वस्तीत्युक्त्वाऽस्त्रमस्त्रेण शान्तम् ।
अश्वत्थाम्ना मणिरत्नं च दत्तं
तदा नाशंसे विजयाय संजय ॥ १-१-२३८ (२३७)
यदाऽश्रौषं द्रोणपुत्रेण गर्भे
वैराट्या वै पात्यमाने महास्त्रैः ।
संजीवयामीति हरेः प्रतिज्ञां
तदा नाशंसे विजयाय संजय ॥ १-१-२३९ (२३८)
द्वैपायनः केशवो द्रोणपुत्रं
परस्परेणाभिशापैः शशाप ।

बुद्ध्वा चाहं बुद्धिहीनोऽद्य सूत
संतप्ये वै पुत्रपौत्रैश्च हीनः ॥ १-१-२४० (२३९)
शोच्या गान्धारी पुत्रपौत्रैर्विहीना
तथा वध्वा पितृभिर्भ्रातृभिश्च ।
कृतं कार्यं दुष्करं पाण्डवेयैः
प्राप्तं राज्यमसपत्नं पुनस्तैः ॥ १-१-२४१ (२४०)
कष्टं युद्धे दश शेषाः श्रुता मे
त्रयोऽस्माकं पाण्डवानां च सप्त ।
द्व्यूना विंशतिराहताऽक्षौहिणीनां
तस्मिन्सङ्ग्रामे भैरवे क्षत्रियाणाम् ॥ १-१-२४२ (२४१)
तमस्त्वतीव विस्तीर्णं मोह आविशतीव माम् ।
संज्ञां नोपलभे सूत मनो विह्वलतीव मे ॥ १-१-२४३ (२४२)
सौतिरुवाच । १-१-२४४क्ष् (६)
इत्युक्त्वा धृतराष्ट्रोऽथ विलप्य बहु दुःखितः ।
मूर्च्छितः पुनराश्वस्तः संजयं वाक्यमब्रवीत् ॥ १-१-२४४ (२४३)
धृतराष्ट्र उवाच । १-१-२४५क्ष् (७)
संजयैवं गते प्राणांस्त्यक्तुमिच्छामि मा चिरम् ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ॥ १-१-२४५ (२४४)
सौतिरुवाच । १-१-२४६क्ष् (८)
तं तथा वादिनं दीनं विलपन्तं महीपतिम् ।
निःश्वसन्तं यथा नागं मुह्यमानं पुनः पुनः ॥ १-१-२४६ (२४५)
गावल्गणिरिदं धीमान्महार्थं वाक्यमब्रवीत् । १-१-२४७ (२४६)
संजय उवाच ।
श्रुतवानसि वै राजन्महोत्साहान्महाबलान् ॥ १-१-२४७क्ष् (९)
द्वैपायनस्य वदतो नारदस्य च धीमतः ।
महत्सु राजवंशेषु गुणैः समुदितेषु च ॥ १-१-२४८ (२४७)
जातान्दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः ।
धर्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वाप्तदक्षिणैः ॥ १-१-२४९ (२४८)
अस्मिँल्लोके यशः प्राप्य ततः कालवशं गतान् ।
शैब्यं महारथं वीरं सृंजयं जयतां वरम् ॥ १-१-२५० (२४९)
सुहोत्रं रन्तिदेवं च काक्षीवन्तमतौशिजम् ।
बाह्लीकं दमनं चैद्यं शर्यातिमजितं नलम् ॥ १-१-२५१ (२५०)
विश्वामित्रममित्रघ्नमम्बरीषं महाबलम् ।
मरुत्तं मनुमिक्ष्वाकुं गयं भरतमेव च ॥ १-१-२५२ (२५१)
रामं दाशरथिं चैव शशबिन्दुं भगीरथम् ।
कृतवीर्यं महाभागं तथैव जनमेजयम् ॥ १-१-२५३ (२५२)

ययातिं शुभकर्माणं देवैर्यो याजितः स्वयम् ।
ग्चैत्ययूपाङ्किता भूमिर्यस्येयं सवनाकरा ॥ १-१-२५४ (२५३)
इति राज्ञां चतुर्विंशन्नारदेन सुरर्षिणा ।
पुत्रशोकाभितप्ताय पुरा श्वैत्याय कीर्तितम् ॥ १-१-२५५ (२५४)
तेभ्यश्चान्ये गताः पूर्वं राजानो बलवत्तराः ।
महारथा महात्मानः सर्वैः समुदिता गुणैः ॥ १-१-२५६ (२५५)
पूरुः कुरुर्यदुः शूरो विष्वगश्वो महाद्युतिः ।
अणुहो युवनाश्वश्च ककुत्स्थो विक्रमी रघुः ॥ १-१-२५७ (२५६)
विजयो वीतिहोत्रोऽङ्गो भवः श्वेतो बृहद्गुरुः ।
उशीनरः शतरथः कङ्को दुलिदुहो द्रुमः ॥ १-१-२५८ (२५७)
दम्भोद्भवः परो वेनः सगरः संकृतिर्निमिः ।
अजेयः परशुः पुण्ड्रः शंभुर्देवावृधोऽनघः ॥ १-१-२५९ (२५८)
देवाह्वयः सुप्रतिमः सुप्रतीको बृहद्रथः ।
महोत्साहो विनीतात्मा सुक्रतुर्नैषधो नलः ॥ १-१-२६० (२५९)
सत्यव्रतः शान्तभयः सुमित्रः सुबलः प्रभुः ।
जानुजङ्घोऽनरण्योऽर्कः प्रियभृत्यः शुचिव्रतः ॥ १-१-२६१ (२६०)
बलबन्धुर्निरामर्दः केतुशृङ्गो बृहद्बलः ।
धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः ॥ १-१-२६२ (२६१)
अविक्षिच्चपलो धूर्तः कृतबन्धुर्दृढेषुधिः ।
महापुराणसंभाव्यः प्रत्यङ्गः परहा श्रुतिः ॥ १-१-२६३ (२६२)
एते चान्ये च राजानः शतशोऽथ सहस्रशः ।
श्रूयन्ते शतशश्चान्ये सङ्ख्याताश्चैव पद्मशः ॥ १-१-२६४ (२६३)
हित्वा सुविपुलान्भोगान्बुद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास्तव पुत्रैर्महत्तरः ॥ १-१-२६५ (२६४)
येषां दिव्यानि कर्माणि विक्रमस्त्याग एव च ।
माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयाऽर्जवम् ॥ १-१-२६६ (२६५)
विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः ।
सर्वर्द्धिगुणसंपन्नास्ते चापि निधनं गताः ॥ १-१-२६७ (२६६)
तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना ।
लुब्धा दुर्वृत्तभूयिष्ठा न ताञ्छोचितुमर्हसि ॥ १-१-२६८ (२६७)
श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसंमतः ।
येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत ॥ १-१-२६९ (२६८)
निग्रहानुग्रहौ चापि विदितौ ते नराधिप ।
नात्यन्तमेवानुवृत्तिः कार्या ते पुत्ररक्षणे ॥ १-१-२७० (२६९)
भवितव्यं तथा तच्च नानुशोचितुमर्हसि ।
दैवं पुरुषकारेण को निवर्तितुमर्हति ॥ १-१-२७१ (२७०)

विधातृविहितं मार्गं न कश्चिदतिवर्तते ।
कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥ १-१-२७२ (२७१)
कालः सृजति भूतानि कालः संहरते प्रजाः ।
संहरन्तं प्रजाः कालं कालः शमयते पुनः ॥ १-१-२७३ (२७२)
कालो विकुरुते भावान्सर्वांल्लोके शुभाशुभान् ।
कालः संक्षिपते सर्वाः प्रजा विसृजते पुनः ॥ १-१-२७४ (२७३)
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः ।
कालः सर्वेषु भूतेषु चरत्यविधतः समः ॥ १-१-२७५ (२७४)
अतीतानागता भावा ये च वर्तन्ति सांप्रतम् ।
तान्कालनिर्मितान्बुद्ध्वा न संज्ञां हातुमर्हसि ॥ १-१-२७६ (२७५)
सौतिरुवाच। १-१-२७७क्ष् (१०)
इत्येवं पुत्रशोकार्तं धृतराष्ट्रं जनेश्वरम् ।
आश्वास्य स्वस्थमकरोत्सूतो गावल्गणिस्तदा ॥ १-१-२७७ (२७६)
धृतराष्ट्रोऽपि तच्छ्रुत्वा धृतिमेव समाश्रयत् ।
दिष्ट्येदमागतमिति मत्त्वा स प्राज्ञसत्तमः ॥ १-१-२७८ (२७७)
लोकानां च हितार्थाय कारुण्यान्मुनिसत्तमः ।
अत्रोपनिषदं पुण्यां कृष्णद्वैपायनोऽब्रवीत् ॥ १-१-२७९ (२७८)
विद्वद्भिः कथ्यते लोके पुराणे कविसत्तमैः ।
भारताध्ययनं पुण्यमपि पादमधीयतः ।
श्रद्दधानस्य पूयन्ते सर्वपापान्यशेषतः ॥ १-१-२८० (२७९)
देवा देवर्षयो ह्यत्र तथा ब्रह्मर्षयोऽमलाः ।
कीर्त्यन्ते शुमकर्माणस्तथा यक्षा महोरगाः ॥ १-१-२८१ (२८०)
भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः ।
स हि सत्यमृतं चैव पवित्रं पुण्यमेव च ॥ १-१-२८२ (२८१)
शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनम् ।
यस्य दिव्यानि कर्माणि कथन्ति मनीषिणः ॥ १-१-२८३ (२८२)
असत्सत्सदसच्चैव यस्माद्विश्वं प्रवर्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥ १-१-२८४ (२८३)
अध्यात्मं श्रूयते यत्र पञ्चभूतगुणात्मकम् ।
अव्यक्तादि परं यच्च स एव परिगीयते ॥ १-१-२८५ (२८४)
यं ध्यायन्ति सदा मुक्ता ध्यानयोगबलान्विताः ।
प्रतिबिम्बमिवादर्शे पश्यन्त्यात्मन्यवस्थितम् ॥ १-१-२८६ (२८५)
श्रद्दधानः सदा युक्तः सदा धर्मपरायणः ।
आसेवन्निममध्यायं नरः पापात्प्रमुच्यते ॥ १-१-२८७ (२८६)
अनुक्रमणिकाध्यायं भारतस्येममादितः ।
आस्तिकः सततं शृण्वन्न कृच्छ्रेष्ववसीदति ॥ १-१-२८८ (२८७)

उभे सन्ध्ये जपन्किंचित्सद्यो मुच्येत किल्बिषात् ।
अनुक्रमण्या यावत्स्यादह्नारात्र्या च संचितम् ॥ १-१-२८९ (२८८)
भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव च ।
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ॥ १-१-२९० (२८९)
आरण्यकं च वेदेभ्य ओषधिभ्योऽमृतं यथा ।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ १-१-२९१ (२९०)
यथैतानीतिहासानां तथा भारतमुच्यते ।
यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ॥ १-१-२९२ (२९१)
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ।
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ॥ १-१-२९३ (२९२)
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ।
कार्ष्णं वेदमिमं विद्वाञ्श्रावयित्वार्थमश्नुते ॥ १-१-२९४ (२९३)
भ्रूणहत्यादिकं चापि पापं जह्यादसंशयम् ।
य इमं शुचिरध्यायं पठेत्पर्वणि पर्वणि ॥ १-१-२९५ (२९४)
अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः ।
यश्चैनं शृणुयान्नित्यमार्षं श्रद्धासमन्वितः ॥ १-१-२९६ (२९५)
स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नुयान्नरः ।
एकतश्चतुरो वेदा भारतं चैतदेकतः ॥ १-१-२९७ (२९६)
पुरा किल सुरैः सर्वैः समेत्य तुलया धृतम् ।
चतुर्भ्यः सरहस्येभ्यो वेदेभ्यो ह्यधिकं यदा ॥ १-१-२९८ (२९७)
तदाप्रभृति लोकेऽस्मिन्महाभारतमुच्यते ।
महत्त्वे च गुरुत्वे च ध्रियमाणं यतोऽधिकम् ॥ १-१-२९९ (२९८)
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ १-१-३०० (२९९)
तपो नकल्कोऽध्ययनं नकल्कः
स्वाभाविको वेदविधिर्नकल्कः ।
प्रसह्य वित्ताहरणं नकल्क-
स्तान्येव भावोपहतानि कल्कः ॥ १-१-३०१ (३००)

इति श्रीमन्माहाभारते आदिपर्वणि अनुक्रमणिकापर्वणि प्रथमोऽध्यायः
॥ १ ॥ ॥ अनुक्रमणिकापर्व समाप्तम् ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१-१ श्रीलक्ष्मीनृसिंहाय नमः ॥
श्रीहयग्रीवाय नमः ॥
श्रीवेदव्यासाय नमः ॥

इह खलु भगवान्पाराशर्यः परमकारुणिको म्दमतीननुग्रहीतुं चतुर्दशविद्यास्थानान्येकत्र दिदर्शयिषुर्महाभारताख्यमितिहासं प्रणेष्यन्प्रारिप्सितस्य निष्प्रत्यूहारिपूरणाय प्रचयगमनाय च मङ्गलं रचयन् शिष्यशिक्षायै लोकरूपेम निबघ्नन्नर्यात्तत्र प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयादि दर्शयति ॥
नारायणमिति ॥
नरोत्तमं पुरुषोत्तमं नारायणं नरं देवीं सरस्वतीं (व्यासं) चैव नमस्कृत्य जयं भारताख्यमितिहासं उदीरयेत् ॥
१-१-२ लक्षालङ्कारव्याख्यानरीत्यायमाद्यः श्लोकः ॥
१-१-३ कतिपयकोशरीत्यायस्पद्यः ॥
३ ॥
१-१-५ रोमहर्षणपुत्रः रोमाणि हर्षयाञ्चक्रे श्रोतॄणा यः स्वभाषितैः ।कर्मणा प्रथितस्तेन रोमहर्षणसंज्ञया। इति कौर्मे निरुक्तार्थनाम्नः पुत्रः। अग्रश्रवाः उग्रस्य नृसिंहस्य श्रवः श्रवणं यस्य सः। पौराणिकः पुराणे कृतश्रमः। नैमिशारण्ये वायवीये। एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते। यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः। इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयम्। प्रणिपत्य महादेवं विससर्ज पितामहः। तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुम्। प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत। तद्वनं तेन विख्यातं नैमिशं मुनिपूजितम्। इति उक्तरूपे। नैमिषेति पाठे तु वाराहे। एवं कृत्वा ततो देवो मुनि गौरमुखं तदा। उवाच निमिषेणेदं निहतं दानवं बलं। अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं। इति निर्वचनं द्रष्टव्यं। शुनकस्य मुनेरपत्यं शौनकः। कुलपतेः। एको दशसहस्राणि योऽन्नदानादिना भरेत्। स वै कुलपतिः इत्युक्तलक्षणस्य। सत्रे ये यजमानास्तएव ऋत्विजो यस्मिन्बहुकर्तृके क्रतौ स सत्रसंज्ञ तस्मिन् ॥
५ ॥
१-१-७ नैमिशारण्यवासिनः तान्सर्वानृषीनुवाचेत्यन्वयः ॥
७ ॥
१-१-८ अहं तपोधनाः सिकीः सर्वाः कथा वेद जानामि ॥
८ ॥
१-१-११ निर्दिष्टं इहोपविश्यतामिति दर्शितम् ॥
११ ॥
१-१-१२ प्रस्तावयन् उपोद्धातयन् ॥
१२ ॥

१-१-१३ विहृतः नीतः ॥
१३ ॥
१-१-१४ तेषां मुनीनां चादन्येषां राजादीनां च यानि चरितानि तेषामाश्रयभूतम् । भावितात्मनां शोधितचित्तानाम् ॥
१४ ॥
१-१-१८ समन्तपञ्चकं समन्तात् पञ्चकं परशुरामकृतह्रदपञ्चकं यस्मिंस्तत् । स्यमन्तपञ्चकमित्यपि पाठो दृश्यते ॥
१८ ॥
१-१-२१ ब्रवीमि किमहं द्विजाः अहं च पुराणादिष्वन्यतमं किं ब्रवीमि तदाज्ञापयतेति शेषः ॥
२१ ॥
१-१-२५ संस्कारोपगतां पदादिव्युत्पत्तिमतीम् । ब्राह्मो वाचं। ब्राह्मी तु भारती भाषेत्यमरः ॥
२५ ॥
१-१-२८ मङ्गलाचरणपूर्वकं मुनिभिः प्रार्थितमर्थं वक्तुं प्रतिजानीते आद्यमित्यदिचतुर्भिः । हरिं नमस्कृत्य महर्षेर्मतं प्रवक्ष्यामीत्यन्वयः। पुरुहूतं पुरुभिर्बहुभिर्होतृभिः हूतं आहूतं। पुरुभिः सामगैः स्तुतं। ऋतं सत्यं। एकश्चासावक्षरश्च तं। एकं अद्वितीयं समाधिकरहितमिति वा। अक्षरं नाशरहितं। व्यख्यव्यक्तं रामकृष्णादिरूपेण दृश्यं। ज्ञानानन्दादिरूपेण मन्देरदृश्यं ॥
२८ ॥
१-१-३० मङ्गल्यं मङ्गलप्रदं ॥
३० ॥
१-१-३६ ज्ञानं ज्ञानसाधनं इदं भारत त्रिषु लोकेषु प्रतिष्ठितम् ॥
३६ ॥
१-१-३७ समयैः संकेतैः । छन्दोवृत्तैः त्रिष्टुबादिछन्दोन्तीतैरिन्द्रवज्रादिभिर्वृत्तैः ॥
३७ ॥
१-१-४५ यस्मिन् ब्रह्माण्डे ॥
४५ ॥
१-१-५२ प्रतिकल्पं सृष्टेः समाननामरूपत्वमाह यथेति ॥
५२ ॥
१-१-५३ कल्पानामानन्त्यमाह एवमिति ॥
५३ ॥

१-१-५४ एवं जडसृष्टिमुक्त्वा चेतनसृष्टिमाह त्रयस्त्रिंशदिति ॥
५४ ॥
१-१-६१ भूतस्थानानि नृणां वासस्थानानि नगरादीनि ॥
६१ ॥
१-१-६४ इह सर्वमनुक्रान्तं अनुक्रमेण उक्तं ॥
६४ ॥
१-१-६५ समासः सङ्क्षेपः । व्यासो विस्तारः ॥
६५ ॥
१-१-६६ भारतारम्भे मतभेदमाह मन्वादीति । मन्वादि मनुर्मन्त्रः नारायणं नमस्कृत्येति। ॐ नमो भगवते वासुदेवायेति वा तदादि। प्रस्तीकं आस्तीकचरितं तदादि। उपरिचरो वसुः तच्चरितादि वा ॥
६६ ॥
१-१-६७ बह्वर्थत्वाद्विविधं संहिताज्ञानं दीपयन्ति प्रकाशयन्ति ॥
६७ ॥
१-१-६९ महुः सत्यवत्याः । गाङ्गेयस्य भीष्मस्य ॥
६९ ॥
१-१-७० क्षत्र भार्यासु अम्बिकादिषु ॥
७० ॥
१-१-७१ परमां गतिं मृत्युं ॥
७१ ॥
१-१-७३ शशासं त्वममन् भारतं श्रावयेत्याज्ञापितवान् ॥
७३ ॥
१-१-८४ वसोः अपत्यं स्त्री वास्त्री तस्याः अपत्यं वासवेयो व्यासः ॥
८४ ॥
१-१-८५ कृष्णो व्यासः ॥
८५ ॥
१-१-९८ विशेषणे अतिशायने ॥
९८ ॥
१-१-१०४ विटङ्काः पक्ष्युपवेशनस्थानानि ॥
१०४ ॥
१-१-१०५ सारो मज्जा ॥
१०५ ॥
१-१-१०६ विश्रामः छाया ॥
१०६ ॥
१-१-१०८ आश्रमस्थानसंश्रयः आश्रमवासिकस्यण्डिलः

। मौसलश्रुतिसंक्षेपः मौसलादिग्रन्थः श्रुतिस्थानीयदीर्घशाखान्तः
॥
१०८ ॥
१-१-११२ यतः यत्र देशे ॥
११२ ॥
१-१-११५ अबुद्ध्वा अर्थमिति शेषः । ओमित्यङ्गीकारे ॥
११५ ॥
१-१-११६ अन्थग्रन्थिं ग्रन्थे दुर्भेद्यस्थानं ॥
११६ ॥
१-१-१३१ कृच्छ्रां आपदं व्यवायकाले मरिष्यसीत्येवं शापरूपां
। तत्र आपदि एवं सत्यामपि पार्थानां पाण्डवानां जन्मप्रभृति
आचारविधिक्रमः अभूदिति शेषः ॥
१३१ ॥
१-१-१३२ आचारविधिक्रममेवाह । मात्रोरिति। मात्रोः
कुन्तीमाद्योः। धर्मोपनिषदं प्रति आपदि अपत्यार्थे विशिष्टः
पुमान्प्रार्थनीय इत्येवरूपं धर्मरहस्यं प्रति। अभ्युपपत्तिः
अङ्गीकारः ॥
१३२ ॥
१-१-१३७ धार्तराष्ट्रान्धृतराष्ट्रसंबन्धिगृहान् ॥
१३७ ॥
१-१-१४२ अन्तर्हितानां भूतानां निःस्वनः पाण्डुपुत्रा एवैते इत्येवंरूपा
अशरीरवाक् ॥
१४२ ॥
१-१-१४८ भर्तारं स्वयमेव वृणुत इति भर्तृस्वयंवरां ॥
१४८ ॥
१-१-१५० राज्ञो युधिष्ठिरस्य ॥
१५० ॥
१-१-१५७ अनभिजातवत् ग्रामीणवत् ॥
१५७ ॥
१-१-१६० धृतराष्ट्रो यद्विवादानन्वमोदत यच्चानयानुपैक्षत
तस्माद्वासुदेवस्य कोपः समभवत् ॥
१६० ॥
१-१-१६१ दहन् अदहत् ॥
१६१ ॥
१-१-१७३ प्रवृष्टं वर्षणे प्रवृत्तं ॥
१७३ ॥

१-१-१८१ चेष्टाः बाहुवीक्षणाद्याः ॥
१८१ ॥
१-१-१८२ स्नातकानां समापितविद्याव्रतानां ब्राह्मणानां ॥
१८२ ॥
१-१-१८५ शंसितं प्रशस्यं ॥
१८५ ॥
१-१-१९७ इमां गां पृथिवीं यस्य वासुदेवस्य एकं विक्रमं पदमात्रमाहुः ॥
१९७ ॥
१-१-१९८ यौ नरनारायणौ ब्रह्मलोके अहं द्रष्टा अद्राक्षं तौ
कृष्णार्जुनौ अर्जुनकृष्णौ इति वदतो नारदस्य नारदात् ॥
१९८ ॥
१-१-२०० बहुधा विश्वरूपत्वेन ॥
२०० ॥
१-१-२०२ तेषां पाण्डवानां ॥
२०२ ॥
१-१-२०९ सोमकानेव अल्पशेषान्कृत्वा ॥
२०९ ॥
१-१-२१० चोदितमर्जुनं च । गां भित्त्वाम्बो वारुणेनाददाने इति पाठान्तरं ॥
२१० ॥
१-१-२२३ व्यंसितां व्यर्थीकृतां ॥
२२३ ॥
१-१-२३७ क्रुद्धेनैषीकं चावधीद्यन्न गर्भं इति पाठान्तरम् ॥
१-१-२८० पूयन्ते नश्यन्ति ॥
२८० ॥
१-१-२९४ कार्ष्णं कृष्णेन व्यासेन प्रोक्तं ॥
२९४ ॥
१-१-३०१ ननु वेदेभ्यः कथमिदमधिकं अत्र युद्धप्रधानानां
कर्मणां बन्धनहेतूनां कथनादुपनिषदि तावन्मोक्षसाधनानां
धर्माणां ब्रह्मणश्च प्रतिपादनादिति चेत्तत्राह । तप
इति। तपः कृच्छ्रचान्द्रायणादि नकल्कः पापनाशकं। स्वाभाविकः
स्वस्ववर्णाश्रमादिपुरस्कारेण विहितः। वेदविधिः वेदोक्तो विधिः
सन्ध्योपासनादिः। प्रसह्य प्रकर्षेण सोढ्वा क्षुधादिदुःखमपि
सोढ्वा। वित्तस्य आहरणं शिलोञ्छादिना अर्जनं। तान्येव
तपआदीन्येव भावेन फलानुसन्धानेन उपहतानि प्रतिषिद्धानि। कल्कः
पापहेतुः। तथाचात्रापि मोक्षधर्मादिषु तत्रतत्र निष्कामकर्मणां
प्रतिपादनं ब्रह्मनिरूपणं चास्त्येव। अतो वेदादप्युत्तमं भारतं ॥

३०१ ॥
इति टिप्पणे प्रथमोऽध्यायः ॥
१ ॥

आदिपर्व - अध्याय ००२
॥ श्रीः ॥
१.२. अध्यायः २

(अथ पर्वसंग्रहपर्व ॥ २ ॥)
Mahabharata - Adi Parva - Chapter Topics
समन्तपञ्चकाख्यानं ॥ १ ॥
अक्षौहिण्यादिपरिमाण ॥ २ ॥
आदिपर्वादिसर्वपर्वणां संक्षेपेण वृत्तान्तकथनं ॥ ३ ॥
नारतश्रवणफलकथनं ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२-० (३०१)
ऋषय ऊचुः। १-२-०क्ष् (११)
समन्तपञ्चकमिति यदुक्तं सूतनन्दन ।
एतत्सर्वं यथातत्त्वं श्रोतुमिच्छामहे वयम् ॥ १-२-१ (३०२)
सौतिरुवाच। १-२-२क्ष् (१२)
शृणुध्वं मम भो विप्रा ब्रुवतश्च कथाः शुभाः ।
समन्तपञ्चकाख्यं च श्रोतुमर्हथ सत्तमाः ॥ १-२-२ (३०३)
त्रेताद्वापरयोः सन्धौ रामः शस्त्रभृतां वरः ।
असकृत्पार्थिवं क्षत्रं जघानामर्षचोदितः ॥ १-२-३ (३०४)
स सर्वं क्षत्रमुत्साद्य स्ववीर्येणानलद्युतिः ।
समन्तपञ्चके पञ्च चकार रुधिरह्रदान् ॥ १-२-४ (३०५)
स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्च्छितः ।
पितॄन्संतर्पयामास रुधिरेणेति नः श्रुतम् ॥ १-२-५ (३०६)
अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन् ।
राम राम महाभाग प्रीताः स्म तव भार्गव ॥ १-२-६ (३०७)
अनया पितृभक्त्या च विक्रमेण तव प्रभो ।
वरं वृणीष्व भद्रं ते यमिच्छसि महाद्युते ॥ १-२-७ (३०८)
राम उवाच। १-२-८क्ष् (१३)
यदि मे पितरः प्रीता यद्यनुग्राह्यता मयि ।
यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया ॥ १-२-८ (३०९)

अतश्च पापान्मुच्येऽहमेष मे प्रार्थितो वरः ।
ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः ॥ १-२-९ (३१०)
एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन् ।
तं क्षमस्वेति निषिषिधुस्ततः स विरराम ह ॥ १-२-१० (३११)
तेषां समीपे यो देशो ह्रदानां रुधिराम्भसाम् ।
समन्तपञ्चकमिति पुण्यं तत्परिकीर्तितम् ॥ १-२-११ (३१२)
येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥ १-२-१२ (३१३)
अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत् ।
समन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः ॥ १-२-१३ (३१४)
तस्मिन्परमधर्मिष्ठे देशे भूदोषवर्जिते ।
अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया ॥ १-२-१४ (३१५)
समेत्य तं द्विजास्ताश्च तत्रैव निधं गताः ।
एतन्नामाभिनिर्वृत्तं तस्य देशस्य वै द्विजाः ॥ १-२-१५ (३१६)
पुण्यश्च रमणीयश्च स देशो वः प्रकीर्तितः ।
तदेतत्कथितं सर्वं मया ब्राह्मणसत्तमाः ॥
यथा देशः स विख्यातस्त्रिषु लोकेषु सुव्रताः ॥ १-२-१६ (३१७)
ऋषय ऊचुः। १-२-१७क्ष् (१४)
अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन ।
एतदिच्छामहे श्रोतुं सर्वमेव यथातथम् ॥ १-२-१७ (३१८)
अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनाम् ।
यथावच्चैव नो ब्रूहि सर्वं हि विदितं तव ॥ १-२-१८ (३१९)
सौतिरुवाच। १-२-१९क्ष् (१५)
एको रथो गजश्चैको नराः पञ्च पदातयः ।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते ॥ १-२-१९ (३२०)
पत्तिं तु त्रिगुणामेतामाहुः सेनामुखं बुधाः ।
त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते ॥ १-२-२० (३२१)
त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः ।
स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः ॥ १-२-२१ (३२२)
चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी ।
अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः ॥ १-२-२२ (३२३)
अक्षौहिण्याः प्रसंख्याता रथानां द्विजसत्तमाः ।
संख्यागणिततत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ १-२-२३ (३२४)
शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ।
गजानां च परीमाणमेतदेव विनिर्दिशेत् ॥ १-२-२४ (३२५)
ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु ।

नराणामपि पञ्चाशच्छतानि त्रीणि चानघाः ॥ १-२-२५ (३२६)
पञ्च षष्टिसहस्राणि तथाश्वानां शतानि च ।
दशोत्तराणि षट् प्राहुर्यथावदिह संख्यया ॥ १-२-२६ (३२७)
एतामक्षौहिणीं प्राहुः संख्यातत्त्वविदो जनाः ।
यां वः कथितवानस्मि विस्तरेण तपोधनाः ॥ १-२-२७ (३२८)
एतया संख्यया ह्यासन्कुरुपाण्डवसेनयोः ।
अक्षौहिण्यो द्विजश्रेष्ठाः पिण्डिताष्टादशैव तु ॥ १-२-२८ (३२९)
समेतास्तत्र वै देशे तत्रैव निधं गताः ।
कौरवान्कारणं कृत्वा कालेनाद्भुतकर्मणा ॥ १-२-२९ (३३०)
अहानि युयुधे भीष्मो दशैव परमास्त्रवित् ।
अहानि पञ्च द्रोणस्तु ररक्ष कुरुवाहिनीम् ॥ १-२-३० (३३१)
अहनी युयुधे द्वे तु कर्णः परबलार्दनः ।
शल्योऽर्धदिवसं चैव गदायुद्धमतः परम् ॥ १-२-३१ (३३२)
तस्यैव दिवसस्यान्ते द्रौणिहार्दिक्यगौतमाः ।
प्रसुप्तं निशि विश्वस्तं जघ्नुर्यौधिष्ठिरं बलम् ॥ १-२-३२ (३३३)
यत्तु शौनक सत्रे ते भारताख्यानमुत्तमम् ।
जनमेजयस्य तत्सत्रे व्यासशिष्येण धीमता ॥ १-२-३३ (३३४)
कथितं विस्तरार्थं च यशो वीर्यं महीक्षिताम् ।
पौष्यं तत्र च पौलोममास्तीकं चादितः स्मृतम् ॥ १-२-३४ (३३५)
विचित्रार्थपदाख्यानमनेकसमयान्वितम् ।
प्रतिपन्नं नरैः प्राज्ञैर्वैराग्यमिव मोक्षिभिः ॥ १-२-३५ (३३६)
आत्मेव वेदितव्येषु प्रियेष्विव हि जीवितम् ।
इतिहासः प्रधानार्थः श्रेष्ठः सर्वागमेष्वयम् ॥ १-२-३६ (३३७)
अनाश्रित्येदमाख्यानं कथा भुवि न विद्यते ।
आहारमनपाश्रित्य शरीरस्येव धारणम् ॥ १-२-३७ (३३८)
तदेतद्भारतं नाम कविभिस्तूपजीव्यते ।
उदयतेप्सुभिर्भृत्यैरभिजात इवेश्वरः ॥ १-२-३८ (३३९)
इतिहासोत्तमे यस्मिन्नर्पिता बुद्धिरुत्तमा ।
स्वरव्यञ्जनयोः कृत्स्ना लोकवेदाश्रयेव वाक् ॥ १-२-३९ (३४०)
तस्य प्रज्ञाभिपन्नस्य विचित्रपदपर्वणः ।
सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ॥ १-२-४० (३४१)
भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः ।
पर्वानुक्रमणी पूर्वं द्वितीयः पर्वसंग्रहः ॥ १-२-४१ (३४२)
पौष्यं पौलोममास्तीकमादिरंशावतारणम् ।
ततः संभवपर्वोक्तमद्भुतं रोमहर्षणम् ॥ १-२-४२ (३४३)
दाहो जतुगृहस्यात्र हैडिम्बं पर्व चोच्यते ।

ततो बकवधः पर्व पर्व चैत्ररथं ततः ॥ १-२-४३ (३४४)
ततः स्वयंवरो देव्याः पाञ्चाल्याः पर्व चोच्यते ।
क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतम् ॥ १-२-४४ (३४५)
विदुरागमनं पर्व राज्यलाभस्तथैव च ।
अर्जुनस्य वने वासः सुभद्राहरणं ततः ॥ १-२-४५ (३४६)
सुभद्राहरणादूर्ध्वं ज्ञेया हरणहारिका ।
ततः खाण्डवदाहाख्यं तत्रैव मयदर्शनम् ॥ १-२-४६ (३४७)
सभापर्व ततः प्रोक्तं मन्त्रपर्व ततः परम् ।
जरासन्धवधः पर्व पर्व दिग्विजयं तथा ॥ १-२-४७ (३४८)
पर्व दिग्विजयादूर्ध्वं राजसूयिकमुच्यते ।
ततश्चार्घाभिहरणं शिशुपालवधस्ततः ॥ १-२-४८ (३४९)
द्यूतपर्व ततः प्रोक्तमनुद्यूतमः परम् ।
तत आरण्यकं पर्व किर्मीरवध एवच ॥ १-२-४९ (३५०)
अर्जुनस्याभिगमनं पर्व ज्ञेयमतः परम् ।
ईश्वरार्जुनयोर्युद्धं पर्व कैरातसंज्ञितम् ॥ १-२-५० (३५१)
इन्द्रलोकाभिगमनं पर्व ज्ञेयमतः परम् ।
नलोपाख्यानमपि च धार्मिकं करुणोदयम् ॥ १-२-५१ (३५२)
तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः ।
जटासुरवधः पर्व यक्षयुद्धमतः परम् ॥ १-२-५२ (३५३)
निवातकवचैर्युद्धं पर्व चाजगरं ततः ।
मार्कण्डेयसमास्या च पर्वानन्तरमुच्यते ॥ १-२-५३ (३५४)
संवादश्च ततः पर्व द्रौपदीसत्यभामयोः ।
घोषयात्रा ततः पर्व ततः प्रायोपवेशनेम् ।
मन्त्रस्य निश्चयं चैव मृगस्वप्नोद्भवं ततः ॥ १-२-५४ (३५५)
व्रीहिद्रौणिकमाख्यानमैन्द्रद्युम्नं तथैव च ।
द्रौपदीहरणं पर्व जयद्रथविमोक्षणम् ॥ १-२-५५ (३५६)
रामोपाख्यानमत्रैव पर्व ज्ञेयमतः परम् ।
पतिव्रताया माहात्म्यं सावित्र्याश्चैवमद्भुतम् ॥ १-२-५६ (३५७)
कुण्डलाहरणं पर्व ततः परमिहोच्यते ।
आरणेयं ततः पर्व वैराटं तदनन्तरम् ॥
पाण्डवानां प्रवेशश्च समयस्य च पालनम् ॥ १-२-५७ (३५८)
कीचकानां वधः पर्व पर्व ग्रोग्रहणं ततः ।
अभिमन्योश्च वैराट्याः पर्व वैवाहिकं स्मृतम् ॥ १-२-५८ (३५९)
उद्योगपर्व विज्ञेयमत ऊर्ध्वं महाद्भुतम् ।
ततः संजययानाख्यं पर्व ज्ञेयमतः परम् ॥ १-२-५९ (३६०)
प्रजागरं तथा पर्व धृतराष्ट्रस्य चिन्तया ।

पर्व सानत्सुजातं वै गुह्यमध्यात्मदर्शनम् ॥ १-२-६० (३६१)
यानसन्धिस्ततः पर्व भगवद्यानमेव च ।
मातलीयमुपाख्यानं चरितं गालवस्य च ॥ १-२-६१ (३६२)
सावित्रं वामदेव्यं च वैन्योपाख्यानमेव च ।
जामदग्न्यमुपाख्यानं पर्व षोडशराजकम् ॥ १-२-६२ (३६३)
सभाप्रवेशः कृष्णस्य विदुलापुत्रशासनम् ।
उद्योगः सैन्यनिर्याणं विश्वोपाख्यानमेव च ॥ १-२-६३ (३६४)
ज्ञेयं विवादपर्वात्र कर्णस्यापि महात्मनः ।
'मन्त्रस्य निश्चयं कृत्वा कार्यस्य समनन्तरम् ॥ १-२-६४ (३६५)
श्वेतस्य वासुदेवेन चित्रं बहुकथाश्रयम् ।'
निर्याणं च ततः पर्व कुरुपाण्डवसेनयोः ॥ १-२-६५ (३६६)
रथातिरथसंख्या च पर्वोक्तं तदनन्तरम् ।
उलूकदूतागमनं पर्वामर्षविवर्धनम् ॥ १-२-६६ (३६७)
अम्बोपाख्यानमत्रैव पर्व ज्ञेयमतः परम् ॥
भीष्माभिषेचनं पर्व ततश्चाद्भुतमुच्यते ॥ १-२-६७ (३६८)
जम्बूखम्डविनिर्माणं पर्वोक्तं तदनन्तरम् ॥
भूमिपर्व ततः प्रोक्तं द्वीपविस्तारकीर्तनम् ॥ १-२-६८ (३६९)
'दिव्यं चक्षुर्ददौ यत्र संजयाय महामुनिः ।'
पर्वोक्तं भगवद्गीता पर्व भीष्मवधस्ततः ।
द्रोणाभिषेचनं पर्व संशप्तकवधस्ततः ॥ १-२-६९ (३७०)
अभिमन्युवधः पर्व प्रतिज्ञा पर्व चोच्यते ।
जयद्रथवधः पर्व घटोत्कचवधस्ततः ॥ १-२-७० (३७१)
ततो द्रोणवधः पर्व विज्ञेयं लोमहर्षणम् ।
मोक्षो नारायणास्त्रस्य पर्वानन्तरमुच्यते ॥ १-२-७१ (३७२)
कर्णपर्व ततो ज्ञेयं शल्यपर्व ततः परम् ।
ह्रदप्रवेशनं पर्व गदायुद्धमतः परम् ॥ १-२-७२ (३७३)
सारस्वतं ततः पर्व तीर्थवंशानुकीर्तनम् ।
अत ऊर्ध्वं सुबीभत्सं पर्व सौप्तिकमुच्यते ॥ १-२-७३ (३७४)
ऐषीकं पर्व चोद्दिष्टमत ऊर्ध्वं सुदारुणम् ।
जलप्रदानिकं पर्व स्त्रीविलापस्ततः परम् ॥ १-२-७४ (३७५)
श्राद्धपर्व ततो ज्ञेयं कुरूणामौर्ध्वदेहिकम् ।
चार्वाकनिग्रहः पर्व रक्षसो ब्रह्मरूपिणः ॥ १-२-७५ (३७६)
आभिषेचनिकं पर्व धर्मराजस्य धीमतः ।
प्रविभागो गृहाणां च पर्वोक्तं तदनन्तरम् ॥ १-२-७६ (३७७)
शान्तिपर्व ततो यत्र राजधर्मानुशासनम् ।
आपद्धर्मश्च पर्वोक्तं मोक्षधर्मस्ततः परम् ॥ १-२-७७ (३७८)

शुकप्रश्नाभिगमनं ब्रह्मप्रश्नानुशासनम् ।
प्रादुर्भावश्च दुर्वासःसंवादश्चैव मायया ॥ १-२-७८ (३७९)
ततः पर्व परिज्ञेयमानुशासनिकं परम् ।
स्वर्गारोहणिकं चैव ततो भीष्मस्य धीमतः ॥ १-२-७९ (३८०)
ततोऽश्वमेधिकं पर्व सर्वपापप्रणाशनम् ।
अनुगीता ततः पर्व ज्ञेयमध्यात्मवाचकम् ॥ १-२-८० (३८१)
पर्व चाश्रमवासाख्यं पुत्रदर्शनमेव च ।
नारदागमनं पर्व ततः परमिहोच्यते ॥ १-२-८१ (३८२)
मौसलं पर्व चोद्दिष्टं ततो घोरं सुदारुणम् ।
महाप्रस्थानिकं पर्व स्वर्गारोहणिकं ततः ॥ १-२-८२ (३८३)
हरिवंशस्ततः पर्व पुराणं खिलसंज्ञितम् ।
विष्णुपर्व शिशोश्चर्या विष्णोः कंसवधस्तथा ॥ १-२-८३ (३८४)
भविष्यं पर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत् ।
एतत्पर्वशतं पूर्णं व्यासेनोक्तं महात्मना ॥ १-२-८४ (३८५)
यथावत्सूतपुत्रेण रौमहर्षणिना ततः ।
उक्तानि नैमिशारण्ये पर्वाण्यष्टादशैव तु ॥ १-२-८५ (३८६)
समासो भारतस्यायमत्रोक्तः पर्वसंग्रहः ।
पौष्यं पौलोममास्तीकमादिरंशावतारणम् ॥ १-२-८६ (३८७)
संभवो जतुवेश्माख्यं हिडिम्बबकयोर्वधः ।
तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरः ॥ १-२-८७ (३८८)
क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतम् ।
विदुरागमनं चैव राज्यलाभस्तथैव च ॥ १-२-८८ (३८९)
वनवासोऽर्जुनस्यापि सुभद्राहरणं ततः ।
हरणाहरणं चैव दहनं खाण्डवस्य च ॥ १-२-८९ (३९०)
मयस्य दर्शनं चैव आदिपर्वणि कथ्यते ।
पौष्ये पर्वणि माहात्म्यमुत्तङ्कस्योपवर्णितम् ॥ १-२-९० (३९१)
पौलोमे भृगुवंशस्य विस्तारः परिकीर्तितः ।
आस्तीके सर्वनागानां गरुडस्य च संभवः ॥ १-२-९१ (३९२)
क्षीरोदमथं चैव जन्मोच्चैःश्रवसस्तथा ।
यजतः सर्पसत्रेण राज्ञः पारिक्षितस्य च ॥ १-२-९२ (३९३)
कथेयमभिनिर्वृत्ता भारतानां महात्मनाम् ।
विविधाः संभवा राज्ञामुक्ताः संभवपर्वणि ॥ १-२-९३ (३९४)
अन्येषां चैव शूराणामृषेर्द्वैपायनस्य च ।
अंशावतरणं चात्र देवानां परिकीर्तितम् ॥ १-२-९४ (३९५)
दैत्यानां दानवानां च यक्षाणां च महौजसाम् ।
नागानामथ सर्पाणां गन्धर्वाणां पतत्त्रिणाम् ॥ १-२-९५ (३९६)

अन्येषां चैव भूतानां विविधानां समुद्भवः ।
महर्षेराश्रमपदे कण्वस्य च तपस्विनः ॥ १-२-९६ (३९७)
शकुन्तलायां दुष्यन्ताद्भरतश्चापि जज्ञिवान् ।
यस्य लोकेषु नाम्नेदं प्रथितं भारतं कुलम् ॥ १-२-९७ (३९८)
वसूनां पुनरुत्पत्तिर्भागीरथ्यां महात्मनाम् ।
शन्तनोर्वेश्मनि पुनस्तेषां चारोहणं दिवि ॥ १-२-९८ (३९९)
तेजोंशानां च संपातो भीष्मस्याप्यत्र संभवः ।
राज्यान्निवर्तनं तस्य ब्रह्मचर्यव्रते स्थितिः ॥ १-२-९९ (४००)
प्रतिज्ञापालनं चैव रक्षा चित्राङ्गदस्य च ।
हते चित्राङ्गदे चैव रक्षा भ्रातुर्यवीयसः ॥ १-२-१०० (४०१)
विचित्रवीर्यस्य तथा राज्ये संप्रतिपादनम् ।
धर्मस्य नृषु संभूतिरणीमाण्डव्यशापजा ॥ १-२-१०१ (४०२)
कृष्णद्वैपायनाच्चैव प्रसूतिर्वरदानजा ।
धृतराष्ट्रस्य पाण्डोश्च पाण्डवानां च संभवः ॥ १-२-१०२ (४०३)
वारणावतयात्रा च मन्त्रो दुर्योधनस्य च ।
कूटस्य धार्तराष्ट्रेण प्रेषणं पाण्डवान्प्रति ॥ १-२-१०३ (४०४)
हितोपदेशश्च पथि धर्मराजस्य धीमतः ।
विदुरेण कृतो यत्र हितार्थं म्लेच्छभाषया ॥ १-२-१०४ (४०५)
विदुरस्य च वाक्येन सुरुङ्गोपक्रमक्रिया ।
निषाद्याः पञ्चपुत्रायाः सुप्ताया जतुवेश्मनि ॥ १-२-१०५ (४०६)
पुरोचनस्य चात्रैव दहनं संप्रकीर्तितम् ।
पाण्डवानां वने घोरे हिडिम्बायाश्च दर्शनम् ॥ १-२-१०६ (४०७)
तत्रैव च हिडिम्बस्य वधो भीमान्महाबलात् ।
घटोत्कचस्य चोत्पत्तिरत्रैव परिकीर्तिता ॥ १-२-१०७ (४०८)
महर्षेर्दर्शनं चैव व्यासस्यामिततेजसः ।
तदाज्ञयैकचक्रायां ब्राह्मणस्य निवेशने ॥ १-२-१०८ (४०९)
अज्ञातचर्यया वासो यत्र तेषां प्रकीर्तितः ।
बकस्य निधनं चैव नागराणां च विस्मयः ॥ १-२-१०९ (४१०)
संभवश्चैव कृष्णाया धृष्टद्युम्नस्य चैव ह ।
ब्राह्मणात्समुपश्रुत्य व्यासवाक्यप्रचोदिताः ॥ १-२-११० (४११)
द्रौपदीं प्रार्थयन्तस्ते स्वयंवरदिदृक्षया ।
पञ्चालानभितो जग्मुर्यत्र कौतूहलान्विताः ॥ १-२-१११ (४१२)
अङ्गारपर्णं निर्जित्य गङ्गाकूलेऽर्जुनस्तदा ।
सख्यं कृत्वा ततस्तेन तस्मादेव च शुश्रुवे ॥ १-२-११२ (४१३)
तापत्यमथ वासिष्ठमौर्वं चाख्यानमुत्तमम् ।
भ्रातृभिः सहितः सर्वैः पञ्चालानभितो ययौ ॥ १-२-११३ (४१४)

पाञ्चालनगरे चापि लक्ष्यं भित्त्वा धनञ्जयः ।
द्रौपदीं लब्धवानत्र मध्ये सर्वमहीक्षिताम् ॥ १-२-११४ (४१५)
भीमसेनार्जुनौ यत्र संरब्धान्पृथिवीपतीन् ।
शल्यकर्णौ च तरसा जितवन्तौ महामृधे ॥ १-२-११५ (४१६)
दृष्ट्वा तयोश्च तद्वीर्यमप्रमेयममानुषम् ।
शङ्कमानौ पाण्डवांस्तान् रामकृष्णौ महामती ॥ १-२-११६ (४१७)
जग्मतुस्तैः समागन्तुं शालां भार्गववेश्मनि ।
पञ्चानामेकपत्नीत्वे विमर्शो द्रुपदस्य च ॥ १-२-११७ (४१८)
पञ्चेन्द्राणामुपाख्यानमत्रैवाद्भुतमुच्यते ।
द्रौपद्या देवविहीतो विवाहश्चाप्यमानुषः ॥ १-२-११८ (४१९)
क्षत्तुश्च धार्तराष्ट्रेण प्रेषणं पाण्डवान्प्रति ।
विदुरस्य च संप्राप्तिर्दर्शनं केशवस्य च ॥ १-२-११९ (४२०)
खाण्डवप्रस्थवासश्च तथा राज्यार्धसर्जनम् ।
नारदस्याज्ञया चैव द्रौपद्याः समयक्रिया ॥ १-२-१२० (४२१)
सुन्दोपसुन्दयोस्तद्वदाख्यानं परिकीर्तितम् ।
अनन्तरं च द्रौपद्या सहासीनं युधिष्ठिरम् ॥ १-२-१२१ (४२२)
अनु प्रविश्य विप्रार्थे फाल्गुनो गृह्य चायुधम् ।
मोक्षयित्वा गृहं गत्वा विप्रार्थं कृतनिश्चयः ॥ १-२-१२२ (४२३)
समयं पालयन्वीरो वनं यत्र जगाम ह ।
पार्थस्य वनवासे च उलूप्या पथि सङ्गमः ॥ १-२-१२३ (४२४)
पुण्यतीर्थानुसंयानं बभ्रुवाहनजन्म च ।
तत्रैव मोक्षयामास पञ्च सोऽप्सरसः शुभाः ॥ १-२-१२४ (४२५)
शापाद्ग्राहत्वमापन्ना ब्राह्मणस्य तपस्विनः ।
प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः ॥ १-२-१२५ (४२६)
द्वारकायां सुभद्रा च कामयानेन कामिनी ।
वासुदेवस्यानुमते प्राप्ता चैव किरीटिना ॥ १-२-१२६ (४२७)
गृहीत्वा हरणं प्राप्ते कृष्णे देवकिनन्दने ।
अभिमन्योः सुभद्रायां जन्म चोत्तमतेजसः ॥ १-२-१२७ (४२८)
द्रौपद्यास्तनयानां च संभवोऽनुप्रकीर्तितः ।
विहारार्थं च गतयोः कृष्णयोर्यमुनामनु ॥ १-२-१२८ (४२९)
संप्राप्तिश्चक्रधनुषोः खाण्डवस्य च दाहनम् ।
मयस्य मोक्षो ज्वलनाद्भुजङ्गस्य च मोक्षणम् ॥ १-२-१२९ (४३०)
महर्षेर्मन्दपालस्य शार्ङ्ग्यां तनयसंभवः ।
इत्येतदादिपर्वोक्तं प्रथमं बहु विस्तरम् ॥ १-२-१३० (४३१)
अध्यायानां शते द्वे तु संख्याते परमर्षिणा ।
सप्तविंशतिरध्याया व्यासेनोत्तमतेजसा ॥ १-२-१३१ (४३२)

अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च ।
श्लोकाश्च चतुराशीतिर्मुनिनोक्ता महात्मना ॥ १-२-१३२ (४३३)
द्वितीयं तु सभापर्व बहुवृत्तान्तमुच्यते ।
सभाक्रिया पाण्डवानां किङ्कराणां च दर्शनम्। १-२-१३३ (४३४)
लोकपालसभाख्यानं नारदाद्देवदर्शिनः ।
राजसूयस्य चारम्भो जरासन्धवधस्तथा ॥ १-२-१३४ (४३५)
गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणम् ।
तथा दिग्विजयोऽत्रैव पाम्डवानां प्रकीर्तितः ॥ १-२-१३५ (४३६)
राज्ञामागमनं चैव सार्हणानां महक्रतौ ।
राजसूयेऽर्घसंवादे शिशुपालवधस्तथा ॥ १-२-१३६ (४३७)
यज्ञे विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च ।
दुर्योधनस्यावहासो भीमेन च सभातले ॥ १-२-१३७ (४३८)
यत्रास्य मन्युरुद्भूतो येन द्यूतमकारयत् ।
यत्र धर्मसुतं द्यूते शकुनिः कितवोऽजयत् ॥ १-२-१३८ (४३९)
यत्र द्यूतार्णवे मग्नां द्रौपदीं नौरिवार्णवात् ।
धृतराष्ट्रो महाप्राज्ञः स्नुषां परमदुःखिताम् ॥ १-२-१३९ (४४०)
तारयामास तांस्तीर्णाञ्ज्ञात्वा दुर्योधनो नृपः ।
पुनरेव ततो द्यूते समाह्वयत पाण्डवान् ॥ १-२-१४० (४४१)
जित्वा स वनवासाय प्रेषयामास तांस्ततः ।
एतत्सर्वं सभापर्व समाख्यातं महात्मना ॥ १-२-१४१ (४४२)
अध्यायाः सप्ततिर्ज्ञेयास्तथा चाष्टौ प्रसंख्यया ।
श्लोकानां द्वे सहस्रे तु पञ्च श्लोकशतानि च ॥ १-२-१४२ (४४३)
श्लोकाश्चैकादश ज्ञेयाः पर्वण्यस्मिन्द्विजोत्तमाः ।
अतः परं तृतीयं तु ज्ञेयमारण्यकं महत् ॥ १-२-१४३ (४४४)
वनवासं प्रयातेषु पाण्डवेषु महात्मसु ।
पौरानुगमनं चैव धर्मपुत्रस्य धीमतः ॥ १-२-१४४ (४४५)
अन्नौषधीनां च कृते पाण्डवेन महात्मना ।
द्विजानां भरणार्थं च कृतमाराधनं रवेः ॥ १-२-१४५ (४४६)
धौम्योपदेशात्तिग्मांशुप्रसादादन्नसंभः ।
हितं च ब्रुवतः क्षत्तुः परित्यागोऽम्बिकासुतात् ॥ १-२-१४६ (४४७)
त्यक्तस्य पाण्डुपुत्राणां समीपगमनं तथा ।
पुनरागमनं चैव धृतराष्ट्रस्य शासनात् ॥ १-२-१४७ (४४८)
कर्णप्रोत्साहनाच्चैव धार्तराष्ट्रस्य दुर्मतेः ।
वनस्थान्पाण्डवान्हन्तुं मन्त्रो दुर्योधनस्यच ॥ १-२-१४८ (४४९)
तं दुष्टभावं विज्ञाय व्यासस्यागमनं द्रुतम् ।
निर्याणप्रतिषेधश्च सुरभ्याख्यानमेव च ॥ १-२-१४९ (४५०)

मैत्रेयागमनं चात्र राज्ञश्चैवानुशासनम् ।
शापोत्सर्गश्च तेनैव राज्ञो दुर्योधनस्य च ॥ १-२-१५० (४५१)
किर्मीरस्य वधश्चात्र भीमसेनेन संयुगे ।
वृष्णीनामागमश्चात्र पाञ्चालानां च सर्वशः ॥ १-२-१५१ (४५२)
श्रुत्वा शकुनिना द्यूते निकृत्या निर्जितांश्च तान् ।
क्रुद्धस्यानुप्रशमनं हरेश्चैव किरीटिना ॥ १-२-१५२ (४५३)
परिदेवनं च पाञ्चाल्या वासुदेवस्य सन्निधौ ।
आश्वासनं च कृष्णेन दुःखार्तायाः प्रकीर्तितम् ॥ १-२-१५३ (४५४)
तथा सौभवधाख्यानमत्रैवोक्तं महर्षिणा ।
सुभद्रायाः सपुत्रायाः कृष्णेन द्वारकां पुरीम् ॥ १-२-१५४ (४५५)
नयनं द्रौपदेयानां धृष्टद्युम्नेन चैव ह ।
प्रवेशः पाण्डवेयानां रम्ये द्वैतवने ततः ॥ १-२-१५५ (४५६)
धर्मराजस्य चात्रैव संवादः कृष्णया सह ।
संवादश्च तथा राज्ञा भीमस्यापि प्रकीर्तितः ॥ १-२-१५६ (४५७)
समीपं पाण्डुपुत्राणां व्यासस्यागमनं तथा ।
प्रतिश्रुत्याथ विद्याया दानं राज्ञो महर्षिणा ॥ १-२-१५७ (४५८)
गमनं काम्यके चापि व्यासे प्रतिगते ततः ।
अस्त्रहेतोर्विवासश्च पार्थस्यामिततेजसः ॥ १-२-१५८ (४५९)
महादेवेन युद्धं च किरातवपुषा सह ।
दर्शनं लोकपालानामस्त्रप्राप्तिस्तथैव च ॥ १-२-१५९ (४६०)
महेन्द्रलोकगमनमस्त्रार्थे च किरीटिनः ।
यत्र चिन्ता समुत्पन्ना धृतराष्ट्रस्य भूयसी ॥ १-२-१६० (४६१)
दर्शनं बृहदश्वस्य महर्षेर्भावितात्मनः ।
युधिष्ठिरस्य चार्तस्य व्यसने परिदेवनम् ॥ १-२-१६१ (४६२)
नलोपाख्यानमत्रैव धर्मिष्ठं करुणोदयम् ।
दमयन्त्याः स्थितिर्यत्र नलस्य चरितं तथा ॥ १-२-१६२ (४६३)
तथाक्षहृदयप्राप्तिस्तस्मादेव महर्षितः ।
लोमशस्यागमस्तत्र स्वर्गात्पाण्डुसुतान्प्रति ॥ १-२-१६३ (४६४)
वनवासगतानां च पाण्डवानां महात्मनाम् ।
स्वर्गे प्रवृत्तिराख्याता लोमशेनार्जुनस्य वै ॥ १-२-१६४ (४६५)
संदेशादर्जुनस्यात्र तीर्थाभिगमनक्रिया ।
तीर्थानां च फलप्राप्तिः पुण्यत्वं चापि कीर्तितम् ॥ १-२-१६५ (४६६)
पुलस्त्यतीर्थयात्रा च नारदेन महर्षिणा ।
तीर्थयात्रा च तत्रैव पाण्डवानां महात्मनां ॥ १-२-१६६ (४६७)
तथा यज्ञविभूतिश्च गयस्यात्र प्रकीर्तिता ॥ १-२-१६७ (४६८)
आगस्त्यमपि चाख्यानं यत्र वातापिभक्षणम् ।

लोपामुद्राभिपमनमपत्यार्थमृषेस्तथा ॥ १-२-१६८ (४६९)
ऋश्यशृङ्गस्य चरितं कौमारब्रह्मचारिणः ।
जामदग्न्यस्य रामस्य चरितं भूरितेजसः ॥ १-२-१६९ (४७०)
कार्तवीर्यवधो यत्र हैहयानां च वर्ण्यते ।
प्रभासतीर्थे पाण्डूनां वृष्णिभिश्च समागमः ॥ १-२-१७० (४७१)
सौकन्यमपि चाख्यानं च्यवनो यत्र भार्गवः ।
शर्यातियज्ञे नासत्यौ कृतवान्सोमपीथिनौ ॥ १-२-१७१ (४७२)
ताभ्यां च यत्र स मुनिर्यौवनं प्रतिपादितः ।
मान्धातुश्चाप्युपाख्यानं राज्ञोऽत्रैवप्रकीर्तितं ॥ १-२-१७२ (४७३)
जन्तूपाख्यानमत्रैव यत्र पुत्रेण सोमकः ।
पुत्रार्थमयजद्राजा लेभे पुत्रशतं च सः ॥ १-२-१७३ (४७४)
ततः श्येनकपोतीयमुपाख्यानमनुत्तमम् ।
इन्द्राग्नी यत्र धर्मश्चाप्यजिज्ञासञ्शिबिं नृपम् ॥ १-२-१७४ (४७५)
अष्टावक्रीयमत्रैव विवादो यत्र बन्दिना ।
अष्टावक्रस्य विप्रर्षेर्जनकस्याध्वरेऽभवत् ॥ १-२-१७५ (४७६)
नैयायिकानां मुख्येन वरुणस्यात्मजेन च ।
पराजितो यत्र बन्दी विवादेन महात्मना ॥ १-२-१७६ (४७७)
विजित्य सागरं प्राप्तं पितरं लब्धवानृषिः ।
यवक्रीतस्य चाख्यानं रैभ्यस्य च महात्मनः ।
गन्धमादनयात्रा च वासो नारायणाश्रमे ॥ १-२-१७७ (४७८)
नियुक्तो भीमसेनश्च द्रौपद्या गन्धमादने ।
व्रजन्पथि महाबाहुर्दृष्टवान्पवनात्मजम् ॥ १-२-१७८ (४७९)
कदलीषण्डमध्यस्थं हनूमन्तं महाबलम् ।
यत्र मन्दारपुष्पार्थे नलिनीं तामधर्षयत् ॥ १-२-१७९ (४८०)
यत्रास्य युद्धमभवत्सुमहद्राक्षसैः सह ।
यक्षैश्चैव महावीर्यैर्मणिमत्प्रमुखैस्तथा ॥ १-२-१८० (४८१)
जटासुरस्य च वधो राक्षसस्य वृकोदरात् ।
वृषपर्वणो राजर्षेस्ततोऽभिगमनं स्मृतम् ॥ १-२-१८१ (४८२)
आर्ष्टिषेणाश्रमे चैषां गमनं वास एव च ।
प्रोत्साहनं च पाञ्चाल्या भीमस्यात्र महात्मनः ॥ १-२-१८२ (४८३)
कैलासारोहणं प्रोक्तं यत्र यक्षैर्बलोत्कटैः ।
युद्धमासीन्महाघोरं मणिमत्प्रमुखैः सह ॥ १-२-१८३ (४८४)
समागमश्च पाण्डूनां यत्र वैश्रवणेन च ।
समागमश्चार्जुनस्य तत्रैव भ्रातृभिः सह ॥ १-२-१८४ (४८५)
अवाप्य दिव्यान्यस्त्राणि गुर्वर्थं सव्यसाचिना ।
निवातकवचैर्युद्धं हिरण्यपुरवासिभिः ॥ १-२-१८५ (४८६)

निवातकवचैर्घोरैर्दानवैः सुरशत्रुभिः ।
पौलोमैः कालकेयैश्च यत्र युद्धं किरीटिनः ॥ १-२-१८६ (४८७)
वधश्चैषां समाख्यातो राज्ञस्तेनैव धीमता ।
अस्त्रसंदर्शनारम्भो धर्मराजस्य सन्निधौ ॥ १-२-१८७ (४८८)
पार्थस्य प्रतिषेधश्छ नारदेन सुरर्षिणा ।
अवरोहणं पुनश्चैव पाण्डूनां गन्धमादनात् ॥ १-२-१८८ (४८९)
भीमस्य ग्रहणं चात्र पर्वताभोगवर्ष्मणा ।
भुजगेन्द्रेण बलिना तस्मिन्सुगहने वने ॥ १-२-१८९ (४९०)
अमोक्षयद्यत्र चैनं प्रश्नानुक्त्वा युधिष्ठिरः ।
काम्यकागमनं चैव पुनस्तेषां महात्मनाम् ॥ १-२-१९० (४९१)
तत्रस्थांश्च पुनर्द्रष्टुं पाण्डवान्पुरुषर्षभान् ।
वासुदेवस्यागमनमत्रैव परिकीर्तितम् ॥ १-२-१९१ (४९२)
मार्कण्डेयसमास्यायामुपाख्यानानि सर्वशः ।
पृथोर्वैन्यस्य यत्रोक्तमाख्यानं परमर्षिणा ॥ १-२-१९२ (४९३)
संवादश्च सरस्वत्यास्तार्क्ष्यर्षेः सुमहात्मनः ।
मत्स्योपाख्यानमत्रैव प्रोच्यते तदनन्तरम् ॥ १-२-१९३ (४९४)
मार्कण्डेयसमास्या च पुराणं परिकीर्त्यते ।
ऐन्द्रद्युम्नामुपाख्यानं तथैवाङ्गिरसं स्मृतम् ॥ १-२-१९४ (४९५)
पतिव्रतायाश्चाख्यानं तथैवाङ्गिरसं स्मृतम् ।
द्रौपद्याः कीर्तितश्चात्र संवादः सत्यभामया ॥ १-२-१९५ (४९६)
पुनर्द्वैतवनं चैव पाण्डवाः समुपागताः ।
घोषयात्रा च गन्धर्वैर्यत्र बद्धः सुयोधनः ॥ १-२-१९६ (४९७)
ह्रियमाणस्तु मन्दात्मा मोक्षितोऽसौ किरीटिना ।
धर्मराजस्य चात्रैव मृगस्वप्ननिदर्शनात् ॥ १-२-१९७ (४९८)
काम्यके काननश्रेष्ठे पुनर्गमनमुच्यते ।
व्रीहिद्रौणिकमाख्यानमत्रैव बहुविस्तरम् ॥ १-२-१९८ (४९९)
दुर्वाससोऽप्युपाख्यानमत्रैव परिकीर्तितम् ।
जयद्रथेनापहारो द्रौपद्याश्चाश्रमान्तरात् ॥ १-२-१९९ (५००)
यत्रैनमन्वयाद्भीमो वायुवेगसमो जवे ।
चक्रे चैनं पञ्चशिखं यत्र भीमो महाबलः ॥ १-२-२०० (५०१)
रामायणमुपाख्यानमत्रैव बहुविस्तरम् ।
यत्र रामेण विक्रम्य निहतो रावणो युधि ॥ १-२-२०१ (५०२)
सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्तितम् ।
कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरंदरात् ॥ १-२-२०२ (५०३)
यत्रास्य शक्तिं तुष्टोऽसावदादेकवधाय च ।
आरणेयमुपाख्यानं यत्र धर्मोऽन्वशात्सुतम् ॥ १-२-२०३ (५०४)

जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशम् ।
एतदारण्यकं पर्व तृतीयं परिकीर्तितम् ॥ १-२-२०४ (५०५)
अत्राध्यायशते द्वे तु संख्यया परिकीर्तिते ।
एकोनसप्ततिश्चैव तथाऽध्यायाः प्रकीर्तिताः ॥ १-२-२०५ (५०६)
एकादश सहस्राणि श्लोकानां षट् शतानि च ।
चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन्प्रकीर्तिताः ॥ १-२-२०६ (५०७)
अतः परं निबोधेदं वैराटं पर्व विस्तरम् ।
विराटनगरे गत्वा श्मशाने विपुलां शमीम् ॥ १-२-२०७ (५०८)
दृष्ट्वा संनिदधुस्तत्र पाण्डवा ह्यायुधान्युत ।
यत्र प्रविश्य नगरं छद्मना न्यवसंस्तु ते ॥ १-२-२०८ (५०९)
पाञ्चालीं प्रार्थयानस्य कामोपहतचेतसः ।
दुष्टात्मनो वधो यत्र कीचकस्य वृकोदरात् ॥ १-२-२०९ (५१०)
पाण्डवान्वेषणार्थं च राज्ञो दुर्योधनस्य च ।
चाराः प्रस्थापिताश्चात्र निपुणाः सर्वतोदिशं ॥ १-२-२१० (५११)
न च प्रवृत्तिस्तैर्लब्धा पाण्डवानां महात्मनाम् ।
गोग्रहश्च विराटस्य त्रिगर्तैः प्रथमं कृतः ॥ १-२-२११ (५१२)
यत्रास्य युद्धं सुमहत्तैरासील्लोमहर्षणम् ।
ह्रियमाणश्च यत्रासौ भीमसेनेन मोक्षितः ॥ १-२-२१२ (५१३)
गोधनं च विराटस्य मोक्षितं यत्र पाण्डवैः ।
अनन्तरं च कुरुभिस्तस्य गोग्रहणं कृतम् ॥ १-२-२१३ (५१४)
समस्ता यत्र पार्थेन निर्जिताः कुरवो युधि ।
प्रत्याहृतं गोधनं च विक्रमेण किरीटिना ॥ १-२-२१४ (५१५)
विराटेनोत्तरा दत्ता स्नुषा यत्र किरीटिनः ।
अभिमन्युं समुद्दिश्य सौभद्रमरिघातिनम् ॥ १-२-२१५ (५१६)
चतुर्थमेतद्विपुलं वैराटं पर्व वर्णितम् ।
अत्रापि परिसंख्याता अध्यायाः परमर्षिणा ॥ १-२-२१६ (५१७)
सप्तषष्टिरथो पूर्णाः श्लोकानामपि मे शृणु ।
श्लोकानां द्वे सहस्रे तु श्लोकाः पञ्चाशदेव तु ॥ १-२-२१७ (५१८)
उक्तानि वेदविदुषा पर्वण्यस्मिन्महर्षिणा ।
उद्योगपर्व विज्ञेयं पञ्चमं शृण्वतः परम् ॥ १-२-२१८ (५१९)
उपप्लाव्ये निविष्टेषु पाण्डवेषु जिगीषया ।
दुर्योधनोऽर्जुनश्चैव वासुदेवमुपस्थितौ ॥ १-२-२१९ (५२०)
साहाय्यमस्मिन्समरे भवान्नौ कर्तुमर्हति ।
इत्युक्ते वचने कृष्णो यत्रोवाच महामतिः ॥ १-२-२२० (५२१)
अयुध्यमानमात्मानं मन्त्रिणं पुरुषर्षभौ ।
अक्षौहिणीं वा सैन्यस्य कस्य किं वा ददाम्यहम् ॥ १-२-२२१ (५२२)

वव्रे दुर्योधनः सैन्यं मन्दात्मा यत्र दुर्मतिः ।
अयुध्यमानं सचिवं वव्रे कृष्णं धनंजयः ॥ १-२-२२२ (५२३)
मद्रराजं व राजानमायान्तं पाण्डवान्प्रति ।
उपहारैर्वञ्चायत्वा वर्त्मन्येव सुयोधनः ॥ १-२-२२३ (५२४)
वरदं तं वरं वव्रे साहाय्यं क्रियतां मम ।
शल्यस्तस्मै प्रतिश्रुत्य जगामोद्दिश्य पाण्डवान् ॥ १-२-२२४ (५२५)
शान्तिपूर्वं चाकथयद्यत्रेन्द्रविजयं नृपः ।
पुरोहितप्रेषणं च पाण्डवैः कौरवान्प्रति ॥ १-२-२२५ (५२६)
वैचित्रवीर्यस्य वचः समादाय पुरोधसः ।
तथेन्द्रविजयं चापि यानं चैव पुरोधसः ॥ १-२-२२६ (५२७)
संजयं प्रेषयामास शमार्थी पाण्डवान्प्रति ।
यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान् ॥ १-२-२२७ (५२८)
श्रुत्वा च पाण्डवान्यत्र वासुदेवपुरोगमान् ।
प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिन्तया ॥ १-२-२२८ (५२९)
विदुरो यत्र वाक्यानि विचित्राणि हितानि च ।
श्रावयामास राजानं धृतराष्ट्रं मनीषिणम् ॥ १-२-२२९ (५३०)
तथा सनत्सुजातेन यत्राध्यात्ममनुत्तमम् ।
मनस्तापान्वितो राजा श्रावितः शोकलालसः ॥ १-२-२३० (५३१)
प्रभाते राजसमितौ संजयो यत्र वा विभो ।
ऐकात्म्यं वासुदेवस्य प्रोक्तवानर्जुनस्य च ॥ १-२-२३१ (५३२)
यत्र कृष्णो दयापन्नः सन्धिमिच्छन्महामतिः ।
स्वयमागाच्छमं कर्तुं नगरं नागसाह्वयम् ॥ १-२-२३२ (५३३)
प्रत्याख्यानं च कृष्णस्य राज्ञा दुर्योधनेन वै ।
शमार्थे याचमानस्य पक्षयोरुभयोर्हितम् ॥ १-२-२३३ (५३४)
दम्भोद्भवस्य चाख्यानमत्रैव परिकीर्तितम् ।
वरान्वेषणमत्रैव मातलेश्च महात्मनः ॥ १-२-२३४ (५३५)
महर्षेश्चापि चरितं कथितं गालवस्य वै ।
विदुलायाश्च पुत्रस्य प्रोक्तं चाप्यनुशासनम् ॥ १-२-२३५ (५३६)
कर्णदुर्योधनादीनां दुष्टं विज्ञाय मन्त्रितम् ।
योगेश्वरत्वं कृष्णेन यत्र राज्ञां प्रदर्शितम् ॥ १-२-२३६ (५३७)
रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः ।
उपायपूर्वं शौटीर्यात्प्रत्याख्यातश्च तेन सः ॥ १-२-२३७ (५३८)
आगम्य हास्तिनपुरादुपप्लाव्यमरिंदमः ।
पाण्डवानां यथावृत्तं सर्वमाख्यातवान्हरिः ॥ १-२-२३८ (५३९)
ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम् ।
साङ्ग्रामिकं ततः सर्वं सज्जं चक्रुः परंतपाः ॥ १-२-२३९ (५४०)

ततो युद्धाय निर्याता नराश्वरथदन्तिनः ।
नगराद्धास्तिनपुराद्बलसंख्यानमेवच ॥ १-२-२४० (५४१)
यत्र राज्ञा ह्युलूकस्य प्रेषणं पाम्डवान्प्रति ।
श्वोभाविनि महायुद्धे दौत्येन कृतवान्प्रभुः ॥ १-२-२४१ (५४२)
रथातिरथसंख्यानमम्बोपाख्यानमेव च ।
एतत्सुबहुवृत्तान्तं पञ्चमं पर्व भारते ॥ १-२-२४२ (५४३)
उद्योगपर्व निर्दिष्टं सन्धिविग्रहमिश्रितम् ।
अध्यायानां शतं प्रोक्तं षडशीतिर्महर्षिणा ॥ १-२-२४३ (५४४)
श्लोकानां षट् सहस्राणि तावन्त्येव शतानि च ।
श्लोकाश्च नवतिः प्रोक्तास्तथैवाष्टौ महात्मना ॥ १-२-२४४ (५४५)
व्यासेनोदारमतिना पर्वण्यस्मिंस्तपोधनाः ।
अतः परं विचित्रार्थं भीष्मपर्व प्रचक्षते ॥ १-२-२४५ (५४६)
जम्बूखण्डविनिर्माणं यत्रोक्तं संजयेन ह ।
यत्र यौधिष्ठिरं सैन्यं विषादमगमत्परम् ॥ १-२-२४६ (५४७)
यत्र युद्धमभूद्धोरं दसाहानि सुदारुणम् ।
कश्मलं यत्र पार्थस्य वासुदेवो महामतिः ॥ १-२-२४७ (५४८)
मोहजं नाशयामास हेतुभिर्मोक्षदर्शिभिः ।
समीक्ष्यादोक्षजः क्षिप्रं युधिष्ठिरहिते रतः ॥ १-२-२४८ (५४९)
रथादाप्लुत्य वेगेन स्वयं कृष्ण उदारधीः ।
प्रतोदपाणिराधावद्भीष्मं हन्तुं व्यपेतभीः ॥ १-२-२४९ (५५०)
वाक्यप्रतोदाभिहतो यत्र कृष्णेन पाण्डवः ।
गाण्डीवधन्वा समरे सर्वशस्त्रभृतां वरः ॥ १-२-२५० (५५१)
शिखण्डिनं पुरस्कृत्य यत्र पार्थो महाधनुः ।
विनिघ्नन्निशितैर्बाणै रथाद्भीष्ममपातयत् ॥ १-२-२५१ (५५२)
शरतल्पगतश्चैव भीष्मो यत्र बभूव ह ।
षष्ठमेतत्समाख्यातं भारते पर्व विस्तृतम् ॥ १-२-२५२ (५५३)
अध्यायानां शतं प्रोक्तं तथा सप्तदशापरे ।
पञ्च श्लोकसहस्राणि संख्ययाष्टौ शतानि च ॥ १-२-२५३ (५५४)
श्लोकाश्च चतुराशीतिरस्मिन्पर्वणि कीर्तिताः ।
व्यासेन वेदविदुषा संख्याता भीष्मपर्वणि ॥ १-२-२५४ (५५५)
द्रोणपर्व ततश्चित्रं बहुवृत्तान्तमुच्यते ।
सैनापत्येऽभिषिक्तोऽथ यत्राचार्यः प्रतापवान् ॥ १-२-२५५ (५५६)
दुर्योधनस्य प्रीत्यर्थं प्रतिजज्ञे महास्त्रवित् ।
ग्रहणं धर्मराजस्य पाण्डुपुत्रस्य धीमतः ॥ १-२-२५६ (५५७)
यत्र संशप्तकाः पार्थमपनिन्यू रणाजिरात् ।
भगदत्तो महाराजो यत्र शक्रसमो युधि ॥ १-२-२५७ (५५८)

सुप्रतीकेन नागेन स हि शान्तः किरीटिना ।
यत्राभिमन्युं बहवो जघ्नुरेकं महारथाः ॥ १-२-२५८ (५५९)
जयद्रथमुखा बालं शूरमप्राप्तयौवनम् ।
हतेऽभिमन्यौ क्रुद्धेन यत्र पार्थेन संयुगे ॥ १-२-२५९ (५६०)
अक्षौहिणीः सप्त हत्वा हतो राजा जयद्रथः ।
यत्र भीमो महाबाहुः सात्यकिश्च महारथः ॥ १-२-२६० (५६१)
अन्वेषणार्थं पार्थस्य युधिष्ठिरनृपाज्ञया ।
प्रविष्टौ भारतीं सेनामप्रधृष्यां सुरैरपि ॥ १-२-२६१ (५६२)
संशप्तकावशेषं च कृतं निःशेषमाहवे ।
संशप्तकानां वीराणां कोट्यो नव महात्मनाम् ॥ १-२-२६२ (५६३)
किरीटिनाभिनिष्क्रम्य प्रापिता यमसादनम् ।
धृतराष्ट्रस्य पुत्राश्च तथा पाषाणयोधिनः ॥ १-२-२६३ (५६४)
नारायणाश्च गोपालाः समरे चित्रयोधिनः ।
अलम्बुषः श्रुतायुश्च जलसन्धश्च वीर्यवान् ॥ १-२-२६४ (५६५)
सौमदत्तिर्विराटश्च द्रुपदश्च महारथः ।
घटोत्कचादयश्चान्ये निहता द्रोणपर्वणि ॥ १-२-२६५ (५६६)
अश्वत्थामापि चात्रैव द्रोणे युधि निपातिते ।
अस्त्रं प्रादुश्चकारोग्रं नारायणममर्षितः ॥ १-२-२६६ (५६७)
आग्नेयं कीर्त्यते यत्र रुद्रमाहात्म्यमुत्तमम् ।
व्यासस्य चाप्यागमनं माहात्म्यं कृष्णपार्थयोः ॥ १-२-२६७ (५६८)
सप्तमं भारते पर्व महदेतदुदाहृतम् ।
यत्र ते पृथिवीपालाः प्रायशो निधनं गताः ॥ १-२-२६८ (५६९)
द्रोणपर्वणि ये शऊरा निर्दिष्टाः पुरुषर्षभाः ।
अत्राध्यायशतं प्रोक्तं तथाध्यायाश्च सप्ततिः ॥ १-२-२६९ (५७०)
अष्टौ श्लोकसहस्राणि तथा नव शतानि च ।
श्लोका नव तथैवात्र संख्यातास्तत्त्वदर्शिना ॥ १-२-२७० (५७१)
पाराशर्येण मुनिनां संचिन्त्य द्रोणपर्वणि ।
अतः परं कर्णपर्व प्रोच्यते परमाद्भुतम् ॥ १-२-२७१ (५७२)
सारथ्ये विनियोगश्च मद्रराजस्य धीमतः ।
आख्यातं यत्र पौरामं त्रिपुरस्य निपातनम् ॥ १-२-२७२ (५७३)
प्रयाणे परुषश्चात्र संवादः कर्णशल्ययोः ।
हंसकाकीयमाख्यानं तत्रैवाक्षेपसंहितम् ॥ १-२-२७३ (५७४)
वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना ।
दण्डसेनस्य च ततो दण्डस्य च वधस्तथा ॥ १-२-२७४ (५७५)
द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः ।
संशयं गमितो युद्धे मिषतां सर्वधन्विनाम् ॥ १-२-२७५ (५७६)

अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः ।
यत्रैवानुनयः प्रोक्तो माधवेनार्जुनस्य हि ॥ १-२-२७६ (५७७)
प्रतिज्ञापूर्वकं चापि वक्षो दुःशासनस्य च ।
भित्त्वा वृकोदरो रक्तं पीतवान्यत्र संयुगे ॥ १-२-२७७ (५७८)
द्वैरथे यत्र पार्थेन हतः कर्णो महारथः ।
अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः ॥ १-२-२७८ (५७९)
एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि ।
चत्वार्येव सहस्राणि नव श्लोकशतानि च ॥ १-२-२७९ (५८०)
चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन्प्रकीर्तिताः ।
अतः परं विचित्रार्थं शल्यपर्व प्रकीर्तितम् ॥ १-२-२८० (५८१)
हतप्रवीरे सैन्ये तु नेता मद्रेश्वरोऽभवत् ।
यत्र कौमारमाख्यानमभिषेकस्य कर्म च ॥ १-२-२८१ (५८२)
वृत्तानि चाथ युद्धानि कीर्त्यन्ते यत्र भागशः ।
विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्यते ॥ १-२-२८२ (५८३)
शल्यस्य निधनं चात्र धर्मराजान्महात्मनः ।
शकुनेश्च वधोऽत्रैव सहदेवेन संयुगे ॥ १-२-२८३ (५८४)
सैन्ये च हतभूयिष्ठे किंचिच्छिष्टे सुयोधनः ।
ह्रदं प्रविश्य यत्रासौ संस्तभ्यापोव्यवस्थितः ॥ १-२-२८४ (५८५)
प्रवृत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः ।
क्षेपयुक्तैर्वचोभिश्च धर्मराजस्य धीमतः ॥ १-२-२८५ (५८६)
ह्रदात्समुत्थितो यत्र धार्तराष्ट्रोऽत्यमर्षणः ।
भीमेन गदया युद्धं यत्रासौ कृतवान्सह ॥ १-२-२८६ (५८७)
समवाये च युद्धस्य रामस्यागमनं स्मृतम् ।
सरस्वत्याश्च तीर्थानां पुण्यता परिकीर्तिता ॥ १-२-२८७ (५८८)
गदायुद्धं च तुमुलमत्रैव परिकीर्तितम् ।
दुर्योधनस्य राज्ञोऽथ यत्र भीमेन संयुगे ॥ १-२-२८८ (५८९)
ऊरू भग्नौ प्रसह्याजौ गदया भीमवेगया ।
नवमं पर्व निर्दिष्टमेतदद्भुतमर्थवत् ॥ १-२-२८९ (५९०)
एकोनषष्टिरध्यायाः पर्वण्यत्र प्रकीर्तिताः ।
संख्याता बहुवृत्तान्ताः श्लोकसंख्याऽत्र कथ्यते ॥ १-२-२९० (५९१)
त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा ।
मुनिना संप्रणीतानि कौरवाणां यशोभृता ॥ १-२-२९१ (५९२)
अतः परं प्रवक्ष्यामि सौप्तिकं पर्व दारुणम् ।
भग्नोरुं यत्र राजानं दुर्योधनममर्षणम् ॥ १-२-२९२ (५९३)
अपयातेषु पार्थेषु त्रयस्तेऽभ्याययू रथाः ।
कृतवर्मा कृपो द्रौणिः सायाह्ने रुधिरोक्षितम् ॥ १-२-२९३ (५९४)

समेत्य ददृशुर्भूमौ पतितं रणमूर्धनि ।
प्रतिजज्ञे दृढक्रोधो द्रौणिर्यत्र महारथः ॥ १-२-२९४ (५९५)
अहत्वा सर्वपाञ्चालान्धृष्टद्युम्नपुरोगमान् ।
पाण्डवांश्च सहामात्यान्न विमोक्ष्यामि दंशनं ॥ १-२-२९५ (५९६)
यत्रैवमुक्त्वा राजानमपक्रम्य त्रयो रथाः ।
सूर्यास्तमनवेलायामासेदुस्ते महद्वनम् ॥ १-२-२९६ (५९७)
न्यग्रोधस्याथ महतो यत्राधस्ताद्व्यवस्थिताः ।
ततः काकान्बहूनात्रौ दृष्ट्वोलूकेन हिंसितान् ॥ १-२-२९७ (५९८)
द्रौणिः क्रोधसमाविष्टः पितुर्वधमनुस्मरन् ।
पाञ्चालानां प्रसुप्तानां वधं प्रति मनो दधे ॥ १-२-२९८ (५९९)
गत्वा च शिबिरद्वारि दुर्दर्शं तत्र राक्षसम् ।
घोररूपमपश्यत्स दिवामावृत्य धिष्ठिरम् ॥ १-२-२९९ (६००)
तेन व्याघातमस्त्राणां क्रियमाणमवेक्ष्य च ।
द्रौणिर्यत्र विरूपाक्षं रुद्रमाराध्य सत्वरः ॥ १-२-३०० (६०१)
प्रसुप्तान्निशि विश्वस्तान्धृष्टद्युम्नपुरोगमान् ।
पाञ्चालान्सपरीवारान्द्रौपदेयांश्च सर्वशः ॥ १-२-३०१ (६०२)
कृतवर्मणा च सहितः कृपेण च निजघ्निवान् ।
यत्रामुच्यन्त ते पार्थाः पञ्च कृष्णबलाश्रयात् ॥ १-२-३०२ (६०३)
सात्यकिश्च महेष्वासः शेषाश्च निधनं गताः ।
पाञ्चालानां प्रसुप्तानां यत्र द्रोणसुताद्वधः ॥ १-२-३०३ (६०४)
धृष्टद्युम्नस्य सूतेन पाण्डवेषु निवेदितः ।
द्रौपदी पुत्रशोकार्ता पितृभ्रातृवधार्दिता ॥ १-२-३०४ (६०५)
कृतानशनसंकल्पा यत्र भर्तॄनुपाविशत् ।
द्रौपदीवचनाद्यत्र भीमो भीमपराक्रमः ॥ १-२-३०५ (६०६)
प्रियं तस्याश्चिकीर्षन्वै गदामादाय वीर्यवान् ।
अन्वधावत्सुसंक्रुद्धो भारद्वाजं गुरोः सुतम् ॥ १-२-३०६ (६०७)
भीमसेनभयाद्यत्र दैवेनाभिप्रचोदितः ।
अपाण्डवायेति रुषा द्रौणिरस्त्रमवासडदत् ॥ १-२-३०७ (६०८)
मैवमित्यब्रवीत्कृष्णः शमयंस्तस्य तद्वचः ।
यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः ॥ १-२-३०८ (६०९)
द्रौणेश्च द्रोहबुद्धित्वं वीक्ष्य पापात्मनस्तदा ।
द्रौणिद्वैपायनादीनां शापाश्चान्योन्यकारिताः ॥ १-२-३०९ (६१०)
मणिं तथा समादाय द्रोणपुत्रान्महारथात् ।
पाण्डवाः प्रददुर्हृष्टा द्रौपद्यै जितकाशिनः ॥ १-२-३१० (६११)
एतद्वै दशमं पर्व सौप्तिकं समुदाहृतम् ।
अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महात्मना ॥ १-२-३११ (६१२)

श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया ।
श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना ॥ १-२-३१२ (६१३)
सौप्तिकैषीकसंबन्धे पर्वण्युत्तमतेजसी ।
अत ऊर्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयम् ॥ १-२-३१३ (६१४)
पुत्रशोकाभिसंतप्तः प्रज्ञाचक्षुर्नराधिपः ।
कृष्णोपनीतां यत्रासावायसीं प्रतिमां दृढां ॥ १-२-३१४ (६१५)
भीमसेनद्रोहबुद्धिर्धृतराष्ट्रो बभञ्जह ।
तथा शोकाभितप्तस्य धृतराष्ट्रस्य धीमतः ॥ १-२-३१५ (६१६)
संसारदहनं बुद्ध्या हेतुभिर्मोक्षदर्शनैः ।
विदुरेण च यत्रास्य राज्ञ आश्वासनं कृतम् ॥ १-२-३१६ (६१७)
धृतराष्ट्रस्य चात्रैव कौरवायोधनं तथा ।
सान्तःपुरस्य गमनं शोकार्तस्य प्रकीर्तितम् ॥ १-२-३१७ (६१८)
विलापो वीरपत्नीनां यत्रातिकरुणः स्मृतः ।
क्रोधावेशः प्रमोहश्च गान्धारीधृतराष्ट्रयोः ॥ १-२-३१८ (६१९)
यत्र तान्क्षत्रियाः शूरान्सङ्ग्रामेष्वनिवर्तिनः ।
पुत्रान्भ्रातॄन्पितॄंश्चैव ददृशुर्निहतान्रणे ॥ १-२-३१९ (६२०)
पुत्रपौत्रवधार्तायास्तथात्रैव प्रकीर्तिता ।
गान्धार्याश्चापि कृष्णेन क्रोधोपशमनक्रिया ॥ १-२-३२० (६२१)
यत्र राजा महाप्राज्ञः सर्वधर्मभृतां वरः ।
राज्ञांतानि शरीराणि दाहयामास शास्त्रतः ॥ १-२-३२१ (६२२)
तोयकर्मणि चारब्धे राज्ञामुदकदानिके ।
गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः ॥ १-२-३२२ (६२३)
सुतस्यैतदिह प्रोक्तं व्यासेन परमर्षिणा ।
एतदेकादशं पर्व शोकवैक्लव्यकारणम् ॥ १-२-३२३ (६२४)
प्रणीतं सज्जनमनोवैक्लव्याश्रुप्रवर्तकम् ।
सप्तविंशतिरध्यायाः पर्वण्यस्मिन्प्रकीर्तिताः ॥ १-२-३२४ (६२५)
श्लोकसप्तशती चापि पञ्चसप्ततिसंयुता ।
संख्यया भारताख्यानमुक्तं व्यासेन धीमता ॥ १-२-३२५ (६२६)
अतः परं शान्तिपर्व द्वादशं बुद्धिवर्धनम् ।
यत्र निर्वेदमापन्नो धर्मराजो युधिष्ठिरः ॥ १-२-३२६ (६२७)
घातयित्वा पितॄन्भ्रातॄन्पुत्रान्संबन्धिमातुलान् ।
शान्तिपर्वणि धर्माश्च व्याख्याताःशारतल्पिकाः ॥ १-२-३२७ (६२८)
राजभिर्वेदितव्यास्ते सम्यग्ज्ञानबुभुत्सुभिः ।
आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शिनः ॥ १-२-३२८ (६२९)
यान्बुद्ध्वा पुरुषः सम्यक्सर्वज्ञत्वमवाप्नुयात् ।
मोक्षधर्माश्च कथिता विचित्रा बहुविस्तराः ॥ १-२-३२९ (६३०)

द्वादशं पर्व निर्दिष्टमेतत्प्राज्ञजनप्रियम् ।
अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयम् ॥ १-२-३३० (६३१)
विंशच्चैव तथाध्याया नव चैव तपोधाः ।
चतुर्दशसहस्राणि तथा सप्तशतानि च ॥ १-२-३३१ (६३२)
सप्तश्लोकास्तथैवात्र पञ्चविंशतिसंख्यया ।
अत ऊर्ध्वं च विज्ञेयमनुशासनमुत्तमम् ॥ १-२-३३२ (६३३)
यत्र प्रकृतिमापन्नः श्रुत्वा धर्मविनिश्चयम् ।
भीष्माद्भागीरथीपुत्रात्कुरुराजो युधिष्ठिरः ॥ १-२-३३३ (६३४)
व्यवहारोऽत्र कार्त्स्न्येन धर्मार्थीयः प्रकीर्तितः ।
विविधानां च दानानां फलयोगाः प्रकीर्तिताः ॥ १-२-३३४ (६३५)
तथा पात्रविशेषाश्च दानानां च परो विधिः ।
आचारविधियोगश्च सत्यस्य च परा गतिः ॥ १-२-३३५ (६३६)
महाभाग्यं गवां चैव ब्राह्मणानां तथैव च ।
रहस्यं चैव धर्माणां देशकालोपसंहितम् ॥ १-२-३३६ (६३७)
एतत्सुबहुवृत्तान्तमुत्तमं चानुशासनम् ।
भीष्मस्यात्रैव संप्राप्तिः स्वर्गस्य परिकीर्तिता ॥ १-२-३३७ (६३८)
एतत्त्रयोदशं पर्व धर्मनिश्चयकारकम् ।
अध्यायानां शतं त्वत्र षट्चत्वारिंशदेव तु ॥ १-२-३३८ (६३९)
श्लोकानां तु सहस्राणि प्रोक्तान्यष्टौ प्रसंख्यया ।
ततोऽश्वमेधिकं नाम पर्व प्रोक्तं चतुर्दशम् ॥ १-२-३३९ (६४०)
तत्संवर्तमरुत्तीयं यत्राख्यानमनुत्तमम् ।
सुवर्णकोशसंप्राप्तिर्जन्म चोक्तं परीक्षितः ॥ १-२-३४० (६४१)
दग्धस्यास्त्राग्निना पूर्वं कृष्णात्संजीवनं पुनः ।
चर्यायां हयमुत्सृष्टं पाण्डवस्यानुगच्छतः ॥ १-२-३४१ (६४२)
तत्र तत्र च युद्धानि राजपुत्रैरमर्षणैः ।
चित्राङ्गदायाः पुत्रेण स्वपुत्रेण धनंजयः ॥ १-२-३४२ (६४३)
सङ्ग्रामे बभ्रुवाहेन संशयं चात्र जग्मिवान् ।
सुदर्शनं तथाऽऽख्यानं वैष्णवं धर्ममेव च ।
अश्वमेधे महायज्ञे नकुलाख्यानमेव च ॥ १-२-३४३ (६४४)
इत्याश्वमेधिकं पर्व प्रोक्तमेतन्महाद्भुतम् ।
अध्यायानां शतं चैव त्रयोऽध्यायाश्च कीर्तिताः ॥ १-२-३४४ (६४५)
त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च ।
विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥ १-२-३४५ (६४६)
ततस्त्वाश्रमवासाख्यं पर्व पञ्चदशं स्मृतम् ।
यत्र राज्यं समुत्सृज्य गान्धार्या सहितो नृपः ॥ १-२-३४६ (६४७)
धृतराष्ट्रोश्रमपदं विदुरश्च जगाम ह ।

यं दृष्ट्वा प्रस्थितं साध्वी पृथाप्यनुययौ तदा ॥१-२-३४७ (६४८)
पुत्रराज्यं परित्यज्य गुरुशुश्रूषणे रता ।
यत्र राजा हतान्पुत्रान्पौत्रानन्यांश्च पार्थिवान् ॥१-२-३४८ (६४९)
लाकान्तरगतान्वीरानपश्यत्पुनरागतान् ।
ऋषेः प्रसादात्कृष्णस्य दृष्ट्वाश्चर्यमनुत्तमम् ॥१-२-३४९ (६५०)
त्यक्त्वा शोकं सदारश्च सिद्धिं परमिकां गतः ।
यत्र धर्मं समाश्रित्य विदुरः सुगतिं गतः ॥१-२-३५० (६५१)
संजयश्च सहामात्यो विद्वान्गावल्गणिर्वशी ।
ददर्श नारदं यत्र धर्मराजो युधिष्ठिरः ॥१-२-३५१ (६५२)
नारदाच्चैव शुश्राव वृष्णीनां कदनं महत् ।
एतदाश्रमवासाख्यं पर्वोक्तं महदद्भुतम् ॥१-२-३५२ (६५३)
द्विचत्वारिंशदध्यायाः पर्वैतदभिसङ्ख्यया ।
सहस्रमेकं श्लोकानां पञ्चश्लोकशतानि च ॥१-२-३५३ (६५४)
षडेव च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ।
अतः परं निबोधेदं मौसलं पर्व दारुणम् ॥१-२-३५४ (६५५)
यत्र ते पुरुषव्याघ्राः शस्त्रस्पर्शहता युधि ।
ब्रह्मदण्डविनिष्पिष्टाः समीपे लवणाम्भसः ॥१-२-३५५ (६५६)
आपाने पानकलिता दैवेनाभिप्रचोदिताः ।
एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरम् ॥१-२-३५६ (६५७)
यत्र सर्वक्षयं कृत्वा तावुभौ रामकेशवौ ।
नातिचक्रामतुः कालं प्राप्तं सर्वहरं महत् ॥१-२-३५७ (६५८)
यत्रार्जुनो द्वारवतीमेत्य वृष्णिविनाकृताम् ।
दृष्ट्वा विषादमगमत्परां चार्तिं नरर्षभः ॥१-२-३५८ (६५९)
स संस्कृत्य नरश्रेष्ठं मातुलं शौरिमात्मनः ।
ददर्श यदुवीराणामापाने वैशसं महत् ॥१-२-३५९ (६६०)
शरीरं वासुदेवस्य रामस्य च महात्मनः ।
संस्कारं लम्भयामास वृष्णीनां च प्रधानतः ॥१-२-३६० (६६१)
सवृद्धबालमादाय द्वारवत्यास्ततो जनम् ।
ददर्शापदि कष्टायां गाण्डीवस्य पराभवम् ॥१-२-३६१ (६६२)
सर्वेषां चैव दिव्यानामस्त्राणामप्रसन्नताम् ।
नाशं वृष्णिकलत्राणां प्रभावानामनित्यताम् ॥१-२-३६२ (६६३)
दृष्ट्वा निर्वेदमापन्नो व्यासवाक्यप्रचोदितः ।
धर्मराजं समासाद्य संन्यासं समरोचयत् ॥१-२-३६३ (६६४)
इत्येतन्मौसलं पर्व षोडशं परिकीर्तितम् ।
अध्यायाष्टौ समाख्याताः श्लोकानां च शतत्रयम् ॥१-२-३६४ (६६५)
श्लोकानां विंशतिश्चैव संख्याता तत्त्वदर्शिना ।

महाप्रस्थानिकं तस्मादूर्ध्वं सप्तदशं स्मृतम् ॥ १-२-३६५ (६६६)
यत्र राज्यं परित्यज्य पाण्डवाः पुरुषर्षभाः ।
द्रौपद्या सहिता देव्या महाप्रस्थानमास्थिताः ॥ १-२-३६६ (६६७)
यत्र तेऽग्निं ददृशिरे लौहित्यं प्राप्य सागरम् ।
यत्राग्निना चोदितश्च पार्थस्तस्मै महात्मने ॥ १-२-३६७ (६६८)
ददौ संपूज्य तद्दिव्यं गाण्डीवं धनुरुत्तमम् ।
यत्र भ्रातॄन्निपतितान्द्रौपदीं च युधिष्ठिरः ॥ १-२-३६८ (६६९)
दृष्ट्वा हित्वा जगामैव सर्वाननवलोकयन् ।
एतत्सप्तदशं पर्व महाप्रस्थानिकं स्मृतम् ॥ १-२-३६९ (६७०)
यत्राध्यायास्त्रयः प्रोक्ताः श्लोकानां च शतत्रयम् ।
विंशतिश्च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ॥ १-२-३७० (६७१)
स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषम् ।
प्राप्तं दैवरथं स्वर्गान्निष्टवान्यत्र धर्मराट् ॥ १-२-३७१ (६७२)
आरोदुं सुमहाप्राज्ञ आनृशंस्याच्छुना विना ।
तामस्याविचलां ज्ञात्वा स्थितिं धर्मे महात्मनः ॥ १-२-३७२ (६७३)
श्वरूपं यत्र तत्त्यक्त्वा धर्मेणासौ समन्वितः ।
स्वर्गं प्राप्तःसच तथा यातनाविपुला भृशम् ॥ १-२-३७३ (६७४)
देवदूतेन नरकं यत्र व्याजेन दर्शितम् ।
शुश्राव यत्र धर्मात्मा भ्रातॄणां करुणागिरः ॥ १-२-३७४ (६७५)
निदेशे वर्तमानानां देशे तत्रैव वर्तताम् ।
अनुदर्शितश्च धर्मेण देवराज्ञा च पाण्डवः ॥ १-२-३७५ (६७६)
आप्लुत्याकाशगङ्गायां देहं त्यक्त्वा स मानुषम् ।
स्वधर्मनिर्जितं स्थानं स्वर्गे प्राप्य स धर्मराट् ॥ १-२-३७६ (६७७)
मुमुदे पूजितः सर्वैः सेन्द्रैः सुरगणैः सह ।
एतदष्टादशं पर्व प्रोक्तं व्यासेन धीमता ॥ १-२-३७७ (६७८)
अध्यायाः पञ्च संख्याताः पर्वम्यस्मिन्महात्मना ।
श्लोकानां द्वे शते चैव प्रसंख्याते तपोधाः ॥ १-२-३७८ (६७९)
नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा ।
अष्टादशैवमेतानि पर्वाण्येतान्यशेषतः ॥ १-२-३७९ (६८०)
खिलेषु हरिवंशश्च भविष्यं च प्रकीर्तितम् ।
दश श्लोकसहस्राणि विंशच्छ्लोकशतानि च ॥ १-२-३८० (६८१)
खिलेषु हरिवंशे च संख्यातानि महर्षिणा ।
एतत्सर्वं समाख्यातं भारते पर्वसंग्रहः ॥ १-२-३८१ (६८२)
अष्टादश समाजग्मुरक्षौहिण्यो ययुत्सया ।
तन्महादारुणं युद्धमहान्यष्टादशाभवत् ॥ १-२-३८२ (६८३)
यो विद्याच्चतुरो वेदान्साङ्गोपनिषदो द्विजः ।

न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः ॥१-२-३८३ (६८४)
अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥१-२-३८४ (६८५)
श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते ।
पुंस्कोकिलगिरं श्रुत्वा रूक्षा ध्वाङ्क्षस्य वागिव ॥१-२-३८५ (६८६)
इतिहासोत्तमादस्माञ्जायन्ते कविबुद्धयः ।
पञ्चभ्य इव् भूतेभ्यो लोकसंविधयस्त्रयः ॥१-२-३८६ (६८७)
अस्याख्यानस्य विषये पुराणं वर्तते द्विजाः ।
अन्तरिक्षस्य विषये प्रजा इव चतुर्विधाः ॥१-२-३८७ (६८८)
क्रियागुणानां सर्वेषामिदमाख्यानमाश्रयः ।
इन्द्रियाणां समस्तानां चित्रा इव मनः क्रियाः ॥१-२-३८८ (६८९)
अनाश्रित्यैतदाख्यानं कथा भुवि न विद्यते ।
आहारमनपाश्रित्य शरीरस्येव धारणम् ॥१-२-३८९ (६९०)
इदं कविवरैः सर्वैराख्यानमुपजीव्यते ।
उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः ॥१-२-३९० (६९१)
अस्य काव्यस्य कवयो न समर्था विशेषणे ।
साधोरिव गृहस्थस्य शेषास्त्रय इवाश्रमाः ॥१-२-३९१ (६९२)
धर्मे मतिर्भवतु वः सततोत्थितानां
स ह्येक एव परलोकगतस्य बन्धुः ।
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना
नैवाप्तभावमुपयान्ति न च स्थिरत्वम् ॥ १-२-३९२ (६९३)
द्वैपायनौष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ॥ १-२-३९३ (६९४)
यदह्ना कुरुते पाप ब्राह्मणस्त्विन्द्रियैश्चरन् ।
महाभारतमाख्याय सन्ध्यां मुच्यति पश्चिमाम् ॥१-२-३९४ (६९५)
यद्रात्रौ कुरुते पापं कर्मणा मनसा गिरा ।
महाभारतमाख्याय पूर्वां सन्ध्यां प्रमुच्यते ॥१-२-३९५ (६९६)
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुश्रुताय ।
पुण्यां च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ॥ १-२-३९६ (६९७)
आख्यानं तदिदमनुत्तमं महार्थं
विज्ञेयं महदिह पर्वसंग्रहेण ।
श्रुत्वादौ भवति नृणां सुखावगाहं

विस्तीर्णं लवणजलं यथा प्लवेन ॥ १-२-३९७ (६९८)

इति श्रीमन्महाभारते आदिपर्वणि पर्वसंग्रहपर्वणि द्वितीयोऽध्यायः
॥ २ ॥ ॥ समाप्तं पर्वसंग्रहपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२-३ क्षत्र क्षत्रियजातिं ।अमर्षः स्वपितुः क्षत्रियेण
हतत्वाज्जातस्य क्रोधस्यासहनं तेन चोदितः प्रेरितः ॥
१-२-१० निषिषिधुः निषिद्धवन्तः ।अक्षराधिक्यमार्षं ॥
१-२-१४ भूदोषाः निम्नोन्नतत्वकण्टकित्वादयः ॥
१-२-१९ पदातय इति रथादिगतानां नराण व्युदासः ॥
१-२-२३-२६ अक्षौहिण्याः २१८७० रथाः। २१८७१ गजाः। १०९३५०
पदातयः। ६५६१० हयाः। ।
१-२-२८ पिण्डिता एकीभूताः ॥
१-२-३२ हार्दिक्यः कृतवर्मा गौतमः कृपः ॥
१-२-३३ ते तव सत्रे यद्भारताख्यानं मत्तः प्रवृत्तं
तज्जनमेजयस्य सत्रे व्यासशिष्येण कथितमित्युत्तरेण संबन्धः ॥
१-२-३४ तत्र भारते ॥
१-२-३५ प्रतिपन्नं शरणीकृतं ॥
१-२-३८ अभिजातः कुलीनः ॥
१-२-४६ हरणं दायः पारिबर्हमिति यावत् तस्य हारिका समानयनं ॥
१-२-४९ अनुद्यूतं पुनर्द्यूतं ॥
१-२-५० अभिगमनं तपसे गमनं ॥
१-२-५३ समास्या सहावस्थानं ॥
१-२-५७ प्रवेशः विराटनगरे ।समयस्य संकेतस्य नियमस्य वा ॥
१-२-७० प्रतिज्ञा जयद्रथवधार्थं ॥
१-२-७२ ह्रदप्रवेशनं दुर्योधनस्य ॥
१-२-८३ अन्यत्र कथितस्यावशिष्टं यत्पुनः प्रक्रम्य कथ्यते तत्
खिलं प्रोच्यते ।हरिवंशश्च तादृशः ॥
१-२-९० माहात्म्यमुत्तङ्कस्य उदङ्कस्येत्यपि पाठः ॥
१-२-११७ भार्गवः कुलालः ॥
१-२-१३८ कितवो द्यूतकारकः ॥
१-२-१५० शत्रुस्तव ऊरू भेत्स्यतीतिशापोत्सर्गः ॥
१-२-२२० नौ आवयोर्मध्ये ममैव साहाय्यं कर्तुमर्हतीति प्रत्येकं
प्रार्थना ज्ञेया ॥
१-२-२३१ ऐकात्म्यं एकचित्तत्वं ॥

१-२-२३७ शौटीर्यात् गर्वात् ॥
१-२-२५५ आचार्यः द्रोणाचार्यः ॥
१-२-२८७ समवाये समये ॥
१-२-३१६ संसारदहनं निरूप्येतिशेषः ॥
१-२-३१७ आयोधनं युद्धस्थानं ॥
१-२-३१९ क्षत्रियाः क्षत्रियस्त्रियः ॥
१-२-३२७ शराएव तल्पो यस्य सः शरतल्पो भीष्मः तेन प्रोक्ताः
। शरतल्पे भवा वा तत्रस्थेन व्याख्यातत्वात् ॥
१-२-३४३ सुदर्शनं तथाख्यानमित्यत्र मृगदर्श
तथाचैवेति-मणिदर्शनं तथाचैवेत्यपि पाठो दृश्यते ॥
१-२-३४७ धृतराष्ट्रः आश्रमपदमिति च्छेदः सन्धिरार्षः ॥
१-२-३५५ ब्रह्मदण्डः ब्राह्मणशापः ॥
१-२-३५६ आपाने पानगोष्ठ्यां पानेन कलिताः विवशीकृताः । एरकाः
तृणविशेषाः ॥
१-२-३५७ नातिचक्रामतुः कालं समर्थावपि मर्यादां
नोल्लङ्घितवन्तावित्यर्थः ॥
१-२-३५९ वैशसं परस्परं विशसनं ॥
१-२-३७२ अस्य अविचलामितिच्छेदः ॥
१-२-३८७ विषये देशे अन्तरित्यर्थः । पुराणं अष्टादशभेदं पाद्मादि ॥
१-२-३९४ संध्यां संध्यायां ॥
द्वितीयोऽध्यायः ॥
२ ॥

आदिपर्व - अध्याय ००३
॥ श्रीः ॥
१.३. अध्यायः ३

(अथ पौष्यपर्व ॥ ३ ॥)
Mahabharata - Adi Parva - Chapter Topics
जनमेजयं प्रति सरमाख्यदवेशुनीशापः ॥ १ ॥
शापनिवारणार्थमृषेः सोमश्रवसः पौरोहित्येन वरणम् ॥ २ ॥
आरुण्युपमन्युबैदाख्यानां धौम्यशिष्याणामुपाख्यानम् ॥ ३ ॥
बैदशिष्यस्योत्तङ्कस्योपाख्यानम् ॥ ४ ॥
पौष्यस्य राज्ञ उपाख्यानम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-३-० (६९९)
सौतिरुवाच। १-३-०क्ष् (१६)
जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते ।
तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति ।
तेषु तत्सत्रमुपासीनेष्वभ्यागच्छत्सारमेयः ॥ १-३-१ (७००)
जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छत् ॥
१-३-२ (७०१)
तं माता रोरूयमाणमुवाच ।
किं रोदिषि केनास्यभिहत इति ॥ १-३-३ (७०२)
स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति
॥ १-३-४ (७०३)
तं माता प्रत्युवाच व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति ॥
१-३-५ (७०४)
स तां पुनरुवाच नापराध्यामि किंचिन्नावेक्षे हवींषि नावलिह इति ॥
१-३-६ (७०५)
तच्छ्रुत्वा तस्य माता सरमा पुत्रदुःखार्ता तत्सत्रमुपागच्छद्यत्र
स जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते ॥ १-३-७ (७०६)
स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किंचिदपराध्यति नावेक्षते
हवींषि नावलेढि किमर्थमभिहत इति ॥ १-३-८ (७०७)
न किंचिदुक्तवन्तस्ते सा तानुवाच यस्मादयमभिहतोऽनपकारी
तस्माददृष्टं त्वां भयमागमिष्यतीति ॥ १-३-९ (७०८)
जनमेजय एवमुक्तो देवशुन्या सरमया भृशं संभ्रान्तो
विषण्णश्चासीत् ॥ १-३-१० (७०९)
स तस्मिन्सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य
पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोद्यो मे पापकृत्यां
शमयेदिति ॥ १-३-११ (७१०)
स कदाचिन्मृगयां गतः पारिक्षितो जनमेजयः कस्मिंश्चित्स्वविषय
आश्रममपश्यत् ॥ १-३-१२ (७११)
तत्र कश्चिदृषिरासाञ्चक्रे श्रुतश्रवा नाम ।
तस्य तपस्यभिरतः पुत्र आस्ते सोमश्रवा नाम ॥ १-३-१३ (७१२)
तस्य तं पुत्रमभिगम्य जनमेजयः पारिक्षितः पौरोहित्याय वव्रे ॥
१-३-१४ (७१३)
स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्रो मम
पुरोहितोऽस्त्विति ॥ १-३-१५ (७१४)
स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय पुत्रोऽयं मम
सर्प्यां जातो महातपस्वी स्वाध्यायसंपन्नो मत्तपोवीर्यसंभृतो

मच्छुक्रं पीतवत्यास्तस्याः कुक्षौ जातः ॥ १-३-१६ (७१५)
समर्थोऽयं भवतः सर्वाः पापकृत्याः शमयितुमन्तरेण
महादेवकृत्याम् ॥ १-३-१७ (७१६)
अस्य त्वेकमुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः
कंचिदर्थमभियाचेत्तं तस्मै दद्यादयं यद्येतदुत्सहसे ततो
नयस्वैनमिति ॥ १-३-१८ (७१७)
तेनैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तत्तथा भविष्यतीति ॥
१-३-१९ (७१८)
स तं पुरोहितमुपादायोपावृत्तो भ्रातृनुवाच मयाऽयं वृत
उपाध्यायो यदयं ब्रूयात्तत्कार्यमविचारयद्भिर्भवद्भिरिति ।
तेनैवमुक्ता भ्रातरस्तस्य तथा चक्रुः ।
स तथा भ्रातॄन्संदिश्य तक्षशिलां प्रत्यभिप्रतस्थे तं च
देशं वशे स्थापयामास ॥ १-३-२० (७१९)
एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यो नामापोदस्तस्य शिष्यास्त्रयो
बभूवुः ॥ १-३-२१ (७२०)
उपमन्युरारुणिर्वैदश्चेति स एकं शिष्यमारुणिं पाञ्चाल्यं
प्रेषयामास गच्छ केदारखण्डं बधानेति ॥ १-३-२२ (७२१)
स उपाध्यायेन संदिष्ट आरुणिः पाञ्चाल्यस्तत्र गत्वा तत्केदारखण्डं
बद्धुं नाशकत् ।
स क्लिश्यमानोऽपश्यदुपायं भवत्वेवं करिष्यामीति ॥१-३-२३ (७२२)
स तत्र संविवेश केदारखण्डे शयाने व तथा तस्मिंस्तदुदकं
तस्थौ ॥ १-३-२४ (७२३)
ततः कदाचिदुपाध्याय आपोदो धौम्यः शिष्यावपृच्छत् क्व आरुणिः
पाञ्चाल्यो गत इति ॥ १-३-२५ (७२४)
तौ तं प्रत्यूचतुर्भगवंस्त्वयैव प्रेषितो गच्छ केदारखण्डं बधानेति ।
स एवमुक्तस्तौ शिष्यौ प्रत्युवाच तस्मात्तत्र सर्वे गच्छामो यत्र
स गत इति ॥१-३-२६ (७२५)
स तत्र गत्वा तस्याह्वानाय शब्दं चकारः ।
भो आरुणे पाञ्चाल्य क्वासि वत्सैहीति ॥१-३-२७ (७२६)
स तच्छ्रुत्वा आरुणिरुपाध्यायवाक्यं
तस्मात्केदारखण्डात्सहसोत्थायतमुपाध्यायमुपतस्थे ॥ १-३-२८ (७२७)
प्रोवाच चैनमयमस्म्यत्र केदारखण्डे निःसरमाणमुदकमवारणीयं
संरोद्धुं संविष्टो भगवच्छब्दं श्रुत्वैव सहसा विदार्य
केदारखण्डं भवन्तमुपस्थितः ॥ १-३-२९ (७२८)
तदभिवादये भगवन्तमाज्ञापयतु भवान्कमर्थं करवाणीति ॥
१-३-३० (७२९)

स एवमुक्त उपाध्यायः प्रत्युवाच यस्माद्भवान्केदारखण्डं
विदार्योत्थितस्तस्मादुद्दालक एवनाम्ना
भवान्भविष्यतीत्युपाध्यायेनानुगृहीतः ॥ १-३-३१ (७३०)
यस्माच्च त्वया मद्वचनमनुष्ठितं तस्माच्छ्रेयोऽवाप्स्यसि ।
सर्वे च ते वेदाः प्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति
॥ १-३-३२ (७३१)
स एवमुक्त उपाध्यायेनेष्टं देशं जगाम ॥ १-३-३३ (७३२)
अथापरः शिष्यस्तस्यैवापोदस्य धौम्यस्योपमन्युर्नाम ।
तं चोपाध्यायः प्रेषयामास वत्सोपमन्यो गा रक्षस्वेति ॥ १-३-३४ (७३३)
स उपाध्यायवचनादरक्षद्गाः स चाहनि गा रक्षित्वा दिवसक्षये
गुरुगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥ १-३-३५ (७३४)
तमुपाध्यायः पीवानमपश्यदुवाच चैनं वत्सोपमन्यो केन वृत्तिं
कल्पयसि पीवानसि दृढमिति ॥ १-३-३६ (७३५)
स उपाध्यायं प्रत्युवाच भो भैक्ष्येण वृत्तिं कल्पयामीति
तमुपाध्यायः प्रत्युवाच ॥ १-३-३७ (७३६)
मय्यनिवेद्य बैक्ष्यं नीपयोक्तव्यमिति ।
स तथेत्युक्तो भैक्ष्यं चरित्वोणध्यायन्यवेदयत् ॥ १-३-३८ (७३७)
स तस्मादुपाध्यायः सर्वमेव भैक्ष्यमगृह्णात् ।
स तथेत्युक्तः पुनररक्षद्गा अहनि रक्षित्वा निशामुखे गुरुकुलमागम्य
गुरोरग्रतःस्थित्वा नमश्चक्रे ॥ १-३-३९ (७३८)
तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वोवाच ।
वत्सोपमन्यो सर्वमशेषतस्ते भैक्ष्यं गृह्णामि केनेदानीं वृत्तिं
कल्पयसीति ॥ १-३-४० (७३९)
स एवमुक्त उपाध्यायं प्रत्युवाच ।
भगवते निवेद्य पूर्वमपरं चरामि तेन वृत्तिं कल्पयामीति
तमुपाध्यायः प्रत्युवाच ॥ १-३-४१ (७४०)
नैषा न्याय्या गुरुवृत्तिरन्येषामपि भैक्ष्योपजीविनां वृत्त्युपरोधं
करोषि इत्येवं वर्तमानो लुब्धोऽसीति ॥ १-३-४२ (७४१)
स तथेत्युक्त्वा गा अरक्षद्रक्षित्वाच
पुनरुपाध्यायगृहमागम्योपाध्यायस्याग्रतः स्थित्वा नमश्चक्रे ॥
१-३-४३ (७४२)
तमुपाध्यायस्तथापि पीवानमेव दृष्ट्वा पुनरुवाच ।
वत्सोपमन्यो अहं ते सर्वं भैक्ष्यं गृह्णामि न चान्यच्चरसि
पीवानसि भृशं केन वृत्तिं कल्पयसीति ॥ १-३-४४ (७४३)
स एवमुक्तस्तमुपाध्यायं प्रत्युवाच ।
भो एतासां गवां पयसा वृत्तिं कल्पयामीति ।

तमुवाचोपाध्यायो नैतन्न्याय्यं पय उपयोक्तुं भवतो मया
नाभ्यनुज्ञातमिति ॥ १-३-४५ (७४४)
स तथेति प्रतिज्ञाय गा रक्षित्वा पुनरुपाध्यायगृहमेत्य गुरोरग्रतः
स्थित्वा नमश्चक्रे ॥ १-३-४६ (७४५)
तमुपाध्यायः पीवानमेव दृष्ट्वोवाच ।
वत्सोपमन्यो भैक्ष्यं नाश्नासि न चान्यच्चरसि पयो न पिबसि
पीवानसि भृशं केनेदानीं वृत्तिं कल्पयसीति ॥१-३-४७ (७४६)
स एवमुक्त उपाध्यायं प्रत्युवाच ।
भोः फेनं पिबापि यमिमे वत्सा मातॄणां स्तनात्पिबन्त उद्गिरन्ति
॥१-३-४८ (७४७)
तमुपाध्यायः प्रत्युवाच ।
एते त्वदनुकम्पया गुणवन्तो वत्साः प्रभूततरं फेनमुद्गिरन्ति ।
तदेषामपि वत्सानां वृत्त्युपरोधं करोष्येवं वर्तमानः ।
फेनमपि भवान्न पातुमर्हतीति स तथेति प्रतिश्रुत्य निराहारः
पुनररक्षद्गाः ॥ १-३-४९ (७४८)
तथा प्रतिषिद्धो भैक्ष्यं नाश्नाति नचान्यच्चरति पयो न पिबति
फेनं नोपयुङ्क्ते स कदाचिदरण्ये क्षुधार्तोऽर्कपत्राण्यभक्षयत् ॥
१-३-५० (७४९)
स तैरर्कपत्रैर्भक्षितैः
क्षारतिक्तकटुरूक्षैस्तीक्ष्णविपाकैश्चक्षुष्युपहतोऽन्धो बभूव ।
ततः सोऽन्धोऽपि चङ्क्रम्यमाणः कूपेऽपतत् ॥१-३-५१ (७५०)
अथ तस्मिन्ननागच्छति सूर्ये चास्ताचलावलम्बिनि उपाध्यायः
शिष्यानवोचत् ॥ १-३-५२ (७५१)
मयोपमन्युः सर्वतः प्रतिषिद्धः स नियतं कुपितस्ततो नागच्छति
चिरगतस्त्विति ।
ततोऽन्वेष्य इत्येवमुक्त्वा शिष्यैः सार्धमरण्यं गत्वा तस्याह्वानाय
शब्दं चकार भो उपमन्यो क्वासि वत्सैहीति ॥१-३-५३ (७५२)
स उपाध्यायस्य आह्वानवचनं श्रुत्वा प्रत्युवाचोच्चैरयमस्मिन्कूपे
पतितोऽहमिति ।
तमुपाध्यायः प्रत्युवाच कथं त्वमस्मिन्कूपे पतित इति ॥१-३-५४ (७५३)
स उपाध्यायं प्रत्युवाच अर्कपत्राणि
भक्षयित्वान्धीभूतोस्म्यतश्चङ्क्रम्यमाणः कूपे पतित इति ।
तमुपाध्यायः प्रत्युवाच ॥१-३-५५ (७५४)
अश्विनौ स्तुहि तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्ताराविति ।
स एवमुक्त उपाध्यायेनोपमन्युः स्तोतुमुपचक्रमे देवावश्विनौ
वाग्भिर्ऋग्भिः ॥१-३-५६ (७५५)

प्रपूर्वगौ पूर्वजौ चित्रभानू
गिरा वां शंसामि तपसा ह्यनन्तौ ।
दिव्यौ सुपर्णौ विरजौ विमाना-
वधिक्षिपन्तौ भुवनानि विश्वा ॥ १-३-५७ (७५६)
हिरण्मयौ शकुनी सांपरायौ
नासत्यदस्रौ सुनसौ वैजयन्तौ ।
शुक्लं वयन्तौ तरसा सुवेमा-
वधिव्ययन्तावसितं विवस्वतः ॥ १-३-५८ (७५७)
ग्रस्तां सुपर्णस्य बलेन वर्तिका-
ममुञ्चतामश्विनौ सौभगाय ।
तावत्सुवृत्तावनमं तमाय या-
वसत्तमा गा अरुणा उदावहत् ॥ १-३-५९ (७५८)
षष्टिश्च गावस्त्रिशताश्च धेनव
एकं वत्सं सुवते तं दुहन्ति ।
नानागोष्ठा विहिता एकदोहना-
स्तावश्विनौ दुहतो घर्ममुक्थ्यम् ॥ १-३-६० (७५९)
एकां नाभिं सप्त सथा अराः श्रिताः
प्रधिष्वन्या विंशतिरर्पिता अराः ।
अनेमि चक्रं परिवर्ततेऽजरं
मायाऽश्विनौ समनक्ति चर्षणी ॥ १-३-६१ (७६०)
एकं चक्रं वर्तते द्वादशारं
षण्णाभिमेकाक्षममृतस्य धारणम् ।
यस्मिन्देवा अधि विश्वे विषक्ता-
स्तावश्विनौ मुञ्चतो मा विषीदतम् ॥ १-३-६२ (७६१)
अश्विनाविन्दुममृतं वृत्तभूयौ
तिरोधत्तामश्विनौ दासपत्नी ।
हित्वा गिरिमश्विनौ गामुदाचरन्तौ
तद्वृष्टिमह्नात्प्रस्थितौ बलस्य ॥ १-३-६३ (७६२)
युवां दिशो जनयथो दशाग्रे
समानं मूर्ध्नि रथयानं वियन्ति ।
तासां यातमृषयोऽनुप्रयान्ति
देवा मनुष्याः क्षितिमाचरन्ति ॥ १-३-६४ (७६३)
युवां वर्णान्विकुरुथो विश्वरूपां-
स्तेऽधिक्षियन्ते भुवनानि विश्वा ।
ते भानवोऽप्यनुसृताश्चरन्ति
देवा मनुष्याः क्षितिमाचरन्ति ॥ १-३-६५ (७६४)

तौ नासत्यावश्विनौ वां महेऽहं
स्रजं च यां बिभृथः पुष्करस्य ।
तौ नासत्वावमृतावृतावृधा-
वृते देवास्तत्प्रपदे न सूते ॥ १-३-६६ (७६५)
मुखेन गर्भं लभतां युवानौ
गतासुरेतत्प्रपदेन सूते ।
सद्यो जातो मातरमत्ति गर्भ-
स्तावश्विनौ मुञ्चथौ जीवसे गाम् ॥ १-३-६७ (७६६)
स्तोतुं न शक्नोमि गुणैर्भवन्तौ
चक्षुर्विहीनः पथि संप्रमोहः ।
दुर्गेऽहमस्मिन्पतितोऽस्मि कूपे
युवां शरण्यौ शरणं प्रपद्ये ॥ १-३-६८ (७६७)
सौतिरुवाच। १-३-६९क्ष् (१७)
एवमृग्भिश्चान्यैरस्तुवत् ।
इत्येवं तेनाभिष्टुतावश्विनावाजग्मतुराहतुश्चैं प्रीतौ स्व एष
तेऽपूपोशानैनमिति ॥१-३-६९ (७६८)
स एवमुक्तः प्रत्युवाच नानृतमूचतुर्भगवन्तौ
नत्वहमेतमपूपमुपयोक्तुमुत्सहे गुरवेऽनिवेद्येति ॥ १-३-७० (७६९)
ततस्तमश्विनावूचतुः ।
आवाभ्यां पुरस्ताद्भवत उपाध्यायेनैवमेवाभिष्टुताभ्यामपूपोदत्त
उपयुक्तः स तेनानिवेद्य गुरवे त्वमपि तथैव कुरुष्व यथा
कृतमुपाध्यायेनेति ॥१-३-७१ (७७०)
स एवमुक्तः प्रत्युवाच एतत्प्रत्यनुनये भवन्तावश्विनौ
नोत्सहेऽहमनिवेद्य गुरवेऽपूपमुपयोक्तुमिति ॥ १-३-७२ (७७१)
तमश्विनावाहतुः प्रीतौ स्वस्तवानया गुरुभक्त्या ।
उपाध्यायस्य ते कार्ष्णायसा दन्ता भवतोऽपि हिरण्मया भविष्यन्ति
चक्षुष्मांश्च भविष्यसि श्रेयश्चावाप्स्यसीति ॥१-३-७३ (७७२)
स एवमुक्तोऽश्विभ्यां लब्धचक्षुरुपाध्यायसकाशमागम्याभ्यवादयत् ॥
१-३-७४ (७७३)
आचचक्षे च स चास्य प्रीतिमान्बभूव ॥ १-३-७५ (७७४)
आह चैनं यथाऽश्विनावाहतुस्तथा त्वं श्रेयोऽवाप्स्यसीति ॥ १-३-७६ (७७५)
सर्वे च ते वेदाःप्रतिभास्यन्ति सर्वाणि च धर्मशास्त्राणीति ।
एषा तस्यापि परीक्षोपमन्न्योः ॥१-३-७७ (७७६)
अथापरः शिष्यस्तस्यैवापोदस्य धौम्यस्य बैदो नाम तमुपाध्यायः
समादिदेश वत्स बैद इहास्यतां तावन्मम गृहे कंचित्कालं
शुश्रूषुणा च भवितव्यं श्रेयस्ते भविष्यतीति ॥ १-३-७८ (७७७)

स तथेत्युक्त्वा गुरुकुले दीर्घकालं गुरुशुश्रूषणपरोऽवसत् ।
गौरिव नित्यं गुरुणा धूर्षु नियोज्यमानः
शीतोष्णक्षुत्तृष्णादुःखसहः सर्वत्राप्रतिकूलस्तस्य महतात्कालेन
गुरुः परितोषं जगाम ॥ १-३-७९ (७७८)
तत्परितोषाच्च श्रेयः सर्वज्ञतां चावाप ।
एषा तस्यापि परीक्षा बैदस्य ॥ १-३-८० (७७९)
स उपाध्यायेनानुज्ञातः समावृत्तस्तस्माद्गुरुकुलवासाद्गृहाश्रमं
प्रत्यपद्यत ।
तस्यापि स्वगृहे वसतस्त्रयः शिष्या बभूवुः स शिष्यान्न
किंचिदुवाच कर्म वा क्रियतां गुरुशुश्रूषा वेति ।
दुःखाभिज्ञो हि गुरुकुलवासस्य शिष्यान्परिक्लेशेन योजयितुं नेयेष ॥
१-३-८१ (७८०)
अथ कस्मिंश्चित्काले बैदं ब्राह्मणं जनमेजयः पौष्यश्च
क्षत्रियावुपेत्योपाध्यायं वरयाञ्चक्रतुः ॥ १-३-८२ (७८१)
स कदाचिद्याज्यकार्येणाभिप्रस्थित उत्तङ्कनामानं शिष्यं नियोजयामास
॥ १-३-८३ (७८२)
भोयत्किंचिदस्मद्गृहे परिहीयते तदिच्छाम्यहमपरिहीयमानं भवता
क्रियमाणमिति स एवं प्रतिसंदिश्योत्तङ्कं बैदः प्रवासं जगाम ॥
१-३-८४ (७८३)
अथोत्तङ्कः शुश्रूषुर्गुरुनियोगमनुतिष्ठमानो गुरुकुले वसति स्म ।
स तत्र वसमान उपाध्यायस्त्रीभिः सहिताभिराहूयोक्तः ॥ १-३-८५ (७८४)
उपाध्यायानी ते ऋतुमती उपाध्यायश्च प्रोषितोऽस्या
यथाऽयमृतुर्वन्ध्यो न भवति तथा क्रियतामेषा विषीदतीति ॥
१-३-८६ (७८५)
एवमुक्तस्ताः स्त्रियः प्रत्युवाच ।
न मया स्त्रीणां वचनादिदमकार्यं करणीयम् ।
न ह्यहमुपाध्यायेन संदिष्टोऽकार्यमपि त्वया कार्यमिति ॥ १-३-८७ (७८६)
तस्य पुनरुपाध्यायः कालान्तरेण गृहमाजगाम तस्मात्प्रवासात् ।
स तु तद्वृत्तं तस्याशेषमुपलभ्य प्रीतिमानभूत् ॥ १-३-८८ (७८७)
उवाच चैनं वत्सोत्तङ्कं किं ते प्रियं करवाणीति ।
धर्मतो हि शुश्रूषितोऽस्मि भवता तेन प्रीतिः परस्परेण नौ
संवृद्धा तदनुजाने भवन्तं सर्वानेव कामानवाप्स्यसि गम्यतामिति
॥ १-३-८९ (७८८)
स एवमुक्तः प्रत्युवाच किं ते प्रियं करवाणीति एवं ह्याहुः ॥ १-३-९० (७८९)
यश्चाधर्मेण वै ब्रूयाद्यश्चाधर्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं चाधिगच्छति ॥ १-३-९१ (७९०)

सोहमनुज्ञातो भवता इच्छामीष्टं गुर्वर्थमुपहर्तुमिति ।
तेनैवमुक्त उपाध्यायः प्रत्युवाच वत्सोत्तङ्क उष्यतां तावदिति
॥१-३-९२ (७९१)
स कदाचित्तमुपाध्यायमाहोत्तङ्क आज्ञापयतु भवान्किं ते
प्रियमुपाहरामि गुर्वर्थमिति ॥ १-३-९३ (७९२)
तमुपाध्यायः प्रत्युवाच वत्सोत्तङ्क बहुशो मां चोदयसि
गुर्वर्थमुपाहरामीति तद्गच्छैनां प्रविश्योपाध्यायानीं पृच्छ
किमुपाहरामीति एषा यद्ब्रवीति तदुपाहरस्वेति ॥ १-३-९४ (७९३)
स एवमुक्त
उपाध्यायेनोपाध्यायानीमपृच्छद्भवत्युपाध्यायेनास्म्यनुज्ञातो गृहं
गन्तुमिच्छामीष्टं ते गुर्वर्थमुपहृत्यानृणो गन्तुं तदाज्ञापयतु
भवती किमुपाहरामि गुर्वर्थमिति ॥ १-३-९५ (७९४)
सैवमुक्तोपाध्यायानी तमुत्तङ्कं प्रत्युवाच गच्छ पौष्यं प्रति
राजानं कुण्डले भिक्षितुं तस्य क्षत्रियया पिनद्धे ॥ १-३-९६ (७९५)
आनयस्वेतश्चतुर्थेऽहनि पुण्यकर्म भविता ताभ्यामाबद्धाभ्यां
शोभमाना ब्राह्मणान्परिवेष्टुमिच्छामि ।
तत्संपादयस्व एवं हि कुर्वतः श्रेयो भविताऽन्यथा कुतः श्रेय
इति ॥१-३-९७ (७९६)
स एवमुक्तस्तयोपाध्यायान्या प्रातिष्ठतोत्तङ्कः स पथि
गच्छन्नपश्यदृषभमतिप्रमाणं तमधिरूढं च
पुरुषमतिप्रमाणमेव स पुरुष उत्तङ्कमभ्यभाषत ॥ १-३-९८
(७९७)
भोउत्तङ्कैतत्पुरीषमस्य ऋषभस्य भक्षयस्वेति स एवमुक्तो
नैच्छत् ॥ १-३-९९ (७९८)
तमाह पुरुषो भूयो भक्षयस्वोत्तङ्क मा विचारयोपाध्यायेनापि ते
भक्षितं पूर्वमिति ॥ १-३-१०० (७९९)
स एवमुक्तो बाढमित्युक्त्वा तदा तद्वृषभस्य मूत्रं पुरीषं च
भक्षयित्वोत्तङ्कः संभ्रमादुत्थित एवापोऽनुस्पृश्य प्रतस्थे ॥
१-३-१०१ (८००)
यत्र स क्षत्रियः पौष्यस्तमुपेत्यासीनमपश्यदुत्तङ्कः ।
स उत्तङ्कस्तमुपेत्याशीर्भिरभिनन्द्योवाच ॥१-३-१०२ (८०१)
अर्थी भवन्तमुपागतोऽस्मीति स एनमभिवाद्योवाच ।
भगवन्पौष्यः खल्वहं किं करवाणीति ॥१-३-१०३ (८०२)
स तमुवाच गुर्वर्थं कुण्डलयोरर्थेनाभ्यागतोऽस्मि ।
ये वै ते क्षत्रिया पिनद्धे कुण्डले ते भवान्दातुमर्हतीति ॥१-३-१०४ (८०३)
तं प्रत्युवाच पौष्यः प्रविश्यान्तःपुरं क्षत्रिया याच्यतामिति ।

स तेनैवमुक्तः प्रविश्यान्तःपुरं क्षत्रियां नापश्यत् ॥ १-३-१०५ (८०४)
स पौष्यं पुनरुवाच न युक्तं भवताऽहमनृतेनोपचरितुं न हि
तेऽन्तःपुरे क्षत्रिया सन्निहिता नैनां पश्यामि ॥ १-३-१०६ (८०५)
स एवमुक्तः पौष्यः क्षणमात्रं विमृश्योत्तङ्कं प्रत्युवाच ।
नियतं भवानुच्छिष्टः स्मर तावन्न हि सा क्षत्रिया
उच्छिष्टेनाशुचिना शक्या द्रष्टुं पतिव्रतात्वात्सैषा
नाशुचेर्दर्शनमुपैतीति ॥ १-३-१०७ (८०६)
अथैवमुक्त उत्तङ्कः स्मृत्वोवाचास्ति खलु मया तु भक्षितं
नोपस्पृष्टमागच्छतेति ।
तं पौष्यः प्रत्युवाच एष ते व्यतिक्रमो नोत्थितेनोपस्पृष्टं
भवति शीघ्रमागच्छतेति ॥ १-३-१०८ (८०७)
अथोत्तङ्कस्तं तथेत्युक्त्वा प्राङ्मुख
उपावेश्य सुप्रक्षालितपाणिपादवदनो
निःशब्दाभिरफेनाभिरनुष्णाभिर्हृद्गताभिरद्भिस्त्रिः पीत्वा
द्विः परिमृज्य खान्यद्भिरुपस्पृश्य चान्तःपुरं प्रविवेश ॥
१-३-१०९ (८०८)
ततस्तां क्षत्रियामपश्यत्सा च दृष्ट्वैवोत्तङ्कं
प्रत्युत्थायाभिवाद्योवाच स्वागतं ते भगवन्नाज्ञापय किं करवाणीति ॥
१-३-११० (८०९)
स तामुवाचैते कुण्डले गुर्वर्थं मे भिक्षिते दातुमर्हसीति ।
सा प्रीता तेन तस्य सद्भावेन पात्रमयमनतिक्रमणीयश्चेति मत्वा ते
कुण्डले अवमुच्यास्मै प्रायच्छदाह चैनमेते कुण्डले तक्षको नागराजः
सुभृशं प्रार्थयत्यप्रमत्तो नेतुमर्हसीति ॥ १-३-१११ (८१०)
स एवमुक्तस्तां क्षत्रियां प्रत्युवाच भवती सुनिर्वृता भवतु ।
न मां शक्तस्तक्षको नागराजो धर्षयितुमिति ॥ १-३-११२ (८११)
स एवमुक्त्वा तां क्षत्रियामामन्त्र्य पौष्यसकाशमागच्छत् ।
आह चैनं भोः पौष्य प्रीतोऽस्मीति तमुत्तङ्कं पौष्यः प्रत्युवाच
॥ १-३-११३ (८१२)
भगवंश्चिरेण पात्रमासाद्यते भवाश्च गुणवानतिथिस्तदिच्छे
श्राद्धं कर्तुं क्रियतां क्षण इति ॥ १-३-११४ (८१३)
तमुत्तङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि
यथोपपन्नमन्नमुपस्कृतं भवतेति स तथेत्युक्त्वा
यथोपपन्नेनान्नेनैनं भोजयामास ॥ १-३-११५ (८१४)
अथोत्तङ्कः सकेशं शीतमन्नं दृष्ट्वा अशुच्येतदिति मत्वा तं
पौष्यमुवाच ।
यस्मान्मे अशुच्यन्नं ददासि तस्मादन्धो भविष्यसीति ॥ १-३-११६ (८१५)

तं पौष्यः प्रत्युवाच ।
यस्मात्त्वमदुष्टमन्नंदूषयसि तस्मादनपत्यो भविष्यसीति तमुत्तङ्कः प्रत्युवाच ॥ १-३-११७ (८१६)
न युक्तं भवताऽन्नमशुचि दत्त्वा प्रतिशापं दातुं तस्मादन्नमेव प्रत्यक्षीकुरु ।
ततः पौष्यस्तदन्नमशुचि दृष्ट्वा तस्याशुचिभावमपरोक्षयामास ॥ १-३-११८ (८१७)
अथ तदन्नं मुक्तकेश्या स्त्रियोपहृतमनुष्णं सकेशं चाशुच्येतदिति मत्वा तमृषिमुत्तङ्कं प्रसादयामास ॥ १-३-११९ (८१८)
भघवन्नेतदज्ञानादन्नं सकेशमुपाहृतं शीतं च ।
तत्क्षामये भवन्तं न भवेयमन्ध इति ।
तमुत्तङ्कः प्रत्युवाच ॥ १-३-१२० (८१९)
न मृषा ब्रवीमि भूत्वा त्वमन्धो नचिरादनन्धो भविष्यसीति ।
ममापि शापो भवता दत्तो न भवेदिति ॥ १-३-१२१ (८२०)
तं पौष्यः प्रत्युवाच न चाहं शक्तः शापं प्रत्यादातुं न हि मे मन्युरद्याप्युपशमं गच्छति किं चैतद्भवता न ज्ञायते ।
यथा ॥ १-३-१२२ (८२१)
नवनीतं हृदयं ब्राह्मणस्य
वाचि क्षुरो निहितस्तीक्ष्णधारः ।
तदुभयमेतद्विपरीतं क्षत्रियस्य
वाङ्नवनीतं हृदयं तीक्ष्णधारम् ॥ इति॥ १-३-१२३ (८२२)
तदेवंगते न शक्तोऽहं तीक्ष्णहृदयत्वात्तं शापमन्यथाकर्तुं गम्यतामिति ।
तमुत्तङ्कः प्रत्युवाच ॥ १-३-१२४ (८२३)
भवताऽहमन्नस्याशुचिभावमालक्ष्य प्रत्यनुनीतः ।
प्राक् च तेऽभिहितं यस्माददुष्टमन्नं दूषयसि तस्मादनपत्यो भविष्यसीति ।
दुष्टे चान्ने नैष मम शापो भविष्यतीति ॥ १-३-१२५ (८२४)
साधयामस्तावदित्युक्त्वा प्रातिष्ठतोत्तङ्कस्ते कुण्डले गृहीत्वा ।
सोऽपश्यदथ पथि नग्नं क्षपणकमागच्छन्तं मुहुर्मुहुर्दृश्यमानमदृश्यमानं च ॥ १-३-१२६ (८२५)
अथोत्तङ्कस्ते कुण्डले संन्यस्य भूमावुदकार्थं प्रचक्रमे ।
एतस्मिन्नन्तरे स क्षपणकस्त्वरमाण उपसृत्य ते कुण्डले गृहीत्वा प्राद्रवत् ॥ १-३-१२७ (८२६)
तमुत्तङ्कोऽभिसृत्य कृतोदककार्यः शुचिः प्रयतो नमो देवेभ्यो

गुरुभ्यश्च कृत्वा महता जवेन तमन्वयात् ॥ १-३-१२८ (८२७)
तस्य तक्षको दृढमासन्नः सतं जग्राह ।
गृहीतमात्रः स तद्रूपं विहाय तक्षकस्वरूपं कृत्वा सहसा
धरण्यां विवृतं महाबिलं प्रविवेश ॥१-३-१२९ (८२८)
प्रविश्य च नागलोकं स्वभवनमगच्छत् ।
अथोत्तङ्कस्तस्याः क्षत्रियाया वचः स्मृत्वा तं तक्षकमन्वगच्छत्
॥१-३-१३० (८२९)
स तद्बिलं दण्डकाष्ठेन चखान न चाशकत् ।
तं क्लिश्यमानमिन्द्रोऽपश्यत्स वज्रं प्रेषयामास ।
गच्छास्य ब्राह्मणस्य साहाय्यं कुरुष्वेति ॥ १-३-१३१ (८३०)
अथ वज्रं दण्डकाष्ठमनुप्रविश्य तद्बिलमदारयत् ॥ १-३-१३२ (८३१)
तमुत्तङ्कोऽनुविवेश तेनैव बिलेन प्रविश्य च तं
नागलोकमपर्यन्तमनेकविधप्रासादहर्म्यवलभीनिर्यूहशत-
संकुलमुच्चावचक्रीडाश्चर्यस्थानावकीर्णमपश्यत् ॥ १-३-१३३ (८३२)
स तत्र नागांस्तानस्तुवदेभिः श्लोकैः ।
य ऐरावतराजानः सर्पाः समितिशोभाः ।
क्षरन्त इव जीमूताः सविद्युत्पवनेरिताः ॥ १-३-१३४ (८३३)
सुरूपा बहुरूपाश्च तथा कल्माषकुण्डलाः ।
आदित्यवन्नाकपृष्ठे रेजुरैरावतोद्भवाः ॥१-३-१३५ (८३४)
बहूनि नागवेश्मानि गङ्गायास्तीर उत्तरे ।
तत्रस्थानपि संस्तौमि महतः पन्नगानहम् ॥१-३-१३६ (८३५)
इच्छेत्कोऽर्कांशुसेनायां चर्तुमैरावतं विना ।
शतान्यशीतिरष्टौ च सहस्राणि च विंशतिः ॥१-३-१३७ (८३६)
सर्पाणां प्रग्रहा यान्ति धृतराष्ट्रो यदैजति ।
ये चैनमुपसर्पन्ति ये च दूरपथं गताः ॥१-३-१३८ (८३७)
अहमैरावतज्येष्ठभ्रातृभ्योऽकरवं नमः ।
यस्य वासः कुरुक्षेत्रे खाण्डवे चाभवत्पुरा ॥१-३-१३९ (८३८)
तं नागराजमस्तौषं कुण्डलार्थाय तक्षकम् ।
तक्षकश्चाश्वसेनश्च नित्यं सहचरावुभौ ॥१-३-१४० (८३९)
कुरुक्षेत्रं च वसतां नदीमिक्षुमतीमनु ।
जघन्यजस्तक्षकस्य श्रुतसेनेति यः सुतः ॥१-३-१४१ (८४०)
अवसद्यो महद्द्युम्नि प्रार्थयन्नागमुख्यताम् ।
करवाणि सदा चाहं नमस्तस्मै महात्मने ॥१-३-१४२ (८४१)
सौतिरुवाच।१-३-१४३क्ष् (१८)
एवं स्तुत्वा स विप्रर्षिरुत्तङ्को भुजगोत्तमान् ।
नैव ते कुण्डले लेभे ततश्चिन्तामुपागमत् ॥१-३-१४३ (८४२)

एवं स्तुवन्नपि नागान्यदा ते कुण्डले नालभत्तदाऽपश्यत्स्त्रियौ तन्त्रे
अधिरोप्य सुवेमे पटं वयन्त्यौ ।
तस्मिंस्तन्त्रे कृष्णाः सिताश्च तन्तवश्चक्रं चापश्यद्द्वादशारं
षड्भिः कुमारैः परिवर्त्यमानं पुरुषं चापश्यदश्वं च
दर्शनीयम् ॥१-३-१४४ (८४३)
स तान्सर्वांस्तुष्टाव एभिर्मन्त्रवादश्लोकैः ॥ १-३-१४५ (८४४)
त्रीण्यर्पितान्यत्र शतानि मध्ये
षष्टिश्च नित्यं चरति ध्रुवेऽस्मिन् ।
चक्रे चतुर्विंशतिपर्वयोगे
षड्वै कुमाराः परिवर्तयन्ति ॥ १-३-१४६ (८४५)
तन्त्रं चेदं विश्वरूपे युवत्यौ
वयतस्तन्तून्सततं वर्तयन्त्यौ ।
कृष्णान्सितांश्चैव विवर्तयन्त्यौ
भूतान्यजस्रं भुवनानि चैव ॥ १-३-१४७ (८४६)
वज्रस्य भर्ता भुवनस्य गोप्ता
वृत्रस्य हन्ता नमुचेर्निहन्ता ।
कृष्णे वसानो वसने महात्मा
सत्यानृते यो विविनक्ति लोके ॥ १-३-१४८ (८४७)
यो वाजिनं गर्भमपां पुराणं
वैश्वानरं वाहनमभ्युपैति ।
नमोऽस्तु तस्मै जगदीश्वराय
लोकत्रयेशाय पुरंदराय ॥ १-३-१४९ (८४८)
ततः स एनं पुरुषः प्राह प्रीतोऽस्मि तेऽहसनेन स्तोत्रेण किं ते
प्रियं करवाणीति ।
स तमुवाच नागा मे वशमीयुरिति ॥१-३-१५० (८४९)
स चैनं पुरुषः पुनरुवाच एतमश्वमपाने धमस्वेति ॥ १-३-१५१ (८५०)
ततोऽश्वस्यापानमधमत्ततोऽश्वाद्धम्यमानात्सर्वस्रोतोभ्यः
पावकार्चिषः सधूमा निष्पेतुः ॥ १-३-१५२ (८५१)
ताभिर्नागलोक उपधूपितेऽथ
संभ्रान्तस्तक्षकोऽग्नेस्तेजोभयाद्विषण्णः कुण्डले गृहीत्वा सहसा
भवनान्निष्क्रम्योत्तङ्कमुवाच ॥ १-३-१५३ (८५२)
इमे कुण्डले गृह्णातु भवानिति ।
स ते प्रतिजग्राहोत्तङ्कः प्रतिगृह्य च कुण्डलेऽचिन्तयत्
॥१-३-१५४ (८५३)
अद्य तत्पुण्यकमुपाध्यायान्या दूरं चाहमभ्यागतः स कथं
संभावयेयमिति ॥ १-३-१५५ (८५४)

तत एनं चिन्तयानमेव स पुरुष उवाच ।
उत्तङ्क एनमेवाश्वमधिरोह त्वां क्षणेनैवोपाध्यायकुलं
प्रापयिष्यतीति ॥ १-३-१५६ (८५५)
स तथेन्युक्त्वा तमश्वमधिरुह्य प्रत्याजगामोपाध्यायकुलं ।
उपाध्यायानी च स्नाता केशानावापयन्त्युपविष्टोत्तङ्को नागच्छतीति
शापायास्य मनो दधे ॥ १-३-१५७ (८५६)
अथैतस्मिन्नन्तरे स उत्तङ्कः प्रविश्य उपाध्यायकुलं
उपाध्यायानीमभ्यवादयत्ते चास्यै कुण्डले प्रायच्छत्सा चैनं
प्रत्युवाच ॥ १-३-१५८ (८५७)
उत्तङ्क देशे कालेऽभ्यागतः स्वागतं ते वत्स ग्इदानीं यद्यनागतोसि
कोपितया मया शप्तो भविष्यसि' श्रेयस्तवोपस्थितं सिद्धिमाप्नुहीति ॥
१-३-१५९ (८५८)
अथोत्तङ्क उपाध्यायमभ्यवादयत् ।
तमुपाध्यायः प्रत्युवाच वत्सोत्तङ्क स्वागतं ते किं चिरं कृतमिति
॥ १-३-१६० (८५९)
तमुत्तङ्क उपाध्यायं प्रत्युवाच ।
भोस्तक्षकेण मे नागराजेन विघ्नः कृतोऽस्मिन्कर्मणि तेनास्मि नागलोकं
गतः ॥ १-३-१६१ (८६०)
तत्र च मया दृष्टे स्त्रियौ तन्त्रेऽधिरोप्य पटं वयन्त्यौ
तस्मिंश्च कृष्णाः सिताश्च तन्तवः ।
किं तत् ॥ १-३-१६२ (८६१)
तत्र च मया चक्रं दृष्टं द्वादशारं षट्चैनं कुमाराः
परिवर्तयन्ति तदपि किं ।
पुरुषश्चापि मया दृष्टः स चापि कः ।
अश्वश्चातिप्रमाणो दृष्टः स चापि कः ॥ १-३-१६३ (८६२)
पथि गच्छता च मया ऋषभो दृष्टस्तं च
पुरुषोऽधिरूढस्तेनास्मि सोपचारमुक्त उत्तङ्कास्य ऋषभस्य पुरीषं
भक्षय उपाध्यायेनापि ते भक्षितमिति ॥ १-३-१६४ (८६३)
ततस्तस्य वचनान्मया तदृषभस्य पुरीषमुपयुक्तं स चापि कः ।
तदेतद्भवतोपदिष्टमिच्छेयं श्रोतुं किं तदिति ।
स तेनैवमुक्त उपाध्यायः प्रत्युवाच ॥ १-३-१६५ (८६४)
ये ते स्त्रियौ धाता विधाता च ये च ते कृष्णाः सितास्तन्तवस्ते रात्र्यहनी ।
यदपि तच्चक्रं द्वादशारं षड्कुमाराः परिवर्तयन्ति तेपि
षड्तवः द्वादशारा द्वादश मासाः संवत्सरश्चक्रम् ॥ १-३-१६६
(८६५)
यः पुरुषःस पर्जन्यः योऽश्वः सोऽग्निः य ऋषभस्त्वया पथि

गच्छता दृष्टः स ऐरावतो नागराट् ॥ १-३-१६७ (८६६)
यश्चैनमधिरूढः पुरुषः स चेन्द्रः यदपि ते भक्षितं तस्य
ऋषभस्य पुरीषं तदमृतं तेन खल्वसि तस्मिन्नागभवने न
व्यापन्नस्त्वम् ॥ १-३-१६८ (८६७)
स हि भगवानिन्द्रो मम सखा त्वदनुक्रोशादिममनुग्रहं कृतवान् ।
तस्मात्कुण्डले गृहीत्वा पुनरागतोऽसि ॥ १-३-१६९ (८६८)
तत्सौम्य गम्यतामनुजाने भवन्तं श्रेयोऽवाप्स्यसीति ।
स उपाध्यायेनानुज्ञातो भगवानुत्तङ्कः क्रुद्धस्तक्षकं
प्रतिचिकीर्षमाणो हास्तिनपुरं प्रतस्थे ॥ १-३-१७० (८६९)
स हास्तिनपुरं प्राप्य नचिराद्विप्रसत्तमः ।
समागच्छत राजानमुत्तङ्को जनमेजयम् ॥ १-३-१७१ (८७०)
पुरा तक्षशिलासंस्थं निवृत्तमपराजितम् ।
सम्यग्विजयिनं दृष्ट्वा समन्तान्मन्त्रिभिर्वृतम् ॥ १-३-१७२ (८७१)
तस्मै जयाशिषः पूर्वं यथान्यायं प्रयुज्य सः ।
उवाचैनं वचः काले शब्दसंपन्नया गिरा ॥ १-३-१७३ (८७२)
उत्तङ्क उवाच। १-३-१७४क्ष् (१९)
अन्यस्मिन्करणीये तु कार्ये पार्थिवसत्तम ।
अर्चयित्वा यथान्यायं प्रत्युवाच द्विजोत्तमम् ॥ १-३-१७४ (८७३)
सौतिरुवाच। १-३-१७५क्ष् (२०)
एवमुक्तस्तु विप्रेण स राजा जनमेजयः ।
अर्चयित्वा यथान्यायं प्रत्युवाच द्विजोत्तमम् ॥ १-३-१७५ (८७४)
जनमेजय उवाच। १-३-१७६क्ष् (२१)
आसां प्रजानां परिपालनेन
स्वं क्षत्रधर्मं परिपालयामि ।
प्रब्रूहि मे किं करणीयमद्य
येनासि कार्येण समागतस्त्वम् ॥ १-३-१७६ (८७५)
सौतिरुवाच। १-३-१७७क्ष् (२२)
स एवमुक्तस्तु नृपोत्तमेन
द्विजोत्तमः पुण्यकृतां वरिष्ठः ।
उवाच राजानमदीनसत्वं
स्वमेव कार्यं नृपते कुरुष्व ॥ १-३-१७७ (८७६)
उत्तङ्क उवाच। १-३-१७८क्ष् (२३)
तक्षकेण महीन्द्रेन्द्र येन ते हिंसितः पिता ।
तस्मै प्रतिकुरुष्व त्वं पन्नगाय दुरात्मने ॥ १-३-१७८ (८७७)
कार्यकालं हि मन्येऽहं विधिदृष्टस्य कर्मणः ।
तद्गच्छापचितिं राजन्पितुस्तस्य महात्मनः ॥ १-३-१७९ (८७८)

तेन ह्यनपराधी स दष्टो दुष्टान्तरात्मना ।
पञ्चत्वमगमद्राजा वज्राहत इव द्रुमः ॥ १-३-१८० (८७९)
बलदर्पसमुत्सिक्तस्तक्षकः पन्नगाधमः ।
अकार्यं कृतवान्पापो योऽदशत्पितरं तव ॥ १-३-१८१ (८८०)
राजर्षिवंशगोप्तारममरप्रतिमं नृपम् ।
यियासुं काश्यपं चैव न्यवर्तयत पापकृत् ॥ १-३-१८२ (८८१)
होतुमर्हसि तं पापं ज्वलिते हव्यवाहने ।
सर्पसत्रे महाराज त्वरितं तद्विधीयताम् ॥ १-३-१८३ (८८२)
एवं पितुश्चापचितिं कृतवांस्त्वं भविष्यसि ।
मम प्रियं च सुमहत्कृतं राजन् भविष्यति ॥ १-३-१८४ (८८३)
कर्मणः पृथिवीपाल मम येन दुरात्मना ।
विघ्नः कृतो महाराज गुर्वर्थं चरतोऽनघ ॥ १-३-१८५ (८८४)
सौतिरुवाच। १-३-१८६क्ष् (२४)
एतच्छ्रुत्वा तु नृपतिस्तक्षकाय चुकोप ह ।
उत्तङ्कवाक्यहविषा दीप्तोऽग्निर्हविषा यथा ॥ १-३-१८६ (८८५)
अपृच्छत्स तदा राजा मन्त्रिणः स्वान्सुदुःखितः ।
उत्तङ्कस्यैव सांनिध्ये पितुः स्वर्गगतिं प्रति ॥ १-३-१८७ (८८६)
तदैव हि स राजेन्द्रो दुःखशोकाप्लुतोऽभवत् ।
यदैव वृत्तं पितरमुत्तङ्कादशृणोत्तदा ॥ ॥ १-३-१८८ (८८७)

इति श्रीमन्महाभारते आदिपर्वणि पौष्यपर्वमि तृतीयोऽध्यायः ॥ ३ ॥ ॥ समाप्तं च पौष्यपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-३-१ परिक्षितोऽपत्य पुमान्पारिक्षितः । सरमायाः देवशुन्याः अपत्यं पुमान्सारमेयः ॥
१-३-९ अदृष्टं अतर्कितं ॥
१-३-१० संभ्रान्तः संतप्त इति पाठान्तरं ॥
१-३-११ पापकृत्यां शापरूपां बलायुः-प्राणनिकृन्तनीं देवतां । शमयेदक्रोधनां कुर्यात्। १-३-१८ उपांशुव्रतं गूढव्रतं। ।
१-३-२० तक्षशिलां देशविशेषं जेतुमिति शेषः ॥
१-३-२१ अपोत्तीत्यपोदः अब्भक्षः तस्यापत्यमापोदः ॥
१-३-२२ केदारो महाक्षेत्रान्तर्गतं चतुरस्रं तस्य खण्डो जलनिरोधभित्तिः तं ॥
१-३-३६ पीवानं पुष्टं । वृत्तिं जीविकां ॥
१-३-४२ वृत्त्युपरोधं वृत्तिप्रतिबन्धं ॥

१-३-४४ चरसि भक्षयसि ॥
१-३-५१ तीक्ष्णविपाकैः पाककाले उदरेऽग्निज्वालोत्थापकैः ॥
१-३-५६ कर्ताराविति लुडन्तं ॥
१-३-५७ प्रपूर्वगाविति ।अस्य श्लोकस्यानन्वयादुत्तरश्लोकस्थं संबोधनमिह योज्यम्। हे नासत्यदस्रौ गिरा वाण्या। वां युवां शंसामि स्तौमि। व्यवहिताश्चेति गतिसंज्ञत्वात्प्रशंसामीति वाऽन्वयः। किंभूतौ वां। प्रपूर्वगौ प्रकर्षेणान्यदेवताभ्यः पूर्वं यज्ञं गच्छन्तौ। पूर्वजौ अश्वजात्यां हि पूर्वं मुखसंयोगः ततः संयोगाद्गर्भोत्पत्तिरिति तत्र गर्भोत्पत्तेः पूर्वं मुखयोहगमात्राज्जातौ। चित्रभानू अग्नितुल्यौ। तपसा सामर्थ्येन। अनन्तौ अनन्तरूपधरौ। दिव्यौ दिवः द्योतमानात्सूर्याद्भवौ। सुपर्णौ शोभनगमनौ। विरजौ विगतरजोगुणौ। विश्वा विश्वानि। भुवनानि अधि। विमानौ स्वविमानौ। क्षिपन्तौ प्रेरयन्तौ ॥
१-३-५८ हिरण्मयाविति ।किंभूतौ विमानौ। हिरण्मयौ सुवर्णमयौ। शकुनी। लुप्तोपममेतत्। शीघ्रगामित्वात्पक्षिणाविव। यद्वा पदद्वयमप्यश्विनोरेव विशेषणं। हिरण्मयौ सुवर्णालङ्कृतौ। शकुनी आरोग्यकरणेन शकुं शक्तिं नयतः प्रापयत इति शकुनी। सांपरायौ संपरायः परलोकस्तस्मै हितौ। यद्वा सांपरायामापदि अयः प्राप्तिर्ययोस्तौ। भक्तानामापदि तद्रक्षणायागच्छन्तौ। नासत्यदस्रौ। नासत्यौ असत्यरहितौ। नासापुटजातौ वा। दस्रौ दर्शनीयौ। सुसौ सुनासिकौ। विशेषेण जयन्तौ विजयन्तौ। विजयन्तावेव वैजयन्तौ। विवस्वतः सूर्यस्य तरसा बलेन असितं श्यामकुष्टं अधिव्ययन्तौ निराकुर्वन्तौ। शुक्लं दीप्तियुक्तं वर्मं चक्षुर्वा। वयन्तौ कुर्वन्तौ। सूर्यस्य पितृत्वात् तद्बलेन युवयोरेतत्सामर्थ्यं युज्यत इति स्तुतिः। सुवेमौ। लुप्तोपममेतत्। यथा वेमधारिणौ तन्तुवायौ पटादसितकेशादि दूरीकुरुतः शुक्लं च तन्तुं वयतस्तथेत्यर्थः ॥
१-३-५९ ग्रस्तामिति ।हे अश्विनौ। सुपर्णस्य लुप्तोपममेतत्। सुपर्णतुल्यपराक्रमस्य गतेर्वा वृकस्य बलेन ग्रस्तां अभिभूतां। वर्तिकां वर्तिकाख्यां पक्षिणीं। तस्याः सौभगाय जीवनरूपसुखाय। अमुञ्चतां भवन्ताविति शेषः। आस्नो वृकस्येत्यस्यामृचि इयं कथा प्रसिद्धा। अहं तौ युवां तावत् कात्स्न्र्येन अनमं नमस्कृतवानस्मि। तौ कौ। यौ प्रति। सुष्टु वर्तत इति सुवृत् सोमयागकर्ता। तमाय तमु ग्लानाविति धातोः

ग्लानये। असत्तमाः असमीचीना अपि गाः उदावहत् प्रार्थनाविषयत्वेन प्रापयामास। गोविषयप्रार्थनां कृतवानित्यर्थः। किंभूतौ यौ। अरुणा अरुणौ। डादेशश्छान्दसः। लुप्तोपममेतत्। सोमयागे हि प्रातरनुवाकादावश्विनोः स्तुतत्वात् यथा दिनारम्भे अरुणस्तथा सोमयागारम्भे युवामित्यर्थः। अत्रायमाशयः। सोमयागे इन्द्रादिषु देवताभूतेषु सत्स्वपि असमीचीनगोरक्षणस्यानन्यसाध्यत्वज्ञानेन यजमानेन भवन्तावेव प्रार्थितावित्यहमपि युवामेव स्तौमीति ॥

१-३-६० षष्टिश्च गाव इति । ज्योतिष्टोमे सन्त्युपसदस्तिस्रः। ताश्च सत्रेऽधिका भवन्ति। उपसत्सु च प्रवर्ग्य उक्तः। तत्र महावीराख्यपात्रेषु तप्ते घृते दुग्धं प्रक्षिप्यते तदर्था चास्ति धेनुः। ततो घृतं दुग्धं च मिश्रमश्विभ्यां हूयते। एवं सति यदा गवामयनादिसत्रेषु संवत्सरमुपसदः क्रियन्ते तत्र घर्मे सर्वोत्कृष्टे अश्विनावेव यष्टव्याविति स्तुतिरत्र क्रियते। तावश्विनावनममिति गतेन संबन्धः। तौ कौ यत्तदोर्नित्यसंबन्धाद्यौ तं घर्मं दुहतः साधयतः। प्रसिद्धोपि घर्मो भवतोर्भवति। भवतोरेव देवतात्वादित्याशयः। तं कं यत्तदोर्नित्यसंबन्धाद्यं घर्मं त्रिशताः षष्टिश्च धेनवो दुग्धदात्र्यो गावः। घर्मे दुग्धरहितानां गवामनुपयोगात्। एकं वत्सं वत्सरं। अत्यन्तसंयोगे द्वितीया। वत्सरावधीत्यर्थः। सुवते साधयन्ति। घृतेन। दुहन्ति दुग्धेन साधयन्ति। यज्ञादौ सावनः स्मृत इति वाक्यादत्र सावनवर्षग्रहणेन षष्ट्यधिकशतत्रयदिनानि भवन्ति। तेन तावत्य एव गावः घृतदुग्धाभ्यां घर्मं साधयन्तीत्यर्थः। कथंभूता गावः। नानागोष्ठाः लुप्तोपममेतत्। दिनानां गोष्ठोपमाया विवक्षितत्वात् नानागोष्ठनिष्ठा इत्यर्तः। एकदोहना विहिताः एकोऽध्वर्युर्दोहनकर्ता यासामेवंभूताः श्रुतावुक्ता इत्यर्थः। किंभूत घर्मं उक्थ्यं प्रशस्यम् ॥

१-३-६१-६२ एकां नाभिमिति । सूर्यरथचालकत्वेनाश्विनावत्र स्तूयेते। श्लोकद्वयस्यैकान्वयः। हे अश्विनौ युवां। विषीदतं विषीदन्तं। छान्दसो नुमभावः। मां मुञ्चतः। लकारव्यत्ययेन मुञ्चतमित्याशंसा। तौ कौ। यावश्विनौ। चर्षणी लुप्तोपमं चैतत्। चर्षणिशब्दो निघण्टुषु मनुष्यपर्यायः पठितः। मनुष्याविवेत्यर्थः। सूर्यरथचालकत्वेन अश्विनोः शोभां वक्तुं सूर्यरथसंबन्धिचक्रद्वयगतिं वर्णयति पादत्रिकद्वयेन। एकपदमावृत्य योज्यं। एकं चक्रं ईदृशं परिवर्तते भ्रमति। अन्यदेकं चक्रं ईदृशं वर्तते

चलतीत्यर्थः। कीदृशमेकं चक्रं आद्यस्य एकां नाभिं सप्तशताः सप्तशतसङ्ख्याः अराः अन्याश्च विंशतिसङ्ख्या अराः श्रिताः संलग्नाः। चक्रमध्यस्थनाभौ विंशत्यधिकसप्तशतसंख्याः अराः तिर्यक् संलग्ना इत्यर्थः। किंभूता अराः। प्रधिषु बाह्यचक्रावयवेषु अर्पिता अधिनिवेशिता इत्यर्थः। कीदृशमन्यच्चक्रं द्वादशारं षण्णाभि। पुंरत्वं छान्दसम्। कीदृशं प्रथमचक्रं। अनेमि चलनेमिरहितमित्यर्थः। अजरं न जीर्यत इत्यजरम्। जीर्णं न भवतीत्यर्थः। एकं चक्रं मध्यशङ्कुनिहितपाशवत्स्वस्थल एव परिभ्रमत्। द्वितीयं तु समन्ततश्चरतीत्याशयः। द्वितीयचक्रविशेषणमेकाक्षमिति। एकं उत्कृष्टोऽक्षोऽस्य अतिदृढ इत्यर्थः। अमृतस्य स्वर्गस्य धारणं रक्षणसाधनम्। यस्मिन्स्वचक्रे विश्वे सवे देवाः अधिविषक्ताः। प्राधान्याद्देवग्रहणम्। तेन तदुपलक्षिताः सर्वे जीवा इत्यर्थः। सर्वेषां सूर्यचक्रनियोगोदितत्वादित्यर्थः। अत्र "पञ्चारे चक्रे" इत्यादिश्रुतयो मानम् ॥

१-३-६३ अश्विनाविति । हे अश्विनौ दासपत्नी। सुपांसुलुगिति लुप्त सप्तमीबहुवचनत्वेन दासपत्नीषु अप्सु। इन्दुं अमृतं सोमाख्यममृतं। तिरोधत्तां कृतवन्तौ। किंभूतावश्विनौ वृत्तभूयौ भूयोवृत्तौ नानाकर्माणावित्यर्थः। हित्वेति। अश्विनौ यत् यदा गिरिं मे हित्वा त्यक्त्वा गां भुवं उदाचरन्तौ गच्छन्तौ। तत् तदा बलस्य प्राणिनां सामर्थ्यस्य संबन्धिनीं तज्जनिकां वृष्टिं प्रति। अह्नात शीघ्रम्। अह्नादिति सुबन्तप्रतिरूपकमव्ययं। प्रस्थितौ कृतप्रस्थानौ भवथः। सुमेरोः सकाशाद्भुवमागत्य प्राणिनामन्नादिद्वारेण बलजनिकां वृष्टिं कुरुथ इत्यर्थः ॥

१-३-६४ युवामिति । हे अश्विनौ युवां अग्रे प्रथमं समानं सम्यक् आनः आगतं गमन यस्मिन्कर्मणि तथा। सोमयागे प्रथमं गच्छन्ताविति यावत् दश दिशो जनयथः। दिक्षब्देन इन्द्रादयो दिक्पाला लक्ष्यन्ते। जनिः प्रादुर्भावार्थः। सोमयागे प्रथमगामित्वेन इन्द्रादिदेवताप्रादुर्भावकत्वं। अथ तदनन्तरं याः दिशः दिग्देवता मूर्ध्नि यागस्य मूर्ध्नि प्रधाने वियन्ति संबन्ध्यन्ते। तासां दिग्देवतानां यातं यानमनु पश्चात् ऋषयः प्रयान्ति मूर्ध्नीति पूर्वेणान्वयः। अतएव युवयोः देवा मनुष्याश्च क्षितिमैश्वर्यं ऐश्वर्य युक्तां स्तुतिमाचरन्ति कुर्वन्ति ॥

१-३-६५ युवां वर्णानिति त इति तच्छब्दात् यच्छब्दो द्रष्टव्यः । हे अश्विनौ युवां वर्णान्नानावर्णान् विश्वरूपान् सृष्ट्यादिहेतुत्वेन अनेकरूपान् यानभानून् विकुरुथः विशेषेण कुरुथः

सूर्यरथप्रकाशयितृत्वादित्याशयः। ते भानवः सूर्यकिरणाः
विश्वा विश्वानि सर्वाणि भुवनानि अधिक्षियन्ते आवृण्वन्ति। त एव
भानवोऽनुसृताश्चरन्त्यपि विचरन्ति चेत्यर्थः। अतएव देवा
मनुष्याश्च युवयोः क्षिति स्तुतिमाचरन्तीति पूर्ववदर्थः ॥
१-३-६६ तौ नासत्याविति हे नासत्यावश्विनौ अहं तौ
वां युवां महे पूजयामि । मनसा पूजयामीत्यर्थः। यां
छान्दसत्वेन जात्यभिप्रायेणैकवचनम्। ये। पुष्करस्य
जात्यभिप्रायैकवचनं। पुष्कराणां पद्मानां स्रजं जात्येकवचनेन
स्रजौ माले बिभृथो धारयथः। तौ प्रसिद्धौ अमृतौ नास्ति मृतं
मरणं ययोस्तौ तथोक्तौ ऋतावृधौ ऋतं सत्यं यज्ञमुदकं
वा वर्धयत इति तथा तौ नासत्यौ ऋते विना देवा इन्द्रादयः पदे
स्थाने सोमयागादौ तद्देवसंबन्धित्वेन प्रसिद्धं हविः न प्रसूते
वचनव्यत्ययेन न प्राप्नुवन्ति। सोमयागे अश्विनोः प्रथमगामित्वेन
तौ विना देवाः स्वांशं न स्वीकुर्वन्तीत्यर्थः ॥
१-३-६७ मुखेन गर्भमिति । हे अश्विनौ तौ युवां जीवसे
जीवितु। असेन्प्रत्ययान्तमेतत्। गां दृष्टिं मुञ्चथः लकारव्यत्ययेन
मुञ्चतमित्याशंसा। तौ कौ यौ मुखेन कृत्वा युवानौ तरुणावेव
गर्भं भावप्रधानो निर्देशः। गर्भत्वं लभतां अलभतां। बहुलं
छन्दसीत्यडभावः। ननु नवमासगर्भधारणाभावे कथमाकस्मिकोत्पत्तिः
कथं च स्तन्यपानाद्यभावे आकस्मिकं तारुण्यमित्यत
आह। गतासुरित्यादि। गता असवः प्राणा यस्येति गतासुर्मनुष्यादिः। एतत्
छान्दसो लिङ्गव्यत्ययः। एनं गर्भं। प्रपदेन प्रकृष्टेन पदेन
गमनेन नवमासरूपेण प्रसूते जातः उत्पन्नः स गर्भः सद्यः
तत्काले जननीं अत्ति पिबति। मनुष्यदेहे एतदुचितम्। अश्विनोस्तु
मरणधर्मत्वाभावान्नैवमित्याशयः ॥
१-३-७७ एषा तस्येति सूतवाक्यं ॥
१-३-७९ गौर्बलीवर्दः ॥
१-३-८१ नेयेष न कामितवान् ॥
१-३-८३ नियोजयामास अग्निशुश्रूषादताविति शेषः ॥
१-३-८४ परिहीयते न्यूनं भवति ॥
१-३-९० आहुः वृद्धा इति शेषः ॥
१-३-९१ ब्रूयात् अध्यायपयेत् । पृच्छति अधीते। अधर्मेण
गुरुदक्षिणादिव्यतिरेकेण ॥
१-३-९६ पिनद्धे धृते ॥
१-३-१०१ अनुपस्पृश्य अनाचम्य ॥
१-३-१०६ अनृतेनोपचरितुं वञ्चयितुं ॥

१-३-१२७ उदकार्थं शौचाचमनादि कर्तुं ॥
१-३-१२९ दृढमासन्नः अत्यन्तसन्निहितः ॥
१-३-१३५ कल्माषकुण्डलाः चित्रकुण्डलाः ॥
१-३-१३७ अर्कांशुसेनायां सेनावद्बहुःसहरश्मिजाले ॥
१-३-१४२ महद्द्युग्नि तीर्थविशेषे ॥
१-३-१४५ मन्त्रवादश्लोकैः मन्त्रस्वरूपश्लोकैः ॥
१-३-१४६ त्रीण्यर्पितानीति
। मन्त्रलिङ्गमात्रावगमात्तुष्टाव। विशेषशानं तु तस्य
गुरुमुखादेव भविष्यति। अत्र चक्रे। नित्यं चरति भ्रमति। ध्रुवे
प्रवाहरूपेण नित्ये कालरूपे। शतानि षष्टिश्च अहोरात्राणामिति
शेषः। चतुर्विंशतिपर्वणां शुक्लकृष्णपक्षरूपाणां योगो
युस्मिन्तथाभूते। मध्येऽर्पितानि। यच्च षड्कुमाराः ऋतवः
परिवर्तयन्ति ॥
१-३-१४७ तन्त्रं चेदमिति । तन्त्रं आतानवितानरूपं
तन्तुसमुदायं। विश्वरूपे समयभेदेन स्त्रीपुरुषादिरूपे। युवत्यौ
धाताविघातारौ। वयतः रचनां कुरतः। संवत्सररूपं
पटमितिशेषः। वर्तयन्त्यौ संचारयन्त्यौ। भूतानि च
परिवर्तयन्त्यौ वयत इति पूर्वेणान्वयः ॥
१-३-१४८ भर्ता धारकः ॥
१-३-१४९ अपां गर्भं अद्भ्यो जातं । पुराणं आदिसर्गभवं। वैश्वानरं
अग्निरूपमश्व। वाजिन वाहनं अभ्युपैति। तस्मै नम इत्यन्वयः ॥
१-३-१५२ स्नोतोभ्यः शरीररन्ध्रेभ्यः ॥
१-३-१५७ आवापयन्ती वेणीरूपेण केशानां संग्रथनं कारयन्ती ॥
१-३-१५९ त्वं मनागसि न शप्तः इति पाठे स्वलकालनिमित्तं न शप्तोसि
। यदि क्षमं नागतः स्याः शप्तः स्या इत्यर्थः ॥
१-३-१६८ न व्यापन्नो न मृतः ॥
१-३-१८२ कश्यप इत्यपि पाठो दृश्यते ॥
॥
तृतीयोऽध्यायः ॥
३ ॥

आदिपर्व - अध्याय ००४
॥ श्रीः ॥
१.४. अध्यायः ४

(अथ पौलोमपर्व ॥ ४ ॥)

सौतिशौनकसंवादमुखेन कथोपोद्धातः ॥१ ॥

रोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिशारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे ऋषीनभ्यागतानुपतस्थे ॥ १-४-१ (८८८)
पौराणिकः पुराणे कृतश्रमः स कृताञ्जलिस्तानुवाच ।
ग्मयोत्तङ्कस्य चरितमशेषमुक्तं जनमेजयस्य सार्पसत्रे निमित्तान्तरमिदमपि।'
किं भवन्तः श्रोतुमिच्छन्ति किमहं ब्रवाणीति ॥ १-४-२ (८८९)
तमृषय ऊचुः।१-४-३क्ष् (२५)
परं रौमहर्षणे प्रवक्ष्यामस्त्वां नः प्रतिवक्ष्यसि वचः
शुश्रूषतां कथायोगं नः कथायोगे ॥ १-४-३ (८९०)
तत्र भगवान् कुलपतिस्तु शौनकोऽग्निशरणमध्यास्ते ।
ग्दीर्घसत्रत्वात्सर्वाः कथाः श्रोतुं कालोस्ति ॥' १-४-४ (८९१)
यौऽसौ दिव्याः कथा वेद देवतासुरसंश्रिताः ।
मनुष्योरगगन्धर्वकथा वेद च सर्वशः ॥१-४-५ (८९२)
स चाप्यस्मिन्मशे सौते विद्वान्कुलपतिर्दिवजः ।
दक्षो धृतव्रतो धीमाञ्शास्त्रे चारण्यके गुरुः ॥१-४-६ (८९३)
सत्यवादी शमपरस्तपस्वी नियतव्रतः ।
सर्वेषामेव नो मान्यः स तावत्प्रतिपाल्यताम् ॥१-४-७ (८९४)
तस्मिन्नध्यासति गुरावासनं परमार्चितम् ।
ततो वक्ष्यसि यत्त्वां स प्रक्ष्यति द्विजसत्तमः ॥१-४-८ (८९५)
सौतिरुवाच।१-४-९क्ष् (२६)
एवमस्तु गुरौ तस्मिन्नुपविष्टे महात्मनि ।
तेन पृष्टः कथाः पुण्या वक्ष्यामि विविधाश्रयाः ॥१-४-९ (८९६)
सोऽथ विप्रर्षभः सर्वं कृत्वा कार्यं यथाविधि ।
देवान्वाग्भिः पितॄनद्भिस्तर्पयित्वाऽऽजगाम ह ॥१-४-१० (८९७)
यत्र ब्रह्मर्षयः सिद्धाः सुखासीना धृतव्रताः ।
यज्ञायतनमाश्रित्य सूतपुत्रपुरस्पराः ॥१-४-११ (८९८)
ऋत्विक्ष्वथ सदस्येषु स वै गृहपतिस्तदा ।
उपविष्टेषूपविष्टः शौनकोऽथाब्रवीदिदम् ॥ ॥१-४-१२ (८९९)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४-७ प्रतिपाल्यतां प्रतीक्ष्यतां ॥

१-४-१० वाग्भिः ब्रह्मयज्ञीयाभिः ॥
चतुर्थोऽध्यायः ॥
४ ॥

आदिपर्व - अध्याय ००५
॥ श्रीः ॥
१.५. अध्यायः ५

Mahabharata - Adi Parva - Chapter Topics
भृगुवंशकथनम् ॥ १ ॥
पौलोमोपाख्यानम् ॥ २ ॥
पुलोमापहारः ॥ ३ ॥
पुलोमाग्निसंवादः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-५-० (९००)
शौनक उवाच। १-५-०क्ष् (२७)
पुराणमखिलं तात पिता तेऽधीतवान्पुरा ।
ग्भारताध्ययनं सर्वं कृष्णद्वैपायनात्तदा।'
कच्चित्त्वमपि तत्सर्वमधीषे रौमहर्षणे ॥ १-५-१ (९०१)
पुराणे हि कथा दिव्या आदिवंशाश्च धीमताम् ।
कथ्यन्ते ये पुराऽस्माभिः श्रुतपूर्वाः पितुस्तव ॥ १-५-२ (९०२)
तत्र वंशमहं पूर्वं श्रोतुमिच्छामि भार्गवम् ।
कथयस्व कथामेतां कल्याः स्मः श्रवणे तव ॥ १-५-३ (९०३)
सौतिरुवाच। १-५-४क्ष् (२८)
यदधीतं पुरा सम्यग्द्विजश्रेष्ठैर्महात्मभिः ।
वैशम्पायनविप्राग्र्यैस्तैश्चापि कथितं यथा ॥ १-५-४ (९०४)
यदधीतं च पित्रा मे सम्यक्कैव ततो मया ।
तावच्छृणुष्व यो देवैः सेन्द्रैः सर्षिमरुद्गणैः ॥ १-५-५ (९०५)
पूजितः प्रवरो वंशो भार्गवो भृगुनन्दन ।
इमं वंशमहं पूर्वं भार्गवं ते महामुने ॥ १-५-६ (९०६)
निगदामि यथायुक्तं पुराणाश्रयसंयुतम् ।
भृगुर्महर्षिर्भगवान्ब्रह्मणा वै स्वयंभुवा ॥ १-५-७ (९०७)
वरुणस्य क्रतौ जातः पावकादिति नः श्रुतम् ।
भृगोः सुदयितः पुत्रश्च्यवनो नाम भार्गवः ॥ १-५-८ (९०८)

च्यवनस्य च दायादः प्रमतिर्नाम धार्मिकः ।
प्रमतेरप्यभूत्पुत्रो घृताच्यां रुरुरित्युत ॥ १-५-९ (९०९)
रुरोरपि सुतो जज्ञे शुनको वेदपारगः ।
प्रमद्वरायां धर्मात्मा तव पूर्वपितामहः ॥ १-५-१० (९१०)
तपस्वी च यशस्वी च श्रुतवान्ब्रह्मवित्तमः ।
धार्मिकः सत्यवादी च नियतो नियताशनः ॥ १-५-११ (९११)
शौनक उवाच। १-५-१२क्ष् (२९)
सूतपुत्र यथा तस्य भार्गवस्य महात्मनः ।
च्यवनत्वं परिख्यातं तन्ममाचक्ष्व पृच्छतः ॥ १-५-१२ (९१२)
सौतिरुवाच। १-५-१३क्ष् (३०)
भृगोः सुदयिता भार्या पुलोमेत्यभिविश्रुता ।
तस्यां समभवद्गर्भो भृगुवीर्यसमुद्भवः ॥ १-५-१३ (९१३)
तस्मिन्गर्भेऽथ संभूते पुलोमायां भृगूद्वह ।
समये समशीलिन्यां धर्मपत्न्यां यशस्विनः ॥ १-५-१४ (९१४)
अभिषेकाय निष्क्रान्ते भृगौ धर्मभृतां वरे ।
आश्रमं तस्य रक्षोऽथ पुलोमाऽभ्याजगाम ह ॥ १-५-१५ (९१५)
तं प्रविश्याश्रमं दृष्ट्वा भृगोर्भार्यामनिन्दिताम् ।
हृच्छयेन समाविष्टो विचेताः समपद्यत ॥ १-५-१६ (९१६)
अभ्यागतं तु तद्रक्षः पुलोमा चारुदर्शना ।
न्यमन्त्रयत वन्येन फलमूलादिना तदा ॥ १-५-१७ (९१७)
तां तु रक्षस्तदा ब्रह्मन्हृच्छयेनाभिपीडितम् ।
दृष्ट्वा हृष्टमभूद्राजञ्जिहीर्षुस्तामनिन्दिताम् ॥ १-५-१८ (९१८)
जातमित्यब्रवीत्कार्यं जिहीर्षुर्मुदितः शुभाम् ।
सा हि पूर्वं वृता तेन पुलोम्ना तु शुचिस्मिता ॥ १-५-१९ (९१९)
तां तु प्रादात्पिता पश्चाद्भृगवे शास्त्रवत्तदा ।
तस्य तत्किल्बिषं नित्यं हृदि वर्तति भार्गव ॥ १-५-२० (९२०)
इदमन्तरमित्येवं हर्तुं चक्रे मनस्तदा ।
अथाग्निशरणेऽपश्यज्ज्वलन्तं जातवेदसम् ॥ १-५-२१ (९२१)
तमपृच्छत्ततो रक्षः पावकं ज्वलितं तदा ।
शंस मे कस्य भार्येयमग्ने पृच्छे ऋतेन वै ॥ १-५-२२ (९२२)
मुखं त्वमसि देवानां वद पावक पृच्छते ।
मया हीयं वृता पूर्वं भार्यार्थे वरवर्णिनी ॥ १-५-२३ (९२३)
पश्चादिमां पिता प्रादाद्भृगवेऽनृतकारकः ।
सेयं यदि वरारोहा भृगोर्भार्या रहोगता ॥ १-५-२४ (९२४)
तथा सत्यं समाख्याहि जिहीर्षाम्याश्रमादिमाम् ।
स मन्युस्तत्र हृदयं प्रदहन्निव तिष्ठति ॥ १-५-२५ (९२५)

मत्पूर्वभार्यां यदिमां भृगुराप सुमध्यमाम् ।
ग्असंमतमिदं मेऽद्य हरिष्याम्याश्रमादिमाम्'॥ १-५-२६ (९२६)
सौतिरुवाच। १-५-२७क्ष् (३१)
एवं रक्षस्तमामन्त्र्य ज्वलितं जातवेदसम् ।
शङ्कमानं भृगोर्भार्यां पुनःपुनरपृच्छत ॥ १-५-२७ (९२७)
त्वमग्ने सर्वभूतानामन्तश्चरसि नित्यदा ।
साक्षिवत्पुण्यपापेषु सत्यं ब्रूहि कवे वचः ॥ १-५-२८ (९२८)
मत्पूर्वभार्याऽपहृता भृगुणाऽनृतकारिणा ।
सेयं यदि तथा मे त्वं सत्यमाख्यातुमर्हसि ॥ १-५-२९ (९२९)
श्रुत्वा त्वत्तो भृगोर्भार्यां हरिष्याम्याश्रमादिमाम् ।
जातवेदः पश्यतस्ते वद सत्यां गिरं मम ॥ १-५-३० (९३०)
सौतिरुवाच। १-५-३१क्ष् (३२)
तस्यैतद्वचनं श्रुत्वा सप्तार्चिर्दुःखितोऽभवत् ।
ग्सत्यं वदामि यदि मे शापः स्याद्ब्रह्मवित्तमात् ॥ १-५-३१ (९३१)
असत्यं चेदहं ब्रूयां पतिष्ये नरकान्ध्रुवम्।'
भीतोऽनृताच्च शापाच्च भृगोरित्यब्रवीच्छनैः ॥ १-५-३२ (९३२)
त्वया वृता पुलोमेयं पूर्वं दानवनन्दन ।
किं त्वियं विधिना पूर्वं मन्त्रवन्न वृता त्वया ॥ १-५-३३ (९३३)
पित्रा तु भृगवे दत्ता पुलोमेयं यशस्विनी ।
ददाति न पिता तुभ्यं वरलोभान्महायशाः ॥ १-५-३४ (९३४)
अथेमां वेददृष्टेन कर्मणा विधिपूर्वकम् ।
भार्यामृषिर्भृगुः प्राप मां पुरस्कृत्य दानव ॥ १-५-३५ (९३५)
सेयमित्यवगच्छामि नानृतं वक्तुमुत्सहे ।
नानृतं हि सदा लोके पूज्यते दानवोत्तम ॥ ॥ १-५-३६ (९३६)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-५-३ कल्याः समर्थाः ।तव त्वत्तः श्रोतुमिति संबन्धः ॥
१-५-७ यथायुक्तं कथायुक्तं इत्यपि पाठः ।पुराणस्य आश्रयः उपोद्धातःतत्संयुतं ॥
१-५-१९ बाल्ये किल रुदतीं कन्यां रोदनानिवृत्त्यर्थं भीषयितुं पित्रोक्तं रे रक्ष एनां गृहाणेति ।तावतैव गृहे सन्निहितेन रक्षसा वृता ममेयं भार्येति ॥
१-५-२७ शङ्कमानं छलवचनेन पूर्वं मह्यं दत्ता पश्चाद्विधिपूर्वकं भृगवे दत्ताऽतो मम वा भृगोर्वा भार्येति

सन्दिहानम् ॥
१-५-२८ कवे सर्वज्ञ ॥
पञ्चमोऽध्यायः ॥
५ ॥

आदिपर्व - अध्याय ००६
॥ श्रीः ॥
१.६. अध्यायः ६

Mahabharata - Adi Parva - Chapter Topics
च्यवनोत्पत्ती रक्षोविनाशश्च ॥ १ ॥
अग्नेर्भृगुशापः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-६-० (९३७)
सौतिरुवाच। १-६-०क्ष् (३३)
अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम् ।
ब्रह्मन्वराहरूपेण मनोमारुतरंहसा ॥ १-६-१ (९३८)
ततः स गर्भो निवसन्कुक्षौ भृगुकुलोद्वह ।
रोषान्मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोऽभवत् ॥ १-६-२ (९३९)
तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्चसम् ।
तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य ताम् ॥ १-६-३ (९४०)
सा तमादाय सुश्रोणी ससार भृगुनन्दनम् ।
च्यवनं भार्गवं पुत्रं पुलोमा दुःखमूर्च्छिता ॥ १-६-४ (९४१)
तां ददर्श स्वयं ब्रह्मा सर्वलोकपितामहः ।
रुदतीं बाष्पपूर्णाक्षीं भृगोर्भार्यामनिन्दिताम् ॥ १-६-५ (९४२)
सान्त्वयामास भगवान्वधूं ब्रह्मा पितामहः ।
अश्रुबिन्दूद्भवा तस्याः प्रावर्तत महानदी ॥ १-६-६ (९४३)
आवर्तन्ती सृतिं तस्या भृगोः पत्न्यास्तपस्विनः ।
तस्या मार्गं सृतवतीं दृष्ट्वा तु सरितं तदा ॥ १-६-७ (९४४)
नाम तस्यास्तदा नद्याश्चक्रे लोकपितामहः ।
वधूसरेति भगवांश्च्यवनस्याश्रमं प्रति ॥ १-६-८ (९४५)
स एवं च्यवनो जज्ञे भृगोः पुत्रः प्रतापवान् ।
तं ददर्श पिता तत्र च्यवनं तां च भामिनीम् ।
स पुलोमां ततो भार्यां पप्रच्छ कुपितो भृगुः ॥ १-६-९ (९४६)
भृगुरुवाच। १-६-१०क्ष् (३४)

केनासि रक्षसे तस्मै कथिता त्वं जिहीर्षवे ।
न हि त्वा वेद तद्रक्षो मद्भार्यां चारुहासिनीम् ॥१-६-१० (९४७)
तत्त्वमाख्याहि तं ह्यद्य शप्तुमिच्छाम्यहं रुषा ।
बिभेति को न शापान्मे कस्य चायं व्यतिक्रमः ॥१-६-११ (९४८)
पुलोमोवाच।१-६-१२क्ष् (३५)
अग्निना भगवंस्तस्मै रक्षसेऽहं निवेदिता ।
ततो मामनयद्रक्षः क्रोशन्तीं कुररीमिव ॥१-६-१२ (९४९)
साऽहं तव सुतस्यास्य तेजसा परिमोक्षिता ।
भस्मीभूतं च तद्रक्षो मामुत्सृज्य पपात वै ॥१-६-१३ (९५०)
सौतिरुवाच।१-६-१४क्ष् (३६)
इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् ।
शशापाग्निमतिक्रुद्धः सर्वभक्षो भविष्यसि ॥ ॥१-६-१४ (९५१)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६-२ तेन च्युतत्वेन हेतुना ॥
२ ॥
१-६-७ आवर्तन्ती सृतिं तस्याः । सृतिं मार्गं। अनुवर्त्म सृता
तस्या इति पाठान्तरं ॥
७ ॥
षष्ठोऽध्यायः ॥
६ ॥

आदिपर्व - अध्याय ००७
॥ श्रीः ॥
१.७. अध्यायः ७

Mahabharata - Adi Parva - Chapter Topics
क्रोधेनाग्निकृत आत्मोपसंहारः ॥ १ ॥
ब्रह्मोक्तसान्त्ववचनेनाग्नेः संतोषः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-७-० (९५२)
सौतिरुवाच।१-७-०क्ष् (३७)
शप्तस्तु भृगुणा वह्निः क्रुद्धो वाक्यमथाब्रवीत् ।

किमिदं साहसं ब्रह्मन्कृतवानसि मां प्रति ॥१-७-१ (९५३)
धर्मे प्रयतमानस्य सत्यं च वदतः समम् ।
पृष्टो यदब्रवं सत्यं व्यभिचारोऽत्र को मम ॥१-७-२ (९५४)
पृष्टो हिसाक्षीयः साक्ष्यं जानानोऽप्यन्यथा वदेत् ।
स पूर्वानात्मनः सप्त कुले हन्यात्तथाऽपरान् ॥१-७-३ (९५५)
यश्च कार्यार्थतत्त्वज्ञो जानानोऽपि न भाषते ।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः ॥१-७-४ (९५६)
शक्तोऽहमपि शप्तुं त्वां मान्यास्तु ब्राह्मणा मम ।
जानतोऽपि च ते ब्रह्मन्कथयिष्ये निबोध तत् ॥१-७-५ (९५७)
योगेन बहुधाऽऽत्मानं कृत्वा तिष्ठामि मूर्तिषु ।
अग्निहोत्रेषु सत्रेषु क्रियासु च मखेषु च ॥१-७-६ (९५८)
वेदोक्तेन विधानेन मयि यद्धूयते हविः ।
देवताः पितरश्चैव तेन तृप्ता भवन्ति वै ॥१-७-७ (९५९)
आपो देवगणाः सर्वे आपः पितृगणास्तथा ।
दर्शश्च पौर्णमासश्च देवानां पितृभिः सह ॥१-७-८ (९६०)
देवताः पितरस्तस्मात्पितरश्चापि देवताः ।
एकीभूताश्च दृश्यन्ते पृथक्त्वेन च पर्वसु ॥१-७-९ (९६१)
देवताः पितरश्चैव भुञ्जते मयि यद्धुतम् ।
देवतानां पितॄणां च मुखमेतदहं स्मृतम् ॥१-७-१० (९६२)
अमावास्यां हि पितरः पौर्णमास्यां हि देवताः ।
मन्मुखेनैव हूयन्ते भुञ्जते च हुतं हविः ॥१-७-११ (९६३)
सर्वभक्षः कथं त्वेषां भविष्यामि मुखं त्वहम्। १-७-१२ (९६४)
सौतिरुवाच ।
चिन्तयित्वा ततो वह्निश्चक्रे संहारमात्मनः ॥ १-७-१२क्ष् (३८)
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ।
निरोंकारवषट्काराः स्वधास्वाहाविवर्जिताः ॥१-७-१३ (९६५)
विनाऽग्निना प्रजाः सर्वास्तत आसन्सुदुःखिताः ।
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन्वचः ॥१-७-१४ (९६६)
अग्निनाशात्क्रियाभ्रंशाद्भ्रान्ता लोकास्त्रयोऽनघाः ।
विधध्वमत्र यत्कार्यं न स्यात्कालात्ययो यथा ॥१-७-१५ (९६७)
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ।
अग्नेरावेदयञ्शापं क्रियासंहारमेव च ॥१-७-१६ (९६८)
भृगुणा वै महाभाग शप्तोऽग्निः कारणान्तरे ।
कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा ॥१-७-१७ (९६९)
हुतभुक्सर्वलोकेषु सर्वभक्षत्वमेष्यति। १-७-१८ (९७०)
सौतिरुवाच ।

श्रुत्वा तु तद्वचस्तेषामग्निमाहूय विश्वकृत् ॥ १-७-१८क्ष् (३९)
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ।
लोकानामिह सर्वेषां त्वं कर्ता चान्त एव च ॥ १-७-१९ (९७१)
त्वं धारयसि लोकांस्त्रीन्क्रियाणां च प्रवर्तकः ।
स तथा कुरु लोकेश नोच्छिद्येरन्यथा क्रियाः ॥ १-७-२० (९७२)
कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन ।
त्वं पवित्रं सदा लोके सर्वभूतगतिश्च ह ॥ १-७-२१ (९७३)
न त्वं सर्वशरीरेण सर्वभक्षत्वमेष्यसि ।
अपाने ह्यर्चिषो यास्ते सर्वं भक्ष्यन्ति ताः शिखिन् ॥ १-७-२२ (९७४)
क्रव्यादा च तनुर्या ते सा सर्वं भक्षयिष्यति ।
यथा सूर्यांशुभिः स्पृष्टं सर्वं शुचि विभाव्यते ॥ १-७-२३ (९७५)
तथा त्वदर्चिर्निर्दग्धं सर्वं शुचि भविष्यति ।
त्वमग्ने परमं तेजः स्वप्रभावाद्विनिर्गतम् ॥ १-७-२४ (९७६)
स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो ।
देवानां चात्मनो भागं गृहाण त्वं मुखे हुतम् ॥ १-७-२५ (९७७)
सौतिरुवाच। १-७-२६क्ष् (४०)
एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ।
जगाम शासनं कर्तुं देवस्य परमेष्ठिनः ॥ १-७-२६ (९७८)
देवर्षयश्च मुदितास्ततो जग्मुर्यथागतम् ।
ऋषयश्च यथा पूर्वं क्रियाः सर्वाः प्रचक्रिरे ॥ १-७-२७ (९७९)
दिवि देवा मुमुदिरे भूतसङ्घाश्च लौकिकाः ।
अग्निश्च परमां प्रीतिमवाप हतकल्मषः ॥ १-७-२८ (९८०)
एवं स भगवाञ्छापं लेभेऽग्निर्भृगुतः पुरा ।
एवमेष पुरा वृत्त इतिहासोऽग्निशापजः ।
पुलोम्नश्च विनाशोऽयं च्यवनस्य च संभवः ॥ ॥ १-७-२९ (९८१)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि सप्तमोऽध्यायः ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७-२ समं पक्षपातहीनां । व्यभिचारः अपराधः ॥
२ ॥
१-७-८ आपः सोमाज्य प्रभृतयोग्नौ हूयमाना देवपितृरूपाः । अग्नौ हुता आप एव देवताशरीररूपेण परिणमन्त इत्यर्थः ॥
१-७-९ देवादिभावस्यापि कर्मप्राप्यत्वाद्देवानां पितॄणां च मिथो भेदो नास्त्येव तुल्यहेतुकत्वादित्याह देवता इति ॥
१-७-११ अमावास्यां अमावास्यायां । हूयन्ते इज्यन्ते ॥

१-७-१२ संहारं तिरोभावं ॥
१-७-२२ भक्ष्यन्ति भक्षयिष्यन्ति ॥
१-७-२३ क्रव्यादा मांसभक्षिणी ॥
१-७-२४ स्वप्रभावात् अग्निप्रेरणया । तस्य वागधिष्ठातृत्वात्तत्प्रेरणयैव विनिर्गतं शापं ॥
२४ ॥
सप्तमोऽध्यायः ॥
७ ॥

आदिपर्व - अध्याय ००८
॥ श्रीः ॥
१.८. अध्यायः ८

Mahabharata - Adi Parva - Chapter Topics
रुरुचरितं ॥ १ ॥
मेन्कात्मजायाः प्रमद्वरायाः रुरुणा सह विवाहप्रसङ्गः ॥ २ ॥
प्रमद्वरायाः सर्पदंशेन रुरोर्दुःखम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-८-० (९८२)
सौतिरुवाच। १-८-०क्ष् (४१)
स चापि च्यवनो ब्रह्मन्भार्गवोऽजनयत्सुतम् ।
सुकन्यायां महात्मानं प्रमतिं दीप्ततेजसम् ॥ १-८-१ (९८३)
प्रमतिस्तु रुरुं नाम घृताच्यां समजीजनत् ।
रुरुः प्रमद्वरायां तु शुनकं समजीजनम् ॥ १-८-२ (९८४)
शुनकस्तु महासत्वः सर्वभार्गवनन्दनः ।
जातस्तपसि तीव्रे च स्थितः स्थिरयशास्ततः ॥ १-८-३ (९८५)
तस्य ब्रह्मन्रुरोः सर्वं चरितं भूरितेजसः ।
विस्तरेण प्रवक्ष्यामि तच्छृणु त्वमशेषतः ॥ १-८-४ (९८६)
ऋषिरासीन्महान्पूर्वं तपोविद्यासमन्वितः ।
स्थूलकेश इति ख्यातः सर्वभूतहिते रतः ॥ १-८-५ (९८७)
एतस्मिन्नेव काले तु मेनकायां प्रजज्ञिवान् ।
गन्धर्वराजो विप्रर्षे विश्वावसुरिति स्मृतः ॥ १-८-६ (९८८)
अप्सरा मेनका तस्य तं गर्भं भृगुनन्दन ।
उत्ससर्ज यथाकालं स्थूलकेशाश्रमं प्रति ॥ १-८-७ (९८९)
उत्सृज्य चैव तं गर्भं नद्यास्तीरे जगाम सा ।

अप्सरा मेनका ब्रह्मन्निर्दया निरपत्रपा ॥१-८-८ (९९०)
कन्याममरगर्भाभां ज्वलन्तीमिव च श्रिया ।
तां ददर्श समुत्सृष्टां नदीतीरे महानृषिः ॥१-८-९ (९९१)
स्थूलकेशः स तेजस्वी विजने बन्धुवर्जिताम् ।
स तां दृष्ट्वा तदा कन्यां स्थूलकेशो महाद्विजः ॥१-८-१० (९९२)
जग्राह च मुनिश्रेष्ठः कृपाविष्टः पुपोष च ।
ववृधे सा वरारोहा तस्याश्रमपदे शुभे ॥१-८-११ (९९३)
जातकाद्याः क्रियाश्चास्या विधिपूर्वं यथाक्रमम् ।
स्थूलकेशो महाभागश्चकार सुमहानृषिः ॥१-८-१२ (९९४)
प्रमदाभ्यो वरा सा तु सत्त्वरूपगुणान्विता ।
ततः प्रमद्वरेत्यस्या नाम चक्रे महानृषिः ॥१-८-१३ (९९५)
तामाश्रमपदे तस्य रुरुर्दृष्ट्वा प्रमद्वराम् ।
बभूव किल धर्मात्मा मदनोपहतस्तदा ॥१-८-१४ (९९६)
पितरं सखिभिः सोऽथ श्रावयामास भार्गवम् ।
प्रमतिश्चाभ्ययाचत्तां स्थूलकेशं यशस्विनम् ॥१-८-१५ (९९७)
ततः प्रादात्पिता कन्यां रुरवे तां प्रमद्वराम् ।
विवाहं स्थापयित्वाग्रे नक्षत्रे भगदैवते ॥१-८-१६ (९९८)
ततः कतिपयाहस्य विवाहे समुपस्थिते ।
सखीभिः क्रीडती सार्धं सा कन्यावरवर्णिनी ॥१-८-१७ (९९९)
नापश्यत्संप्रसुप्तं वै भुजंगं तिर्यगायतम् ।
पदा चैनं समाक्रामन्मुमूर्षुः कालचोदिता ॥१-८-१८ (१०००)
स तस्याः संप्रमत्तायाश्चोदितः कालधर्मणा ।
विषोपलिप्तान्दशनान्भृशमङ्गे न्यपातयत् ॥१-८-१९ (१००१)
सा दष्टा तेन सर्पेण पपात सहसा भुवि ।
विवर्णा विगतश्रीका भ्रष्टाभरणचेतना ॥१-८-२० (१००२)
निरानन्दकरी तेषां बन्धूनां मुक्तमूर्धजा ।
व्यसुरप्रेक्षणीया सा प्रेक्षणीयतमाऽभवत् ॥१-८-२१ (१००३)
प्रसुप्तेवाभवच्चापि भुवि सर्पविषार्दिता ।
भूयो मनोहरतरा बभूव तनुमध्यमा ॥१-८-२२ (१००४)
ददर्श तां पिता चैव ये चैवान्ये तपस्विनः ।
विचेष्टमानां पतितां भूतले पद्मवर्चसम् ॥१-८-२३ (१००५)
ततः सर्वे द्विजतराः समाजग्मुः कृपान्विताः ।
स्वस्त्यात्रेयो महाजानुः कुशिकः शङ्खमेखलः ॥१-८-२४ (१००६)
उद्दालकः कठश्चैव श्वेतश्चैव महायशाः ।
भरद्वाजः कौणकुत्स्य आर्ष्टिषेणोऽथ गौतमः ॥१-८-२५ (१००७)
प्रमतिः सह पुत्रेण तथान्ये वनवासिनः ।

तां ते कन्यां व्यसुं दृष्ट्वा भुजंगस्य विषार्दिताम् ॥१-८-२६ (१००८)
रुरुदुः कृपयाऽविष्टा रुरुस्त्वार्तो बहिर्ययौ ।
ते च सर्वे द्विजश्रेष्ठास्तत्रैवोपाविशंस्तदा ॥ ॥१-८-२७ (१००९)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि अष्टमोऽध्यायः ॥८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-८-३ शुनकस्तु शौनकस्त्वमिति पाठान्तरम् ॥
१-८-६ प्रजज्ञिवान् उत्पादितवान् ॥
१-८-१७ कतिपयाहस्य कतिपयाहस्सु इति पाठान्तरं ।कतिपयाहस्सु
हतेष्वित्यर्थः ॥
१-८-१९ कालधर्मणा मृत्युना ॥
अष्टमोऽध्यायः ॥
८ ॥

आदिपर्व - अध्याय ००९
॥ श्रीः ॥
१.९. अध्यायः ९

Mahabharata - Adi Parva - Chapter Topics
देवदूतवचनेन रुरुकृतस्वार्धायुः प्रदानेन प्रमद्वराजीवनं तया
सह रुरोर्विवाहश्च ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-९-० (१०१०)
सौतिरुवाच।१-९-०क्ष् (४२)
तेषु तत्रोपविष्टेषु ब्राह्मणेषु महात्मसु ।
रुरुश्चुक्रोश गहनं वनं गत्वाऽतिदुःखितः ॥१-९-१ (१०११)
शोकेनाभिहतः सोऽथ विलपन्करुणं बहु ।
अब्रवीद्वचनं शोचन्प्रियां स्मृत्वा प्रमद्वराम् ॥१-९-२ (१०१२)
शेते सा भुवि तन्वङ्गी मम शोकविवर्धिनी ।
ग्प्राणानपहरन्तीव पूर्णचन्द्रनिभानना ॥१-९-३ (१०१३)
यदि पीनायतश्रोणी पद्मपत्रनिभेक्षणा ।
मुमूर्षुरपि मे प्राणानादायाशु गमिष्यति ॥१-९-४ (१०१४)
पितृमातृसखीनां च लुप्तपिण्डस्य तस्य मे।'
बान्धवानां च सर्वेषां किं नु दुःखमतःपरम् ॥ १-९-५ (१०१५)

यदि दत्तं तपस्तप्तं गुरवो वा मया यदि ।
सम्यगाराधितास्तेन संजीवतु मम प्रिया ॥ १-९-६ (१०१६)
यथा च जन्मप्रभृति यतात्माऽहं धृतव्रतः ।
प्रमद्वरा तथाद्यैषा समुत्तिष्ठतु भामिनी ॥ १-९-७ (१०१७)
श‌एवं लालप्यतस्तस्य भार्यार्थे दुःखितस्य च ।
देवदूतस्तदाऽभ्येत्य वाक्यमाह रुरुं वने ॥ॅ १-९-८ (१०१८)
ग्कृष्णे विष्णौ हृषीकेशे लोकेशेऽसुरविद्विषि ।
यदि मे निश्चला भक्तिर्मम जीवतु सा प्रिया ॥ १-९-९ (१०१९)
विलप्यमाने तु रुरौ सर्वे देवाः कृपान्विताः ।
दूतं प्रस्थापयामासुः संदिश्यास्य हितं वचः ॥ १-९-१० (१०२०)
स दूतस्त्वरितोऽभ्येत्य देवानां प्रियकृच्छुचिः ।
उवाच देववचनं रुरुमाभाष्य दुःखितम् ॥ १-९-११ (१०२१)
देवैः सर्वैरहं ब्रह्मन्प्रेषितोऽस्मि तवान्तिकम् ।
त्वद्धितं त्वद्धितैरुक्तं शृणु वाक्यं द्विजोत्तम ॥' १-९-१२ (१०२२)
अभिधत्से ह यद्वाचा रुरो दुःखान्न तन्मृषा ।
न तु मर्त्यस्य धर्मात्मन्नायुरस्ति गतायुषः ॥ १-९-१३ (१०२३)
गतायुरेषा कृपणा गन्धर्वाप्सरसोः सुता ।
तस्माच्छोके मनस्तात मा कृथास्त्वं कथंचन ॥ १-९-१४ (१०२४)
उपायश्चात्र विहितः पूर्वं देवैर्महात्मभिः ।
तं यदीच्छसि कर्तुं त्वं प्राप्स्यसीह प्रमद्वराम् ॥ १-९-१५ (१०२५)
रुरुरुवाच। १-९-१६क्ष् (४३)
क उपायः कृतो देवैर्ब्रूहि तत्त्वेन खेचर ।
करिष्येऽहं तथा श्रुत्वा त्रातुमर्हति मां भवान् ॥ १-९-१६ (१०२६)
देवदूत उवाच। १-९-१७क्ष् (४४)
आयुषोऽर्धं प्रयच्छ त्वं कन्यायै भृगुनन्दन ।
एवमुत्थास्यति रुरो तव भार्या प्रयद्वरा ॥ १-९-१७ (१०२७)
रुरुरुवाच। १-९-१८क्ष् (४५)
आयुषोऽर्धं प्रयच्छामि कन्यायै खेचरोत्तम ।
शृङ्गाररूपाभरणा समुत्तिष्ठतु मे प्रिया ॥ १-९-१८ (१०२८)
सौतिरुवाच। १-९-१९क्ष् (४६)
ततो गन्धर्वराजश्च देवदूतश्च सत्तमौ ।
धर्मराजमुपेत्येदं वचनं प्रत्यभाषताम् ॥ १-९-१९ (१०२९)
धर्मराजायुषोऽर्धेन रुरोर्भार्या प्रमद्वरा ।
समुत्तिष्ठतु कल्याणी मृतैवं यदि मन्यसे ॥ १-९-२० (१०३०)
धर्मराज उवाच। १-९-२१क्ष् (४७)
प्रमद्वरा रुरोर्भार्या देवदूत यदीच्छसि ।

उत्तिष्ठत्वायुषोऽर्धेन रुरोरेव समन्विता ॥ १-९-२१ (१०३१)
सौतिरुवाच। १-९-२२क्ष् (४८)
एवमुक्ते ततः कन्या सोदतिष्ठत्प्रमद्वरा ।
रुरोस्तस्यायुषोऽर्धेन सुप्तेव वरवर्णिनी ॥ १-९-२२ (१०३२)
एतद्दृष्टं भविष्ये हि रुरोरुत्तमतेजसः ।
आयुषोऽतिप्रवृद्धस्य भार्यार्थेऽर्धमलुप्यत ॥ १-९-२३ (१०३३)
तत इष्टेऽहनि तयोः पितरौ चक्रतुर्मुदा ।
विवाहं तौ च रेमाते परस्परहितैषिणौ ॥ १-९-२४ (१०३४)
स लब्ध्वा दुर्लभां भार्यां पद्मकिञ्जल्कसुप्रभाम् ।
व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः ॥ १-९-२५ (१०३५)
स दृष्ट्वा जिह्मगान्सर्वांस्तीव्रकोपसमन्वितः ।
अभिहन्ति यथासत्त्वं गृह्य प्रहरणं सदा ॥ १-९-२६ (१०३६)
स कदाचिद्वनं विप्रो रुरुरभ्यागमन्महत् ।
शयानं तत्र चापश्यड्डुण्डुभं वयसान्वितम् ॥ १-९-२७ (१०३७)
तत उद्यम्य दम्डं स कालदण्डोपमं तदा ।
जिघांसुः कुपितो विप्रस्तमुवाचाथ डुण्डुभः ॥ १-९-२८ (१०३८)
नापराध्यामि ते किंचिदहमद्य तपोधन ।
संरम्भाच्च किमर्थं मामभिहंसि रुषान्वितः ॥ ॥ १-९-२९ (१०३९)

इति श्रीमन्महाभारते आदिपर्वाणि पौलोमपर्वणि नवमोऽध्यायः ॥ ९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-९-१३ गतायुषः आयुर्नास्ति पुनर्न भवतीत्यर्थः ॥
१-९-२३ भविष्ये जातके ॥
१-९-२५ जिह्मगानां सर्पाणां ॥
१-९-२७ डुण्डुभं जलसर्पं ॥
नवमोऽध्यायः ॥
९ ॥

आदिपर्व - अध्याय ०१०
॥ श्रीः ॥
१.१०. अध्यायः १०

Mahabharata - Adi Parva - Chapter Topics
रुरुडुण्डुभसंवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०-० (१०४०)
रुरुरुवाच। १-१०-०क्ष् (४९)
मम प्राणसमा भार्या दष्टासीद्भुजगेन ह ।
तत्र मे समयो घोर आत्मनोरग वै कृतः ॥ १-१०-१ (१०४१)
भुजंगं वै सदा हन्यां यं यं पश्येयमित्युत ।
ततोऽहं त्वां जिघांसामि जीवितेनाद्य मोक्ष्यसे ॥ १-१०-२ (१०४२)
डुण्डुभ उवाच। १-१०-३क्ष् (५०)
अन्ये ते भुजगा ब्रह्मन्ये दशन्तीह मानवान् ।
डुण्डुभानहिगन्धेन न त्वं हिंसितुमर्हसि ॥ १-१०-३ (१०४३)
एकानर्थान्पृथग्धर्मानेकदुःखान्पृथक्सुखान् ।
डुण्डुभान्धर्मविद्भूत्वा न त्वं हिंसितुमर्हसि ॥ १-१०-४ (१०४४)
सौतिरुवाच। १-१०-५क्ष् (५१)
इति श्रुत्वा वचस्तस्य डुण्डुभस्य रुरुस्तदा ।
नावधीद्भयसंविग्नमृषिं मत्त्वाऽथ डुण्डुभम् ॥ १-१०-५ (१०४५)
उवाच चैनं भगवान्रुरुः संशमयन्निव ।
केन त्वं भुजग ब्रूहि कोऽसीमां विक्रियां गतः ॥ १-१०-६ (१०४६)
डुण्डुभ उवाच। १-१०-७क्ष् (५२)
अहं पुरा रुरो नाम्ना ऋषिरासं सहस्रपात् ।
सोऽहं शापेन विप्रस्य भुजगत्वमुपागतः ॥ १-१०-७ (१०४७)
रुरुरुवाच। १-१०-८क्ष् (५३)
किमर्थं शप्तवान्क्रुद्धो द्विजस्त्वां भुजगोत्तम ।
कियन्तं चैव कालं ते वपुरेतद्भविष्यसि ॥ ॥ १-१०-८ (१०४८)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि दशमोऽध्यायः ॥ १० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१०-३ अहिगन्धेन सर्पसादृश्यमात्रेण ॥
१-१०-४ एकानर्थान् एकः समानः अनर्थः जनकर्तृकहिंसादिरूपो येषां तान् । पृथक् सर्पजात्युचितप्राणहरणादिविलक्षणो धर्मो लक्षणं येषां ते। एकं तुल्यं बिलेशयत्वादिरूपं दुःखं येषां तान्। पृथक् हविर्भागादिभ्यो भिन्नं भेकभक्षणादि सुखं येषां तान्। धर्मवित् कृतापराधस्यैव दण्डो नत्वन्यस्येति धर्मस्तज्ज्ञः ॥
दशमोऽध्यायः ॥
१० ॥

आदिपर्व - अध्याय ०११

॥ श्रीः ॥

१.११. अध्यायः ११

Mahabharata - Adi Parva - Chapter Topics

डुण्डुभचरितम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-११-० (१०४९)
डुण्डुभ उवाच। १-११-०क्ष् (५४)
सखा बभूव मे पूर्वं खगमो नाम वै द्विजः ।
भृशं संशितवाक्तात तपोबलसमन्वितः ॥ १-११-१ (१०५०)
स मया क्रीडता बाल्ये कृत्वा तार्णं भुजंगमम् ।
अग्निहोत्रे प्रसक्तस्तु भीषितः प्रमुमोह वै ॥ १-११-२ (१०५१)
लब्ध्वा स च पुनः संज्ञां मामुवाच तपोधनः ।
नर्दहन्निव कोपेन सत्यवाक्संशितव्रतः ॥ १-११-३ (१०५२)
यथावीर्यस्त्वया सर्पः कृतोऽयं मद्बिभीषया ।
तथावीर्यो भुजंगस्त्वं मम शापाद्भविष्यसि ॥ १-११-४ (१०५३)
तस्याहं तपसो वीर्यं जानन्नासं तपोधन ।
भृशमुद्विग्नहृदयस्तमवोचमहं तदा ॥ १-११-५ (१०५४)
प्रणतः संभ्रमाच्चैव प्राञ्जलिः पुरतः स्थितः ।
सखेति हसतेदं ते नर्मार्थं वै कृतं मया ॥ १-११-६ (१०५५)
क्षन्तुमर्हसि मे ब्रह्मञ्शापोऽयं विनिवर्त्यताम् ।
सोऽथ मामब्रवीद्दृष्ट्वा भृशमुद्विग्नचेतसम् ॥ १-११-७ (१०५६)
मुहुरुष्णं विनिःश्वस्य सुसंभ्रान्तस्तपोधनः ।
नानृतं वै मया प्रोक्तं भवितेदं कथंचन ॥ १-११-८ (१०५७)
यत्तु वक्ष्यामि ते वाक्यं शृणु तन्मे तपोधन ।
श्रुत्वा च हृदि ते वाक्यमिदमस्तु सदाऽनघ ॥ १-११-९ (१०५८)
उत्पत्स्यति रुरुर्नाम प्रमतेरात्मजः शुचिः ।
तं दृष्ट्वा शापमोक्षस्ते भविता नचिरादिव ।
गएवमुक्तस्तु तेनाहमुरगत्वमवाप्तवान् ॥' १-११-१० (१०५९)
स त्वं रुरुरिति ख्यातः प्रमतेरात्मजोऽपि च ।
स्वरूपं प्रतिपद्याहमद्य वक्ष्यामि ते हितम् ॥ १-११-११ (१०६०)
सौतिरुवाच। १-११-१२क्ष् (५५)
स डौण्डुभं परित्यज्य रूपं विप्रर्षभस्तदा ।
स्वरूपं भास्वरं भूयः प्रतिपेदे महायशाः ॥ १-११-१२ (१०६१)

इदं चोवाच वचनं रुरुमप्रतिमौजसम् ।
अहिंसा परमो धर्मः सर्वप्राणभृतां वर ॥ १-११-१३ (१०६२)
तस्मात्प्राणभृतः सर्वान्न हिंस्याद्ब्राह्मणः क्वचित् ।
ब्राह्मणः सौम्य एवेह भवतीति परा श्रुतिः ॥ १-११-१४ (१०६३)
वेदवेदाङ्गविन्नाम सर्वभूताभयप्रदः ।
अहिंसा सत्यवचनं क्षमा चेति विनिश्चितम् ॥ १-११-१५ (१०६४)
ब्राह्मणस्य परो धर्मो वेदानां धारणापि च ।
क्षत्रियस्य हि यो धर्मः स नेहेष्येत वै तव ॥ १-११-१६ (१०६५)
दण्डधारणमुग्रत्वं प्रजानां परिपालनम् ।
तदिदं क्षत्रियस्यासीत्कर्म वै शृणु मे रुरो ॥ १-११-१७ (१०६६)
जनमेजयस्य यज्ञेऽस्मिन्सर्पाणां हिंसनं पुरा ।
परित्राणं च भीतानां सर्पाणां ब्राह्मणादपि ॥ १-११-१८ (१०६७)
तपोवीर्यबलोपेताद्वेदवेदाङ्गपारगात् ।
आस्तीकादिद्वजमुख्याद्वै सर्पसत्रे द्विजोत्तम ॥ ॥ १-११-१९ (१०६८)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि एकादशोऽध्यायः ॥ ११ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-११-१ संशितवाक् तीक्ष्णवचनः ॥
१-११-२ तार्णं तृणमयम् ॥
१-११-१४ सौम्यः अतीक्ष्णस्वभावः ॥
१-११-१८ परित्राणं दृष्टमिति शेषः ॥
एकादशोऽध्यायः ॥
११ ॥

आदिपर्व - अध्याय ०१२
॥ श्रीः ॥
१.१२. अध्यायः १२

Mahabharata - Adi Parva - Chapter Topics
जनमेजयसर्पसत्रप्रस्तावः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२-० (१०६९)
रुरुरुवाच। १-१२-०क्ष् (५६)
कथं हिंसितवान्सर्पान्स राजा जनमेजयः ।

सर्पा वा हिंसितास्तत्र किमर्थं द्विजसत्तम ॥ १-१२-१ (१०७०)
किमर्थं मोक्षिताश्चैव पन्नगास्तेन धीमता ।
आस्तीकेन द्विजश्रेष्ठ श्रोतुमिच्छाम्यशेषतः ॥ १-१२-२ (१०७१)
ऋषिरुवाच। १-१२-३क्ष् (५७)
श्रोष्यसि त्वं रुरो सर्वमास्तीकचरितं महत् ।
ब्राह्मणानां कथयतां त्वरावान्गमने ह्यहम् ॥ १-१२-३ (१०७२)
सौतिरुवाच। १-१२-४क्ष् (५८)
ग्इत्युक्त्वान्तर्हिते योगात्तस्मिन्नृषिवरे प्रभौ ।
संभ्रमाविष्टहृदयो रुरुर्मेने तदद्भुतम् ॥' १-१२-४ (१०७३)
बलं परममास्थाय पर्यधावत्समन्ततः ।
तमृषिं नष्टमन्विच्छन्संश्रान्तो न्यपतद्भुवि ॥ १-१२-५ (१०७४)
स मोहं परमं गत्वा नष्टसंज्ञ इवाभवत् ।
तदृषेर्वचनं तथ्यं चिन्तयानः पुनःपुनः ॥ १-१२-६ (१०७५)
लब्धसंज्ञो रुरुश्चायात्तदाचख्यौ पितुस्तदा ।
ग्पित्रे तु सर्वमाख्याय डुण्डुभस्य वचोऽर्थवत् ॥ १-१२-७ (१०७६)
अपृच्छत्पितरं भूयः सोस्तीकस्य वचस्तदा ।
आख्यापयत्तदाऽऽख्यानं डुण्डुभेनाथ कीर्तितम् ॥ १-१२-८ (१०७७)
तत्कीर्त्यमानं भगवञ्श्रोतुमिच्छामि तत्त्वतः।'
पिता चास्य तदाख्यानं पृष्टः सर्वं न्यवेदयत् ॥ ॥ १-१२-९ (१०७८)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ समाप्तं पौलोमपर्व ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२-५ नष्टं अन्तर्हितं ॥
द्वादशोऽध्यायः ॥
१२ ॥

आदिपर्व - अध्याय ०१३
॥ श्रीः ॥
१.१३. अध्यायः १३

(अथास्तीकपर्व ॥ ५ ॥)
Mahabharata - Adi Parva - Chapter Topics
आस्तीकजरत्कार्वोराख्यानं ॥ १ ॥
जरत्कारोस्तत्पितॄणां च संवादः ॥ २ ॥

१-१३-० (१०७९)
शौनक उवाच। १-१३-०क्ष् (५९)
किमर्थं राजशार्दूलः स राजा जनमेजयः ।
सर्पसत्रेण सर्पाणां गतोऽन्तं तद्वदस्व मे ॥ १-१३-१ (१०८०)
निखिलेन यथातत्त्वं सौते सर्वमशेषतः ।
आस्तीकश्च द्विजश्रेष्ठः किमर्थं जपतां वरः ॥ १-१३-२ (१०८१)
मोक्षयामास भुजगान्प्रदीप्ताद्वसुरेतसः ।
कस्य पुत्रः स राजासीत्सर्पसत्रं य आहरत् ॥ १-१३-३ (१०८२)
स च द्विजातिप्रवरः कस्य पुत्रोऽभिधत्स्व मे। १-१३-४ (१०८३)
सौतिरुवाच ।
महदाख्यानमास्तीकं यथैतत्प्रोच्यते द्विज ॥ १-१३-४क्ष् (६०)
सर्वमेतदशेषेण शृणु मे वदतां वर। १-१३-५ (१०८४)
शौनक उवाच ।
श्रोतुमिच्छाम्यशेषेण कथामेतां मनोरमाम् ॥ १-१३-५क्ष् (६१)
आस्तीकस्य पुराणर्षेर्ब्राह्मणस्य यशस्विनः। १-१३-६ (१०८५)
सौतिरुवाच ।
इतिहासमिमं विप्राः पुराणं परिचक्षते ॥ १-१३-६क्ष् (६२)
कृष्णद्वैपायनप्रोक्तं नैमिषारण्यवासिषु ।
पूर्वं प्रचोदितः सूतः पिता मे लोमहर्षणः ॥ १-१३-७ (१०८६)
शिष्यो व्यासस्य मेधावी ब्राह्मणेष्विदमुक्तवान् ।
तस्मादहमुपश्रुत्य प्रवक्ष्यामि यथातथम् ॥ १-१३-८ (१०८७)
इदमास्तीकमाख्यानं तुभ्यं शौनक पृच्छते ।
कथयिष्याम्यशेषेण सर्वपापप्रणाशनम् ॥ १-१३-९ (१०८८)
आस्तीकस्य पिता ह्यासीत्प्रजापतिसमः प्रभुः ।
ब्रह्मचारी यताहारस्तपस्युग्रे रतः सदा ॥ १-१३-१० (१०८९)
जरत्कारुरिति ख्यात ऊर्ध्वरेता महातपाः ।
यायावराणां प्रवरो धर्मज्ञः संशितव्रतः ॥ १-१३-११ (१०९०)
स कदाचिन्महाभागस्तपोबलसमन्वितः ।
चचार पृथिवीं सर्वां यत्रसायंगृहो मुनिः ॥ १-१३-१२ (१०९१)
तीर्थेषु च समाप्लावं कुर्वन्नटति सर्वशः ।
चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः ॥ १-१३-१३ (१०९२)
वायुभक्षो निराहारः शुष्यन्ननिमिषो मुनिः ।
इतस्ततः परिचरन्दीप्तपावकसप्रभः ॥ १-१३-१४ (१०९३)
अटमानः कदाचित्स्वान्स ददर्श पितामहान् ।

लम्बमानान्महागर्ते पादैरूर्ध्वैरवाङ्मुखान् ॥ १-१३-१५ (१०९४)
तानब्रवीत्स दृष्ट्वैव जरत्कारुः पितामहान् ।
के भवन्तोऽवलम्बन्ते गर्ते ह्यस्मिन्नधोमुखाः ॥ १-१३-१६ (१०९५)
वीरणस्तम्भके लग्नाः सर्वतः परिभक्षिते ।
मूषकेन निगूढेन गर्तेऽस्मिन्नित्यवासिना ॥ १-१३-१७ (१०९६)
पितर ऊचुः। १-१३-१८क्ष् (६३)
यायावरा नाम वयमृषयः संशितव्रताः ।
संतानप्रक्षयाद्ब्रह्मन्नधो गच्छाम मेदिनीम् ॥ १-१३-१८ (१०९७)
अस्माकं संततिस्त्वेको जरत्कारुरिति स्मृतः ।
मन्दभाग्योऽल्पभाग्यानां तप एकं समास्थितः ॥ १-१३-१९ (१०९८)
न स पुत्राञ्जनयितुं दारान्मूढश्चिकीर्षति ।
तेन लम्बामहे गर्ते संतानस्य क्षयादिह ॥ १-१३-२० (१०९९)
अनाथास्तेन नाथेन यथा दुष्कृतिनस्तथा ।
ग्येषां तु संततिर्नास्ति मर्त्यलोके सुखावहा ॥ १-१३-२१ (११००)
न ते लभन्ते वसतिं स्वर्गे पुण्यकृतोऽपि हि।'
कस्त्वं बन्धुरिवास्माकमनुशोचसि सत्तम ॥ १-१३-२२ (११०१)
ज्ञातुमिच्छामहे ब्रह्मन्को भवानिह नः स्थितः ।
किमर्थं चैव नः शोच्याननुशोचसि सत्तम ॥ १-१३-२३ (११०२)
जरत्कारुरुवाच। १-१३-२४क्ष् (६४)
मम पूर्वे भवन्तो वै पितरः सपितामहाः ।
ब्रूत किं करवाण्यद्य जरत्कारुरहं स्वयम् ॥ १-१३-२४ (११०३)
पितर ऊचुः। १-१३-२५क्ष् (६५)
यतस्व यत्नवांस्तात संतानाय कुलस्य नः ।
आत्मनोऽर्थेऽस्मदर्थे च धर्म इत्येव वा विभो ॥ १-१३-२५ (११०४)
न हि धर्मफलैस्तात न तपोऽभिः सुसंचितैः ।
तां गतिं प्राप्नुवन्तीह पुत्रिणो यां व्रजन्ति वै ॥ १-१३-२६ (११०५)
तद्दारग्रहणे यत्नं संतत्यां च मनः कुरु ।
पुत्रकास्मन्नियोगात्त्वमेतन्नः परमं हितम् ॥ १-१३-२७ (११०६)
जरत्कारुरुवाच। १-१३-२८क्ष् (६६)
न दारान्वै करिष्येऽहं न धनं जीवितार्थतः ।
भवतां तु हितार्थाय करिष्ये दारसंग्रहम् ॥ १-१३-२८ (११०७)
समयेन च कर्ताऽहमनेन विधिपूर्वकम् ।
तथा यद्युपलप्स्यामि करिष्ये नान्यथा ह्यहम् ॥ १-१३-२९ (११०८)
सनाम्नी या भवित्री मे दित्सिता चैव बन्धुभिः ।
भैक्ष्यवत्तामहं कन्यामुपयंस्ये विधानतः ॥ १-१३-३० (११०९)
दरिद्राय हि मे भार्यां को दास्यति विशेषतः ।

प्रतिग्रहीष्ये भिक्षां तु यदि कश्चित्प्रदास्यति ॥ १-१३-३१ (१११०)
एवं दारक्रियाहेतोः प्रयतिष्ये पितामहाः ।
अनेन विधिना शश्वन्न करिष्येऽहमन्यथा ॥ १-१३-३२ (११११)
तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै ।
शाश्वतं स्थानमासाद्य मोदन्तां पितरो मम ॥ ॥ १-१३-३३ (१११२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१३-११ यायावराणां ग्रामैकरात्रवासिनां गृहस्थानां ॥
१-१३-१२ सायंकालस्तत्रैव गृहमस्येति यत्रसायंगृहः ॥
१-१३-३० उपयंस्येपरिणेष्ये ॥
३० ॥
त्रयोदशोऽध्यायः ॥
१३ ॥

आदिपर्व - अध्याय ०१४
॥ श्रीः ॥
१.१४. अध्यायः १४

Mahabharata - Adi Parva - Chapter Topics
वासुकिभगिन्या जरत्कारोर्विवाहः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४-० (१११३)
सौतिरुवाच। १-१४-०क्ष् (६७)
ततो निवेशाय तदा स विप्रः संशितव्रतः ।
महीं चचार दारार्थी न च दारानविन्दत ॥ १-१४-१ (१११४)
स कदाचिद्वनं गत्वा विप्रः पितृवचः स्मरन् ।
चुक्रोश कन्याभिक्षार्थी तिस्रो वाचः शनैरिव ॥ १-१४-२ (१११५)
तं वासुकिः प्रत्यगृह्णादुद्यम्य भगिनीं तदा ।
न स तां प्रतिजग्राह न सनाम्नीति चिन्तयन् ॥ १-१४-३ (१११६)
सनाम्नीं चोद्यतां भार्यां गृह्णीयामिति तस्य हि ।
मनो निविष्टमभवज्जरत्कारोर्महात्मनः ॥ १-१४-४ (१११७)
तमुवाच महाप्राज्ञो जरत्कारुर्महातपाः ।
किंनाम्नी भगिनीयं ते ब्रूहि सत्यं भुजंगम ॥ १-१४-५ (१११८)

वासुकिरुवाच। १-१४-६क्ष् (६८)
जरत्कारो जरत्कारुः स्वसेयमनुजा मम ।
प्रतिगृह्णीष्व भार्यार्थे मया दत्तां सुमध्यमाम् ।
त्वदर्थं रक्षिता पूर्वं प्रतीच्छेमां द्विजोत्तम ॥ १-१४-६ (१११९)
सौतिरुवाच। १-१४-७क्ष् (६९)
एवमुक्त्वा ततः प्रादाद्भार्यार्थे वरवर्णिनीम् ।
स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ॥ ॥ १-१४-७ (११२०)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४-१ निवेशाय दारसंग्रहाय ॥
चतुर्दशोऽध्यायः ॥
१४ ॥

आदिपर्व - अध्याय ०१५
॥ श्रीः ॥
१.१५. अध्यायः १५

Mahabharata - Adi Parva - Chapter Topics
आस्तीकोत्पत्तिः ॥ १ ॥
संक्षेपेण सर्पमोचनवृत्तान्तश्च ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५-० (११२१)
सौतिरुवाच। १-१५-०क्ष् (७०)
मात्रा हि भुजगाः शप्ताः पूर्वं ब्रह्मविदां वर ।
जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः ॥ १-१५-१ (११२२)
तस्य शापस्य शान्त्यर्थं प्रददौ पन्नगोत्तमः ।
स्वसारमृषये तस्मै सुव्रताय महात्मने ॥ १-१५-२ (११२३)
स च तां प्रतिजग्राह विधिदृष्टेन कर्मणा ।
आस्तीको नाम पुत्रश्च तस्यां जज्ञे महामनाः ॥ १-१५-३ (११२४)
तपस्वी च महात्मा च वेदवेदाङ्गपारगः ।
समः सर्वस्य लोकस्य पितृमातृभयापहः ॥ १-१५-४ (११२५)
अथ दीर्घस्य कालस्य पाण्डवेयो नराधिपः ।
आजहार महायज्ञं सर्पसत्रमिति श्रुतिः ॥ १-१५-५ (११२६)

तस्मिन्प्रवृत्ते सत्रे तु सर्पाणामन्तकाय वै ।
मोचयामास ताञ्शापादास्तीकः सुमहातपाः ॥ १-१५-६ (११२७)
भ्रातॄंश्च मातुलांश्चैव तथैवान्यान्स पन्नगान् ।
पितॄंश्च तारयामास संतत्या तपसा तथा ॥ १-१५-७ (११२८)
व्रतैश्च विविधैर्ब्रह्मन्स्वाध्यायैश्चानृणोऽभवत् ।
देवांश्च तर्पयामास यज्ञैर्विविधदक्षिणैः ॥ १-१५-८ (११२९)
ऋषींश्च ब्रह्मचर्येम सन्तत्या च पितामहान् ।
अपहृत्य गुरुं भारं पितॄणां संशितव्रतः ॥ १-१५-९ (११३०)
जरत्कारुर्गतः स्वर्गं सहितः स्वैः पितामहैः ।
आस्तीकं च सुतं प्राप्य धर्मं चानुत्तमं मुनिः ॥ १-१५-१० (११३१)
जरत्कारुः सुमहता कालेन स्वर्गमेयिवान् ।
एतदाख्यानमास्तीकं यथावत्कथितं मया ।
प्रब्रूहि भृगुशार्दूल किमन्यत्कथयामि ते ॥ ॥ १-१५-११ (११३२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥

आदिपर्व - अध्याय ०१६
॥ श्रीः ॥
१.१६. अध्यायः १६

Mahabharata - Adi Parva - Chapter Topics
आस्तीकाख्यानविस्तरः ॥ १ ॥
कद्रूविनतयोः कश्यपाद्वरलाभः ॥ २ ॥
कद्रवाः सर्पोत्पत्तिर्विनताया अरुणोत्पत्तिश्च ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६-० (११३३)
शौनक उवाच। १-१६-०क्ष् (७१)
सौते त्वं कथयस्वेमां विस्तरेण कथां पुनः ।
आस्तीकस्य कवेःसाधोः शुश्रूषा परमा हिनः ॥ १-१६-१ (११३४)
मधुरं कथ्यते सौम्य श्लक्ष्णाक्षरपदं त्वया ।
प्रीयामहे भृशं तात पितेवेदं प्रभाषसे ॥ १-१६-२ (११३५)
अस्मच्छुश्रूषणे नित्यं पिता हि निरतस्तव ।
आचष्टैतद्यथाऽऽख्यानं पिता तेत्वं तथा वद ॥ १-१६-३ (११३६)
सौतिरुवाच। १-१६-४क्ष् (७२)

आयुष्मन्निदमाख्यानमास्तीकं कथयामि ते ।
यथाश्रुतं कथयतः सकाशाद्वै पितुर्मया ॥ १-१६-४ (११३७)
पुरा देवयुगे ब्रह्मन्प्रजापतिसुते शुभे ।
आस्तां भगिन्यौ रूपेण समुपेतेऽद्भुतेऽनघ ॥ १-१६-५ (११३८)
ते भार्ये कश्यपस्यास्तां कद्रूश्च विनता च ह ।
प्रादात्ताभ्यां वरं प्रीतः प्रजापतिसमः पतिः ॥ १-१६-६ (११३९)
कश्यपो धर्मपत्नीभ्यां मुदा परमया युतः ।
वरातिसर्गं श्रुत्वैवं कश्यपादुत्तमं च ते ॥ १-१६-७ (११४०)
हर्षादप्रतिमां प्रीतिं प्रापतुः स्म वरस्त्रियौ ।
वव्रे कद्रूः सुतान्नागान्सहस्रं तुल्यवर्चसः ॥ १-१६-८ (११४१)
द्वौ पुत्रौ विनता वव्रे कद्रूपुत्राधिकौ बले ।
तेजसा वपुषा चैव विक्रमेणाधिकौ च तौ ॥ १-१६-९ (११४२)
तस्यै भर्ता वरं प्रादादीदृसौ ते भविष्यतः ।
एवमस्त्वित्ति तं चाह कश्यपं विनता तदा ॥ १-१६-१० (११४३)
यथावत्प्रार्थितं लब्ध्वा वरं तुष्टाभवत्तदा ।
कृतकृत्या तु विनता लब्ध्वा वीर्याधिकौ सुतौ ॥ १-१६-११ (११४४)
कद्रूश्च लब्ध्वा पुत्राणां सहस्रं तुल्यवर्चसाम् ।
धार्यौ प्रयत्नतो गर्भावित्युक्त्वा स महातपाः ॥ १-१६-१२ (११४५)
ते भार्ये वरसंतुष्टे कश्यपो वनमाविशत्। १-१६-१३ (११४६)
सौतुरिवाच ।
कालेन महता कद्रूरण्डानां दशतीर्दश ॥ १-१६-१३क्ष् (७३)
जनयामास विप्रेन्द्र द्वे चाण्डे विनता तदा ।
तयोरण्डानि निदधुः प्रहृष्टाः परिचारिकाः ॥ १-१६-१४ (११४७)
सोपस्वेदेषु भाण्डेषु पञ्चवर्षशतानि च ।
ततः पञ्चशते काले कद्रूपुत्रा विनिःसृताः ॥ १-१६-१५ (११४८)
अण्डाभ्यां विनतायास्तु मिथुनं न व्यदृश्यत ।
ततः पुत्रार्थिनी देवी व्रीडिता च तपस्विनी ॥ १-१६-१६ (११४९)
अण्डं बिभेद विनता तत्र पुत्रमपश्यत ।
पूर्वार्धकायसंपन्नमितरेणाप्रकाशता ॥ १-१६-१७ (११५०)
स पुत्रः क्रोधसंरब्धः शशापैनामिति श्रुतिः ।
योऽहमेवं कृतो मातस्त्वया लोभपरीतया ॥ १-१६-१८ (११५१)
शरीरेणासमग्रेण तस्माद्दासी भविष्यसि ।
पञ्च वर्षशतान्यस्या यया विस्पर्धसे सह ॥ १-१६-१९ (११५२)
एष च त्वां सुतो मातर्दासीत्वान्मोचयिष्यति ।
यद्येनमपि मातस्त्वं मामिवाण्डविभेदनात् ॥ १-१६-२० (११५३)
न करिष्यस्यनङ्गं वा व्यङ्गं वापि तपस्विनम् ।

प्रतिपालयितव्यस्ते जन्मकालोऽस्य धीरया ॥ १-१६-२१ (११५४)
विशिष्टं बलमीप्सन्त्या पञ्चवर्षशतात्परः ।
एवं शप्त्वा ततः पुत्रो विनतामन्तरिक्षगः ॥ १-१६-२२ (११५५)
अरुणोऽदृश्यत ब्रह्मन्प्रभातसमये तदा ।
ऽउद्यन्नथ सहस्रांशुर्दृष्ट्वा तमरुणं प्रभुः ॥ १-१६-२३ (११५६)
स्वतेजसा प्रज्वलन्तमात्मनः समतेजसम् ।
सारथ्ये कल्पयामास प्रीयमाणस्तमोनुदः ॥ १-१६-२४ (११५७)
सोऽपि तं रथमारुह्य भानोरमिततेजसः ।
सर्वलोकप्रदीपस्य ह्यमरोऽप्यरुणोऽभवत् ॥' १-१६-२५ (११५८)
गरुडोऽपि यथाकालं जज्ञे पन्नगभोजनः ।
स जातमात्रो विनतां परित्यज्य खमाविशत् ॥ १-१६-२६ (११५९)
आदास्यन्नात्मनो भोज्यमन्नं विहितमस्य यत् ।
विधात्रा भृगुशार्दूल क्षुधितः पतगेश्वरः ॥ ॥ १-१६-२७ (११६०)

इति श्रीमन्महाभारते आदिपर्वाणि आस्तीकपर्वणि षोडशोऽध्यायः ॥ १६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६-१५ सोपस्वेदेषु ऊष्मवत्सु ॥
षोडशोऽध्यायः ॥
१६ ॥

आदिपर्व - अध्याय ०१७
॥ श्रीः ॥
१.१७. अध्यायः १७

Mahabharata - Adi Parva - Chapter Topics
अमृतमथनविषये भगवदाज्ञया देवानां विचारः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७-० (११६१)
सौतिरुवाच। १-१७-०क्ष् (७४)
एतस्मिन्नेव काले तु भगिन्यौ ते तपोधन ।
अपश्यतां समायान्तमुच्चैः श्रवसमन्तिकात् ॥ १-१७-१ (११६२)
यं तु देवगणाः सर्वे हृष्टरूपमपूजयन् ।
मथ्यमानेऽमृते जातमश्वरत्नमनुत्तमम् ॥ १-१७-२ (११६३)
अमोघबलमश्वानामुत्तमं जविनां वरम् ।

श्रीमन्तमजरं दिव्यं सर्वलक्षणपूजितम् ॥१-१७-३ (११६४)
शौनक उवाच।१-१७-४क्ष् (७५)
कथं तदमृतं देवैर्मथितं क्व च शंस मे ।
ग्कारणं चात्र मथने संजातममृतात्परम् ॥'
यत्र जज्ञे महावीर्यः सोऽश्वराजो महाद्युतिः ॥ १-१७-४ (११६५)
सौतिरुवाच।१-१७-५क्ष् (७६)
ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमम् ।
आक्षिपन्तं प्रभां भानोः स्वशृङ्गैः काञ्चनोज्ज्वलैः ॥१-१७-५ (११६६)
कनकाभरणं चित्रं देवगन्धर्वसेवितम् ।
अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः ॥१-१७-६ (११६७)
व्यालैरावारितं घोरैर्दिव्यौषधिविदीपितम् ।
नाकमावृत्य तिष्ठन्तमुच्छ्रयेण महागिरिम् ॥१-१७-७ (११६८)
अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितम् ।
नानापतगसङ्घैश्च नादितं सुमनोहरैः ॥१-१७-८ (११६९)
तस्य शृङ्गमुपारुह्य बहुरत्नाचितं शुभम् ।
अनन्तकल्पमद्वन्द्वं सुराः सर्वे महौजसः ॥१-१७-९ (११७०)
ते मन्त्रयितुमारब्धास्तत्रासीना दिवौकसः ।
अमृताय समागम्य तपोनियमसंयुताः ॥१-१७-१० (११७१)
तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत् ।
चिन्तयत्सु सुरेष्वेवं मन्त्रयत्सु च सर्वशः ॥१-१७-११ (११७२)
देवैरसुरसङ्घैश्च मथ्यतां कलशोदधिः ।
भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ ॥१-१७-१२ (११७३)
सर्वौषधीः समावाप्य सर्वरत्नानि चैव ह ।
मन्थध्वयुदधिं देवा वेत्स्यध्वममृतं ततः ॥ ॥१-१७-१३ (११७४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि सप्तदशोऽध्यायः ॥१७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७-९ अनन्तकल्पं अनन्तो विष्णुराकाशो वात तत ईषन्न्यूनम् ॥
१-१७-१३ वेत्स्यध्वं लप्स्यध्वम् ॥
सप्तदशोऽध्यायः ॥
१७ ॥

आदिपर्व - अध्याय ०१८
॥ श्रीः ॥
१.१८. अध्यायः १८

Mahabharata - Adi Parva - Chapter Topics

मोहितैर्दैत्यैर्मोहिन्या अमृतकलशदानम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८-० (११७५)
सौतिरुवाच। १-१८-०क्ष् (७७)
ततोऽभ्रशिखराकारैर्गिरिशृङ्गैरलंकृतम् ।
मन्दरं पर्वतवरं लताजालसमाकुलम् ॥१-१८-१ (११७६)
नानाविहंगसंघुष्टं नानादंष्ट्रिसमाकुलम् ।
किंनरैरप्सरोभिश्च देवैरपि च सेवितम् ॥१-१८-२ (११७७)
एकादश सहस्राणि योजनानां समुच्छ्रितम् ।
अधोभूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितम् ॥१-१८-३ (११७८)
तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा ।
विष्णुमासीनमभ्येत्य ब्रह्माणं चेदमब्रुवन् ॥१-१८-४ (११७९)
भवन्तावत्र कुरुतां बुद्धिं नैःश्रेयसीं पराम् ।
मन्दरोद्धरणे यत्नः क्रियतां च हिताय नः ॥१-१८-५ (११८०)
सौतिरुवाच। १-१८-६क्ष् (७८)
तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव ।
अचोदयदमेयात्मा फणीन्द्रं पद्मलोचनः ॥१-१८-६ (११८१)
ततोऽनन्तः समुत्थाय ब्रह्मणा परिचोदितः ।
नारायणेन चाप्युक्तस्तस्मिन्कर्मणि वीर्यवान् ॥१-१८-७ (११८२)
अथ पर्वतराजानं तमनन्तो महाबलः ।
उज्जहार बलाद्ब्रह्मन्सवनं सवनौकसम् ॥१-१८-८ (११८३)
ततस्तेन सुराः सार्धं समुद्रमुपतस्थिरे ।
तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलम् ॥१-१८-९ (११८४)
अपांपतिरथोवाच ममाप्यंशो भवेत्ततः ।
सोढाऽस्मि विपुलं मर्दं मन्दरभ्रमणादिति ॥१-१८-१० (११८५)
ऊचुश्च कूर्मराजानमकूपारे सुरासुराः ।
अधिष्ठानं गिरेरस्य भवान्भवितुमर्हति ॥१-१८-११ (११८६)
कूर्मेण तु तथेत्युक्त्वा पृष्ठमस्य समर्पितम् ।
तं शैलं तस्य पृष्ठस्थं वज्रेणेन्द्रोऽभ्यपीडयत् ॥१-१८-१२ (११८७)
मन्थानं मन्दरं कृत्वा तथा योक्त्रं च वासुकिम् ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भसाम् ।
अमृतार्थे पुरा ब्रह्मस्तथैवासुरदानवाः ॥ १-१८-१३ (११८८)
एकमन्तमुपाश्लिष्टा नागराज्ञो महासुराः ॥ १-१८-१४ (११८९)

विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः ।
अनन्तो भगवान्देवो यतो नारायणः स्थितः ॥ १-१८-१५ (११९०)
ग्वासुकेरग्रमाश्लिष्टा नागराज्ञो महासुराः।'
शिर उत्क्षिप्य नागस्य पुनः पुनरवाक्षिपन् ॥ १-१८-१६ (११९१)
वासुकेरथ नागस्य सहसा क्षिप्यतोऽसुरैः ।
सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात् ॥ १-१८-१७ (११९२)
ग्वासुकेर्मथ्यमानस्य निःसृतेन विषेण च ।
अभवन्मिश्रितं तोयं तदा भार्गवनन्दन ॥ १-१८-१८ (११९३)
मथनान्मन्दरेणाथ देवदानवबाहुभिः ।
विषं तीक्ष्णं समुद्भूतं हालाहलमिति श्रुतम् ॥ १-१८-१९ (११९४)
देवाश्च दानवाश्चैव दग्धाश्चैव विषेण ह ।
अपाक्रामंस्ततो भीता विषादमगमंस्तदा ॥ १-१८-२० (११९५)
ब्रह्माणमब्रुवन्देवाः समेत्य मुनिपुंगवैः ।
मथ्यमानेऽमृते जातं विषं कालानलप्रभम् ॥ १-१८-२१ (११९६)
तेनैव तापिता लोकास्तस्य प्रतिकुरुष्वह ।
एवमुक्तस्तदा ब्रह्मा दध्यौ लोकेश्वरं हरम् ॥ १-१८-२२ (११९७)
त्र्यक्षं त्रिशूलिनं रुद्रं देवदेवमुमापतिम् ।
तदाऽथ चिन्तितो देवस्तज्ज्ञात्वा द्रुतमाययौ ॥ १-१८-२३ (११९८)
तस्याथ देवस्तत्सर्वमाचचक्षे प्रजापतिः ।
तच्छ्रुत्वा दवेदेवेशो लोकस्यास्य हितेप्सया ॥ १-१८-२४ (११९९)
अपिबत्तद्विषं रुद्रः कालानलसमप्रभम् ।
कण्ठे स्थापितवान्देवो लोकानां हितकाम्यया ॥ १-१८-२५ (१२००)
यस्मात्तु नीलता कण्ठे नीलकण्ठस्ततः स्मृतः ।
पीतमात्रे विषे तत्र रुद्रेणामिततेजसा ॥ १-१८-२६ (१२०१)
देवाः प्रीताः पुनर्जग्मुश्चक्रुर्वै कर्म तत्तथा ।
मथ्यमानेऽमृतस्यार्थे भूयो वै देवदानवैः ॥ १-१८-२७ (१२०२)
वासुकेरथ नागस्य सहसा क्षिप्यतोऽसुरैः ।
सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात् ॥' १-१८-२८ (१२०३)
ते धूमसङ्घाः संभूता मेघसङ्घाः सविद्युतः ।
अभ्यवर्षन्सुरगणाञ्श्रमसंतापकर्शितान् ॥ १-१८-२९ (१२०४)
तस्माच्च गिरिकूटाग्रात्प्रच्युताः पुष्पवृष्टयः ।
सुरासुरगणान्सर्वान्समन्तात्समवाकिरन् ॥ १-१८-३० (१२०५)
बभूवात्र महान्नादो महामेघरवोपमः ।
उदधेर्मथ्यमानस्य मन्दरेण सुरासुरैः ॥ १-१८-३१ (१२०६)
तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा ।
विलयं समुपाजग्मुः शतशो लवणाम्भसि ॥ १-१८-३२ (१२०७)

वारुणानि च भूतानि विविधानि महीधरः ।
पातालतलवासीनि विलयं समुपानयत् ॥ १-१८-३३ (१२०८)
तस्मिंश्च भ्राम्यमाणेऽद्रौ संघृष्यन्तः परस्परम् ।
न्यपतन्पतगोपेताः पर्वताग्रान्महाद्रुमाः ॥ १-१८-३४ (१२०९)
तेषां संघर्षजश्चाग्निरर्चिर्भिः प्रज्वलन्मुहुः ।
विद्युद्भिरिव नीलाभ्रमावृणोन्मन्दरं गिरिम् ॥ १-१८-३५ (१२१०)
ददाह कुञ्जरांस्तत्र सिंहांश्चैव विनिर्गतान् ।
विगतासूनि सर्वाणि सत्त्वानि विविधानि च ॥ १-१८-३६ (१२११)
तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः ।
वारिणा मेघजेनेन्द्रः शमयामास सर्वशः ॥ १-१८-३७ (१२१२)
ततो नानाविधास्तत्र सुस्रुवुः सागराम्भसि ।
महाद्रुमाणां निर्यासा बहवश्चौषधीरसाः ॥ १-१८-३८ (१२१३)
तेषाममृतवीर्याणां रसानां पयसैव च ।
अमरत्वं सुरा जग्मुः काञ्चनस्य च निःस्रवात् ॥ १-१८-३९ (१२१४)
ततस्तस्य समुद्रस्य तञ्जातमुदकं पयः ।
रसोत्तमैर्विमिश्रं च ततः क्षीरादभूद्घृतम् ॥ १-१८-४० (१२१५)
ततो ब्रह्माणमासीनं देवा वरदमब्रुवन् ।
श्रान्ताः स्म सुभृशं ब्रह्मन्नोद्भवत्यमृतं च तत् ॥ १-१८-४१ (१२१६)
ऋते नारायणं देवं सर्वेऽन्ये देवदानवाः ।
चिरारब्धमिदं चापि सागरस्यापि मन्थनम् ॥ १-१८-४२ (१२१७)
ग्ग्लानिरस्मान्समाविष्टा न चात्रामृतमत्थितम्। १-१८-४३ (१२१८)
सौतिरुवाच ।
देवानां वचनं श्रुत्वा ब्रह्मा लोकपितामहः'॥ १-१८-४३क्ष् (७९)
ततो नारायणं देवं वचनं चेदमब्रवीत् ।
विधत्स्वैषां बलं विष्णो भवानत्र परायणम् ॥ १-१८-४४ (१२१९)
विष्णुरुवाच। १-१८-४५क्ष् (८०)
बलं ददामि सर्वेषां कर्मैतद्ये समास्थिताः ।
क्षोभ्यतां कलशः सर्वैर्मन्दरः परिवर्त्यताम् ॥ १-१८-४५ (१२२०)
सौतिरुवाच। १-१८-४६क्ष् (८१)
नारायणवचः श्रुत्वा बलिनस्ते महोदधेः ।
तत्पयः सहिता भूयश्चक्रिरे भृशमाकुलम् ॥ १-१८-४६ (१२२१)
ग्तत्र पूर्वं विषं जातं तद्ब्रह्मवचनाच्छिवः ।
प्राग्रसल्लोकरक्षार्थं ततो ज्येष्ठा समुत्थिता ।
कृष्णरूपधरा देवी सर्वाभरणभूषिता ॥' १-१८-४७ (१२२२)
ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् ।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ १-१८-४८ (१२२३)

श्रीरनन्तरमुत्पन्ना घृतात्पाण्डुरवासिनी ।
सुरा देवी समुत्पन्ना तुरगः पाण्डुरस्तथा ॥ १-१८-४९ (१२२४)
कौस्तुभस्तु मणिर्दिव्य उत्पन्नो घृतसंभवः ।
मरीचिविकचः श्रीमान्नारायणउरोगतः ॥ १-१८-५० (१२२५)
श्रीः सुरा चैव सोमश्च तुरगश्च मनोजवः ।
ग्पारिजातश्च तत्रैव सुरभिश्च महामुने ।
जज्ञाते तौ तदा ब्रह्मन्सर्वकामफलप्रदौ ॥ १-१८-५१ (१२२६)
ततो जज्ञे महाकायश्चतुर्दन्तो महागजः ।
कपिला कामवृक्षश्च कौस्तुभश्चाप्सरोगणः।'
यतो देवास्ततो जग्मुरादित्यपथमाश्रिताः ॥ १-१८-५२ (१२२७)
धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत ।
श्वेतं कमण्डलुं बिभ्रदमृतं यत्र तिष्ठति ॥ १-१८-५३ (१२२८)
एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः ।
अमृतार्थे महान्नादो ममेदमिति जल्पताम् ॥ १-१८-५४ (१२२९)
ततो नारायणो मायां मोहिनीं समुपाश्रितः ।
स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः ॥ १-१८-५५ (१२३०)
ततस्तदमृतं तस्यै ददुस्ते मूढचेतसः ।
स्त्रियै दानवदैतेयाः सर्वे तद्गतमानसाः ॥ १-१८-५६ (१२३१)
ग्सा तु नारायणी माया धारयन्ती कमण्डलुम् ।
आस्यमानेषु दैत्येषु पङ्क्त्या च प्रति दानवैः ॥ १-१८-५७ (१२३२)
देवानपाययद्देवी न दैत्यांस्ते च चुक्रुशुः ॥ ॥ १-१८-५८ (१२३३)

इति श्रीमन्महाबारते आदिपर्वणि आस्तीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१८-११ अकूपारे समुद्रसमीपे । अधिष्ठानं आधारः ॥
१-१८-१२ तु तथेत्युक्ते पृष्ठे त्वस्य समर्पितः । सशैलस्तस्य चाग्रं वै वज्रेणेन्द्रोऽभ्यपीडयत्। इति पाठान्तरं ॥
१-१८-१३ योक्त्रं मन्थनरज्जुम् ॥
१-१८-१४ एकमन्तं एकं प्रदेशं मुखभागम् ॥
१-१८-३३ वारुणानि वरुणलोकस्थानि आप्यांशप्रधानशरीराणि ॥
१-१८-४० लवणाम्भसि कुतो दुग्धमित्यत आह । तत इति। ततः तेषां निःस्रवं प्राप्य। समुद्रस्य तत्क्षारं उदकं पयः क्षीरं जातम् ॥
१-१८-५० मरीचिविकचः रश्मिभिरुज्ज्वलः । नारायणउरोगत इत्यसन्धिरार्षः ॥
१-१८-५५ अभिसंश्रितः संमुखः स्थितः मोहनार्थमिति शेषः ॥

अष्टादशोऽध्यायः ॥
१८ ॥

आदिपर्व - अध्याय ०१९
॥ श्रीः ॥
१.१९. अध्यायः १९

Mahabharata - Adi Parva - Chapter Topics
देवानाममृतपानं ॥ १ ॥
देवरूपेणामृतं पिबतो राहोः शिरश्छेदनं ॥ २ ॥
देवदैत्ययोर्युद्धं । तत्र दैत्यपराजयः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९-० (१२३४)
सौतिरुवाच। १-१९-०क्ष् (८२)
अथावरणमुख्यानि नानाप्रहरणानि च ।
प्रगृह्याभ्यद्रवन्देवान्सहिता दैत्यदानवाः ॥ १-१९-१ (१२३५)
ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् ।
जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः ॥ १-१९-२ (१२३६)
ततो देवगणाः सर्वे पपुस्तदमृतं तदा ।
विष्णोः सकाशात्संप्राप्य संभ्रमे तुमुले सति ॥ १-१९-३ (१२३७)
ग्पाययत्यमृतं देवान्हरौ बाहुबलान्नरः ।
निरोधयति चापेन दूरीकृत्य धनुर्धरान् ।
ये येऽमृतं पिबन्ति स्म ते ते युद्ध्यन्ति दानवैः;'॥ १-१९-४ (१२३८)
ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितम् ।
राहुर्विबुधरूपेण दानवः प्रापिबत्तदा ॥ १-१९-५ (१२३९)
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा ।
आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया ॥ १-१९-६ (१२४०)
ततो भगवता तस्य शिरश्छिन्नमलंकृतम् ।
चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥ १-१९-७ (१२४१)
तच्छैलशृङ्गप्रङ्गिमं दानवस्य शिरो महत् ।
ग्चक्रेणोत्कृत्तमपतच्चालयद्वसुधातलम् ॥' १-१९-८ (१२४२)
चक्रच्छिन्नं खमुत्पत्य ननादातिभयंकरम् ।
तत्कबन्धं पपातास्य विस्फुरद्धरणीतले ॥ १-१९-९ (१२४३)
ग्त्रयोदश सहस्राणि चतुरश्रं समन्ततः ।
सपर्वतवनद्वीपां दैत्यस्याकम्पयन्महीम् ॥ १-१९-१० (१२४४)

ततो वैरविनिर्बन्धः कृतो राहुमुखेन वै ।
शाश्वतश्चन्द्रसूर्याभ्यां ग्रसत्यद्यापि चैव तौ ॥ १-१९-११ (१२४५)
विहाय भगवांश्चापि स्त्रीरूपमतुलं हरिः ।
नानाप्रहरणैर्भीमैर्दानवान्तमकम्पयत् ॥ १-१९-१२ (१२४६)
ततः प्रवृत्तः संग्रामः समीपे लवणाम्भसः ।
सुराणामसुराणां च सर्वघोरतरो महान् ॥ १-१९-१३ (१२४७)
प्रासाश्च विपुलास्तीक्ष्णा न्यपतन्त सहस्रशः ।
तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ १-१९-१४ (१२४८)
ततोऽसुराश्चक्रभिन्ना वमन्तो रुधिरं बहु ।
असिशक्तिगदारुग्णा निपेतुर्धरणीतले ॥ १-१९-१५ (१२४९)
छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः ।
तप्तकाञ्चनमालीनि निपेतुरनिशं तदा ॥ १-१९-१६ (१२५०)
रुधिरेणानुलिप्ताङ्गा निहताश्च महासुराः ।
अद्रीणामिव कूटानि धातुरक्तानि शेरते ॥ १-१९-१७ (१२५१)
आहाकारः समभवत्तत्र तत्र सहस्रशः ।
अन्योन्यंछिन्दतां शस्त्रैरादित्ये लोहितायति ॥ १-१९-१८ (१२५२)
परिघैरायसैस्तीक्ष्णैः सन्निकर्षे च मुष्टिभिः ।
निघ्नतां समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ १-१९-१९ (१२५३)
छिन्धिभिन्धि प्रधाव त्वं पातयाभिसरेति च ।
व्यश्रूयन्त महाघोराः शब्दास्तत्र समन्ततः ॥ १-१९-२० (१२५४)
एवं सुतुमुले युद्धे वर्तमाने महाभये ।
नरनारायणौ देवौ समाजग्मतुराहवम् ॥ १-१९-२१ (१२५५)
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
चिन्तयामास तच्चक्रं विष्णुर्दानवसूदनम् ॥ १-१९-२२ (१२५६)
ततोऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रममित्रतापनम् ।
विभावसोस्तुल्यमकुण्ठमण्डलं
सुदर्शनं संयति भीमदर्शनम् ॥ १-१९-२३ (१२५७)
तदागतं ज्वलितहुताशनप्रभं
भयंकरं करिकरबाहुरच्युतः ।
मुमोच वै प्रबलवदुग्रवेगवा-
न्महाप्रभं परनगरावदारणम् ॥ १-१९-२४ (१२५८)
तदन्तकज्वलनसमानवर्चसं
पुनःपुनर्न्यपतत वेगवत्तदा ।
विदारयद्दितिदनुजान्सहस्रशः
करेरितं पुरुषवरेण संयुगे ॥ १-१९-२५ (१२५९)

दहत्क्वचिज्ज्वलन इवावलेलिह-
त्प्रसह्य तानसुरगणान्न्यकृन्तत ।
प्रवेरितं वियति मुहुः क्षितौ तथा
पपौ रणे रुधिरमथो पिशाचवत् ॥ १-१९-२६ (१२६०)
तथाऽसुरा गिरिभिरदीनचेतसो
मुहुर्मुहुः सुरगणमार्दयंस्तदा ।
महाबला विगलितमेघवर्चसः
सहस्रशो गगनमभिप्रपद्यह ॥ १-१९-२७ (१२६१)
अथाम्बराद्भयजननाः प्रपेदिरे
सपादपा बहुविधमेघरूपिणः ।
महाद्रयः परिगलिताग्रसानवः
परस्परं द्रुतमभिहत्य सस्वनाः ॥ १-१९-२८ (१२६२)
ततो मही प्रविचलिता सकानना
महाद्रिपाताभिहता समन्ततः ।
परस्परं भृशमभिगर्जतां मुहू
रणाजिरे भृशमभिसंप्रवर्तिते ॥ १-१९-२९ (१२६३)
नरस्ततो वरकनकाग्रभूषणै-
र्महेषुभिर्गगनपथं समावृणोत् ।
विदारयन्गिरिशिखराणि पत्रिभि-
र्महाभयेऽसुरगणविग्रहे तदा ॥ १-१९-३० (१२६४)
ततो महीं लवणजलं च सागरं
महासुराः प्रविविशुरर्दिताः सुरैः ।
वियद्गतं ज्वलितहुताशनप्रभं
सुदर्शनं परिकुपितं निशाम्य ते ॥ १-१९-३१ (१२६५)
ततः सुरैर्विजयमवाप्य मन्दरः
स्वमेव देशं गमितः सुपूजितः ।
विनाद्य खं दिवमपि चैव सर्वश-
स्ततो गताः सलिलधरा यथागतम् ॥ १-१९-३२ (१२६६)
ततोऽमृतं सुनिहितमेव चक्रिरे
सुराः पुरां मुदमभिगम्य पुष्कलाम् ।
ददो च तं निधिममृतस्य रक्षितुं
किरीटिने बलभिदथामरैः सह ॥ ॥ १-१९-३३ (१२६७)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि एकोनविंशोऽध्यायः ॥१९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१९-१ आवरणमुख्यानि कवचाग्र्याणि ॥
१-१९-३ संभ्रमे उभयेषाममृतादरे सति ।सङ्ग्रामे इति पाठान्तरं ॥
१-१९-२६ प्रवेरितं प्रेरितं ॥
१-१९-२७ विगलितमेघाः रिक्तमेघाः ॥
१-१९-३२ सलिलधराः अमृतभृतो देवाः ॥
१-१९-३३ किरीटिने नराय ॥
एकोनविंशोऽध्यायः ॥
१९ ॥

आदिपर्व - अध्याय ०२०
॥ श्रीः ॥
१.२०. अध्यायः २०

Mahabharata - Adi Parva - Chapter Topics
कद्रूविनतयोः पणबन्धः ॥ १ ॥
सर्पाणां कद्रूशापः ॥ २ ॥
ब्रह्मणा कश्यपाय विषहरविद्यादानं ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०-० (१२६८)
सौतिरुवाच। १-२०-०क्ष् (८३)
एतत्ते कथितं सर्वममृतं मथितं यथा ।
यत्र सोऽश्वः समुत्पन्नः श्रीमानतुलविक्रमः ॥ १-२०-१ (१२६९)
तं निशाम्य तदा कद्रूर्विनतामिदमब्रवीत् ।
उच्चैःश्रवा हि किंवर्णो भद्रे प्रब्रूहि मा चिरम् ॥ १-२०-२ (१२७०)
विनतोवाच। १-२०-३क्ष् (८४)
श्वेत एवाश्वराजोऽयं किं वा त्वं मन्यसे शुभे ।
ब्रूहि वर्णं त्वमप्यस्य ततोऽत्र विपणावहे ॥ १-२०-३ (१२७१)
कद्रूरुवाच। १-२०-४क्ष् (८५)
कृष्णवालमहं मन्ये हयमेनं शुचिस्मिते ।
एहि सार्धं मया दीव्य दासीभावाय भामिनि ॥ १-२०-४ (१२७२)
सौतिरुवाच। १-२०-५क्ष् (८६)
एवं ते समयं कृत्वा दासीभावाय वै मिथः ।
जग्मतुः स्वगृहानेव श्वो द्रक्ष्याव इति स्म ह ॥ १-२०-५ (१२७३)
ततः पुत्रसहस्रं तु कद्रूर्जिह्मं चिकीर्षती ।
आज्ञापयामास तदा वाला भूत्वाऽञ्जनप्रभाः ॥ १-२०-६ (१२७४)

आविशध्वं हयं क्षिप्रं दासी न स्यामहं यथा ।
नावपद्यन्त ये वाक्यं ताञ्शशाप भुजंगमान् ॥ १-२०-७ (१२७५)
सर्पसत्रे वर्तमाने पावको वः प्रधक्ष्यति ।
जनमेजयस्य राजर्षेः पाण्डवेयस्य धीमतः ॥ १-२०-८ (१२७६)
शापमेनं तु शुश्राव स्वयमेव पितामहः ।
अतिक्रूरं समुत्सृष्टं कद्रुवा दैवादतीव हि ॥ १-२०-९ (१२७७)
सार्धं देवगणैः सर्वैर्वाचं तामन्वमोदत ।
बहुत्वं प्रेक्ष्य सर्पाणां प्रजानां हितकाम्यया ॥ १-२०-१० (१२७८)
तिग्मवीर्यविषा ह्येते दन्दशूका महाबलाः ।
तेषां तीक्ष्णविषत्वाद्धि प्रजानां च हिताय च ॥ १-२०-११ (१२७९)
युक्तं मात्रा कृतं तेषां परपीडोपसर्पिणाम् ।
अन्येषामपि सत्त्वानां नित्यं दोषपरास्तु ये ॥ १-२०-१२ (१२८०)
तेषां प्राणान्तिको दण्डो दैवेन विनिपात्यते ।
एवं संभाष्य देवस्तु पूज्य कद्रूं च तां तदा ॥ १-२०-१३ (१२८१)
आहूय कश्यपं देव इदं वचनमब्रवीत् ।
यदेते दन्दशूकाश्च सर्पा जातास्त्वयानघ ॥ १-२०-१४ (१२८२)
विषोल्बणा महाभोगा मात्रा शप्ताः परंतप ।
तत्र मन्युस्त्वया तात न कर्तव्यः कथंचन ॥ १-२०-१५ (१२८३)
दृष्टं पुरातनं ह्येतद्यज्ञे सर्पविनाशनम् ।
इत्युक्त्वा सृष्टिकृद्देवस्तं प्रसाद्य प्रजापतिम् ।
प्रादाद्विषहरीं विद्यां कश्यपाय महात्मने ॥ १-२०-१६ (१२८४)
गएवं शप्तेषु नागेषु कद्रुवातु द्विजसत्तम ।
अद्विग्नः शापतस्तस्याः कद्रूं कर्कोटकोऽब्रवीत् ॥ १-२०-१७ (१२८५)
मातरं परमप्रीतस्तथा भुजगसत्तमः ।
आविश्य वाजिनं मुख्यं बालो भूत्वाञ्जनप्रभः ॥ १-२०-१८ (१२८६)
दर्शयिष्यामि तत्राहमात्मानं काममाश्वस ।
एवमस्त्विति सा पुत्रं प्रत्युवाच यशस्विनी'॥ ॥ १-२०-१९ (१२८७)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि विंशोऽध्यायः ॥ २० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२०-३ विपणावहे पणं कुर्वहे ॥
१-२०-६ जिह्मं कौटिल्यं । वालाः लोमानि ॥
१-२०-७ नावपद्यन्त नानुमोदितवन्तः ॥
विंशोऽध्यायः ॥
२० ॥

आदिपर्व - अध्याय ०२१
॥ श्रीः ॥
१.२१. अध्यायः २१

Mahabharata - Adi Parva - Chapter Topics
उच्चैःश्रवसो दर्शार्थं कद्रूविनतयोर्गमनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१-० (१२८८)
सौतिरुवाच। १-२१-०क्ष् (८७)
ततो रजन्यां व्युष्टायां प्रभातेऽभ्युदिते रवौ ।
कद्रूश्च विनता चैव भगिन्यौ ते तपोधन ॥ १-२१-१ (१२८९)
अमर्षिते सुसंरब्धे दास्ये कृतपणे तदा ।
ग्स्मगरस्य परं पारं वेलावनविभूषितम्।'
जग्मतुस्तुरगं द्रष्टुमुच्चैःश्रवसमन्तिकात् ॥ १-२१-२ (१२९०)
ददृशातेऽथ ते तत्र समुद्रं निधिमम्भसाम् ।
महान्तमुदकागाधं क्षोभ्यमाणं महास्वनम् ॥ १-२१-३ (१२९१)
तिमिंगिलझषाकीर्णं मकरैरावृतं तथा ।
सत्वैश्च बहुसाहस्रैर्नानारूपैः समावृतम् ॥ १-२१-४ (१२९२)
भीषणैर्विकृतैरन्यैर्घोरैर्जलचरैस्तथा ।
उग्रैर्नित्यमनाधृष्यं कूर्मग्राहसमाकुलम् ॥ १-२१-५ (१२९३)
आकरं सर्वरत्नानामालयं वरुणस्य च ।
नागानामालयं रम्यमुत्तमं सरितां पतिम् ॥ १-२१-६ (१२९४)
पातालज्वलनावासमसुराणां च बान्धवम् ।
भयंकरं च सत्त्वानां पयसां निधिमर्णवम् ॥ १-२१-७ (१२९५)
शुभं दिव्यममर्त्यानाममृतस्याकरं परम् ।
अप्रमेयमचिन्त्यं च सुपुण्यजलमद्भुतम् ॥ १-२१-८ (१२९६)
घोरं जलचरारावरौद्रं भैरवनिःस्वनम् ।
गम्भीरावर्तकलिलं सर्वभूतभयंकरम् ॥ १-२१-९ (१२९७)
वेलादोलानिलचलं क्षोभोद्वेगसमुच्छ्रितम् ।
वीचीहस्तैः प्रचलितैर्नृत्यन्तमिव सर्वतः ॥ १-२१-१० (१२९८)
चन्द्रवृद्धिक्षयवशादुद्वृत्तोर्मिसमाकुलम् ।
पाञ्चजन्यस्य जननं रत्नाकरमनुत्तमम् ॥ १-२१-११ (१२९९)
गां विन्दता भगवता गोविन्देनामितौजसा ।
वराहरूपिणा चान्तर्विक्षोभितजलाविलम् ॥ १-२१-१२ (१३००)

ब्रह्मर्षिणा व्रतवता वर्षाणां शतमत्रिणा ।
अनासादितगाधं च पातालतलमव्ययम् ॥ १-२१-१३ (१३०१)
अध्यात्मयोगनिद्रां च पद्मनाभस्य सेवतः ।
युगादिकालशयनं विष्णोरमिततेजसः ॥ १-२१-१४ (१३०२)
वज्रपातनसंत्रस्तमैनाकस्याभयप्रदम् ।
डिम्बाहवार्दितानां च असुराणां परायणम् ॥ १-२१-१५ (१३०३)
बडवामुखदीप्ताग्नेस्तोयहव्यप्रदं शिवम् ।
अगाधपारं विस्तीर्णमप्रमेयं सरित्पतिम् ॥ १-२१-१६ (१३०४)
महानदीभिर्बह्वीभिः स्पर्धयेव सहस्रशः ।
अभिसार्यमाणमनिशं ददृशाते महार्णवम् ।
आपूर्यमाणमत्यर्थं नृत्यमानमिवोर्मिभिः ॥ १-२१-१७ (१३०५)
गम्भीरं तिमिमकरोग्रसंकुलं तं
गर्जन्तं जलचररावरौद्रनादैः ।
विस्तीर्णं ददृशतुरम्बरप्रकाशं
तेऽगाधं निधिमुरुमम्भसामनन्तम् ॥ ॥ १-२१-१८ (१३०६)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि एकविंशतितमोऽध्यायः
॥ २१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२१-३ क्षोभ्यमाणं मकरादिभिः ॥
१-२१-७ पातालज्वलनो बडवाग्निः ॥
१-२१-१२ गां पृथ्वीं विन्दता लम्बमानेन ॥
१-२१-१५ डिम्बो भयवतामाक्रन्दस्तद्वति आहवे ॥
१-२१-१८ ते कद्रूविनते ॥
एकविंशतितमोऽध्यायः ॥
२१ ॥

आदिपर्व - अध्याय ०२२
॥ श्रीः ॥
१.२२. अध्यायः २२

Mahabharata - Adi Parva - Chapter Topics

सर्पैर्मातृवचनादुच्चैःश्रवःपुच्छवेष्टनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२-० (१३०७)
सौतिरुवाच। १-२२-०क्ष् (८८)
नागाश्च संविदं कृत्वा कर्तव्यमिति तद्वचः ।
निःस्नेहा वै दहेन्माता असंप्राप्तमनोरथा ॥ १-२२-१ (१३०८)
प्रसन्ना मोक्षयेदस्मांस्तस्माच्छापाच्च भामिनी ।
कृष्णं पुच्छं करिष्यामस्तुरगस्य न संशयः ॥ १-२२-२ (१३०९)
ग्इति निश्चित्य ते तस्य कृष्णा वाला इव स्थिताः।'
एतस्मिन्नन्तरे ते तु सपत्न्यौ पणिते तदा ॥ १-२२-३ (१३१०)
ततस्ते पणितं कृत्वा भगिन्यौ द्विजसत्तम ।
जग्मतुः परया प्रीत्या परं पारं महोदधेः ॥ १-२२-४ (१३११)
कद्रूश्च विनता चैव दाक्षायण्यौ विहायसा ।
आलोकयन्त्यावक्षोभ्यं समुद्रं निधिमम्भसाम् ॥ १-२२-५ (१३१२)
वायुनाऽतीव सहसा क्षोभ्यमाणं महास्वनम् ।
तिमिंगिलसमाकीर्णं मकरैरावृतं तथा ॥ १-२२-६ (१३१३)
संयुतं बहुसाहस्रैः सत्वैर्नानाविधैरपि ।
घोरर्घोरमनाधृष्यं गम्भीरमतिभैरवम् ॥ १-२२-७ (१३१४)
आकरं सर्वरत्नानामालयं वरुणस्य च ।
नागानामालयं चापि सुरम्यं सरितां पतिम् ॥ १-२२-८ (१३१५)
पातालज्वलनावासमसुराणां तथालयम् ।
भयंकराणां सत्त्वानां पयसो निधिमव्ययम् ॥ १-२२-९ (१३१६)
शुभ्रं दिव्यममर्त्यानाममृतस्याकरं परम् ।
अप्रमेयमचिन्त्यं च सुपुम्यजलसंमितम् ॥ १-२२-१० (१३१७)
महानदीभिर्बह्वीभिस्तत्र तत्र सहस्रशः ।
आपूर्यमाणमत्यर्थं नृत्यन्तमिव चोर्मिभिः ॥ १-२२-११ (१३१८)
इत्येवं तरलतरोर्मिसंकुलं ते
गम्भीरं विकसितमम्बरप्रकाशम् ।
पातालज्वलनशिखाविदीपिताङ्गं
गर्जन्तं द्रुतमभिजग्मतुस्ततस्ते ॥ ॥ १-२२-१२ (१३१९)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२२-१ संविदं मिथ आलोचनम् ॥
१-२२-३ पणिते पणं कृत वत्यौ ॥
३ ॥
द्वाविंशोऽध्यायः ॥

आदिपर्व - अध्याय ०२३
॥ श्रीः ॥
१.२३. अध्यायः २३

Mahabharata - Adi Parva - Chapter Topics
गरुडोत्पत्तिः ॥ १ ॥
देवकृतस्तुत्या गरुडकृतं स्वतेजस्संहरणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३-० (१३२०)
सौतिरुवाच। १-२३-०क्ष् (८९)
तं समुद्रमतिक्रम्य कद्रूर्विनतया सह ।
न्यपतत्तुरगाभ्याशे न चिरादिव शीघ्रगा ॥ १-२३-१ (१३२१)
ततस्ते तं हयश्रेष्ठं ददृशाते महाजवम् ।
शशाङ्ककिरणप्रख्यं कालवालमुभे तदा ॥ १-२३-२ (१३२२)
निशाम्य च बहून्वालान्कृष्णान्पुच्छसमाश्रितान् ।
विषण्णरूपां विनतां कद्रूर्दास्ये न्ययोजयत् ॥ १-२३-३ (१३२३)
ततः सा विनता तस्मिन्पणितेन पराजिता ।
अभवद्दुःखसंतप्ता दासीभावं समास्थिता ॥ १-२३-४ (१३२४)
एतस्मिन्नन्तरे चापि गरुडः काल आगते ।
विना मात्रा महातेजा विदार्याण्डमजायत ॥ १-२३-५ (१३२५)
महासत्त्वबलोपेतः सर्वा विद्योतयन्दिशः ।
कामरूपः कामगमः कामवीर्यो विहंगमः ॥ १-२३-६ (१३२६)
अग्निराशिरिवोद्भासन्समिद्धोऽतिभयंकरः ।
विद्युद्विस्पष्टपिङ्गाक्षो युगान्ताग्निसमप्रभः ॥ १-२३-७ (१३२७)
प्रवृद्धः सहसा पक्षी महाकायो नभोगतः ।
घोरो घोरस्वनो रौद्रो वह्निरौर्व इवापरः ॥ १-२३-८ (१३२८)
तं दृष्ट्वा शरणं जग्मुर्देवाः सर्वे विभावसुम् ।
प्रमिपत्याब्रुवंश्चैनमासीनं विश्वरूपिणम् ॥ १-२३-९ (१३२९)
अग्ने मा त्वं प्रवर्धिष्ठाः कच्चिन्नो न दिधक्षसि ।
असौ हि राशिः सुमहान्समिद्धस्तव सर्पति ॥ १-२३-१० (१३३०)
अग्निरुवाच। १-२३-११क्ष् (९०)
नैतदेवं यथा यूयं मन्यध्वमसुरार्दनाः ।
गरुडो बलवानेष मम तुल्यश्च तेजसा ॥ १-२३-११ (१३३१)

जातः परमतेजस्वी विनतानन्दवर्धनः ।
तेजोराशिमिमं दृष्ट्वा युष्मान्मोहः समाविशत् ॥ १-२३-१२ (१३३२)
नागक्षयकरश्चै काश्यपेयो महाबलः ।
देवानां च हिते युक्तस्त्वहितो दैत्यरक्षसाम् ॥ १-२३-१३ (१३३३)
न भीः कार्या कथं चात्र पश्यध्वं सहिता मया। १-२३-१४ (१३३४)
सौतिरुवाच ।
एवमुक्तास्तदा गत्वा गरुडं वाग्भिरस्तुवन् ॥ १-२३-१४क्ष् (९१)
ते दूरादभ्युपेत्यैनं देवाः सर्षिगणास्तदा। १-२३-१५ (१३३५)
देवा ऊचुः ।
त्वमृषिस्त्वं महाभागस्त्वं देवः पतगेश्वरः ॥ १-२३-१५क्ष् (९२)
त्वं प्रभुस्तपनः सूर्यः परमेष्ठी प्रजापतिः ।
त्वमिन्द्रस्त्वं हयमुखस्त्वं शर्वस्त्वं जगत्पतिः ॥ १-२३-१६ (१३३६)
त्वं मुखं पद्मजो विप्रस्त्वमग्निः पवनस्तथा ।
त्वं हि धाता विधाता च त्वं विष्णुः सुरसत्तमः ॥ १-२३-१७ (१३३७)
त्वं महानभिभूः शश्वदमृतं त्वं महद्यशः ।
त्वं प्रभास्त्वमभिप्रेतं त्वं नस्त्राणमनुत्तमम् ॥ १-२३-१८ (१३३८)
ग्त्वं गतिः सततं त्वत्तः कथं नः प्राप्नुयाद्भयम्।'
बलोर्मिमान्साधुरदीनसत्त्वः
समृद्धिमान्दुर्विषहस्त्वमेव ।
त्वत्तः सृतं सर्वमहीनकीर्ते
ह्यनागतं चोपगतं च सर्वम् ॥ १-२३-१९ (१३३९)
त्वमुत्तमः सर्वमिदं चराचरं
गभस्तिभिर्भानुरिवावभाससे ।
समाक्षिपन्भानुमतः प्रभां मुहु-
स्त्वमन्तकः सर्वमिदं ध्रुवाध्रुवम् ॥ १-२३-२० (१३४०)
दिवाकरः परिकुपितो यथा दहे-
त्प्रजास्तथा दहसि हुताशनप्रभ ।
भयंकरः प्रलय इवाग्निरुत्थितो
विनाशयन्युगपरिवर्तनान्तकृत् ॥ १-२३-२१ (१३४१)
खगेश्वरं शरणमुपागता वयं
महौजसं ज्वलनसमानवर्चसम् ।
तडित्प्रभं वितिमिरमभ्रगोचरं
महाबलं गरुडमुपेत्य खेचरम् ॥ १-२३-२२ (१३४२)
परावरं वरदमजय्यविक्रमं
तवौजस सर्वमिदं प्रतापितम् ।
जगत्प्रभो तप्तसुवर्णवर्चसा

त्वं पाहि सर्वांश्च सुरान्महात्मनः ॥ १-२३-२३ (१३४३)
भयान्विता नभसि विमानगामिनो
विमानिता विपथगतिं प्रयान्ति ते ।
ऋषेः सुतस्त्वमसि दयावतः प्रभो
महात्मनः खगवर कश्यपस्य ह ॥ १-२३-२४ (१३४४)
स मा क्रुधः कुरु जगतो दयां परां
त्वमीश्वरः प्रशममुपैहि पाहि नः ।
महाशनिस्फुरितसमस्वनेन ते
दिशोऽम्बरं त्रिदिवमियं च मेदिनी ॥ १-२३-२५ (१३४५)
चलन्ति नः खग हृदयानि चानिशं
निगृह्यतां वपुरिदमग्निसन्निभम् ।
तव द्युतिं कुपितकृतान्तसन्निभां
निशाम्य नश्चलति मनोऽव्यवस्थितम् ।
प्रसीद नः पतगते प्रयाचतां
शिवश्च नो भव भगवन्सुखावहः ॥ १-२३-२६ (१३४६)
सौतिरुवाच। १-२३-२७x (९३)
एवं स्तुतः सुपर्णस्तु देवैः सर्षिगणैस्तदा ।
तेजसः प्रतिसंहारमात्मनः स चकार ह ॥ ॥ १-२३-२७ (१३४७)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२३-२ शशाङ्ककिरणवत्प्रख्या दीप्तिर्यस्य तं तादृशमपि
कालवालं कृष्णकेशम् ॥
१-२३-८ और्वो वडवाग्निः ॥
१-२३-९ विभावसुं अग्निम् ॥
१-२३-१० अग्ने मात्वमिति देवानां भ्रमवर्णनं अग्निगरुडयोरति
सादृश्यकथनार्थम् ॥
१-२३-२५ चलन्तीत्युत्तरादपकृष्यते ॥
१-२३-२६ निगृत्यतां संक्षिप्यताम् ॥
त्रयोविंशोऽध्यायः ॥
२३ ॥

आदिपर्व - अध्याय ०२४
॥ श्रीः ॥
१.२४. अध्यायः २४

Mahabharata - Adi Parva - Chapter Topics
राहुणा कृतोपद्रवस्य सूर्यस्य क्रोधः ॥ १ ॥
ब्रह्माज्ञयाऽरुणस्य सूर्यसारथ्यकरणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४-० (१३४८)
सौतिरुवाच। १-२४-०क्ष् (९४)
स श्रुत्वाऽथात्मनो देहं सुपर्णः प्रेक्ष्य च स्वयम् ।
शरीरप्रतिसंहारमात्मनः संप्रचक्रमे ॥ १-२४-१ (१३४९)
सुपर्ण उवाच। १-२४-२क्ष् (९५)
न मे सर्वाणि भूतानि विभियुर्देहदर्शनात् ।
भीमरूपात्समुद्विग्नास्तस्मात्तेजस्तु संहरे ॥ १-२४-२ (१३५०)
सौतिरुवाच। १-२४-३क्ष् (९६)
ततः कामगमः पक्षी कामवीर्यो विहंगमः ।
अरुणं चात्मनः पृष्ठमारोप्य स पितुर्गृहात् ॥ १-२४-३ (१३५१)
मातुरन्तिकमागच्छत्परं तीरं महोदधेः ।
तत्रारुणश्च निक्षिप्तो पुरोदेशे महाद्युतेः ॥ १-२४-४ (१३५२)
सूर्यस्तेजोभिरत्युग्रैर्लोकान्दग्धुमना यदा। १-२४-५ (१३५३)
रुरुरुवाच ।
किमर्थं भगवान्सूर्यो लोकान्दग्धुमनास्तदा ॥ १-२४-५क्ष् (९७)
किमस्तापहृतं देवैर्येनमं मन्युराविशत्। १-२४-६ (१३५४)
प्रमतिरुवाच ।
चन्द्रार्काभ्यां यदा राहुराख्यातो ह्यमृतं पिबन् ॥ १-२४-६क्ष् (९८)
वैरानुबन्धं कृतवांश्चन्द्रादित्यौ तदाऽनघ ।
बाध्यमानं ग्रहेणाथ ह्यादित्यं मन्युराविशत् ॥ १-२४-७ (१३५५)
सुरार्थाय समुत्पन्नो रोषो राहोस्तु मां प्रति ।
बह्वनर्थकरं पापमेकोऽहं समवाप्नुयाम् ॥ १-२४-८ (१३५६)
सहाय एव कार्येषु न च कृच्छ्रेषु दृश्यते ।
पश्यन्ति ग्रस्यमानं मां सहन्ते वै दिवौकसः ॥ १-२४-९ (१३५७)
तस्माल्लोकविनाशार्थं ह्यवतिष्ठे न संशयः ।
एवं कृतमतिः सूर्यो ह्यस्तमभ्यगमद्गिरिम् ॥ १-२४-१० (१३५८)
तस्माल्लोकविनाशाय संतापयत भास्करः ।
ततो देवानुपागम्य प्रोचुरेवं महर्षयः ॥ १-२४-११ (१३५९)
आद्यार्धरात्रसमये सर्वलोकभयावहः ।
उत्पत्स्यते महान्दाहस्त्रैलोक्यस्य विनाशनः ॥ १-२४-१२ (१३६०)

ततो देवाः सर्षिगणा उपगम्य पितामहम् ।
अब्रुवन्किमिवेहाद्य महद्दाहकृतं भयम् ॥ १-२४-१३ (१३६१)
न तावद्दृश्यते सूर्यः क्षयोऽयं प्रतिभाति च ।
उदिते भगवन्भानौ कथनेतद्भविष्यति ॥ १-२४-१४ (१३६२)
पितामह उवाच। १-२४-१५क्ष् (९९)
एष लोकविनाशाय रविरुद्यन्तुमुद्यतः ।
दृश्यन्नेव हि लोकान्स भस्मराशीकरिष्यति ॥ १-२४-१५ (१३६३)
तस्य प्रतिविधानं च विहितं पूर्वमेव हि ।
कश्यपस्य सुतो धीमानरुणेत्यभिविश्रुतः ॥ १-२४-१६ (१३६४)
महाकायो महातेजाः स स्थास्यति पुरो रवेः ।
करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति ॥ १-२४-१७ (१३६५)
लोकानां स्वस्ति चैवं स्यादृषीणां च दिवौकसाम्। १-२४-१८ (१३६६)
प्रमतिरुवाच ।
ततः पितामहाज्ञातः सर्वं चक्रे तदाऽरुणः ॥ १-२४-१८क्ष् (१००)
उदितश्चैव सविता ह्यरुणेन समावृतः ।
एतत्ते सर्वमाख्यातं यत्सूर्यं मन्युराविशत् ॥ १-२४-१९ (१३६७)
अरुणश्च यथैवास्य सारथ्यमकरोत्प्रभुः ।
भूय एवापरं प्रश्नं शृणु पूर्वमुदाहृतम् ॥ ॥ १-२४-२० (१३६८)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२४-२ समुद्विग्नाः समुद्विग्नानि ॥
१-२४-७ चन्द्रादित्यौ प्रतीति शेषः ॥
१-२४-१२ किमुत सूर्ये उदिते इति शेः ॥
चतुर्विंशोऽध्यायः ॥
२४ ॥

आदिपर्व - अध्याय ०२५
॥ श्रीः ॥
१.२५. अध्यायः २५

Mahabharata - Adi Parva - Chapter Topics

विनतया कद्रूवहनं गरुडेन सर्पवहनं च ॥ १ ॥
सूर्यातपतप्तस्वपुत्ररक्षार्थं कद्रूकृत इन्द्रस्तवः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५-० (१३६९)
सौतिरुवाच। १-२५-०क्ष् (१०१)
ततः कामगमः पक्षी महावीर्यो महाबलः ।
मातुरन्तिकमागच्छत्परं पारं महोदधेः ॥ १-२५-१ (१३७०)
यत्र सा विनता तस्मिन्पणितेन पराजिता ।
अतीव दुःखसंतप्ता दासीभावमुपागता ॥ १-२५-२ (१३७१)
ततः कदाचिद्विनतां प्रणतां पुत्रसन्निधौ ।
काले चाहूय वचनं कद्रूरिदमभाषत ॥ १-२५-३ (१३७२)
नागानामालयं भद्रे सुरम्यं चारुदर्शनम् ।
समुद्रकुक्षावेकान्ते तत्र मां विनते नय ॥ १-२५-४ (१३७३)
सौतिरुवाच। १-२५-५क्ष् (१०२)
ततः सुपर्णमाता तामवहत्सर्पमातरम् ।
पन्नगान्गारुडश्चापि मातुर्वचनचोदितः ॥ १-२५-५ (१३७४)
स सूर्यमभितो याति वैनतेयो विहंगमः ।
सूर्यरश्मिप्रतप्ताश्च मूर्च्छिताः पन्नगाऽभवन् ॥ १-२५-६ (१३७५)
तदवस्थान्सुतान्दृष्ट्वा कद्रूः शक्रमथास्तुवत् ।
नमस्ते सर्वदेवेश नमस्ते बलसूदन ॥ १-२५-७ (१३७६)
नमुचिघ्न नमस्तेऽस्तु सहस्राक्ष शचीपते ।
सर्पाणां सूर्यतप्तानां वारिणा त्वं प्लवो भव ॥ १-२५-८ (१३७७)
त्वमेव परमं त्राणमस्माकममरोत्तम ।
ईशो असि पवः स्रष्टुं त्वमनल्पं पुरंदर ॥ १-२५-९ (१३७८)
त्वमेव मेघस्त्वं वायुस्त्वमग्निर्विद्युतोऽम्बरे ।
त्वमभ्रगणविक्षेप्ता त्वामेवाहुर्महाघनम् ॥ १-२५-१० (१३७९)
त्वं वज्रमतुलं घोरं घोषवांस्त्वं बलाहकः ।
स्रष्टा त्वमेव लोकानां संहर्ता चापराजितः ॥ १-२५-११ (१३८०)
त्वं ज्योतिः सर्वभूतानां त्वमादित्यो विभावसुः ।
त्वं महद्भूतमाश्चर्यं त्वं राजा त्वं सुरोत्तमः ॥ १-२५-१२ (१३८१)
त्वं विष्णुस्त्वं सहस्राक्षस्त्वं देवस्त्वं परायणम् ।
त्वं सर्वममृतं देव त्वं सोमः परमार्चितः ॥ १-२५-१३ (१३८२)
त्वं मुहूर्तस्तिथिस्त्वं च त्वं लवस्त्वं पुनः क्षणः ।
शुक्लस्त्वं बहुलस्त्वं च कला काष्ठा त्रुटिस्तथा ।
संवत्सरर्तवो मासा रजन्यश्च दिनानि च ॥ १-२५-१४ (१३८३)
त्वमुत्तमा सगिरिवना वसुंधरा
सभास्करं वितिमिरमम्बरं तथा ।
मदोदधिः सतिमितिमिङ्गिलस्तथा

महोर्मिमान्बहुमकरो झषाकुलः ॥ १-२५-१५ (१३८४)
महायशास्त्वमिति सदाऽभिपूज्यसे
मनीषिभिर्मुदितमना महर्षिभिः ।
अभिष्टुतः पिबसि च सोममध्वरे
वषट्कृतान्यपि च हवींषि भूतये ॥ १-२५-१६ (१३८५)
त्वं विप्रैः सततमिहेज्यसे फलार्थं
वेदाङ्गेष्वतुलबलौघ गीयसे च ।
त्वद्धेतोर्यजनपरायणा द्विजेन्द्रा
वेदाङ्गान्यभिगमयन्ति सर्वयत्नैः ॥ ॥ १-२५-१७ (१३८६)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२५-६ अभितः संमुखम् ॥
१-२५-१४ बहुलः कृष्णपक्षः ॥
पञ्चविंशोऽध्यायः ॥
२५ ॥

आदिपर्व - अध्याय ०२६
॥ श्रीः ॥
१.२६. अध्यायः २६

Mahabharata - Adi Parva - Chapter Topics
स्तुत्या तुष्टेन इन्द्रेण कृतं जलवर्षणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२६-० (१३८७)
सौतिरुवाच। १-२६-०क्ष् (१०३)
एवं स्तुतस्तदा कद्रवा भगवान्हरिवाहनः ।
नीलजीमूतसंघातैः सर्वमम्बरमावृणोत् ॥ १-२६-१ (१३८८)
मेघानाज्ञापयामास वर्षध्वममृतं शुभम् ।
ते मेघा मुमुचुस्तोयं प्रभूतं विद्युदुज्ज्वलाः ॥ १-२६-२ (१३८९)
परस्परमिवात्यर्थं गर्जन्तः सततं दिवि ।
संवर्तितमिवाकाशं जलदैः सुमहाद्भुतैः ॥ १-२६-३ (१३९०)
सृजद्भिरतुलं तोयमजस्रं सुमहारवैः ।
संप्रनृत्तमिवाकाशं धारोर्मिभिरनेकशः ॥ १-२६-४ (१३९१)

मेघस्तनितनिर्घोषैर्विद्युत्पवनकम्पितैः ।
तैर्मेघैः सततासारं वर्षद्भिरनिशं तदा ॥ १-२६-५ (१३९२)
नष्टचन्द्रार्ककिरणमम्बरं समपद्यत ।
नागानामुत्तमो हर्षस्तथा वर्षति वासवे ॥ १-२६-६ (१३९३)
आपूर्यत मही चापि सलिलेन समन्ततः ।
रसातलमनुप्राप्तं शीतलं विमलं जलम्। १-२६-७ (१३९४)
तदा भूरभवच्छन्ना जलोर्मिभिरनेकशः ।
रामणीयकमागच्छन्मात्रा सह भुजंगमाः ॥ ॥ १-२६-८ (१३९५)

इति श्रीमन्महाभारते आदिपर्वणि पौलोमपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२६-३ संवर्तः कल्पान्तः संजातोस्मिन्निति संवर्तितम् ॥
१-२६-८ रामणीयकं रमणकसंज्ञं द्वीपम् ॥
षड्विंशोऽध्यायः ॥
२६ ॥

आदिपर्व - अध्याय ०२७
॥ श्रीः ॥
१.२७. अध्यायः २७

Mahabharata - Adi Parva - Chapter Topics
गरुडस्य विनतां प्रति दास्यकारणप्रश्नः ॥ १ ॥
सर्पैः दास्यमोचनोपायकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२७-० (१३९६)
सौतिरुवाच। १-२७-०क्ष् (१०४)
संप्रहृष्टास्ततो नागा जलधाराप्लुतास्तदा ।
सुपर्णेनोह्यमानास्ते जग्मुस्तं द्वीपमाशु वै ॥ १-२७-१ (१३९७)
तं द्वीपं मकरावासं विहितं विश्वकर्मणा ।
तत्र ते लवणं घोरं ददृशुः पूर्वमागताः ॥ १-२७-२ (१३९८)
सुपर्णसहिताः सर्पाः काननं च मनोरमम् ।
सागराम्बुपरिक्षिप्तं पक्षिसङ्घनिजादितम् ॥ १-२७-३ (१३९९)
विचित्रफलपुष्पाभिर्वनराजिभिरावृतम् ।
भवनैरावृतं रम्यैस्तथा पद्माकरैरपि ॥ १-२७-४ (१४००)

प्रसन्नसलिलैश्चापि ह्रदैर्दिव्यैर्विभूषितम् ।
दिव्यगन्धवहैः पुण्यैर्मारुतैरुपवीजितम् ॥ १-२७-५ (१४०१)
उत्पतद्भिरिवाकाशं वृक्षैर्मलयजैरपि ।
शोभितं पुष्पवर्षाणि मुञ्चद्भिर्मारुतोद्धतैः ॥ १-२७-६ (१४०२)
वायुविक्षिप्तकुसुमैस्तथाऽन्यैरपि पादपैः ।
किरद्भिरिव तत्रस्थान्नागान्पुष्पाम्बुवृष्टिभिः ॥ १-२७-७ (१४०३)
मनःसंहर्षजं दिव्यं गन्धर्वाप्सरसां प्रियम् ।
मत्तभ्रमरसंघुष्टं मनोज्ञाकृतिदर्शनम् ॥ १-२७-८ (१४०४)
रमणीयं शिवं पुण्यं सर्वैर्जनमनोहरैः ।
नानापक्षिरुतं रम्यं कद्रूपुत्रप्रहर्षणम् ॥ १-२७-९ (१४०५)
तत्ते वनं समासाद्य विजह्रुः पन्नगास्तदा ।
अब्रुवंश्च महावीर्यं सुपर्णं पतगेश्वरम् ॥ १-२७-१० (१४०६)
वहास्मानपरं द्वीपं सुरम्यं विमलोदकम् ।
त्वं हि देशान्बहून्रम्यान्व्रजन्पश्यसि खेचर ॥ १-२७-११ (१४०७)
सौतिरुवाच। १-२७-१२क्ष् (१०५)
स विचिन्त्याब्रवीत्पक्षी मातरं विनतो तदा ।
किं कारणं मया मातः कर्तव्यं सर्पभाषितम् ॥ १-२७-१२ (१४०८)
विनतोवाच। १-२७-१३क्ष् (१०६)
दासीभूतास्मि दुर्योगात्सपत्न्याः पतगोत्तम ।
पणं वितथमास्थाय सर्पैरुपधिना कृतम् ॥ १-२७-१३ (१४०९)
सौतिरुवाच। १-२७-१४क्ष् (१०७)
तस्मिंस्तु कथिते मात्रा कारणे गगनेतरः ।
उवाच वचनं सर्पांस्तेन दुःखेन दुःखितः ॥ १-२७-१४ (१४१०)
किमाहृत्य विदित्वा वा किं वा कृत्वेह पौरुषम् ।
दास्याद्वो विप्रमुच्येयं तथ्यं वदत लेलिहाः ॥ १-२७-१५ (१४११)
सौतिरुवाच। १-२७-१६क्ष् (१०८)
श्रुत्वा समब्रुवन्सर्पा आहरामृतमोजसा ।
ततो दास्याद्विप्रमोक्षो भविता तव खेचर ॥ ॥ १-२७-१६ (१४१२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२७-२ लवणं लवणासुरं पूर्वं ददृशुः ॥
१-२७-८ मनःसंहर्षजं मनसः संहर्षाय जातम् ॥
१-२७-१५ लेलिहाः भोसर्पाः ॥
सप्तविंशोऽध्यायः ॥

आदिपर्व - अध्याय ०२८
॥ श्रीः ॥
१.२८. अध्यायः २८

Mahabharata - Adi Parva - Chapter Topics
अमृताहरणार्थं गच्छतो गरुडस्य भक्ष्ययाचनम् ॥ १ ॥
ब्राह्मणवर्जं समुद्रकुक्षिस्थनिषादभक्षणे विनताया अनुज्ञा ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२८-० (१४१३)
सौतिरुवाच। १-२८-०क्ष् (१०९)
इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्तुं भक्ष्यमिच्छामि वेदितुम् ॥ १-२८-१ (१४१४)
विनतोवाच। १-२८-२क्ष् (११०)
समुद्रकुक्षावेकान्ते निषादालयमुत्तमम् ।
‘भवनानि निषादानां तत्र सन्ति द्विजोत्तम ॥ १-२८-२ (१४१५)
पापिनां नष्टलोकानां निर्घृणानां दुरात्मनाम्’।
निषादानां सहस्राणि तान्भुक्त्वाऽमृतमानय ॥ १-२८-३ (१४१६)
न च ते ब्राह्मणं हन्तुं कार्या बुद्धिः कथंचन ।
अवध्यः सर्वभूतानां ब्राह्मणो ह्यनलोपमः ॥ १-२८-४ (१४१७)
अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः ।
गुरुर्हि सर्वभूतानां ब्राह्मणः परिकीर्तितः ॥ १-२८-५ (१४१८)
एवमादिस्वरूपैस्तु सतां वै ब्राह्मणो मतः ।
स ते तात न हन्तव्यः संक्रुद्धेनापि सर्वथा ॥ १-२८-६ (१४१९)
ब्राह्मणानामभिद्रोहो न कर्तव्यः कथंचन ।
न ह्येवमग्निर्नादित्यो भस्म कुर्यात्तथानघ ॥ १-२८-७ (१४२०)
यथा कुर्यादभिक्रुद्धो ब्राह्मणः संशितव्रतः ।
तदेतैर्विविधैर्लिङ्गैस्त्वं विद्यास्तं द्विजोत्तमम् ॥ १-२८-८ (१४२१)
भूतानामग्रभूर्विप्रो वर्णश्रेष्ठः पिता गुरुः। १-२८-९ (१४२२)
गरुड उवाच ।
किंरूपो ब्राह्मणो मातः किंशीलः किंपराक्रमः ॥ १-२८-९क्ष् (१११)
किंस्विदग्निनिभो भाति किंस्वित्सौम्यप्रदर्शनः ।
यथाहमभिजानीयां ब्राह्मणं लक्षणैः शुभैः ॥ १-२८-१० (१४२३)
तन्मे कारणतो मातः पृच्छतो वक्तुमर्हसि। १-२८-११ (१४२४)

विनतोवाच ।
यस्ते कण्ठमनुप्राप्तो निगीर्णं बडिशं यथा ॥ १-२८-११क्ष् (११२)
दहेदङ्गारवत्पुत्रं तं विद्याद्ब्राह्मणर्षभम् ।
विप्रस्त्वया न हन्तव्यः संक्रुद्धेनापि सर्वदा ॥१-२८-१२ (१४२५)
प्रोवाच चैन विनता पुत्रहार्दादिदं वचः ।
जठरे न च जीर्येद्यस्तं जानीहि द्विजोत्तमम् ॥१-२८-१३ (१४२६)
पुनः प्रोवाच विनता पुत्रहार्दादिदं वचः ।
जानन्त्यप्यतुलं वीर्यमाशीर्वादपरायणा ॥१-२८-१४ (१४२७)
प्रीता परमदुःखार्ता नागैर्विप्रकृता सती। १-२८-१५ (१४२८)
विनतोवाच ।
पक्षौ ते मारुतः पातु चन्द्रसूर्यौ च पृष्ठतः ॥ १-२८-१५क्ष् (११३)
शिरश्च पातु वह्निस्ते वसवः सर्वतस्तनुम् ।
गविष्णुः सर्वगतः सर्वमङ्गानि तव चैव ह।'
अहं च ते सदा पुत्र शान्तिस्वस्तिपरायणा ॥ १-२८-१६ (१४२९)
इहासीना भविष्यामि स्वस्तिकारे रता सदा ।
अरिष्टं व्रज पन्थानं पुत्र कार्यार्थसिद्धये ॥१-२८-१७ (१४३०)
सौतिरुवाच। १-२८-१८क्ष् (११४)
ततः स मातुर्वचनं निशम्य
वितत्य पक्षौ नभ उत्पपात ।
ततो निषादान्बलवानुपागतो
बुभुक्षितः काल इवान्तकोऽपरः ॥ १-२८-१८ (१४३१)
स तान्निषादानुपसंहरंस्तदा
रजः समुद्धूय नभःस्पृशं महत् ।
समुद्रकुक्षौ च विशोषयन्पयः
समीपजान्भूधरजान्विचालयन् ॥ १-२८-१९ (१४३२)
ततः स चक्रे महदाननं तदा
निषादमार्गं प्रतिरुध्य पक्षिराट् ।
ततो निषादास्त्वरिताः प्रवव्रजु-
र्यतो मुखं तस्य भुजंगभोजिनः ॥ १-२८-२० (१४३३)
तदाननं विवृतमतिप्रमाणव-
त्समभ्ययुर्गगनमिवार्दिताः खगाः ।
सहस्रशः पवनजोविमोहिता
यथा ऽनिलप्रचलितपादपे वने ॥ १-२८-२१ (१४३४)
ततः खगो वदनममित्रतापनः
समाहरत्परिचपलो मत्बलाः ।
निषूदयन्बहुविधमत्स्यजीविनो

बभुक्षितो गगनचरेश्वरस्तदा ॥ ॥ १-२८-२२ (१४३५)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२८-१८ काले समये ॥
१-२८-१९ भूधरजान् पर्वतजान्वृक्षान् ॥
१-२८-२२ परिचपलः तेषां ग्रहणाय सर्वतो भ्रमन् ॥
अष्टाविंशोऽध्यायः ॥
२८ ॥

आदिपर्व - अध्याय ०२९
॥ श्रीः ॥
१.२९. अध्यायः २९

Mahabharata - Adi Parva - Chapter Topics
कण्ठं दहतो ब्राह्मणस्य विषादीसहितस्य परित्राणम् ॥ १ ॥
गरुडस्य कश्यपेन संवादः ॥ २ ॥
गजकच्छपपूर्ववृत्तान्तकथनम् ॥ ३ ॥
कश्यपाज्ञया गरुडस्य गजकच्छपग्रहणम् ॥ ४ ॥
रोहिणवृक्षशाखाभङ्गः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२९-० (१४३६)
सौतिरुवाच। १-२९-०क्ष् (११५)
तस्य कण्ठमनुप्राप्तो ब्राह्मणः सह भार्यया ।
दहन्दीप्त इवाङ्गारस्तमुवाचान्तरिक्षगः ॥ १-२९-१ (१४३७)
द्विजोत्तम विनिर्गच्छ तूर्णमास्यादपावृतात् ।
न हि मे ब्राह्मणो वध्यः पापेष्वपि रतः सदा ॥ १-२९-२ (१४३८)
सौतिरुवाच। १-२९-३क्ष् (११६)
ब्रुवाणमेवं गरुडं ब्राह्मणः प्रत्यभाषत ।
निषादी मम भार्येयं निर्गच्छतु मया सह ॥ १-२९-३ (१४३९)
गरुड उवाच। १-२९-४क्ष् (११७)
एतामपि निषादीं त्वं परिगृह्याशु निष्पत ।
तूर्णं संभावयात्मानमजीर्णं मम तेजसा ॥ १-२९-४ (१४४०)
सौतिरुवाच। १-२९-५क्ष् (११८)

ततः स विप्रो निष्क्रान्तो निषादीसहितस्तदा ।
वर्धयित्वा च गरुडमिष्टं देशं जगाम ह ॥१-२९-५ (१४४१)
सहभार्ये विनिष्क्रान्ते तस्मिन्विप्रे स पक्षिराट् ।
वितत्य पक्षावाकाशमुत्पपात मनोजवः ॥१-२९-६ (१४४२)
ततोऽपश्यत्स्वपितरं पृष्टश्चाख्यातवान्पितुः ।
यथान्यायममेयात्मा तं चोवाच महानृषिः ॥१-२९-७ (१४४३)
कश्यप उवाच।१-२९-८क्ष् (११९)
कच्चिद्वः कुशलं नित्यं भोजने बहुलं सुत ।
कच्चिच्च मानुषे लोके तवान्नं विद्यते बहु ॥
ग्क्व गन्तास्यतिवेगेन मम त्वं वक्तुमर्हसि ॥' १-२९-८ (१४४४)
गरुड उवाच।१-२९-९क्ष् (१२०)
माता मे कुशला शश्वत्तथा भ्राता तथा ह्यहम् ।
न हि मे कुशलं तात भोजने बहुले सदा ॥१-२९-९ (१४४५)
अहं हि सर्पैः प्रहितः सोममाहर्तुमुत्तमम् ।
महातुर्दास्यविमोक्षार्थमाहरिष्ये तमद्य वै ॥१-२९-१० (१४४६)
मात्रा चात्र समादिष्टो निषादान्भक्षयेति ह ।
न च मे तृप्तिरभवद्भक्षयित्वा सहस्रशः ॥१-२९-११ (१४४७)
तस्माद्भक्ष्यं त्वमपरं भगवन्प्रदिशस्व मे ।
यद्भुक्त्वाऽमृतमाहर्तुं समर्तः स्यामहं प्रभो ॥१-२९-१२ (१४४८)
क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे भवान्। १-२९-१३ (१४४९)
कश्यप उवाच ।
इदं सरो महापुण्यं देवलोकेऽपि विश्रुतम् ॥ १-२९-१३क्ष् (१२१)
यत्र कूर्माग्रजं हस्ती सदा कर्षत्यवाङ्मुखः ।
तयोर्जन्मान्तरे वैरं संप्रवक्ष्याम्यसोषतः ॥१-२९-१४ (१४५०)
तन्मे तत्त्वं निबोधस्य यत्प्रमाणौ च तावुभौ ।
ग्शृणु त्वं वत्स भद्रं ते कथां वैराग्यवर्धिनीम् ॥१-२९-१५ (१४५१)
पित्रोरर्थविभागे वै समुत्पन्नां पुराण्डज।'
आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम् ॥ १-२९-१६ (१४५२)
भ्राता तस्यानुजश्चासीत्सुप्रतीको महातपाः ।
स नेच्छति धनं भ्रात्रा सहैकस्थं महामुनिः ॥१-२९-१७ (१४५३)
विभागं कीर्तयत्येव सुप्रतीको हि नित्यशः ।
अथाब्रवीच्च तं भ्राता सुप्रतीकं विभावसुः ॥१-२९-१८ (१४५४)
ग्विभागे बहवो दोषा भविष्यन्ति महातपः।'
विभागं बहवो मोहात्कर्तुमिच्छन्ति नित्यशः ।
ततो विभक्तास्त्वन्योन्यं नाद्रियन्तेऽर्थमोहिताः ॥ १-२९-१९ (१४५५)
ततः स्वार्थपरान्मूढान्पृथग्भूतान्स्वकैर्धनैः ।

विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः ॥ १-२९-२० (१४५६)
विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ ।
भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्तते ॥ १-२९-२१ (१४५७)
तस्माद्विभागं भ्रातॄणां न प्रशंसन्ति साधवः ।
ग्एवमुक्तः सुप्रतीको भागं कीर्तयतेऽनिशम् ॥ १-२९-२२ (१४५८)
एवं निर्बध्यमानस्तु शशापैनं विभावसुः।'
गुरुशास्त्रेऽनिबद्धानामन्योन्येनाभिशङ्किनाम् ॥ १-२९-२३ (१४५९)
नियन्तु न हि शक्यस्त्वं भेदतो धनमिच्छसि ।
यस्मात्तस्मात्सुप्रतीक हस्तित्वं समवाप्स्यसि ॥ १-२९-२४ (१४६०)
कश्यप उवाच। १-२९-२५क्ष् (१२२)
शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत् ।
त्वमप्यन्तर्जलचरः कच्छपः संभविष्यसि ॥ १-२९-२५ (१४६१)
एवमन्योन्यशापात्तौ सुप्रतीकविभावसू ।
गजकच्छपतां प्राप्तावर्थार्थं मूढचेतसौ ॥ १-२९-२६ (१४६२)
रोषदोषानुषङ्गेण तिर्यग्योनिगतावपि ।
परस्परद्वेषरतौ प्रमाणबलदर्पितौ ॥ १-२९-२७ (१४६३)
सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ ।
तयोरन्यतरः श्रीमान्समुपैति महागजः ॥ १-२९-२८ (१४६४)
यस्य बृंहितशब्देन कूर्मोऽप्यन्तर्जलेशयः ।
उत्थितोऽसौ महाकायः कृत्स्नं विक्षोभयन्सरः ॥ १-२९-२९ (१४६५)
तं दृष्ट्वाऽऽवेष्टितकरः पतत्येष गजो जलम् ।
दन्तहस्ताग्रलाङ्गूलपादवेगेन वीर्यवान् ॥ १-२९-३० (१४६६)
विक्षोभयंस्ततो नागः सरो बहुझषाकुलम् ।
कूर्मोऽप्यभ्युद्यतशिरा युद्धायाभ्येति वीर्यवान् ॥ १-२९-३१ (१४६७)
षडुच्छ्रितो योजनानि गजस्तद्द्विगुणायतः ।
कूर्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः ॥ १-२९-३२ (१४६८)
तावुभौ युद्धसंमत्तौ परस्परवधैषिणौ ।
उपयुज्याशु कर्मेदं साधये हितमात्मनः ॥ १-२९-३३ (१४६९)
महाभ्रघनसंकाशं तं भुक्त्वामृतमानय ।
महागिरिसमप्रख्यं घोररूपं च हस्तिनम् ॥ १-२९-३४ (१४७०)
सौतिरुवाच। १-२९-३५क्ष् (१२३)
इत्युक्त्वा गरुडं सोऽथ माङ्गल्यमकरोत्तदा ।
युध्यतः सह देवैस्ते युद्धे भवतु मङ्गलम् ॥ १-२९-३५ (१४७१)
पूर्णकुम्भो द्विजा गावो यच्चान्यत्किंचिदुत्तमम् ।
शुभं स्वस्त्ययनं चापि भविष्यति तवाण्डजा ॥ १-२९-३६ (१४७२)
युध्यमानस्य सङ्ग्रामे देवैः सार्धं महाबल ।

ऋचो यजूंषि सामानि पवित्राणि हवींषि च ॥१-२९-३७ (१४७३)
रहस्यानि च सर्वाणि सर्वे वेदाश्च ते बलम् ।
ग्वर्धयिष्यन्ति समरे भविष्यति खगोत्तम।'
इत्युक्तो गरुडः पित्रा गतस्तं ह्रदमन्तिकात् ॥ १-२९-३८ (१४७४)
अपश्यन्निर्मलजलं नानापक्षिसमाकुलम् ।
स तत्स्मृत्वा पितुर्वाक्यं भीमवेगोऽन्तरिक्षगः ॥१-२९-३९ (१४७५)
नखेन गजमेकेन कूर्ममेकेन चाक्षिपत् ।
सधुत्पपात चाकाशं तत उच्चैर्विहङ्गमः ॥१-२९-४० (१४७६)
सोऽलम्बं तीर्थणासाद्य देववृक्षानुपागमत् ।
ते भीताः समकम्पन्त तस्य पक्षानिलाहताः ॥१-२९-४१ (१४७७)
न नो भञ्ज्यादिति तदा दिव्याः कनकशाखिनः ।
प्रचलाङ्गान्स तान्दृष्ट्वा मनोरथफलद्रुमान् ॥१-२९-४२ (१४७८)
अन्यानतुलरूपाङ्गानुपचक्राम खेचरः ।
काञ्चनै राजतैश्चैव फलैर्वैदूर्यशाखिनः ।
सागराम्बुपरिक्षिप्तान्भ्राजमानान्महाद्रुमान् ॥ १-२९-४३ (१४७९)
ग्तेषां मध्ये महानासीत्पादपः सुमनोहरः ।
सहस्रयोजनोत्सेधो बहुशाखासमन्वितः ॥१-२९-४४ (१४८०)
खगानामालयो दिव्यो नाम्ना रौहिणपादपः ।
यस्य छायां समाश्रित्य सद्यो भवति निर्वृतः;॥१-२९-४५ (१४८१)
तमुवाच खगश्रेष्ठं तत्र रौहिणपादपः ।
अतिप्रवृद्धः समुहानापतन्तं मनोजवम् ॥१-२९-४६ (१४८२)
रौहिण उवाच।१-२९-४७क्ष् (१२४)
यैषा मम महाशाखा शतयोजनमायता ।
एतामास्थाय शाखां त्वं खादेमौ गजकच्छपौ ॥१-२९-४७ (१४८३)
सौतिरुवाच।१-२९-४८क्ष् (१२५)
ततो द्रुमं पतगसहस्रसेवितं
महीधरप्रतिमवपुः प्रकम्पयन् ।
खगोत्तमो द्रुतमभिपत्य वेगवा-
न्बभञ्ज तामविरलपत्रसंचयाम् ॥ ॥ १-२९-४८ (१४८४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि एकोनत्रिंशोऽध्यायः ॥२९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२९-४ संभावय संजीवय ॥
१-२९-७ ततोऽपश्यत्स्वपितरं काश्यपं दीप्ततेजसम् ।तं श्रेष्ठं
पततां श्रेष्ठो ब्रह्म ब्रह्मविदां वरम्। पृष्टश्च पित्रा

बलवान्वैनतेयः प्रतापदान्। इति पाठान्तरम् ॥
७ ॥
१-२९-९ भोजने बहुले मम कुशलं न हि ॥
१-२९-१० सोमं अमृतम् ॥
१-२९-१४ कूर्माग्रजं कूर्मभूतं ज्येष्ठभ्रातरम् ॥
१-२९-२१ अन्तरेषु छिद्रेषु ॥
१-२९-३० आवेष्टितकरः कुण्डलीकृतशुण्डादण्डः ॥
१-२९-३३ उपयुज्य भुक्त्वा ॥
१-२९-३८ भविष्यति समरे ॥
एकोनत्रिंशोऽध्यायः ॥
२९ ॥

आदिपर्व - अध्याय ०३०
॥ श्रीः ॥
१.३०. अध्यायः ३०

Mahabharata - Adi Parva - Chapter Topics
भग्नशाखाया अधोभागे लम्बमानवालखिल्यरक्षणार्थं मुखेन शाखाग्रहणम् ॥ १ ॥
कश्यपाज्ञया हिमालयं गत्वा तत्र शाखां परित्यज्य तत्रैव स्थित्वा गजकच्छपभक्षणम् ॥ २ ॥
उत्पातान्दृष्ट्वा देवैः कृतोऽमृतरक्षणोपायः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-३०-० (१४८५)
सौतिरुवाच। १-३०-०क्ष् (१२६)
स्पष्टमात्रा तु पद्भ्यां सा गरुडेन बलीयसा ।
अभज्यत तरोः शाखा भग्नां चैकामधारयत् ॥ १-३०-१ (१४८६)
तां भङ्क्त्वा स महाशाखां स्मयमानो विलोकयन् ।
अथात्रं लम्बतोऽपश्यद्वालखिल्यानधोमुखान् ॥ १-३०-२ (१४८७)
ऋषयो ह्यत्र लम्बन्ते न हन्यामिति तानृषीन् ।
तपोरतांल्लम्बमानान्ब्रह्मर्षीनभिवीक्ष्य सः ॥ १-३०-३ (१४८८)
हन्यादेतान्संपतन्ती शाखेत्यथ विचिन्त्य सः ।
नखैर्दृढतरं वीरः संगृह्य गजकच्छपौ ॥ १-३०-४ (१४८९)
स तद्विनाशसंत्रासादभिपत्य स्वगाधिपः ।
शाखामास्येन जग्राह तेषामेवान्ववेक्षया ॥ १-३०-५ (१४९०)

अतिदैवं तु तत्तस्य कर्म दृष्ट्वा महर्षयः ।
विस्मयोत्कम्पहृदया नाम चक्रुर्महाखगे ॥ १-३०-६ (१४९१)
गुरुं भारं समासाद्योड्डीन एष विहङ्गमः ।
गरुडस्तु खगश्रेष्ठस्तस्मात्पन्नगभोजनः ॥ १-३०-७ (१४९२)
ततः शनैः पर्यपतत्पक्षैः शैलान्प्रकम्पयन् ।
एवं सोऽभ्यपतद्देशान्बहून्सगजकच्छपः ॥ १-३०-८ (१४९३)
दयार्थं वालखिल्यानां न च स्थानमविन्दत ।
स गत्वा पर्वतश्रेष्ठं गन्धमादनमञ्जसा ॥ १-३०-९ (१४९४)
ददर्श कश्यपं तत्र पितरं तपसि स्थितम् ।
ददर्श तं पिता चापि दिव्यरूपं विहङ्गमम् ॥ १-३०-१० (१४९५)
तेजोवीर्यबलोपेतं मनोमारुतरंहसम् ।
शैलशृङ्गप्रतीकाशं ब्रह्मदण्डमिवोद्यतम् ॥ १-३०-११ (१४९६)
अचिन्त्यमनभिध्येयं सर्वभूतभयंकरम् ।
महावीर्यधरं रौद्रं साक्षादग्निमिवोद्यतम् ॥ १-३०-१२ (१४९७)
अप्रधृष्यमजेयं च देवदानवराक्षसैः ।
भेत्तारं गिरिशृङ्गाणां समुद्रजलशोषणम् ॥ १-३०-१३ (१४९८)
लोकसंलोडनं घोरं कृतान्तसमदर्शनम् ।
तमागतमभिप्रेक्ष्य भगवान्कश्यपस्तदा ।
विदित्वा चास्यं संकल्पमिदं वचनमब्रवीत् ॥ १-३०-१४ (१४९९)
कश्यप उवाच। १-३०-१५क्ष् (१२७)
पुत्र मा साहसं कार्षीर्मा सद्यो लप्स्यसे व्यथाम् ।
मा त्वां दहेयुः संक्रुद्धा वालखिल्या मरीचिपाः ॥ १-३०-१५ (१५००)
सौतिरुवाच। १-३०-१६क्ष् (१२८)
ततः प्रसादयामास कश्यपः पुत्रकारणात् ।
वालखिल्यान्महाभागांस्तपसा हतकल्मषान् ॥ १-३०-१६ (१५०१)
कश्यप उवाच। १-३०-१७क्ष् (१२९)
प्रजाहितार्थमारम्भो गरुडस्य तपोधनाः ।
चिकीर्षति महत्कर्म तदनुज्ञातुमर्हथ ॥ १-३०-१७ (१५०२)
सौतिरुवाच। १-३०-१८क्ष् (१३०)
एवमुक्ता भगवता मुनयस्ते समभ्ययुः ।
मुक्त्वा शाखां गिरिं पुण्यं हिमवन्त तपोऽर्थिनः ॥ १-३०-१८ (१५०३)
ततस्तेष्वपयातेषु पितरं विनतासुतः ।
शाखाव्याक्षिप्तवदनः पर्यपृच्छत कश्यपम् ॥ १-३०-१९ (१५०४)
भगवन्क्व विमुञ्चामि तरोः शाखामिमामहम् ।
वर्जितं मानुषैर्देशमाख्यातु भगवान्मम ॥ १-३०-२० (१५०५)
सौतिरुवाच। १-३०-२१क्ष् (१३१)

ततो निःपुरुषं शैलं हिमसंरुद्धकन्दरम् ।
अगम्यं मनसाप्यन्यैस्तस्याचख्यौ स कश्यपः ॥ १-३०-२१ (१५०६)
तं पर्वतं महाकुक्षिमुद्दिश्य स महाखगः ।
जवेनाभ्यपतत्ताक्ष्र्यः सशाखागजकच्छपः ॥ १-३०-२२ (१५०७)
न तां वध्री परिणहेच्छतचर्मा महातनुम् ।
शाखिनो महतीं शाखां यां प्रगृह्य ययौ खगः ॥ १-३०-२३ (१५०८)
स ततः शतसाहस्रं योजनान्तरमागतः ।
कालेन नातिमहता गरुडः पतगेश्वरः ॥ १-३०-२४ (१५०९)
स तं गत्वा क्षणेनैव पर्वतं वचनात्पितुः ।
अमुञ्चन्महतीं शाखां सस्वनं तत्र खेचरः ॥ १-३०-२५ (१५१०)
पक्षानिलहतश्चास्य प्राकम्पत स शैलराट् ।
मुमोच पुष्पवर्षं च समागलितपादप ॥ १-३०-२६ (१५११)
शृङ्गाणि च व्यशीर्यन्त गिरेस्तस्य समन्ततः ।
मणिकाञ्चनचित्राणि शोभयन्ति महागिरिम् ॥ १-३०-२७ (१५१२)
शाखिनो बहवश्चापि शाखयाऽभिहतास्तया ।
काञ्चनैः कुसुमैर्भान्ति विद्युत्वन्त इवाम्बुदाः ॥ १-३०-२८ (१५१३)
ते हेमविकचा भूमौ युताः पर्वतधातुभिः ।
व्यराजञ्छाखिनस्तत्र सूर्यांशुप्रतिरञ्जिताः ॥ १-३०-२९ (१५१४)
ततस्तस्य गिरेः शृङ्गमास्थाय स खगोत्तमः ।
भक्षयामास गरुडस्तावुभौ गजकच्छपौ ॥ १-३०-३० (१५१५)
तावुभौ भक्षयित्वा तु स ताक्ष्र्यः कूर्मकुञ्जरौ ।
ततः पर्वतकूटाग्रादुत्पपात महाजवः ॥ १-३०-३१ (१५१६)
प्रावर्तन्ताथ देवानामुत्पाता भयशंसिनः ।
इन्द्रस्य वज्रं दयितं प्रजज्वाल भयात्ततः ॥ १-३०-३२ (१५१७)
सधूमा न्यपतत्सार्चिर्दिवोल्का नभसश्च्युता ।
तथा वसूनां रुद्राणामादित्यानां च सर्वशः ॥ १-३०-३३ (१५१८)
साध्यानां मरुतां चैव ये चान्ये देवतागणाः ।
स्वं स्वं प्रहरणं तेषां परस्परमुपाद्रवत् ॥ १-३०-३४ (१५१९)
अभूतपूर्वं संग्रामे तदा देवासुरेऽपि च ।
ववुर्वाताः सनिर्घाताः पेतुरुल्काः सहस्रशः ॥ १-३०-३५ (१५२०)
निरभ्रमेव चाकाशं प्रजगर्ज महास्वनम् ।
देवानामपि यो देवः सोऽप्यवर्षत शोणितम् ॥ १-३०-३६ (१५२१)
मम्लुर्माल्यानि देवानां नेशुस्तेजांसि चैव हि ।
उत्पातमेघा रौद्राश्च ववृषुः शोणितं बहु ॥ १-३०-३७ (१५२२)
रजांसि मुकुटान्येषामुत्थितानि व्यधर्षयन् ।
ततस्त्राससमुद्विग्नः सह देवैः शतक्रतुः ।

उत्पातान्दारुणान्पश्यन्नित्युवाच बृहस्पतिम् ॥ १-३०-३८ (१५२३)
किमर्थं भगवन्घोरा उत्पाताः सहसोत्थिताः ।
न च शत्रुं प्रपश्यामि युधि यो नः प्रधर्षयेत् ॥१-३०-३९ (१५२४)
बृहस्पतिरुवाच। १-३०-४०क्ष् (१३२)
तवापराधाद्देवेन्द्र प्रमादाच्च शतक्रतो ।
तपसा वालखिल्यानां महर्षीणां महात्मनाम् ॥१-३०-४० (१५२५)
कश्यपस्य मुनेः पुत्रो विनतायाश्च खेचरः ।
हर्तुं सोममभिप्राप्तो बलवान्कामरूपधृक् ॥१-३०-४१ (१५२६)
समर्थो बलिनां श्रेष्ठो हर्तुं सोमं विहंगमः ।
सर्वं संभावयाम्यस्मिन्नसाध्यमपि साधयेत् ॥१-३०-४२ (१५२७)
सौतिरुवाच। १-३०-४३क्ष् (१३३)
श्रुत्वैतद्वचनं शक्रः प्रोवाचामृतरक्षिणः ।
महावीर्यबलः पक्षी हर्तुं सोममिहोद्यतः ॥१-३०-४३ (१५२८)
युष्मान्संबोधयाम्येष ग्गृहीत्वावरणायुधान् ।
परिवार्यामृतं सर्वे यूयं मद्वचनादिह ॥१-३०-४४ (१५२९)
रक्षध्वं विबुधा वीरा' यथा न स हरेद्बलात् ।
अतुलं हि बलं तस्य बृहस्पतिरुवाच ह ॥१-३०-४५ (१५३०)
सौतिरुवाच। १-३०-४६क्ष् (१३४)
तच्छ्रुत्वा विबुधा वाक्यं विस्मिता यत्नमास्थिताः ।
परिवार्यामृतं तस्थूर्वज्री चेन्द्रः प्रतापवान् ॥१-३०-४६ (१५३१)
धारयन्तो विचित्राणि काञ्चनानि मनस्विनः ।
कवचानि महार्हाणि वैदूर्यविकृतानि च ॥१-३०-४७ (१५३२)
चर्माण्यपि च गात्रेषु भानुमन्ति दृढानि च ।
विविधानि च शस्त्राणि घोररूपाण्यनेकशः ॥१-३०-४८ (१५३३)
शिततीक्ष्णाग्रधाराणि समुद्यम्य सुरोत्तमः ।
सविस्फुलिङ्गज्वालानि सधूमानि च सर्वशः ॥१-३०-४९ (१५३४)
चक्राणि परघांश्चैव त्रिशूलानि परश्वधान् ।
शक्तीश्च विविधास्तीक्ष्णाः करवालांश्च निर्मलान् ।
स्वदेहरूपाण्यादाय गदाश्चोग्रप्रदर्शनाः ॥ १-३०-५० (१५३५)
तैः शस्त्रैर्भानुमद्भिस्ते दिव्याभरणभूषिताः ।
भानुमन्तः सुरगणास्तस्थुर्विगतकल्मषाः ॥१-३०-५१ (१५३६)
अनुपमबलवीर्यतेजसो
धृतमनसः परिरक्षणेऽमृतस्य ।
असुरपुरविदारणाः सुरा
ज्वलनसमिद्धवपुःप्रकाशिनः ॥ १-३०-५२ (१५३७)
इति समरवरं सुराः स्थितास्ते

परिघसहस्रशतैः समाकुलम् ।
विगलितमिव चाम्बरान्तरं
तपनमरीचिविकाशितं बभासे ॥ ॥ १-३०-५३ (१५३८)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-३०-६ अतिदैवं देवैरपि कर्तुमशक्यम् ॥
१-३०-७ गुरुशब्दपूर्वाड्डीङ्विहायसागतावित्यस्माड्डुः आदेरकारश्च
पृषोदरादित्वात् गरुडशब्दो निष्पन्न इत्यर्थः ॥
१-३०-१८ शाखां मुक्त्वा गिरिं समभ्ययुरिति संबन्धः ॥
१-३०-१९ शाखया मुखस्थया व्याक्षिप्तं वदनं वचनक्रियायस्य स तथा ॥
१-३०-२३ शतचर्मा शतगोचर्मणा कृता । वध्री रज्जुः। न परिणहेत्
परितो न बध्नीयात् ॥
१-३०-२९ विकचाः हेमवदुज्ज्वलाः ॥
१-३०-३३ दिवा अह्नि ॥
१-३०-३६ देवानां देवः पर्जन्यः ॥
१-३०-४२ अन्येषामसाध्यमप्ययं साधयेत् ॥
१-३०-४८ भानुमन्ति दीप्तिमन्ति ॥
१-३०-५० स्वदेहरूपाणि स्वदेहानुरूपाणि ॥
१-३०-५२ ज्वलनवत्समिद्धैर्दीप्यमानैर्वपुर्भिः प्रकाशिनः ॥
त्रिंशोऽध्यायः ॥
३० ॥

आदिपर्व - अध्याय ०३१
॥ श्रीः ॥
१.३१. अध्यायः ३१

Mahabharata - Adi Parva - Chapter Topics
वालखिल्यतपसा गरुडोत्पत्तिकथनपूर्वकं तस्य
पक्षीन्द्रत्वेऽभिषेचनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३१-० (१५३९)
शौनक उवाच। १-३१-०क्ष् (१३५)
कोऽपराधो महेन्द्रस्य कः प्रमादश्च सूतज ।

तपसा वालखिल्यानां संभूतो गरुडः कथम् ॥ १-३१-१ (१५४०)
कश्यपस्य द्विजातेश्च कथं वै पक्षिराट् सुतः ।
अधृष्टः सर्वभूतानामवध्यस्चाभवत्कथम् ॥ १-३१-२ (१५४१)
कथं च कामचारी स कामवीर्यश्च खेचरः ।
एतदिच्छाम्यहं श्रोतुं पुराणे यदि पठ्यते ॥ १-३१-३ (१५४२)
सौतिरुवाच। १-३१-४क्ष् (१३६)
विषयोऽयं पुराणस्य यन्मां त्वं परिपृच्छसि ।
शृणु मे वदतः सर्वमेतत्संक्षेपतो द्विज ॥ १-३१-४ (१५४३)
यजतः पुत्रकामस्य कश्यपस्य प्रजापतेः ।
साहाय्यमृषयो देवा गन्धर्वाश्च ददुः किल ॥ १-३१-५ (१५४४)
तत्रेध्मानयने शक्रो नियुक्तः कश्यपेन ह ।
मुनयो वालखिल्याश्च ये चान्ये देवतागणाः ॥ १-३१-६ (१५४५)
शक्रस्तु वीर्यसदृशमिध्यभारं गिरिप्रभम् ।
समुद्यम्यानयामास नातिकृच्छ्रादिव प्रभुः ॥ १-३१-७ (१५४६)
अथापश्यदृषीन्ह्रस्वानङ्गुष्ठोदरवर्ष्मणः ।
पलाशवर्तिकामेकां वहतः संहतान्पथि ॥ १-३१-८ (१५४७)
प्रलीनान्स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् ।
क्लिश्यमानान्मन्दबलान्गोष्पदे संप्लुतोदके ॥ १-३१-९ (१५४८)
तान्सर्वान्विस्मयाविष्टो वीर्योन्मत्तः पुरन्दरः ।
अपहास्याभ्यगाच्छीघ्रं लम्बयित्वाऽवमन्य च ॥ १-३१-१० (१५४९)
तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः ।
आरेभिरे महत्कर्म तदा शक्रभयंकरम् ॥ १-३१-११ (१५५०)
जुहुवुस्ते सुतपसो विधिवज्जातवेदसम् ।
मन्त्रैरुच्चावचैर्विप्रा येन कामेन तच्छृणु ॥ १-३१-१२ (१५५१)
कामवीर्यः कामगमो देवराजभयप्रदः ।
इन्द्रोऽन्यः सर्वदेवानां भवेदिति यतव्रताः ॥ १-३१-१३ (१५५२)
इन्द्राच्छतगुणः शौर्ये वीर्ये चैव मनोजवः ।
तपसो नः फलेनाद्य दारुणः संभवित्विति ॥ १-३१-१४ (१५५३)
तद्बुद्ध्वा भृशसंतप्तो देवराजः शतक्रतुः ।
जगाम शरणं तत्र कश्यपं संशितव्रतम् ॥ १-३१-१५ (१५५४)
तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः ।
वालखिल्यानुपागम्य कर्मसिद्धिमपृच्छत ॥ १-३१-१६ (१५५५)
ग्कश्यप उवाच। १-३१-१७क्ष् (१३७)
केन कामेन चारब्धं भवद्भिर्होमकर्म च ।
याथातथ्येन मे ब्रूत श्रोतुं कौतूहलं हि मे ॥ १-३१-१७ (१५५६)
वालखिल्या ऊचुः। १-३१-१८क्ष् (१३८)

अवज्ञाताः सुरेन्द्रेण मूढेनाकृतबुद्धिना ।
ऐश्वर्यमदमत्तेन सदाचारान्निरस्यता ॥ १-३१-१८ (१५५७)
तद्विघातार्थमारम्भो विधिवत्तस्य कश्यप ॥ १-३१-१९ (१५५८)
सौतिरुवाच।' १-३१-२०क्ष् (१३९)
एवमस्त्विति तं चापि प्रत्यूचुः सत्यवादिनः ।
तान्कश्यप उवाचेदं सान्त्वपूर्वं प्रजापतिः ॥ १-३१-२० (१५५९)
अयमिन्द्रस्त्रिभुवने नियोगाद्ब्रह्मणः कृतः ।
इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधनाः ॥ १-३१-२१ (१५६०)
न मिथ्या ब्रह्मणो वाक्यं कर्तुमर्हथ सत्तमाः ।
भवतां हि न मिथ्याऽयं संकल्पो वै चिकीर्षितः ॥ १-३१-२२ (१५६१)
भवत्वेष पतत्रीणामिन्द्रोऽतिबलसत्त्ववान् ।
प्रसादः क्रियतामस्य देवराजस्य याचतः ॥ १-३१-२३ (१५६२)
सौतिरुवाच। १-३१-२४क्ष् (१४०)
एवमुक्ताः कश्यपेन वालखिल्यास्तपोधनाः ।
प्रत्यूचुरभिसंपूज्य मुनिश्रेष्ठं प्रजापतिम् ॥ १-३१-२४ (१५६३)
वालखिल्या ऊचुः। १-३१-२५क्ष् (१४१)
इन्द्रार्थोऽयं समारम्भः सर्वेषां नः प्रजापते ।
अपत्यार्थं समारम्भो भवतश्चायमीप्सितः ॥ १-३१-२५ (१५६४)
तदिदं सफलं कर्म त्वयैव प्रतिगृह्यताम् ।
तथा चैवं विधत्स्वात्र यथा श्रेयोऽनुपश्यसि ॥ १-३१-२६ (१५६५)
सौतिरुवाच। १-३१-२७क्ष् (१४२)
एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा ।
विनता नाम कल्याणी पुत्रकामा यशस्विनी ॥ १-३१-२७ (१५६६)
तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः ।
उपचक्राम भर्तारं तामुवाचाथ कश्यपः ॥ १-३१-२८ (१५६७)
आरम्भः सफलो देवि भविता यस्त्वयेप्सितः ।
जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ ॥ १-३१-२९ (१५६८)
तपसा वालखिल्यानां मम संकल्पतस्तथा ।
भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ ॥ १-३१-३० (१५६९)
उवाच चैनां भगवान्कश्यपः पुनरेव ह ।
धार्यतामप्रमादेन गर्भोऽयं सुमहोदयः ॥ १-३१-३१ (१५७०)
एकः सर्वपतत्रीणामिन्द्रत्वं कारयिष्यति ।
लोकसंभावितो वीरः कामरूपो विहङ्गमः ॥ १-३१-३२ (१५७१)
सौतिरुवाच। १-३१-३३क्ष् (१४३)
शतक्रतुमथोवाच प्रीयमाणः प्रजापतिः ।
त्वत्सहायौ महावीर्यौ भ्रातरौ ते भविष्यतः ॥ १-३१-३३ (१५७२)

नैताभ्यां भविता दोषः सकाशात्ते पुरंदर ।
व्येतु ते शक्र संतापस्त्वमेवेन्द्रो भविष्यसि ॥ १-३१-३४ (१५७३)
न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः ।
न चावमान्या दर्पात्ते वाग्वज्रा भृशकोपनाः ॥ १-३१-३५ (१५७४)
सौतिरुवाच । १-३१-३६क्ष् (१४४)
एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिविष्टपम् ।
विनता चापि सिद्धार्था बभूव मुदिता तथा ॥ १-३१-३६ (१५७५)
जनयामास पुत्रौ द्वावरुणं गरुडं तथा ।
विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः ॥ १-३१-३७ (१५७६)
पतत्त्रीणां च गरुडमिन्द्रत्वेनाभ्यषिञ्चत ।
तस्यैतत्कर्म सुमहच्छ्रूयतां भृगुनन्दन ॥ ॥ १-३१-३८ (१५७७)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-३१-८ अङ्गुष्ठोदरप्रमाणं वर्ष्म शरीरं येषां तान् । वर्तिकां यष्टिम् ॥
१-३१-९ स्वेष्वङ्गेषु प्रलीनानिव अतिकृशानित्यर्थः । क्लिश्यमानान् गोष्पदमात्रेति जले मज्जनेनेत्यर्थः ॥
१-३१-११ जातमन्यवः दीनाः । मन्युर्दैन्ये क्रतौ क्रुधीति कोशः ॥
१-३१-१४ दारुणः इन्द्रं प्रत्येव ॥
१-३१-१६ कर्मसिद्धिमपृच्छत सिद्ध वः कर्मेत्यपृच्छत् ॥
१-३१-२० एवमस्तु सिद्धमस्तु ॥
१-३१-२८ पुंसवने ऋतुकाले ॥
१-३१-३२ कारयिष्यति स्वार्थे णिच् ॥
एकत्रिंशोऽध्यायः ॥
३१ ॥

आदिपर्व - अध्याय ०३२
॥ श्रीः ॥
१.३२. अध्यायः ३२

Mahabharata - Adi Parva - Chapter Topics
देवगरुडयुद्धं तत्र देवानां पराजयः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३२-० (१५७८)
सौतिरुवाच। १-३२-०क्ष् (१४५)
ग्ततस्तस्माद्गिरिवरात्समुदीर्णमहाबलः।'
गरुडः पक्षिराट् तूर्णं संप्राप्तो विबुधान्प्रति ॥ १-३२-१ (१५७९)
तं दृष्ट्वातिबलं चैव प्राकम्पन्त सुरास्ततः ।
परस्परं च प्रत्यघ्नन्सर्वप्रहरणान्युत ॥ १-३२-२ (१५८०)
तत्र चासीदमेयात्मा विद्युदग्निसमप्रभः ।
भौमनः सुमहावीर्यः सोमस्य परिरक्षिता ॥ १-३२-३ (१५८१)
स तेन पतगेन्द्रेण पक्षतुण्डनखैः क्षतः ।
मुहूर्तमतुलं युद्धं कृत्वा विनिहतो युधि ॥ १-३२-४ (१५८२)
रजश्चोद्धूय सुमहत्पक्षवातेन खेचरः ।
कृत्वा लोकान्निरालोकांस्तेन देवानवाकिरत् ॥ १-३२-५ (१५८३)
तेनावकीर्णा रजसा देवा मोहमुपागमन् ।
न चैवं ददृशुश्छन्ना रजसाऽमृतरक्षिणः ॥ १-३२-६ (१५८४)
एवं संलोडयामास गरुडस्त्रिदिवालयम् ।
पक्षतुण्डप्रहारैस्तु देवान्स विददार ह ॥ १-३२-७ (१५८५)
ततो देवः सहस्राक्षस्तूर्णं वायुमचोदयत् ।
विक्षिपेमां रजोवृष्टिं तवेदं कर्म मारुत ॥ १-३२-८ (१५८६)
सौतिरुवाच। १-३२-९क्ष् (१४६)
अथ वायुरपोवाह तद्रजस्तरसा बली ।
ततो वितिमिरे जाते देवाः शकुनिमार्दयन् ॥ १-३२-९ (१५८७)
ननादोच्चैः स बलवान्महामेघ इवाम्बरे ।
वध्यमानः सुरगणैः सर्वभूतानि भीषयन् ॥ १-३२-१० (१५८८)
उत्पपात महावीर्यः पक्षिराट् परवीरहा ।
समुत्पत्यान्तरिक्षस्थं देवानामुपरि स्थितम् ॥ १-३२-११ (१५८९)
वर्मिमो विबुधाः सर्वे नानाशस्त्रैरवाकिरन् ।
पट्टिशैः परिधैः शूलैर्गदाभिश्च सवासवाः ॥ १-३२-१२ (१५९०)
क्षुरप्रैर्ज्वलितैश्चापि चक्रैरादित्यरूपिभिः ।
नानाशस्त्रविसर्गैस्तैर्वध्यमानः समन्ततः ॥ १-३२-१३ (१५९१)
कुर्वन्सुतुमुलं युद्धं पक्षिराण्ण व्यकम्पत ।
निर्दहन्निव चाकाशे वैनतेयः प्रतापवान् ।
पक्षाभ्यामुरसा चैव समन्ताद्व्यक्षिपत्सुरान् ॥ १-३२-१४ (१५९२)
ते विक्षिप्तास्ततो देवा दुद्रुवुर्गरुडार्दिताः ।
नखतुण्डक्षताश्चैव सुस्रुवुः शोणितं बहु ॥ १-३२-१५ (१५९३)
साध्याः प्राचीं सगन्धर्वा वसवो दक्षिणां दिशम् ।
प्रजग्मुः सहिता रुद्राः पतगेन्द्रप्रधर्षिताः ॥ १-३२-१६ (१५९४)

दिशं प्रतीचीमादित्या नासत्यावुत्तरां दिशम् ।
मुहुर्मुहुः प्रेक्षमाणा युध्यमानं महौजसः ॥ १-३२-१७ (१५९५)
अश्वक्रन्देन वीरेण रेणुकेन च पक्षिराट् ।
क्रथनेन च शूरेण तपनेन च खेचरः ॥ १-३२-१८ (१५९६)
उलूकश्वसनाभ्यां च निमेषेण च पक्षिराट् ।
प्ररुजेन च संग्रामं चकार पुलिनेन च ॥ १-३२-१९ (१५९७)
तान्पक्षनखतुण्डाग्रैरभिनद्विनतासुतः ।
युगान्तकाले संक्रुद्धः पिनाकीव परंतप ॥ १-३२-२० (१५९८)
महाबला महोत्साहास्तेन ते बहुधा क्षताः ।
रेजुरभ्रघनप्रख्या रुधिरौघप्रवर्षिणः ॥ १-३२-२१ (१५९९)
तान्कृत्वा पतगश्रेष्ठः सर्वानुत्क्रान्तजीवितान् ।
अतिक्रान्तोऽमृतस्यार्थे सर्वतोऽग्निमपश्यत ॥ १-३२-२२ (१६००)
आवृण्वानं महाज्वालमर्चिर्भिः सर्वतोऽम्बरम् ।
दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥ १-३२-२३ (१६०१)
ग्नभः स्पृशन्तं ज्वालाभिः सर्वभूतभयंकरम्।'
ततो नवत्या नवतीर्मुखानां
कृत्वा महात्मा गरुडस्तरस्वी ।
नदीः समापीय मुखैस्ततस्तैः
सुशीघ्रमागम्य पुनर्जवेन ॥ १-३२-२४ (१६०२)
ज्वलन्तमग्निं तममित्रतापनः
समास्तरत्पत्ररथो नदीभिः ।
ततः प्रचक्रे वपुरन्यदल्पं
प्रवेष्टुकामोऽग्निमभिप्रशाम्य ॥ ॥ १-३२-२५ (१६०३)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-३२-३ भौमनः विश्वकर्मा ॥
१-३२-४ विनिहतः मृतकल्पः कृतः ॥
१-३२-९ अपोवाह अपसारितवान् ॥
१-३२-२४ नवत्याः नवतीः शताधिकाष्टसाहस्रीः ॥
१-३२-२५ समास्तरत् आच्छादितवान् शामितवानित्यर्थः ॥
द्वात्रिंशोऽध्यायः ॥
३२ ॥

आदिपर्व - अध्याय ०३३
॥ श्रीः ॥

१.३३. अध्यायः ३३

Mahabharata - Adi Parva - Chapter Topics
अमृतसमीपे गरुडस्य गमनम् ॥ १ ॥
अमृतं गृहीत्वा गच्छतो गरुडस्य विष्णुदर्शनम् ॥ २ ॥
विष्णुगरुडयोः परस्परं वरदानम् ॥ ३ ॥
गरुडस्य सुपर्णनामप्राप्तिः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-३३-० (१६०४)
सौतिरुवाच। १-३३-०क्ष् (१४७)
जाम्बूनदमयो भूत्वा मरीचिनिकरोज्ज्वलः ।
प्रविवेश बलात्पक्षी वारिवेग इवार्णवम् ॥ १-३३-१ (१६०५)
स चक्रं क्षुरपर्यन्तमपश्यदमृतान्तिके ।
परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम् ॥ १-३३-२ (१६०६)
ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् ।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्मितम् ॥ १-३३-३ (१६०७)
तस्यान्तरं स दृष्ट्वै पर्यवर्तत खेचरः ।
अरान्तरेणाभ्यपतत्संक्षिप्याङ्गं क्षणेन ह ॥ १-३३-४ (१६०८)
अधश्चक्रस्य चैवात्र दीप्तानलसमद्युती ।
विद्युज्जिह्वौ महावीर्यौ दीप्तास्यौ दीप्तलोचनौ ॥ १-३३-५ (१६०९)
चक्षुर्विषौ महाघोरौ नित्यं क्रुद्धौ तरस्विनौ ।
अमृतस्यैव रक्षार्थं ददर्श भुजगोत्तमौ ॥ १-३३-६ (१६१०)
सदा संरब्धनयनौ सदा चानिमिषेक्षणौ ।
तयोरेकोऽपि यं पश्येत्स तूर्णं भस्मसाद्भवेत् ॥ १-३३-७ (१६११)
गतौ दृष्ट्वा सहसा खेदं जगाम विनतात्मजः ।
कथमेतौ महावीर्यौ जेतव्यौ हरिभोजिनौ ॥ १-३३-८ (१६१२)
इति संचिन्त्य गरुडस्तयोस्तूर्णं निराकरः।'
तयोश्चक्षूंषि रजसा सुपर्णः सहसाऽऽवृणोत् ।
ताभ्यामदृष्टरूपोऽसौ सर्वतः समताडयत् ॥ १-३३-९ (१६१३)
तयोरङ्गे समाक्रम्य वैनतेयोऽन्तरिक्षगः ।
आच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥ १-३३-१० (१६१४)
समुत्पाट्यामृतं तत्र वैनतेयस्ततो बली ।
उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्यवान् ॥ १-३३-११ (१६१५)
अपीत्वैवामृतं पक्षी परिगृह्याशु निःसृतः ।

आगच्छदपरिश्रान्त आवार्यार्कप्रभां ततः ॥ १-३३-१२ (१६१६)
विष्णुना च तदाकाशे वैनतेयः समेयिवान् ।
तस्य नारायणस्तुष्टस्तेनालौल्येन कर्मणा ॥ १-३३-१३ (१६१७)
तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् ।
स वव्रे तव तिष्ठेयमुपरीत्यन्तरिक्षगः ॥ १-३३-१४ (१६१८)
उवाच चैनं भूयोऽपि नारायणमिदं वचः ।
अजरश्चामरश्च स्याममृतेन विनाऽप्यहम् ॥ १-३३-१५ (१६१९)
सौतिरुवाच। १-३३-१६क्ष् (१४८)
एवमस्त्विति तं विष्णुरुवाच विनतासुतम् ।
प्रतिगृह्य वनौ तौ च गरुडो विष्णुमब्रवीत् ॥ १-३३-१६ (१६२०)
भवतेपि वरं दद्यां वृणोतु भगवानपि ।
तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम् ॥ १-३३-१७ (१६२१)
ध्वजं च चक्रे भगवानुपरि स्थास्यसीति तम् ।
एवमस्त्विति तं देवमुक्त्वा नारायणं खगः ॥ १-३३-१८ (१६२२)
वव्राज तरसा वेगाद्वायुं स्पर्धन्महाजवः ।
तं व्रजन्तं खगश्रेष्ठं वज्रेणेन्द्रोऽभ्यताडयत् ॥ १-३३-१९ (१६२३)
हरन्तममृतं रोषाद्गरुडं पक्षिणां वरम् ।
तमुवाचेन्द्रमाक्रन्दे गरुडः पततां वरः ॥ १-३३-२० (१६२४)
प्रहसञ्श्लक्ष्णया वाचा तथा वज्रसमाहतः ।
ऋषेर्मानं करिष्यामि वज्रं यस्यास्थिसंभवम् ॥ १-३३-२१ (१६२५)
वज्रस्य च करिष्यामि तवैव च शतक्रतो ।
एतत्पत्रं त्यजाम्येकं यस्यान्तं नोपलप्स्यसे ॥ १-३३-२२ (१६२६)
न च वज्रनिपातेन रुजा मेऽस्तीह काचन ।
एवमुक्त्वा ततः पुत्रमुत्ससर्ज स पक्षिराट् ॥ १-३३-२३ (१६२७)
तदुत्सृष्टमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
हृष्टानि सर्धभूतानि नाम चक्रुर्गरुत्मतः ॥ १-३३-२४ (१६२८)
सुरूपं पत्रमालक्ष्य सुपर्णोऽयं भवत्विति ।
तद्दृष्ट्वा महदाश्चर्यं सहस्राक्षः पुरंदरः ।
खगो महदिदं भूतमिति मत्वाऽभ्यभाषत ॥ १-३३-२५ (१६२९)
बलं विज्ञातुमिच्छामि यत्ते परमनुत्तमम् ।
सख्यं चानन्तमिच्छामि त्वया सह खगोत्तम ॥ ॥ १-३३-२६ (१६३०)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-३३-४ संक्षिप्य अणुतरं कृत्वा ॥

१-३३-१० तयोः अङ्गे देहौ आच्छिनत् खण्डशः कृतवान् ॥
१-३३-११ यन्त्रमुन्मथ्य अमृतं अमृतकुम्भं समुत्पाद्य
उत्पपातेत्यन्वयः ॥
१-३३-१२ आवार्य वारयित्वा तिरस्कृत्येत्यर्थः ॥
१-३३-१३ अलौल्येन अमृतपानलोभराहित्येन ॥
१-३३-१४ उपरि ध्वजे इत्यर्थः ॥
१-३३-१९ स्पर्धावानिवाचरतीति स्पर्धन् ॥
१-३३-२० आक्रन्दे कलकले ॥
१-३३-२१ ऋषेः दधीचेः ॥
त्रयस्त्रिंशोऽध्यायः ॥
३३ ॥

आदिपर्व - अध्याय ०३४
॥ श्रीः ॥
१.३४. अध्यायः ३४

Mahabharata - Adi Parva - Chapter Topics
इन्द्रस्य गरुडसख्यलाभः ॥ १ ॥
इन्द्राद्गरुडस्य वरलाभः ॥ २ ॥
विनताया दास्यमोचनम् ॥ ३ ॥
सर्पाणां द्विजिह्वत्वप्राप्तिः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-३४-० (१६३१)
सौतिरुवाच। १-३४-०क्ष् (१४९)
ग्इत्येवमुक्तो गरुडः प्रत्युवाच शचीपतिम्'। १-३४-१ (१६३२)
गरुड उवाच ।
सख्यं मेऽस्तु त्वया देव यथेच्छसि पुरंदर ।
बलं तु मम जानीहि महच्चासह्यमेव च ॥ १-३४-१क्ष् (१५०)
कामं नैतत्प्रशंसन्ति सन्तः स्वबलसंस्तवम् ।
ग्अनिमित्तं सुरश्रेष्ठ सद्यः प्राप्नोति गर्हणाम् ॥ १-३४-२ (१६३३)
गुणसंकीर्तनं चापि पृष्टेनान्येन गोपते ।
वक्तव्यं न तु वक्तव्यं स्वयमेव शतक्रतो ॥' १-३४-३ (१६३४)
सखेति कृत्वा तु सखे पृष्टो वक्ष्याम्यहं त्वया ।
न ह्यात्मस्तवसंयुक्तं वक्तव्यमनिमित्ततः ॥ १-३४-४ (१६३५)
सपर्वतवनामुर्वी ससागरजलामिमाम् ।

वहे पक्षेण वै शक्र त्वामप्यत्रावलम्बिनम् ॥१-३४-५ (१६३६)
सर्वान्संपिण्डितान्वापि लोकान्सस्थाणुजङ्गमान् ।
वहेयमपरिश्रान्तो विद्धीदं मे महद्बलम् ॥१-३४-६ (१६३७)
सौतिरुवाच।१-३४-७क्ष् (१५१)
इत्युक्तवचनं वीरं किरीटी श्रीमतां वरः ।
आह शौनक देवेन्द्रः सर्वलोकहितः प्रभुः ॥१-३४-७ (१६३८)
एवमेव यथात्थ त्वं सर्वं संभाव्यते त्वयि ।
संगृह्यतामिदानीं मे सख्यमत्यन्तमुत्तमम् ॥१-३४-८ (१६३९)
न कार्यं यदि सोमेन मम सोमः प्रदीयताम् ।
अस्मांस्ते हि प्रबाधेयुर्येभ्यो दद्याद्भवानिमम् ॥१-३४-९ (१६४०)
गरुड उवाच।१-३४-१०क्ष् (१५२)
किंचित्कारणमुद्दिश्य सोमोऽयं नीयते मया ।
न दास्यामि समापातुं सोमं कस्मैचिदप्यहम् ॥१-३४-१० (१६४१)
यत्रेमं तु सहस्राक्ष निक्षिपेयमहं स्वयम् ।
त्वमादाय ततस्तूर्णं हरेथास्त्रिदिवेश्वर ॥१-३४-११ (१६४२)
शक्र उवाच।१-३४-१२क्ष् (१५३)
वाक्येनानेन तुष्टोऽहं यत्त्वयोक्तमिहाण्डज ।
यमिच्छसि वरं मत्तस्तं गृहाण खगोत्तम ॥१-३४-१२ (१६४३)
सौतिरुवाच।१-३४-१३क्ष् (१५४)
इत्युक्तः प्रत्युवाचेदं कद्रूपुत्राननुस्मरन् ।
भवेयुर्भुजगाः शक्र मम भक्ष्या महाबलाः ॥१-३४-१३ (१६४४)
गरुड उवाच।१-३४-१४क्ष् (१५५)
ईशोऽहमपि सर्वस्य करिष्यामि तु तेऽर्थिताम् ।
भवेयुर्भुजगाः शक्र मम भक्ष्या महाबलाः ॥१-३४-१४ (१६४५)
सौतिरुवाच।१-३४-१५क्ष् (१५६)
तथेत्युक्त्वाऽन्वगच्छत्तं ततो दानवसूदनः ।
देवदेवं महात्मानं योगिनामीश्वरं हरिम् ॥१-३४-१५ (१६४६)
स चान्वमोदत्तं चार्थं यथोक्तं गरुडेन वै ।
इदं भूयो वचः प्राह भगवांस्त्रिदशेश्वरः ॥१-३४-१६ (१६४७)
हरिष्यामि विनिक्षिप्तं सोममित्यनुभाष्य तम् ।
आजगाम ततस्तूर्णं सुपर्णो मातुरन्तिकम् ॥१-३४-१७ (१६४८)
गविनयावनतो भूत्वा वचनं चेदमब्रवीत् ।
इदमानीतममृतं देवानां भवनान्मया ॥१-३४-१८ (१६४९)
प्रशाधि किमितो मातः करिष्यामि शुभव्रते। १-३४-१९ (१६५०)
विनतोवाच ।
परितुष्टाऽहमेतेन कर्मणा तव पुत्रक ॥ १-३४-१९क्ष् (१५७)

अजरश्चाभरश्चैव देवानां सुप्रियो भव। १-३४-२० (१६५१)
सौतिरुवाच।'
अथ सर्पानुवाचेदं सर्वान्परमहृष्टवत्। १-३४-२०क्ष् (१५८)
गरुड उवाच ।
इदमानीतममृतं निक्षेप्स्यामि कुशेषु वः ॥ १-३४-२०क्ष् (१५९)
स्नाता मङ्गलसंयुक्तास्ततः प्राश्नीत पन्नगाः ।
भवद्भिरिदमासीनैर्यदुक्तं तद्वचस्तदा ॥१-३४-२१ (१६५२)
अदासी चैव मातेयमद्यप्रभृति चास्तु मे ।
यथोक्तं भवतामेतद्वचो मे प्रतिपादितम् ॥१-३४-२२ (१६५३)
सौतिरुवाच।१-३४-२३क्ष् (१६०)
ततः स्नातुं गताः सर्पाः प्रत्युक्त्वा तं तथेत्युत ।
शक्रोऽप्यमृतमाक्षिप्य जगाम त्रिदिवं पुनः ॥१-३४-२३ (१६५४)
अथागतास्तमुद्देशं सर्पाः सोमार्थिनस्तदा ।
स्नाताश्च कुतजप्याश्च प्रहृष्टाः कृतमङ्गलाः ॥१-३४-२४ (१६५५)
ग्परस्परकृतद्वेषाः सोमप्राशनकर्मणि ।
अहं पूर्वमहं पूर्वमित्युक्त्वा ते समाद्रवन् ॥' १-३४-२५ (१६५६)
यत्रैतदमृतं चापि स्थापितं कुशसंस्तरे ।
तद्विज्ञाय हृतं सर्पाः प्रतिमायाकृतं च तत् ॥१-३४-२६ (१६५७)
सोमस्थानमिदं चेति दर्भांस्ते लिलिहुस्तदा ।
ततो द्विधा कृता जिह्वाः सर्पाणां तेन कर्मणा ॥१-३४-२७ (१६५८)
अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः ।
ग्नागाश्च वञ्चिता भूत्वा विसृज्य विनतां ततः ।
विषादमगमंस्तीव्रं गरुडस्य बलात्प्रभो ॥' १-३४-२८ (१६५९)
एवं तदमृतं तेन हृतमाहृतमेव च ।
द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना ॥१-३४-२९ (१६६०)
ततः सुपर्णः परमप्रहर्षवा-
न्विहृत्य मात्रा सह तत्र कानने ।
भुजंगभक्षः परमार्चितः खगै-
रहीनकीर्तिर्विनतामनन्दयत् ॥ १-३४-३० (१६६१)
इमां कथां यः शृणुयान्नरः सदा
पठेत वा द्विजगणमुख्यसंसदि ।
असंशयं त्रिदिवमियात्स पुण्यभा-
ङ्महात्मनः पतगपतेः प्रकीर्तनात् ॥ ॥ १-३४-३१ (१६६२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि चतुस्त्रिंशोऽध्यायः ॥३४ ॥

१-३४-६ संपिण्डितान् एकीकृतान् । स्थाणु स्थावरम् ॥
१-३४-७ किरीटी इन्द्रः ॥
१-३४-१३ उपधिकृतं छलकृतम् ॥
१-३४-१४ ईशः समर्थः । अर्थितां अन्यस्मै अमृतं न देयमित्यर्थेप्सुताम् ॥
१-३४-१७ अनुभाष्य हे गरुडेति संबोध्य ॥
१-३४-२० इदं वः युष्माकममृतं न तु मम ॥
१-३४-२६ प्रतिमायाकृतं यथा दास्यं मायाकृतं तथा अमृतदानमपि
इतरेण कृतमित्यर्थः ॥
चतुस्त्रिंशोऽध्यायः ॥
३४ ॥

आदिपर्व - अध्याय ०३५
॥ श्रीः ॥
१.३५. अध्यायः ३५

Mahabharata - Adi Parva - Chapter Topics
सर्पनामकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३५-० (१६६३)
शौनक उवाच। १-३५-०क्ष् (१६१)
भुजङ्गमानां शापस्य मात्रा चैव सुतेन च ।
विनतायास्त्वया प्रोक्तं कारणं सूतनन्दन ॥ १-३५-१ (१६६४)
वरप्रदानं भर्त्रा च कद्रूविनतयोस्तथा ।
नामनी चैव ते प्रोक्ते पक्षिणोर्वैनतेययोः ॥ १-३५-२ (१६६५)
पन्नगानां तु नामानि न कीतर्यसि सूतज ।
प्राधान्येनापि नामानि श्रोतुमिच्छामहे वयम् ॥ १-३५-३ (१६६६)
सौतिरुवाच। १-३५-४क्ष् (१६२)
बहुत्वान्नामधेयानि पन्नगानां तपोधन ।
न कीर्तयिष्ये सर्वेषां प्राधान्येन तु मे शृणु ॥ १-३५-४ (१६६७)
शेषः प्रथमतो जातो वासुकिस्तदनन्तरम् ।
ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ ॥ १-३५-५ (१६६८)
कालियो मणिनागश्च नागश्चापूरणस्तथा ।
नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः ॥ १-३५-६ (१६६९)
नीलानीलौ तथा नागौ कल्माषशबलौ तथा ।

आर्यकश्चोग्रकश्चैव नागः कलशपोतकः ॥ १-३५-७ (१६७०)
सुमनाख्यो दधिमुखस्तथा विमलपिण्डकः ।
आप्तः कोटरकश्चैव शङ्खो वालिशिखस्तथा ॥ १-३५-८ (१६७१)
निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा ।
बाह्यकर्णो हस्तिपदस्तथा मुद्गरपिण्डकः ॥ १-३५-९ (१६७२)
कम्बलाश्वतरौ चापि नागः कालीयकस्तथा ।
वृत्तसंवर्तकौ नागौ द्वौ च पद्माविति श्रुतौ ॥ १-३५-१० (१६७३)
नागः शङ्खमुखश्चैव तथा कूष्माण्डकोऽपरः ।
क्षेमकश्च तथा नागो नागः पिण्डारकस्तथा ॥ १-३५-११ (१६७४)
करवीरः पुष्पदंष्ट्रो बिल्वको बिल्वपाण्डुरः ।
मूषकादः शङ्खशिराः पूर्णभद्रो हरिद्रकः ॥ १-३५-१२ (१६७५)
अपराजितो ज्योतिकश्च पन्नगः श्रीवहस्तथा ।
कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्यवान् ॥ १-३५-१३ (१६७६)
विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्यवान् ।
हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः ॥ १-३५-१४ (१६७७)
कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः ।
कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा ॥ १-३५-१५ (१६७८)
कर्दमश्च महानागो नागश्च बहुमूलकः ।
कर्कराकर्करौ नागौ कुण्डोदरमहोदरौ ॥ १-३५-१६ (१६७९)
एते प्राधान्यतो नागाः कीर्तिता द्विजसत्तम ।
बहुत्वान्नामधेयानामितरे नानुकीर्तिताः ॥ १-३५-१७ (१६८०)
एतेषां प्रसवो यश्च प्रसवस्य च संततिः ।
असङ्ख्येयेति मत्त्वा तान्न ब्रवीमि तपोधन ॥ १-३५-१८ (१६८१)
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
अशक्यान्येव सङ्ख्यातुं पन्नगानां तपोधन ॥ ॥ १-३५-१९ (१६८२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-३५-१ भुजङ्गमानां मात्रा शापो दत्तस्तस्य कारणं अवज्ञया
मातुराज्ञाकारित्वं । विनतायाः सुतेन अरुणेन शापो दत्तस्तस्य कारणं
सपत्नीर्ष्या ॥
पञ्चत्रिंशोऽध्यायः ॥
३५ ॥

आदिपर्व - अध्याय ०३६
॥ श्रीः ॥

१.३६. अध्यायः ३६

Mahabharata - Adi Parva - Chapter Topics
शेषस्य ब्रह्मणो वरलाभः पृथ्वीधारणाज्ञा च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३६-० (१६८३)
शौन उवाच। १-३६-०क्ष् (१६३)
आख्याता भुजगास्तात वीर्यवन्तो दुरासदाः ।
शापं तं तेऽभिविज्ञाय कृतवन्तः किमुत्तरम् ॥ १-३६-१ (१६८४)
सौतिरुवाच। १-३६-२क्ष् (१६४)
तेषां तु भगवाञ्छेषः कद्रूं त्यक्त्वा महायशाः ।
उग्रं तपः समातस्थे वायुभक्षो यतव्रतः ॥ १-३६-२ (१६८५)
गन्धमादनमासाद्य बदर्यां च तपोरतः ।
गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे ॥ १-३६-३ (१६८६)
तेषु तेषु च पुण्येषु तीर्थेष्वायतनेषु च ।
एकान्तशीलो नियतः सततं विजितेन्द्रियः ॥ १-३६-४ (१६८७)
तप्यमानं तपो घोरं तं ददर्श पितामहः ।
संशुष्कमांसत्वक्स्नायुं जटाचीरधरं मुनिम् ॥ १-३६-५ (१६८८)
तमब्रवीत्सत्यधृतिं तप्यमानं पितामहः ।
किमिदं कुरुषे शेष प्रजानां स्वस्ति वै कुरु ॥ १-३६-६ (१६८९)
त्वं हि तीव्रेण तपसा प्रजास्तापयसेऽनघ ।
ब्रूहि कामं च मे शेष यस्ते हृदि व्यवस्थितः ॥ १-३६-७ (१६९०)
शेष उवाच। १-३६-८क्ष् (१६५)
सोदर्या मम सर्वे हि भ्रातरो मन्दचेतसः ।
सह तैर्नोत्सहे वस्तुं तद्भवाननुमन्यताम् ॥ १-३६-८ (१६९१)
अभ्यसूयन्ति सततं परस्परममित्रवत् ।
ततोऽहं तप आतिष्ठे नैतन्पश्येयमित्युत ॥ १-३६-९ (१६९२)
न मर्षयन्ति ससुतां सततं विनतां च ते ।
अस्माकं चापरो भ्राता वैनतेयोऽन्तरिक्षगः ॥ १-३६-१० (१६९३)
तं च द्विषन्ति सततं स चापि बलवत्तरः ।
वरप्रदानात्स पितुः कश्यपस्य महात्मनः ॥ १-३६-११ (१६९४)
सोऽहं तपः समास्थाय मोक्ष्यामीदं कलेवरम् ।
कथं मे प्रेत्यभावेऽपि न तैः स्यात्सह सङ्गमः ॥ १-३६-१२ (१६९५)
तमेवं वादिनं शेषं पितामह उवाच ह ।

जानामि शेष सर्वेषां भ्रातॄणां ते विचेष्टितम् ॥१-३६-१३ (१६९६)
मातुश्चाप्यपराधाद्धि भ्रातॄणां ते महद्भयम् ।
कृतोऽत्र परिहारश्च पूर्वमेव भुजङ्गम ॥१-३६-१४ (१६९७)
भ्रातॄणां तव सर्वेषां न शोकं कर्तुमर्हसि ।
वृणीष्व च वरं मत्तः शेष यत्तेऽभिकाङ्क्षितम् ॥१-३६-१५ (१६९८)
दास्यामि हि वरं तेऽद्य प्रीतिर्मे परमा त्वयि ।
दिष्ट्या बुद्धिश्च ते धर्मे निविष्टा पन्नगोत्तम ।
भूयो भूयश्च ते बुद्धिर्धर्मे भवतु सुस्थिरा ॥ १-३६-१६ (१६९९)
शेष उवाच। १-३६-१६क्ष् (१६६)
एष एव वरो देव काङ्क्षितो मे पितामह ।
धर्मे मे रमतां बुद्धिः शमे तपसि चेश्वर ॥१-३६-१७ (१७००)
ब्रह्मोवाच। १-३६-१८क्ष् (१६७)
प्रीतोऽस्म्यनेन ते शेष दमेन च शमेन च ।
त्वया त्विदं वचः कार्यं मन्नियोगात्प्रजाहितम् ॥१-३६-१८ (१७०१)
इमां महीं शैलवनोपपन्नां
ससागरग्रामविहारपत्तनाम्
त्वं शेष सम्यक् चलितां यथाव-
त्संगृह्य तिष्ठस्व यथाऽचला स्यात् ॥ १-३६-१९ (१७०२)
शेष उवाच। १-३६-२०क्ष् (१६८)
यथाऽऽह देवो वरदः प्रजापति-
र्महीपतिर्भूतपतिर्जगत्पतिः ।
तथा महीं धारयिताऽस्मि निश्चलां
प्रयच्छतां मे विवरं प्रजापते ॥ १-३६-२० (१७०३)
ब्रह्मोवाच। १-३६-२१क्ष् (१६९)
अधो महीं गच्छ भुजङ्गमोत्तम
स्वयं तवैषा विवरं प्रदास्यति ।
इमां धरां धारयता त्वया हि मे
महत्प्रियं शेष कृतं भविष्यति ॥ १-३६-२१ (१७०४)
सौतिरुवाच। १-३६-२२क्ष् (१७०)
तथैव कृत्वा विवरं प्रविश्य स
प्रभुर्भुवो भुजगवराग्रजः स्थितः ।
बिभर्ति देवीं शिरसा महीमिमां
समुद्रनेमिं परिगृह्य सर्वतः ॥ १-३६-२२ (१७०५)
ब्रह्मोवाच। १-३६-२३क्ष् (१७१)
शेषोऽसि नागोत्तम धर्मदेवो
महीमिमां धारयसे यदेकः ।

अनन्तभोगैः परिगृह्य सर्वां
यथाहमेवं बलभिद्यथा वा ॥ १-३६-२३ (१७०६)
सौतिरुवाच। १-३६-२४क्ष् (१७२)
अधो भूमौ वसत्येवं नागोऽनन्तः प्रतापवान् ।
धारयन्वसुधामेकः शासनाद्ब्रह्मणो विभोः ॥ १-३६-२४ (१७०७)
सुपर्णं च सहायं वै भगवानमरोत्तमः ।
प्रादादनन्ताय तदा वैनतेयं पितामहः ॥ १-३६-२५ (१७०८)
'अनन्तेऽभिप्रयाते तु वासुकिः स महाबलः ।
अभ्यषिच्यत नागैस्तु दैवतैरिव वासवः ॥' ॥ १-३६-२६ (१७०९)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि षट्त्रिंशोऽध्यायः ॥ ३७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-३६-१ उत्तरं अनन्तरम् ॥
१-३६-२३ अनन्तभोगैः अनन्तफणाभिः ॥
षट्त्रिंशोऽध्यायः ॥
३६ ॥

आदिपर्व - अध्याय ०३७
॥ श्रीः ॥
१.३७. अध्यायः ३७

Mahabharata - Adi Parva - Chapter Topics
मातृशापपरिहारार्थं सर्पाणां मन्त्रालोचनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३७-० (१७१०)
सौतिरुवाच। १-३७-०क्ष् (१७३)
मातुः सकाशात्तं शापं श्रुत्वा वै पन्नगोत्तमः ।
वासुकिश्चिन्तयामास शापोऽयं न भवेत्कथम् ॥ १-३७-१ (१७११)
ततः स मन्त्रयामास भ्रातृभिः सह सर्वशः ।
ऐरावतप्रभृतिभिः सर्वैर्धर्मपरायणैः ॥ १-३७-२ (१७१२)
वासुकिरुवाच। १-३७-३क्ष् (१७४)
अयं शापो यथोद्दिष्टो विदितं वस्तथाऽनघाः ।
तस्य शापस्य मोक्षार्थं मन्त्रयित्वा यतामहे ॥ १-३७-३ (१७१३)
सर्वेषामेव शापानां प्रतिघातो हि विद्यते ।

न तु मात्राऽभिशप्तानां मोक्षः क्वचन विद्यते ॥ १-३७-४ (१७१४)
अव्ययस्याप्रमेयस्य सत्यस्य च तथाग्रतः ।
शप्ता इत्येव मे श्रुत्वा जायते हृदि वेपथुः ॥ १-३७-५ (१७१५)
नूनं सर्वविनाशोऽयमस्माकं समुपागतः ।
ग्शापः सृष्टो महाघोरो मात्रा खल्वविनीतया ।
न ह्येतां सोऽव्ययो देवः शपन्तीं प्रत्यषेधयत् ॥ १-३७-६ (१७१६)
तस्मात्संमन्त्रयामोऽद्य भुजङ्गानामनामयम् ।
यथा भवेद्धि सर्वेषां मा नः कालोऽत्यगादयम् ॥ १-३७-७ (१७१७)
सर्व एव हि नस्तावद्बुद्धिमन्तो विचक्षणाः ।
अपि मन्त्रयमाणा हि हेतुं पश्याम मोक्षणे ॥ १-३७-८ (१७१८)
यथा नष्टं पुरा देवा गूढमग्निं गुहागतम् ।
यथा स यज्ञो न भवेद्यथा वाऽपि पराभवः ।
जनमेजयस्य सर्पाणां विनाशकरणाय वै ॥ १-३७-९ (१७१९)
सौतिरुवाच। १-३७-१०क्ष् (१७५)
तथेत्युक्त्वा ततः सर्वे काद्रवेयाः समागताः ।
समयं चक्रिरे तत्र मन्त्रबुद्धिविशारदाः ॥ १-३७-१० (१७२०)
एके तत्राब्रुवन्नागा वयं भूत्वा द्विजर्षभाः ।
जनमेजयं तु भिक्षामो यज्ञस्ते न भवेदिति ॥ १-३७-११ (१७२१)
अपरे त्वब्रुवन्नागास्तत्र पण्डितमानिनः ।
मन्त्रिणोऽस्य वयं सर्वे भविष्यामः सुसंमताः ॥ १-३७-१२ (१७२२)
स नः प्रक्ष्यति सर्वेषु कार्येष्वर्थविनिश्चयम् ।
तत्र बुद्धिं प्रदास्यामो यथा यज्ञो निवर्त्स्यति ॥ १-३७-१३ (१७२३)
स नो बहुमतान्राजा बुद्ध्या बुद्धिमतां वरः ।
यज्ञार्थं प्रक्ष्यति व्यक्तं नेति वक्ष्यामहे वयम् ॥ १-३७-१४ (१७२४)
दर्शयन्तो बहून्दोषान्प्रेत्य चेह च दारुणान् ।
हेतुभिः कारणैश्चैव यथा यज्ञो भवेन्न सः ॥ १-३७-१५ (१७२५)
अथवा य उपाध्यायः क्रतोस्तस्य भविष्यति ।
सर्पसत्रविधानज्ञो राजकार्यहिते रतः ॥ १-३७-१६ (१७२६)
तं गत्वा दशतां कश्चिद्भुजङ्गः स मरिष्यति ।
तस्मिन्मृते यज्ञकारे क्रतुः स न भविष्यति ॥ १-३७-१७ (१७२७)
ये चान्ये सर्पसत्रज्ञा भविष्यन्त्यस्य चर्त्विजः ।
तांश्च सर्वान्दशिष्यामः कृतमेवं भविष्यति ॥ १-३७-१८ (१७२८)
अपरे त्वब्रुवन्नागा धर्मात्मानो दयालवः ।
अबुद्धिरेषा भवतां ब्रह्महत्या न शोभनम् ॥ १-३७-१९ (१७२९)
सम्यक्सद्धर्ममूला वै व्यसने शान्तिरुत्तमा ।
अधर्मोत्तरता नाम कृत्स्नं व्यापादयेज्जगत् ॥ १-३७-२० (१७३०)

अपरे त्वब्रुवन्नागाः समिद्धं जातवेदसम् ।
वर्षैर्निर्वापयिष्यामो मेघा भूत्वा सविद्युतः ॥ १-३७-२१ (१७३१)
स्रुग्भाण्डं निशि गत्वा च अपरे भुजगोत्तमाः ।
प्रमत्तानां हरन्त्वाशु विघ्न एवं भविष्यति ॥ १-३७-२२ (१७३२)
यज्ञे वा भुजगास्तस्मिञ्शतशोऽथ सहस्रशः ।
जनान्दशन्तु वै सर्वे नैवं त्रासो भविष्यति ॥ १-३७-२३ (१७३३)
अथवा संस्कृतं भोज्यं दूषयन्तु भुजङ्गमाः ।
स्वेन मूत्रपुरीषेण सर्वभोज्यविनाशिना ॥ १-३७-२४ (१७३४)
अपरे त्वब्रुवंस्तत्र ऋत्विजोऽस्य भवामहे ।
यज्ञविघ्नं करिष्यामो दक्षिणा दीयतामिति ॥ १-३७-२५ (१७३५)
वश्यतां च गतोऽसौ नः करिष्यति यथेप्सितम् ।
अपरे त्वब्रुवंस्तत्र जले प्रक्रीडितं नृपम् ॥ १-३७-२६ (१७३६)
गृहमानीय बध्नीमः क्रतुरेवं भवेन्न सः ।
अपरे त्वब्रुवंस्तत्र नागाः पण्डितमानिनः ॥ १-३७-२७ (१७३७)
दशामस्तं प्रगृह्याशु कृतमेवं भविष्यति ।
छिन्नं मूलमनर्थानां मृते तस्मिन्भविष्यति ॥ १-३७-२८ (१७३८)
एषा नो नैष्ठिकी बुद्धिः सर्वेषामीक्षणश्रवः ।
अथ यन्मन्यसे राजन्हितं तत्संविधीयताम् ॥ १-३७-२९ (१७३९)
इत्युक्त्वा समुदैक्षन्त वासुकिं पन्नगोत्तमम् ।
वासुकिश्चापि संचिन्त्य तानुवाच भुजङ्गमान् ॥ १-३७-३० (१७४०)
नैषा वो नैष्ठिकी बुद्धिर्मता कर्तुं भुजङ्गमाः ।
सर्वेषामेव मे बुद्धिः पन्नगानां न रोचते ॥ १-३७-३१ (१७४१)
किं तत्र संविधातव्यं भवतां स्याद्धितं तु यत् ।
श्रेयः प्रसादनं मन्ये कश्यपश्य महात्मनः ॥ १-३७-३२ (१७४२)
ज्ञातिवर्गस्य सौहार्दादात्मनश्च भुजङ्गमाः ।
न च जानाति मे बुद्धिः किंचित्कर्तुं वचो हिवः ॥ १-३७-३३ (१७४३)
मया हीदं विधातव्यं भवतां यद्धितं भवेत् ।
अनेनाहं भृशं तप्ये गुणदोषौ मदाश्रयौ ॥ ॥ १-३७-३४ (१७४४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-३७-५ सत्यस्य सत्यलोकाधिपतेर्ब्रह्मणः ॥
१-३७-१० मन्त्रबुद्धिविशारदाः नीतिनिश्चयनिपुणाः ॥
१-३७-१३ निवर्त्स्यति निवृत्तो भविष्यति ॥
१-३७-१८ कृतं प्रतिकृतम् ॥

१-३७-२० व्यसने आपदि शान्तिः आपन्नाशः ।सद्धर्ममूला सतां धर्मो देवब्राह्मणप्रार्थना तन्मूला ॥
१-३७-२९ नैष्ठिकी आत्यन्तिकी ।ईक्षणमेव श्रवः श्रोत्रं यस्य स तथाभूत हे वासुके ॥
१-३७-३१ ज्ञातिरक्षानाशनिमित्तौ गुणदोषौ मदाश्रयौ ज्येष्ठत्वान्ममेत्यर्थः ॥
सप्तत्रिंशोऽध्यायः ॥
३७ ॥

आदिपर्व - अध्याय ०३८
॥ श्रीः ॥
१.३८. अध्यायः ३८

Mahabharata - Adi Parva - Chapter Topics
एलापत्रभाषणम् ॥ १ ॥
देवब्रह्मसंवादमुखेनास्तीकोत्पत्तिकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-३८-० (१७४५)
सौतिरुवाच।१-३८-०क्ष् (१७६)
सर्पाणां तु वचः श्रुत्वा सर्वेषामिति चेति च ।
वासुकेश्च वचः श्रुत्वा एलापत्रोऽब्रवीदिदम् ॥१-३८-१ (१७४६)
ग्प्रागेव दर्शिता बुद्धिर्मयैषा भुजगोत्तमाः ।
हेयेति यदि वो बुद्धिस्तवापि च तथा प्रभो ॥१-३८-२ (१७४७)
अस्तु कामं मभाद्यापि बुद्धिः स्मरणमागता ।
तां शृणुध्वं प्रवक्ष्यामि याथातथ्येन पन्नगाः ॥' १-३८-३ (१७४८)
न स यज्ञो न भविता न स राजा तथाविधः ।
जनमेजयः पाण्डवेयो यतोऽस्माकं महद्भयम् ॥१-३८-४ (१७४९)
दैवेनोपहतो राजन्यो भवेदिह पूरुषः ।
स दैवमेवाश्रयेत नान्यत्तत्र परायणम् ॥१-३८-५ (१७५०)
तदिदं चैवमस्माकं भयं पन्नगसत्तमाः ।
दैवमेवाश्रयामोऽत्र शृणुध्वं च वचो मम ॥१-३८-६ (१७५१)
अहं शापे समुत्सृष्टे समश्रौषं वचस्तदा ।
मातुरुत्सङ्गमारूढो भयात्पन्नगसत्तमाः ।
देवानां पन्नगश्रेष्ठास्तीक्ष्णास्तीक्ष्ण इति प्रभो ॥ १-३८-७ (१७५२)
ग्शापदुःखाग्नितप्तानां पन्नगानामनामयम् ।

कृपया परयाऽऽविष्टाः प्रार्थयन्तो दिवौकसः ॥' १-३८-८ (१७५३)
देवा ऊचुः। १-३८-९क्ष् (१७७)
का हि लब्ध्वा प्रियान्पुत्राञ्शपेदेवं पितामह ।
ऋते कद्रूं तीक्ष्णरूपां देवदेव तवाग्रतः ॥ १-३८-९ (१७५४)
तथेति च वचस्तस्यास्त्वयाप्युक्तं पितामह ।
इच्छाम एतद्विज्ञातुं कारणं यन्न वारिता ॥ १-३८-१० (१७५५)
ब्रह्मोवाच। १-३८-११क्ष् (१७८)
बहवः पन्नगास्तीक्ष्णा घोररूपा विषोल्बणाः ।
प्रजानां हितकामोऽहं न च वारितवांस्तदा ॥ १-३८-११ (१७५६)
ये दन्दशूकाः क्षुद्राश्च पापाचारा विषोल्बणाः ।
तेषां विनाशो भविता न तु ये धर्मचारिणः ॥ १-३८-१२ (१७५७)
यन्निमित्तं च भविता मोक्षस्तेषां महाभयात् ।
पन्नगानां निबोधध्वं तस्मिन्काले समागते ॥ १-३८-१३ (१७५८)
यायावरकुले धीमान्भविष्यति महानृषिः ।
जरत्कारुरिति ख्यातस्तपस्वी नियतेन्द्रियः ॥ १-३८-१४ (१७५९)
तस्य पुत्रो जरत्कारोर्भविष्यति तपोधनः ।
आस्तीको नाम यज्ञं स प्रतिषेत्स्यति तं तदा ।
तत्र मोक्ष्यन्ति भुजगा ये भविष्यन्ति धार्मिकाः ॥ १-३८-१५ (१७६०)
देवा ऊचुः। १-३८-१६क्ष् (१७९)
स मुनिप्रवरो ब्रह्मञ्जरत्कारुर्महातपाः ।
कस्यां पुत्रं महात्मानं जनयिष्यति वीर्यवान् ॥ १-३८-१६ (१७६१)
ब्रह्मोवाच। १-३८-१७क्ष् (१८०)
ग्वासुकेर्भगिनी कन्या समुत्पन्ना सुशोभना ।
तस्मै दास्यति तां कन्यां वासुकिर्भुजगोत्तमः ॥ १-३८-१७ (१७६२)
तस्यां जनयिता पुत्रं वेदवेदाङ्गपारगम्।'
सनामायां सनामा स कन्यायां द्विजसत्तमः ॥ १-३८-१८ (१७६३)
एलापत्र उवाच। १-३८-१९क्ष् (१८१)
एवमस्त्विति तं देवाः पितामहमथाब्रुवन् ।
उत्क्वैवं वचनं देवान्विरिञ्चिस्त्रिदिवं ययौ ॥ १-३८-१९ (१७६४)
सोऽहमेवं प्रपश्यामि वासुके भगिनी तव ।
जरत्कारुरिति ख्याता तां तस्मै प्रतिपादय ॥ १-३८-२० (१७६५)
भैक्षवद्भिक्षमाणाय नागानां भयशान्तये ।
ऋषये सुव्रतायैनामेष मोक्षः श्रुतो मया ॥ ॥ १-३८-२१ (१७६६)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

१-३८-१ इतिचेतिचेति तत्तद्वचनाभिनयप्रदर्शनम् ॥
१-३८-४ न भवितेति न भवितैवेत्यर्थः । न तथाविधः यस्य राष्ट्रमृत्विजः स्वरूप वा द्रष्टुं शक्यं तादृशो न भवति मन्त्रवीर्यसंपन्नत्वात् ॥
१-३८-७ तीक्ष्णास्तीक्ष्णाः अत्यन्तं तीक्ष्णाः स्त्रिय इति शेषः ॥
१-३८-१२ दन्दशूकाः दंशनशीलाः । क्षुद्राः अल्पेपि निमित्ते प्राणग्राहकाः ॥
अष्टत्रिंशोऽध्यायः ॥
३८ ॥

आदिपर्व - अध्याय ०३९
॥ श्रीः ॥
१.३९. अध्यायः ३९

Mahabharata - Adi Parva - Chapter Topics
एलापत्रोपदेशेन वासुकिभगिन्या जरत्कार्वा रक्षणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-३९-० (१७६७)
सौतिरुवाच । १-३९-०क्ष् (१८२)
एलापत्रवचः श्रुत्वा ते नागा द्विजसत्तम ।
सर्वे प्रहृष्टमनसः साधुसाध्वित्यपूजयन् ॥ १-३९-१ (१७६८)
ततःप्रभृति तां कन्यां वासुकिः पर्यरक्षत ।
जरत्कारुं स्वसारं वै परं हर्षमवाप च ॥ १-३९-२ (१७६९)
ततो नातिमहान्कालः समतीत इवाभवत् ।
अथ देवासुराः ग्सर्वे ममन्थुर्वरुणालयम् ॥ १-३९-३ (१७७०)
तत्र नेत्रमभून्नागो वासुकिर्बलिनां वरः ।
समाप्यैव च तत्कर्म पितामहमुपागमन् ॥ १-३९-४ (१७७१)
देवा वासुकिना सार्धं पितामहमथाब्रुवन् ।
भगवञ्शापभीतोऽयं वासुकिस्तप्यते भृशम् ॥ १-३९-५ (१७७२)
अस्यैतन्मानसं शल्यं समुद्धर्तुं त्वमर्हसि ।
जनन्याः शापजं देव ज्ञातीनां हितमिच्छतः ॥ १-३९-६ (१७७३)
हितो ह्ययं सदास्मकं प्रियकारी च नागराट् ।
प्रसादं कुरु देवेश शमयास्य मनोज्वरम् ॥ १-३९-७ (१७७४)
ब्रह्मोवाच । १-३९-८क्ष् (१८३)
मयैव तद्वितीर्णं वै वचनं मनसाऽमराः ।

एलापत्रेण नागेन यदस्याभिहितं पुरा ॥ १-३९-८ (१७७५)
तत्करोत्वेष नागेन्द्रः प्राप्तकालं वचः स्वयम् ।
विनशिष्यन्ति ये पापा न तु ये धर्मचारिणः ॥ १-३९-९ (१७७६)
उत्पन्नः स जरत्कारुस्तपस्युग्रे रतो द्विजः ।
तस्यैष भगिनीं काले जरत्कारुं प्रयच्छतु ॥ १-३९-१० (१७७७)
एलापत्रेण यत्प्रोक्तं वचनं भुजगेन ह ।
पन्नगानां हितं देवास्तत्तथा न तदन्यथा ॥ १-३९-११ (१७७८)
सौतिरुवाच । १-३९-१२क्ष् (१८४)
एतच्छ्रुत्वा तु नागेन्द्रः पितामहवचस्तदा ।
संदिश्य पन्नगान्सर्वान्वासुकिः शापमोहितः ॥ १-३९-१२ (१७७९)
स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति ।
सर्पान्बहूञ्जरत्कारौ नित्ययुक्तान्समादधत् ॥ १-३९-१३ (१७८०)
जरत्कारुर्यदा भार्यामिच्छेद्वरयितुं प्रभुः ।
शीघ्रमेत्य तदाऽऽख्येयं तन्नः श्रेयो भविष्यति ॥ ॥ १-३९-१४ (१७८१)

इति श्रीमनमहाभारते आदिपर्वणि आस्तीकपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-३९-४ नेत्रं रज्जुः ॥
१-३९-१३ जरत्कारौ जरत्कारुऋषिनिमित्तं । तदन्वेषणायेत्यर्थः ॥
एकोनचत्वारिंशोऽध्यायः ॥
३९ ॥

आदिपर्व - अध्याय ०४०
॥ श्रीः ॥
१.४०. अध्यायः ४०

Mahabharata - Adi Parva - Chapter Topics
जरत्कारुनामव्युत्पत्तिकथनम् ॥ १ ॥
शौनकस्य सौतिं प्रति आस्तीकोत्पत्तिप्रश्नः ॥ २ ॥
प्रसङ्गेन परीक्षिन्मृगयाकथनम् ॥ ३ ॥
परीक्षिता शमीकस्कन्धे मृतसर्पनिधानम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-४०-० (१७८२)

शौनक उवाच। १-४०-०क्ष् (१८५)
जरत्कारुरिति ख्यातो यस्त्वया सूतनन्दन ।
इच्छामि तदहं श्रोतुं ऋषेस्तस्य महात्मनः ॥ १-४०-१ (१७८३)
किं कारणं जरत्कारोर्नामैतत्प्रथितं भुवि ।
जरत्कारुनिरुक्तिं त्वं यथावद्वक्तुमर्हसि ॥ १-४०-२ (१७८४)
सौतिरुवाच। १-४०-३क्ष् (१८६)
जरेति क्षयमाहुर्वै दारुणं कारुसंज्ञितम् ।
शरीरं कारु तस्यासीत्तत्स धीमाञ्शनैःशनैः ॥ १-४०-३ (१७८५)
क्षपयामास तीव्रेण तपसेत्यत उच्यते ।
जरत्कारुरिति ब्रह्मन्वासुकेर्भगिनी तथा ॥ १-४०-४ (१७८६)
एवमुक्तस्तु धर्मात्मा शौनकः प्राहसत्तदा ।
उग्रश्रवसमामन्त्र्य उपपन्नमिति ब्रुवन् ॥ १-४०-५ (१७८७)
शौनक उवाच। १-४०-६क्ष् (१८७)
उक्तं नाम यथा पूर्वं सर्वं तच्छ्रुतवानहम् ।
यथा तु जातो ह्यास्तीक एतदिच्छामि वेदितुम् ।
तच्छ्रुत्वा वचनं तस्य सौतिः प्रोवाच शास्त्रतः ॥ १-४०-६ (१७८८)
सौतिरुवाच। १-४०-७क्ष् (१८८)
संदिश्य पन्नगान्सर्वान्वासुकिः सुसमाहितः ।
स्वसारमुद्यम्य तदा जरत्कारुमृषिं प्रति ॥ १-४०-७ (१७८९)
अथ कालस्य महतः स मुनिः संशितव्रतः ।
तपस्यभिरतो धीमान्स दारान्नाभ्यकाङ्क्षत ॥ १-४०-८ (१७९०)
स तूर्ध्वरेतास्तपसि प्रसक्तः
स्वाध्यायवान्वीतभयः कृतात्मा ।
चचार सर्वां पृथिवीं महात्मा
न चापि दारान्मनसाध्यकाङ्क्षत् ॥ १-४०-९ (१७९१)
ततोऽपरस्मिन्संप्राप्ते काले कस्मिंश्चिदेव तु ।
परिक्षिन्नाम राजासीद्ब्रह्मन्कौरववंशजः ॥ १-४०-१० (१७९२)
यथा पाण्डुर्महाबाहुर्धनुर्धरवरो युधि ।
बभूव मृगयाशीलः पुरास्य प्रपितामहः ॥ १-४०-११ (१७९३)
ग्तथा विख्यातवाँल्लोके परीक्षिदभिमन्युजः।'
मृगान्विध्यन्वराहांश्च तरक्षून्महिषांस्तथा ।
अन्यांश्च विविधान्वन्यांश्चचार पृथिवीपतिः ॥ १-४०-१२ (१७९४)
स कदाचिन्मृगं विद्ध्वा बाणेनानतपर्वणा ।
पृष्ठतो धनुरादाय ससार गहने वने ॥ १-४०-१३ (१७९५)
यथैव भगवान्रुद्रो विद्ध्वा यज्ञमृगं दिवि ।
अन्वगच्छद्धनुष्पाणिः पर्यन्वेष्टुमितस्ततः ॥ १-४०-१४ (१७९६)

न हि तेन मृगो विद्धो जीवन्गच्छति वै वने ।
पूर्वरूपं तु तत्तूर्णं तस्यासीत्स्वर्गतिं प्रति ॥१-४०-१५ (१७९७)
परिक्षितो नरेन्द्रस्य विद्धो यन्नष्टवान्मृगः ।
दूरं चापहृतस्तेन मृगेण स महीपतिः ॥१-४०-१६ (१७९८)
परिश्रान्तः पिपासार्त आससाद मुनिं वने ।
गवां प्रचारेष्वासीनं वत्सानां मुखनिःसृतम् ॥१-४०-१७ (१७९९)
भूयिष्ठमुपयुञ्जानं फेनमापिबतां पयः ।
तमभिद्रुत्य वेगेन स राजा संशितव्रतम् ॥१-४०-१८ (१८००)
अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छ्रमान्वितः ।
भोभो ब्रह्मन्नहं राजा परीक्षिदभिमन्युजः ॥१-४०-१९ (१८०१)
मया विद्धो मृगो नष्टः कच्चित्तं दृष्टवानसि ।
स मुनिस्तं तु नोवाच किंचिन्मौनव्रते स्थितः ॥१-४०-२० (१८०२)
तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासजत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत ॥१-४०-२१ (१८०३)
न स किंचिदुवाचैनं शुभं वा यदि वाऽशुभम् ।
स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतम् ।
दृष्ट्वा जगाम नगरमृषिस्त्वासीत्तथैव सः ॥ १-४०-२२ (१८०४)
न हि तं राजशार्दूलं क्षमाशीलो महामुनिः ।
स्वधर्मनिरतं भूपं समाक्षिप्तोऽप्यधर्षयत् ॥१-४०-२३ (१८०५)
न हि तं राजशार्दूलस्तथा धर्मपरायणम् ।
जानाति भरतश्रेष्ठस्तत एनमधर्षयत् ॥१-४०-२४ (१८०६)
तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः ।
शृङ्गी नाम महाक्रोधो दुष्पसादोमहाव्रतः ॥१-४०-२५ (१८०७)
स देवं परमासीनं सर्वभूतहिते रतम् ।
ब्रह्माणमुपतस्थे वै काले काले सुंसयतः ॥१-४०-२६ (१८०८)
सतेन समनुज्ञातो ब्रह्मणा गृहमेयिवान् ।
सख्योक्तः क्रीडमानेन स तत्र हसता किल ॥१-४०-२७ (१८०९)
संरम्भात्कोपनोऽतीव विषकल्पो मुनेः सुतः ।
उद्दिश्य पितरं तस्य यच्छ्रुत्वा रोषमाहरत् ।
ऋषिपुत्रेण नर्मार्थे कृशेन द्विजसत्तम ॥ १-४०-२८ (१८१०)
कृश उवाच।१-४०-२९क्ष् (१८९)
तेजस्विनस्तव पिता तथैव च तपस्विनः ।
शवं स्कन्धेन वहति मा शृङ्गिन्गर्वितो भव ॥१-४०-२९ (१८११)
व्याहरत्स्वृषिपुत्रेषु मा स्म किंचिद्वचो वद ।
अस्मद्विधेषु सिद्धेषु ब्रह्मवित्सु तपस्विषु ॥१-४०-३० (१८१२)
क्व ते पुरुषमानित्वं क्व ते वाचस्तथाविधाः ।

दर्पजाः पितरं द्रष्टा यस्त्वं शवधरं तथा ॥ १-४०-३१ (१८१३)
पित्रा च तव तत्कर्म नानुरूपमिवात्मनः ।
कृतं मुनिजनश्रेष्ठ येनाहं भृशदुःखितः ॥ ॥ १-४०-३२ (१८१४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-४०-३ कारु कामाद्युपद्रवमूलत्वाद्दारुणं शरीरं जरयति क्षपयतीति
जरत्कारुरिति निर्वचनम् ॥
१-४०-४ तथा तादृस्येव ॥
१-४०-५ प्राहसत् अतिजीर्णयोरपि ब्रह्मचर्यविनाशः प्रसक्त
इत्याश्चर्यं मत्वेति भावः । आमन्त्र्य हेउग्रश्रव इति
संबोध्य। उपपन्नं युक्तं यत्तुल्यवयोरूपयोर्विवाह इति भावः ॥
१-४०-१५ तत् मृगस्यादर्शनं । पूर्वरूपं कारणम् ॥
१-४०-१७ प्रचारेषु गोष्ठेषु ॥
१-४०-१८ उपयुञ्जानं भक्षयन्तम् । पयः आपिबतां वत्सानामिति
पूर्वेणान्वयः ॥
१-४०-२१ समासजत् आरोपयामास ॥
चत्वारिंशोऽध्यायः ॥
४० ॥

आदिपर्व - अध्याय ०४१
॥ श्रीः ॥
१.४१. अध्यायः ४१

Mahabharata - Adi Parva - Chapter Topics
मुनिपुत्राच्छृङ्गिणः परीक्षितः शापः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-४१-० (१८१५)
सौतिरुवाच। १-४१-०क्ष् (१९०)
एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः ।
मृतधारं गुरुं श्रुत्वा पर्यतप्यत मन्युना ॥ १-४१-१ (१८१६)
स त कृशमक्षिप्रेक्ष्य सूनृतां वाचमुत्सृजन् ।
अपृच्छत्तं कथं तातः ग्सर्वभूतहिते रतः ॥ १-४१-२ (१८१७)
अनन्यचेताः सततं विष्णुं दवेमतोषयत् ।

वन्यान्नभोजी सततं मुनिर्मौनव्रते स्थितः ।
एवंभूतः स तेजस्वी' स मेऽद्य मृतधारकः ॥ १-४१-३ (१८१८)
कृश उवाच। १-४१-४क्ष् (१९१)
राज्ञा परिक्षिता तात मृगयां परिधावता ।
अवसक्तः पितुस्तेऽद्य मृतः स्कन्धे भुजङ्गमः ॥ १-४१-४ (१८१९)
शृङ्ग्युवाच। १-४१-५क्ष् (१९२)
किं मे पित्रा कृतं तस्य राज्ञोऽनिष्टं दुरात्मनः ।
ब्रूहि तत्कृश तत्त्वेन पश्य मे तपसो बलम् ॥ १-४१-५ (१८२०)
कृश उवाच। १-४१-६क्ष् (१९३)
स राजा मृगयां यातः परिक्षिदभिमन्युजः ।
ससार मृगमेकाकी विद्ध्वा बाणेन शीघ्रगम् ॥ १-४१-६ (१८२१)
न चापश्यन्मृगं राजा चरंस्तस्मिन्महावने ।
पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् ॥ १-४१-७ (१८२२)
तं स्थाणुभूतं तिष्ठन्तं क्षुत्पिपासाश्रमातुरः ।
पुनःपुनर्मृगं नष्टं प्रपच्छ पितरं तव ॥ १-४१-८ (१८२३)
स च मौनव्रतोपेतो नैव तं प्रत्यभाषत ।
तस्य राजा धनुष्कोट्या सर्पं स्कन्धे समासजत् ॥ १-४१-९ (१८२४)
शृङ्गिंस्तव पिता सोऽपि तथैवास्ते यतव्रतः ।
सोऽपि राजा स्वनगरं प्रस्थितो गजसाह्वयम् ॥ १-४१-१० (१८२५)
सौतिरुवाच। १-४१-११क्ष् (१९४)
श्रुत्वैवमृषिपुत्रस्तु शवं स्कन्धे प्रतिष्ठितम् ।
कोपसंरक्तनयनः प्रज्वलन्निव मन्युना ॥ १-४१-११ (१८२६)
आविष्टः स हि कोपेन शशाप नृपतिं तदा ।
वार्युपस्पृश्य तेजस्वी क्रोधवेगबलात्कृतः ॥ १-४१-१२ (१८२७)
शृङ्ग्युवाच। १-४१-१३क्ष् (१९५)
योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य ह ।
स्कन्धे मृतं समास्राक्षीत्पन्नगं राजकिल्विषी ॥ १-४१-१३ (१८२८)
तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः ।
आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः ॥ १-४१-१४ (१८२९)
सप्तरात्रादितो नेता यमस्य सदनं प्रति ।
द्विजानामवमन्तारं कुरूणामयशस्करम् ॥ १-४१-१५ (१८३०)
सौतिरुवाच। १-४१-१६क्ष् (१९६)
इति शप्त्वातिसंक्रुद्धः शृङ्गी पितरमभ्यगात् ।
आसीनं गोव्रजे तस्मिन्वहन्तं शवपन्नगम् ॥ १-४१-१६ (१८३१)
स तमलक्ष्य पितरं शृङ्गी स्कन्धगतेन वै ।
शवेन भुजगेनासीद्भूयः क्रोधसमाकुलः ॥ १-४१-१७ (१८३२)

दुःखाच्चाश्रूणि मुमुचे पितरं चेदमब्रवीत् ।
श्रुत्वेमां धर्षणां तात तव तेन दुरात्मना ॥१-४१-१८ (१८३३)
राज्ञा परिक्षिता कोपादशपं तमहं नृपम् ।
यथार्हति स एवोग्रं शापं कुरुकुलाधमः ।
सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ॥ १-४१-१९ (१८३४)
वैवस्वतस्य सदनं नेता परमदारुणम्। १-४१-२० (१८३५)
सौतिरुवाच ।
तमब्रवीत्पिता ब्रह्मंस्तथा कोपसमन्वितम् ॥ १-४१-२०क्ष् (१९७)
शमीक उवाच। १-४१-२१क्ष् (१९८)
न मे प्रियं कृतं तात नैष धर्मस्तपस्विनाम् ।
वयं तस्य नरेन्द्रस्य विषये निवसामहे ॥१-४१-२१ (१८३६)
न्यायतो रक्षितास्तेन तस्य पापं न रोचये ।
सर्वथा वर्तमानस्य राज्ञो ह्यस्मद्विधैः सदा ॥१-४१-२२ (१८३७)
क्षन्तव्यं पुत्र धर्मो हि हतो हन्ति न संशयः ।
यदि राजा न संरक्षेत्पीडा नः परमा भवेत् ॥१-४१-२३ (१८३८)
न शक्नुयाम चरितुं धर्मं पुत्र यथासुखम् ।
रक्षमाणा वयं तात राजभिर्धर्मदृष्टिभिः ॥१-४१-२४ (१८३९)
चरामो विपुलं धर्मं तेषां भागोऽस्ति धर्मतः ।
सर्वथा वर्तमानस्य राज्ञः क्षन्तव्यमेव हि ॥१-४१-२५ (१८४०)
परिक्षित्तु विशेषेण यथाऽस्य प्रपितामहः ।
रक्षत्यस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो ॥१-४१-२६ (१८४१)
अराजके जनपदे दोषा जायन्ति वै सदा ।
उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति वै ॥१-४१-२७ (१८४२)
दण्डात्प्रतिभयं भूयः शान्तिरुत्पद्यते तदा ।
नोद्विग्नश्चरते धर्मं नोद्विग्नश्चरते क्रियाम् ॥१-४१-२८ (१८४३)
राज्ञा प्रतिष्ठितो धर्मो धर्मात्स्वर्गः प्रतिष्ठितः ।
राज्ञो यज्ञक्रियाः सर्वा यज्ञाद्देवाः प्रतिष्ठिताः ॥१-४१-२९ (१८४४)
देवाद्वृष्टिः प्रवर्तेत वृष्टेरोषधयः स्मृताः ।
ओषधिभ्यो मनुष्याणां धारयन्सततं हितम् ॥१-४१-३० (१८४५)
मनुष्याणां च यो धाता राजा राज्यकरः पुनः ।
दशश्रोत्रियसमो राजा इत्येवं मनुरब्रवीत् ॥१-४१-३१ (१८४६)
तेनेह क्षुधितेनैत्य श्रान्तेन मृगलिप्सुना ।
अजानता कृतं मन्ये व्रतमेतदिदं मम ॥१-४१-३२ (१८४७)
कस्मादिदं त्वया बाल्यात्सहसा दुष्कृतं कृतम् ।
न ह्यर्हति नृपः शापमस्मत्तः पुत्र सर्वथा ॥ ॥१-४१-३३ (१८४८)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि एकचत्वारिंशोऽध्यायः
॥ ४१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-४१-१० गजसाह्वयं हस्तिनपुरम् ॥
१-४१-१३ कृच्छ्रगतस्य मौनव्रतधरस्य । राजा चासौ किल्बिषी
च राजकिल्बिषी ॥
१-४१-२१ विषये देशे ॥
१-४१-२२ पापं द्रोहम् ॥
१-४१-२७ दोषाः दस्युपीडादयः ॥
१-४१-३० मनुष्याणां हितं धारयन् कुर्वन् ॥
१-४१-३१ धाता पोषकः ॥
१-४१-३२ व्रतमजानतेति संबन्धः ॥
एकचत्वारिंशोऽध्यायः ॥
४१ ॥

आदिपर्व - अध्याय ०४२
॥ श्रीः ॥
१.४२. अध्यायः ४२

Mahabharata - Adi Parva - Chapter Topics
शृङ्गिशमीकसवादः ॥ १ ॥
शमीकप्रेषितेन गौरमुखाख्यशिष्येण सह परिक्षित्संवादः ॥ २ ॥
मन्त्रिभिः सह राज्ञं विचारः ॥ ३ ॥
तक्षककाश्यपसंवादः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-४२-० (१८४९)
शृङ्ग्युवाच। १-४२-०क्ष् (१९९)
यद्येतत्साहसं तात यदि वा दुष्कृतं कृतम् ।
प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा भवेत् ॥ १-४२-१ (१८५०)
नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा ब्रवीम्येवं स्वैरेष्वपि कुतः शपन् ॥ १-४२-२ (१८५१)
शमीक उवाच। १-४२-३क्ष् (२००)
जानाम्युग्रप्रभावं त्वां तात सत्यगिरं तथा ।
नानृतं चोक्तपूर्वं ते नैतन्मिथ्या भविष्यति ॥ १-४२-३ (१८५२)

पित्रा पुत्रो वयस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ १-४२-४ (१८५३)
किं पुनर्बाल एव त्वं तपसा भावितः सदा ।
वर्धते चेत्प्रभवतां कोपोऽतीव महात्मनाम् ॥ १-४२-५ (१८५४)
ग्उत्सीदेयुरिमे लोकाः क्षणा चास्य प्रतिक्रिया।'
सोऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर ।
पुत्रत्वं बालतां चैव तवावेक्ष्य च साहसम् ॥ १-४२-६ (१८५५)
स त्वं शमपरो भूत्वा वन्यमाहारमाचरन् ।
चर क्रोधमिमं हित्वा नैवं धर्मं प्रहास्यसि ॥ १-४२-७ (१८५६)
क्रोधो हि धर्मं हरति यतीनां दुःखसंचितम् ।
ततो धर्मविहीनानां गतिरिष्टा न विद्यते ॥ १-४२-८ (१८५७)
शम एव यतीनां हि क्षमिणां सिद्धिकारकः ।
क्षमावतामयं लोकः परश्चैव क्षमावताम् ॥ १-४२-९ (१८५८)
तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः ।
क्षमया प्राप्स्यसे लोकान्ब्रह्मणः समनन्तरान् ॥ १-४२-१० (१८५९)
मया तु शममास्थाय यच्छक्यं कर्तुमद्य वै ।
तत्करिष्याम्यहं तात प्रेपयिष्ये नृपाय वै ॥ १-४२-११ (१८६०)
मम पुत्रेण शप्तोऽसि बालेनाकृतबुद्धिना ।
ममेमां धर्षणां त्वत्तः प्रेक्ष्य राजन्नमर्षिणा ॥ १-४२-१२ (१८६१)
सौतिरुवाच। १-४२-१३क्ष् (२०१)
एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः ।
परिक्षिते नृपतये दयापन्नो महातपाः ॥ १-४२-१३ (१८६२)
संदिश्य कुशलप्रश्नं कार्यवृत्तान्तमेव च ।
शिष्यं गौरमुखं नाम शीलवन्तं समाहितम् ॥ १-४२-१४ (१८६३)
सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्धनम् ।
विवेश भवनं राज्ञः पूर्वं द्वास्थैर्निवेदितः ॥ १-४२-१५ (१८६४)
पूजितस्तु नरेन्द्रेण द्विजो गौरमुखस्तदा ।
आचख्यौ च परिश्रान्तो राज्ञः सर्वमशेषतः ॥ १-४२-१६ (१८६५)
शमीकवचनं घोरं यथोक्तं मन्त्रिसन्निधौ ।
शमीको नाम राजेन्द्र वर्तते विषये तव ॥ १-४२-१७ (१८६६)
ऋषिः परमधर्मात्मा दान्तः शान्तो महातपाः ।
तस्य त्वया नरव्याघ्र सर्पः प्राणैर्वियोजितः ॥ १-४२-१८ (१८६७)
अवसक्तो धनुष्कोट्या स्कन्धे मौनान्वितस्य च ।
क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे ॥ १-४२-१९ (१८६८)
तेन शप्तोऽसि राजेन्द्र पितुरज्ञातमद्य वै ।
तक्षकः सप्तरात्रेण मृत्युस्तव भविष्यति ॥ १-४२-२० (१८६९)

तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत् ।
तदन्यथा न शक्यं च कर्तुं केनचिदप्युत ॥ १-४२-२१ (१८७०)
न हि शक्नोति संयन्तुं पुत्रं कोपसमन्वितम् ।
ततोऽहं प्रेषितस्तेन तव राजन्हितार्थिना ॥ १-४२-२२ (१८७१)
सातिरुवाच। १-४२-२३क्ष् (२०२)
इति श्रुत्वा वचो घोरं स राजा कुरुनन्दनः ।
पर्यतप्यत तत्पापं कृत्वा राजा महातपाः ॥ १-४२-२३ (१८७२)
तं च मौनव्रतं श्रुत्वा वने मुनिवरं तदा ।
भूय एवाभवद्राजा शोकसंतप्तमानसः ॥ १-४२-२४ (१८७३)
अनुक्रोशात्मतां तस्य शमीकस्यावधार्य च ।
पर्यतप्यत भूयोपि कृत्वा तत्किल्बिषं मुनेः ॥ १-४२-२५ (१८७४)
न हि मृत्युं तथा राजा श्रुत्वा वै सोऽन्वतप्यत ।
अशोचदमरप्रख्यो यथा कृत्वेह कर्म तत् ॥ १-४२-२६ (१८७५)
ततस्तं प्रेषयामास राजा गौरमुखं तदा ।
भूयः प्रसादं भगवान्करोत्विह ममेति वै ॥ १-४२-२७ (१८७६)
ग्श्रुत्वा तु वचनं राज्ञो मुनिर्गौरमुखस्तदा ।
समनुज्ञाप्य वेगेन प्रजगामाश्रमं गुरोः ॥' १-४२-२८ (१८७७)
तस्मिंश्च गतमात्रेऽथ राजा गौरमुखे तदा ।
मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः ॥ १-४२-२९ (१८७८)
संमन्त्र्य मन्त्रिभिश्चैव स तथा मन्त्रतत्त्ववित् ।
प्रासादं कारयामास एकस्तम्भं सुरक्षितम् ॥ १-४२-३० (१८७९)
रक्षां च विदधे तत्र भिषजश्चौषधानि च ।
ब्राह्मणान्मन्त्रसिद्धांश्च सर्वतो वै न्ययोजयत् ॥ १-४२-३१ (१८८०)
राजकार्याणि तत्रस्थः सर्वाण्येवाकरोच्च सः ।
मन्त्रिभिः सह धर्मज्ञः समन्तात्परिरक्षितः ॥ १-४२-३२ (१८८१)
न चैनं कश्चिदारूढं लभते राजसत्तमम् ।
वातोऽपि निश्चरंस्तत्र प्रवेशे विनिवार्यते ॥ १-४२-३३ (१८८२)
प्राप्ते च दिवसे तस्मिन्सप्तमे द्विजसत्तमः ।
काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुम् ॥ १-४२-३४ (१८८३)
श्रुतं हि तेन तदभूद्यथा तं राजसत्तमम् ।
तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम् ॥ १-४२-३५ (१८८४)
तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम् ।
तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन् ॥ १-४२-३६ (१८८५)
तं ददर्श स नागेन्द्रस्तक्षकः काश्यपं पथि ।
गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः ॥ १-४२-३७ (१८८६)
तमब्रवीत्पन्नगेन्द्रः काश्यपं मुनिपुंगवम् ।

क्व भवांस्त्वरितो याति किंच कार्यं चिकीर्षति ॥१-४२-३८ (१८८७)
काश्यप उवाच।१-४२-३९क्ष् (२०३)
नृपं कुरुकुलोत्पन्नं परिक्षितमरिंदमम् ।
तक्षकः पन्नगश्रेष्ठस्तेजसाऽध्य प्रधक्ष्यति ॥१-४२-३९ (१८८८)
तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसम् ।
पाण्डवानां कुलकरं राजानममितौजसम्।१-४२-४ओच् गच्छामित्वरितं सौम्य सद्यः कर्तुमपज्वरम् ॥ १-४२-४० (१८८९)
गविज्ञातविषविद्योऽहं ब्राह्मणो लोकपूजितः ।
अस्मद्गुरुकटाक्षेण कल्योऽहं विषनाशने ॥' १-४२-४१ (१८९०)
तक्षक उवाच।१-४२-४२क्ष् (२०४)
अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम् ।
निवर्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम् ॥१-४२-४२ (१८९१)
काश्यप उवाच।१-४२-४३क्ष् (२०५)
अहं तं नृपतिं गत्वा त्वया दष्टमपज्वरम् ।
करिष्यामीति मे बुद्धिर्विद्याबलसमन्विता ॥ ॥१-४२-४३ (१८९२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४२-२ स्वैरेष्वपि परिहासादिष्वपि ॥
१-४२-४ वयस्थोऽपि प्रौढोपि ।वाच्यः शास्यः ॥
१-४२-५ प्रभवतां योगैश्वर्यवताम् ॥
१-४२-८ यतीनां आमुष्मिकहितार्थं यतमानानाम् ॥
१-४२-१० समनन्तरान् प्रत्यासन्नान् ॥
१-४२-११ संदेशहरमिति शेषः ॥
१-४२-१९ न चक्षमे न क्षान्तवान् ॥
१-४२-२३ पापं कृत्वैव पर्यतप्यत नतु मृत्युं श्रुत्वा ॥
१-४२-३३ आरूढं प्रासादारूढम् ॥
१-४२-४३ नृपतिं गत्वा नृपतिं नागेति पाठान्तरम् ॥
द्विचत्वारिंशोऽध्यायः ॥
४२ ॥

आदिपर्व - अध्याय ०४३

॥ श्रीः ॥

१.४३. अध्यायः ४३

Mahabharata - Adi Parva - Chapter Topics
स्वदष्टन्यग्रोधोज्जीवनेन परीक्षितस्य काश्यपस्य धनं दत्वा
तक्षकेण कृतं परावर्तनं परीक्षिद्दंशश्च ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-४३-० (१८९३)
तक्षक उवाच। १-४३-०क्ष् (२०६)
यदि दष्टं मयेह त्वं शक्तः किंचिच्चिकित्सितुम् ।
ततो वृक्षं मया दष्टमिमं जीवय काश्यप ॥१-४३-१ (१८९४)
परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च ।
न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम ॥१-४३-२ (१८९५)
काश्यप उवाच। १-४३-३क्ष् (२०७)
दश नागेन्द्र वृक्षं त्वं यद्येतदभिमन्यसे ।
अहमेनं त्वया दष्टं जीवयिष्ये भुजंगम ।
ग्पश्य मन्त्रबलं मेऽद्य न्यग्रोधं दश पन्नग ॥' १-४३-३ (१८९६)
सौतिरुवाच। १-४३-४क्ष् (२०८)
एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना ।
अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः ॥१-४३-४ (१८९७)
स वृक्षस्तेन दष्टस्तु पन्नगेन महात्मना ।
आशीविषविषोपेतः प्रजज्वाल समन्ततः ॥१-४३-५ (१८९८)
तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत् ।
कुरु यत्नं द्विजश्रेष्ठ जीवयैव वनस्पतिम् ॥१-४३-६ (१८९९)
सौतिरुवाच। १-४३-७क्ष् (२०९)
भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा ।
भस्म सर्वं समाहृत्य काश्यपो वाक्यमब्रवीत् ॥१-४३-७ (१९००)
विद्याबलं पन्नगेन्द्र पश्य मेऽद्य वनस्पतौ ।
अहं संजीवयाम्येनं पश्यतस्ते भुजंगम ॥१-४३-८ (१९०१)
ततः स भगवान्विद्वान्काश्यपो द्विजसत्तमः ।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत् ॥१-४३-९ (१९०२)
अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम् ।
पलाशिनं शाखिनं च तथा विटपिनं पुनः ॥१-४३-१० (१९०३)
तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना ।
उवाच तक्षको ब्रह्मन्नैतदत्यद्भुतं त्वयि ॥१-४३-११ (१९०४)
द्विजेन्द्र यद्विषं हन्या मम वा मद्विधस्य वा ।
कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन ॥१-४३-१२ (१९०५)

यत्तेऽभिलषितं प्राप्तं फलं तस्मान्नृपोत्तमात् ।
अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम् ॥ १-४३-१३ (१९०६)
विप्रशापाभिभूते च क्षीणायुषि नराधिपे ।
घटमानस्य ते विप्र सिद्धिः संशयिता भवेत् ॥ १-४३-१४ (१९०७)
ततो यशः प्रदीप्तं ते त्रिषु लोकेषु विश्रुतम् ।
निरंशुरिव घर्मांशुरन्तर्धानमितो व्रजेत् ॥ १-४३-१५ (१९०८)
काश्यप उवाच। १-४३-१६क्ष् (२१०)
धनार्थी याम्यहं तत्र तन्मे देहि भुजंगम ।
ततोऽहं विनिवर्तिष्ये स्वापतेयं प्रगृह्य वै ॥ १-४३-१६ (१९०९)
तक्षक उवाच। १-४३-१७क्ष् (२११)
यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम् ।
अहमेव प्रदास्यामि निवर्तस्व द्विजोत्तम ॥ १-४३-१७ (१९१०)
सौतिरुवाच। १-४३-१८क्ष् (२१२)
तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः ।
प्रदध्यौ सुमहातेजाराजानं प्रति बुद्धिमान् ॥ १-४३-१८ (१९११)
दिव्यज्ञानः स तेजस्वी ज्ञात्वा तं नृपतिं तदा ।
क्षीणायुषं पाण्डवेयमपावर्तत काश्यपः ॥ १-४३-१९ (१९१२)
लब्ध्वा वित्तं मुनिवरस्तक्षकाद्यावदीप्सितम् ।
निवृत्ते काश्यपे तस्मिन्समयेन महात्मनि ॥ १-४३-२० (१९१३)
जगाम तक्षकस्तूर्णं नगरं नागसाह्वयम् ।
अथ शुश्राव गच्छन्स तक्षको जगतीपतिम् ॥ १-४३-२१ (१९१४)
मन्त्रैर्विषहरैर्दिव्यै रक्ष्यमाणं प्रयत्नतः। १-४३-२२ (१९१५)
सौतिरुवाच ।
स चिन्तयामास तदा मायायोगेन पार्थिवः ॥ १-४३-२२क्ष् (२१३)
मया वञ्चयितव्योऽसौ क उपायो भवेदिति ।
ततस्तापसरूपेण प्राहिणोत्स भुजंगमान् ॥ १-४३-२३ (१९१६)
फलपत्रोदकं गृह्य राज्ञे नागोऽथ तक्षकः। १-४३-२४ (१९१७)
तक्षक उवाच ।
गच्छध्वं यूयमव्यग्रा राजानं कार्यवत्तया ॥ १-४३-२४क्ष् (२१४)
फलपत्रोदकं नागाः प्रतिग्राहयितुं नृपम्। १-४३-२५ (१९१८)
सौतिरुवाच ।
ते तक्षकसमादिष्टास्तथा चक्रुर्भुजङ्गमाः ॥ १-४३-२५क्ष् (२१५)
उपनिन्युस्तथा राज्ञे दर्भानम्भः फलानि च ।
तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्यवान् ॥ १-४३-२६ (१९१९)
कृत्वा तेषां च कार्याणि गम्यतामित्युवाच तान् ।
गतेषु तेषु नागेषु तापसच्छद्मरूपिषु ॥ १-४३-२७ (१९२०)

अमात्यान्सुहृदश्चैव प्रोवाच स नराधिपः ।
भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः ॥ १-४३-२८ (१९२१)
तापसैरुपनीतानि फलानि सहिता मया ।
ततो राजा ससचिवः फलान्यादातुमैच्छत ॥ १-४३-२९ (१९२२)
विधिना संप्रयुक्तो वै ऋषिवाक्येन तेन तु ।
यस्मिन्नेव फले नागस्तमेवाभक्षयत्स्वयम् ॥ १-४३-३० (१९२३)
ततो भक्षयतस्तस्य फलात्कृमिरभूदणुः ।
ह्रस्वकः कृष्णनयनस्ताम्रवर्णोऽथ शौनक ॥ १-४३-३१ (१९२४)
स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत् ।
अस्तमभ्येति सविता विषादद्य न मे भयम् ॥ १-४३-३२ (१९२५)
सत्यवागस्तु स मुनिः कृमिर्मां दशतामयम् ।
तक्षको नाम भूत्वा वै तथा परिहृतं भवेत् ॥ १-४३-३३ (१९२६)
ते चैनमन्ववर्तन्त मन्त्रिणः कालचोदिताः ।
एवमुक्त्वा स राजेन्द्रो ग्रीवायां सन्निवेश्यह ॥ १-४३-३४ (१९२७)
कृमिकं प्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः ।
प्रहसन्नेव भोगेन तक्षकेणाभिवेष्टितः ॥ १-४३-३५ (१९२८)
तस्मात्फलाद्विनिष्क्रम्य यत्तद्राज्ञे निवेदितम् ।
वेष्टयित्वा च भोगेन विनद्य च महास्वनम् ।
अदशत्पृथिवीपालं तक्षकः पन्नगेश्वरः ॥ ॥ १-४३-३६ (१९२९)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि त्रिचत्वारिंशोऽध्यायः
॥ ४३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४३-३ दश दंशं कुरु ॥
१-४३-६ नग वृक्षम् ॥
१-४३-१३ यत् फलं प्राप्तुमभिलषितं तत् इत्यन्वयः ॥
१-४३-१४ घटमानस्य सज्जमानस्य ॥
१-४३-१६ स्वापतेयं धनम् ॥
१-४३-२२ तत्रागतैर्विषहरैरिति पाठान्तरम् ॥
१-४३-३१ यज्जग्राह फलं राजा तत्र क्रिमिरभूदणुः इति पाठान्तरम् ॥
१-४३-३३ क्रिमिको मां दशत्वयं इति पाठान्तरम् ॥
त्रिचत्वारिशोऽध्यायः ॥
४३ ॥

आदिपर्व - अध्याय ०४४
॥ श्रीः ॥

१.४४. अध्यायः ४४

Mahabharata - Adi Parva - Chapter Topics

परीक्षिन्मरणोत्तरं तत्पुत्रस्य जनमेजयस्य राज्याभिषेकः ॥ १ ॥
वपुष्टमाविवाहः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-४४-० (१९३०)
सौतिरुवाच। १-४४-०क्ष् (२१६)
तं तथा मन्त्रिणो दृष्ट्वा भोगेन परिवेष्टितम् ।
विषण्णवदनाः सर्वे रुरुदुर्भृशदुःखिताः ॥ १-४४-१ (१९३१)
तं तु नागं ततो दृष्ट्वा मन्त्रिणस्ते प्रदुद्रुवुः ।
अपश्यन्त तथा यान्तमाकाशे नागमद्भुतम् ॥ १-४४-२ (१९३२)
सीमन्तमिव कुर्वाणं नभसः पद्मवर्चसम् ।
तक्षकं पन्नगश्रेष्ठं भृशं शोकपरायणाः ॥ १-४४-३ (१९३३)
ततस्तु ते तद्गृहमग्निना वृतं
प्रदीप्यमानं विषजेन भोगिनः ।
भयात्परित्यज्य दिशः प्रपेदिरे
पपात तच्चाशनिताडितं यथा ॥ १-४४-४ (१९३४)
ततो नृपे तक्षकतेजसाहते
प्रयुज्य सर्वाः परलोकसत्क्रियाः ।
शुचिर्दिजो राजपुरोहितस्तदा
तथैव ते तस्य नृपस्य मन्त्रिणः ॥ १-४४-५ (१९३५)
नृपं शिशुं तस्य सुतं प्रचक्रिरे
समेत्य सर्वे पुरवासिनो जनाः ।
नृपं यमाहुस्तममित्रघातिनं
कुरुप्रवीरं जनमेजयं जनाः ॥ १-४४-६ (१९३६)
स बाल एवार्यमतिर्नृपोत्तमः
सहैव तैर्मन्त्रिपुरोहितैस्तदा ।
शशास राज्यं कुरुपुंगवाग्रजो
यथाऽस्य वीरः प्रपितामहस्तथा ॥ १-४४-७ (१९३७)
ततस्तु राजानममित्रतापनं
समीक्ष्य ते तस्य नृपस्य मन्त्रिणः ।
सुवर्णवर्माणमुपेत्य काशिप
वपुष्टमार्थं वरयांप्रचक्रमुः ॥ १-४४-८ (१९३८)

ततः स राजा प्रददौ वपुष्टमां
कुरुप्रवीराय परीक्ष्य धर्मतः ।
स चापि तां प्राप्य मुदा युतोऽभव-
न्न चान्यनारीषु मनो दधे क्वचित् ॥ १-४४-९ (१९३९)
सरःसु फुल्लेषु वनेषु चैव
प्रसन्नचेता विजहार वीर्यवान् ।
तथा स राजन्यवरो विजह्रिवान्
यथोर्वशीं प्राप्य पुरा पुरूरवाः ॥ १-४४-१० (१९४०)
वपुष्टमा चापि वरं पतिव्रता
प्रतीतरूपा समवाप्य भूपतिम् ।
भावेन रामा रमयांबभूव तं
विहारकालेष्ववरोधसुन्दरी ॥ ॥ १-४४-११ (१९४१)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-४४-२ दह्यमानं ततो दृष्ट्वा इति पाठान्तरम् ॥
१-४४-७ प्रपितामहो युधिष्ठिरः ॥
१-४४-८ वपुष्टमा काशिराजकन्या ॥
१-४४-११ वरं वरणीयम् । प्रतीतरूपा हृष्टरूपा ॥
चतुश्चत्वारिंशोऽध्यायः ॥
४४ ॥

आदिपर्व - अध्याय ०४५
॥ श्रीः ॥
१.४५. अध्यायः ४५

Mahabharata - Adi Parva - Chapter Topics
जरत्कारोः स्वपितॄणां दर्शनं तद्भाषणं च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-४५-० (१९४२)
सौतिरुवाच । १-४५-०क्ष् (२१७)
एतस्मिन्नेव काले तु जरत्कारुर्महातपाः ।
चचार पृथिवीं कृत्स्नां यत्रसायंगृहो मुनिः ॥ १-४५-१ (१९४३)

चरन्दीक्षां महातेजा दुश्चरामकृतात्मभिः ।
तीर्थेष्वाप्लवनं कुर्वन्पुण्येषु विचचार ह ॥ १-४५-२ (१९४४)
वायुभक्षो निराहारः शुष्यन्नहरहर्मुनिः ।
सं ददर्श पितॄन्गर्ते लम्बमानानधोमुखान् ॥ १-४५-३ (१९४५)
एकतन्त्ववशिष्टं वै वीरणस्तम्बमाश्रितान् ।
तं तन्तुं च शनैराखुमाददानं बिलेशयम् ॥ १-४५-४ (१९४६)
निराहारान्कृशान्दीनान्गर्ते स्वत्राणमिच्छतः ।
उपसृत्य स तान्दीनान्दीनरूपोऽभ्यभाषत ॥ १-४५-५ (१९४७)
के भवन्तोऽवलम्बन्ते वीरमस्तम्बमाश्रिताः ।
दुर्बलं खादितैर्मूलैराखुना बिलवासिना ॥ १-४५-६ (१९४८)
वीरणस्तम्बके मूलं यदप्येकमिह स्थितम् ।
तदप्ययं शनैराखुरादत्ते दशनैः शितैः ॥ १-४५-७ (१९४९)
छेत्स्यतेऽल्पावशिष्टत्वादेतदप्यचिरादिव ।
ततस्तु पतितारोऽत्र गर्ते व्यक्तमधोमुखाः ॥ १-४५-८ (१९५०)
अत्र मे दुःखमुत्पन्नं दृष्ट्वा युष्मानधोमुखान् ।
कृच्छ्रामापदमापन्नान्प्रियं किं करवाणि वः ॥ १-४५-९ (१९५१)
तपसोऽस्य चतुर्थेन तृतीयेनाथ वा पुनः ।
अर्धेन वापि निस्तर्तुमापदं ब्रूत मा चिरम् ॥ १-४५-१० (१९५२)
अथवापि समग्रेण तरन्तु तपसा मम ।
भवन्तः सर्व एवेह काममेवं विधीयताम् ॥ १-४५-११ (१९५३)
पितर ऊचुः। १-४५-१२क्ष् (२१८)
कुतो भवान्ब्रह्मचारी यो नस्त्रातुमिहेच्छसि ।
न तु विप्राग्र्य तपसा शक्यमेतद्व्यपोहितुम् ॥ १-४५-१२ (१९५४)
अस्ति नस्तात तपसः फलं प्रवदतां वर ।
संतानप्रक्षयाद्ब्रह्मन्पतामो निरयेऽशुचौ ॥ १-४५-१३ (१९५५)
सन्तानं हि परो धर्म एवमाह पितामहः ।
लम्बतामिह नस्तात न ज्ञानं प्रतिभाति वै ॥ १-४५-१४ (१९५६)
येन त्वां नाभिजानीमो लोके विख्यातपौरुषम् ।
वृद्धो भवान्महाभागोयोनः शोच्यान्सुदुःखितान ॥ १-४५-१५ (१९५७)
शोचते चैव कारुण्याच्छृणु ये वै वयं द्विज ।
यायावरा नाम वयमृषयः संशितव्रताः ॥ १-४५-१६ (१९५८)
लोकात्पुण्यादिह भ्रष्टाः सन्तानप्रक्षयान्मुने ।
प्रणष्टं नस्तपस्तीव्रं न हि नस्तन्तुरस्ति वै ॥ १-४५-१७ (१९५९)
अस्तित्वेकोऽद्य नस्तन्तुः सोऽपि नास्ति यथा तथा ।
मन्दभाग्योऽल्पभाग्यानां तप एकं समास्थितः ॥ १-४५-१८ (१९६०)
जरत्कारुरिति ख्यातो वेदवेदाङ्गपारगः ।

नियतात्मा महात्मा च सुव्रतः सुमहातपाः ॥ १-४५-१९ (१९६१)
तेन स्म तपसो लोभात्कृच्छ्रमापादिता वयम् ।
न तस्य भार्या पुत्रो वा बान्धवो वाऽस्ति कश्चन ॥ १-४५-२० (१९६२)
तस्माल्लम्बामहे गर्ते नष्टसंज्ञा ह्यनाथवत् ।
स वक्तव्यस्त्वया दृष्टो ह्यस्माकं नाथवत्तया ॥ १-४५-२१ (१९६३)
पितरस्तेऽवलम्बन्ते गर्ते दीना अधोमुखाः ।
साधु दारान्कुरुष्वेति प्रजायस्वेति चाभि भोः ॥ १-४५-२२ (१९६४)
कुलतन्तुर्हि नः शिष्टः स एकैकस्तपोधन ।
यं तु पश्यसि नो ब्रह्मन्वीरणस्तम्बमाश्रयम् ॥ १-४५-२३ (१९६५)
एषोऽस्माकं कुलस्तम्ब आस्ते स्वकुलवर्धनः ।
यानि पश्यसि वै ब्रह्मन्मूलानीहास्य वीरुधः ॥ १-४५-२४ (१९६६)
एते नस्तन्तवस्तात कालेन परिभक्षिताः ।
यत्त्वेतत्पश्यसि ब्रह्मन्मूलमस्यार्धभक्षितम् ॥ १-४५-२५ (१९६७)
यत्र लम्बामहे गर्ते सोऽप्येकस्तप आस्थितः ।
यमाखुं पश्यसि ब्रह्मन्काल एष महाबलः ॥ १-४५-२६ (१९६८)
स तं तपोरतं मन्दं शनैः क्षपयते तुदन् ।
जरत्कारुं तपोलुब्धं मन्दात्मानमचेतसम् ॥ १-४५-२७ (१९६९)
न हि नस्तत्तपस्तस्य तारयिष्यति सत्तम ।
छिन्नमूलान्परिभ्रष्टान्कालोपहतचेतसः ॥ १-४५-२८ (१९७०)
अधः प्रविष्टान्पश्यास्मान्यथा दुष्कृतिनस्तथा ।
अस्मासु पतितेष्वत्र सह सर्वैः सबान्धवैः ॥ १-४५-२९ (१९७१)
छिन्नः कालेन सोऽप्यत्र गन्ता वै नरकं ततः ।
तपो वाऽप्यथ चा यज्ञो यच्चान्यत्पावनं महत् ॥ १-४५-३० (१९७२)
तत्सर्वं न समं तात संतत्येति सतां मतम् ।
स तात दृष्ट्वा ब्रूयास्त्वं जरत्कारुं तपोधन ॥ १-४५-३१ (१९७३)
यथा दृष्टमिदं चात्र त्वयाऽऽख्येयमशेषतः ।
यथा दारान्प्रकुर्यात्स पुत्रानुत्पादयेद्यथा ॥ १-४५-३२ (१९७४)
वा ब्रह्मंस्त्वया वाच्यः सोऽस्माकं नाथवत्तया ।
बान्धवानां हितस्येह यथा चात्मकुलं तथा ॥ १-४५-३३ (१९७५)
कस्त्वं बन्धुमिवास्माकमनुशोचसि सत्तम ।
श्रोतुमिच्छाम सर्वेषां को भवानिह तिष्ठति ॥ ॥ १-४५-३४ (१९७६)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४५-५ स्वत्राणं स्वरक्षाम् ॥
१-४५-८ पतितारः पतिष्यथा ॥
१-४५-१२ एतत् अस्मदीयं कृच्छ्रं व्यपोहितुं अपनेतुम् ॥
पञ्चचत्वारिंशोऽध्यायः ॥
४५ ॥

आदिपर्व - अध्याय ०४६
॥ श्रीः ॥
१.४६. अध्यायः ४६

Mahabharata - Adi Parva - Chapter Topics
जरत्कारोः स्वपितृसंवादानन्तरं दारान्वेषणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-४६-० (१९७७)
सौतिरुवाच। १-४६-०क्ष् (२१९)
एतच्छ्रुत्वा जरत्कारुर्भृशं शोकपरायणः ।
उवाच तान्पितॄन्दुःखाद्बाष्पसंदिग्धया गिरा ॥ १-४६-१ (१९७८)
जरत्कारुरुवाच। १-४६-२क्ष् (२२०)
मम पूर्वे भवन्तो वै पितरः सपितामहाः ।
तद्ब्रूत यन्मया कार्यं भवतां प्रियकाम्यया ॥ १-४६-२ (१९७९)
अहमेव जरत्कारुः किल्बिषी भवतां सुतः ।
ते दण्डं धारयत मे दुष्कृतेरकृतात्मनः ॥ १-४६-३ (१९८०)
पितर ऊचुः। १-४६-४क्ष् (२२१)
पुत्र दिष्ट्याऽसि संप्राप्त इमं देशं यदृच्छया ।
किमर्थं च त्वया ब्रह्मन्न कृतो दारसङ्ग्रहः ॥ १-४६-४ (१९८१)
जरत्कारुरुवाच। १-४६-५क्ष् (२२२)
ममायं पितरो नित्यं हृद्यर्थः परिवर्तते ।
ऊर्ध्वरेताः शरीरं वै प्रापयेयममुत्र वै ॥ १-४६-५ (१९८२)
न दारान्वै करिष्येऽहमिति मे भावितं मनः ।
एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः ॥ १-४६-६ (१९८३)
मया निवर्तिता बुद्धिर्ब्रह्मचर्यात्पितामहाः ।
करिष्ये वः प्रियं कामं निवेक्ष्येऽहमसंशयम् ॥ १-४६-७ (१९८४)
सनाम्नीं यद्यहं कन्यामुपलप्स्ये कदाचन ।
भविष्यति च या काचिद्भैक्ष्यवत्स्वयमुद्यता ॥ १-४६-८ (१९८५)
प्रतिग्रहीता तामस्मि न भरेयं च यामहम् ।

एवंविधमहं कुर्यां निवेशं प्राप्नुयां यदि ।
अन्यथा न करिष्येऽहं सत्यमेतत्पितामहाः ॥ १-४६-९ (१९८६)
तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै ।
शाश्वताश्चाव्ययाश्चैव तिष्ठन्तु पितरो मम ॥ १-४६-१० (१९८७)
सौतिरुवाच। १-४६-११क्ष् (२२३)
एवमुक्त्वा तु स पितॄंश्चचार पृथिवीं मुनिः ।
न च स्म लभते भार्यां वृद्धोऽयमिति शानक ॥ १-४६-११ (१९८८)
यदा निर्वेदमापन्नः पितृभिश्चोदितस्तथा ।
तदाऽरण्यं स गत्वोच्चैश्चुक्रोश भृशदुःखितः ॥ १-४६-१२ (१९८९)
सत्वरण्यगतः प्राज्ञः पितॄणा हितकाम्यया ।
उवाच कन्यां याचामि तिस्रो वाचः शनैरिमाः ॥ १-४६-१३ (१९९०)
यानि भूतानि सन्तीह स्थावराणि चराणि च ।
अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः ॥ १-४६-१४ (१९९१)
उग्रे तपसि वर्तन्तं पितरश्चोदयन्ति माम् ।
निविशस्वेति दुःखार्ताः सन्तानस्य चिकीर्षया ॥ १-४६-१५ (१९९२)
निवेशायाखिलां भूमिं कन्याभैक्ष्यं चरामि भोः ।
दरिद्रो दुःखशीलश्च पितृभिः सन्नियोजितः ॥ १-४६-१६ (१९९३)
यस्य कन्याऽस्ति भूतस्य ये मयेह प्रकीर्तिताः ।
ते मे कन्यां प्रयच्छन्तु चरतः सर्वतोदिशम् ॥ १-४६-१७ (१९९४)
मम कन्या सनाम्नी या भैक्ष्यवच्चोदिता भवेत् ।
भरेयं चैव यां नाहं तां मे कन्यां प्रयच्छत ॥ १-४६-१८ (१९९५)
ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः ।
तामादाय प्रवृत्तिं ते वासुकेः प्रत्यवेदयन् ॥ १-४६-१९ (१९९६)
तेषां श्रुत्वा स नागेन्द्रस्तां कन्यां समलङ्कृताम् ।
प्रगृह्यारण्यमगमत्समीपं तस्य पन्नगः ॥ १-४६-२० (१९९७)
तत्र तां भैक्ष्यवत्कन्यां प्रादात्तस्मै महात्मने ।
नागेन्द्रो वासुकिर्ब्रह्मन्न स तां प्रत्यगृह्णत ॥ १-४६-२१ (१९९८)
असनामेति वै मत्वा भरणे चाविचारिते ।
मोक्षभावे स्थितश्चापि मन्दीभूतः परिग्रहे ॥ १-४६-२२ (१९९९)
ततो नाम स कन्यायाः पप्रच्छ भृगुनन्दन ।
वासुकिं भरणं चास्या न कुर्यामित्युवाच ह ॥ ॥ १-४६-२३ (२०००)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४६-७ निवेक्ष्ये निवेशं विवाहं करिष्ये ॥
१-४६-९ न भरेयं धारणपोषणे न कुर्याम् ॥
१-४६-१९ जरत्कारौ जरत्कारोरन्वेषणे ।समाहिताः यत्ताः ॥
षट्चत्वारिंशोऽध्यायः ॥
४६ ॥

आदिपर्व - अध्याय ०४७
॥ श्रीः ॥
१.४७. अध्यायः ४७

Mahabharata - Adi Parva - Chapter Topics
जरत्कारोरुद्वाहः ॥ १ ॥
तस्यां गर्भसंभवः ॥ २ ॥
समयोल्लङ्घनेन क्रुद्धस्य मुनेः तपोर्थं गमनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-४७-० (२००१)
सौतिरुवाच। १-४७-०क्ष् (२२४)
वासुकिस्त्वब्रवीद्वाक्यं जरत्कारुमृषिं तदा ।
सनाम्नी तव कन्येयं स्वसा मे तपसान्विता ॥ १-४७-१ (२००२)
भरिष्यामि च ते भार्यां प्रतीच्छेमां द्विजोत्तम ।
रक्षणं च करिष्येऽस्याः सर्वशक्त्या तपोधन ।
त्वदर्थं रक्ष्यते चैषा मया मुनिवरोत्तम ॥ १-४७-२ (२००३)
जरत्कारुरुवाच। १-४७-३क्ष् (२२५)
न भरिष्येऽहमेतां वै एष मे समयः कृतः ।
अप्रियं च न कर्तव्यं कृते चैनां त्यजाम्यहम् ॥ १-४७-३ (२००४)
सौतिरुवाच। १-४७-४क्ष् (२२६)
प्रतिश्रुते तु नागेन भरिष्ये भगिनीमिति ।
जरत्कारुस्तदा वेश्म भुजगस्य जगाम ह ॥ १-४७-४ (२००५)
तत्र मन्त्रविदां श्रेष्ठस्तपोवृद्धो महाव्रतः ।
जग्राह पाणिं धर्मात्मा विधिमन्त्रपुरस्कृतम् ॥ १-४७-५ (२००६)
ततो वासगृहं रम्यं पन्नगेन्द्रस्य संमतम् ।
जगाम भार्यामादाय स्तूयमानो महर्षिभिः ॥ १-४७-६ (२००७)
शयनं तत्र संक्लृप्तं स्पर्ध्यास्तरणसंवृतम् ।
तत्र भार्यासहायो वै जरत्कारुरुवास ह ॥ १-४७-७ (२००८)
स तत्र समयं चक्रे भार्यया सह सत्तमः ।

विप्रियं मे न कर्तव्यं न च वाच्यं कदाचन ॥ १-४७-८ (२००९)
त्यजेयं विप्रिये च त्वां कृते वासं च ते गृहे ।
एतद्गृहाण वचनं मया यत्समुदीरितम् ॥ १-४७-९ (२०१०)
ततः परमसंविग्ना स्वसा नागपतेस्तदा ।
अतिदुःखान्विता वाक्यं तमुवाचैवमस्त्विति ॥ १-४७-१० (२०११)
तथैव सा च भर्तारं दुःखशीलमुपचारत् ।
उपायैः श्वेतकाकीयैः प्रियकामा यशस्विनी ॥ १-४७-११ (२०१२)
ऋतुकाले ततः स्नाता कदाचिद्वासुकेः स्वसा ।
भर्तारं वै यथान्यायमुपतस्थे महामुनिम् ॥ १-४७-१२ (२०१३)
तत्र तस्याः समभवद्गर्भो ज्वलनसन्निभः ।
अतीव तेजसा युक्तो वैश्वानरसमद्युतिः ॥ १-४७-१३ (२०१४)
शुक्लपक्षे यथा सोमो व्यवर्धत तथैव सः ।
ततः कतिपयाहस्तु जरत्कारुर्महायशाः ॥ १-४७-१४ (२०१५)
उत्सङ्गेऽस्याः शिरः कृत्वा सुष्वाप परिखिन्नवत् ।
तस्मिंश्च सुप्ते विप्रेन्द्रे सवितास्तमियाद्गिरिम् ॥ १-४७-१५ (२०१६)
अह्नः परिक्षये ब्रह्मंस्ततः साऽचिन्तयत्तदा ।
वासुकेर्भगिनी भीता धर्मलोपान्मनस्विनी ॥ १-४७-१६ (२०१७)
किं नु मे सुकृतं भूयाद्भर्तुरुत्थापनं न वा ।
दुःखशीलो हि धर्मात्मा कथं नास्यापराध्नुयाम् ॥ १-४७-१७ (२०१८)
कोपो वा धर्मशीलस्य धर्मलोपोऽथवा पुनः ।
धर्मलोपो गरीयान्वै स्यादित्यत्राकरोन्मतिम् ॥ १-४७-१८ (२०१९)
उत्थापयिष्ये यद्येनं ध्रुवं कोपं करिष्यति ।
धर्मलोपो भवेदस्य सन्ध्यातिक्रमणे ध्रुवम् ॥ १-४७-१९ (२०२०)
इति निश्चित्य मनसा जरत्कारुर्भुजंगमा ।
तमृषिं दीप्ततपसं शयानमनलोपमम् ॥ १-४७-२० (२०२१)
उवाचेदं वचः श्लक्ष्णं ततो मधुरभाषिणी ।
उत्तिष्ठ त्वं महाभाग सूर्योऽस्तमुपगच्छति ॥ १-४७-२१ (२०२२)
सन्ध्यामुपास्स्व भगवन्नपः स्पृष्ट्वा यतव्रतः ।
प्रादुष्कृताग्निहोत्रोऽयं मुहूर्तो रम्यदारुणः ॥ १-४७-२२ (२०२३)
सन्ध्या प्रवर्तते चेयं पश्चिमायां दिशि प्रभो ।
एवमुक्तः स भगवाञ्जरत्कारुर्महातपाः ॥ १-४७-२३ (२०२४)
भार्यां प्रस्फुरमाणौष्ठ इदं वचनमब्रवीत् ।
अवमानः प्रयुक्तोऽयं त्वया मम भुजंगमे ॥ १-४७-२४ (२०२५)
समीपे ते न वत्स्यामि गमिष्यामि यथागतम् ।
शक्तिरस्ति न वामोरु मयि सुप्ते विभावसोः ॥ १-४७-२५ (२०२६)
अस्तं गन्तुं यथाकालमिति मे हृदि वर्तते ।

न चाप्यवमतस्येह वासो रोचेत कस्यचित् ॥१-४७-२६ (२०२७)
किं पुनर्धर्मशीलस्य मम वा मद्विधस्य वा ।
एवमुक्ता जरत्कारुर्भर्त्रा हृदयकम्पनम् ॥१-४७-२७ (२०२८)
अब्रवीद्भगिनी तत्र वासुकेः सन्निवेशने ।
नावमानात्कृतवती तवाहं विप्रे बोधनम् ॥१-४७-२८ (२०२९)
धर्मलोपो न ते विप्र स्यादित्येतन्मया कृतम् ।
उवाच भार्यामित्युक्तो जरत्कारुर्महातपाः ॥१-४७-२९ (२०३०)
ऋषिः कोपसमाविष्टस्त्यक्तुकामो भुजंगमाम् ।
न मे वागनृतं प्राह गमिष्येऽहं भुजंगमे ॥१-४७-३० (२०३१)
समयो ह्येष मे पूर्वं त्वया सह मिथः कृतः ।
सुखमस्म्युषितो भद्रे ब्रूयास्त्वं भ्रातरं शुभे ॥१-४७-३१ (२०३२)
इतो मयि गते भीरु गतः स भगवानिति ।
त्वं चापि मयि निष्क्रान्ते न शोकं कर्तुमर्हसि ॥१-४७-३२ (२०३३)
इत्युक्ता साऽनवद्याङ्गी प्रत्युवाच मुनिं तदा ।
जरत्कारुं जरत्कारुश्चिन्ताशोकपरायणा ॥१-४७-३३ (२०३४)
बाष्पगद्गदया वाचा मुखेन परिशुष्यता ।
कृताञ्जलिर्वरारोहा पर्यश्रुनयना ततः ॥१-४७-३४ (२०३५)
धैर्यमालम्ब्य वामोरूर्हृदयेन प्रवेपता ।
न मामर्हसि धर्मज्ञ परित्यक्तुमनागसम् ॥१-४७-३५ (२०३६)
धर्मे स्थितां स्थितो धर्मे सदा प्रियहिते रताम् ।
प्रदाने कारणं यच्च मम तुभ्यं द्विजोत्तम ॥१-४७-३६ (२०३७)
तदलब्धवतीं मन्दां किं मां वक्ष्यति वासुकिः ।
मातृशापाभिभूतानां ज्ञातीनां मम सत्तम ॥१-४७-३७ (२०३८)
अपत्यमीप्सितं त्वत्तस्तच्च तावन्न दृश्यते ।
त्वत्तो ह्यपत्यलाभेन ज्ञातीनां मे शिवं भवेत् ॥१-४७-३८ (२०३९)
संप्रयोगो भवेन्नायां मम मोघस्त्वया द्विज ।
ज्ञातीनां हितमिच्छन्ती भगवंस्त्वां प्रसादये ॥१-४७-३९ (२०४०)
इममव्यक्तरूपं मे गर्भमाधाय सत्तम ।
कथं त्यक्त्वा महात्मा सन्गान्तुमिच्छस्यनागसम् ॥१-४७-४० (२०४१)
एवमुक्तस्तु स मुनिर्भार्यां वचनमब्रवीत् ।
यद्युक्तमनुरूपं च जरत्कारुं तपोधनः ॥१-४७-४१ (२०४२)
अस्त्ययं सुभगे गर्भस्तव वैश्वानरोपमः ।
ऋषिः परमधर्मात्मा वेदवेदाङ्गपारगः ॥१-४७-४२ (२०४३)
एवमुक्त्वा स धर्मात्मा जरत्कारुर्महानृषिः ।
उग्राय तपसे भूयो जगाम कृतनिश्चयः ॥ ॥१-४७-४३ (२०४४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि सप्तचत्वारिंशोऽध्यायः
॥ ४७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-४७-७ स्पर्ध्यं बहुमूल्यम् ॥
१-४७-९ विप्रिये कृते त्वां तव गृहे वासं च त्यजेयम् ॥
१-४७-११ श्वतकाकीयैः अनुकूलैः ॥
१-४७-१५ उत्सङ्गे अङ्के ॥
१-४७-१८ कोपो वा गरीयान्धर्मलोपो वा गरीयानिति कोदिद्वयमुपन्यस्य
धर्मलोपमेव गुरुकरोति ।कोपो वेति ॥
१-४७-२२ प्रादुष्कृतः उद्भूतः अग्निहोत्रोऽग्निः यस्मिन्सः
।धर्मसाधनत्वाद्रम्यः।भूतादिप्रचाराद्दारुणः ॥
१-४७-२५ विभावसोः सूर्यस्य ॥
१-४७-३९ संप्रयोगः संबन्ध ।मोघो निष्फलः ॥
सप्तचत्वारिंशोऽध्यायः ॥
४७ ॥

आदिपर्व - अध्याय ०४८
॥ श्रीः ॥
१.४८. अध्यायः ४८

Mahabharata - Adi Parva - Chapter Topics
वासुकेः तद्भगिन्याश्च संवादः ॥ १ ॥
आस्तीकोत्पत्तिः ॥ २ ॥
तन्नामनिर्वचनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-४८-० (२०४५)
सौतिरुवाच।१-४८-०क्ष् (२२७)
गतमात्रं तु भर्तारं जरत्कारुरवेदयत् ।
भ्रातुः सकाशमागत्य यथातथ्यं तपोधन ॥ १-४८-१ (२०४६)
ततः स भुजगश्रेष्ठः श्रुत्वा सुमहदप्रियम् ।
उवाच भगिनीं दीनां तदा दीनतरः स्वयम् ॥ १-४८-२ (२०४७)
वासुकिरुवाच।१-४८-३क्ष् (२२८)
जानासि भद्रे यत्कार्यं प्रदाने कारणं च यत् ।
पन्नगानां हितार्थाय पुत्रस्ते स्यात्ततो यदि ॥ १-४८-३ (२०४८)

स सर्पसत्रात्किल नो मोक्षयिष्यति वीर्यवान् ।
एवं पितामहः पूर्वमुक्तवांस्तु सुरैः सह ॥ १-४८-४ (२०४९)
अप्यस्ति गर्भः सुभगे तस्मात्ते मुनिसत्तमात् ।
न चेच्छाम्यफलं तस्य दारकर्म मनीषिणः ॥ १-४८-५ (२०५०)
कामं च मम न न्याय्यं प्रष्टुं त्वां कार्यमीदृशम् ।
किंतु कार्यगरीयस्त्वात्ततस्त्वाऽहमचूचुदम् ॥ १-४८-६ (२०५१)
दुर्वार्यतां विदित्वा च भर्तुस्तेऽतितपस्विनः ।
नैनमन्वागमिष्यामि कदाचिद्धि शपेत्स माम् ॥ १-४८-७ (२०५२)
आचक्ष्व भद्रे भर्तुः स्वं सर्वमेव विचेष्टितम् ।
उद्धरस्व च शल्यं मे घोरं हृदि चिरस्थितम् ॥ १-४८-८ (२०५३)
जरत्कारुस्ततो वाक्यमित्युक्ता प्रत्यभाषत ।
आश्वासयन्ती सन्तप्तं वासुकिं पन्नगेश्वरम् ॥ १-४८-९ (२०५४)
जरत्कारुरुवाच। १-४८-१०क्ष् (२२९)
पृष्टो मयाऽपत्यहेतोः स महात्मा महातपाः ।
अस्तीत्युत्तरमुद्दिश्य ममेदं गतवांश्च सः ॥ १-४८-१० (२०५५)
स्वैरेष्वपि न तेनाहं स्मरामि वितथं वचः ।
उक्तपूर्वं कुतो राजन्सांपराये स वक्ष्यति ॥ १-४८-११ (२०५६)
न संतापस्त्वया कार्यः कार्यं प्रति भुजंगमे ।
उत्पत्स्यति च ते पुत्रो ज्वलनार्कसमप्रभः ॥ १-४८-१२ (२०५७)
इत्युक्त्वा स हि मां भ्रातर्गतो भर्ता तपोधनः ।
तस्माद्व्येतु परं दुःखं तवेदं मनसि स्थितम् ॥ १-४८-१३ (२०५८)
सौतिरुवाच। १-४८-१४क्ष् (२३०)
एतच्छ्रुत्वा स नागेन्द्रो वासुकिः परया मुदा ।
एवमस्त्विति तद्वाक्यं भगिन्याः प्रत्यगृह्णत ॥ १-४८-१४ (२०५९)
सान्त्वमानार्थदानैश्च पूजया चारुरूपया ।
सोदर्यां पूजयामास स्वसारं पन्नगोत्तमः ॥ १-४८-१५ (२०६०)
ततः प्रववृधे गर्भो महातेजा महाप्रभः ।
यथा मोमो द्विजश्रेष्ठ शुक्लपक्षोदितो दिवि ॥ १-४८-१६ (२०६१)
अथ काले तु सा ब्रह्मन्प्रजज्ञे भुजगस्वसा ।
कुमारं देवगर्भाभं पितृमातृभयापहम् ॥ १-४८-१७ (२०६२)
ववृधे स तु तत्रैव नागराजनिवेशने ।
वेदांश्चाधिजगे साङ्गान्भार्गवच्यवनात्मजात् ॥ १-४८-१८ (२०६३)
चीर्णव्रतो बाल एव बुद्धिसत्त्वगुणान्वितः ।
नाम चास्याभवत्ख्यातं लोकेष्वास्तीक इत्युत ॥ १-४८-१९ (२०६४)
अस्तीत्युक्त्वा गतो यस्मात्पिता गर्भस्थमेव तम् ।
वनं तस्मादिदं तस्य नामास्तीकेति विश्रुतम् ॥ १-४८-२० (२०६५)

स बाल एव तत्रस्थश्चरन्नमितबुद्धिमान् ।
गृहे पन्नगराजस्य प्रयत्नात्परिरक्षितः ॥१-४८-२१ (२०६६)
भगवानिव देवेशः शूलपाणिर्हिरण्मयः ।
विवर्धमानः सर्वांस्तान्पन्नगानभ्यहर्षयत् ॥ ॥१-४८-२२ (२०६७)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि अष्टचत्वारिंशोऽध्यायः
॥ ४८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-४८-६ अचूचुदं कार्यसिद्धिं वक्तुं प्रेरितवान् ॥
१-४८-१० ममेदं कार्यमुद्दिश्य अस्तीत्युत्तरं दत्तवानिति शेषः ॥
१-४८-११ वितथं अनृतं तेन उक्तपूर्वं न स्मरामि ।सांपराये संकटे ॥
१-४८-१७ प्रजज्ञे जनयामास ॥
१-४८-२२ हिरण्मयः दीप्तिमान् ॥
अष्टचत्वारिंशोऽध्यायः ॥
४८ ॥

आदिपर्व - अध्याय ०४९
॥ श्रीः ॥
१.४९. अध्यायः ४९

Mahabharata - Adi Parva - Chapter Topics
जनमेजयमन्त्रिसंवादमुखेन पुनः परीक्षिच्चरितकथनम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-४९-० (२०६८)
शौनक उवाच।१-४९-०क्ष् (२३१)
यदपृच्छत्तदा राजा मन्त्रिणो जनमेजयः ।
पितुः स्वर्गगतिं तन्मे विस्तरेण पुनर्वद ॥१-४९-१ (२०६९)
सौतिरुवाच।१-४९-२क्ष् (२३२)
शृणु ब्रह्मन्यथाऽपृच्छन्मन्त्रिणो नृपतिस्तदा ।
यथा चाख्यातवन्तस्ते निधनं तत्परिक्षितः ॥१-४९-२ (२०७०)
जनमेजय उवाच।१-४९-३क्ष् (२३३)
जानन्ति स्म भवन्तस्तद्यथावृत्तं पितुर्मम ।
आसीद्यथा स निधनं गतः काले महायशाः ॥१-४९-३ (२०७१)
श्रुत्वा भवत्सकाशाद्धि पितुर्वृत्तमशेषतः ।

कल्याणं प्रतिपत्स्यामि विपरीतं न जातुचित् ॥१-४९-४ (२०७२)
सौतिरुवाच। १-४९-५क्ष् (२३४)
मन्त्रिणोऽथाब्रुवन्वाक्यं पृष्टास्तेन महात्मना ।
सर्वे धर्मविदः प्राज्ञा राजानं जनमेजयम् ॥१-४९-५ (२०७३)
मन्त्रिण ऊचुः। १-४९-६क्ष् (२३५)
शृणु पार्थिव यद्ब्रूषे पितुस्तव महात्मनः ।
चरितं पार्थिवेन्द्रस्य यथा निष्ठां गतश्च सः ॥१-४९-६ (२०७४)
धर्मात्मा च महात्मा च प्रजापालः पिता तव ।
आसीदिहायथा वृत्तः स महात्मा शृणुष्व तत् ॥१-४९-७ (२०७५)
चातुर्वर्ण्यं स्वधर्मस्थं स कृत्वा पर्यरक्षत ।
धर्मतो धर्मविद्राजा धर्मो विग्रहवानिव ॥१-४९-८ (२०७६)
ररक्ष पृथिवीं देवीं श्रीमानतुलविक्रमः ।
द्वेष्टारस्तस्य नैवासन्स च द्वेष्टि न कंचन ॥१-४९-९ (२०७७)
समः सर्वेषु भूतेषु प्रजापतिरिवाभवत् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव स्वकर्मसु ॥१-४९-१० (२०७८)
स्थितः सुमनसो राजंस्तेन राज्ञा स्वधिष्ठिताः ।
विधवानाथविकलान्कृपणांश्च बभार सः ॥१-४९-११ (२०७९)
सुदर्शः सर्वभूतानामासीत्सोम इवापरः ।
तुष्टपुष्टजनः श्रीमान्सत्यवाग्दृढविक्रमः ॥१-४९-१२ (२०८०)
धनुर्वेदे तु शिष्योऽभून्नृपः शारद्वतस्य सः ।
गोविन्दस्य प्रियश्चासीत्पिता ते जनमेजय ॥१-४९-१३ (२०८१)
लोकस्य चैव सर्वस्य प्रिय आसीन्महायशाः ।
परिक्षीणेषु कुरुषु सोत्तरायामजीजनत् ॥१-४९-१४ (२०८२)
परिक्षिदभवत्तेन सौभद्रस्यात्मजो बली ।
राजधर्मार्थकुशलो युक्तः सर्वगुणैर्वृतः ॥१-४९-१५ (२०८३)
जितेन्द्रियश्चात्मवांश्च मेधावी धर्मसेविता ।
षड्वर्गजिन्महाबुद्धिर्नीतिशास्त्रविदुत्तमः ॥१-४९-१६ (२०८४)
प्रजा इमास्तव पिता षष्टिवर्षाण्यपालयत् ।
ततो दिष्टान्तमापन्नः सर्वेषां दुःखमावहन् ॥१-४९-१७ (२०८५)
ततस्त्वं पुरुषश्रेष्ठ धर्मेण प्रतिपेदिवान् ।
इदं वर्षसहस्राणि राज्यं कुरुकुलागतम् ।
बाल एवाभिषिक्तस्त्वं सर्वभूतानुपालकः ॥ १-४९-१८ (२०८६)
जनमेजय उवाच। १-४९-१९क्ष् (२३६)
नास्मिन्कुले जातु बभूव राजा
यो न प्रजानां प्रियकृत्प्रियश्च ।
विशेषतः प्रेक्ष्य पितामहानां

वृत्तं महद्वृत्तपरायणानाम् ॥ १-४९-१९ (२०८७)
कथं निधनमापन्नः पिता मम तथाविधः ।
आचक्षध्वं यथावन्मे श्रोतुमिच्छामि तत्त्वतः ॥ १-४९-२० (२०८८)
सौतिरुवाच। १-४९-२१क्ष् (२३७)
एवं संचोदिता राज्ञा मन्त्रिणस्ते नराधिपम् ।
ऊचुः सर्वे यथावृत्तं राज्ञः प्रियहितैषिणः ॥ १-४९-२१ (२०८९)
मन्त्रिण ऊचुः। १-४९-२२क्ष् (२३८)
स राजा पृथिवीपालः सर्वशस्त्रभृतां वरः ।
बभूव मृगयाशीलस्तव राजन्पिता सदा ॥ १-४९-२२ (२०९०)
यथा पाण्डुर्महाबाहुर्धनुर्धरवरो युधि ।
अस्मास्वासज्य सर्वाणि राजकार्याण्यशेषतः ॥ १-४९-२३ (२०९१)
स कदाचिद्वनगतो मृगं विव्याध पत्रिणा ।
विद्ध्वा चान्वसरत्तूर्णं तं मृगं गहने वने ॥ १-४९-२४ (२०९२)
पदातिर्बद्धनिस्त्रिंशस्ततायुधकलापवान् ।
न चाससाद गहने मृगं नष्टं पिता तव ॥ १-४९-२५ (२०९३)
परिश्रान्तो वयस्थश्च षष्टिवर्षो जरान्वितः ।
क्षुधितः स महारण्ये ददर्श मुनिसत्तमम् ॥ १-४९-२६ (२०९४)
स तं पप्रच्छ राजेन्द्रो मुनिं मौनव्रते स्थितम् ।
न च किंचिदुवाचेदं पृष्टोऽपि समुनिस्तदा ॥ १-४९-२७ (२०९५)
ततो राजा क्षुच्छ्रमार्तस्तं मुनिं स्थाणुवत्स्थितम् ।
मौनव्रतधरं शान्तं सद्यो मन्युवशं गतः ॥ १-४९-२८ (२०९६)
न बुबोध च तं राजा मौनव्रतधरं मुनिम् ।
स तं क्रोधसमाविष्टो धर्षयामास ते पिता ॥ १-४९-२९ (२०९७)
मृतं सर्पं धनुष्कोट्या समुत्क्षिप्य धरातलात् ।
तस्य शुद्धात्मनः प्रादात्स्कन्धे भरतसत्तम ॥ १-४९-३० (२०९८)
न चोवाच स मेधावी तमथो साध्वसाधु वा ।
तस्थौ तथैव चाक्रुद्धः सर्पं स्कन्धेन धारयन् ॥ ॥ १-४९-३१ (२०९९)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-४९-४ कल्याणं सर्वलोकहितं चेत्प्रतिपत्स्यामि प्रतीकारं करिष्यामि ॥
१-४९-६ ब्रूषे पृच्छसि ।निष्ठां समाप्तिम् ॥
१-४९-११ स्वधिष्ठिताः सुष्ठुपालिताः ॥
१-४९-१३ शारद्वतस्य कृपाचार्यस्य ॥

१-४९-१४ सोत्तरायमिति पादपूरणार्थः सन्धिः ।अजीजनज्जातः ॥
१-४९-१७ षष्टिवषाणि जन्मतः षष्टिपर्वपर्यन्तं न तु राज्यलाभात् ॥
१-४९-१८ वर्षसहस्राणि चिरकालमित्यर्थः ।पालयितुमिति शेषः ॥
१-४९-२० आचक्षध्वं भ्वादेराकृतिगणत्वाच्छपो न लुक् ॥
१-४९-२६ वयस्थो वृद्धः ॥
एकोनपञ्चाशत्तमोऽध्यायः ॥
४९ ॥

आदिपर्व - अध्याय ०५०
॥ श्रीः ॥
१.५०. अध्यायः ५०

Mahabharata - Adi Parva - Chapter Topics
शून्यारण्ये वृत्तस्य
काश्यपतक्षकवृत्तान्तस्योपलब्धिप्रकारकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-५०-० (२१००)
मन्त्रिण ऊचुः। १-५०-०क्ष् (२३९)
ततः स राजा राजेन्द्र स्कन्धे तस्य भुजंगमम् ।
मुनेः क्षुत्क्षाम आसज्य स्वपुरं प्रययौ पुनः ॥ १-५०-१ (२१०१)
ऋषेस्तस्य तु पुत्रोऽभूद्गवि जातो महायशाः ।
शृङ्गी नाम महातेजास्तिग्मवीर्योऽतिकोपनः ॥ १-५०-२ (२१०२)
ब्रह्माणं समुपागम्य मुनिः पूजां चकार ह ।
सोऽनुज्ञातस्ततस्तत्र शृङ्गी शुश्राव तं तदा ॥ १-५०-३ (२१०३)
सख्युः सकाशात्पितरं पित्रा ते धर्षितं पुरा ।
मृतं सर्पं समासक्तं स्थाणुभूतस्य तस्य तम् ॥ १-५०-४ (२१०४)
वहन्तं राजशार्दूल स्कन्धेनानपकारिणम् ।
तपस्विनमतीवाथ तं मुनिप्रवरं नृप ॥ १-५०-५ (२१०५)
जितेन्द्रियं विशुद्धं च स्थितं कर्मण्यथाद्भुतम् ।
तपसा द्योतितात्मानं स्वेष्वङ्गेषु यतं तदा ॥ १-५०-६ (२१०६)
शुभाचारं शुभकथं सुस्थितं तमलोलुपम् ।
अक्षुद्रमनसूयं च वृद्धं मौनव्रते स्थितम् ।
शरण्यं सर्वभूतानां पित्रा विनिकृतं तव ॥ १-५०-७ (२१०७)
शशापाथ महातेजाः पितरं ते रुषान्वितः ।
ऋषेः पुत्रो महातेजा बालोऽपि स्थविरद्युतिः ॥ १-५०-८ (२१०८)

स क्षिप्रमुदकं स्पृष्ट्वा रोषादिदमुवाच ह ।
पितरं तेऽभिसन्धाय तेजसा प्रज्वलन्निव ॥ १-५०-९ (२१०९)
अनागसि गुरौ यो मे मृतं सर्पवासृजत् ।
तं नागस्तक्षकः क्रुद्धस्तेजसा प्रदहिष्यति ॥ १-५०-१० (२११०)
आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः ।
सप्तरात्रादितः पापं पश्य मे तपसो बलम् ॥ १-५०-११ (२१११)
इत्युक्त्वा प्रययौ तत्र पिता यत्राऽस्य सोऽभवत् ।
दृष्ट्वा च पितरं तस्मै तं शापं प्रत्यवेदयत् ॥ १-५०-१२ (२११२)
स चापि मुनिशार्दूलः प्रेरयामास ते पितुः ।
शिष्यं गौरमुखं नाम शीलवन्तं गुणान्वितम् ॥ १-५०-१३ (२११३)
आचख्यौ सत्त्व विश्रान्तो राज्ञः सर्वमशेषतः ।
शप्तोऽसि मम पुत्रेण यत्तो भव महीपते ॥ १-५०-१४ (२११४)
तक्षकस्त्वां महाराज तेजसाऽसौ दहिष्यति ।
श्रुत्वा च तद्वचो घोरं पिता ते जनमेजय ॥ १-५०-१५ (२११५)
यत्तोऽभवत्परित्रस्तस्तक्षकात्पन्नगोत्तमात् ।
ततस्तस्मिंस्तु दिवसे सप्तमे समुपस्थिते ॥ १-५०-१६ (२११६)
राज्ञः समीपं ब्रह्मर्षिः काश्यपो गन्तुमैच्छत ।
तं ददर्शाथ नागेन्द्रस्तक्षकः काश्यपं तदा ॥ १-५०-१७ (२११७)
तमब्रवीत्पन्नगेन्द्रः काश्यपं त्वरितं द्विजम् ।
क्व भवांस्त्वरितो याति किं च कार्यं चिकीर्षति ॥ १-५०-१८ (२११८)
काश्यप उवाच। १-५०-१९क्ष् (२४०)
यत्र राजा कुरुश्रेष्ठः परिक्षिन्नाम वै द्विज ।
तक्षकेण भुजंगेन धक्ष्यते किल सोऽद्य वै ॥ १-५०-१९ (२११९)
गच्छाम्यहं तं त्वरितः सद्यः कर्तुमपज्वरम् ।
मयाऽभिपन्नं तं चापि न सर्पो धर्षयिष्यति ॥ १-५०-२० (२१२०)
तक्षक उवाच। १-५०-२१क्ष् (२४१)
किमर्थं तं मया दष्टं संजीवयितुमिच्छसि ।
अहं त तक्षको ब्रह्मन्पश्य मे वीर्यमद्भुतम् ॥ १-५०-२१ (२१२१)
न शक्तस्त्वं मया दष्टं तं संजीवयितुं नृपम्। १-५०-२२ (२१२२)
मन्त्रिण ऊचुः ।
इत्युक्त्वा तक्षकस्तत्र सोऽदशद्वै वनस्पतिम् ॥ १-५०-२३क्ष् (२४२)
स दष्टमात्रो नागेन भस्मीभूतोऽभवन्नगः ।
काश्यपश्च ततो राजन्नजीवयत तं नगम् ॥ १-५०-२३ (२१२३)
ततस्तं लोभयामास कामं ब्रूहीति तक्षकः ।
स एवमुक्तस्तं प्राह काश्यपस्तक्षकं पुनः ॥ १-५०-२४ (२१२४)
धनलिप्सुरहं तत्र यामीत्युक्तश्च तेन सः ।

तमुवाच महात्मानं तक्षकः श्लक्ष्णया गिरा ॥१-५०-२५ (२१२५)
यावद्धनं प्रार्थयसे राज्ञस्तस्मात्ततोऽधिकम् ।
गृहाण मत्त एव त्वं सन्निवर्तस्व चानघ ॥१-५०-२६ (२१२६)
स एवमुक्तो नागेन काश्यपो द्विपदां वरः ।
लब्ध्वा वित्तं निववृते तक्षकाद्यावदीप्सितम् ॥१-५०-२७ (२१२७)
तस्मिन्प्रतिगते विप्रे छद्मनोपेत्य तक्षकः ।
तं नृपं नृपतिश्रेष्ठं पितरं धार्मिकं तव ॥१-५०-२८ (२१२८)
प्रासादस्थं यत्तमपि दग्धवान्विषवह्निना ।
ततस्त्वं पुरुषव्याघ्र विजयायाभिषेचितः ॥१-५०-२९ (२१२९)
एतद्दृष्टं श्रुतं चापि यथावन्नृपसत्तम ।
अस्माभिर्निखिलं सर्वं कथितं तेऽतिदारुणम् ॥१-५०-३० (२१३०)
श्रुत्वा चैतं नरश्रेष्ठ पार्थिवस्य पराभवम् ।
अस्य चर्षेरुदङ्कस्य विधत्स्व यदनन्तरम् ॥१-५०-३१ (२१३१)
सौतिरुवाच।१-५०-३२क्ष् (२४३)
एतस्मिन्नेव काले तु स राजा जनमेजयः ।
उवाच मन्त्रिणः सर्वानिदं वाक्यमरिदमः ॥१-५०-३२ (२१३२)
जनमेजय उवाच।१-५०-३३क्ष् (२४४)
अथ तत्कथितं केन यद्वृत्तं तद्वनस्पतौ ।
आश्चर्यभूतं लोकस्य भस्मराशीकृतं तदा ॥१-५०-३३ (२१३३)
यद्वृक्षं जीवयामास काश्यपस्तक्षकेण वै ।
नूनं मन्त्रैर्हतविषो न प्रणश्येत काश्यपात् ॥१-५०-३४ (२१३४)
चिन्तयामास पापात्मा मनसा पन्नगाधमः ।
दष्टं यदि मया विप्रः पार्थिवं जीवयिष्यति ॥१-५०-३५ (२१३५)
तक्षकः संहतविषो लोके यास्यति हास्यताम् ।
विचिन्त्यैवं कृता तेन ध्रुवं तुष्टिर्द्विजस्य वै ॥१-५०-३६ (२१३६)
भविष्यति ह्युपायेन यस्य दास्यामि यातनाम् ।
एकं तु श्रोतुमिच्छामि तद्वृत्तं निर्जने वने ॥१-५०-३७ (२१३७)
संवादं पन्नगेन्द्रस्य काश्यपस्य च कस्तदा ।
श्रुतवान्दृष्टवांश्चापि भवत्सु कथमागतम् ।
श्रुत्वा तस्य विधास्येऽहं पन्नगान्तकरीं मतिम् ॥ १-५०-३८ (२१३८)
मन्त्रिण ऊचुः।१-५०-३९क्ष् (२४५)
शृणु राजन्यथास्माकं येन तत्कथितं पुरा ।
समागतं द्विजेन्द्रस्य पन्नगेन्द्रस्य चाध्वनि ॥१-५०-३९ (२१३९)
तस्मिन्वृक्षे नरः कश्चिदिन्धनार्थाय पार्थिव ।
विचिन्वन्पूर्वमारूढः शुष्कशाखावनस्पतौ ॥१-५०-४० (२१४०)
न बुध्येतामुभौ तौ च नगस्थं पन्नगद्विजौ ।

सह तेनैव वृक्षेण भस्मीभूतोऽभवन्नृप ॥ १-५०-४१ (२१४१)
द्विजप्रभावाद्राजेन्द्र व्यजीवत्स वनस्पतिः ।
तेनागम्य द्विजश्रेष्ठ पुंसाऽस्मासु निवेदितम् ॥ १-५०-४२ (२१४२)
यथा वृत्तं तु तत्सर्वं तक्षकस्य द्विजस्य च ।
एतत्ते कथितं राजन्यथादृष्टं श्रुतं च यत् ।
श्रुत्वा च नृपशार्दूल विधत्स्व यदनन्तरम् ॥ १-५०-४३ (२१४३)
सौतिरुवाच। १-५०-४४क्ष् (२४६)
मन्त्रिणां तु वचः श्रुत्वा स राजा जनमेजयः ।
पर्यतप्यत दुःखार्तः प्रत्यपिंषत्करं करे ॥ १-५०-४४ (२१४४)
निःश्वासमुष्णमसकृद्दीर्घं राजीवलोचनः ।
मुमोचाश्रूणि च तदा नेत्राभ्यां प्ररुदन्नृपः ॥ १-५०-४५ (२१४५)
उवाच च महीपालो दुःखशोकसमन्वितः ।
दुर्धरं बाष्पमुत्सृज्य स्पृष्ट्वा चापो यथाविधि ॥ १-५०-४६ (२१४६)
मुहूर्तमिव च ध्यात्वा निश्चित्य मनसा नृपः ।
अमर्षी मन्त्रिणः सर्वानिदं वचनमब्रवीत् ॥ १-५०-४७ (२१४७)
जनमेजय उवाच। १-५०-४८क्ष् (२४७)
श्रुत्वैतद्भवतां वाक्यं पितुर्मे स्वर्गतिं प्रति ।
निश्चितेयं मम मतिर्या च तां मे निबोधत ।
अनन्तरं च मन्येऽहं तक्षकाय दुरात्मने ॥ १-५०-४८ (२१४८)
प्रतिकर्तव्यमित्येवं येन मे हिंसितः पिता ।
शृङ्गिणं हेतुमात्रं यः कृत्वा दग्ध्वा च पार्थिवम् ॥ १-५०-४९ (२१४९)
इयं दुरात्मता तस्य काश्यपं यो न्यवर्तयत् ।
यद्यागच्छेत्स वै विप्रो ननु जीवेत्पिता मम ॥ १-५०-५० (२१५०)
परिहीयेत किं तस्य यदि जीवेत्स पार्थिवः ।
काश्यपस्य प्रसादेन मन्त्रिणां विनयेन च ॥ १-५०-५१ (२१५१)
स तु वारितवान्मोहात्काश्यपं द्विजसत्तमम् ।
संजिजीवयिषुं प्राप्तं राजानमपराजितम् ॥ १-५०-५२ (२१५२)
महानतिक्रमो ह्येष तक्षकस्य दुरात्मनः ।
द्विजस्य योऽददद्द्रव्यं मा नृपं जीवयेदिति ॥ १-५०-५३ (२१५३)
उत्तङ्कस्य प्रियं कर्तुमात्मनश्च महत्प्रियम् ।
भवतां चैव सर्वेषां गच्छाम्यपचितिं पितुः ॥ ॥ १-५०-५४ (२१५४)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-५०-६ अङ्गेषु बागादिषु यतं नियतं शमदमवन्तमित्यर्थः ॥
१-५०-७ अक्षुद्रं गम्भीरं ।तव पित्रा विनिकृतमपकृतम् ॥
१-५०-२० अभिपन्नं त्रातं धर्षयिष्यत्यमिभविष्यति ॥
१-५०-२४ कामं काम्यमानमर्थम् ॥
१-५०-२७ द्विपदा पुस्त्राणाम् ॥
१-५०-३६ संहतविषः सम्या हतं नष्टं विषं यस्य स तथा
संहृतविष इति पाठे स्पष्टोथः ॥
१-५०-३९ समागणं समागमं भावे निष्ठा ॥
१-५०-४४ करं कर निधाय प्रत्यपिंषत् ॥
१-५०-५२ मोहान्मदीयसमर्थ्याज्ञानात् ॥
१-५०-५४ अपचितिं वैरनिर्यातनम् ॥
पञ्चाशत्तमोऽध्यायः ॥
५० ॥

आदिपर्व - अध्याय ०५१
॥ श्रीः ॥
१.५१. अध्यायः ५१

Mahabharata - Adi Parva - Chapter Topics
जनमेजयस्य सर्पसत्रप्रतिज्ञा ॥ १ ॥
यज्ञसामग्रीसंपादनम् ॥ २ ॥
दीक्षाग्रहणम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-५१-० (२१५५)
सौतिरुवाच। १-५१-०क्ष् (२४८)
एवमुक्त्वा ततः श्रीमान्मन्त्रिभिश्चानुमीदितः ।
आरुरोह प्रतिज्ञां स सर्पसत्राय पार्थिवः ॥ १-५१-१ (२१५६)
ब्रह्मन्भरतशार्दूलो राजा पारिक्षितस्तदा ।
पुरोहितमथाहूय ऋत्विजो वसुधाधिपः ॥ १-५१-२ (२१५७)
अब्रवीद्वाक्यसंपन्नः कार्यसंपत्करं वचः ।
यो मे हिंसितवांस्तातं तक्षकः स दुरात्मवान् ॥ १-५१-३ (२१५८)
प्रतिकुर्यां यथा तस्य तद्भवन्तो ब्रुवन्तु मे ।
अपि तत्कर्म विदितं भवतां येन पन्नगम् ॥ १-५१-४ (२१५९)
तक्षकं संप्रदीप्तेऽग्नौ प्रक्षिपेयं सबान्धवम् ।
यथा तेन पिता मह्यं पूर्वं दग्धो विषाग्निना ॥

तथाऽहमपि तं पापं दग्धुमिच्छामि पन्नगम् ॥ १-५१-५ (२१६०)
ऋत्विज ऊचुः। १-५१-६क्ष् (२४९)
अस्ति राजन्महात्सत्रं त्वदर्थं देवनिर्मितम् ।
सर्वसत्रमिति ख्यातं पुराणे परिपठ्यते ॥ १-५१-६ (२१६१)
आहर्ता तस्य सत्रस्य त्वन्नान्योऽस्ति नराधिप ।
इति पौराणिकाः प्राहुरस्माकं चास्ति स क्रतुः ॥ १-५१-७ (२१६२)
एवमुक्तः स राजर्षिर्मेने दग्धं हि तक्षकम् ।
हुताशनमुखे दीप्ते प्रविष्टमिति सत्तम ॥ १-५१-८ (२१६३)
ततोऽब्रवीन्मन्त्रविदस्तान्राजा ब्राह्मणांस्तदा ।
आहरिष्यामि तत्सत्रं संभाराः संभ्रियन्तु मे ॥ १-५१-९ (२१६४)
सौतिरुवाच। १-५१-१०क्ष् (२५०)
ततस्त ऋत्विजस्तस्य शास्त्रतो द्विजसत्तम ।
तं देशं मापयामासुर्यज्ञायतनकारणात् ॥ १-५१-१० (२१६५)
यथावद्वेदविद्वांसः सर्वे बुद्धेः परंगताः ।
ऋद्ध्या परमया युक्तमिष्टं द्विजगणैर्युतम् ॥ १-५१-११ (२१६६)
प्रभूतधनधान्याढ्यमृत्विग्भिः सुनिषेवितम् ।
निर्माय चापि विधिवद्यज्ञायतनमीप्सितम् ॥ १-५१-१२ (२१६७)
राजानं दीक्षयामासुः सर्पसत्राप्तये तदा ।
इदं चासीत्तत्र पूर्वं सर्पसत्रे भविष्यति ॥ १-५१-१३ (२१६८)
निमित्तं महदुत्पन्नं यज्ञविघ्नकरं तदा ।
यज्ञस्यायतने तस्मिन्क्रियमाणे वचोऽब्रवीत् ॥ १-५१-१४ (२१६९)
स्थपतिर्बुद्धिसंपन्नो वास्तुविद्याविशारदः ।
इत्यब्रवीत्सूत्रधारः सूतः पौराणिकस्तदा ॥ १-५१-१५ (२१७०)
यस्मिन्देशे च काले च मापनेयं प्रवर्तिता ।
ब्राह्मणं कारणं कृत्वा नायं संस्थास्यते क्रतुः ॥ १-५१-१६ (२१७१)
एतच्छ्रुत्वा तु राजासौ प्राग्दीक्षाकालमब्रवीत् ।
क्षत्तारं न हि मे कश्चिदज्ञातः प्रविशेदिति ॥ ॥ १-५१-१७ (२१७२)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-५१-५ मह्यं मम ॥
१-५१-७ त्वत् त्वत्तो नान्योस्ति ॥
१-५१-९ आहरिष्यामि करिष्यामि । संभ्रियन्तु संभ्रियन्ताम् ॥
१-५१-१३ भविष्यति भाविनि ॥

१-५१-१५ सूतो जात्या पौराणिकः शिल्पागमवेत्ता ॥
१-५१-१६ नायं संस्थास्यते न समाप्स्यते ॥
१-५१-१७ दीक्षाकालस्य प्रागिति प्राग्दी क्षाकालं क्षत्तारं द्वास्थम् ॥
एकपञ्चाशत्तमोऽध्यायः ॥
५१ ॥

आदिपर्व - अध्याय ०५२
॥ श्रीः ॥
१.५२. अध्यायः ५२

Mahabharata - Adi Parva - Chapter Topics
अग्नौ सर्पपतनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-५२-० (२१७३)
सौतिरुवाच। १-५२-०क्ष् (२५१)
ततः कर्म प्रववृते सर्पसत्रविधानतः ।
पर्यक्रामंश्च विदिवत्स्वे स्वे कर्मणि याजकाः ॥ १-५२-१ (२१७४)
प्रावृत्य कृष्णवासांसि धूम्रसंरक्तलोचनाः ।
जुहुवुर्मन्त्रवच्चैव समिद्धं जातवेदसम् ॥ १-५२-२ (२१७५)
कम्पयन्तश्च सर्वेषामुरगाणां मनांसि च ।
सर्पानाजुहुवुस्तत्र सर्वानग्निमुखे तदा ॥ १-५२-३ (२१७६)
ततः सर्पाः समापेतुः प्रदीप्ते हव्यवाहने ।
विचेष्टमानाः कृपणमाह्वयन्तः परस्परम् ॥ १-५२-४ (२१७७)
विस्फुरन्तः श्वसन्तश्च वेष्टयन्तः परस्परम् ।
पुच्छैः शिरोभिश्च भृशं चित्रभानुं प्रपेदिरे ॥ १-५२-५ (२१७८)
श्वेताः कृष्णाश्च नीलाश्च स्थविराः शिशवस्तथा ।
नदन्तो विविधान्नादान्पेतुर्दीप्ते विभावसौ ॥ १-५२-६ (२१७९)
क्रोशयोजनमात्रा हि गोकर्णस्य प्रमाणतः ।
पतन्त्यजस्रं वेगेन वह्नावग्निमतां वर ॥ १-५२-७ (२१८०)
एवं शतसहस्राणि प्रयुतान्यर्बुदानि च ।
अवशानि विनष्टानि पन्नगानां तु तत्र वै ॥ १-५२-८ (२१८१)
तुरगा इव तत्रान्ये हस्तिहस्ता इवापरे ।
मत्ता इव च मातङ्गा महाकाया महाबलाः ॥ १-५२-९ (२१८२)
उच्चावचाश्च बहवो नानावर्णा विषोल्बणाः ।
घोराश्च परिघप्रख्या दन्दशूका महाबलाः ।

प्रपेतुरग्नावुरगा मातृवाग्दण्डपीडिताः ॥ ॥ १-५२-१० (२१८३)

इति श्रीमन्माहाभारते आदिपर्वणि आस्तीकपर्वणि
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५२-१ पर्यक्रामन् पराक्रान्तवन्तः ॥
१-५२-२ मन्त्रवन्मन्त्रयुक्तं यथा स्यात्तथा ॥
१-५२-३ आजुहुवुः आहूतवन्तः ॥
१-५२-५ चित्रभानुमग्निम् ॥
१-५२-७ प्रमाणतः प्रमाणं प्राप्य ॥
द्विपञ्चाशत्तमोऽध्यायः ॥
५२ ॥

आदिपर्व - अध्याय ०५३
॥ श्रीः ॥
१.५३. अध्यायः ५३

Mahabharata - Adi Parva - Chapter Topics
ऋत्विगादिनामकथनम् ॥ १ ॥
इन्द्रकृतं तक्षकाश्वासनम् ॥ २ ॥
वासुकेः स्वभगिन्या संवादः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-५३-० (२१८४)
शौनक उवाच। १-५३-०क्ष् (२५२)
सर्पसत्रे तदा राज्ञः पाण्डवेयस्य धीमतः ।
जनमेजयस्य के त्वासन्नृत्विजः परमर्षयः ॥ १-५३-१ (२१८५)
के सदस्या बभूवुश्च सर्पसत्रे सुदारुणे ।
विषादजननेऽत्यर्थं पन्नगानां महाभय ॥ १-५३-२ (२१८६)
सर्वं विस्तरशस्तात भवाञ्छंसितुमर्हति ।
सर्पसत्रविधानज्ञविज्ञेयाः के च सूतज ॥ १-५३-३ (२१८७)
सौतिरुवाच। १-५३-४क्ष् (२५३)
हन्त ते कथयिष्यामि नामानीह मनीषिणाम् ।
ये ऋत्विजः सदस्याश्च तस्यासन्नृपतेस्तदा ॥ १-५३-४ (२१८८)
तत्र होता बभूवाथ ब्राह्मणश्चण्डभार्गवः ।

च्यवनस्यान्वये ख्यातो जातो वेदविदां वरः ॥ १-५३-५ (२१८९)
उद्गाता ब्राह्मणो वृद्धो विद्वान्कौत्सोऽथ जैमिनिः ।
ब्रह्माऽभवच्छार्ङ्गरवोऽथाध्वर्युश्चापि पिङ्गलः ॥ १-५३-६ (२१९०)
सदस्यश्चाभवद्व्यासः पुत्रशिष्यसहायवान् ।
उद्दालकः प्रमतकः श्वेतकेतुश्च पिङ्गलः ॥ १-५३-७ (२१९१)
असितो देवलश्चैव नारदः पर्वतस्तथा ।
आत्रेयः कुम्डजठरौ द्विजः कालघटस्तथा ॥ १-५३-८ (२१९२)
वात्स्यः श्रुतश्रवा वृद्धो जपस्वाध्यायशीलवान् ।
कोहलो देवशर्मा च मौद्गल्यः समसौरभः ॥ १-५३-९ (२१९३)
एते चान्ये च बहवो ब्राह्मणा वेदपारगाः ।
सदस्याश्चाभवंस्तत्र सत्रे पारिक्षितस्य ह ॥ १-५३-१० (२१९४)
जुह्वत्स्वृत्विक्ष्वथ तदा सर्पसत्रे महाक्रतौ ।
अहयः प्रापतंस्तत्र घोराः प्राणिभयावहाः ॥ १-५३-११ (२१९५)
वसामेदोवहाः कुल्या नागानां संप्रवर्तिताः ।
ववौ गन्धश्च तुमुलो दह्यतामनिशं तदा ॥ १-५३-१२ (२१९६)
पततां चैव नागानां धिष्ठितानां तथाम्बरे ।
अश्रूयतानिशं शब्दः पच्यतां चाग्निना भृशम् ॥ १-५३-१३ (२१९७)
तक्षकस्तु स नागेन्द्रः पुरंदरनिवेशनम् ।
गतः श्रुत्वैव राजानं दीक्षितं जनमेजयम् ॥ १-५३-१४ (२१९८)
ततः सर्वं यथावृत्तमाख्याय भुजगोत्तमः ।
अगच्छच्छरणं भीत आगस्कृत्वा पुरंदरम् ॥ १-५३-१५ (२१९९)
तमिन्द्रः प्राह सुप्रीतो न तवास्तीह तक्षक ।
भयं नागेन्द्र तस्माद्वै सर्पसत्रात्कदाचन ॥ १-५३-१६ (२२००)
प्रसादितो मया पूर्वं तवार्थाय पितामहः ।
तस्मात्तव भयं नास्ति व्येतु तेनसो ज्वरः ॥ १-५३-१७ (२२०१)
सौतिरुवाच। १-५३-१८क्ष् (२५४)
एवमाश्वासितस्तेन ततः स भुजगोत्तमः ।
उवास भवने तस्मिञ्शक्रस्य मुदितः सुखी ॥ १-५३-१८ (२२०२)
अजस्रं निपतत्स्वग्नौ नागेषु भृशदुःखितः ।
अल्पशेषपरीवारो वासुकिः पर्यतप्यत ॥ १-५३-१९ (२२०३)
कश्मलं चाविशद्घोरं वासुकिं पन्नगोत्तमम् ।
स घूर्णमानहृदयो भगिनीमिदमब्रवीत् ॥ १-५३-२० (२२०४)
दह्यन्तेऽङ्गानि मे भद्रे न दिशः प्रतिभान्ति माम् ।
सीदामीव च संमोहाद्घूर्णतीव च मे मनः ॥ १-५३-२१ (२२०५)
दृष्टिर्भ्राम्यति मेऽतीव हृदयं दीर्यतीव च ।
पतिष्याम्यवशोऽद्याहं तस्मिन्दीप्ते विभावसौ ॥ १-५३-२२ (२२०६)

पारिक्षितस्य यज्ञोऽसौ वर्ततेऽस्मज्जिघांसया ।
व्यक्तं मयाऽभिगन्तव्यं प्रेतराजनिवेशनम् ॥ १-५३-२३ (२२०७)
अयं स कालः संप्राप्तो यदर्थमसि मे स्वसः ।
जरत्करौ(पुरा)मयादत्तात्रायस्वास्मान्सबान्धवान् ॥ १-५३-२४ (२२०८)
आस्तीकः किल यज्ञं तं वर्तन्तं भुजगोत्तमे ।
प्रतिषेत्स्यति मां पूर्वं स्वयमाह पितामहः ॥ १-५३-२५ (२२०९)
तद्वत्से ब्रूहि वत्सं स्वं कुमारं वृद्धसंमतम् ।
ममाद्य त्वं सभृत्यस्य मोक्षार्थं वेदवित्तमम् ॥ ॥ १-५३-२६ (२२१०)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५३-२ सदस्या उपद्रष्टारः ॥
१-५३-३ विधानज्ञेषु विज्ञेयाः श्रेष्ठाः ॥
१-५३-१३ पच्यतां पच्यमानानाम् ॥
१-५३-१५ आगः अपरांध कृत्वा ॥
त्रिपञ्चाशत्तमोऽध्यायः ॥
५३ ॥

आदिपर्व - अध्याय ०५४
॥ श्रीः ॥
१.५४. अध्यायः ५४

Mahabharata - Adi Parva - Chapter Topics
आस्तीकस्य स्वमात्रा सवादः । वासुकेराश्वासनं च ॥ १ ॥
आस्तीकस्य सर्पसत्रं प्रति गमनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-५४-० (२२११)
सौतिरुवाच । १-५४-०क्ष् (२५५)
तत आहूय पुत्रं स्वं जरत्कारुर्भुजंगमा ।
वासुकेर्नागराजस्य वचनादिदमब्रवीत् ॥ १-५४-१ (२२१२)
अहं तव पितुः पुत्र भ्रात्रा दत्ता निमित्ततः ।
कालः स चायं संप्राप्तस्तत्कुरुष्व यथातथम् ॥ १-५४-२ (२२१३)
आस्तीक उवाच । १-५४-३क्ष् (२५६)

किंनिमित्तं मम पितुर्दत्ता त्वं मातुलेन मे ।
तन्ममाचक्ष्व तत्त्वेन श्रुत्वा कर्ताऽस्मि तत्तथा ॥ १-५४-३ (२२१४)
सौतिरुवाच। १-५४-४क्ष् (२५७)
तत आचष्ट सा तस्मै बान्धवानां हितैषिणी ।
भगिनी नागराजस्य जरत्कारुरविक्लबा ॥ १-५४-४ (२२१५)
जरत्कारुरुवाच। १-५४-५क्ष् (२५८)
पन्नगानामशेषाणां माता कद्रूरिति श्रुता ।
तया शप्ता रुषितया सुता यस्मान्निबोध तत् ॥ १-५४-५ (२२१६)
उच्चैः श्रवाः सोऽश्वराजो यन्मिथ्या न कृतो मम ।
विनतार्थाय पणिते दासभावाय पुत्रकाः ॥ १-५४-६ (२२१७)
जनमेजयस्य वो यज्ञे धक्ष्यत्यनिलसारथिः ।
तत्र पञ्चत्वमापन्नाः प्रेतलोकं गमिष्यथ ॥ १-५४-७ (२२१८)
तां च शप्तवतीं देवः साक्षाल्लोकपितामहः ।
एवमस्त्विति तद्वाक्यं प्रोवाचानु मुमोद च ॥ १-५४-८ (२२१९)
वासुकिश्चापि तच्छ्रुत्वा पितामहवचस्तदा ।
अमृते मथिते तात देवाञ्छरणमीयिवान् ॥ १-५४-९ (२२२०)
सिद्धार्थाश्च सुराः सर्वे प्राप्यामृतमनुत्तमम् ।
भ्रातरं मे पुरस्कृत्य पितामहमुपागमन् ॥ १-५४-१० (२२२१)
ते तं प्रसादयामासुः सुराः सर्वेऽब्जसंभवम् ।
राज्ञा वासुकिना सार्धं शापोऽसौन भवेदिति ॥ १-५४-११ (२२२२)
देवा ऊचुः। १-५४-१२क्ष् (२५९)
वासुकिर्नागराजोऽयं दुःखितो ज्ञातिकारणात् ।
अभिशापः स मातुस्तु भगवन्न भवेत्कथम् ॥ १-५४-१२ (२२२३)
ब्रह्मोवाच। १-५४-१३क्ष् (२६०)
जरत्कारुर्जरत्कारुं यां भार्यां समवाप्स्यति ।
तत्र जातो द्विजः शापान्मोक्षयिष्यति पन्नगान् ॥ १-५४-१३ (२२२४)
एतच्छ्रुत्वा तु वचनं वासुकिः पन्नगोत्तमः ।
प्रादान्माममरप्रख्य तव पित्रे महात्मने ॥ १-५४-१४ (२२२५)
प्रागेवानागते काले तस्मात्त्व मय्यजायथाः ।
अयं स कालः संप्राप्तो भयान्नस्त्रातुमर्हसि ॥ १-५४-१५ (२२२६)
भ्रातरं चापि मे तस्मात्त्रातुमर्हसि पावकात् ।
न मोघं तु कृतं तत्स्याद्यदहं तव धीमते ।
पित्रे दत्ता विमोक्षार्थं कथं वा पुत्र मन्यसे ॥ १-५४-१६ (२२२७)
सौतिरुवाच। १-५४-१७क्ष् (२६१)
एवमुक्तस्तथेत्युक्त्वा सास्तीको मातरं तदा ।
अब्रवीद्दुःखसंतप्तं वासुकिं जीवयन्निव ॥ १-५४-१७ (२२२८)

अहं त्वां मोक्षयिष्यामि वासुके पन्नगोत्तम ।
तस्माच्छापान्महासत्त्व सत्यमेतद्ब्रवीमि ते ॥ १-५४-१८ (२२२९)
भव स्वस्थमना नाग न हि ते विद्यते भयम् ।
प्रयतिष्ये तथा राजन्यथा श्रेयो भविष्यति ॥ १-५४-१९ (२२३०)
न मे वागनृतं प्राह स्वैरेष्वपि कुतोऽन्यथा ।
तं वै नृपवरं गत्वा दीक्षितं जनमेजयम् ॥ १-५४-२० (२२३१)
वाग्भिर्मङ्गलयुक्ताभिस्तोषयिष्येऽद्य मातुल ।
यथा स यज्ञो नृपतेर्निवर्त्स्यति सत्तम ॥ १-५४-२१ (२२३२)
स संभावय नागेन्द्र मयि सर्वं महामते ।
न ते मयि मनो जातु मिथ्या भवितुमर्हति ॥ १-५४-२२ (२२३३)
वासुकिरुवाच। १-५४-२३क्ष् (२६२)
आस्तीक परिघूर्णामि हृदयं मे विदीर्यते ।
दिशो न प्रतिजानामि ब्रह्मदण्डनिपीडितः ॥ १-५४-२३ (२२३४)
आस्तीक उवाच। १-५४-२४क्ष् (२६३)
न सन्तापस्त्वया कार्यः कथंचित्पन्नगोत्तम ।
प्रदीप्ताग्नेः समुत्पन्नं नाशयिष्यामि ते भयम् ॥ १-५४-२४ (२२३५)
ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम् ।
नाशयिष्यामि माऽत्र त्वं भयंकार्षीः कथंचन ॥ १-५४-२५ (२२३६)
सौतिरुवाच। १-५४-२६क्ष् (२६४)
ततः स वासुकेर्घोरमपनीय मनोज्वरम् ।
आधाय चात्मनोऽङ्गेषु जगाम त्वरितो भृशम् ॥ १-५४-२६ (२२३७)
जनमेजयस्य तं यज्ञं सर्वैः समुदितं गुणैः ।
मोक्षाय भुजगेन्द्राणामास्तीको द्विजसत्तमः ॥ १-५४-२७ (२२३८)
स गत्वाऽपश्यदास्तीको यज्ञायतनमुत्तमम् ।
वृतं सदस्यैर्बहुभिः सूर्यवह्निसमप्रभैः ॥ १-५४-२८ (२२३९)
स तत्र वारितो द्वास्थैः प्रविशन्द्विजसत्तमः ।
अभितुष्टाव तं यज्ञं प्रवेशार्थी परंतपः ॥ १-५४-२९ (२२४०)
स प्राप्य यज्ञायतनं वरिष्ठं
द्विजोत्तमः पुण्यकृतां वरिष्ठः ।
तुष्टाव राजानमनन्तकीर्ति-
मृत्विक्सदस्यांश्च तथैव चाग्निम् ॥ ॥ १-५४-३० (२२४१)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५४-४ आचष्ट व्यक्तं कथितवती ।अविक्लबा अनाकुला ॥
१-५४-१२ अभिशापः शापः ॥
१-५४-१७ आस्तीक इति पादपूरणार्थः सुलोपः ॥
१-५४-२२ मयि अयमस्मान्मोचयिष्यत्येवरूपो मनःसंकल्पो जातु कदापि मिथ्याऽन्यथा न ॥
१-५४-२३ ब्रह्म वेदः मातृदेवो भवेति मातुराज्ञकरत्वविधानपरस्तदन्यथाकरणप्रयुक्तो दण्डो मातृशापरूपो ब्रह्मदण्डः ॥
१-५४-२६ वासुकेश्चिन्ताज्वरं स्वयं गृहीत्वेत्यर्थः ॥
चतुःपञ्चाशत्तमोऽध्यायः ॥
५४ ॥

आदिपर्व - अध्याय ०५५
॥ श्रीः ॥
१.५५. अध्यायः ५५

Mahabharata - Adi Parva - Chapter Topics
आस्तीककृता जनमेजययज्ञप्रशंसा ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-५५-० (२२४२)
आस्तीक उवाच।१-५५-०क्ष् (२६५)
सोमस्य यज्ञो वरुणस्य यज्ञः
प्रजापतेर्यज्ञ आसीत्प्रयागे ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-१ (२२४३)
शक्रस्य यज्ञः शतसङ्ख्य उक्त-
स्तथापरं तुल्यसङ्ख्यं शतं वै ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-२ (२२४४)
यमस्य यज्ञो हरिमेधसश्च
यथा यज्ञो रन्तिदेवस्य राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-३ (२२४५)
गयस्य यज्ञः शशबिन्दोश्च राज्ञो
यज्ञस्तथा वैश्रवणस्य राज्ञः ।

तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-४ (२२४६)
नृगस्य यज्ञस्त्वजमीढस्य चासी-
द्यथा यज्ञो दाशरथेश्च राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-५ (२२४७)
यज्ञः श्रुतो दिवि देवस्य सूनो-
र्युधिष्ठिरस्याजमीढस्य राज्ञः ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-६ (२२४८)
कृष्णस्य यज्ञः सत्यवत्याः सुतस्य
स्वयं च कर्म प्रचकार यत्र ।
तथा यज्ञोऽयं तव भारताग्र्य
पारिक्षित स्वस्ति नोऽस्तु प्रियेभ्यः ॥ १-५५-७ (२२४९)
इमे च ते सूर्यसमानवर्चसः
समासते वृत्रहणः क्रतुं यथा ।
नैषां ज्ञातुं विद्यते ज्ञानमद्य
दत्तं येभ्यो न प्रणश्येत्कदाचित् ॥ १-५५-८ (२२५०)
ऋत्विक्समो नास्ति लोकेषु चैव
द्वैपायनेनेति विनिश्चितं मे ।
एतस्य शिष्या हि क्षितिं संचरन्ति
सर्वर्त्विजः कर्मसु स्वेषु दक्षाः ॥ १-५५-९ (२२५१)
विभावसुश्चित्रभानुर्महात्मा
हिरण्यरेता हुतभुक्कृष्णवर्त्मा ।
प्रदक्षिमावर्तशिखः प्रदीप्तो
हव्यं तवेदं हुतभुग्वष्टि देवः ॥ १-५५-१० (२२५२)
नैह त्वदन्यो विद्यते जीवलोके
समो नृपः पालयिता प्रजानाम् ।
धृत्या च ते प्रतीमनाः सदाहं
त्वं वा वरुणो धर्मराजो यमो वा ॥ १-५५-११ (२२५३)
शक्रः साक्षाद्वज्रपाणिर्यथेह
त्राता लोकेऽस्मिंस्त्वं तथेह प्रजानाम् ।
मतस्त्वं नः पुरुषेन्द्रेह लोके
न च त्वदन्यो भूपतिरस्ति जज्ञे ॥ १-५५-१२ (२२५४)
खट्वाङ्गनाभगदिलीपकल्प
ययातिमान्धातृसमप्रभाव ।

आदित्यतेजःप्रतिमानतेजा
भीष्मो यथा राजसि सुव्रतस्त्वम् ॥ १-५५-१३ (२२५५)
वाल्मीकिवत्ते निभृतं स्ववीर्यं
वसिष्ठवत्ते नियतश्च कोपः ।
प्रभुत्वमिन्द्रत्वसमं मतं मे
द्युतिश्च नारायणवद्विभाति ॥ १-५५-१४ (२२५६)
यमो यथा धर्मविनिश्चयज्ञः
कृष्णो यथा सर्वगुणोपपन्नः ।
श्रियां निवासोऽसि यथा वसूनां
निधानभूतोऽसि तथा क्रतूनाम् ॥ १-५५-१५ (२२५७)
दम्भोद्भवेनासि समो बलेन
रामो यथा शस्त्रविदस्त्रविच्च ।
और्वत्रिताभ्यामसि तुल्यतेजा
दुष्प्रेक्षणीयोऽसि भगीरथेन ॥ १-५५-१६ (२२५८)
सौतिरुवाच। १-५५-१७क्ष् (२६६)
एवं स्तुताः सर्व एव प्रसन्ना
राजा सदस्या ऋत्विजो हव्यवाहः ।
तेषां दृष्ट्वा भावितानीङ्गितानि
प्रोवाच राजा जनमेजयोऽथ ॥ ॥ १-५५-१७ (२२५९)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-५५-६ देवस्य धर्मराजस्य ॥
१-५५-८ ज्ञानशब्दः कर्मव्युत्पन्नो ज्ञेयवचनः अद्य संप्रति ज्ञातुं ज्ञेयं न विद्यते सर्वस्य ज्ञातत्वादित्यर्थः ॥
१-५५-१० अग्निं स्तौति विभावसुरिति । वष्टि कामयते ॥
१-५५-१२ न च त्वदन्यस्त्राता भूपतिरस्ति इदानीं न च जज्ञे प्रागपि ॥
१-५५-१४ निभृतं गुप्तं । नियतो निगृहीतः ॥
१-५५-१५ वसवोऽष्टौ तत्संबन्धिनीनां श्रियाम् ॥
१-५५-१६ रामो भार्गवः और्वत्रितावृषी ॥
१-५५-१७ भावितानि मनसि संकल्पितानि । भारतस्त्विङ्गितानीति पाठे भारतो राजा भरतवंशजत्वात् ॥
पञ्चपञ्चाशत्तमोऽध्यायः ॥
५५ ॥

आदिपर्व - अध्याय ०५६
॥ श्रीः ॥
१.५६. अध्यायः ५६

Mahabharata - Adi Parva - Chapter Topics
प्रशंसया तुष्टस्य जनमेजयस्य ऋत्विग्भिः संवादः ॥ १ ॥
ऋत्विगाह्वानेन सतक्षकस्येन्द्रस्यागमनम् ॥ २ ॥
भयेनेन्द्रे पलायितेऽग्निसमीपे तक्षकागमनम् ॥ ३ ॥
आस्तीकस्य यज्ञसमाप्तिवरयाचनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-५६-० (२२६०)
जनमेजय उवाच। १-५६-०क्ष् (२६७)
बालोऽप्ययं स्थविर इवावभाषते
नायं बालः स्थविरोऽयं मतो मे ।
इच्छाम्यहं वरमस्मै प्रदातुं
तन्मे विप्राः संविदध्वं यथावत् ॥ १-५६-१ (२२६१)
सदस्या ऊचुः। १-५६-२क्ष् (२६८)
बालोऽपि विप्रो मान्य एवेह राज्ञा
ग्यश्चाविद्वान्यश्च विद्वान्यथावत् ।
प्रसादयैनं त्वरितो नरेन्द्र
द्विजातिवर्यं सकलार्थसिद्धये।'
सर्वान्कामांस्त्वत्त एवार्हतेऽद्य
यथा च नस्तक्षक एति शीघ्रम् ॥ १-५६-२ (२२६२)
सौतिरुवाच। १-५६-३क्ष् (२६९)
व्याहर्तुकामे वरदे नृपे द्विजं
वरं वृणीष्वेति ततोऽब्युवाच ।
होता वाक्यं नातिहृष्टान्तरात्मा
कर्मण्यस्मिंस्तक्षको नैति तावत् ॥ १-५६-३ (२२६३)
जनमेजय उवाच। १-५६-४क्ष् (२७०)
यथा चेदं कर्म समाप्यते मे
यथा च वै तक्षक एति शीघ्रम् ।
तथा भवन्तः प्रयतन्तु सर्वे
परं शक्त्या स हि मे विद्विषाणः ॥ १-५६-४ (२२६४)
ऋत्विज ऊचुः। १-५६-५क्ष् (२७१)

यथा शस्त्राणि नः प्राहुर्यथा शंसति पावकः ।
इन्द्रस्य भवने राजंस्तक्षको भयपीडितः ॥ १-५६-५ (२२६५)
यथा सूतो लोहिताक्षो महात्मा
पौराणिको वेदितवान्पुरस्तात् ।
स राजानं प्राह पृष्टस्तदानीं
यथाहुर्विप्रास्तद्वदेतन्नृदेव ॥ १-५६-६ (२२६६)
पुराणमागम्य ततो ब्रवीम्यहं
दत्तं तस्मै वरमिन्द्रेण राजन् ।
वसेह त्वं मत्सकाशे सुगुप्तो
न पावकस्त्वां प्रदहिष्यतीति ॥ १-५६-७ (२२६७)
एतच्छ्रुत्वा दीक्षितस्तप्यमान
आस्ते होतारं चोदयन्कर्म काले ।
ग्इन्द्रेण सार्धं तक्षकं पातयध्वं
विभावसौ न विमुच्येत नागः।'
होता च यत्तोऽस्याजुहावाथ मन्त्रै-
रथो महेन्द्रः स्वयमाजगाम ॥ १-५६-८ (२२६८)
ग्आयातु चेन्द्रोऽपि सतक्षकः पते-
द्विभावसौ नागराजेन तूर्णम् ।
जम्भस्य हन्तेति जुहाव होता
तदा जगामाहिदत्ताभयः प्रभुः ॥' १-५६-९ (२२६९)
विमानमारुह्य महानुभावः
सर्वैर्देवैः परिसंस्तूयमानः ।
बलाहकैश्चाप्यनुगम्यमानो
विद्याधरैरप्सरसां गणैश्च
ग्नागस्य नाशो मम चैव नाशो
भविष्यतीत्येव विचिन्तयानः ॥' १-५६-१० (२२७०)
तस्योत्तरीये निहितः स नागो
भयोद्विग्नः शर्म नैवाभ्यगच्छत् ।
ततो राजा मन्त्रविदोऽब्रवीत्पुनः
क्रुद्धो वाक्यं तक्षकस्यान्तमिच्छन् ॥ १-५६-११ (२२७१)
जनमेजय उवाच। १-५६-१२क्ष् (२७२)
इन्द्रस्य भवने विप्रा यदि नागः स तक्षकः ।
तमिन्द्रेणैव सहितं पातयध्वं विभावसौ ॥ १-५६-१२ (२२७२)
सौतिरुवाच। १-५६-१३क्ष् (२७३)
जनमेजयेन राज्ञा तु नोदितस्तक्षकं प्रति ।
होता जुहाव तत्रस्थं तक्षकं पन्नगं तथा ॥ १-५६-१३ (२२७३)

हूयमाने तथा चैव तक्षकः सपुरन्दरः ।
आकाशे ददृशे तत्र क्षणेन व्यथितस्तदा ॥ १-५६-१४ (२२७४)
पुरन्दरस्तु तं यज्ञं दृष्ट्वोरुभयमाविशत् ।
हित्वा तु तक्षकं त्रस्तः स्वमेव भवनं ययौ ॥ १-५६-१५ (२२७५)
इन्द्रे गते तु राजेन्द्र तक्षको भयमोहितः ।
मन्त्रशक्त्या पावकार्चिस्समीपमवशो गतः ।
ग्तं दृष्ट्वा ऋत्विजस्तत्र वचनं चेदमब्रुवन्'॥ १-५६-१६ (२२७६)
ऋत्विज ऊचुः। १-५६-१७क्ष् (२७४)
अयमायाति तूर्णं स तक्षकस्ते वशं नृप ।
श्रूयतेऽस्य महान्नादो नदतो भैरवं रवम् ॥ १-५६-१७ (२२७७)
नूनं मुक्तो वज्रभृता स नागो
भ्रष्टो नाकान्मन्त्रवित्रस्तकायः ।
घूर्णन्नाकाशे नष्टसंज्ञोऽभ्युपैति
तीव्रान्निश्वासान्निश्वसन्पन्नगेन्द्रः ॥ १-५६-१८ (२२७८)
वर्तते तव राजेन्द्र कर्मैतद्विधिवत्प्रभो ।
अस्मै तु द्विजमुख्याय वरं त्वं दातुमर्हसि ॥ १-५६-१९ (२२७९)
जनमेजय उवाच। १-५६-२०क्ष् (२७५)
बालाभिरूपस्य तवाप्रमेय
वरं प्रयच्छामि यथानुरूपम् ।
वृणीष्व यत्तेऽभिमतं हृदि स्थितं
तत्ते प्रदास्याम्यपि चेददेयम् ॥ १-५६-२० (२२८०)
सौतिरुवाच। १-५६-२१क्ष् (२७६)
पतिष्यमाणे नागेन्द्रे तक्षके जातवेदसि ।
इदमन्तरमित्येवं तदास्तीकोऽभ्यचोदयत् ॥ १-५६-२१ (२२८१)
आस्तीक उवाच। १-५६-२२क्ष् (२७७)
वरं ददासि चेन्मह्यं वृणोमि जनमेजय ।
सत्रं ते विरमत्वेतन्न पतेयुरिहोरगाः ॥ १-५६-२२ (२२८२)
एवमुक्तस्तदा तेन ब्रह्मन्पारिक्षितस्तु सः ।
नातिहृष्टमनाश्चेदमास्तीकं वाक्यमब्रवीत् ॥ १-५६-२३ (२२८३)
सुवर्णं रजतं गाश्च यच्चान्यन्मन्यसे विभो ।
तत्ते दद्यां वरं विप्र न निवर्तेत्क्रतुर्मम ॥ १-५६-२४ (२२८४)
आस्तीक उवाच। १-५६-२५क्ष् (२७८)
सुवर्णं रजतं गाश्च न त्वां राजन्वृणोम्यहम् ।
सत्रं ते विरमत्वेतत्स्वस्ति मातृकुलस्य नः ॥ १-५६-२५ (२२८५)
सौतिरुवाच। १-५६-२६क्ष् (२७९)
आस्तीकेनैवमुक्तस्तु राजा पारिक्षितस्तदा ।

पुनःपुनरुवाचेदमास्तीकं वदतां वरः ॥१-५६-२६ (२२८६)
अन्यं वरय भद्रं ते वरं द्विज्वरोत्तम ।
अयाचत न चाप्यन्यं वरं स भृगुनन्दन ॥१-५६-२७ (२२८७)
ततो वेदविदस्तात सदस्याः सर्व एव तम् ।
राजानमूचुः सहिता लभतां ब्राह्मणो वरम् ॥ ॥१-५६-२८ (२२८८)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
षट्पञ्चाशत्तमोऽध्यायः ॥५६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५६-१ संविदध्वमैकमत्यं कुरुध्वम् ।संवदध्वमित्यपि पाठः ॥
१-५६-४ विद्विषाणः विद्वेषं कृतवान् ।लिटः कान्च। अभ्यासलोप आर्षः ॥
१-५६-५ शस्त्राणि शंसनमन्त्रदेवताः ॥
१-५६-७ पुराणं पूर्वकल्पीयवृत्तान्तम् ।आगम्य ज्ञात्वा ॥
१-५६-१५ भयं आविशत् प्राप्तवान् ॥
१-५६-२० हे बाल ॥
षट्पञ्चाशत्तमोऽध्यायः ॥
५६ ॥

आदिपर्व - अध्याय ०५७
॥ श्रीः ॥
१.५७. अध्यायः ५७

Mahabharata - Adi Parva - Chapter Topics
सर्पसत्रे हतानां नागानां नामकथनम् ॥१ ।
Mahabharata - Adi Parva - Chapter Text

१-५७-० (२२८९)
शौनक उवाच।१-५७-०क्ष् (२८०)
ये सर्पाः सर्पसत्रेऽस्मिन्पतिता हव्यवाहने ।
तेषां नामानि सर्वेषां श्रोतुमिच्छामि सूतज ॥१-५७-१ (२२९०)
सौतिरुवाच।१-५७-२क्ष् (२८१)
सहस्राणि बहून्यस्मिन्प्रयुतान्यर्बुदानि च ।
न शक्यं परिसंख्यातुं बहुत्वाद्द्विजसत्तम ॥१-५७-२ (२२९१)
यथास्मृति तु नामानि पन्नगानां निबोध मे ।
उच्यमानानि मुख्यानां हुतानां जातवेदसि ॥१-५७-३ (२२९२)
वासुकेः कुलजातांस्तु प्राधान्येन निबोध मे ।

नीलरक्तान्सितान्घोरान्महाकायान्विषोल्बणान् ॥१-५७-४ (२२९३)
अवशान्मातृवाग्दण्डपीडितान्कृपणान्हूतान् ।
कोटिशो मानसः पूर्णः शलः पालो हलीमकः ॥१-५७-५ (२२९४)
पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः ।
हिरण्यबाहुः शरणः कक्षकः कालदन्तकः ॥१-५७-६ (२२९५)
एते वासुकिजा नागाः प्रविष्टा हव्यवाहने ।
अन्ये च बहवो विप्र तथा वै कुलसंभवाः ।
प्रदीप्ताग्नौ हुताःसर्वे घोररूपा महाबलाः ॥ १-५७-७ (२२९६)
तक्षकस्य कुले जातान्प्रवक्ष्यामि निबोध तान् ।
पुच्छाण्डको मण्डलकः पिण्डसेक्ता रभेणकः ॥१-५७-८ (२२९७)
उच्छिखः शरभो भङ्गो बिल्वतेजा विरोहणः ।
शिली शलकरो मूकः सुकुमारः प्रवेपनः ॥१-५७-९ (२२९८)
मुद्गरः शिशुरोमा च सुरोमा च महाहनुः ।
एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम् ॥१-५७-१० (२२९९)
पारावतः पारियात्रः पाण्डरो हरिणः कृशः ।
विहङ्गः शरभो मोदः प्रमोदः संहतापनः ॥१-५७-११ (२३००)
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ।
कौरव्यकुलजान्नागाञ्शृणु मे त्वं द्विजोत्तम ॥१-५७-१२ (२३०१)
एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः ।
बाहुकः शृङ्गबेरश्च धूर्तकः प्रातरातकौ ॥१-५७-१३ (२३०२)
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम् ।
धृतराष्ट्रकुले जाताञ्शृणु नागान्यथातथम् ॥१-५७-१४ (२३०३)
कीर्त्यमानान्मया ब्रह्मन्वातवेगान्विषोल्बणान् ।
शङ्कुकर्णः पिठरकः कुठारमुखसेचकौ ॥१-५७-१५ (२३०४)
पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः ।
अमाहठः कामठकः सुषेणो मानसोऽव्ययः ॥१-५७-१६ (२३०५)
ग्अष्टावक्रः कोमलकः श्वसनो मौनवेपगः।'
भैरवो मुण्डवेदाङ्गः पिशङ्गश्चोदपारकः ।
ऋषभो वेगवान्नागः पिण्डारकमहाहनू ॥ १-५७-१७ (२३०६)
रक्ताङ्गः सर्वसारङ्गः समृद्धपटवासकौ ।
वराहको वीरणकः सुचित्रश्चित्रवेगिकः ॥१-५७-१८ (२३०७)
पराशरस्तरुणको मणिः स्कन्धस्तथाऽऽरुणिः ।
इति नागा मया ब्रह्मन्कीर्तिताः कीर्तिवर्धनाः ॥१-५७-१९ (२३०८)
प्राधान्येन बहुत्वात्तु न सर्वे परिकीर्तिताः ।
एतेषां प्रसवो यश्च प्रसवस्य च सन्ततिः ॥१-५७-२० (२३०९)
न शक्यं परिसंख्यातुं ये दीप्तं पावकं गताः ।

ग्द्विशीर्षाः पञ्चशीर्षाश्च सप्तशीर्षास्तथाऽपरे ।
दशशीर्षाः शतशीर्षास्तथान्ये बहुशीर्षकाः'॥ १-५७-२१ (२३१०)
कालानलविषा घोरा हुताः शतसहस्रशः ।
महाकाया महावेगाः शैलशृङ्गसमुच्छ्रयाः ॥१-५७-२२ (२३११)
योजनायामविस्तारा द्वियोजनसमायताः ।
कामरूपाः कामबला दीप्तानलविषोल्बणाः ॥१-५७-२३ (२३१२)
दग्धास्तत्र महासत्रे ब्रह्मदण्डनिपाडिताः ॥ ॥ १-५७-२४ (२३१३)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
सप्तपञ्चाशत्तमोऽध्यायः ॥५७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५७-२३ योजनायमविस्तारा अपि मन्त्रसामर्थ्यात्स्वल्पप्रमाणाः
अगस्त्यकरगतसमुद्रवद्वह्नौ प्रवेशयोग्या भवन्ति ॥
सप्तपञ्चाशत्तमोऽध्यायः ॥
५७ ॥

आदिपर्व - अध्याय ०५८
॥ श्रीः ॥
१.५८. अध्यायः ५८

Mahabharata - Adi Parva - Chapter Topics
आस्तीकवरप्रदानेन यज्ञसमाप्तिः ॥१ ॥
प्रत्यागतस्यास्तीकस्य सर्पेभ्यो वरलाभः ॥२ ॥

Mahabharata - Adi Parva - Chapter Text

१-५८-० (२३१४)
सौतिरुवाच।१-५८-०क्ष् (२८२)
इदमत्यद्भुतं चान्यदास्तीकस्यानुशुश्रुम ।
तथा वरैश्छन्द्यमाने राज्ञा पारिक्षितेन हि ॥१-५८-१ (२३१५)
इन्द्रहस्ताच्च्युतो नागः ख एव यदतिष्ठत ।
ततश्चिन्तापरो राजा बभूव जनमेजयः ॥१-५८-२ (२३१६)
हूयमाने भृशं दीप्ते विधिवद्वसुरेतसि ।
न स्म स प्रापतद्वह्नौ तक्षको भयपीडितः ॥१-५८-३ (२३१७)
शौनक उवाच।१-५८-४क्ष् (२८३)
किं सूत तेषां विप्राणां मन्त्रग्रामो मनीषिणाम् ।

न प्रत्यभात्तदाऽग्नौ यत्स पपात न तक्षकः ॥१-५८-४ (२३१८)
सौतिरुवाच।१-५८-५क्ष् (२८४)
तमिन्द्रहस्ताद्विस्तं विसंज्ञं पन्नगोत्तमम् ।
आस्तीकस्तिष्ठ तिष्ठेति वाचस्तिस्रोऽभ्युदैरयत् ॥१-५८-५ (२३१९)
वितस्थे सोऽन्तरिक्षे च हृदयेन विदूयता ।
यथा तिष्ठति वै कश्चित्खं च गां चान्तरा नरः ॥१-५८-६ (२३२०)
ततो राजाब्रवीद्वाक्यं सदस्यैश्चोदितो भृशम् ।
काममेतद्भवत्वेवं यथास्तीकस्य भाषितम् ॥१-५८-७ (२३२१)
समाप्यतामिदं कर्म पन्नगाः सन्त्वनामयाः ।
प्रीयतामयमास्तीकः सत्यं सूतवचोऽस्तु तत् ॥१-५८-८ (२३२२)
ततो हलहलाशब्दः प्रीतिजः समजायत ।
आस्तीकस्य वरे दत्ते तथैवोपरराम च ॥१-५८-९ (२३२३)
स यज्ञः पाण्डवेयस्य राज्ञः पारिक्षितस्य ह ।
प्रीतिमांश्चाभवद्राजा भारतो जनमेजयः ॥१-५८-१० (२३२४)
ऋत्विग्भ्यः ससदस्येभ्यो ये तत्रासन्समागताः ।
तेभ्यश्च प्रददौ वित्तं शतशोऽथ सहस्रशः ॥१-५८-११ (२३२५)
लोहिताक्षाय सूताय तथा स्थपतये विभुः ।
येनोक्तं तस्य तत्राग्रे सर्पसत्रनिवर्तने ॥१-५८-१२ (२३२६)
निमित्तं ब्राह्मण इति तस्मै वित्तं ददौ बहु ।
दत्त्वा द्रव्यं यथान्यायं भोजनाच्छादनान्वितम् ॥१-५८-१३ (२३२७)
प्रीतस्तस्मै नरपतिरप्रमेयपराक्रमः ।
ततश्चकारावभृथं विधिदृष्टेन कर्मणा ॥१-५८-१४ (२३२८)
आस्तीकं प्रेषयामास गृहानेव सुसंस्कृतम् ।
राजा प्रीतमनाः प्रीतं कृतकृत्यं मनीषिणम् ॥१-५८-१५ (२३२९)
पुनरागमनं कार्यमिति चैनं वचोऽब्रवीत् ।
भविष्यसि सदस्यो मे वाजिमेधे महाक्रतौ ॥१-५८-१६ (२३३०)
तथेत्युक्त्वा प्रदुद्राव तदास्तीको मुदा युतः ।
कृत्वा स्वकार्यमतुलं तोषयित्वा च पार्थिवम् ॥१-५८-१७ (२३३१)
स गत्वा परमप्रीतो मातुलं मातरं च ताम् ।
अभिगम्योपसंगृह्य तथा वृत्तं न्यवेदयत् ॥१-५८-१८ (२३३२)
सौतिरुवाच।१-५८-१९क्ष् (२८५)
एतच्छ्रुत्वा प्रीयमाणाः समेता
ये तत्रासन्पन्नगा वीतमोहाः ।
आस्तीके वै प्रीतिमन्तो बभूवु-
रूचुश्चैनं वरमिष्टं वृणीष्व ॥ १-५८-१९ (२३३३)
भूयोभूयः सर्वशस्तेऽब्रुवंस्तं

किं ते प्रियं करवामाद्य विद्वन् ।
प्रीता वयं मोक्षितास्चैव सर्वे
कामं किं ते करवामाद्य वत्स ॥ १-५८-२० (२३३४)
आस्तीक उवाच। १-५८-२१क्ष् (२८६)
सायं प्रातर्ये प्रसन्नात्मरूपा
लोके विप्रा मानवा ये परेऽपि ।
धर्माख्यानं ये पठेयुर्ममेदं
तेषां युष्मन्नैव किंचिद्भयं स्यात् ॥ १-५८-२१ (२३३५)
तैश्चाप्युक्तो भागिनेयः प्रसन्नै-
रेतत्सत्यं काममेवं वरं ते ।
प्रीत्या युक्ताः कामितं सर्वशस्ते
कर्तारः स्म प्रवणा भागिनेय ॥ १-५८-२२ (२३३६)
असितं चार्तिमन्तं च सुनीथं चापि यः स्मरेत् ।
दिवा वा यदि वा रात्रौ नास्य सर्पभयं भवेत् ॥ १-५८-२३ (२३३७)
यो जरत्कारुणा जातो जरत्कारौ महावशाः ।
आस्तीकः सर्पसत्रे वः पन्नगान्योऽभ्यरक्षत ।
तं स्मरन्तं महाभागा न मां हिंसितुमर्हथ ॥ १-५८-२४ (२३३८)
सर्पापसर्प भद्रं ते गच्छ सर्प महाविष ।
जनेमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर ॥ १-५८-२५ (२३३९)
आस्तीकस्य वचः श्रुत्वा यः सर्पो न निवर्तते ।
शतधा भिद्यते मूर्धा शिंशवृक्षफलं यथा ॥ १-५८-२६ (२३४०)
सौतिरुवाच। १-५८-२७क्ष् (२८७)
स एवमुक्तस्तु तदा द्विजेन्द्रः
समागतैस्तैर्भुजगेन्द्रमुख्यैः ।
संप्राप्य प्रीतिं विपुलां महात्मा
ततो मनो गमनायाथ दध्रे ॥ १-५८-२७ (२३४१)
ग्इत्येवं नागराजोऽथ नागानां मध्यगस्तदा ।
उक्त्वा सहैव तैः सर्पैः स्वमेव भवनं ययौ ॥' १-५८-२८ (२३४२)
मोक्षयित्वा तु भुजगान्सर्पसत्राद्द्विजोत्तमः ।
जगाम काले धर्मात्मा दिष्टान्तं पुत्रपौत्रवान् ॥ १-५८-२९ (२३४३)
इत्याख्यानं मयास्तीकं यथावत्तव कीर्तितम् ।
यत्कीर्तयित्वा सर्पेभ्यो न भयं विद्यते क्वचित् ॥ १-५८-३० (२३४४)
सौतिरुवाच। १-५८-३१क्ष् (२८८)
यथा कथितवान्ब्रह्मन्प्रमतिः पूर्वजस्तव ।
पुत्राय रुरवे प्रीतः पृच्छते भार्गवोत्तम ॥ १-५८-३१ (२३४५)
यद्वाक्यं श्रुतवांश्चाहं तथा च कथितं मया ।

आस्तीकस्य कवेर्विप्र श्रीमच्चरितमादितः ॥ १-५८-३२ (२३४६)
यन्मां त्वं पृष्टवान्ब्रह्मञ्श्रुत्वा डुण्डुभभाषितम् ।
व्येतु ते सुमहद्ब्रह्मन्कौतूहलमरिन्दम ॥ १-५८-३३ (२३४७)
श्रुत्वा धर्मिष्ठमाख्यानमास्तीकं पुण्यवर्धनम् ।
ग्सर्वपापविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥' ॥ १-५८-३४ (२३४८)

इति श्रीमन्महाभारते आदिपर्वणि आस्तीकपर्वणि
अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ समाप्तं चास्तीकपर्व ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-५८-६ स्वं च गांचान्तराद्यावापृथिव्योर्मध्ये अन्तरिक्ष इत्यर्थः ॥
१-५८-१२ स यज्ञ उपररामेति पूर्वेणान्वयः ॥
१-५८-१४ अवभृथं यज्ञसमाप्तिं ॥
१-५८-१५ सुसंस्कृतं वस्त्रालङ्करणादिभिः शोभितम् ॥
१-५८-२२ प्रवणा नम्राः ॥
१-५८-२९ दिष्टान्तं मरणम् ॥
अष्टपञ्चाशत्तमोऽध्यायः ॥
५८ ॥

आदिपर्व - अध्याय ०५९
॥ श्रीः ॥
१.५९. अध्यायः ५९

(अथांशावतरणपर्व ॥ ६ ॥)
Mahabharata - Adi Parva - Chapter Topics
सौतेर्भारतकथनप्रतिज्ञा ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-५९-० (२३४९)
शौनक उवाच। १-५९-०क्ष् (२८९)
भृगुवंशात्प्रभृत्येव त्वया मे कीर्तितं महत् ।
आख्यानमखिलं तात सौते प्रीतोऽस्मितेन ते ॥ १-५९-१ (२३५०)
प्रक्ष्यामि चैव भूयस्त्वां यथावत्सूतनन्दन ।
याः कथा व्याससंपन्नास्ताश्च भूयो विचक्ष्व मे ॥ १-५९-२ (२३५१)
तस्मिन्परमदुष्पारे सर्पसत्रे महात्मनाम् ।
कर्मान्तरेषु यज्ञस्य सदस्यानां तथाऽध्वरे ॥ १-५९-३ (२३५२)

या बभूवुः कथाश्चित्रा येष्वर्थेषु यथातथम् ।
त्वत्त इच्छामहे श्रोतुं सौते त्वं वै प्रचक्ष्व नः ॥ १-५९-४ (२३५३)
सौतिरुवाच। १-५९-५क्ष् (२९०)
कर्मान्तरेष्वकथयन्द्विजा वेदाश्रयाः कथाः ।
व्यासस्त्वकथयच्चित्रमाख्यानं भारतं महत् ॥ १-५९-५ (२३५४)
शौनक उवाच। १-५९-६क्ष् (२९१)
महाभारतमाख्यानं पाण्डवानां यशस्करम् ।
जनमेजयेन पृष्टः सन्कृष्णद्वैपायनस्तदा ॥ १-५९-६ (२३५५)
श्रावयामास विधिवत्तदा कर्मान्तरे तु सः ।
तामहं विधिवत्पुण्यां श्रोतुमिच्छामि वै कथाम् ॥ १-५९-७ (२३५६)
मनःसागरसंभूतां महर्षेर्भावितात्मनः ।
कथयस्व सतां श्रेष्ठ सर्वरत्नमयीमिमाम् ॥ १-५९-८ (२३५७)
सौतिरुवाच। १-५९-९क्ष् (२९२)
हन्त ते कथयिष्यामि महदाख्यानमुत्तमम् ।
कृष्णद्वैपायनमतं महाभारतमादितः ॥ १-५९-९ (२३५८)
शृणु सर्वमशेषेण कथ्यमानं मया द्विज ।
शंसितुं तन्महान्हर्षो ममापीह प्रवर्तते ॥ ॥ १-५९-१० (२३५९)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

आदिपर्व - अध्याय ०६०
॥ श्रीः ॥
१.६०. अध्यायः ६०

Mahabharata - Adi Parva - Chapter Topics
भारतकथानुबन्धः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-६०-० (२३६०)
सौतिरुवाच। १-६०-०क्ष् (२९३)
श्रुत्वा तु सर्पसत्राय दीक्षितं जनमेजयम् ।
अभ्यगच्छदृषिर्विद्वान्कृष्णद्वैपायनस्तदा ॥ १-६०-१ (२३६१)
जनयामास यं काली शक्तेः पुत्रात्पराशरात् ।
कन्यैव यमुनाद्वीपे पाण्डवानां पितामहम् ॥ १-६०-२ (२३६२)
जातमात्रश्च यः सद्य इष्ट्या देहमवीवृधत् ।

वेदांश्चाधिजगे साङ्गान्सेतिहासान्महायशाः ॥ १-६०-३ (२३६३)
यं नाति तपसा कश्चिन्न वेदाध्ययनेन च ।
न व्रतैर्नोपवासैश्च न प्रसूत्या न मन्युना ॥ १-६०-४ (२३६४)
विव्यासैकं चतुर्धा यो वेदं वेदविदां वरः ।
परावरज्ञो ब्रह्मर्षिः कविः सत्यव्रतः शुचिः ॥ १-६०-५ (२३६५)
यः पाण्डुं धृतराष्ट्रं च विदुरं चाप्यजीजनत् ।
शन्तनोः संततिं तन्वन्पुण्यकीर्तिर्महायशाः ॥ १-६०-६ (२३६६)
जनमेजयस्य राजर्षेः स महात्मा सदस्तथा ।
विवेश सहितः शिष्यैर्वेदवेदाङ्गपारगैः ॥ १-६०-७ (२३६७)
तत्र राजानमासीनं ददर्श जनमेजयम् ।
वृतं सदस्यैर्बहुभिर्देवैरिव पुरन्दरम् ॥ १-६०-८ (२३६८)
तथा मूर्धाभिषिक्तैश्च नानाजनपदेश्वरैः ।
ऋत्विग्भिर्ब्रह्मकल्पैश्च कुशलैर्यज्ञसंस्तरे ॥ १-६०-९ (२३६९)
जनमेजयस्तु राजर्षिर्दृष्ट्वा तमृषिमागतम् ।
सगणोऽभ्युद्ययौ तूर्णं प्रीत्या भरतसत्तमः ॥ १-६०-१० (२३७०)
काञ्चनं विष्टरं तस्मै सदस्यानुमतः प्रभुः ।
आसनं कल्पयामास यथा शक्रो बृहस्पतेः ॥ १-६०-११ (२३७१)
तत्रोपविष्टं वरदं देवर्षिगणपूजितम् ।
पूजयामास राजेन्द्रः शास्त्रदृष्टेन कर्मणा ॥ १-६०-१२ (२३७२)
पाद्यमाचमनीयं च अर्घ्यं गां च विधानतः ।
पितामहाय कृष्णाय तदर्हाय न्यवेदयत् ॥ १-६०-१३ (२३७३)
प्रतिगृह्य तु तां पूजां पाम्डवाज्जनमेजयात् ।
गां चैव समनुज्ञाय व्यासः प्रीतोऽभवत्तदा ॥ १-६०-१४ (२३७४)
तथा च पूजयित्वा तं प्रणयात्प्रतितामहम् ।
उपोपविश्य प्रीतात्मा पर्यपृच्छदनामयम् ॥ १-६०-१५ (२३७५)
भगवानापि तं दृष्ट्वा कुशलं प्रतिवेद्य च ।
सदस्यैः पूजितः सर्वैः सदस्यान्प्रत्यपूजयत् ॥ १-६०-१६ (२३७६)
ततस्तु सहितः सर्वैः सदस्यैर्जनमेजयः ।
इदं पश्चाद्द्विजश्रेष्टं पर्यपृच्छत्कृताञ्जलिः ॥ १-६०-१७ (२३७७)
जनमेजय उवाच। १-६०-१८क्ष् (२९४)
कुरूणां पाण्डवानां च भवान्प्रत्यक्षदर्शिवान् ।
तेषां चरितमिच्छामि कथ्यमानं त्वया द्विज ॥ १-६०-१८ (२३७८)
कथं समभवद्भेदस्तेषामक्लिष्टकर्मणाम् ।
तच्च युद्धं कथं वृत्तं भूतान्तकरणं महत् ॥ १-६०-१९ (२३७९)
पितामहानां सर्वेषां दैवेनाविष्टचेतसाम् ।
कार्त्स्न्येनैतन्ममाचक्ष्व यथा वृत्तं द्विजोत्तम ।

ग्इच्छामि तत्त्वतः श्रोतुं भगवन्कुशलो ह्यसि'॥ १-६०-२० (२३८०)
सौतिरुवाच। १-६०-२१क्ष् (२९५)
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनस्तदा ।
शशास शिष्यमासीनं वैशम्पायनमन्तिके ॥ १-६०-२१ (२३८१)
व्यास उवाच। १-६०-२२क्ष् (२९६)
कुरूणां पाण्डवानां च यथा भेदोऽभवत्पुरा ।
तदस्मै सर्वमाचक्ष्व यन्मत्तः श्रुतवानसि ॥ १-६०-२२ (२३८२)
गुरोर्वचनमाज्ञाय स तु विप्रर्षभस्तदा ।
आचचक्षे ततः सर्वमितिहासं पुरातनम् ॥ १-६०-२३ (२३८३)
राज्ञे तस्मै सदस्येभ्यः पार्थिवेभ्यश्च सर्वशः ।
भेदं सर्वविनाशं च कुरुपाण्डवयोस्तदा ॥ ॥ १-६०-२४ (२३८४)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६०-२ काली सत्यवती ॥
१-६०-३ इष्ट्या इच्छया देहं सद्योऽवीवृधत् वर्धितवान् ॥
१-६०-४ यं व्यासम् । तपआदिना कश्चिन्नाति नात्येति नातिशेते ॥
१-६०-१५ उपोपविश्य समीपे उपविश्य ॥
१-६०-१६ प्रतिवेद्य प्रतिख्याप्य । अत्र पूजा स्तुतिरेव ॥
१-६०-१७ इदं वक्ष्यमाणम् ॥
१-६०-१८ प्रत्यक्षदर्शिवान् प्रत्यक्षदर्शी ॥
१-६०-१९ भेदो वैरम् ॥
१-६०-२० पितामहानां प्रपितामहानाम् ॥
षष्टितमोऽध्यायः ॥
६० ॥

आदिपर्व - अध्याय ०६१
॥ श्रीः ॥
१.६१. अध्यायः ६१

Mahabharata - Adi Parva - Chapter Topics
वैशम्पायनेन जनमेजयाय संक्षिप्य भारतकथाकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-६१-० (२३८५)
वैशम्पायन उवाच। १-६१-०क्ष् (२९७)
ग्शृणु राजन्यथा वीरा भ्रातरः पञ्च पाण्डवाः ।
विरोधमन्वगच्छन्त धार्तराष्ट्रैर्दुरात्मभिः ॥' १-६१-१ (२३८६)
गुरवे प्राङ्नमस्कृत्य मनोबुद्धिसमाधिभिः ।
संपूज्य च द्विजान्सर्वांस्तथान्यान्विदुषो जनान् ॥ १-६१-२ (२३८७)
महर्षेर्विश्रुतस्येह सर्वलोकेषु धीमतः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥ १-६१-३ (२३८८)
श्रोतुं पात्रं च राजंस्त्वं प्राप्येमां भारतीं कथाम् ।
गुरोर्वक्त्रपरिस्पन्दो मनः प्रोत्साहतीव मे ॥ १-६१-४ (२३८९)
शृणु राजन्यथा भेदः कुरुपाण्डवयोरभूत् ।
राज्यार्थे द्यूतसंभूतो वनवासस्तथैव च ॥ १-६१-५ (२३९०)
यथा च युद्धमभवत्पृथिवीक्षयकारकम् ।
तत्तेऽहं कथयिष्यामि पृच्छते भरतर्षभ ॥ १-६१-६ (२३९१)
मृते पितरि ते वीरा वनादेत्य स्वमन्दिरम् ।
नचिरादेव विद्वांसो वेदे धनुषि चाभवन् ॥ १-६१-७ (२३९२)
तांस्तथा सत्ववीर्यौजःसंपन्नान्पौरसंमतान् ।
नामृष्यन्कुरवो दृष्ट्वा पाण्डवाञ्श्रीयशोभृतः ॥ १-६१-८ (२३९३)
ततो दुर्योधनः क्रूरः कर्णश्च सहसौबलः ।
तेषां निग्रहनिर्वासान्विविधांस्ते समारभन् ॥ १-६१-९ (२३९४)
ततो दुर्योधनः क्रूरः कुलिङ्गस्य मते स्थितः ।
पाम्डवान्विविधोपायै राज्यहेतोरपीडयत् ॥ १-६१-१० (२३९५)
ददावथ विषं पापो भीमाय धृतराष्ट्रजः ।
जरयामास तद्वीरः सहान्नेन वृकोदरः ॥ १-६१-११ (२३९६)
प्रमाणकोट्यां संसुप्तं पुनर्बद्ध्वा वृकोदरम् ।
तोयेषु भीमं गङ्गायाः प्रक्षिप्य पुरमाव्रजत् ॥ १-६१-१२ (२३९७)
यदा विबुद्धः कौन्तेयस्तदा संछिद्य बन्धनम् ।
उदतिष्ठन्महाबाहुर्भीमसेनो गतव्यथः ॥ १-६१-१३ (२३९८)
आशीविषैः कृष्णसर्पैः सुप्तं चैनमदंशयत् ।
सर्वेष्वेवाङ्गदेशेषु न ममार स शत्रुहा ॥ १-६१-१४ (२३९९)
तेषां तु विप्रकारेषु तेषु तेषु महामतिः ।
मोक्षणे प्रतिकारे च विदुरोऽवहितोऽभवत् ॥ १-६१-१५ (२४००)
स्वर्गस्थो जीवलोकस्य यथा शक्रः सुखावहः ।
पाण्डवानां तथा नित्यं विदुरोऽपि सुखावहः ॥ १-६१-१६ (२४०१)
यदा तु विविधोपायैः संवृतैर्विवृतैरपि ।
नाशकद्विनिहन्तुं तान्दैवभाव्यर्थरक्षितान् ॥ १-६१-१७ (२४०२)

ततः संमन्त्र्य सचिवैर्वृषदुःशासनादिभिः ।
धृतराष्ट्रमनुज्ञाप्य जातुषं गृहमादिशत् ॥१-६१-१८ (२४०३)
ग्तत्र तान्वासयामास पाण्डवानमितौजसः।'
सुतप्रियैषी तान्राजा पाण्डवानम्बिकासुतः ।
ततो विवासयामास राज्यभोगबुभुक्षया ॥ १-६१-१९ (२४०४)
ते प्रातिष्ठन्त सहिता नगरान्नागसाह्वयात् ।
प्रस्थाने चाभवन्मन्त्री क्षत्ता तेषां महात्मनाम् ॥१-६१-२० (२४०५)
तेन मुक्ता जतुगृहान्निशीथे प्राद्रवन्वनम् ।
ततः संप्राप्य कौन्तेया नगरं वारणावतम् ॥१-६१-२१ (२४०६)
न्यवसन्त महात्मानो मात्रा सह परन्तपाः ।
धृतराष्ट्रेण चाज्ञप्ता उषिता जातुषे गृहे ॥१-६१-२२ (२४०७)
पुरोचनाद्रक्षमाणाः संवत्सरमतन्द्रिताः ।
सुरुङ्गां कारयित्वा तु विदुरेण प्रचोदिताः ॥१-६१-२३ (२४०८)
आदीप्य जातुषं वेश्म दग्ध्वा चैव पुरोचनम् ।
प्राद्रवन्भयसंविग्ना मात्रा सह पन्तपाः ॥१-६१-२४ (२४०९)
ददृशुर्दारुमं रक्षो हिडिम्बं वननिर्झरे ।
हत्वा च तं राक्षसेन्द्रं भीताः समवबोधनात् ॥१-६१-२५ (२४१०)
निशि संप्राद्रवन्पार्था धार्तराष्ट्रभयार्दिताः ।
प्राप्ता हिडिम्बा भीमेन यत्र जातो घटोत्कचः ॥१-६१-२६ (२४११)
एकचक्रां ततो हत्वा पाण्डवाः संशितव्रताः ।
वेदाध्ययनसंपन्नास्तेऽभवन्ब्रह्मचारिणः ॥१-६१-२७ (२४१२)
ते तत्र नियताः कालं कंचिदूषुर्नरर्षभाः ।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥१-६१-२८ (२४१३)
तत्रासदाद क्षुधितं पुरुषादं वृकोदरः ।
भीमसेनो महाबाहुर्बकं नाम महाबलम् ॥१-६१-२९ (२४१४)
तं चापि पुरुषव्याघ्रो बाहुवीर्येण पाण्डवः ।
निहत्य तरसा वीरो नागरान्पर्यसान्त्वयत् ॥१-६१-३० (२४१५)
ततस्ते शुश्रुवुः कृष्णां पञ्चालेषु स्वयंवराम् ।
श्रुत्वा चैवाभ्यगच्छत गत्वा चैवालभन्त ताम् ॥१-६१-३१ (२४१६)
ते तत्र द्रौपदीं लब्ध्वा परिसंवत्सरोषिताः ।
विदिता हास्तिनपुरं प्रत्याजग्मुररिन्दमाः ॥१-६१-३२ (२४१७)
ते उक्ता धृतराष्ट्रेण राज्ञा शान्तनवेन च ।
भ्रातृभिर्विग्रहस्तात कथं वो न भवेदिति ॥१-६१-३३ (२४१८)
अस्माभिः खाण्डवप्रस्थे युष्मद्वासोऽनुचिन्तितः ।
तस्माज्जनपदोपेतं सुविभक्तमहापथम् ॥१-६१-३४ (२४१९)
वासाय स्वाण्डवप्रस्थं व्रजध्वं गतमत्सराः ।

तयोस्ते वचनाज्जग्मुः सह सर्वैः सुहृज्जनैः ॥ १-६१-३५ (२४२०)
नगरं खाण्डवप्रस्थं रत्नान्यादाय सर्वशः ।
तत्र ते न्यवसन्पार्थाः संवत्सरगणांन्बहून् ॥ १-६१-३६ (२४२१)
वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान्महीभृतः ।
एवं धर्मप्रधानास्ते सत्यव्रतपरायणाः ॥ १-६१-३७ (२४२२)
अप्रमत्तोत्थिताः क्षान्ताः प्रतपन्तोऽहितान्बहून् ।
अजयद्भीमसेनस्तु दिशं प्राचीं महायशाः ॥ १-६१-३८ (२४२३)
उदीचीमर्जुनो वीरः प्रतीचीं नकुलस्तथा ।
दक्षिणां सहदेवस्तु विजिग्ये परवीरहा ॥ १-६१-३९ (२४२४)
एवं चक्रुरिमां सर्वे वशे कृत्स्नां वसुन्धराम् ।
पञ्चभिः सूर्यसङ्काशैः सूर्येण च विराजता ॥ १-६१-४० (२४२५)
षट्सूर्येवाभवत्पृथ्वी पाण्डवैः सत्यविक्रमैः ।
ततो निमित्ते कस्मिंश्चिद्धर्मराजो युधिष्ठिरः ॥ १-६१-४१ (२४२६)
वनं प्रस्थापयामास तेजस्वी सत्यविक्रमः ।
प्राणेभ्योऽपि प्रियतरं भ्रातरं सव्यसाचिनम् ॥ १-६१-४२ (२४२७)
अर्जुनं पुरुषव्याघ्रं स्थिरात्मानं गुणैर्युतम् ।
स वै संवत्सरं पूर्णं मासं चैकं वने वसन् ॥ १-६१-४३ (२४२८)
ग्तीर्थयात्रां च कृतवान्नागकन्यामवाप च ।
पाण्ड्यस्य तनयां लब्ध्वा तत्र ताभ्यांसहोषितः'॥ १-६१-४४ (२४२९)
ततोऽगच्छद्धृषीकेशं द्वारवत्यां कदाचन ।
लब्धवांस्तत्र बीभत्सुर्भार्यां राजीवलोचनाम् ॥ १-६१-४५ (२४३०)
अनुजां वासुदेवस्य सुभद्रां भद्रभाषिणीम् ।
सा शचीव महेन्द्रेण श्रीः कृष्णेनेव सङ्गता ॥ १-६१-४६ (२४३१)
सुभद्रा युयुजे प्रीत्या पाण्डवेनार्जुनेन ह ।
अतर्पयच्च कौन्तेयः खाण्डवे हव्यवाहनम् ॥ १-६१-४७ (२४३२)
बीभत्सुर्वासुदेवेन सहितो नृपस्तम ।
नातिभारो हि पार्थस्य केशवेन सहाभवत् ॥ १-६१-४८ (२४३३)
व्यवसायसहायस्य विष्णोः शत्रुवधेष्विव ।
पार्थायाग्निर्ददौ चापि गाण्डीवं धनुरुत्तमम् ॥ १-६१-४९ (२४३४)
इषुधी चाक्षयैर्बाणै रथं च कपिलक्षणम् ।
मोक्षयामास बीभत्सुर्मयं यत्र महासुरम् ॥ १-६१-५० (२४३५)
स चकार सभां दिव्यां सर्वरत्नसमाचिताम् ।
तस्यां दुर्योधनो मन्दो लोभं चक्रे सुदुर्मतिः ॥ १-६१-५१ (२४३६)
ततोऽक्षैर्वञ्चयित्वा च सौबलेन युधिष्ठिरम् ।
वनं प्रस्थापयामास सप्तवर्षाणि पञ्च च ॥ १-६१-५२ (२४३७)
अज्ञातमेकं राष्ट्रे च ततो वर्षं त्रयोदशम् ।

ततश्चतुर्दशे वर्षे याचमानाः स्वकं वसु ॥१-६१-५३ (२४३८)
नालभन्त महाराज ततो युद्धमवर्तत ।
ततस्ते क्षत्रमुत्साद्य हत्वा दुर्योधनं नृपम् ॥१-६१-५४ (२४३९)
राज्यं विहतभूयिष्ठं प्रत्यपद्यन्त पाण्डवाः ।
ग्इष्ट्वा क्रतूंश्च विविधानश्वमेधादिकान्बहून् ॥१-६१-५५ (२४४०)
धृतराष्ट्रे गते स्वर्गं विदुरे पञ्चतां गते ।
गमयित्वा क्रियां स्वर्ग्यां राज्ञाममिततेजसाम् ॥१-६१-५६ (२४४१)
स्वं धाम याते वार्ष्णेये कृष्णदारान्प्ररक्ष्य च ।
महाप्रस्थानिकं कृत्वा गताः स्वर्गमनुत्तमम्'॥१-६१-५७ (२४४२)
एवमेतत्पुरावृत्तं तेषामक्लिष्टकर्मणाम् ।
भेदो राज्यविनाशश्च जयश्च जयतांवर ॥ ॥१-६१-५८ (२४४३)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-६१-४ प्रोत्साहतीव प्रोत्साहयतीव ।परिस्पन्दमुदुत्साहयतीव मे इति
पाठेगुरोर्वक्त्रपरिस्पन्दस्त्वं कथां कथयेत्याज्ञावचनं तज्जन्या
मुत्प्रीतिः सा प्रोत्साहयती ॥
४ ॥
१-६१-७ नचिरात् शीघ्र ।विद्वांसोऽमवन् ॥
१-६१-१२ प्रमाणकोट्यां गङ्गायास्तीर्थविशेषे ।वृकनामा बहुभ
क्षोऽग्निरुदरे यस्य स वृकोदरः ॥
१-६१-१७ संवृतैर्गुप्तैः ।विवृतै
प्रकाशैः।दैवभाव्यर्थरक्षितान् दैवेनादृष्टेन भावी
कुरुक्षयपाण्ड वराज्यलाभादिरर्थस्तस्मै रक्षितान् ॥
१-६१-१८ वृषः कर्णः जातुषं लाक्षामयम् ॥
१-६१-२० अभवन्मित्रमित्यपि पाठः ।क्षत्ता विदुरः ॥
१-६१-२१ तेन क्षत्तुर्मन्त्रणेन ॥
१-६१-३१ स्वयं वृणुते इति स्वयंवरा ताम् ॥
१-६१-३३ शान्तनवेन भीष्मेण ॥
१-६१-३६ आदाय भागश इत्यपि पाठः ॥
१-६१-४८ नातीति खाण्डवदाह इति शेषः ॥
१-६१-४९ व्यवसायो बुद्धिः ॥
१-६१-५० बाणैर्युक्ताविति शेषः ।कपिलक्षणं वानरध्वजं।यत्र
खाण्डवदाहे ॥

एकषष्टितमोऽध्यायः ॥
६१ ॥

आदिपर्व - अध्याय ०६२
॥ श्रीः ॥
१.६२. अध्यायः ६२

Mahabharata - Adi Parva - Chapter Topics
भारतप्रशंसा ॥ १ ॥
तच्छ्रवणादिफलकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-६२-० (२४४४)
जनमेजय उवाच। १-६२-०क्ष् (२९८)
कथितं वै समासेन त्वया सर्वं द्विजोत्तम ।
महाभारतमाख्यानं कुरूणां चरितं महत् ॥ १-६२-१ (२४४५)
कथां त्वनघ चित्रार्थां कथयस्व तपोधन ।
विस्तरश्रवणे जातं कौतूहलमतीव मे ॥ १-६२-२ (२४४६)
स भवान्विस्तरेणेमां पुनराख्यातुमर्हति ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् ॥ १-६२-३ (२४४७)
न तत्कारणमल्पं वै धर्मज्ञा यत्र पाण्डवाः ।
अवध्यान्सर्वशो जघ्नुः प्रशस्यन्ते च मानवैः ॥ १-६२-४ (२४४८)
किमर्थं ते नरव्याघ्राः शक्ताः सन्तो ह्यनागसः ।
प्रयुज्यमानान्संक्लेशान्क्षान्तवन्तो दुरात्मनाम् ॥ १-६२-५ (२४४९)
कथं नागायुतप्राणो बाहुशाली वृकोदरः ।
परिक्लिश्यन्नपि क्रोधं धृतवान्वै द्विजोत्तम ॥ १-६२-६ (२४५०)
कथं सा द्रौपदी कृष्णा क्लिश्यमाना दुरात्मभिः ।
शक्ता सती धार्तराष्ट्रान्नादहत्क्रोधचक्षुषा ॥ १-६२-७ (२४५१)
कथं व्यसनिनं द्यूते पार्थौ माद्रीसुतौ तदा ।
अन्वयुस्ते नरव्याघ्रा बाध्यमाना दुरात्मभिः ॥ १-६२-८ (२४५२)
कथं धर्मभृतां श्रेष्ठः सुतो धर्मस्य धर्मवित् ।
अनर्हः परमं क्लेशं सोढवान्स युधिष्ठिरः ॥ १-६२-९ (२४५३)
कथं च बहुलाः सेनाः पाण्डवः कृष्णसारथिः ।
अस्यन्नेकोऽनयत्सर्वाः पितृलोकं धनंजयः ॥ १-६२-१० (२४५४)
एतदाचक्ष्व मे सर्वं यथावृत्तं तपोधन ।
यद्यच्च कृतवन्तस्ते तत्रतत्र महारथाः ॥ १-६२-११ (२४५५)

वैशम्पायन उवाच। १-६२-१२क्ष् (२९९)
क्षणं कुरु महाराज विपुलोऽयमनुक्रमः ।
पुण्याख्यानस्य वक्तव्यः कृष्णद्वैपायनेरितः ॥१-६२-१२ (२४५६)
महर्षेः सर्वलोकेषु पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥१-६२-१३ (२४५७)
इदं शतसहस्रं हि श्लोकानां पुण्यकर्मणाम् ।
सत्यवत्यात्मजेनेह व्याख्यातममितौजसा ॥१-६२-१४ (२४५८)
\`उपाख्यानैः सह ज्ञेयं श्राव्यं भारतमुत्तमम् ।
संक्षेपेण तु वक्ष्यामि सर्वमेतन्नराधिप ॥१-६२-१५ (२४५९)
अध्यायानां सहस्रे द्वे पर्वणां शतमेव च ।
श्लोकानां तु सहस्राणि नवतिश्च दशैव च ।
ततोऽष्टादशभिः पर्वैः संगृहीतं महर्षिणा'॥ १-६२-१६ (२४६०)
य इदं श्रावयेद्विद्वान्ये चेदं शृणुयुर्नराः ।
ते ब्रह्मणः स्थानमेत्य प्राप्नुयुर्देवतुल्यताम् ॥१-६२-१७ (२४६१)
इदं हि वेदैः समितं पवित्रमपि चोत्तमम् ।
श्राव्याणामुत्तमं चेदं पुराणमृषिसंस्तुतम् ॥१-६२-१८ (२४६२)
अस्मिन्नर्थश्च कामश्च निखिलेनोपदेक्ष्यते ।
इतिहासे महापुण्ये बुद्धिश्च परिनैष्ठिकी ॥१-६२-१९ (२४६३)
अक्षुद्रान्दानशीलांश्च सत्यशीलाननास्तिकान् ।
कार्ष्णं वेदमिमं विद्वाञ्छ्रावयित्वाऽर्थमश्नुते ॥१-६२-२० (२४६४)
भ्रूणहत्याकृतं चापि पापं जह्यादसंशयम् ।
इतिहासमिमं श्रुत्वा पुरुषोऽपि सुदारुणः ॥१-६२-२१ (२४६५)
मुच्यते सर्वपापेभ्यो राहुणा चन्द्रमा यथा ।
जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ॥१-६२-२२ (२४६६)
महीं विजयते राजा शत्रूंश्चापि पराजयेत् ।
इदं पुंसवनं श्रेष्ठमिदं स्वस्त्ययनं महत् ॥१-६२-२३ (२४६७)
महिषीयुवराजाभ्यां श्रोतव्यं बहुशस्तथा ।
वीरं जनयते पुत्रं कन्यां वा राज्यभागिनीम् ॥१-६२-२४ (२४६८)
धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम् ।
मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥१-६२-२५ (२४६९)
\`धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ।
इदं हि ब्राह्मणैर्लोके आख्यातं ब्राह्मणेष्विह'॥ १-६२-२६ (२४७०)
संप्रत्याचक्षते चेदं तथा श्रोष्यन्ति चापरे ।
पुत्राः शुश्रूषवः सन्ति प्रेष्याश्च प्रियकारिणः ॥१-६२-२७ (२४७१)
भरतानां महज्जन्म शृण्वतामनसूयताम् ।

नास्ति व्याधिभयं तेषां परलोकभयं कुतः ॥ १-६२-२८ (२४७२)
शरीरेण कृतं पापं वाचा च मनसैव च ।
सर्वं संत्यजति क्षिप्रं य इदं शृणुयान्नरः ॥ १-६२-२९ (२४७३)
धन्यं यशस्यमायुष्यं पुण्यं स्वर्ग्यं तथैव च ।
कृष्णद्वैपायनेनेदं कृतं पुण्यचिकीर्षुणा ॥ १-६२-३० (२४७४)
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनाम् ।
अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम् ॥ १-६२-३१ (२४७५)
सर्वविद्यावदातानां लोके प्रथितकर्मणाम् ।
य इदं मानवो लोके पुण्यार्थे ब्राह्मणाञ्छुचीन् ॥ १-६२-३२ (२४७६)
श्रावयेत महापुण्यं तस्य धर्मः सनातनः ।
कुरूणां प्रथितं वंशं कीर्तयन्सततं शुचिः ॥ १-६२-३३ (२४७७)
वंशमाप्नोति विपुलं लोके पूज्यतमो भवेत् ।
योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः ॥ १-६२-३४ (२४७८)
चतुरो वार्षिकान्मासान्सर्वपापैः प्रमुच्यते ।
विज्ञेयः स च वेदानां पारगो भारतं पठन् ॥ १-६२-३५ (२४७९)
देवा राजर्षयो ह्यत्र पुण्या ब्रह्मर्षयस्तथा ।
कीर्त्यन्ते धूतपाप्मानः कीर्त्यते केशवस्तथा ॥ १-६२-३६ (२४८०)
भगवांश्चापि देवेशो यत्र देवी च कीर्त्यते ।
अनेकजननो यत्र कार्तिकेयस्य संभवः ॥ १-६२-३७ (२४८१)
ब्राह्मणानां गवां चैव माहात्म्यं यत्र कीर्त्यते ।
सर्वश्रुतिसमूहोऽयं श्रोतव्यो धर्मबुद्धिभिः ॥ १-६२-३८ (२४८२)
य इदं श्रावयेद्विद्वान्ब्राह्मणानिह पर्वसु ।
धूतपाप्मा जितस्वर्गो ब्रह्म गच्छति शाश्वतम् ॥ १-६२-३९ (२४८३)
श्रावयेद्ब्राह्मणाञ्श्राद्धे यश्चेमं पादमन्ततः ।
अक्षय्यं तस्य तच्छ्राद्धमुपावर्तेत्पितॄनिह ॥ १-६२-४० (२४८४)
अह्ना यदेनः क्रियते इन्द्रियैर्मनसाऽपि वा ।
ज्ञानादज्ञानतो वापि प्रकरोति नरश्च यत् ॥ १-६२-४१ (२४८५)
तन्महाभारताख्यानं श्रुत्वैव प्रविलीयते ।
भरतानां महज्जन्म महाभारतमुच्यते ॥ १-६२-४२ (२४८६)
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।
भरतानां महज्जन्म महाभारतमुच्यते ॥ १-६२-४३ (२४८७)
महतो ह्येनसो मर्त्यान्मोचयेदनुकीर्तितः ।
त्रिभिर्वर्षैर्महाभागः कृष्णद्वैपायनोऽब्रवीत् ॥ १-६२-४४ (२४८८)
नित्योत्थितः शुचिः शक्तो महाभारतमादितः ।
तपोनियममास्थाय कृतमेतन्महर्षिणा ॥ १-६२-४५ (२४८९)
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम् ।

कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम् ॥ १-६२-४६ (२४९०)
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः ।
सर्वथा वर्तमाना वै न ते शोच्याः कृताकृतैः ॥ १-६२-४७ (२४९१)
नरेण धर्मकामेन सर्वः श्रोतव्य इत्यपि ।
निखिलेनेतिहासोऽयं ततः सिद्धिमवाप्नुयात् ॥ १-६२-४८ (२४९२)
न तां स्वर्गगतिं प्राप्य तुष्टिं प्राप्नोति मानवः ।
यां श्रुत्वैवं महापुण्यमितिहासमुपाश्नुते ॥ १-६२-४९ (२४९३)
शृण्वञ्श्राद्धः पुण्यशीलः श्रावयंश्चेदमद्भुतम् ।
नरः फलमवाप्नोति राजसूयाश्वमेधयोः ॥ १-६२-५० (२४९४)
यथा समुद्रो भगवान्यथा मेरुर्महागिरिः ।
उभौ ख्यातौ रत्ननिधी तथा भारतमुच्यते ॥ १-६२-५१ (२४९५)
इदं हि वेदैः समितं पवित्रमपि चोत्तमम् ।
श्राव्यं श्रुतिसुखं चैव पावनं शीलवर्धनम् ॥ १-६२-५२ (२४९६)
य इदं भारतं राजन्वाचकाय प्रयच्छति ।
तेन सर्वा मही दत्ता भवेत्सागरमेखला ॥ १-६२-५३ (२४९७)
पारिक्षित कथां दिव्यां पुण्याय विजयाय च ।
कथ्यमानां मया कृत्स्नां शृणु हर्षकरीमिमाम् ॥ १-६२-५४ (२४९८)
त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः ।
महाभारतमाख्यानं कृतवानिदमद्भुतम् ॥ १-६२-५५ (२४९९)
शृणु कीर्तयतस्तन्म इतिहासं पुरातनम् ॥ ॥ १-६२-५६ (२५००)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-६२-४ अवध्यान् भीष्मद्रोणादीन् ॥
१-६२-६ क्रोधं धृतवान् निरुद्धवान् ॥
१-६२-१० अस्यन् शरान् क्षिपन् स कथं क्लेशं सोढवानित्यनुषज्ज्यते ॥
१-६२-१८ ऋषिभिर्मन्त्रैस्तद्द्रष्टृभिर्वा संस्तुतं समं स्तुतं वा ॥
१-६२-१९ परिनैष्ठिकी परिनिष्ठा मोक्षस्तदुचिता ॥
१-६२-२० अनास्तिकान् नास्तिका न भवन्तीत्यनास्तिकास्तान् ॥
१-६२-२३ पुंसवनं पुमांसः सूयन्तेऽस्मिन् श्रुते ॥
१-६२-२४ महिषी पट्टराज्ञी ॥
१-६२-४७ सर्वथा साधुनाऽसाधुना वा वर्त्मना वर्तमाना अपि
कृताकृतैः क्रमेण पापपुण्यैस्ते न शोच्याः । एतच्छ्रवणादेव
सर्वप्रत्यवायपरिहारो भवतीति भावः ॥

१-६२-४९ स्वर्गादप्येतच्छ्रवणं सुखकरं मुक्तिहेतुत्वादिति भावः ॥
१-६२-५० श्राद्धः श्रद्धावान् ॥
१-६२-५२ श्राव्यमर्थतो रम्यम् ॥
१-६२-५५ सदोत्थायी सदोद्युक्तः ॥
द्विषष्टितमोऽध्यायः ॥
६२ ॥

आदिपर्व - अध्याय ०६३
॥ श्रीः ॥
१.६३. अध्यायः ६३

Mahabharata - Adi Parva - Chapter Topics
पूरुवंशकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-६३-० (२५०१)
वैशम्पायन उवाच। १-६३-०क्ष् (३००)
पूरोर्वंशमहं धन्यं राज्ञाममिततेजसाम् ।
प्रवक्ष्यामि पितॄणां ते तेषां नामानि मे शृमु ॥ १-६३-१ (२५०२)
अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः ।
तस्मान्मरीचिः संजज्ञे दक्षश्चैव प्रजापतिः ॥ १-६३-२ (२५०३)
अङ्गुष्ठाद्दक्षमसृजच्चक्षुर्भ्यां च मरीचिनम् ।
मरीचेः कश्यपः पुत्रो दक्षस्य दुहिताऽऽदितिः ॥ १-६३-३ (२५०४)
अदित्यां कश्यपाद्विवस्थान् ।
विवस्वतो मनुर्मनोरिला ॥ १-६३-४ (२५०५)
इलायाः पुरूरवाः ।
पुरूरवस आयुः ।
आयुषो नहुषः ।
नहुषस्य ययातिः ॥ १-६३-५ (२५०६)
ययातेर्द्वे भार्ये बभूवतुः ।
उशनसो दुहिता देवयानी वृषपर्वणश्च दुहिता शर्मिष्ठा नाम
॥ १-६३-६ (२५०७)
तत्रानुवंशो भवति ।
यदुं च तुर्वसुं चैव देवयानी व्यजायत ।
द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ॥ १-६३-७ (२५०८)
तत्र यदोर्यादवाः ।

पूरोः पौरवाः ।
पूरोर्भार्या कौसल्या बभूव ।
तस्यामस्य जज्ञे जनमेजयः ॥ १-६३-८ (२५०९)
स त्रीन्हयमेधानाजहार ।
विश्वजिता चेष्ट्वा वनं प्रविवेश ॥१-६३-९ (२५१०)
जनमेजयस्तु सुनन्दां नामोपयेमे मागधीं ।
तस्यामस्य जज्ञे प्राचीन्वान् ॥१-६३-१० (२५११)
यः प्राचीं दिशं जिगाय ।
यावत्सूर्यादयात् तत्तस्य प्राचीनत्वम् ॥१-६३-११ (२५१२)
प्राचीन्वांस्तु खल्वाश्मकीमुपयेमे यादवीम् ।
तस्यामस्य जज्ञे शस्यातिः ॥१-६३-१२ (२५१३)
शय्यातिस्तु त्रिशङ्कोर्दुहितरं वराङ्गीं नामोपयेमे तस्यामस्य
जज्ञेऽहंयातिः ॥ १-६३-१३ (२५१४)
अहंयातिस्तु खलु कृतवीर्यदुहितरं भानुमतीं नामोपयेमे ।
तस्यामस्य जज्ञे सार्वभौमः ॥१-६३-१४ (२५१५)
सार्वभौमस्तु खलु जित्वाऽऽजहार कैकयीं सुन्दरां नाम तामुपयेमे ।
तस्यामस्य जज्ञे जयत्सेनः ॥१-६३-१५ (२५१६)
जयत्सेनस्तु खलु वैदर्भीमुपयेमे सुश्रवां नाम ।
तस्यामस्य जज्ञेऽपराचीनः ॥१-६३-१६ (२५१७)
अपराचीनस्तु खलु वैदर्भीमपरामुपयेमे मर्यादां नाम ।
तस्यामस्य जज्ञेऽरिहः ॥१-६३-१७ (२५१८)
अरिहः खल्वाङ्गीमुपेयेमे ।
तस्यामस्य जज्ञे महाभौमः ॥१-६३-१८ (२५१९)
महाभौमस्तु खलु प्रसेनजिद्दुहितरमुपयेमे सुयज्ञां नाम ।
तस्यामस्य जज्ञे अयुतानायी ॥१-६३-१९ (२५२०)
यः पुरुषमेधे पुरुषाणामयुतमानयत्तत्तस्यायुतानायित्वम् ॥ १-६३-२० (२५२१)
अयुतानायी तु खलु पृथुश्रवसो दुहितरमुपयेमे भासां नाम ।
तस्यामस्य जज्ञेऽक्रोधनः ॥१-६३-२१ (२५२२)
अक्रोधनस्तु खलु कालिङ्गीं कण्डूं नामोपयेमे ।
तस्यामस्य जज्ञे देवातिथिः ॥१-६३-२२ (२५२३)
देवातिथिस्तु खलु वैदर्भीमुपयेमे मर्यादां नाम तस्यामस्य जज्ञे
ऋचः ॥ १-६३-२३ (२५२४)
ऋचस्तु खलु वामदेव्यामङ्गराजकन्यायामृक्षं पुत्रमजीजनत् ॥
१-६३-२४ (२५२५)
ऋक्षस्तु खलु तक्षकदुहितरं ज्वलन्तीं नामोपयेमे ।
तस्यामन्त्यनारमुत्पादयामास ॥१-६३-२५ (२५२६)

अन्त्यनारस्तु खलु सरस्वत्यां द्वादशवार्षिकं सत्रमाजहार ।
तमुदवसाने सरस्वत्यभिगम्य भर्तारं वरयामास ॥ १-६३-२६ (२५२७)
तस्यां पुत्रं जनयामास त्रस्नुं नाम ।
अत्रानुवंशो भवति ॥ १-६३-२७ (२५२८)
त्रस्नुं सरस्वती पुत्रमन्त्यनारादजीजनत् ।
इलिलं जनयामास कालिन्द्यांत्रस्नुरात्मजम् ॥ १-६३-२८ (२५२९)
इलिलस्तु रथन्तर्यां दुष्यन्तादीन्पञ्च पुत्रानजीजनत् ॥ १-६३-२९ (२५३०)
दुष्यन्तस्तु लाक्षीं नाम भागीरथीमुपयेमे तस्यामस्य जज्ञे
जनमेजयः ॥ १-६३-३० (२५३१)
सएव दुष्यन्तो विश्वामित्रदुहितरं शकुन्तलां नामोपयेमे ।
तस्यामस्य जज्ञे भरतः ॥ १-६३-३१ (२५३२)
तत्रेमौ श्लोकौ भवतः ।
माता भस्त्रा पितुः पुत्रो यस्माज्जातः स एव सः ।
भरस्व पुत्रं दौष्यन्तिं सत्यमाह शकुन्तला ॥ १-६३-३२ (२५३३)
रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ १-६३-३३ (२५३४)
ततोऽस्य भरतत्वम् ।
भरतस्तु खलु काशेयीं सार्वसेनीमुपयेमे सुनन्दां नाम ।
तस्यामस्य जज्ञे भुमन्युः ॥ १-६३-३४ (२५३५)
भुमन्युस्तु खलु दाशार्हीमुपयेमे सुवर्णां नाम ।
तस्यामस्य जज्ञे सुहोत्रः ॥ १-६३-३५ (२५३६)
सुहोत्रस्तु खल्वैक्ष्वाकीमुपयेमे जयन्तीं नाम ।
तस्यामस्य जज्ञे हस्ती ।
य इदं पुरं निर्मापयामास ॥ १-६३-३६ (२५३७)
तस्माद्धास्तिनपुरत्वम् ।
हस्ती खलु त्रैगर्तीमुपयेमे यशोदां नाम तस्यामस्य जज्ञे विकुञ्जतः
॥ १-६३-३७ (२५३८)
विकुञ्जनस्तु खलु दाशार्हीमुपयेमे सुन्दरां नाम ।
तस्यामस्य जज्ञेऽजमीढः ॥ १-६३-३८ (२५३९)
अजमीढस्य तु चतुर्विंशतिपुत्रशतं बभूव ।
कैकय्यां नागायां गान्धार्यां विमलायामृक्षायामिति ॥ १-६३-३९ (२५४०)
पृथग्वंशकर्तारो नृपतयः ।
तत्र अजमीढादृक्षायां संवरणो जज्ञे स वंशकरः ॥ १-६३-४० (२५४१)
सवरणस्तु वैवस्वतीं तपतीं नामोपयेमे ।
तस्यामस्य जज्ञे कुरुः ॥ १-६३-४१ (२५४२)
कुरुस्तु खलु दाशार्हीमुपयेमे शुभाङ्गीं नाम ।

तस्यामस्य जज्ञे विदूरथः ॥१-६३-४२ (२५४३)
विदूरथस्तु खलु मागधीमुपयेमे संप्रियां नाम ।
तस्यामस्य जज्ञेऽनश्वान् ॥१-६३-४३ (२५४४)
अनश्वांस्तु खलु मागधीमुपयेमेऽमृतां नाम ।
तस्यामस्य जज्ञे परिक्षित् ॥१-६३-४४ (२५४५)
परिक्षित्खलु बाहुकामुपयेमे सुवेषां नाम ।
तस्यामस्य जज्ञे भीमसेनः ॥१-६३-४५ (२५४६)
भीमसेनस्तु खलु कैकयीमुपयेमे सुकुमारीं नाम ।
तस्यामस्य जज्ञे परिश्रवाः ॥१-६३-४६ (२५४७)
यमाहुः प्रतीप इति ।
प्रतीपस्तु खलु शैब्यामुपयेमे सुनन्दीं नाम ।
तस्यां त्रीन्पुत्रानुत्पादयामास देवापिं शन्तनुं बाह्लीकं चेति ॥
१-६३-४७ (२५४८)
देवापिस्तु खलु बाल एवारण्यं प्रविवेश ।
शन्तनुस्तु महीपालोऽभवत् ॥१-६३-४८ (२५४९)
तत्र श्लोको भवति ।
यं यं कराभ्यां स्पृशति जीर्णं स सुखमश्नुते ।
पुनर्युवा च भवति तस्मात्तं शन्तनुं विदुः ॥ १-६३-४९ (२५५०)
तदस्य शन्तनुत्वं ।
शन्तनुस्तु खलु गङ्गां भागीरथीमुपयेमे तस्यामस्य जज्ञे देवव्रतः ।
यमाहुर्भीष्म इति ॥ १-६३-५० (२५५१)
भीष्मस्तु खलु पितुः प्रियचिकीर्षया सत्यवतीमानयामास मातरं ।
यामाहुः कालीति ॥१-६३-५१ (२५५२)
तस्यां पूर्वं पुराशरात्कन्यागर्भो द्वैपायनः ।
तस्यामेव शन्तनोर्द्वौ पुत्रौ बभूवतुः चित्राङ्गदो विचित्रवीर्यश्च
॥१-६३-५२ (२५५३)
चित्राङ्गदस्तु प्राप्तराज्य एव गन्धर्वेण निहतः ।
ततो विचित्रवीर्यो राजा बभूव ॥१-६३-५३ (२५५४)
विचित्रवीर्यस्तु खलुकाशिराजस्य सुते अम्बिकाम्बालिके उदवहत् ।
विचित्रवीर्योऽनुत्पन्नापत्य एव विदेहत्वं प्राप्तः ॥१-६३-५४ (२५५५)
ततः सत्यवती चिन्तयामास कथं नु खलु शन्तनोः पिण्डविच्छेदो
न स्यादिति ॥ १-६३-५५ (२५५६)
साथ द्वैपायनं चिन्तयामास सोऽग्रतः स्थितः किं करवाणीति ।
तं सत्यवत्युवाच भ्राता तेऽनपत्य एव स्वर्गतः
तस्यार्थेऽपत्यमुत्पादयेति ॥१-६३-५६ (२५५७)
स परमित्युवाच स तत्र त्रीन्पुत्रानुत्पादयामास धृतराष्ट्रं पाण्डुं

विदुरं चेति ॥ १-६३-५७ (२५५८)
धृतराष्ट्रात्पुत्रशतं बभूव गान्धार्यां वरदानाद्द्वैपायनस्य
तेषां च धार्तराष्ट्राणां चत्वारः प्रधानाः दुर्योधनो दुश्शासनो
विकर्णश्चित्रसेनश्चेति ॥ १-६३-५८ (२५५९)
पाण्डोस्तु कुन्ती माद्रीति स्त्रीरत्ने बभूवतुः ।
स मृगयां चरन्मैथुनगतमृषिं मृगचारिणं बाणेन जघान
॥ १-६३-५९ (२५६०)
स बाणविद्ध उवाच पाण्डुम् ।
अत्र श्लोको भवति ॥ १-६३-६० (२५६१)
योऽकृतार्थं हि मां ग्रूर बाणेनाघ्ना मृगव्रतम् ।
त्वामप्येतादृशो भावः क्षिप्रमेवागमिष्यति ॥ १-६३-६१ (२५६२)
इति मृगव्रतचारिणा ऋषिणा शप्तः ।
स विषण्णरूपः पाण्डुस्तं शापं परिहरन्नोपसर्पति भार्ये ॥ १-६३-६२
(२५६३)
कदाचित्स आह ।
स्वचापल्यादिदं प्राप्तवानहम् ।
पुराणेषु पठ्यमानं शृणोमि नानपत्यस्य लोकाः सन्तीति ॥ १-६३-६३ (२५६४)
सा त्वं मदर्थे पुत्रानुत्पादयेति कुन्तीमुवाच ॥ १-६३-६४ (२५६५)
सा कुन्ती पुत्रानुत्पादयामास धर्माद्युधिष्ठिरं
मारुताद्भीमसेनमिन्द्रादर्जुनमिति ।
स हृष्टरूपः पाण्डुरुवाच ।
इयं ते सपत्नी भवति माद्र्यनपत्या व्रीडिता साध्वी
अस्यामपत्यमुत्पाद्यतामिति ॥ १-६३-६५ (२५६६)
सा कुन्ती तस्यै माद्र्यै तथेति व्रतमादिदेश ।
ततस्तस्यां नकुलसहदेवौ यमावश्विभ्यां जज्ञाते ॥ १-६३-६६ (२५६७)
माद्रीं तु खलु स्वलङ्कृतां दृष्ट्वा पाण्डुर्भावं चक्रे ।
स तां प्राप्यैव विदेहत्वं प्राप्तः ॥ १-६३-६७ (२५६८)
ततस्तेन सह चितामन्वारुरोह माद्री ।
कुन्तीं चोवाच यमयोरार्ययाऽप्रमत्तया भवितव्यमिति ॥ १-६३-६८ (२५६९)
ततः पञ्चपाण्डवान्सह कुन्त्या हास्तिनपुरं नयन्ति स्म तपस्विनः ॥
१-६३-६९ (२५७०)
तत्र भीष्माय धृतराष्ट्रविदुरयोः पाण्डोः स्वर्गगमनं याथातथ्यं
निवेदयन्तिस्म तपस्विनः ॥ १-६३-७० (२५७१)
पाण्डवान्सह कुन्त्या जतुगृहे दाहयितुकामो धृतराष्ट्रात्मजोऽभूत् ॥
१-६३-७१ (२५७२)
तांश्च विदुरो मोक्षयामास ।

ततो भीमो हिडिम्बं हत्वा पुत्रमुत्पादयामास हिडिम्बायां घटोत्कचं
नाम ॥ १-६३-७२ (२५७३)
ततश्चैकचक्रां जग्मुः कुशलिनः ।
ततः पाञ्चालविषयं गत्वा स्वयंवरे द्रौपदीं लब्ध्वाऽर्धराज्यं
प्राप्येन्द्रप्रस्थनिवासिनस्तस्यां पुत्रानुत्पादयामासुर्द्रौपद्याम्
॥ १-६३-७३ (२५७४)
प्रतिविन्ध्यां युधिष्ठिरः ।
सुतसोमं वृकोदरः ।
श्रुतकीर्तिमर्जुनः ।
शतानीकं नकुलः ।
श्रुतसेनं सहदेव इति ॥ १-६३-७४ (२५७५)
शैव्यस्य कन्यां देवकीं नामोपयेमे युधिष्ठिरः ।
तस्यां पुत्रं जनयामास यौधेयं नाम ॥ १-६३-७५ (२५७६)
भीमसेनस्तु वाराणस्यां काशिराजकन्यां जलन्धरां नामोपयेमे स्वयंवरस्थां ।
तस्यामस्य जज्ञे शर्वत्रातः ॥ १-६३-७६ (२५७७)
अर्जुनस्तु खलु द्वारवतीं गत्वा भगवतो वासुदेवस्य भगिनीं सुभद्रां
नामोदवहद्भार्यां ।
तस्यामभिमन्युं नाम पुत्रं जनयामास ॥ १-६३-७७ (२५७८)
नकुलस्तु खलु चैद्यां रेणुमतीं नामोदवहत् ।
तस्यां पुत्रं जनयामास निरमित्रं नाम ॥ १-६३-७८ (२५७९)
सहदेवस्तु खलु माद्रीमेव स्वयंवरे विजयां नामोदवहद्भार्याम् ।
तस्यां पुत्रं जनयामास सुहोत्रं नाम ॥ १-६३-७९ (२५८०)
भीमसेनश्च पूर्वमेव हिडिम्बायां राक्षस्यां पुत्रमुत्पादयामास
घटोत्कचं नाम ।
अर्जुनस्तु नागकन्यायामुलूप्यामिरावन्तं नाम पुत्रं जनयामास ॥ १-६३-८०
(२५८१)
ततो मणलूरुपतिकन्यायां चित्राङ्गदायामर्जुनः पुत्रमुत्पादयामास
बभ्रुवाहनं नाम ।
एते त्रयोदश पुत्राः पाण्डवानाम् ॥ १-६३-८१ (२५८२)
विराटस्य दुहितरमुत्तरां नामाभिमन्युरुपेयेमे ।
तस्यामस्य परासुर्गर्भोऽजायत ॥ १-६३-८२ (२५८३)
तमुत्सङ्गे प्रतिजग्राह पृथा नियोगात्पुरुषोत्तमस्य ।
षाण्मासिकं गर्भमहं जीवयामि पादस्पर्शादिति वासुदेव उवाच
॥ १-६३-८३ (२५८४)
अहं जीवयामि कुमारमनन्तवीर्यं जात एवायमजायत ।
अभिमन्योः सत्येन चेयं पृथिवी धारयत्विति वासुदेवस्य

पादस्पर्शात्सजीवोऽजायत ।
नाम तस्याकरोत्सुभद्रा ॥ १-६३-८४ (२५८५)
परिक्षीणे कुले जात उत्तरायां परंतपः ।
परिक्षिदभवत्तस्मात्सौभद्रात्तु यशस्विनः ॥ १-६३-८५ (२५८६)
परीक्षित्तु खलु भद्रवतीं नामोपयेमे ।
तस्यां तत्र भवाञ्जनमेजयः ॥ १-६३-८६ (२५८७)
जनमेजयात्तु भवतः खलु वपुष्टमायां पुत्रौ द्वौ शतानीकः
शङ्कुकर्णश्च ॥ १-६३-८७ (२५८८)
शतानीकस्तु खलु वैदेहीमुपयेमे ।
तस्यामस्य जज्ञे पुत्रोऽश्वमेधदत्तः ॥ १-६३-८८ (२५८९)
इत्येष पूरोर्वंशस्तु पाण्डवानां च कीर्तितः ।
पूरोर्वंशमिमं श्रुत्वा सर्वपापैः प्रमुच्यते ॥ ॥ १-६३-८९ (२५९०)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६३-३२ भस्त्रा चर्मकोशः तत्र निहितं बीजं यथा तदीयं न
भवति एवं मातापि भस्त्रेव । येन हेतुना यो जातः स एव सः। कार्यस्य
कारणानन्यत्वात् ॥
१-६३-३३ पुत्रः रेतोधाः रेतोधातारं पितरं उन्नयति ऊर्ध्वं नयति
। यमक्षयात् नरकात् ॥

आदिपर्व - अध्याय ०६४
॥ श्रीः ॥
१.६४. अध्यायः ६४

Mahabharata - Adi Parva - Chapter Topics
उपरिचरराजोपाख्यानम् ॥ १ ॥
इन्द्रध्वजोत्सववृत्तान्तः ॥ २ ॥
गिरिकाया उत्पत्तिः । उपरिचरस्य तया विवाहश्च ॥ ३ ॥
मृगयार्थं गतेनोपरिचरेण स्वपत्नीस्मरणात्स्कन्नस्य श्येनद्वरा
प्रेषितस्य रेतसो यमुनाजले पतनम् ॥ ४ ॥
ब्रह्मशापान्मत्स्यभावं प्राप्तयाऽद्रिकया तद्रेतःपानम् ॥ ५ ॥
तदुदरे मिथुनोत्पत्तिः ॥ ६ ॥
तत्र पुत्रस्य उपरिचरवसुना ग्रहणम् । कन्याया दाशगृहे स्थितिः ॥ ७ ॥
नावं वाहयमानायां सत्यवतीनाम्न्यां दाशकन्यायां

पराशराद्द्वैपायनस्योत्पत्तिः ।तस्य व्यासनामप्राप्तिश्च ॥ ८ ॥
पाठान्तरे पराशरसत्यवतीविवाहादि ॥ ९ ॥
भीष्मादीनां संक्षेपतो जन्मवृत्तान्तकथनम् ॥ १० ॥

Mahabharata - Adi Parva - Chapter Text

१-६४-० (२५९१)
वैशम्पायन उवाच। १-६४-०क्ष् (३०१)
राजोपरिचरो नाम धर्मनित्यो महीपतिः ।
बभूव मृगयाशीलः शश्वत्स्वाध्यायवाञ्छुचिः ॥ १-६४-१ (२५९२)
स चेदिविषयं रम्यं वसुः पौरवनन्दनः ।
इन्द्रोपदेशाज्जग्राह रमणीयं महीपतिः ॥ १-६४-२ (२५९३)
तमाश्रमे न्यस्तशस्त्रं निवसन्तं तपोनिधिम् ।
देवाः शक्रपुरोगा वै राजानमुपतस्थिरे ॥ १-६४-३ (२५९४)
इन्द्रत्वमर्हो राजायं तपसेत्यनुचिन्त्य वै ।
तं सान्त्वेन नृपं साक्षात्तपसः संन्यवर्तयन् ॥ १-६४-४ (२५९५)
देवा ऊचुः। १-६४-५क्ष् (३०२)
न संकीर्येत धर्मोऽयं पृथिव्यां पृथिवीपते ।
त्वया हि धर्मो विधृतः कृत्स्नं धारयते जगत् ॥ १-६४-५ (२५९६)
इन्द्र उवाच। १-६४-६क्ष् (३०३)
ग्देवानहं पालयिता पालय त्वं हि मानुषान्।’
लोके धर्मं पालय त्वं नित्ययुक्तः समाहितः ।
धर्मयुक्तस्ततो लोकान्पुण्यान्प्राप्स्यसि शाश्वतान् ॥ १-६४-६ (२५९७)
दिविष्ठस्य भुविष्ठस्त्वं सखाभूतो मम प्रियः ।
ऊधः पृथिव्या यो देशस्तमावस नराधिप ॥ १-६४-७ (२५९८)
पशव्यश्चैव पुण्यश्च प्रभूतधनधान्यवान् ।
स्वारक्ष्यश्चैव सौम्यश्च भोग्यैर्भूमिगुणैर्युतः ॥ १-६४-८ (२५९९)
अर्थवानेष देशो हि धनरत्नादिभिर्युतः ।
वसुपूर्णा च वसुधा वस चेदिषु चेदिप ॥ १-६४-९ (२६००)
धर्मशीला जनपदाः सुसंतोषाश्च साधवः ।
न च मिथ्या प्रलापोऽत्र स्वैरेष्वपि कुतोऽन्यथा ॥ १-६४-१० (२६०१)
न च पित्रा विभज्यन्ते पुत्रा गुरुहिते रताः ।
युञ्जते धुरि नो गाश्च कृशान्संधुक्षयन्ति च ॥ १-६४-११ (२६०२)
सर्वे वर्णाः स्वधर्मस्थाः सदा चेदिषु मानद ।
न तेऽस्त्यविदितं किंचित्त्रिषु लोकेषु यद्भवेत् ॥ १-६४-१२ (२६०३)
दैवोपभोग्यं दिव्यं त्वामाकाशे स्फाटिकं महत् ।

आकाशगं त्वां मद्दत्तं विमानमुपपत्स्यते ॥ १-६४-१३ (२६०४)
त्वमेकः सर्वमर्त्येषु विमानवरमास्थितः ।
चरिष्यस्युपरिस्थो हि देवो विग्रहवानिव ॥ १-६४-१४ (२६०५)
ददामि ते वैजयन्तीं मालामम्लानपङ्कजाम् ।
धारयिष्यति सङ्ग्रामे या त्वां शस्त्रैरविक्षतम् ॥ १-६४-१५ (२६०६)
लक्षणं चैतदेवेह भविता ते नराधिप ।
इन्द्रमालेति विख्यातं धन्यमप्रतिमं महत् ॥ १-६४-१६ (२६०७)
यष्टिं च वैणवीं तस्मै ददौ वृत्रनिषूदनः ।
इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालिनीम् ॥ १-६४-१७ (२६०८)
ग्एवं संसान्त्व्य नृपतिं तपसः संन्यवर्तयत् ।
प्रययौ दैवतैः सार्धं कृत्वा कार्यं दिवौकसाम् ॥ १-६४-१८ (२६०९)
ततस्तु राजा चेदीनामिन्द्राभरणभूषितः ।
इन्द्रदत्तं विमानं तदास्थाय प्रययौ पुरीम् ॥' १-६४-१९ (२६१०)
तस्याः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा ।
प्रवेशं कारयामास सर्वोत्सववरं तदा ॥ १-६४-२० (२६११)
ग्मार्गशीर्षे महाराज पूर्वपक्षे महामखम् ।
ततःप्रभृति चाद्यापि यष्टेः क्षितिपसत्तमैः ॥' १-६४-२१ (२६१२)
प्रवेशः क्रियते राजन्यथा तेन प्रवर्तितः ।
अपरेद्युस्ततस्तस्याः क्रियतेऽत्युच्छ्रयो नृपैः ॥ १-६४-२२ (२६१३)
अलङ्कृताया पिटकैर्गन्धमाल्यैश्च भूषणैः ।
ग्माल्यदामपरिक्षिप्तां द्वात्रिंशत्किष्कुसंमिताम् ॥ १-६४-२३ (२६१४)
उद्धृत्य पिटके चापि द्वादशारत्निकोच्छ्रये ।
महारजनवासांसि परिक्षिप्य ध्वजोत्तमम् ॥ १-६४-२४ (२६१५)
वासोभिरन्नपानैश्च पूजितैर्ब्राह्मणर्षभैः ।
पुण्याहं वाचयित्वाथ ध्वज उच्छ्रियते तदा ॥ १-६४-२५ (२६१६)
शङ्खभेरीमृदङ्गैश्च संनादः क्रियते तदा'।
भगवान्पूज्यते चात्र यष्टिरूपेण वासवः ॥ १-६४-२६ (२६१७)
स्वयमेव गृहीतेन वसोः प्रीत्या महात्मनः ।
ग्माणिभद्रादयो यक्षाः पूज्यन्ते दैवतैः सह ॥ १-६४-२७ (२६१८)
नानाविधानि दानानि दत्त्वार्थिभ्यः सुहृज्जनैः ।
अलङ्कृत्वा माल्यदामैर्वस्त्रैर्नानाविधैस्तथा ॥ १-६४-२८ (२६१९)
दृतिभिः सजलैः सर्वैः क्रीडित्वा नृपशासनात् ।
सभाजयित्वा राजानं कृत्वा नर्माश्रयाः कथाः ॥ १-६४-२९ (२६२०)
रमन्ते नागराः सर्वे तथा जानपदैः सह ।
सूताश्च मागधाश्चैव रमन्ते नटनर्तकाः ॥ १-६४-३० (२६२१)
प्रीत्या तु नृपशार्दूल सर्वे चक्रुर्महोत्सवम् ।

सान्तःपुरः सहामात्यः सर्वाभरणभूषितः ॥१-६४-३१ (२६२२)
महारजनवासांसि वसित्वा चेदिराट् तदा ।
जातिहिङ्गुलकेनाक्तः सदारो मुमुदे तदा ॥१-६४-३२ (२६२३)
एवं जानपदाः सर्वे चक्रुरिन्द्रमहं वसुः ॥'
यथा चेदिपतिः प्रीतश्चकारेन्द्रमहं वसुः ॥' १-६४-३३ (२६२४)
एतां पूजां महेन्द्रस्तु दृष्ट्वा वसुकृतां शुभाम् ।
ग्हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ॥१-६४-३४ (२६२५)
आस्थाय सह शच्या च वृतो ह्यप्सरसां गणैः।'
वसुना राजमुख्येन समागम्याब्रवीद्वचः ॥ १-६४-३५ (२६२६)
ये पूजयिष्यन्ति च मुदा यथा चेदिपतिर्नृपः ।
कारयिष्यन्ति च मुदा यथा चेदिपतिर्नृपः ॥१-६४-३६ (२६२७)
तेषां श्रीर्विजयश्चैव सराष्ट्राणां भविष्यति ।
तथा स्फीतो जनपदो मुदितश्च भविष्यति ॥१-६४-३७ (२६२८)
गनिरीतिकानि सस्यानि भवन्ति बहुधा नृप ।
राक्षसाश्च पिशाचाश्च न लुम्पन्ते कथंचन ॥१-६४-३८ (२६२९)
वैशम्पायन उवाच।' १-६४-३९क्ष् (३०४)
एवं महात्मना तेन महेन्द्रेण नराधिप ।
वसुः प्रीत्या मघवता महाराजोऽभिसत्कृतः ।
एवं कृत्वा महेन्द्रस्तु जगाम स्वं निवेशनम् ॥ १-६४-३९ (२६३०)
उत्सवं कारयिष्यन्ति सदा शक्रस्य ये नराः ।
भूमिरत्नादिभिर्दानैस्तथा पूज्या भवन्ति ते ।
वरदानमहायज्ञैस्तथा शक्रोत्सवेन च ॥ १-६४-४० (२६३१)
संपूजितो मघवता वसुश्चेदीश्वरो नृपः ।
पालयामास धर्मेण चेदिस्थः पृथिवीमिमाम् ॥१-६४-४१ (२६३२)
इन्द्रपीत्या चेदिपतिश्चकारेन्द्रमहं वसुः ।
पुत्राश्चास्य महावीर्याः पञ्चासन्नमितौजसः ॥१-६४-४२ (२६३३)
नानाराज्येषु च सुतान्स सम्राडभ्यषेचयत् ।
महारथो मागधानां विश्रुतो यो बृहद्रथः ॥१-६४-४३ (२६३४)
प्रत्यग्रहः कुशाम्बश्च यमाहुर्मणिवाहनम् ।
मत्सिल्लश्च यदुश्चैव राजन्यश्चापराजितः ॥१-६४-४४ (२६३५)
एते तस्य सुता राजन्राजर्षेर्भूरितेजसः ।
न्यवेशयन्नामभिः स्वैस्ते देशांश्च पुराणि च ॥१-६४-४५ (२६३६)
वासवाः पञ्च राजानः पृथग्वंशाश्च शास्वताः ।
वसन्तमिन्द्रप्रासादे आकाशे स्फाटिके च तम् ॥१-६४-४६ (२६३७)
उपतस्थुर्महात्मानं गन्धर्वाप्सरसो नृपम् ।
राजोपरिचरेत्येवं नाम तस्याथ विश्रुतम् ॥१-६४-४७ (२६३८)

पुरोपवाहिनीं तस्य नदीं शुक्तमतीं गिरिः ।
अरौत्सीच्चेतनायुक्तः कामात्कोलाहलः किल ॥१-६४-४८ (२६३९)
गिरिं कोलाहलं तं तु पदा वसुरताडयत् ।
निश्चक्राम ततस्तेन प्रहारविवरेण सा ॥१-६४-४९ (२६४०)
तस्यां नद्यां स जनयन्मिथुनं पर्वतः स्वयम् ।
तस्माद्विमोक्षणात्प्रीता नदी राज्ञे न्यवेदयत् ॥१-६४-५० (२६४१)
'महिषी भविता कन्या पुमान्सेनापतिर्भवेत् ।
शुक्तिमत्या वचःश्रुत्वा दृष्ट्वा तौ राजसत्तमः'॥१-६४-५१ (२६४२)
यः पुमानभवत्तत्र तं स राजर्षिसत्तमः ।
वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः ॥१-६४-५२ (२६४३)
चकार पत्नीं कन्यां तु तथा तां गिरिकां नृपः ।
वसोः पत्नी तु गिरिका कामकालं न्यवेदयत् ॥१-६४-५३ (२६४४)
ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः ।
तदहः पितरश्चैनपूचुर्जहि मृगानिति ॥१-६४-५४ (२६४५)
तं राजसत्तमं प्रीतास्तदा मतिमतां वरः ।
स पितॄणां नियोगेन तामतिक्रम्य पार्थिवः ॥१-६४-५५ (२६४६)
चकार मृगयां कामी गिरिकामेव संस्मरन् ।
अतीव रूपसंपन्नां साक्षाच्छ्रियमिवापराम् ॥१-६४-५६ (२६४७)
अशोकैश्चम्पकैश्चूतैरनेकैरतिमुक्तकैः ।
पुन्नागैः कर्णिकारैश्च बकुलैर्दिव्यपाटलैः ॥१-६४-५७ (२६४८)
पनसैर्नारिकेलैश्च चन्दनैश्चार्जुनैस्तथा ।
एतै रम्यैर्महावृक्षैः पुण्यैः स्वादुफलैर्युतम् ॥१-६४-५८ (२६४९)
कोकिलाकुलसन्नादं मत्तभ्रमरनादितम् ।
वसन्तकाले तत्पश्यन्वनं चैत्ररथोपमम् ॥१-६४-५९ (२६५०)
मन्मथाभिपरीतात्मा नापश्यद्गिरिकां तदा ।
अपश्यन्कामसंतप्तश्चरमाणो यदृच्छया ॥१-६४-६० (२६५१)
पुष्पसंछन्नशाखाग्रं पल्लवैरुपशोभितम् ।
अशोकस्तबकैश्छन्नं रमणीयमपश्यत ॥१-६४-६१ (२६५२)
अधस्यात्तस्य छायायां सुखासीनो नराधिपः ।
मधुगन्धैश्च संयुक्तं पुष्पगन्धमनोहरम् ॥१-६४-६२ (२६५३)
वायुना प्रेर्यमाणस्तु धूम्राय मुदमन्वगात् ।
'भार्यां चिन्तयमानस्य मन्मथाग्निरवर्धत।'
तस्य रेतः प्रचस्कन्द चरतो गहने वने ॥ १-६४-६३ (२६५४)
स्कन्नमात्रं च तद्रेतो वृक्षपत्रेण भूमिपः ।
प्रतिजग्राह मिथ्या मे न पतेद्रेत इत्युत ॥१-६४-६४ (२६५५)
'अङ्गुलीयेन शुक्लस्य रक्षां च विदधे नृपः ।

अशोकस्तबकै रक्तैः पल्लवैश्चाप्यबन्धयत् ॥' १-६४-६५ (२६५६)
इदं मिथ्या परिस्कन्नं रेतो मे न भवेदिति ।
ऋतुश्च तस्याः पत्न्या मे न मोघः स्यादिति प्रभुः ॥१-६४-६६ (२६५७)
संचिन्त्यैवं तदा राजा विचार्य च पुनःपुनः ।
अमोघत्वं च विज्ञाय रेतसो राजसत्तमः ॥१-६४-६७ (२६५८)
शुक्रप्रस्थापने कालं महिष्या प्रसमीक्ष्य वै ।
अभिमन्त्र्याथ तच्छुक्रमारात्तिष्ठन्तमाशुगम् ॥१-६४-६८ (२६५९)
सूक्ष्मधर्मार्थतत्त्वज्ञो गत्वा श्येनं ततोऽब्रवीत् ।
मत्प्रियार्थमिदं सौम्य शुक्रं मम गृहं नय ॥१-६४-६९ (२६६०)
गिरिकायाः प्रयच्छाशु तस्या ह्यार्तवमद्य वै। १-६४-७० (२६६१)
वैशम्पायन उवाच ।
गृहीत्वा तत्तदा श्येनस्तूर्णमुत्पत्य वेगवान् ॥ १-६४-७०क्ष् (३०५)
जवं परममास्थाय प्रदुद्राव विहंगमः ।
तमपश्यदथायान्तं श्येनं श्येनस्तथाऽपरः ॥१-६४-७१ (२६६२)
अभ्यद्रवच्च तं सद्यो दृष्ट्वैवामिषशङ्कया ।
तुण्डयुद्धमथाकाशे तावुभौ संप्रचक्रतुः ॥१-६४-७२ (२६६३)
युद्ध्यतोरपतद्रेतस्तच्चापि यमुनाम्भसि ।
तत्राद्रिकेति विख्याता ब्रह्मशापाद्वराप्सरा ॥१-६४-७३ (२६६४)
मीनभावमनुप्राप्ता बभूव यमुनाचरी ।
श्येनपादपरिभ्रष्टं तद्वीर्यमथ वासवम् ॥१-६४-७४ (२६६५)
जग्राह तरसोपेत्य साऽद्रिका मत्स्यरूपिणी ।
कदाचिदपि मत्सीं तां बबन्धुर्मत्स्यजीविनः ॥१-६४-७५ (२६६६)
मासे च दशमे प्राप्ते तदा भरतसत्तम ॥
उज्जह्रुरुदरात्तस्याः स्त्रीं पुमांसं च मानुषौ ॥१-६४-७६ (२६६७)
आश्चर्यभूतं तद्गत्वा राज्ञेऽथ प्रत्यवेदयन् ।
काये मत्स्या इमौ राजन्संभूतौ मानुषाविति ॥१-६४-७७ (२६६८)
तयोः पुमांसं जग्राह राजोपरिचरस्तदा ।
स मत्स्यो नाम राजासीद्धार्मिकः सत्यसङ्गरः ॥१-६४-७८ (२६६९)
साऽप्सरा मुक्तशापा च क्षणेन समपद्यत ।
या पुरोक्ता भगवता तिर्यग्योनिगता शुभा ॥१-६४-७९ (२६७०)
मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि ।
ततः साजनयित्वा तौ विशस्ता मत्स्यघातिभिः ॥१-६४-८० (२६७१)
संत्यज्य मत्स्यरूपं सा दिव्यं रूपमवाप्य च ।
सिद्धर्षिचारणपथं जगामाथ वराप्सराः ॥१-६४-८१ (२६७२)
सा कन्या दुहिता तस्या मत्स्या मत्स्यसगन्धिनी ।
राज्ञा दत्ता च दाशाय कन्येयं ते भवत्विति ॥१-६४-८२ (२६७३)

रूपसत्वसमायुक्ता सर्वैः समुदिता गुणैः ।
सा तु सत्यवती नाम मत्स्यघात्यभिसंश्रयात् ॥१-६४-८३ (२६७४)
आसीत्सा मत्स्यगन्धैव कंचित्कालं शुचिस्मिता ।
शुश्रूषार्थं पितुर्नावं वाहयन्तीं जले च ताम् ॥१-६४-८४ (२६७५)
तीर्थयात्रां परिक्रामन्नपश्यद्वै पराशरः ।
अतीव रूपसंपन्नां सिद्धानामपि काङ्क्षिताम् ॥१-६४-८५ (२६७६)
दृष्ट्वैव स च तां धीमांश्चकमे चारुहासिनीम् ।
दिव्यां तां वासवीं कन्यां रम्भोरूं मुनिपुङ्गवः ॥१-६४-८६ (२६७७)
संभवं चिन्तयित्वा तां ज्ञात्वा प्रोवाच शक्तिजः ।
क्व कर्णधारो नौर्येन नीयते ब्रूहि भामिनि ॥१-६४-८७ (२६७८)
मत्स्यगन्धोवाच।१-६४-८८क्ष् (३०६)
अनपत्यस्य दाशस्य सुता तत्प्रियकाम्यया ।
सहस्रजनसंपन्ना नौर्मया वाह्यते द्विज ॥१-६४-८८ (२६७९)
पराशर उवाच।१-६४-८९क्ष् (३०७)
शोभनं वासवि शुभे किं चिरायसि वाह्यताम् ।
कलशं भविता भद्रे सहस्रार्धेन संमितम् ॥१-६४-८९ (२६८०)
अहं शेषो भिविष्यामि नीयतामचिरेण वै। १-६४-९० (२६८१)
वैशम्पायन उवाच ।
मत्स्यगन्धा तथेत्युक्त्वा नावं वाहयतां जले ॥ १-६४-९०क्ष् (३०८)
वीक्षमाणं मुनिं दृष्ट्वा प्रोवाचेदं वचस्तदा ।
मत्स्यगन्धेति मामाहुर्दाशराजसुतां जनाः ॥१-६४-९१ (२६८२)
जन्म शोकाभितप्तायाः कथं ज्ञास्यसि कथ्यताम्। १-६४-९२ (२६८३)
पराशर उवाच ।
दिव्यज्ञानेन दृष्टं हि दृष्टमात्रेण ते वपुः ॥ १-६४-९२क्ष् (३०९)
प्रणयग्रहणार्थाय वक्ष्येव वासवि तच्छृणु ।
बर्हिषद इति ख्याताः पितरः सोमपास्तुते ॥१-६४-९३ (२६८४)
तेषां त्वं मानसी कन्या अच्छोदा नाम विश्रुता ।
अच्छोदं नाम तद्दिव्यं सरो यस्मात्समुत्थितम् ॥१-६४-९४ (२६८५)
त्वया न दृष्टपूर्वास्तु पितरस्ते कदाचन ।
संभूता मनसा तेषां पितॄन्स्वान्नाभिजानती ॥१-६४-९५ (२६८६)
सा त्वन्यं पितरं वव्रे स्वानतिक्रम्य तान्पितॄन् ।
नाम्ना वसुरिति ख्यातं मनुपुत्रं दिवि स्थितम् ॥१-६४-९६ (२६८७)
अद्रिकाऽप्सरसा युक्तं विमाने दिवि विष्ठितम् ।
सा तेन व्यभिचारेण मनसा कामचारिणी ॥१-६४-९७ (२६८८)
पितरं प्रार्थयित्वाऽन्यं योगाद्भ्रष्टा पपात सा ।
अपश्यत्पतमाना सा विमानत्रयमन्तिकात् ॥१-६४-९८ (२६८९)

त्रसरेणुप्रमाणांस्तांस्तत्रापश्यत्स्वकान्पितॄन् ।
सुसूक्ष्मानपरिव्यक्तानङ्गैरङ्गेष्विवाहितान् ॥ १-६४-९९ (२६९०)
तातेति तानुवाचार्ता पतन्ती सा ह्यधोमुखी ।
तैरुक्ता सा तु माभैषीस्तेन सा संस्थिता दिवि ॥ १-६४-१०० (२६९१)
ततः प्रसादयामास स्वान्पितॄन्दीनया गिरा ।
तामूचुः पितरः कन्यां भ्रष्टश्वर्यां व्यतिक्रमात् ॥ १-६४-१०१ (२६९२)
भ्रष्टैश्वर्या स्वदोषेण पतसि त्वं शुचिस्मिते ।
यैरारभन्ते कर्माणि शरीरैरिह देवताः ॥ १-६४-१०२ (२६९३)
तैरेव तत्कर्मफलं प्राप्नुवन्ति स्म देवताः ।
मनुष्यास्त्वन्यदेहेन शुभाशुभमिति स्थितिः ॥ १-६४-१०३ (२६९४)
सद्यः फलन्ति कर्माणि देवत्वे प्रेत्य मानुषे ।
तस्मात्त्वं पतसे पुत्रि प्रेत्यत्वं प्राप्स्यसे फलम् ॥ १-६४-१०४ (२६९५)
पितृहीना तु कन्या त्वं वसोर्हि त्वं सुता मता ।
मत्स्ययोनौ समुत्पन्ना सुताराज्ञो भविष्यसि ॥ १-६४-१०५ (२६९६)
अद्रिका मत्स्यरूपाऽभून्नङ्गायमनुसङ्गमे ।
पराशरस्य दायादं त्वं पुत्रं जनयिष्यसि ॥ १-६४-१०६ (२६९७)
यो वेदमेकं ब्रह्मर्षिश्चतुर्धा विबजिष्यति ।
महाभिषक्सुतस्यैव शन्तनोः कीर्तिवर्धनम् ॥ १-६४-१०७ (२६९८)
ज्येष्ठं चित्राङ्गदं वीरं चित्रवीरं च विश्रुतम् ।
एतान्सूत्वा सुपुत्रांस्त्वं पुनरेव गमिष्यसि ॥ १-६४-१०८ (२६९९)
व्यतिक्रमात्पितॄणां च प्राप्स्यसे जन्म कुत्सितम् ।
अस्यैव राज्ञस्त्वं कन्या ह्यद्रिकायां भविष्यसि ॥ १-६४-१०९ (२७००)
अष्टाविंशे भवित्री त्वं द्वापरे मत्स्ययोनिजा ।
एवमुक्ता पुरा तैस्त्वं जाता सत्यवती शुभा ॥ १-६४-११० (२७०१)
अद्रिकेत्यभिविख्याता ब्रह्मशापाद्वराप्सरा ।
मीनभावमनुप्राप्ता त्वं जनित्वा गता दिवम् ॥ १-६४-१११ (२७०२)
तस्यां जातासि सा कन्या राज्ञो वीर्येण चैवहि ।
तस्माद्वासवि भद्रं ते याचे वंशकरं सुतम् ॥ १-६४-११२ (२७०३)
संगमं मम कल्याणि कुरुष्वेत्यभ्यभाषत ॥ १-६४-११३ (२७०४)
वैशम्पायन उवाच। १-६४-११४क्ष् (३१०)
विस्मयाविष्टसर्वाङ्गी जातिस्मरणतां गता ।
साब्रवीत्पश्य भगवन्परपारे स्थितानृषीन् ॥ १-६४-११४ (२७०५)
आवयोर्दृष्टयोरेभिः कथं नु स्यात्समागमः ।
एवं तयोक्तो भगवान्नीहारमसृजत्प्रभुः ॥ १-६४-११५ (२७०६)
येन देशः स सर्वस्तु तमोभूत इवाभवत् ।
दृष्ट्वा सृष्टं तु नीहारं ततस्तं परमर्षिणा ॥ १-६४-११६ (२७०७)

विस्मिता साभवत्कन्या व्रीडिता च तपस्विनी। १-६४-११७ (२७०८)
सत्यवत्युवाच ।
विद्धि मां भगवन्कन्यां सदा पितृवशानुगाम् ॥ १-६४-११७क्ष् (३११)
त्वत्संयोगाच्च दुष्येत कन्याभावो ममाऽनघ ।
कन्यात्वे दूषिते वापि कथं शक्ष्ये द्विजोत्तम ॥ १-६४-११८ (२७०९)
गृह गन्तुमुषे चाहं धीमन्न स्थातुमुत्सहे ।
एतत्संचिन्त्य भगवन्विधत्स्व यदनन्तरम् ॥ १-६४-११९ (२७१०)
वैशम्पायन उवाच। १-६४-११९क्ष् (३१२)
एवमुक्तवतीं तीं तु प्रीतिमानुषिसत्तमः ।
उवाच मत्प्रियं कृत्वा कन्यैव त्वं भविष्यति ॥ १-६४-१२० (२७११)
वृणीष्व च वरं भीरुं यं त्वमिच्छसि भामिनि ।
वृथा हि न प्रसादो मे भूतपूर्वः शुचिस्मिते ॥ १-६४-१२१ (२७१२)
एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम् ।
सचास्यै भगवान्प्रादान्मनः काङ्क्षितं प्रभुः ॥ १-६४-१२२ (२७१३)
ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता ।
जगाम सह संसर्गमृषिणाऽद्भुतकर्मणा ॥ १-६४-१२३ (२७१४)
तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि ।
तस्यास्तु योजनाद्गन्धमाजिघ्रन्त नरा भुवि ॥ १-६४-१२४ (२७१५)
तस्या योजनगन्धेति ततो नामापरं स्मृतम् ।
इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम् ॥ १-६४-१२५ (२७१६)
पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा ।
जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्यवान् ॥ १-६४-१२६ (२७१७)
स मातरमनुज्ञाप्य तपस्येव मनो दधे ।
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् ॥ १-६४-१२७ (२७१८)
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् ।
न्यस्तोद्वीपे यद्बालस्तस्माद्द्वैपायनःस्मृतः ॥ १-६४-१२८ (२७१९)
पादापसारिणं धर्मं स तु विद्वान्युगे युगे ।
आयुः शक्तिं च मर्त्यानां युगावस्थामवेक्ष्यच ॥ १-६४-१२९ (२७२०)
ब्रह्मणो ब्राह्मणानां च तथानुग्रहकाङ्क्षया ।
विव्यास वेदान्यस्मत्स तस्माद्व्यास इति स्मृतः ॥ १-६४-१३० (२७२१)
वेदानध्यापयामास महाभारतपञ्चमान् ।
सुमन्तुं जैमिनिं पैलं शुकं चैव स्वमात्मजम् ॥ १-६४-१३१ (२७२२)
प्रभुर्वरिष्ठो वरदो वैशम्पायनमेव च ।
संहितास्तैः पृथक्त्वेन भारतस्य प्रकाशिताः ॥ १-६४अ-१अ
श्ततो रम्ये वनोद्देशे दिव्यास्तरणसंयुते। १-६४अ-१ब्
वीरासनमुपास्थाय योगी ध्यानपरोऽभवत्॥ १-६४अ-२अ

श्वेतपट्टगृहे रम्ये पर्यङ्के सोत्तरच्छदे। १-६४अ-२ब्
तूष्णींभूतां तदा कन्यां ज्वलन्तीं योगतेजसा॥ १-६४अ-३अ
दृष्ट्वा तां तु समाधाय विचार्य च पुनः पुनः। १-६४अ-३ब्
स चिन्तयामास मुनिः किं कृतं सुकृतं भवेत्॥ १-६४अ-४अ
शिष्टानां तु समाचारः शिष्टाचार इति स्मृतः। १-६४अ-४ब्
श्रुतिस्मृतिविदो विप्रा धर्मज्ञा ज्ञानिनः स्मृताः॥ १-६४अ-५अ
धर्मज्ञैर्विहितो धर्मः श्रौतः स्मार्तो द्विधा द्विजैः। १-६४अ-५ब्
दानाग्निहोत्रमिज्या च श्रौतस्यैतद्धि लक्षणम्॥ १-६४अ-६अ
स्मार्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः। १-६४अ-६ब्
धर्मे तु धारणे धातुः सहत्वे चापि पठ्यते॥ १-६४अ-७अ
तत्रेष्टफलभाग्धर्म आचार्यैरुपदिश्यते। १-६४अ-७ब्
अनिष्टफलभाक्चेति तैरधर्मोऽपि भाष्यते॥ १-६४अ-८अ
तस्मादिष्टफलार्थाय धर्ममेव समाश्रयेत्। १-६४अ-८ब् ब्राह्मो
दैवस्तथैवार्षः प्राजापत्यश्च धार्मिकः॥ १-६४अ-९अ
विवाहा ब्राह्मणानां तु गान्धर्वो नैव धार्मिकः। १-६४अ-९ब्
त्रिवर्णेतरजातीनां गान्धर्वासुरराक्षसाः॥ १-६४अ-१०अ पैशाचो
नैव कर्तव्यः पैशाचश्चाष्टमोऽधमः। १-६४अ-१०ब्
सामर्षां व्यङ्गिकां कन्यां मातुश्च कुलजां तथा॥ १-६४अ-११अ
वृद्धां प्रव्राजितां वन्ध्यां पतितां च रजस्वलाम्। १-६४अ-११ब्
अपस्मारकुले जातां पिङ्गलांकुष्ठिनीं व्रणीम्॥ १-६४अ-१२अ न
चास्नातां स्त्रियं गच्छेदिति धर्मानुशासनम्। १-६४अ-१२ब्
पिता पितामहो भ्राता माता मातुल एव च॥ १-६४अ-१३अ
उपाध्यायर्त्विजश्चैव कन्यादाने प्रभूत्तमाः। १-६४अ-१३ब्
एतैर्दत्तां निषेवेत नादत्तामाददीत च॥ १-६४अ-१४अ इत्येव
ऋषयः प्राहुर्विवाहे धर्मवित्तमाः। १-६४अ-१४ब् अस्या नास्ति
पिता भ्राता माता मातुल एव च॥ १-६४अ-१५अ गान्धर्वेण
विवाहेन न स्पृशामि यदृच्छया। १-६४अ-१५ब् क्रियाहीनं
तु गान्धर्वं न कर्तव्यमनापदि॥ १-६४अ-१६अ यदस्यां जायते
पुत्रो वेदव्यासो भवेदृषिः। १-६४अ-१६ब् क्रियाहीनः कथं विप्रो
भवेदृषिरुदारधीः॥ १-६४अ-१७क्ष् वैशम्पायन उवाच। १-६४अ-१७अ
एवं चिन्तयतो भावं महर्षेर्भावितात्मनः। १-६४अ-१७ब् ज्ञात्वा
चैवाभ्यवर्तन्त पितरो बर्हिषस्तदा॥ १-६४अ-१८अ तस्मिन्क्षणे
ब्रह्मपुत्रो वसिष्ठोऽपि समेयिवान्। १-६४अ-१८ब् पूर्वं स्वागतमित्युक्त्वा
वसिष्ठः प्रत्यभाषत॥ १-६४अ-१९क्ष् पितृगणा ऊचुः। १-६४अ-१९अ
अस्माकं मानसीं कन्यामस्मच्छापेन वासवीम्। १-६४अ-१९ब्
यदिचच्छशि पुत्रार्थं कन्यां गृह्णीष्वमा चिरम्॥ १-६४अ-२०अ

पितॄणां वचनं श्रुत्वा वसिष्ठः प्रत्यभाषत। १-६४अ-२०ब्
महर्षीणां वचः सत्यं पुराणेपि मया श्रुतम्॥ १-६४अ-२१अ
पराशरो ब्रह्मचारी प्रजार्थी मम वंशधृत्। १-६४अ-२१ब्
एवं संभाषमाणे तु वसिष्ठे पितृभिः सह॥ १-६४अ-२२अ
ऋषयोऽभ्यागमंस्तत्र नैमिशारण्यवासिनः। १-६४अ-२२ब्
विवाहं द्रष्टुमिच्छन्तः शक्तिपुत्रस्य धीमतः॥ १-६४अ-२३अ
अरुन्धती महाभागा अदृश्यन्त्या सहैव सा। १-६४अ-२३ब्
विश्वकर्मकृतां दिव्यां पर्णशालां प्रविश्य सा॥ १-६४अ-२४अ
वैवाहिकांस्तु संभारान्संकल्प्य च यथाक्रमम्। १-६४अ-२४ब्
अरुन्धती सत्यवतीं वधूं संगृह्य पाणिना॥ १-६४अ-२५अ
भद्रासने प्रतिष्ठाप्य इन्द्राणीं समकल्पयत्। १-६४अ-२५ब्
आपूर्यमाणपक्षे तु वैशाखे सोमदैवते॥ १-६४अ-२६अ
शुभग्रहे त्रयोदश्यां मुहूर्ते मैत्र आगते। १-६४अ-२६ब्
विवाहकाल इत्युक्त्वा वसिष्ठो मुनिभिः सह॥ १-६४अ-२७अ
यमुनाद्वीपमासाद्य शिष्यैश्च मुनिपङ्क्तिभिः। १-६४अ-२७ब्
स्थण्डिलं चतुरश्रं च गोमयेनोपलिप्य च॥ १-६४अ-२८अ
अक्षतैः फलपुष्पैश्च स्वस्तिकैराम्रपल्लवैः। १-६४अ-२८ब्
जलपूर्णघटैश्चैव सर्वतः परिशोभितम्॥ १-६४अ-२९अ
तस्य मध्ये प्रतिष्ठाप्य बृस्यां मुनिवरं तदा। १-६४अ-२९ब्
सिद्धार्थयवकल्कैश्च स्नातं सर्वौषधैरपि॥ १-६४अ-३०अ
कृत्वार्जुनानि वस्त्राणि परिधाप्य महामुनिम्। १-६४अ-३०ब् वाचयित्वा तु पुण्याहमक्षतैस्तु समर्चितः॥ १-६४अ-३१अ गन्धानुलिप्तः स्रग्वी च सप्रतोदो वधूगृहे। १-६४अ-३१ब् अपदातिस्ततो गत्वा वधूज्ञातिभिरर्चितः॥ १-६४अ-३२अ स्नातामहतसंवीतां गन्धलिप्तां स्रगुज्ज्वलाम्। १-६४अ-३२ब् वधूं मङ्गलसंयुक्तामिषुहस्तां समीक्ष्य च॥ १-६४अ-३३अ उवाच वचनं काले कालज्ञः सर्वधर्मवित्। १-६४अ-३३ब् प्रतिग्रहो दातृवशः श्रुतमेवं मया पुरा॥ १-६४अ-३४अ यथा वक्ष्यन्ति पितरस्तत्करिष्यामहे वयम्। १-६४अ-३४क्ष् वैशम्पायन उवाच। १-६४अ-३४ब् तद्धर्मिष्ठं यशस्यं च वचनं सत्यवादिनः॥ १-६४अ-३५अ श्रुत्वा तु पितरः सर्वे निःसङ्गा निष्परिग्रहाः। १-६४अ-३५ब् वसुं परमधर्मिष्ठमानीयेदं वचोऽब्रुवन्॥ १-६४अ-३६अ मत्स्ययोनौ समुत्पन्ना तव पुत्री विशेषतः। १-६४अ-३६ब् पराशराय मुनये दातुमर्हसि धर्मतः॥ १-६४अ-३७क्ष् वसुरुवाच। १-६४अ-३७अ सत्यं मम सुता सा हि दाशराजेन वर्धिता। १-६४अ-३७ब् अहं प्रभुः प्रदाने तु प्रजापालः प्रजार्थिनाम्॥ १-६४अ-३८क्ष् पितर ऊचुः। १-६४अ-३८अ

निराशिषो वयं सर्वे निःसङ्गा निष्परिग्रहाः। १-६४अ-३८ब्
कन्यादानेन संबन्धो दक्षिणाबन्ध उच्यते॥ १-६४अ-३९अ
कर्मभूमिस्तु मानुष्यं भोगभूमिस्त्रिविष्टपम्। १-६४अ-३९ब् इह
पुण्यकृतो यान्ति स्वर्गलोकं न संशयः॥ १-६४अ-४०अ इह लोके
दुष्कृतिनो नरकं यान्ति निर्घृणाः। १-६४अ-४०ब् दक्षिणाबन्ध
इत्युक्ते उभे सुकृतदुष्कृते॥ १-६४अ-४१अ दक्षिणाबन्धसंयुक्ता
योगिनः प्रपतन्ति ते। १-६४अ-४१ब् तस्मान्नो मानसीं कन्यां
योगाद्भ्रष्टां विशापते॥ १-६४अ-४२अ सुतात्वं तव संप्राप्तां
सतीं भिक्षां ददस्व वै। १-६४अ-४२ब् इत्युक्त्वा पितरः सर्वे
क्षणादन्तर्हितास्तदा॥ १-६४अ-४३क्ष् वैशम्पायन उवाच। १-६४अ-४३अ
याज्ञवल्क्यं समाहूय विवाहाचार्यमित्युत। १-६४अ-४३ब् वसुं चापि
समाहूय वसिष्ठो मुनिभिः सह॥ १-६४अ-४४अ विवाहं कारयामास
विधिदृष्टेन कर्मणा। १-६४अ-४४क्ष् वसुरुवाच। १-६४अ-४४ब्
पराशर महाप्राज्ञ तव दास्याम्यहं सुताम्॥ १-६४अ-४५अ
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना। १-६४अ-४५क्ष्
वैशम्पायन उवाच। १-६४अ-४५ब् वसोस्तु वचनं श्रुत्वा
याज्ञवल्क्यमते स्थितः॥ १-६४अ-४६अ कृतकौतुकमङ्गल्यः
पाणिना पाणिमस्पृशत्। १-६४अ-४६ब् प्रभूताज्येन हविषा हुत्वा
मन्त्रैर्हुताशनम्॥ १-६४अ-४७अ त्रिरग्निं तु परिक्रम्य समभ्यर्च्य
हुताशनम्। १-६४अ-४७ब् महर्षीन्याज्ञवल्क्यादीन्दक्षिणाभिः
प्रतर्प्यच॥ १-६४अ-४८अ लब्धानुज्ञोऽभिवाद्याशु
प्रदक्षिणमथाकरोत्। १-६४अ-४८ब् पराशरे कृतोद्वाहे
देवाः सर्पिगणास्तदा॥ १-६४अ-४९अ हृष्टा जग्मुः क्षणादेव
वेदव्यासो भवत्विति। १-६४अ-४९ब् एवं सत्यवती हृष्टा
पूजां लब्ध्वा यथेष्टतः॥ १-६४अ-५०अ पराशरेण संयुक्ता
सद्यो गर्भं सुषाव सा। १-६४अ-५०ब् जज्ञे च यमुनाद्वीपे
पाराशर्यः स वीर्यवान्॥ १-६४अ-५१अ जातमात्रः स ववृधे
सप्तवर्षोऽभवत्तदा। १-६४अ-५१ब् स्नात्वाभिवाद्य पितरं तस्थौ
व्यासः समाहितः॥ १-६४अ-५२अ स्वस्तीति वचनं चोक्त्वा ददौ
कलशमुत्तमम्। १-६४अ-५२ब् गृहीत्वा कलशं प्राप्ते तस्थौ व्यासः
समाहितः॥ १-६४अ-५३अ ततो दाशभयात्पत्नी स्नात्वा कन्या बभूव
सा। १-६४अ-५३ब् अभिवाद्य मुनेः पादौ पुत्रं जग्राह पाणिना॥ १-६४अ-५४अ
स्पृष्टमात्रे तु निर्भर्त्स्य मातरं वाक्यमब्रवीत्। १-६४अ-५४ब्
मम पित्रा तु संस्पर्शान्मातस्त्वमभवः शुचिः॥ १-६४अ-५५अ अद्य
दाशसुता कन्या न स्पृशेर्मामनिन्दिते। १-६४अ-५५क्ष् वैशम्पायन
उवाच। १-६४अ-५५ब् व्यासस्य वचनं श्रुत्वा बाष्पपूर्णमुखी

तदा॥ १-६४अ-५६अ मनुष्यभावात्सा योषित्पपात मुनिपादयोः। १-६४अ-५६ब्
महाप्रसादो भगवान्पुत्रं प्रोवाच धर्मवित्॥ १-६४अ-५७अ मा
त्वमेवंविधं कार्षीर्नैतद्धर्म्यं मतं हि नः। १-६४अ-५७ब्
दूष्यौ न मातापितरौ तथा पूर्वोपकारिणौ॥ १-६४अ-५८अ
धारणाद्दुःखसहनात्तयोर्माता गरीयसी। १-६४अ-५८ब्
बीजक्षेत्रसमायोगे सस्यं जायेत लौकिकम्॥ १-६४अ-५९अ जायते
च सुतस्तद्वत्पुरुषस्त्रीसमागमे। १-६४अ-५९ब् मृगीणां पक्षिणां
चैव अप्सराणां तथैव च॥ १-६४अ-६०अ शूद्रयोन्यां च जायन्ते
मुनयो वेदपारगाः। १-६४अ-६०ब् ऋष्यशृङ्गो मृगीपुत्रः
कण्वो बर्हिसुतस्तथा॥ १-६४अ-६१अ अगस्त्यश्च वसिष्ठश्च
उर्वश्यां जनितावुभौ। १-६४अ-६१ब् सोमश्रवास्तु सर्प्यां तु
अश्विनावश्विसंभवौ॥ १-६४अ-६२अ स्कन्दः स्कन्नेन शुक्लेन
जातः शरवणे पुरा। १-६४अ-६२ब् एवमेव च देवानामृषीमां
चैव संभवः॥ १-६४अ-६३अ लोकवेदप्रवृत्तिर्हि न मीमांस्या
बुधैः सदा। १-६४अ-६३ब् वेदव्यास इति प्रोक्तः पुराणे च
स्वयंभुवा॥ १-६४अ-६४अ धर्मनेता महर्षीणां मनुष्याणां
त्वमेव च। १-६४अ-६४ब् तस्मात्पुत्र न दूष्येत वासवी
योगचारिणी॥ १-६४अ-६५अ मत्प्रीत्यर्थं महाप्राज्ञ सस्नेहं
वक्तुमर्हसि। १-६४अ-६५ब् प्रजाहितार्थं संभूतो विष्णोर्भागो
महानृषिः॥ १-६४अ-६६अ तस्मात्स्वमातरं स्नेहात्प्रबवीहि
तपोधन। १-६४अ-६६क्ष् वैशम्पायन उवाच। १-६४अ-६६ब्
गुरोर्वचनमाज्ञाय व्यासः प्रीतोऽभवत्तदा॥ १-६४अ-६७अ चिन्तयित्वा
लोकवृत्तं मातुरङ्कमथाविशत्। १-६४अ-६७ब् पुत्रस्पर्शात्तु
लोकेषु नान्यत्सुखमतीव हि॥ १-६४अ-६८अ व्यासं कमलपत्राक्षं
परिष्वज्याश्र्ववर्तयत्। १-६४अ-६८ब् स्तन्यासारैः क्लिद्यमाना
पुत्रमाघ्राय मूर्धनि॥ १-६४अ-६९क्ष् वासव्युवाच। १-६४अ-६९अ
पुत्रलाभात्परं लोके नास्तीह प्रसवार्थिनाम्। १-६४अ-६९ब् दुर्लभं
चेति मन्येऽहं मया प्राप्तं महत्तपः॥ १-६४अ-७०अ महता
तपसा तात महायोगबलेन च। १-६४अ-७०ब् मया त्वं हि महाप्राज्ञ
लब्धोऽमृतमिवामरैः॥ १-६४अ-७१अ तस्मात्त्वं मामृषेः पुत्र
त्यक्तुं नार्हसि सांप्रतम्। १-६४अ-७१क्ष् वैशम्पायन उवाच। १-६४अ-७१ब्
एवमुक्तस्ततः स्नेहाद्व्यासो मातरमब्रवीत्॥ १-६४अ-७२अ त्वया स्पृष्टः
परिष्वक्तो मूर्ध्नि चाघ्रायितो मुहुः। १-६४अ-७२ब् एतावन्मात्रया
प्रीतो भविष्येषु नृपात्मजे॥ १-६४अ-७३अ स्मृतोऽहं
दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत्। १-६४अ-७३ब्
स मातरमनुज्ञाप्य तपस्येव मनो दधे॥ १-६४अ-७४अ

ततः कन्यामनुज्ञाय पुनः कन्या भवत्विति। १-६४अ-७४ब्
पराशरोऽपि भगवान्पुत्रेण सहितो ययौ॥ १-६४अ-७५अ
गत्वाश्रमपदं पुम्यमदृश्यन्त्या पराशरः। १-६४अ-७५ब्
जातकर्मादिसंस्कारं कारयामास धर्मतः॥ १-६४अ-७६अ कृतोपनयनो
व्यासो याज्ञवल्क्येन भारत। १-६४अ-७६ब् वेदानधिजगौ
साङ्गानोङ्कारेण त्रिमात्रया॥ १-६४अ-७७अ गुरवे दक्षिणां
दत्त्वा तपः कर्तुं प्रचक्रमे। १-६४अ-७७ब् एवं द्वैपायनो
जज्ञे सत्यवत्यां पराशरात्॥ १-६४अ-७८अ द्वीप न्यस्तः स
यद्बालस्तस्माद्द्वैपायनोऽभवत्। १-६४अ-७८ब् पादापसारिणं धर्मं
विद्वान्स तु युगे युगे॥ १-६४अ-७९अ आयुः शक्तिं च मर्त्यानां
युगाद्युगमवेक्ष्य च। १-६४अ-७९ब् ब्रह्मर्षिर्ब्राह्मणानां च
तथाऽनुग्रहकाङ्क्षया॥ १-६४अ-८०अ विव्यास वेदान्यस्माच्च वेदव्यास
इति स्मृतः। १-६४अ-८०ब् ततः स महर्षिर्विद्वाञ्शिष्यानाहूय
धर्मतः॥ १-६४अ-८१अ सुमन्तुं जैमिनिं पैलं शुकं चैव
स्वमात्मजम्। १-६४अ-८१ब् प्रभुर्वरिष्ठो वरदो वैशम्पायनमेव
च॥ १-६४अ-८२अ वेदानध्यापयामास महाभारतपञ्चमान्। १-६४अ-८२ब्
संहितास्तैः पृथक्त्वेन भारतस्य प्रकीर्तिता॥ १-६४अ-८३अ
ततः सत्यवती हृष्टा जगाम स्वं निवेशनम्। १-६४अ-८३ब्
तस्यास्तु योजनाद्गन्धमाजिघ्रन्ति नरा भुवि॥ १-६४अ-८४अ
दाशराजस्तु तद्गन्धमाजिघ्रन्पीतिमावहत्। १-६४अ-८४क्ष्
दाशराज उवाच। १-६४अ-८४ब् त्वामाहुर्मत्स्यगन्धेति कथं बाले
सुगन्धता॥ १-६४अ-८५अ अपास्य मत्स्यगन्धत्वं केन दत्ता सुगन्धता
१-६४अ-८५क्ष् सत्यवत्युवाच। १-६४अ-८५ब् शक्ते- पुत्रो महाप्राज्ञः
पराशर इति श्रुतः॥ १-६४अ-८६अ नावं वाहयमानाया मम दृष्ट्वां
सुशिक्षितम्। १-६४अ-८६ब् उपास्य मत्स्यगन्धत्वं योजनाद्गन्धतां
ददौ॥ १-६४अ-८७अ ऋषेः प्रसादं दृष्ट्वा तु जनाः
प्रीतिमुपागमन्। १-६४अ-८७ब् एवं लब्धो मया गन्धो न रोषं
कर्तुमर्हसि॥ १-६४अ-८८अ दाशराजस्तु तद्वाक्यं प्रशशंस ननन्द
च। १-६४अ-८८ब् एतत्पवित्रं पुण्यं च व्याससमवमुत्तमम्। १-६४अ-८८च्
इतिहासमिमं श्रुत्वा प्रजावन्तो भवन्ति च॥ १-६४-१३२ (२७२३)
तथा भीष्मः शान्तनवो गङ्गायाममितद्युतिः ।
वसुवीर्यात्समभवन्महावीर्यो महायशाः ॥ १-६४-१३३ (२७२४)
वेदार्थविच्च भगवानृषिर्विप्रो महायशाः ।
शूले प्रोतः पुराणर्षिरचोरश्चोरशङ्कया ॥ १-६४-१३४ (२७२५)
अणीमाण्डव्य इत्येवं विख्यातः स महायशाः ।
स धर्ममाहूय पुरा महर्षिरिदमुक्तवान् ॥ १-६४-१३५ (२७२६)

इषीकया मया बाल्याद्विद्धा ह्येका शकुन्तिका ।
तत्किल्बिषं स्मरे धर्म नान्यत्पापमहं स्मरे ॥१-६४-१३६ (२७२७)
तन्मे सहस्रममितं कस्मान्नेहाजयत्तपः ।
गरीयान्ब्राह्मणवधः सर्वभूतवधाद्यतः ॥१-६४-१३७ (२७२८)
तस्मात्त्वं किल्बिषादस्माच्छूद्रयोनौ जनिष्यसि। १-६४-१३८ (२७२९)
वैशम्पायन उवाच ।
तेन शापेन धर्मोऽपि शूद्रयोनावजायत ॥ १-६४-१३८क्ष् (३१३)
विद्वान्विदुररूपेण धार्मिकः किल्बिषात्ततः ।
संजयो मुनिकल्पस्तु जज्ञे सूतो गवल्गणात् ॥१-६४-१३९ (२७३०)
सूर्याच्च कुन्तिकन्यायां जज्ञे कर्णो महाबलः ।
सहजं कवचं बिभ्रत्कुण्डलोद्योतिताननः ॥१-६४-१४० (२७३१)
अनुग्रहार्थं लोकानां विष्णुर्लोकनमस्कृतः ।
वसुदेवात्तु देवक्यां प्रादुर्भूतो महायशाः ॥१-६४-१४१ (२७३२)
अनादिनिधनो देवः स कर्ता जगतः प्रभुः ।
अव्यक्तमक्षरं ब्रह्म प्रधानं त्रिगुणात्मकम् ॥१-६४-१४२ (२७३३)
आत्मानमव्ययं चैव प्रकृतिं प्रभवं प्रभुम् ।
पुरुषं विश्वकर्माणं सत्वयोगं ध्रुवाक्षरम् ॥१-६४-१४३ (२७३४)
अनन्तमचलं देवं हंसं नारायणं प्रभुम् ।
धातारमजमव्यक्तं यमाहुः परमव्ययम् ॥१-६४-१४४ (२७३५)
कैवल्यं निर्गुणं विश्वमनादिमजमव्ययम् ।
पुरुषः स विभुः कर्ता सर्वभूतपितामहः ॥१-६४-१४५ (२७३६)
धर्मसंस्थापनार्थाय प्रजज्ञेऽन्धकवृष्णिषु ।
अस्त्रज्ञौ तु महावीर्यौ सर्वशास्त्रविशारदौ ॥१-६४-१४६ (२७३७)
सात्यकिः कृतवर्मा च नारायणमनुव्रतौ ।
सत्यकाद्धृदिकाच्चैव जज्ञातेऽस्त्रविशारदौ ॥१-६४-१४७ (२७३८)
भरद्वाजस्य च स्कन्नं द्रोण्यां शुक्रमवर्धत ।
सहर्षेरुग्रतपसस्तस्माद्द्रोणो व्यजायत ॥१-६४-१४८ (२७३९)
गौतमान्मिथुनं जज्ञे शरस्तम्बाच्छरद्वतः ।
अश्वत्थाम्नश्च जननी कृपश्चैव महाबलः ॥१-६४-१४९ (२७४०)
अश्वत्थामा ततो जज्ञे द्रोणादेव महाबलः ।
तथैव धृष्टद्युम्नोऽपि साक्षादग्निसमद्युतिः ॥१-६४-१५० (२७४१)
वैताने कर्मणि तते पावकात्समजायत ।
वीरो द्रोणविनाशाय धनुरादाय वीर्यवान् ॥१-६४-१५१ (२७४२)
तथैव वेद्यां कृष्णापि जज्ञे तेजस्विनी शुभा ।
विभ्राजमाना वपुषा बिभ्रती रूपमुत्तमम् ॥१-६४-१५२ (२७४३)
प्रह्लादशिष्यो नग्नजित्सुबलश्चाभवत्ततः ।

तस्य प्रजा धर्महन्त्री जज्ञे देवप्रकोपनात् ॥ १-६४-१५३ (२७४४)
गान्धारराजपुत्रोऽभूच्छकुनिः सौबलस्तथा ।
दुर्योधनस्य जननी जज्ञातेऽर्थविशारदौ ॥ १-६४-१५४ (२७४५)
कृष्णद्वैपायनाज्जज्ञे धृतराष्ट्रो जनेश्वरः ।
क्षेत्रे विचित्रवीर्यस्य पाण्डुश्चैव महाबलः ॥ १-६४-१५५ (२७४६)
धर्मार्थकुशलो धीमान्मेधावी धूतकल्मषः ।
विदुरः शूद्रयोनौ तु जज्ञे द्वैपायनादपि ॥ १-६४-१५६ (२७४७)
पाण्डोस्तु जज्ञिरे पञ्च पुत्रा देवसमाः पृथक् ।
द्वयोः स्त्रियोर्गुणज्येष्ठस्तेषामासीद्युधिष्ठिरः ॥ १-६४-१५७ (२७४८)
धर्माद्युधिष्ठिरो जज्ञे मारुताच्च वृकोदरः ।
इन्द्राद्धनंजयः श्रीमान्सर्वशस्त्रभृतां वरः ॥ १-६४-१५८ (२७४९)
जज्ञाते रूपसंपन्नावश्विभ्यां च यमावपि ।
नकुलः सहदेवश्च गुरुशुश्रूषणे रतौ ॥ १-६४-१५९ (२७५०)
तथा पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः ।
दुर्योधनप्रभृतयो युयुत्सुः करणस्तथा ॥ १-६४-१६० (२७५१)
ततो दुःशासनश्चैव दुःसहश्चापि भारत ।
दुर्मर्षणो विकर्णश्च चित्रसेनो विविंशतिः ॥ १-६४-१६१ (२७५२)
जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत ।
वैश्यापुत्रो युयुत्सुश्च एकादश महारथाः ॥ १-६४-१६२ (२७५३)
अभिमन्युः सुभद्रायामर्जुनादभ्यजायत ।
स्वस्रीयो वासुदेवस्य पौत्रः पाण्डोर्महात्मनः ॥ १-६४-१६३ (२७५४)
पाण्डवेभ्यो हि पाञ्चाल्यां द्रौपद्यां पञ्च जज्ञिरे ।
कुमारा रूपसंपन्नाः सर्वशास्त्रविशारदाः ॥ १-६४-१६४ (२७५५)
प्रतिविन्ध्यो युधिष्ठिरात्सुतसोमो वृकोदरात् ।
अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः ॥ १-६४-१६५ (२७५६)
तथैव सहदेवाच्च श्रुतसेनः प्रतापवान् ।
हिडिम्बायां च भीमेन वने जज्ञे घटोत्कचः ॥ १-६४-१६६ (२७५७)
शिखण्डी द्रुपदाज्जज्ञे कन्या पुत्रत्वभागता ।
यां यक्षः पुरुषं चक्रे स्थूमः प्रियचिकीर्षया ॥ १-६४-१६७ (२७५८)
कुरूणां विग्रहे तस्मिन्समागच्छन्बहून्यथ ।
राज्ञां शतसहस्राणि योत्स्यमानानि संयुगे ॥ १-६४-१६८ (२७५९)
तेषामपरिमेयानां नामधेयानि सर्वशः ।
न शक्यानि समाख्यातुं वर्षाणामयुतैरपि ।
एते तु कीर्तिता मुख्या यैराख्यानमिदं ततम् ॥ ॥ १-६४-१६९ (२७६०)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि

१-६४-१ रञ्जकत्वाद्राजा ।महीपतिः पृथ्वीपालकः ॥
१-६४-२ वसुः उपरिचरः ॥
१-६४-४ साक्षात्प्रत्यक्षभूय ॥
१-६४-५ न संकीर्येत निर्नायकत्वात् ॥
१-६४-८ पशव्यः पशुभ्यो हितः ॥
१-६४-११ गाः बलीवर्दान् ।वृषभान्कृशान्न धुरि युञ्जते
प्रत्युत संधुक्षयन्ति पुष्टान्कुर्वन्ति। अन्ये तु गाः स्त्रीगवीः
तासामप्यान्ध्रादिदुर्देशेषु धुरि योजनं दृष्टं तदिह नास्तीत्याहुः ॥
१-६४-१२ न त इति ।आत्मज्ञानात्सर्वज्ञो भविष्यसीत्यर्थः ॥
१-६४-१३ उपपत्स्यते उपस्थास्यते ॥
१-६४-१५ वैजयन्तीं विजयहेतुं ।अविक्षतमेव धारयिष्यति
पालयिष्यति नतु विक्षतम् ॥
१-६४-१६ लक्षणं चिह्नम् ॥
१-६४-१७ इष्टप्रदानं प्रीतिदायमुद्दिश्य यष्टिं ददौ ॥
१-६४-२० शक्रस्य पूजार्थं तस्या यष्टेः प्रवेशं स्थापनम् ॥
१-६४-२३ पिटकैः मञ्जूषारूपैर्वस्त्रमयैः कोशैः ॥
१-६४-४६ वासवाः वसुपुत्राः ॥
१-६४-४८ पुरोपवाहिनीं पुरसमीपे वहन्तीं ॥
१-६४-५० नदी राज्ञे न्यवेदयन्मिथुनमित्यनुषज्यते ॥
१-६४-५४ तदहस्तस्मिन् दिने ॥
१-६४-६३ वायुना कामोद्दीपकेन ।धूम्रं मलिनं रतिकर्म
तदर्थं। मुदं स्त्रीविषयां प्रीतिमनुसृत्य तामेन मनसाऽगात्। तया
सह मानसं सुरतमकरोदित्यर्थः। प्रचस्कन्द पपात ॥
१-६४-६४ मिथ्या प्रसवशून्यत्वेनालीकप्रायम् ॥
१-६४-६८ अभिमन्त्र्य पुत्रोत्पत्तिलिङ्गैर्मन्त्रैः स्पृष्ट्वा ॥
१-६४-७० आर्तवमृतुकालीनं स्नानम् ॥
१-६४-७३ युध्यतोः सतोः ॥
१-६४-७६ मासे दशमे प्राप्ते बबन्धुरिति संबन्धः ।उज्जह्रुः
उद्धृतवन्तः ॥
१-६४-७७ काये देहे ।मत्स्याः मत्स्ययोषायाः ॥
१-६४-११५ नीहारं धूमिकाम् ॥
१-६४-११९ स्थातुं जीवितुं नोत्सहे कन्यात्वदूषणादित्यर्थः ॥
१-६४-१२८ द्वीपमेवाऽयनं न्यासस्थानं यस्य द्वीपायनः स्वार्थे

तद्धितः द्वीपायन एव द्वैपायन इति नाम निर्वक्ति न्यस्त इति ॥
१-६४-१२५ पादापसारिणं युगेयुगे पादशः १-६४-८८
तमश्लोकपूर्वार्धात्परं 'इति सत्यवती हृष्टा' इत्यादि 'भारतस्य
प्रकाशिताः' इत्यन्तसार्धश्लोकसप्तकस्थाने इमे कुण्डलिताः श्लोकाः
केषुचित्कोशेषूपलभ्यन्ते। १-६४-१३३ वसुवीर्यात् वस्वंशात्। ।
१-६४-१३६ शकुन्तिका मक्षिका ॥
१-६४-१४० कुन्तिभोजस्य कन्यायां कुन्त्याम् ॥
१-६४-१६७ स्थूणो नाम्ना ॥
चतुःषष्ठितमोऽध्यायः ॥
६४ ॥

आदिपर्व - अध्याय ०६५
॥ श्रीः ॥
१.६५. अध्यायः ६५

Mahabharata - Adi Parva - Chapter Topics
विस्तरश्रवणेच्छया जनमेजयस्य प्रश्नः ॥ १ ॥
परशुरामेण लोके निःक्षत्रिये कृते ब्राह्मणेभ्यः क्षत्रस्य
पुनरुत्पत्तिः ॥ २ ॥
तत्कालस्य धर्मभूयिष्ठत्वम् ॥ ३ ॥
देवैर्निर्जितानां दानवानां भूमावुत्पत्तिः ॥ ४ ॥
तद्भूरिभारार्तया पृथ्व्या प्रार्थितस्य ब्रह्मणो
देवान्प्रत्यंशावतरणाज्ञापनम् ॥ ५ ॥
अवतारार्थं इन्द्रेण नारायणप्रार्थना ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-६५-० (२७६१)
जनमेजय उवाच। १-६५-०क्ष् (३१४)
य एते कीर्तिता ब्रह्मन्ये चान्ये नानुकीर्तिताः ।
सम्यक्ताञ्श्रोतुमिच्छामिराज्ञश्चान्यान्सहस्रशः ॥ १ ॥ १-६५-१ (२७६२)
यदर्थमिह संभूता देवकल्पा महारथाः ।
भुवि तन्मे महाभाग सम्यगाख्यातुमर्हसि ॥ १-६५-२ (२७६३)
वैशम्पायन उवाच। १-६५-३क्ष् (३१५)
रहस्यं खल्विदं राजन्देवानामिति नः श्रुतम् ।
तत्तु ते कथयिष्यामि नमस्कृत्वा स्वयंभुवे ॥ १-६५-३ (२७६४)
त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षित्रयां पुरा ।

जामदग्न्यस्तपस्तेपे महेन्द्रे पर्वतोत्तमे ॥ १-६५-४ (२७६५)
तदा निःक्षत्रिये लोके भार्गवेण कृते सति ।
ब्राह्मणान्क्षत्रिया राजन्सुतार्थिन्योऽभिचक्रमुः ॥ १-६५-५ (२७६६)
ताभिः सह समापेतुर्ब्राह्मणाः संशितव्रताः ।
ऋतावृतौ नरव्याघ्र न कामान्नानृतौ तथा ॥ १-६५-६ (२७६७)
तेभ्यश्च लेभिरे गर्भं क्षत्रियास्ताः सहस्रशः ।
ततः सुषुविरे राजन्क्षत्रियान्वीर्यवत्तरान् ॥ १-६५-७ (२७६८)
कुमारांश्च कुमारीश्च पुनः क्षत्राभिवृद्धये ।
एवं तद्ब्राह्मणैः क्षत्रं क्षत्रियासु तपस्विभिः ॥ १-६५-८ (२७६९)
जातं वृद्धं च धर्मेण सुदीर्घेणायुषान्वितम् ।
चत्वारोऽपि ततो वर्णा बभूवुर्ब्राह्मणोत्तराः ॥ १-६५-९ (२७७०)
अभ्यगच्छन्नृतौ नारीं न कामान्नानृतौ तथा ।
तथैवान्यानि भूतानि तिर्यग्योनिगतान्यपि ॥ १-६५-१० (२७७१)
ऋतौ दारांश्च गच्छन्ति तत्तथा भरतर्षभ ।
ततोऽवर्धन्त धर्मेण सहस्रशतजीविनः ॥ १-६५-११ (२७७२)
ताः प्रजाः पृथिवीपाल धर्मव्रतपरायणाः ।
आधिभिर्व्याधिभिश्चैव विमुक्ताः सर्वशो नराः ॥ १-६५-१२ (२७७३)
अथेमां सागरोपान्तां गां गजेन्द्रगताखिलाम् ।
अध्यतिष्ठत्पुनः क्षत्रं सशैलवनपत्तनाम् ॥ १-६५-१३ (२७७४)
प्रशासति पुनः क्षत्रे धर्मेणेमां वसुन्धराम् ।
ब्राह्मणाद्यास्ततो वर्णा लेभिरे मुदमुत्तमाम् ॥ १-६५-१४ (२७७५)
कामक्रोधोद्भवान्दोषान्निरस्य च नराधिपाः ।
धर्मेण दण्डं दण्डेषु प्रणयन्तोऽन्वपालयन् ॥ १-६५-१५ (२७७६)
तथा धर्मपरे क्षत्रे सहस्राक्षः शतक्रतुः ।
स्वादु देशे च काले च ववर्षाप्याययन्प्रजाः ॥ १-६५-१६ (२७७७)
न बाल एव म्रियते तदा कश्चिज्जनाधिप ।
न च स्त्रियं प्रजानाति कश्चिदप्राप्तयौवनाम् ॥ १-६५-१७ (२७७८)
एवमायुष्मतीभिस्तु प्रजाभिर्भरतर्षभ ।
इयं सागरपर्यन्ता ससापूर्यत मेदिनी ॥ १-६५-१८ (२७७९)
ईजिरे च महायज्ञैः क्षत्रिया बहुदक्षिणैः ।
साङ्गोपनिषदान्वेदान्विप्राश्चाधीयते तदा ॥ १-६५-१९ (२७८०)
न च विक्रीणते ब्रह्म ब्राह्मणाश्च तदा नृप ।
न च शूद्रसमभ्याशे वेदानुच्चारयन्त्युत ॥ १-६५-२० (२७८१)
कारयन्तः कृषिं गोभिस्तथा वैश्याः क्षिताविह ।
युञ्जते धुरि नो गाश्च कृशाङ्गांश्चाप्यजीवयन् ॥ १-६५-२१ (२७८२)
फेनपांश्च तथा वत्सान्न दुहन्ति स्म मानवाः ।

न कूटमानैर्वणिजः पण्यं विक्रीणते तदा ॥१-६५-२२ (२७८३)
कर्माणि च नरव्याघ्र धर्मोपेतानि मानवाः ।
धर्ममेवानुपश्यन्तश्चक्रुर्धर्मपरायणाः ॥१-६५-२३ (२७८४)
स्वकर्मनिरताश्चासन्सर्वे वर्णा नराधिप ।
एवं तदा नरव्याघ्र धर्मो न ह्रसते क्वचित् ॥१-६५-२४ (२७८५)
काले गावः प्रसूयन्ते नार्यश्च भरतर्षभ ।
भवन्त्यृतुषु वृक्षाणां पुष्पाणि च फलानि च ॥१-६५-२५ (२७८६)
एवं कृतयुगे सम्यग्वर्तमाने तदा नृप ।
आपूर्यत मही कृत्स्ना प्राणिभिर्बहुभिर्भृशम् ॥१-६५-२६ (२७८७)
एवं समुदिते लोके मानुषे भरतर्षभ ।
असुरा जज्ञिरे क्षेत्रे राज्ञां तु मनुजेश्वर ॥१-६५-२७ (२७८८)
आदित्यैर्हि तदा दैत्या बहुशो निर्जिता युधि ।
ऐश्वर्याद्भ्रंशिताः स्वर्गात्संबभूवुः क्षिताविह ॥१-६५-२८ (२७८९)
इह देवत्वमिच्छन्तो मानुषेषु तपस्विनः ।
जज्ञिरे भुवि भूतेषु तेषु तेष्वसुरा विभो ॥१-६५-२९ (२७९०)
गोष्वश्वेषु च राजेन्द्र खरोष्ट्रमहिषेषु च ।
क्रव्यात्सु चैव भूतेषु गजेषु च मृगेषु च ॥१-६५-३० (२७९१)
जातैरिह महीपाल जायमानैश्च तैर्मही ।
न शशाकात्मनात्मानमियं धारयितुं धरा ॥१-६५-३१ (२७९२)
अथ जाता महीपालाः केचिद्बहुमदान्विताः ।
दितेः पुत्रा दनोश्चैव तदा लोकादिह च्युताः ॥१-६५-३२ (२७९३)
वीर्यवन्तोऽवलिप्तास्ते नानारूपधरा महीम् ।
इमां सागरपर्यन्तां परीयुररिमर्दनाः ॥१-६५-३३ (२७९४)
ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्चैवाप्यपीडयन् ।
अन्यानि चैव सत्वानि पीडयामासुरोजसा ॥१-६५-३४ (२७९५)
त्रासयन्तोऽभिनिघ्नन्तः सर्वभूतगणांश्च ते ।
विचेरुः सर्वशो राजन्महीं शतसहस्रशः ॥१-६५-३५ (२७९६)
आश्रमस्थान्महर्षींश्च धर्षयन्तस्ततस्ततः ।
अब्रह्मण्या वीर्यमदा मत्ता मदबलेन च ॥१-६५-३६ (२७९७)
एवं वीर्यबलोत्सिक्तैर्भूरियं तैर्महासुरैः ।
पीड्यमाना मही राजन्ब्रह्माणमुपचक्रमे ॥१-६५-३७ (२७९८)
न ह्यमी भूतसत्वौघाः पन्नगाः सनगां महीम् ।
तदा धारयितुं शेकुराक्रान्तां दानवैर्बलात् ॥१-६५-३८ (२७९९)
ततो मही महीपाल भारार्ता भयपीडिता ।
जगाम शरणं देवं सर्वभूतपितामहम् ॥१-६५-३९ (२८००)
सा संवृतं महाभागैर्देवद्विजमहर्षिभिः ।

ददर्श देवं ब्रह्माणं लोककर्तारमव्ययम् ॥१-६५-४० (२८०१)
गन्धर्वैरप्सरोभिश्च बन्दिकर्मसु निष्ठितैः ।
वन्द्यमानं मुदोपतैर्ववन्दे चैनमेत्य सा ॥१-६५-४१ (२८०२)
अथ विज्ञापयामास भूमिस्तं शरणार्थिनी ।
सन्निधौ लोकपालानां सर्वेषामेव भारत ॥१-६५-४२ (२८०३)
तत्प्रधानात्मनस्तस्य भूमेः कृत्यं स्वयंभुवः ।
पूर्वमेवाभवद्राजन्विदितं परमेष्ठिनः ॥१-६५-४३ (२८०४)
स्रष्टा हि जगतः कस्मान्न संबुध्येत भारत ।
ससुरासुरलोकानामशेषेण मनोगतम् ॥१-६५-४४ (२८०५)
तामुवाच महाराज भूमिं भूमिपतिः प्रभुः ।
प्रभवः सर्वभूतानामीशः शंभुः प्रजापतिः ॥१-६५-४५ (२८०६)
ब्रह्मोवाच।१-६५-४६क्ष् (३१६)
यदर्थमभिसंप्राप्ता मत्सकाशं वसुन्धरे ।
तदर्थं सन्नियोक्ष्यामि सर्वानेव दिवौकसः ॥१-६५-४६ (२८०७)
ग्उत्तिष्ठ गच्छ वसुधे स्वस्थानमिति साऽगमत्।' १-६५-४७ (२८०८)
वैशम्पायन उवाच ।
इत्युक्त्वा स महीं देवो ब्रह्मा राजन्विसृज्य च ।
आदिदेश तदा सर्वान्विबुधान्भूतकृत्स्वयम् ॥ १-६५-४७क्ष् (३१७)
अस्या भूमेर्निरसितुं भारं भागैः पृथक्पृथक् ।
अस्यामेव प्रसूयध्वं तिरोधायेति चाब्रवीत् ॥१-६५-४८ (२८०९)
तथैव च समानीय गन्धर्वाप्सरसां गणान् ।
उवाच भगवान्सर्वानिदं वचनमर्थवत् ॥१-६५-४९ (२८१०)
ब्रह्मोवाच।१-६५-५०क्ष् (३१८)
स्वैः स्वैरंशैः प्रसूयध्वं यथेष्टं मानेषेषु च। १-६५-५० (२८११)
वैशम्पायन उवाच ।
अथ शक्रादयः सर्वे श्रुत्वा सुरगुरोर्वचः ।
तथ्यमर्थ्यं च पथ्यं च तस्य ते जगृहुस्तदा ॥ १-६५-५०क्ष् (३१९)
अथ ते सर्वशोंशैः स्वैर्गन्तुं भूमिं कृतक्षणाः ।
नारायणममित्रघ्नं वैकुण्ठमुपचक्रमुः ॥१-६५-५१ (२८१२)
यः स चक्रगदापाणिः पीतवासाः शितिप्रभः ।
पद्मनाभः सुरारिघ्नः पृथुचार्वञ्चितेक्षणः ॥१-६५-५२ (२८१३)
प्रजापतिपतिर्देवः सुरनाथो महाबलः ।
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ॥१-६५-५३ (२८१४)
तं भुवः शोधनायेन्द्र उवाच पुरुषोत्तमम् ।
अंशेनावतरेत्येवं तथेत्याह च तं हरिः ॥ ॥१-६५-५४ (२८१५)

इति श्रीमन्महाभारते आदिपर्वणि अंशावतरणपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ॥ समाप्तमंशावतरणपर्व ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६५-४ त्रिःसप्तकृत्वा एकविंशतिवारान् ॥
१-६५-१३ हे गजेन्द्रगत हे गजेन्द्रगमन ॥
१-६५-२० ब्रह्म वेदं न विक्रीणते भृतकाध्यापनं न कुर्वत इत्यर्थः ॥
१-६५-२१ वैश्याः स्वयं धुरि गा बलीवर्दान् न युञ्जते ॥
१-६५-२२ फेनपान् अतृणादानभिलक्ष्य न दुहन्ति धेनूरिति शेषः
। कूटमानैः कपटतुलाप्रस्थादिभिः ॥
१-६५-२९ देवत्वं राजत्वम् ॥
१-६५-३६ मही उपचक्रमे गन्तुमिति शेषः ॥
१-६५-४८ तिरोधाय स्वंस्वं रूपं प्रच्छाद्य ॥
१-६५-५४ शोधनाय कण्टकभूतखलोन्मूलनाय ॥
पञ्चषष्टितमोऽध्यायः ॥
६५ ॥

आदिपर्व - अध्याय ०६६
॥ श्रीः ॥
१.६६. अध्यायः ६६

(अथ संभवपर्व ॥ ७ ॥)
Mahabharata - Adi Parva - Chapter Topics
अदित्यादिदक्षकन्यावंशकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-६६-० (२८१६)
वैशम्पायन उवाच। १-६६-०क्ष् (३२०)
अथ नारायणेनेन्द्रश्चकार सह संविदम् ।
अवतर्तुं महीं स्वर्गादंशतः महितः सुरैः ॥ १-६६-१ (२८१७)
आदिश्य च स्वयं शक्रः सर्वानेव दिवौकसः ।
निर्जगाम पुनस्तस्मात्क्षयान्नारायणस्य ह ॥ १-६६-२ (२८१८)
तेऽमरारिविनाशाय सर्वलोकहिताय च ।
अवतेरुः क्रमेणैव महीं स्वर्गाद्दिवौकसः ॥ १-६६-३ (२८१९)
ततो ब्रह्मर्षिवंशेषु पार्थिवर्षिकुलेषु च ।
जज्ञिरे राजशार्दूल यथाकामं दिवौकसः ॥ १-६६-४ (२८२०)

दानवान्राक्षसांश्चैव गन्धर्वान्पन्नगांस्तथा ।
पुरुषादानि चान्यानि जघ्नुः सत्वान्यनेकशः ॥ १-६६-५ (२८२१)
दानवा राक्षसाश्चैव गन्धर्वाः पन्नगास्तथा ।
न तान्बलस्थान्बाल्येऽपि जघ्नुर्भरतसत्तम ॥ १-६६-६ (२८२२)
जनमेजय उवाच। १-६६-७क्ष् (३२१)
देवदानवसङ्घानां गन्धर्वाप्सरसां तथा ।
मानवानां च सर्वेषां तथा वै यक्षरक्षसाम् ॥ १-६६-७ (२८२३)
श्रोतुमिच्छामि तत्त्वेन संभवं कृत्स्नमादितः ।
प्राणिनां चैव सर्वेषां संभवं वक्तुमर्हसि ॥ १-६६-८ (२८२४)
वैशम्पायन उवाच। १-६६-९क्ष् (३२२)
हन्त ते कथयिष्यामि नमस्कृत्य स्वयंभुवे ।
सुरादीनामहं सम्यग्लोकानां प्रभवाप्ययम् ॥ १-६६-९ (२८२५)
ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ।
मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ॥ १-६६-१० (२८२६)
मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥ १-६६-११ (२८२७)
अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः ॥ १-६६-१२ (२८२८)
कद्रूश्च मनुजव्याघ्र दक्षकन्यैव भारत ।
एतासां वीर्यसंपन्नं पुत्रपौत्रमनन्तकम् ॥ १-६६-१३ (२८२९)
अदित्यां द्वादशादित्याः संभूता भुवनेश्वराः ।
ये राजन्नामतस्तांस्ते कीर्तयिष्यामि भारत ॥ १-६६-१४ (२८३०)
धाता मित्रोऽर्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान्पूषा च सविता दशमस्तथा ॥ १-६६-१५ (२८३१)
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्वेषामादित्यानां गुणाधिकः ॥ १-६६-१६ (२८३२)
एक एव दितेः पुत्रो हिरण्यकशिपुः स्मृतः ।
नाम्ना ख्यातास्तु तस्येमे पञ्च पुत्रा महात्मनः ॥ १-६६-१७ (२८३३)
प्रह्लादः पूर्वजस्तेषां संह्लादस्तदनन्तरम् ।
अनुह्लादस्तृतीयोऽभूत्तस्माच्च शिबिबाष्कलौ ॥ १-६६-१८ (२८३४)
प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥ १-६६-१९ (२८३५)
विरोचनस्य पुत्रोऽभूद्बलिरेकः प्रतापवान् ।
बलेश्च प्रथितः पुत्रो बाणो नाम महासुरः ॥ १-६६-२० (२८३६)
रुद्रस्यानुचरः श्रीमान्महाकालेति यं विदुः ।
चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत ॥ १-६६-२१ (२८३७)

तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः ।
शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः ॥ १-६६-२२ (२८३८)
असिलोमा च केशी च दुर्जयश्चैव दानवः ।
अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्यवान् ॥ १-६६-२३ (२८३९)
तथा गगनमूर्धा च वेगवान्केतुमांश्च सः ।
स्वर्भानुरश्वोऽश्वपतिर्वृषपर्वाऽजकस्तथा ॥ १-६६-२४ (२८४०)
अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः ।
इषुपादेकचक्रश्च विरूपाक्षहराहरौ ॥ १-६६-२५ (२८४१)
निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा ।
शरभः शलभश्चैव सूर्याचन्द्रमसौ तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्तिताः ॥ १-६६-२६ (२८४२)
अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ स्मृतौ ।
अन्यौ दानवमुख्यानां सूर्याचन्द्रमसौ तथा ॥ १-६६-२७ (२८४३)
इमे च वंशाः प्रथिताः सत्ववन्तो महाबलाः ।
दनुपुत्रा महाराज दश दानववंशजाः ॥ १-६६-२८ (२८४४)
एकाक्षो मृतपो वीरः प्रलम्बनरकावपि ।
वातापिः शत्रुतपनः शठश्चैव महासुरः ॥ १-६६-२९ (२८४५)
गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ।
असङ्ख्येयाः स्मृतास्तेषां पुत्राः पौत्राश्च भारत ॥ १-६६-३० (२८४६)
सिंहिका सुषुवे पुत्रं राहुं चन्द्रार्कमर्दनम् ।
सुचन्द्रं चन्द्रहर्तारं तथा चन्द्रप्रमर्दनम् ॥ १-६६-३१ (२८४७)
क्रूरस्वभावं क्रूरायाः पुत्रपौत्रमनन्तकम् ।
गणः क्रोधवशो नाम क्रूरकर्माऽरिमर्दनः ॥ १-६६-३२ (२८४८)
दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुंगवाः ।
विक्षरो बलवीरौ च वृत्रश्चैव महासुरः ॥ १-६६-३३ (२८४९)
कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः ।
प्रविख्याता महावीर्या दानवेषु परन्तपाः ॥ १-६६-३४ (२८५०)
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुस्तथैवान्ये कालकेया इति श्रुताः ॥ १-६६-३५ (२८५१)
असुराणामुपाध्यायः शक्रस्त्वषिसुतोऽभवत् ।
ख्याताश्चोशनसः पुत्राश्चत्वारोऽसुरयाजकाः ॥ १-६६-३६ (२८५२)
त्वष्टा धरस्तथात्रिश्च द्वावन्यौ रौद्रकर्मिणौ ।
तेजसा सूर्यसंकाशा ब्रह्मलोकपरायणाः ॥ १-६६-३७ (२८५३)
इत्येष वंशप्रभवः कथितस्ते तरस्विनाम् ।
असुराणां सुराणां च पुराणे संश्रुतो मया ॥ १-६६-३८ (२८५४)
एतेषां यदपत्यं तु न शक्यं तदशेषतः ॥

प्रसंख्यातुं महीपाल गुणभूतमनन्तकम् ॥१-६६-३९ (२८५५)
तार्क्ष्यश्चारिष्टनेमिश्च तथैव गरुडारुणौ ।
आरुणिर्वारुणिश्चैव वैनतेयाः प्रकीर्तिताः ॥१-६६-४० (२८५६)
शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्तिताः ॥१-६६-४१ (२८५७)
भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ।
गोपतिर्धृतराष्ट्रश्च सूर्यवर्चाश्च सप्तमः ॥१-६६-४२ (२८५८)
सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः ।
भीमश्चित्ररथश्चैव विख्यातः सर्वविद्वशी ॥१-६६-४३ (२८५९)
तथा शालिशिरा राजन्पर्जन्यश्च चतुर्दशः ।
कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः ॥
इत्येते देवगन्धर्वा मौनेयाः परिकीर्तिताः ॥ १-६६-४४ (२८६०)
अथ प्रभूतान्यन्यानि कीर्तयिष्यामि भारत ।
अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम् ॥१-६६-४५ (२८६१)
अरूपां सुभगां भासीमिति प्राधा व्यजायत ।
सिद्धः पूर्णश्च बर्हिश्च पूर्णायुश्च महायशाः ॥१-६६-४६ (२८६२)
ब्रह्मचारी रतिगुणः सुपर्णश्चैव सप्तमः ।
विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा ॥१-६६-४७ (२८६३)
इत्येते देवगन्धर्वाः प्राधेयाः परिकीर्तिताः ।
इमं त्वप्सरसां वंशं विदितं पुण्यलक्षणम् ॥१-६६-४८ (२८६४)
अरिष्टाऽसूत सुभगा देवी देवर्षितः पुरा ।
अलम्बुषा मिश्रकेशी विद्युत्पर्णा तिलोत्तमा ॥१-६६-४९ (२८६५)
अरुणा रक्षिता चैव रम्बा तद्वन्मनोरमा ।
केशिनी च सुबाहुश्च सुरता सुरजा तथा ॥१-६६-५० (२८६६)
सुप्रिया चातिबाहुश्च विख्यातौ च हाहा हूहूः ।
तुम्बुरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः ॥१-६६-५१ (२८६७)
अमृतं ब्राह्मणा गावो गन्धर्वाप्सरसस्तथा ।
अपत्यं कपिलायास्तु पुराणे परिकीर्तितम् ॥१-६६-५२ (२८६८)
इति ते सर्वभूतानां संभवः कथितो मया ।
यथावत्संपरिख्यातो गन्धर्वाप्सरसां तथा ॥१-६६-५३ (२८६९)
भुजंगानां सुपर्णानां रुद्राणां मरुतां तथा ।
गवां च ब्राह्मणानां च श्रीमतां पुण्यकर्मणाम् ॥१-६६-५४ (२८७०)
आयुष्यश्चैव पुण्यश्च धन्यः श्रुतिसुखावहः ।
श्रोतव्यश्चैव सततं श्राव्यश्चैवानसूयता ॥१-६६-५५ (२८७१)
इमं तु वंशं नियमेन यः पठे-
न्महात्मनां ब्राह्मणदेवसन्निधौ ।

अपत्यलाभं लभते स पुष्कलं
श्रियं यशः प्रेत्य च शोभनां गतिम् ॥ ॥ १-६६-५६ (२८७२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि षट्षष्टितमोऽध्यायः
॥ ६६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६६-२ क्षयात् स्थानात् ॥
१-६६-१६ जघन्यजः पश्चाज्जातः ॥
१-६६-३२ क्रूरायाः क्रोधायाः ॥
१-६६-३९ गुणभूतप्रधानरूपम् ॥
षट्षष्टितमोऽध्यायः ॥
६६ ॥

आदिपर्व - अध्याय ०६७
॥ श्रीः ॥
१.६७. अध्यायः ६७

Mahabharata - Adi Parva - Chapter Topics
ऋष्यादिवंशकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-६७-० (२८७३)
वैशम्पायन उवाच। १-६७-०क्ष् (३२३)
ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ।
एकादश सुताः स्थाणोः ख्याताः परमतेजसः ॥ १-६७-१ (२८७४)
मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी च परन्तपः ॥ १-६७-२ (२८७५)
दहनोऽथेश्वरश्चैव कपाली च महाद्युतिः ।
स्थाणुर्भगश्च भगवान् रुद्रा एकादश स्मृताः ॥ १-६७-३ (२८७६)
मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
षडेते ब्रह्मणः पुत्रा वीर्यवन्तो महर्षयः ॥ १-६७-४ (२८७७)
त्रयस्त्वङ्गिरसः पुत्रा लोके सर्वत्र विश्रुताः ।
बृहस्पतिरुतथ्यश्च संवर्तश्च धृतव्रताः ॥ १-६७-५ (२८७८)
अत्रेस्तु बहवः पुत्राः श्रूयन्ते मनुजाधिप ।
सर्वे वेदविदः सिद्धाः शान्तात्मानो महर्षयः ॥ १-६७-६ (२८७९)

राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा ।
यक्षाश्च मनुजव्याघ्र पुत्रास्तस्य च धीमतः ॥ १-६७-७ (२८८०)
पुलहस्य सुता राजञ्शरभाश्च प्रकीर्तिताः ।
सिंहाः किपुरुषा व्याघ्रा ऋक्षा ईहामृगास्तथा ॥ १-६७-८ (२८८१)
क्रतोः क्रतुसमाः पुत्राः पतङ्गसहचारिणः ।
विश्रुतास्त्रिषु लोकेषु सत्यव्रतपरायणाः ॥ १-६७-९ (२८८२)
दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाद्भगवानृषिः ।
ब्रह्मणः पृथिवीपाल शान्तात्मा सुमहातपाः ॥ १-६७-१० (२८८३)
वामादजायताङ्गुष्ठाद्भार्या तस्य महात्मनः ।
तस्यां पञ्चाशतं कन्याः स एवाजनयन्मुनिः ॥ १-६७-११ (२८८४)
ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः ।
पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः ॥ १-६७-१२ (२८८५)
ददौ स दश धर्माय सप्तविंशतिमिन्दवे ।
दिव्येन विधिना राजन्कश्यपाय त्रयोदश ॥ १-६७-१३ (२८८६)
नामतो धर्मपत्न्यस्ताः कीर्त्यमाना निबोध मे ।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा ॥ १-६७-१४ (२८८७)
बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश ।
द्वाराण्येतानि धर्मस्य विहितानि स्वयंभुवा ॥ १-६७-१५ (२८८८)
सप्तविंशतिः सोमस्य पत्न्यो लोकस्य विश्रुताः ।
कालस्य नयने युक्ताः सोमपत्न्याः शुचिव्रताः ॥ १-६७-१६ (२८८९)
सर्वा नक्षत्रयोगिन्यो लोकयात्राविधानतः ।
पैतामहो मुनिर्देवस्तस्य पुत्रः प्रजापतिः ।
तस्याष्टौ वसवः पुत्रास्तेषां वक्ष्यामि विस्तरम् ॥ १-६७-१७ (२८९०)
धरो ध्रुवश्च सोमश्च अहश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ १-६७-१८ (२८९१)
धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्याः श्वासायाः श्वसनस्तथा ॥ १-६७-१९ (२८९२)
रतायाश्चाप्यहः पुत्रः शाण्डिल्याश्च हुताशनः ।
प्रत्यूषश्च प्रभासश्च प्रभातायाः सुतौ स्मृतौ ॥ १-६७-२० (२८९३)
धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ।
ग्आपस्य पुत्रो वैतण्ड्यः श्रमः शान्तोमुनिस्तथा'।
ध्रुवस्य पुत्रो भगवान्कालो लोकप्रकालनः ॥ १-६७-२१ (२८९४)
सोमस्य तु सुतो वर्चा वर्चस्वी येन जायते ।
मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ॥ १-६७-२२ (२८९५)
अह्नः सुतस्तथा ज्योतिः शमः शान्तस्तथा मुनिः ।
अग्नेः पुत्रः कुमारस्तु श्रीमाञ्छरवणालयः ॥ १-६७-२३ (२८९६)

तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः ।
कृत्तिकाभ्युपपत्तेश्च कार्तिकेय इति स्मृतः ॥१-६७-२४ (२८९७)
अनिलस्य शिवा भार्या तस्याः पुत्रो मनोजवः ।
अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य तु ॥१-६७-२५ (२८९८)
प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाऽथ देवलम् ।
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ ।
बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मवादिनी ॥ १-६७-२६ (२८९९)
योगसिद्धा जगत्कृत्स्नमसक्ता विचचार ह ।
प्रभासस्य तु भार्या सा वसूनामष्टमस्य ह ॥१-६७-२७ (२९००)
विश्वकर्मा महाभागो जज्ञे शिल्पप्रजापतिः ।
कर्ता शिल्पसहस्राणां त्रिदशानां च वर्धकिः ॥१-६७-२८ (२९०१)
भूषणानां च सर्वेषां कर्ता शिल्पवतां वरः ।
यो दिव्यानि विमानानि त्रिदशानां चकारह ॥१-६७-२९ (२९०२)
मनुष्याश्चोपजीवन्ति यस्य शिल्पं महात्मनः ।
पूजयन्ति च यं नित्यं विश्वकर्माणमव्ययम् ॥१-६७-३० (२९०३)
स्तनं तु दक्षिणं भित्त्वा ब्रह्मणो नरविग्रहः ।
निःसृतो भगवान्धर्मः सर्वलोकसुखावहः ॥१-६७-३१ (२९०४)
त्रयस्तस्य वराः पुत्राः सर्वभूतमनोहराः ।
शमः कामश्च हर्षश्च तेजसा लोकधारिणः ॥१-६७-३२ (२९०५)
कामस्य तु रतिर्भार्या शमस्य प्राप्तिरङ्गना ।
नन्दा तु भार्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ॥१-६७-३३ (२९०६)
मरीचेः कश्यपः पुत्रः कश्यपस्य सुरासुराः ।
जज्ञिरे नृपशार्दूल लोकानां प्रभवस्तु सः ॥१-६७-३४ (२९०७)
त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी ।
असूयत महाभागा सान्तरिक्षेऽस्विनावुभौ ॥१-६७-३५ (२९०८)
द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप ।
तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिताः ॥१-६७-३६ (२९०९)
त्रयस्त्रिंशत यत्येते देवास्तेषामहं तव ।
अन्वयं संप्रवक्ष्यामि पक्षैश्च कुलतो गणान् ॥१-६७-३७ (२९१०)
रुद्राणामपरः पक्षः साध्यानां मरुतां तथा ।
वसूनां भार्गवं विद्याद्विश्वेदेवांस्तथैव च ॥१-६७-३८ (२९११)
वैनतेयस्तु गरुडो बलवानरुणस्तथा ।
बृहस्पतिश्च भगवानादित्येष्वेव गण्यते ॥१-६७-३९ (२९१२)
अश्विनौ गुह्यकान्विद्धि सर्वौषध्यस्तथा पशून् ।
एते देवगणा राजन्कीर्तितास्तेऽनुपूर्वशः ॥१-६७-४० (२९१३)
यान्कीर्तयित्वा मनुजः सर्वपापैः प्रमुच्यते ।

ब्रह्मणो हृदयं भित्त्वा निःसृतो भगवान्भृगुः ॥१-६७-४१ (२९१४)
भृगोः पुत्रः कविर्विद्वाञ्छुक्रः कविसुतो ग्रहः ।
त्रैलोक्यप्राणयात्रार्थं वर्षावर्षे भयाभये ।
स्वयंभुवा नियुक्तः सन्भुवनं परिधावति ॥ १-६७-४२ (२९१५)
योगाचार्यो महाबुद्धिर्दैत्यानामभवद्गुरुः ।
सुराणां चापि मेधावी ब्रह्मचारी यतव्रतः ॥१-६७-४३ (२९१६)
तस्मिन्नियुक्ते विधिना योगक्षेमाय भार्गवे ।
अन्यमुत्पादयामास पुत्रं भृगुरनिन्दितम् ॥१-६७-४४ (२९१७)
च्यवनं दीप्ततपसं धर्मात्मानं यशस्विनम् ।
यः स रोषाच्च्युतो गर्भान्मातुर्मोक्षाय भारत ॥१-६७-४५ (२९१८)
आरुषी तु मनोः कन्या तस्य पत्नी मनीषिणः ।
और्वस्तस्यां समभवदूरुं भित्त्वा महायशाः ॥१-६७-४६ (२९१९)
महातेजा महावीर्यो बाल एव गुणैर्युतः ।
ऋचीकस्तस्य पुत्रस्तु जमदग्निस्ततोऽभवत् ॥१-६७-४७ (२९२०)
जमदग्नेस्तु चत्वार आसन्पुत्रा महात्मनः ।
रामस्तेषां जघन्योऽभूदजघन्यैर्गुणैर्युतः ।
सर्वशस्त्रेषु कुशलः क्षत्रियान्तकरो वशी ॥ १-६७-४८ (२९२१)
और्वस्यासीत्पुत्रशतं जमदग्निपुरोगमम् ।
तेषां पुत्रसहस्राणि बभूवुर्भुवि विस्तरः ॥१-६७-४९ (२९२२)
द्वौ पुत्रो ब्रह्मणस्त्वन्यौ ययोस्तिष्ठति लक्षणम् ।
लोके धाता विधाता च यौ स्थितौ मनुना सह ॥१-६७-५० (२९२३)
तयोरेव स्वसा देवी लक्ष्मीः पद्मगृहा शुभा ।
तस्यास्तु मानसाः पुत्रास्तुरगा व्योमचारिणः ॥१-६७-५१ (२९२४)
वरुणस्य भार्या या ज्येष्ठा शुक्राद्देवी व्यजायत ।
तस्याः पुत्रं बलं विद्धि सुरां च सुरनन्दिनीम् ॥१-६७-५२ (२९२५)
प्रजानामन्नकामानामन्योन्यपरिभक्षणात् ।
अधर्मस्तत्र संजातः सर्वभूतविनाशकः ॥१-६७-५३ (२९२६)
तस्यापि निर्ऋतिर्भार्या नैर्ऋता येन राक्षसाः ।
घोरास्तस्यास्त्रयः पुत्राः पापकर्मरताः सदा ॥१-६७-५४ (२९२७)
भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा ।
न तस्य भार्या पुत्रो वा कश्चिदस्त्यन्तको हि सः ॥१-६७-५५ (२९२८)
काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः ॥१-६७-५६ (२९२९)
उलूकान्सुषुवे काकी श्येनी श्येनान्व्यजायत ।
भासी भासानजनयद्गृध्रांश्चैव जनाधिप ॥१-६७-५७ (२९३०)
धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ।

चक्रवाकांश्च भद्रा तु जनयामास सैव तु ॥ १-६७-५८ (२९३१)
शुकी च जनयामास शुकानेव यशस्विनी ।
कल्याणगुणसंपन्ना सर्वलक्षणपूजिता ॥ १-६७-५९ (२९३२)
नव क्रोधवशा नारीः प्रजज्ञे क्रोधसंभवाः ।
मृगी च मृगमन्दा च हरी भद्रमना अपि ॥ १-६७-६० (२९३३)
मातङ्गी त्वथ शार्दूली श्वेता सुरभिरेव च ।
सर्वलक्षणसंपन्ना सुरसा चैव भामिनी ॥ १-६७-६१ (२९३४)
अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम ।
ऋक्षाश्च मृगमन्दायाः सृमराश्च परंतप ॥ १-६७-६२ (२९३५)
ततस्त्वैरावतं नागं जज्ञे भद्रमनाः सुतम् ।
ऐरावतः सुतस्तस्या देवनागो महागजः ॥ १-६७-६३ (२९३६)
हर्याश्च हरयोऽपत्यं वानराश्च तरस्विनः ।
गोलाङ्गूलांश्च भद्रं ते हर्याः पुत्रान्प्रचक्षते ॥ १-६७-६४ (२९३७)
प्रजज्ञे त्वथ शार्दूली सिंहान्व्याघ्राननेकशः ।
द्वीपिनश्च महासत्वान्सर्वानेव न सशंयः ॥ १-६७-६५ (२९३८)
मातङ्ग्यपि च मातङ्गानपत्यानि नराधिप ।
दिशां गजं तु श्वेताख्यं श्वेताऽजनयदाशुगम् ॥ १-६७-६६ (२९३९)
तथा दुहितरौ राजन्सुरभिर्वै व्यजायत ।
रोहिणी चैव भद्रं ते गन्धर्वी तु यशस्विनी ॥ १-६७-६७ (२९४०)
विमलामपि भद्रं ते अनलामपि भारत ।
रोहिण्यां जज्ञिरे गावो गन्धर्व्यां वाजिनः सुताः ॥ १-६७-६८ (२९४१)
ग्इरायाः कन्यका जातास्तिस्रः कमललोचनाः ।
वनस्पतीनां वृक्षाणां वीरुधां चैव मातरः ॥ १-६७-६९ (२९४२)
लतारुहे च द्वे प्रोक्ते वीरुधां चैव ताः स्मृताः ।
गृह्णन्ति ये विना पुष्पं फलानि तरवः पृथक् ॥ १-६७-७० (२९४३)
लतासुतास्ते विज्ञेयास्तानेवाहुर्वनस्पतीन् ।
पुष्पैः फलग्रहान्वृक्षान्रुहायाः प्रसवं विदुः ॥ १-६७-७१ (२९४४)
लतागुल्मानि वृक्षाश्च त्वक्सारतृणजन्तवः ।
वीरुधो याः प्रजास्तस्यास्तत्र वंशः समाप्यते ॥ १-६७-७२ (२९४५)
सप्तपिम्डफलान्वृक्षाननलापि व्यजायत ॥ १-६७-७३ (२९४६)
अनलायाः शुकी पुत्री कंकस्तु सुरसासुतः ।
अरुणस्य भार्या श्येनी तु वीर्यवन्तौ महाबलौ ॥ १-६७-७४ (२९४७)
संपातिं जनयामास वीर्यवन्तं जटायुषम् ।
सुरसाऽजनयन्नागान्कद्रूः पुत्रांस्तु पन्नगान् ॥ १-६७-७५ (२९४८)
द्वौ पुत्रौ विनतायास्तु विख्यातौ गरुडारुणौ ।
इत्येष सर्वभूतानां महतां मनुजाधिप ।

प्रभवः कीर्तितः सम्यङ्मया मतिमतां वर ॥ १-६७-७६ (२९४९)
यं श्रुत्वा पुरुषः सम्यङ्मुक्तो भवति पाप्मनः ।
सर्वज्ञतां च लभते रतिमग्र्यां च विन्दति ॥ ॥ १-६७-७७ (२९५०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६७-१ ब्रह्मण इति षण्महर्षयः स्थाणुश्च सप्तम इति बोध्यम्
। तत्रादौ स्थाणुसंततिमेवाह एकादशेति। एकादश तथा रुद्राः
स्थाणोश्चैव हि मानसाः इति पाठान्तरम्। अत्र स्थिरत्वात्स्थाणुर्ब्रह्मा ॥
१-६७-५ बृहस्पतिरुचथ्यश्चेति पाठान्तरम् ॥
१-६७-८ ईहामृगाः वृकाः ॥
१-६७-९ पतङ्गसहचारिणः सूर्यसहचरा वालखिल्याः ॥
१-६७-१६ नयने ज्ञापने ॥
१-६७-१७ नक्षत्रयोगिन्यो नक्षत्रनामयुक्ताः । विधानतः
विधानार्थमभवन्। पैतामहो देवो धर्मः पितामहस्तनाज्जातत्वात्। तस्य
पितामहस्य पुत्रो दक्षः तदङ्गुष्ठाज्जातत्वात्। तस्य संबन्धिनी
वसुनाम्नी कन्या तस्यां धर्माद्वसवोष्टौ जाता इत्यर्थः। वसोस्तु वसवः
पुत्रा इत्यन्यत्रोक्तेः ॥
१-६७-१९ धूम्राय इति वसोरेव धूम्रादीनि नामान्तराणि कल्पभेदात् । अन्या
एता न दक्षकन्या इति वा ॥
१-६७-२४ कृत्तिकानां षण्णां मातृत्वेनाभ्युपपत्तेरङ्गीकारात् ॥
१-६७-३५ बडवा अश्वा अन्तरिक्षे अश्विनावसूत नासिकायां शुक्रप्रक्षेपात् ॥
१-६७-३७ त्रयस्त्रिंशत् अष्टौ वसव एकादश रुद्रा द्वादशादित्याः
प्रजापतिश्च वषट्कारश्च ॥
१-६७-४३ योगाचार्य इति । चापी व्यस्तौ। सुराणामपि च गुरुरिति
संबन्धः। देवानां गुरुरेव योगाचार्यो योगबलेन कायद्वयं कृत्वा
दैत्यानामप्याचार्योऽभवदित्यर्थः ॥
१-६७-७३ पिण्डफलान्सप्त । खर्जूरतालहिंताला ताली खर्जूरिका
तथा। गुवाकानारिकेलश्च सप्त पिण्डफला द्रुमाः इत्युक्तरूपान्। इह
पुराणान्तरविरोधो नामभेदात्कल्पभेदाद्वापनेयः ॥
सप्तषष्टितमोऽध्यायः ॥
६७ ॥

आदिपर्व - अध्याय ०६८
॥ श्रीः ॥

१.६८. अध्यायः ६८

Mahabharata - Adi Parva - Chapter Topics

जरासन्धादीनां संभवः ॥ १ ॥
द्रोणादीनां संभवः ॥ २ ॥
धृतराष्ट्रादीनां संभवः ॥ ३ ॥
दुर्योधनादीनां संभवः ॥ ४ ॥
युधिष्ठिरादीनां संभवः ॥ ५ ॥
धृष्टद्युम्नादीनां संभवः ॥ ६ ॥
पृथाचरित्रं । कर्णोत्पत्तिश्च ॥ ७ ॥
बलरामादीनां संभवः ॥ ८ ॥
द्रौपदीसंभवः ॥ ९ ॥
कुन्तीमाद्र्योः संभवः ॥ १० ॥

Mahabharata - Adi Parva - Chapter Text

१-६८-० (२९५१)
जनमेजय उवाच। १-६८-०क्ष् (३२४)
देवानां दानवानां च गन्धर्वोरगरक्षसाम् ।
सिंहव्याघ्रमृगाणां च पन्नगानां पतत्त्रिणाम् ॥ १-६८-१ (२९५२)
अन्येषां चैव भूतानां संभवं भगवन्नहम् ।
श्रोतुमिच्छामि तत्त्वेन मानुषेषु महात्मनाम् ।
जन्म कर्म च भूतानामेतेषामनुपूर्वशः ॥ १-६८-२ (२९५३)
वैशम्पायन उवाच। १-६८-३क्ष् (३२५)
मानुषेषु मनुष्येन्द्र संभूता ये दिवौकसः ।
प्रथमं दानवाश्चैव तांस्ते वक्ष्यामि सर्वशः ॥ १-६८-३ (२९५४)
विप्रचित्तिरिति ख्यातो य आसीद्दानवर्षभः ।
जरासन्ध इति ख्यातः स आसीन्मनुजर्षभः ॥ १-६८-४ (२९५५)
दितेः पुत्रस्तु यो राजन्हिरण्यकशिपुः स्मृतः ।
स जज्ञे मानुषे लोके शिशुपालो नरर्षभः ॥ १-६८-५ (२९५६)
संह्लाद इति विख्यातः प्रह्लादस्यानुजस्तु यः ।
स शल्य इति विख्यातो जज्ञे वाहीकपुङ्गवः ॥ १-६८-६ (२९५७)
अनुह्लादस्तु तेजस्वी योऽभूत्ख्यातो जघन्यजः ।
धृष्टकेतुरिति ख्यातः स बभूव नरेश्वरः ॥ १-६८-७ (२९५८)
यस्तु राजञ्शिबिर्नाम दैतेयः परिकीर्तितः ।
द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः ॥ १-६८-८ (२९५९)

बाष्कलो नाम यस्तेषामासीदसुरसत्तमः ।
भगदत्त इति ख्यातः सं जज्ञे पुरुषर्षभः ॥१-६८-९ (२९६०)
अयःशिरा अश्वशिरा अयःशङ्कुश्च वीर्यवान् ।
तथा गगनमूर्धा च वेगवांश्चात्र पञ्चमः ॥१-६८-१० (२९६१)
पञ्चैते जज्ञिरे राजन्वीर्यवन्तो महासुराः ।
केकयेषु महात्मानः पार्थिवर्षभसत्तमाः ।
केतुमानिति विख्यातो यस्ततोऽन्यःप्रतापवान् ॥ १-६८-११ (२९६२)
अमितौजा इति ख्यातः सोग्रकर्मा नराधिपः ।
स्वर्भानुरिति विख्यातः श्रीमान्यस्तु महासुरः ॥१-६८-१२ (२९६३)
उग्रसेन इति ख्यात उग्रकर्मा नराधिपः ।
यस्त्वश्व इति विख्यातः श्रीमानासीन्महासुरः ॥१-६८-१३ (२९६४)
अशोको नाम राजाऽभून्महावीर्योऽपराजितः ।
तस्मादवरजो यस्तु राजन्नश्वपतिः स्मृतः ॥१-६८-१४ (२९६५)
दैतेयः सोऽभवद्राजा हार्दिक्यो मनुजर्षभः ।
वृषपर्वेति विख्यातः श्रीमान्यस्तु महासुरः ॥१-६८-१५ (२९६६)
दीर्घप्रज्ञ इति ख्यातः पृथिव्यां सोऽभवन्नृपः ।
अजकस्त्ववरो राजन्य आसीद्वृषपर्वणः ॥१-६८-१६ (२९६७)
स शाल्व इति विख्यातः पृथिव्यामभवन्नृपः ।
अश्वग्रीव इति ख्यातः सत्ववान्यो महासुरः ॥१-६८-१७ (२९६८)
रोचमान इति ख्यातः पृथिव्यां कोऽभवन्नृपः ।
सूक्ष्मस्तु मतिमान्राजन्कीर्तिमान्यः प्रकीर्तितः ॥१-६८-१८ (२९६९)
बृहद्रथ इति ख्यातः क्षितावासीत्स पार्थिवः ।
तुहुण्ड इति विख्यातो य आसीदसुरोत्तमः ॥१-६८-१९ (२९७०)
सेनाबिन्दुरिति ख्यातः स बूभव नराधिपः ।
इषुमान्नाम यस्तेषामसुराणां बलाधिकः ॥१-६८-२० (२९७१)
नग्नजिन्नाम राजासीद्भुवि विख्यातविक्रमः ।
एकचक्र इति ख्यात आसीद्यस्तु महासुरः ॥१-६८-२१ (२९७२)
प्रतिविन्ध्य इति ख्यातो बभूव प्रथितः क्षितौ ।
विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः ॥१-६८-२२ (२९७३)
चित्रधर्मेति विख्यातः क्षितावासीत्स पार्थिवः ।
हरस्त्वरिहरो वीर आसीद्यो दानवोत्तमः ॥१-६८-२३ (२९७४)
सुबाहुरिति विख्यातः श्रीमानासीत्स पार्थिवः ।
अहरस्तु महातेजाः शत्रुपक्षक्षयंकरः ॥१-६८-२४ (२९७५)
बाह्लिको नाम राजा स बभूव प्रथितः क्षितौ ।
निचन्द्रश्चन्द्रवक्त्रस्तु य आसीदसुरोत्तमः ॥१-६८-२५ (२९७६)
मुञ्जकेश इति ख्यातः श्रीमानासीत्स पार्थिवः ।

निकुम्भस्त्वजितः संख्ये महामतिरजायत ॥१-६८-२६ (२९७७)
भूमौ भूमिपतिश्रेष्ठो देवाधिप इति स्मृतः ।
शरभो नाम यस्तेषां दैतेयानां महासुरः ॥१-६८-२७ (२९७८)
पौरवो नाम राजर्षिः स बभूव नरोत्तमः ।
कुपटस्तु महावीर्यः श्रीमान्राजन्महासुरः ॥१-६८-२८ (२९७९)
सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः ।
कपटस्तु राजन्राजर्षिः क्षितौ जज्ञे महासुरः ॥१-६८-२९ (२९८०)
पार्वतेय इति ख्यातः काञ्चनाचलसन्निभः ।
द्वितीयः शलभस्तेषामसुराणां बभूव ह ॥१-६८-३० (२९८१)
प्रह्लादो नाम बाह्लीकः स बभूव नराधिपः ।
चन्द्रस्तु दितिजश्रेष्ठो लोके ताराधिपोपमः ॥१-६८-३१ (२९८२)
चन्द्रवर्मेति विख्यातः काम्बोजानां नराधिपः ।
अर्क इत्यभिविख्यातो यस्तु दानवपुङ्गवः ॥१-६८-३२ (२९८३)
ऋषिको नाम राजर्षिर्बभूव नृपसत्तमः ।
मृतपा इति विख्यातो य आसीदसुरोत्तमः ॥१-६८-३३ (२९८४)
पश्चिमानूपकं विद्धि तं नृपं नृपसत्तम ।
गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः ॥१-६८-३४ (२९८५)
द्रुमसेन इति ख्यातः पृथिव्यां सोऽभवन्नृपः ।
मयूर इति विख्यातः श्रीमान्यस्तु महासुरः ॥१-६८-३५ (२९८६)
स विश्व इति विख्यातो बभूव पृथिवीपतिः ।
सुपर्ण इति विख्यातस्तस्मादवरजस्तु यः ॥१-६८-३६ (२९८७)
कालकीर्तिरिति ख्यातः पृथिव्यां सोऽभवन्नृपः ।
चन्द्रहन्तेति यस्तेषां कीर्तितः प्रवरोऽसुरः ॥१-६८-३७ (२९८८)
शुनको नाम राजर्षिः स बभूव नराधिपः ।
विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः ॥१-६८-३८ (२९८९)
जानकिर्नाम विख्यातः सोऽभवन्मनुजाधिपः ।
दीर्घजिह्वस्तु कौरव्य य उक्तो दानवर्षभः ॥१-६८-३९ (२९९०)
काशिराजः स विख्यातः पृथिव्यां पृथिवीपते ।
ग्रहं तु सुषुवे यं तु सिंहिकार्केन्दुमर्दनम् ।
स क्राथ इति विख्यातो बभूव मनुजाधिपः ॥ १-६८-४० (२९९१)
दनायुषस्तु पुत्राणां चतुर्णां प्रवरोऽसुरः ।
विक्षरो नाम तेजस्वी वसुमित्रो नृपः स्मृतः ॥१-६८-४१ (२९९२)
द्वितीयो विक्षराद्यस्तु नराधिप महासुरः ।
पाण्ड्यराष्ट्राधिप इति विख्यातः सोऽभवन्नृपः ॥१-६८-४२ (२९९३)
बली वीर इति ख्यातो यस्त्वासीदसुरोत्तमः ।
पौण्ड्रमात्स्यक इत्येवं बभूव स नराधिपः ॥१-६८-४३ (२९९४)

वृत्र इत्यभिविख्यातो यस्तु राजन्महासुरः ।
मणिमान्नाम राजर्षिः स बभूव नराधिपः ॥१-६८-४४ (२९९५)
क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः ।
दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ ॥१-६८-४५ (२९९६)
क्रोधवर्धन इत्येवं यस्त्वन्यः परिकीर्तितः ।
दण्डधार इति ख्यातः सोऽभवन्मनुजर्षभः ॥१-६८-४६ (२९९७)
कालेयानां तु ये पुत्रास्तेषामष्टौ नराधिपाः ।
जज्ञिरे राजशार्दूल शार्दूलसमविक्रमाः ॥१-६८-४७ (२९९८)
मगधेषु जयत्सेनस्तेषामासीत्स पार्थिवः ।
अष्टानां प्रवरस्तेषां कालेयानां महासुरः ॥१-६८-४८ (२९९९)
द्वितीयस्तु ततस्तेषां श्रीमान्हरिहयोपमः ।
अपराजित इत्येवं स बभूव नराधिपः ॥१-६८-४९ (३०००)
तृतीयस्तु महातेजा महामायो महासुरः ।
निषादाधिपतिर्जज्ञे भुवि भीमपराक्रमः ॥१-६८-५० (३००१)
तेषामन्यतमो यस्तु चतुर्थः परिकीर्तितः ।
श्रेणिमानिति विख्यातः क्षितौ राजर्षिसत्तमः ॥१-६८-५१ (३००२)
पञ्चमस्त्वभवत्तेषां प्रवरो यो महासुरः ।
महौजा इति विख्यातो बभूवेह परन्दपः ॥१-६८-५२ (३००३)
षष्ठस्तु मतिमान्यो वै तेषामासीन्महासुरः ।
अभीरुरिति विख्यातः क्षितौ राजर्षिसत्तमः ॥१-६८-५३ (३००४)
समुद्रसेनस्तु नृपस्तेषामेवाभवद्गणात् ।
विश्रुतः सागरान्तायां क्षितौ धर्मार्थतत्त्ववित् ॥१-६८-५४ (३००५)
बृहन्नामाष्टमस्तेषां कालेयानां नराधिप ।
बभूव राजा धर्मात्मा सर्वभूतहिते रतः ॥१-६८-५५ (३००६)
कुक्षिस्तु राजन्विख्यातो दानवानां महाबलः ।
पार्वतीय इति ख्यातः काञ्चनाचलसन्निभः ॥१-६८-५६ (३००७)
क्रथनश्च महावीर्यः श्रीमान्राजा महासुरः ।
सूर्याक्ष इति विख्यातः क्षितौ जज्ञे महीपतिः ॥१-६८-५७ (३००८)
असुराणां तु यः सकूर्यः श्रीमांश्चैव महासुरः ।
दरदो नाम बाह्लीको वरः सर्वमहीक्षिताम् ॥१-६८-५८ (३००९)
गणः क्रोधवशो नाम यस्ते राजन्प्रकीर्तितः ।
ततः संजज्ञिरे वीराः क्षिताविह नराधिपाः ॥१-६८-५९ (३०१०)
मद्रकः कर्णवेष्टश्च सिद्धार्थः कीटकस्तथा ।
सुवीरश्च सुबाहुश्च महावीरोऽथ बाह्लिकः ॥१-६८-६० (३०११)
क्रथो विचित्रः सुरथः श्रीमान्नीलश्च भूमिपः ।
चीरवासाश्च कौरव्य भूमिपालश्च नामतः ॥१-६८-६१ (३०१२)

दन्तवक्त्रश्च नामासीद्दुर्जयश्चैव दानवः ।
रुक्मी च नृपशार्दूलो राजा च जनमेजयः ॥ १-६८-६२ (३०१३)
आषाढो वायुवेगश्च भूरितेजास्तथैव च ।
एकलव्यः सुमित्रश्च वाटधानोऽथ गोमुखः ॥ १-६८-६३ (३०१४)
कारूषकाश्च राजानः क्षेमधूर्तिस्तथैव च ।
श्रुतायुरुद्वहश्चैव बृहत्सेनस्तथैव च ॥ १-६८-६४ (३०१५)
क्षेमोग्रतीर्थः कुहरः कलिङ्गेषु नराधिपः ।
मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः ॥ १-६८-६५ (३०१६)
गणात्क्रोधवशादेष राजपूगोऽभवत्क्षितौ ।
जातः पुरा महाभागो महाकीर्तिर्महाबलः ॥ १-६८-६६ (३०१७)
कालनेमिरिति ख्यातो दानवानां महाबलः ।
स कंस इति विख्यात उग्रसेनसुतो बली ॥ १-६८-६७ (३०१८)
यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्वपतिर्मुख्यः क्षितौ जज्ञे नराधिपः ॥ १-६८-६८ (३०१९)
बृहस्पतेर्बृहत्कीर्तेर्देवर्षेर्विद्धि भारत ।
अशाद्द्रोणं समुत्पन्नं भारद्वाजमयोनिजम् ॥ १-६८-६९ (३०२०)
धन्विनां नृपशार्दूल यः सर्वास्त्रविदुत्तमः ।
महाकीर्तिर्महातेजाः स जज्ञे मनुजेश्वर ॥ १-६८-७० (३०२१)
धनुर्वेदे च वेदे च यं तं वेदविदो विदुः ।
वरिष्ठं चित्रकर्माणं द्रोणं स्वकुलवर्धनम् ॥ १-६८-७१ (३०२२)
महादेवान्तकाभ्यां च कामात्क्रोधाच्च भारत ।
एकत्वमुपसंपद्य जज्ञे शूरः परन्तपः ॥ १-६८-७२ (३०२३)
अश्वत्थामा महावीर्यः शत्रुपक्षभयावहः ।
वीरः कमलपत्राक्षः क्षितावासीन्नराधिपः ॥ १-६८-७३ (३०२४)
जज्ञिरे वसवस्त्वष्टौ गङ्गायां शन्तनोः सुताः ।
वसिष्ठस्य च शापेन नियोगाद्वासवस्य च ॥ १-६८-७४ (३०२५)
तेषामवरजो भीष्मः कुरूणामभयङ्करः ।
मतिमान्वेदविद्वाग्मी शत्रुपक्षक्षयङ्करः ॥ १-६८-७५ (३०२६)
जामदग्न्येन रामेण सर्वास्त्रविदुषां वरः ।
योऽप्युध्यत महातेजा भार्गवेण महात्मना ॥ १-६८-७६ (३०२७)
यस्तु राजन्कृपो नाम ब्रह्मर्षिरभवत्क्षितौ ।
रुद्राणां तु गणाद्विद्धि संभूतमतिपौरुषम् ॥ १-६८-७७ (३०२८)
शकुनिर्नाम यस्त्वासीद्राजा लोके महारथः ।
द्वापरं विद्धि तं राजन्संभूतमरिमर्दनम् ॥ १-६८-७८ (३०२९)
सात्यकिः सत्यसन्धश्च योऽसौ वृष्णिकुलोद्वहः ।
पक्षात्स जज्ञे मरुतां देवानामरिमर्दनः ॥ १-६८-७९ (३०३०)

द्रुपदश्चैव राजर्षिस्तत एवाभवद्गणात् ।
मानुषे नृप लोकेऽस्मिन्सर्वशस्त्रभृतां वरः ॥ १-६८-८० (३०३१)
ततश्च कृतवर्माणं विद्धि राजञ्जनाधिपम् ।
तमप्रतिमकर्माणं क्षत्रियर्षभसत्तमम् ॥ १-६८-८१ (३०३२)
मरुतां तु गणाद्विद्धि संजातमरिमर्दनम् ।
विराटं नाम राजानं परराष्ट्रप्रतापनम् ॥ १-६८-८२ (३०३३)
अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः ।
स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्धनः ॥ १-६८-८३ (३०३४)
धृतराष्ट्र इति ख्यातः कृष्णद्वैपायनात्मजः ।
दीर्घबाहुर्महातेजाः प्रज्ञाचक्षुर्नराधिपः ॥
मातुर्दोषादृषेः कोपादन्ध एव व्यजायत ॥ १-६८-८४ (३०३५)
ग्मरुतां तु गणाद्वीरः सर्वशस्त्रभृतां वरः ।
पाण्डुर्जज्ञे महाबाहुस्तव पूर्वपितामहः।'
तस्यैवावरजो भ्राता महासत्वो महाबलः ॥ १-६८-८५ (३०३६)
धर्मात्तु सुमहाभागं पुत्रं पुत्रवतां वरम् ।
विदुरं विद्धि तं लोके जातं बुद्धिमतां वरम् ॥ १-६८-८६ (३०३७)
कलेरंशस्तु संजज्ञे भुवि दुर्योधनो नृपः ।
दुर्बद्धिर्दुर्मतिश्चैव कुरूणामयशस्करः ॥ १-६८-८७ (३०३८)
जगतो यस्तु सर्वस्य विद्विष्टः कलिपूरुषः ।
यः सर्वां घातयामास पृथिवीं पृथिवीपते ॥ १-६८-८८ (३०३९)
उद्दीपितं येन वैरं भूतान्तकरणं महत् ।
पौलस्त्या भ्रातरश्चास्य जज्ञिरे मनुजेष्विह ॥ १-६८-८९ (३०४०)
शतं दुःशासनादीनां सर्वेषां क्रूरकर्मणाम् ।
दुर्मुखो दुःसहश्चैव ये चान्ये नानुकीर्तिताः ॥ १-६८-९० (३०४१)
दुर्योधनसहायास्ते पौलस्त्या भरतर्षभ ।
वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ॥ १-६८-९१ (३०४२)
जनमेजय उवाच। १-६८-९२क्ष् (३२६)
ज्येष्ठानुज्येष्ठतामेषां नामधेयानि वा विभो ।
धृतराष्ट्रस्य पुत्राणामानुपूर्व्येण कीर्तय ॥ १-६८-९२ (३०४३)
वैशम्पायन उवाच। १-६८-९३क्ष् (३२७)
दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा ।
दुःसहो दुःशलश्चैव दुर्मुखश्च तथापरः ॥ १-६८-९३ (३०४४)
विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः ।
विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ॥ १-६८-९४ (३०४५)
दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च ।
चत्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह ॥ १-६८-९५ (३०४६)

दुर्मदो दुष्प्रहर्षश्च विवित्सुर्विकटः समः ।
ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥ १-६८-९६ (३०४७)
सेनापतिः सुषेणश्च कुण्डोदरमहोदरौ ।
चित्रबाहुश्चित्रवर्मा सुवर्मा दुर्विरोचनः ॥ १-६८-९७ (३०४८)
अयोबाहुर्महाबाहुश्चित्रचापसुकुण्डलौ ।
भीमवेगो भीमबलो बलाकी भीमविक्रमः ॥ १-६८-९८ (३०४९)
उग्रायुधो भीमशरः कनकायुर्दृढायुधः ।
दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः ॥ १-६८-९९ (३०५०)
जरासन्धो दृढसन्धः सत्यसन्धः सहस्रवाक् ।
उग्रश्रवा उग्रसेनः क्षेममूर्तिस्तथैव च ॥ १-६८-१०० (३०५१)
अपराजितः पण्डितको विशालाक्षो दुराधनः ॥ १-६८-१०१ (३०५२)
दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ ।
आदित्यकेतुर्बह्वाशी नागदत्तानुयायिनौ ॥ १-६८-१०२ (३०५३)
कवाची निषङ्गी दण्डी दण्डधारो धनुर्ग्रहः ।
उग्रो भीमरथो वीरो वीरबाहुरलोलुपः ॥ १-६८-१०३ (३०५४)
अभयो रौद्रकर्मा च तथा दृढरथश्च यः ।
अनाधृष्यः कुम्डभेदी विरावी दीर्घलोचनः ॥ १-६८-१०४ (३०५५)
दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकाङ्गदः ।
कुण्डजश्चित्रकश्चैव दुःशला च शताधिका ॥ १-६८-१०५ (३०५६)
वैश्यापुत्रो युयुत्सुश्च धार्तराष्ट्रः शताधिकः ।
एतदेकशतं राजन्कन्या चैका प्रकीर्तिता ॥ १-६८-१०६ (३०५७)
नामधेयानुपूर्व्या च ज्येष्ठानुज्येष्ठतां विदुः ।
सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः ॥ १-६८-१०७ (३०५८)
सर्वे वेदविदश्चैव राजञ्शास्त्रे च परागाः ।
सर्वे सङ्ग्रामविद्यासु विद्याभिजनशोभिनः ॥ १-६८-१०८ (३०५९)
सर्वेषामनुरूपाश्च कृता दारा महीपते ।
दुःशलां समये राजसिन्धुराजाय कौरवः ॥ १-६८-१०९ (३०६०)
जयद्रथाय प्रददौ सौबलानुमते तदा ।
धर्मस्यांशं तु राजानं विद्धि राजन्युधिष्ठिरम् ॥ १-६८-११० (३०६१)
भीमसेनं तु वातस्य देवराजस्य चार्जुनम् ।
अश्विनोस्तु तथैवांशौ रूपेणाप्रतिमौ भुवि ॥ १-६८-१११ (३०६२)
नकुलः सहदेवश्च सर्वभूतमनोहरौ ।
स्युवर्चा इति ख्यातः सोमपुत्रः प्रतापवान् ॥ १-६८-११२ (३०६३)
सोऽभिमन्युर्बृहत्कीर्तिरर्जुनस्य सुतोऽभवत् ।
यस्यावतरणे राजन्सुरान्सोमोऽब्रवीदिदम् ॥ १-६८-११३ (३०६४)
नाहं दद्यां प्रियं पुत्रं मम प्राणैर्गरीयसम् ।

समयः क्रियतामेष न शक्यमतिवर्तितुम् ॥ १-६८-११४ (३०६५)
सुरकार्यं हि नः कार्यमसुराणां क्षितौ वधः ।
तत्र यास्यत्ययं वर्चा न च स्थास्यति वै चिरम् ॥ १-६८-११५ (३०६६)
ऐन्द्रिर्नरस्तु भविता यस्य नारायणः सखा ।
सोर्जुनेत्यभिविख्यातः पाण्डोः पुत्रः प्रतापवान् ॥ १-६८-११६ (३०६७)
तस्यायं भविता पुत्रो बालो भुवि महारथः ।
ततः षोडशवर्षाणि स्थास्यत्यमरसत्तमाः ॥ १-६८-११७ (३०६८)
अस्य षोडशवर्षस्य स सङ्ग्रामो भविष्यति ।
यत्रांशा वः करिष्यन्ति कर्म वीरनिषूदनम् ॥ १-६८-११८ (३०६९)
नरनारायणाभ्यां तु स सङ्ग्रामो विनाकृतः ।
चक्रव्यूहं समास्थाय योधयिष्यन्ति वःसुराः ॥ १-६८-११९ (३०७०)
विमुखाञ्छात्रवान्सर्वान्कारयिष्यति मे सुतः ।
बालः प्रविश्य च व्यूहमभेद्यं विचरिष्यति ॥ १-६८-१२० (३०७१)
महारथानां वीराणां कदनं च करिष्यति ।
सर्वेषामेव शत्रूणां चतुर्थांशं नयिष्यति ॥ १-६८-१२१ (३०७२)
दिनार्धेन महाबाहुः प्रेतराजपुरं प्रति ।
ततो महारथैर्वीरैः समेत्य बहुशो रणे ॥ १-६८-१२२ (३०७३)
दिनक्षये महाबाहुर्मया भूयः समेष्यति ।
एकं वंशकरं पुत्रं वीरं वै जनयिष्यति ॥ १-६८-१२३ (३०७४)
प्रनष्टं भारतं वंशं स भूयो धारयिष्यति। १-६८-१२४ (३०७५)
वैशम्पायन उवाच ।
एतत्सोमवचः श्रुत्वा तथास्त्विति दिवौकसः ॥ १-६८-१२४क्ष् (३२८)
प्रत्यूचुः सहिताः सर्वे ताराधिपमपूजयन् ।
एवं ते कथितं राजंस्तव जन्म पितुः पितुः ॥ १-६८-१२५ (३०७६)
अग्नेर्भागं तु विद्धि त्वं धृष्टद्युम्नं महारथण् ।
शिखण्डिनमथो राजंस्त्रीपूर्वं विद्धि राक्षसम् ॥ १-६८-१२६ (३०७७)
द्रौपदेयाश्च ये पञ्च बभूवुर्भरतर्षभ ।
विश्वान्देवगणान्विद्धि संजातान्भरतर्षभ ॥ १-६८-१२७ (३०७८)
प्रतिविन्ध्यः सुतसोमः श्रुतकीर्तिस्तथापरः ।
नाकुलिस्तु शतानीकः श्रुतसेनश्च वीर्यवान् ॥ १-६८-१२८ (३०७९)
शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत् ।
तस्य कन्या पृथा नाम रूपेणासदृशी भुवि। १-६८-१२९ (३०८०)
पितुः स्वस्रीयपुत्राय सोऽनपत्याय वीर्यवान् ।
अग्रमग्रे प्रतिज्ञाय स्वस्यापत्यस्य वै तदा ॥ १-६८-१३० (३०८१)
अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया ।
अददत्कुन्तिभोजाय स तां दुहितरं तदा ॥ १-६८-१३१ (३०८२)

सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने ।
उग्रं पर्यचरद्घोरं ब्राह्मणं संशितव्रतम् ॥ १-६८-१३२ (३०८३)
निकूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ।
समुग्रं शंसितात्मानं सर्वयत्नैरतोषयत् ॥ १-६८-१३३ (३०८४)
तुष्टोऽभिचारसंयुक्तमाचचक्षे यथाविधि ।
उवाच चैनां भगवान्प्रीतोऽस्मि सुभगे तव ॥ १-६८-१३४ (३०८५)
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
तस्य तस्य प्रसादात्त्वं देवि पुत्राञ्जनिष्यसि ॥ १-६८-१३५ (३०८६)
एवमुक्ता च सा बाला तदा कौतूहलान्विता ।
कन्या सती देवमर्कमाजुहाव यशस्विनी ॥ १-६८-१३६ (३०८७)
प्रकाशकर्ता भगवांस्तस्यां गर्भं दधौ तदा ।
अजीजनत्सुतं चास्यां सर्वशस्त्रभृतांवरम् ॥ १-६८-१३७ (३०८८)
सकुण्डलं सकवचं देवगर्भं श्रियान्वितम् ।
दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषितम् ॥ १-६८-१३८ (३०८९)
निगूहमाना जातं वै बन्धुपक्षभयात्तदा ।
उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम् ॥ १-६८-१३९ (३०९०)
तमुत्सृष्टं जले गर्भं राधाभर्ता महायशाः ।
राधायाः कल्पयामास पुत्रं सोऽधिरथस्तदा ॥ १-६८-१४० (३०९१)
चक्रतुर्नामधेयं च तस्य बालस्य तावुभौ ।
दंपती वसुषेणेति दिक्षु सर्वासु विश्रुतम् ॥ १-६८-१४१ (३०९२)
संवर्धमानो बलवान्सर्वास्त्रेषूत्तमोऽभवत् ।
वेदाङ्गानि च सर्वाणि जजाप जपतां वरः ॥ १-६८-१४२ (३०९३)
यस्मिन्काले जपन्नास्ते धीमान्सत्यपराक्रमः ।
नादेयं ब्राह्मणेष्वासीत्तस्मिन्काले महात्मनः ॥ १-६८-१४३ (३०९४)
तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थे भूतभावनः ।
ययाचे कुण्डले वीरं कवचं च सहाङ्गजम् ॥ १-६८-१४४ (३०९५)
उत्कृत्य कर्णो ह्यददत्कवचं कुण्डले तथा ॥
शक्तिं शक्रो ददौ तस्मै विस्मितश्चेदमब्रवीत् ॥ १-६८-१४५ (३०९६)
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
यस्मिन्क्षेप्स्यसि दुर्धर्ष स एको न भविष्यति ॥ १-६८-१४६ (३०९७)
वैशम्पायन उवाच। १-६८-१४७क्ष् (३२९)
पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ ।
ततो वैकर्तनः कर्णः कर्मणा तेन सोऽभवत् ॥ १-६८-१४७ (३०९८)
आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः ।
स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः ॥ १-६८-१४८ (३०९९)
स तु सूतकुले वीरो ववृधे राजसत्तम ।

कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम् ॥ १-६८-१४९ (३१००)
दुर्योधनस्य सचिवं मित्रं शत्रुविनाशनम् ।
दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम् ॥ १-६८-१५० (३१०१)
यस्तु नारायणो नाम देवदेवः सनातनः ।
तस्यांशो मानुषेष्वासीद्वासुदेवः प्रतापवान् ॥ १-६८-१५१ (३१०२)
शेषस्यांशश्च नागस्य बलदेवो महाबलः ।
सनत्कुमारं प्रद्युम्नं विद्धि राजन्महौजसम् ॥ १-६८-१५२ (३१०३)
एवमन्ये मनुष्येन्द्रा बहवोंशा दिवौकसाम् ।
जज्ञिरे वसुदेवस्य कुले कुलविवर्धनाः ॥ १-६८-१५३ (३१०४)
गणस्त्वप्सरसां यो वै मया राजन्प्रकीर्तितः ।
तस्य भागः क्षितौ जज्ञे नियोगाद्वासवस्य ह ॥ १-६८-१५४ (३१०५)
तानि षोडशदेवीनां सहस्राणि नराधिप ।
बभूवुर्मानुषे लोके वासुदेवपरिग्रहः ॥ १-६८-१५५ (३१०६)
श्रियस्तु भागः संजज्ञे रत्यर्थं पृथिवीतले ।
१भीष्मकस्य कुले साध्वी रुक्मिणी नाम नामतः ॥ १-६८-१५६ (३१०७)
द्रौपदी त्वथ संजज्ञे शची भागादनिन्दिता ।२
द्रुपदस्य कुले जाता वेदिमध्यादनिन्दिता ॥ १-६८-१५७ (३१०८)
नातिह्रस्वा न महती नीलोत्पलसुगन्धिनी ।
पद्मायताक्षी सुश्रोणी स्वसिताञ्चितमूर्धजा ॥ १-६८-१५८ (३१०९)
सर्वलक्षणसंपन्ना वैदूर्यमणिसंनिभा ।
पञ्चानां पुरुषेन्द्राणां चित्तप्रमथनी रहः ॥ १-६८-१५९ (३११०)
सिद्धिर्धृतिश्च ये देव्यौ पञ्चानां मातरौ तु ते ।
कुन्ती माद्री च जज्ञाते मतिस्तु कुबलात्मजा ॥ १-६८-१६० (३१११)
इति देवासुराणां ते गन्धर्वाप्सरसां तथा ।
अंशावतरणं राजन्राक्षसानां च कीर्तितम् ॥ १-६८-१६१ (३११२)
ये पृथिव्यां समुद्भूता राजानो युद्धदुर्मदाः ।
महात्मानो यदूनां च ये जाता विपुले कुले ॥ १-६८-१६२ (३११३)
ब्राह्मणाः क्षत्रिया वैश्या मया ते परिकीर्तिताः ।
धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम् ॥ १-६८-१६३ (३११४)
इदमंशावतरणं श्रोतव्यमनसूयता ।
अंशावतरणं श्रुत्वा देवगन्धर्वरक्षसाम् ॥ १-६८-१६४ (३११५)
प्रभवाप्ययवित्प्राज्ञो न कृच्छ्रेष्ववसीदति ॥ ॥ १-६८-१६५ (३११६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

कुण्डलितोयं पाठः क्वचिन्न दृश्यते ।

आदिपर्व - अध्याय ०६९
॥ श्रीः ॥
१.६९. अध्यायः ६९

Mahabharata - Adi Parva - Chapter Topics
कुरुवंशकथनम् ॥ १ ॥
संक्षेपेण ययात्युपाख्यानम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-६९-० (३११७)
जनमेजय उवाच। १-६९-०क्ष् (३३०)
त्वत्तः श्रुतमिदं ब्रह्मन्देवदानवरक्षसाम् ।
अंशावतरणं सम्यग्गन्धर्वाप्सरसां तथा ॥ १-६९-१ (३११८)
इमं तु भूय इच्छामि कुरूणां वंशमादितः ।
कथ्यमानं त्वया विप्र विप्रर्षिगणसन्निधौ ॥ १-६९-२ (३११९)
वैशम्पायन उवाच। १-६९-३क्ष् (३३१)
धर्मार्थकामसहितं राजर्षीणां प्रकीर्तितम् ।
पवित्रं कीर्त्यमानं मे निबोधेदं मनीषिणाम् ॥ १-६९-३ (३१२०)
प्रजापतेस्तु दक्षस्य मनोर्वैवस्वतस्य च ।
भरतस्य कुरोः पूरोराजमीढस्य चानघ ॥ १-६९-४ (३१२१)
यादवानामिमं वंशं कौरवाणां च सर्वशः ।
तथैव भरतानां च पुण्यं स्वस्त्ययनं महत् ॥ १-६९-५ (३१२२)
धन्यं यशस्यमायुष्यं कीर्तयिष्यामि तेऽनघ ।
तेजोभिरुदिताः सर्वे महर्षिसमतेजसः ॥ १-६९-६ (३१२३)
दश प्राचेतसः पुत्राः सन्तः पुण्यजनाः स्मृताः ।
मुखजेनाग्निना यैस्ते पूर्वं दग्धा महौजसः ॥ १-६९-७ (३१२४)
तेभ्यः प्राचेतसो जज्ञे दक्षो दक्षादिमाः प्रजाः ।
संभूताः पुरुषव्याघ्र स हि लोकपितामहः ॥ १-६९-८ (३१२५)
वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः ।
आत्मतुल्यानजनयत्सहस्रं संशितव्रतान् ॥ १-६९-९ (३१२६)
सहस्रसङ्ख्यानसंभूतान्दक्षपुत्रांश्च नारदः ।
मोक्षमध्यापयामास साङ्ख्यज्ञानमनुत्तमम् ॥ १-६९-१० (३१२७)
ग्नाशार्थं योजयामास दिगन्तज्ञानकर्मसु'।

ततः पञ्चाशतं कन्या पुत्रिका अभिसन्दधे ।
प्रजापतिः प्रजा दक्षः सिसृक्षुर्जनमेजय ॥ १-६९-११ (३१२८)
ददौ दश स धर्माय कश्यपाय त्रयोदश ।
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे ॥ १-६९-१२ (३१२९)
त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा ।
मारीचः कश्यपस्त्वस्यामादित्यान्समजीजनत् ॥ १-६९-१३ (३१३०)
इन्द्रादीन्वीर्यसंपन्नान्विवस्वन्तमथापि च ।
विवस्वतः सुतो जज्ञे यमो वैवस्वतः प्रभुः ॥ १-६९-१४ (३१३१)
ग्मार्ताण्डस्य यमी चापि सुता राजन्नजायत'।
मार्तण्डस्य मनुर्धीमानजायत सुतः प्रभुः ॥ १-६९-१५ (३१३२)
धर्मात्मा स मनुर्धीमान्यत्र वंशः प्रतिष्ठितः ।
मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत् ॥ १-६९-१६ (३१३३)
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ।
ततोऽभवन्महाराज ब्रह्म क्षत्रेण सङ्गतम् ॥ १-६९-१७ (३१३४)
ब्राह्मणा मानवास्तेषां साङ्गं वेदमदारयन् ।
वेनं धृष्णुं नरिष्यन्तं नाभागेक्ष्वाकुमेव च ॥ १-६९-१८ (३१३५)
कारूषमथ शर्यातिं तथा चैवाष्टमीमिलाम् ।
पृषध्रं नवमं प्राहुः क्षत्रधर्मपरायणम् ॥ १-६९-१९ (३१३६)
नाभागारिष्टदशमान्मनोः पुत्रान्प्रचक्षते ।
पञ्चाशत्तु मनोः पुत्रास्तथैवान्येऽभवन्क्षितौ ॥ १-६९-२० (३१३७)
अन्योन्यभेदात्ते सर्वे विनेशुरिति नः श्रुतम् ।
पुरूरवास्ततो विद्वानिलायां समपद्यत ॥ १-६९-२१ (३१३८)
सा वै तस्याभवन्माता पिता चैवेति नः श्रुतम् ।
त्रयोदश समुद्रस्य द्वीपानश्नन्पुरूरवाः ॥ १-६९-२२ (३१३९)
अमानुषैर्वृतः सत्वैर्मानुषः सन्महायशाः ।
विप्रैः स विग्रहं चक्रे वीर्योन्मत्तः पुरूरवाः ॥ १-६९-२३ (३१४०)
जहार च स विप्राणां रत्नान्युत्क्रोशतामपि ।
सनत्कुमारस्तं राजन्ब्रह्मलोकादुपेत्य ह ॥ १-६९-२४ (३१४१)
अनुदर्शं ततश्चक्रे प्रत्यगृह्णान्न चाप्यसौ ।
ततो महर्षिभिः क्रुद्धैः सद्यः शप्तो व्यनश्यत ॥ १-६९-२५ (३१४२)
लोभान्वितो बलमदान्नष्टसंज्ञो नराधिपः ।
स हि गन्धर्वलोकस्थानुर्वश्या सहितो विराट् ॥ १-६९-२६ (३१४३)
आनिनाय क्रियार्थेऽग्नीन्यथावद्विहितांस्त्रिधा ।
षट् सुता जज्ञिरे चैलादायुर्धीमानमावसुः ॥ १-६९-२७ (३१४४)
दृढायुश्च वनायुश्च शतायुश्चोर्वशीसुताः ।
नहुषं वृद्धशर्माणं रजिं गयमनेनसम् ॥ १-६९-२८ (३१४५)

स्वर्भानवी सुतानेतानायोः पुत्रान्प्रचक्षते ।
आयुषो नहुषः पुत्रो धीमान्सत्यपराक्रमः ॥ १-६९-२९ (३१४६)
राज्यं शशास सुमहद्धर्मेण पृथिवीपते ।
पितॄन्देवानृषीन्विप्रान्गन्धर्वोरगराक्षसान् ॥ १-६९-३० (३१४७)
नहुषः पालयामास ब्रह्मक्षत्रमथो विशः ।
स हत्वा दस्युसंघातानृषीन्करमदापयत् ॥ १-६९-३१ (३१४८)
पशुवच्चैव तान्पृष्ठे वाहयामास वीर्यवान् ।
कारयामास चेन्द्रत्वमभिभूय दिवौकसः ॥ १-६९-३२ (३१४९)
तेजसा तपसा चैव विक्रमेणौजसा तथा ।
‘विश्लिष्टो नहुषः शप्तः सद्यो ह्यजगरोऽभवत्’।
यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ॥ १-६९-३३ (३१५०)
नहुषो जनयामास षट् सुतान्प्रियवादिनः ।
यतिस्तु योगमास्थाय ब्रह्मीभूतोऽभवन्मुनिः ॥ १-६९-३४ (३१५१)
ययातिर्नाहुषः सम्राडासीत्सत्यपराक्रमः ।
स पालयामास महीमीजे च बहुभिर्मखैः ॥ १-६९-३५ (३१५२)
अतिभक्त्या पितॄनर्चन्देवांश्च प्रयतः सदा ।
अन्वगृह्णात्प्रजाः सर्वा ययातिरपराजितः ॥ १-६९-३६ (३१५३)
तस्य पुत्रा महेष्वासाः सर्वैः समुदिता गुणैः ।
देवयान्यां महाराज शर्मिष्ठायां च जज्ञिरे ॥ १-६९-३७ (३१५४)
देवयान्यामजायेतां यदुस्तुर्वसुरेव च ।
द्रुह्युश्चानुश्च पूरुश्च शर्मिष्ठायां च जज्ञिरे ॥ १-६९-३८ (३१५५)
स शाश्वतीः समा राजन्प्रजा धर्मेण पालयन् ।
जरामार्च्छन्महाघोरां नाहुषो रूपनाशिनीम् ॥ १-६९-३९ (३१५६)
जराऽभिभूतः पुत्रान्स राजा वचनमब्रवीत् ।
यदुं पूरुं तुर्वसुं च द्रुह्युं चानुं च भारत ॥ १-६९-४० (३१५७)
यौवनेन चरन्कामान्युवा युवतिभिः सह ।
बिहर्तुमहमिच्छामि साह्यं कुरुत पुत्रकाः ॥ १-६९-४१ (३१५८)
तं पुत्रो दैवयानेयः पूर्वजो वाक्यमब्रवीत् ।
किं कार्यं भवतः कार्यमस्माकं यौवनेन ते ॥ १-६९-४२ (३१५९)
ययातिरब्रवीत्तं वै जरा मे प्रतिगृह्यताम् ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ १-६९-४३ (३१६०)
यजतो दीर्घसत्रैर्मे शापाच्चोशनसो मुनेः ।
कामार्थः परिहीणोऽयं तप्येयं तेन पुत्रकाः ॥ १-६९-४४ (३१६१)
मामकेन शरीरेण राज्यमेकः प्रशास्तु वः ।
अहं तन्वाऽभिनवया युवा काममवाप्नुयाम् ॥ १-६९-४५ (३१६२)
वैशम्पायन उवाच। १-६९-४६क्ष् (३३२)

ते न तस्य प्रत्यगृह्णन्यदुप्रभृतयो जराम् ।
तमब्रवीत्ततः पूरुः कनीयान्सत्यविक्रमः ॥ १-६९-४६ (३१६३)
राजंश्चराभिनवया तन्वा यौवनगोचरः ।
अहं जरां समादाय राज्ये स्थास्यामि तेज्ञया ॥ १-६९-४७ (३१६४)
एवमुक्तः स राजर्षिस्तपोवीर्यसमाश्रयात् ।
संचारयामास जरां तदा पुत्रे महात्मनि ॥ १-६९-४८ (३१६५)
पौरवेणाथ वयसा राजा यौवनमास्थितः ।
यायातेनापि वयसा राज्यं पूरुरकारयत् ॥ १-६९-४९ (३१६६)
ततो वर्षसहस्राणि ययातिरपराजितः ।
स्थितः स नृपशार्दूलः शार्दूलसमविक्रमः ॥ १-६९-५० (३१६७)
ययातिरपि पत्नीभ्यां दीर्घकालं विहृत्य च ।
विश्वाच्या सहितो रेमे पुनश्चैत्ररथे वने ॥ १-६९-५१ (३१६८)
नाध्यगच्छत्तदा तृप्तिं कामानां स महायशाः ।
अवेत्य मनसा राजन्निमां गाथां तदा जगौ ॥ १-६९-५२ (३१६९)
न जातु कामः कामानामुपभोगेन शाम्यति ।
इविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १-६९-५३ (३१७०)
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ॥ १-६९-५४ (३१७१)
यदा न कुरुते पापं सर्वभूतेषु कर्हिचित् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ १-६९-५५ (३१७२)
न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ॥ १-६९-५६ (३१७३)
इत्यवेक्ष्य महाप्राज्ञः कामानां फल्गुतां नृप ।
समाधाय मनो बुद्ध्या प्रत्यगृह्णाज्जरां सुतात् ॥ १-६९-५७ (३१७४)
ग्ततो वर्षसहस्रान्ते ययातिरपराजितः।'
दत्वा च यौवनं राजा पूरुं राज्येऽभिषिच्य च ।
अतृप्त एव कामानां पूरुं पुत्रमुवाच ह ॥ १-६९-५८ (३१७५)
त्वया दायादवानस्मि त्वं मे वंशकरः सुतः ।
पौरवो वंश इति ते ख्यातिं लोके गमिष्यति ॥ १-६९-५९ (३१७६)
वैशम्पायन उवाच। १-६९-६०क्ष् (३३३)
ततः स नृपशार्दूल पूरुं राज्येऽभिषिच्य च ।
ततः सुचरितं कृत्वा भृगुतुङ्गे महातपाः ॥ १-६९-६० (३१७७)
कालेन महता पश्चात्कालधर्ममुपेयिवान् ।
कारयित्वा त्वनशनं सदारः स्वर्गमाप्तवान् ॥ ॥ १-६९-६१ (३१७८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि

एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-६९-७ प्राचेतसः प्राचे देशाय यज्ञक्रियया अतति सततं गच्छतीति प्राचेताः तस्य प्राचेतसः प्राचीनबर्हिषः । पुण्यजनाः पुण्योत्पादकास्तपः शीला इत्यर्थः। यैस्ते महौजसो महाप्रभावा वृक्षौषधयो दग्धाः ॥
१-६९-९ वीरिण्या वीरणपुत्र्या ॥
१-६९-१० मोक्षं मोक्षहेतुं । सांख्यज्ञानं विवेकजं विज्ञानम् ॥
१-६९-१५ यमी यमुना ॥
१-६९-२१ अन्योन्यभेदात्परस्परवैरात् ॥
१-६९-२२ मातैव लब्धपुंभावा राज्य दानात्पिताप्यभूत् । मुख्यः पिता तु बुध एव ॥
१-६९-२५ अनुदश दर्शो दर्शनं स पश्चाद्यस्य स श्रुतियुक्त्युपदेशोऽनुदर्शस्तं तत स्तदुपदेशमित्यर्थः ॥
१-६९-२६ विराड्विराजमानः ॥
१-६९-२७ त्रिधा गार्हपत्यदक्षिणाग्न्याहवनीयभेदेन । आयुःशब्दः उक रान्तः सान्तश्च ॥
१-६९-४२ कार्यं प्रयोजनम् । कार्यं कर्तव्यम् ॥
१-६९-४४ व्रतनिर्बन्धाच्छुक्रशापाच्च कामरूपः पुरुषार्थो हीनः ॥
१-६९-४७ तेज्ञया तव आज्ञया । पूर्वरूपमाकारलोपो वार्षः ॥
१-६९-५२ कामामां कामभोगेन । अवेत्य कामसेवया तृप्त्यभावं ज्ञात्वा ॥
१-६९-५३ हविषा समिदाज्यादिना ॥
१-६९-५४ एकस्य कामिनः सर्वं नालमपर्याप्तम् । शमं कामशान्तिम् ॥
१-६९-५९ दायादवान् पुत्रवान् ॥
१-६९-६१ कारयित्वा कृत्वा ॥
एकोनसप्ततितमोऽध्यायः ॥
६९ ॥

आदिपर्व - अध्याय ०७०
॥ श्रीः ॥
१.७०. अध्यायः ७०

Mahabharata - Adi Parva - Chapter Topics
ययात्युपाख्यानारम्भः ॥ १ ॥
सञ्जीवनीविद्यालाभार्थं देवैः शुक्रसमीपे कचस्य प्रेषणम् ॥ २ ॥
कचस्य शिष्यत्वेनाङ्गीकारः ॥ ३ ॥

दैत्यैर्हतस्य कचस्योज्जीवनम् ॥ ४ ॥
दैत्यैर्भस्मीकृत्य तन्मिश्रितसुराद्वारा स्वकुक्षिं प्रापितस्य कचस्य शुक्रेण विद्यादानपूर्वकमुज्जीवनम् ॥ ५ ॥
शुक्रेण सुरापाननिषेधः ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-७०-० (३१७९)
जनमेजय उवाच। १-७०-०क्ष् (३३४)
ययातिः पूर्वजोऽस्माकं दशमो यः प्रजापतेः ।
कथं स शुक्रतनयां लेभे परमदुर्लभाम् ॥ १-७०-१ (३१८०)
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।
आनुपूर्व्या च मे शंस राज्ञो वंशकरान्पृथक् ॥ १-७०-२ (३१८१)
वैशम्पायन उवाच। १-७०-३क्ष् (३३५)
ययातिरासीन्नृपतिर्देवराजसमद्युतिः ।
तं शुक्रवृषपर्वाणौ वव्राते वै यथा पुरा ॥ १-७०-३ (३१८२)
तत्तेऽहं संप्रवक्ष्यामि पृच्छते जनमेजय ।
देवयान्याश्च संयोगं ययातेर्नाहुषस्य च ॥ १-७०-४ (३१८३)
सुराणामसुराणां च समजायत वै मिथः ।
ऐश्वर्यं प्रति संघर्षस्त्रैलोक्ये सचराचरे ॥ १-७०-५ (३१८४)
जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ।
पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे ॥ १-७०-६ (३१८५)
ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्धिनौ भृशम् ।
तत्र देवा निजघ्नुर्यान्दानवान्युधि संगतान् ॥ १-७०-७ (३१८६)
तान्पुनर्जीवयामास काव्यो विद्याबलाश्रयात् ।
ततस्ते पुनरुत्थाय योधयांचक्रिरे सुरान् ॥ १-७०-८ (३१८७)
असुरास्तु निजघ्नुर्यान्सुरान्समरमूर्धनि ।
न तान्सञ्जीवयामास बृहस्पतिरुदारधीः ॥ १-७०-९ (३१८८)
न हि वेद स तां विद्यां यां काव्योवेत्ति वीर्यवान् ।
सञ्जीविनीं ततो देवा विषादमगमन्परम् ॥ १-७०-१० (३१८९)
ते तु देवा भयोद्विग्नाः काव्यादुशनसस्तदा ।
ऊचुः कचमुपागम्य ज्येष्ठं पुत्रं बृहस्पतेः ॥ १-७०-११ (३१९०)
भजमानान्भजस्वास्मान्कुरु नः साह्यमुत्तमम् ।
या सा विद्या निवसति ब्राह्मणेऽमिततेजसि ॥ १-७०-१२ (३१९१)
शुक्रे तामाहर क्षिप्रं भागभाङ्गो भविष्यसि ।
वृषपर्वसमीपे हि शक्यो द्रष्टुं त्वया द्विजः ॥ १-७०-१३ (३१९२)

रक्षते दानवांस्तत्र न स रक्षत्यदानवान् ।
तमाराधयितुं शक्तो भवान्पूर्ववयाः कविम् ॥ १-७०-१४ (३१९३)
देवयानीं च दयितां सुतां तस्य महात्मनः ।
त्वमाराधयितुं शक्तो नान्यः कश्चन विद्यते ॥ १-७०-१५ (३१९४)
शीलदाक्षिण्यमाधुर्यैराचारेण दमेन च ।
देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवम् ॥ १-७०-१६ (३१९५)
वैशम्पायन उवाच। १-७०-१७क्ष् (३३६)
तथेत्युक्त्वा ततः प्रायाद्बृहस्पतिसुतः कचः ।
तदाऽभिपूजितो देवैः समीपे वृषपर्वणः ॥ १-७०-१७ (३१९६)
स गत्वा त्वरितो राजन्देवैः संप्रेषितः कचः ।
असुरेन्द्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाच ह ॥ १-७०-१८ (३१९७)
ऋषेरङ्गिरसः पौत्रं पुत्रं साक्षाद्बृहस्पतेः ।
नाम्ना कच इति ख्यातं शिष्यं गृह्णात् मां भवान् ॥ १-७०-१९ (३१९८)
ब्रह्मचर्यं चरिष्यामि त्वय्यहं परमं गुरौ ।
अनुमन्यस्व मां ब्रह्मन्सहस्रं परिवत्सरान् ॥ १-७०-२० (३१९९)
शुक्र उवाच। १-७०-२१क्ष् (३३७)
कच सुस्वागतं तेऽस्तु प्रतिगृह्णामि ते वचः ।
अर्चयिष्येऽहमर्च्यं त्वामर्चितोऽस्तु बृहस्पतिः ॥ १-७०-२१ (३२००)
वैशम्पायन उवाच। १-७०-२२क्ष् (३३८)
कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम् ।
आदिष्टं कविपुत्रेण शुक्रेणोशनसा स्वयम् ॥ १-७०-२२ (३२०१)
व्रतस्य प्राप्तकालं स यथोक्तं प्रत्यगृह्णत ।
आराधयन्नुपाध्यायं देवयानीं च भारत ॥ १-७०-२३ (३२०२)
नित्यमाराधयिष्यंस्तां युवा यौवनगां मुनिः ।
गायन्नृत्यन्वादयंश्च देवयानीमतोषयत् ॥ १-७०-२४ (३२०३)
स शीलयन्देवयानीं कन्यां संप्राप्तयौवनाम् ।
पुष्पैः फलैः प्रेषणैश्च तोषयामास भारत ॥ १-७०-२५ (३२०४)
देवयान्यपि तं विप्रं नियमव्रतधारिणम् ।
गायन्ती च ललन्ती च रहः पर्यचरत्तथा ॥ १-७०-२६ (३२०५)
ग्गायन्तं चैव शुल्कं च दातारं प्रियवादिनम् ।
नार्यो नरं कामयन्ते रूपिणं स्रग्विणं तथा ॥' १-७०-२७ (३२०६)
पञ्चवर्षशतान्येवं कचस्य चरतो व्रतम् ।
तत्रातीयुरथो बुद्ध्वा दानवास्तं ततः कचम् ॥ १-७०-२८ (३२०७)
गा रक्षन्तं वने दृष्ट्वा रहस्येकममर्षिताः ।
जघ्नुर्बृहस्पतेर्द्वेषाद्विद्यारक्षार्थमेव च ॥ १-७०-२९ (३२०८)
हत्वा शालावृकेभ्यश्च प्रायच्छँल्लवशः कृतम् ।

ततो गावो निवृत्तास्ता अगोपाः स्वं निवेशनम् ॥ १-७०-३० (३२०९)
सा दृष्ट्वा रहिता गाश्च कचेनाभ्यागता वनात् ।
उवाच वचनं काले देवयान्यथ भारत ॥ १-७०-३१ (३२१०)
देवयान्युवाच। १-७०-३२क्ष् (३३९)
आहुतं चाग्निहोत्रं ते सूर्यश्चास्तं गतः प्रभो ।
अगोपाश्चागता गावः कचस्तात न दृश्यते ॥ १-७०-३२ (३२११)
व्यक्तं हतो मृतो वापि कचस्तात भविष्यति ।
तं विना न च जीवेयमिति सत्यं ब्रवीमि ते ॥ १-७०-३३ (३२१२)
शुक्र उवाच। १-७०-३४क्ष् (३४०)
अयमेहीति संशब्द्य मृतं संजीवयाम्यहम्। १-७०-३४ (३२१३)
वैशम्पायन उवाच ।
ततः संजीविनीं विद्यां प्रयुज्य कचमाह्वयत् ॥ १-७०-३४क्ष् (३४१)
भित्त्वा भित्त्वा शरीराणि वृकाणां स विनिर्गतः ।
आहूतः प्रादुरभवत्कचो हृष्टोऽथ विद्यया ॥ १-७०-३५ (३२१४)
कस्माच्चिरायितोऽसीति पृष्टस्तामाह भार्गवीम्। १-७०-३६ (३२१५)
कच उवाच ।
समिधश्च कुशादीनि काष्ठभारं च भामिनि ॥ १-७०-३६क्ष् (३४२)
गृहीत्वा श्रमभारार्तो वटवृक्षं समाश्रितः ।
गावश्च सहिताः सर्वा वृक्षच्छायामुपाश्रिताः ॥ १-७०-३७ (३२१६)
असुरास्तत्र मां दृष्ट्वा कस्त्वमित्यभ्यचोदयन् ।
बृहस्पतिसुतश्चाहं कच इत्यभिविश्रुतः ॥ १-७०-३८ (३२१७)
इत्युक्तमात्रे मां हत्वा पेषीकृत्वा तु दानवाः ।
दत्त्वा शालावृकेभ्यस्तु सुखं जग्मुः स्वमालयं ॥ १-७०-३९ (३२१८)
आहूतो विद्यया भद्रे भार्गवेण महात्मना ।
त्वत्समीपमिहायातः कथंचित्प्राप्तजीवितः ॥ १-७०-४० (३२१९)
हतोऽहमिति चाचख्यौ पृष्टो ब्राह्मणकन्यया ।
स पुनर्देवयान्योक्तः पुष्पाण्याहर मे द्विज ॥ १-७०-४१ (३२२०)
वनं ययौ कचो विप्रो ददृशुर्दानवाश्च तम् ।
पुनस्तं पेषयित्वा तु समुद्राम्भस्यमिश्रयन् ॥ १-७०-४२ (३२२१)
चिरं गतं पुनः कन्या पित्रे तं संन्यवेदयत् ।
विप्रेण पुनराहूतो विद्यया गुरुदेहजः ।
पुनरावृत्य तद्वृत्तं न्यवेदयत तद्यथा ॥ १-७०-४३ (३२२२)
ततस्तृतीयं हत्वा तं दग्ध्वा कृत्वा च चूर्णशः ।
प्रायच्छन्ब्राह्मणायैव सुरायामसुरास्तथा ॥ १-७०-४४ (३२२३)
ग्अपिबत्सुरया सार्धं कचभस्म भृगूद्वहः ।
सा सायन्तनवेलायामगोपा गाः समागताः ॥ १-७०-४५ (३२२४)

देवयानी शङ्कमाना दृष्ट्वा पितरमब्रवीत्।'
पुष्पाहारः प्रेषणकृत्कचस्तात न दृश्यते ॥ १-७०-४६ (३२२५)
व्यक्तं हतो मृतो वापि कचस्तात भविष्यति ।
तं विना न च जीवेयं कचं सत्यं ब्रवीमि ते ॥१-७०-४७ (३२२६)
ग्वैशम्पायन उवाच।१-७०-४८क्ष् (३४३)
श्रुत्वा पुत्रीवचः काव्यो मन्त्रेणाहूतवान्कचम् ।
ज्ञात्वा बहिष्ठमज्ञात्वा स्वकुक्षिस्थं कचं नृप'॥१-७०-४८ (३२२७)
शुक्र उवाच।१-७०-४९क्ष् (३४४)
बृहस्पतेः सुतः पुत्रि कचः प्रेतगतिं गतः ।
विद्यया जीवितोऽप्येवं हन्यते करवाम किम् ॥१-७०-४९ (३२२८)
मैवं शुचो मा रुद देवयानि
न त्वादृशी मर्त्यमनुप्रशोचते ।
यस्यास्तव ब्रह्म च ब्राह्मणाश्च
सेन्द्रा देवा वसवोऽथाश्विनौ च ॥ १-७०-५० (३२२९)
सुरद्विषश्चैव जगच्च सर्व-
मुपस्थाने सन्नमन्ति प्रभावात् ।
अशक्योऽसौ जीवयितुं द्विजातिः
संजीवितो वध्यते चैव भूयः ॥ १-७०-५१ (३२३०)
देवयान्युवाच।१-७०-५२क्ष् (३४५)
यस्याङ्गिरा वृद्धतमः पितामहो
बृहस्पतिश्चापि पिता तपोनिधिः ।
ऋषेः पुत्रं तमथो वापि पौत्रं
कथं न शोचेयमहं न रुद्याम् ॥ १-७०-५२ (३२३१)
स ब्रह्मचारी च तपोधनश्च
सदोत्थितः कर्मसु चैव दक्षः ।
कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये
प्रियो हि मे तात कचोऽभिरूपः ॥ १-७०-५३ (३२३२)
शुक्र उवाच।१-७०-५४क्ष् (३४६)
असंशयं मामसुरा द्विषन्ति
ये शिष्यं मेऽनागसं सूदयन्ति ।
अब्राह्मणं कर्तुमिच्छिन्त रौद्रा-
स्ते मां यथा व्यभिचरन्ति नित्यम् ।
अप्यस्य पापस्य भवेदिहान्तः
कं ब्रह्महत्या न दहेदपीन्द्रम् ॥ १-७०-५४ (३२३३)
ग्वैशम्पायन उवाच।१-७०-५५क्ष् (३४७)
संचोदितो देवयान्या महर्षिः पुनराह्वयत् ।

संरम्भेणैव काव्यो हि बृहस्पतिसुतं कचम् ॥१-७०-५५ (३२३४)
कचोऽपि राजन्स महानुभावो
विद्याबलाल्लब्धमतिर्महात्मा।'
गुरोर्हि भीतो विद्यया चोपहूतः ।
शनैर्वाक्यं जठरे व्याजहार ॥ १-७०-५६ (३२३५)
ग्प्रसीद भगवन्मह्यं कचोऽहमभिवादये ।
यथा बहुमतः पुत्रस्तथा मन्यतु मां भवान् ॥' १-७०-५७ (३२३६)
वैशम्पायन उवाच।१-७०-५८क्ष् (३४८)
तमब्रवीत्केन पथोपनीत-
स्त्वं चोदरे तिष्ठसि ब्रूहि विप्र ।
अस्मिन्मुहूर्ते ह्यसुरान्विनाश्य
गच्छामि देवानहमद्य विप्र ॥ १-७०-५८ (३२३७)
कच उवाच।१-७०-५९क्ष् (३४९)
तव प्रसादान्न जहाति मां स्मृतिः
स्मरामि सर्वं यच्च यथा च वृत्तम् ।
नत्वेवं स्यात्तपसः संक्षयो मे
ततः क्लेशं घोरमिमं सहामि ॥ १-७०-५९ (३२३८)
असुरैः सुरायां भवतोऽस्मि दत्तो
हत्वा दग्ध्वा चूर्णयित्वा च काव्य ।
ब्राह्मीं मायां चासुरीं विप्र मायां
त्वयि स्थिते कथमेवातिवर्तेत् ॥ १-७०-६० (३२३९)
शुक्र उवाच।१-७०-६१क्ष् (३५०)
किं ते प्रियं करवाण्यद्य वत्से
वधेन मे जीवितं स्यात्कचस्य ।
नान्यत्र कुक्षेर्मम भेदनेन
दृश्येत्कचो मद्गतो देवयानि ॥ १-७०-६१ (३२४०)
देवयान्युवाच।१-७०-६२क्ष् (३५१)
द्वौ मां शोकावग्निकल्पौ दहेतां
कचस्य नाशस्तव चैवोपघातः ।
कचस्य नाशे मम शर्म नास्ति
तवोपघाते जीवितुं नास्मि शक्ता ॥ १-७०-६२ (३२४१)
शुक्र उवाच।१-७०-६३क्ष् (३५२)
संसिद्धरूपोऽसि बृहस्पतेः सुत
यत्त्वां भक्तं भजते देवयानी ।
विद्यामिमां प्राप्नुहि जीवनीं त्वं
न चेदिन्द्रः कचरूपी त्वमद्य ॥ १-७०-६३ (३२४२)

न निवर्तेत्पुनर्जीवन्कश्चिदन्यो ममोदरात् ।
ब्राह्मणं वर्जयित्वैकं तस्माद्विद्यामवाप्नुहि ॥१-७०-६४ (३२४३)
पुत्रो भूत्वा भावय भावितो मा-
मस्मद्देहादुपनिष्क्रम्य तात ।
समीक्षेथा धर्मवतीमवेक्षां
गुरोः सकाशात्प्राप्य विद्यां सविद्यः ॥ १-७०-६५ (३२४४)
वैशम्पायन उवाच।१-७०-६६क्ष् (३५३)
गुरोः सकाशात्समवाप्य विद्यां
भित्त्वा कुक्षिं निर्विचक्राम विप्रः ।
कचोऽभिरूपस्तत्क्षणाद्ब्राह्मणस्य
शुक्लात्यये पौर्णमास्यामिवेन्दुः ॥ १-७०-६६ (३२४५)
दृष्ट्वा च तं पतितं ब्रह्मराशि-
मुत्थापयामास मृतं कचोऽपि ।
विद्यां सिद्धां तामवाप्याभिवाद्य
ततः कचस्तं गुरुमित्युवाच ॥ १-७०-६७ (३२४६)
यः श्रोत्रयोरमृतं सन्निषिञ्चे-
द्विद्यामविद्यस्य यथा त्वमार्यः ।
तं मन्येऽहं पितरं मातरं च
तस्मै न द्रुह्येत्कृतमस्य जानन् ॥ १-७०-६८ (३२४७)
ऋतस्य दातारमनुत्तमस्य
निधिं निधीनामपि लब्धविद्याः ।
ये नाद्रियन्ते गुरुमर्चनीयं
पापाँल्लोकांस्ते व्रजन्त्यप्रतिष्ठाः ॥ १-७०-६९ (३२४८)
वैशम्पायन उवाच।१-७०-७०क्ष् (३५४)
सुरापानाद्वञ्चनां प्राप्य विद्वा-
न्संज्ञानाशं चैव महातिघोरम् ।
दृष्ट्वा कचं चापि तथाभिरूपं
पीतं तदा सुरया मोहितेन ॥ १-७०-७० (३२४९)
समन्युरुत्थाय महानुभाव-
स्तदोशना विप्रहितं चिकीर्षुः ।
सुरापानं प्रति संजातमन्युः
काव्यः स्वयं वाक्यमिदं जगाद ॥ १-७०-७१ (३२५०)
यो ब्राह्मणोऽद्यप्रभृतीह कश्चि-
न्मोहात्सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मा ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हितः स्यात्परे च ॥ १-७०-७२ (३२५१)

मया चैतां विप्रधर्मोक्तिसीमां
मर्यादां वै स्थापितां सर्वलोके ।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्वे ॥ १-७०-७३ (३२५२)
वैशम्पायन उवाच। १-७०-७४क्ष् (३५५)
इतीदमुक्त्वा स महानुभाव-
स्तपोनिधीनां निधिरप्रमेयः ।
तान्दानवान्दैवविमूढबुद्धी-
निदं समाहूय वचोऽभ्युवाच ॥ १-७०-७४ (३२५३)
आचक्षे वो दानवा बालिशाः स्थ
सिद्धः कचो वत्स्यति मत्सकाशे ।
सञ्जीविनीं प्राप्य विद्यां महात्मा
तुल्यप्रभावो ब्राह्मणो ब्रह्मभूतः ॥ १-७०-७५ (३२५४)
ग्योऽकार्षीद्दुष्करं कर्म देवानां कारणात्कचः ।
न तत्किर्तिर्जरां गच्छेद्याज्ञीयश्च भविष्यति ॥ १-७०-७६ (३२५५)
वैशम्पायन उवाच।' १-७०-७७क्ष् (३५६)
एतावदुक्त्वा वचनं विरराम स भार्गवः ।
दानवा विस्मयाविष्टाः प्रययुः स्वं निवेशनम् ॥ १-७०-७७ (३२५६)
गुरोरुष्य सकाशे तु दश वर्षशतानि सः ।
अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम् ॥ ॥ १-७०-७८ (३२५७)

इति श्रीमन्मेहाभारते आदिपर्वणि संभवपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७०-३ विप्रदानवौ वव्राते जामातृत्वेनेति शेषः ॥
१-७०-२५ प्रेषणैः प्रेष्यत्वादिभिः ॥
१-७०-३१ उवाच शुक्रं प्रति ॥
१-७०-३९ पेषः पिष्टम् । पिष्टीकृत्येत्यर्थः ॥
१-७०-४३ गुरुदेहजः कचः । आवृत्य आगत्य। तद्वृत्तमसुरचेष्टितम् ॥
१-७०-४४ ब्राह्मणाय शुक्राय ॥
१-७०-५० मर्त्ये त्वं तु मत्प्रभावादमरकल्पासि । ब्रह्म वेदः तस्य नमनं स्वार्थप्रकाशेन ॥
१-७०-६० चाह्वैवीं मायां । मायात्रयविदि त्वयि सति को देवोऽसुरो ब्राह्मणो वाऽतिक्रामेदतस्त्वदुदरभेदनं मम दुःसाध्यमेवेति भावः ॥
१-७०-६५ भावय जीवय भावितो मया जीवितः । कृतघ्नो मा भूरिति भावः ॥
१-७०-६६ शुक्लस्याह्नो रवेर्वा अत्यये शुक्लात्यये ॥

१-७०-६९ ऋतस्य वेदस्य । निधीनां विद्यानां निधिमाश्रयम्। प्रतिष्ठा विद्याफलं तच्छून्या अप्रतिष्ठाः ॥
सप्ततितमोऽध्यायः ॥
७० ॥

आदिपर्व - अध्याय ०७१
॥ श्रीः ॥
१.७१. अध्यायः ७१

Mahabharata - Adi Parva - Chapter Topics
स्वपाणिग्रहणार्थं प्रार्थितवत्या देवयान्या कचस्य विवादः ॥ १ ॥
कचदेवयान्योः परस्परशापदानम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-७१-० (३२५८)
वैशम्पायन उवाच। १-७१-०क्ष् (३५७)
समावृतव्रतं तं तु विसृष्टं गुरुणा कचम् ।
प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदम् ॥ १-७१-१ (३२५९)
ऋषेरङ्गिरसः पौत्र वृत्तेनाभिजनेन च ।
भ्राजसे विद्यया चैव तपसा च दमेन च ॥ १-७१-२ (३२६०)
ऋषिर्यथाङ्गिरा मान्यः पितुर्मम महायशाः ।
तथा प्रान्यश्च पूज्यश्च मम भूयो बृहस्पतिः ॥ १-७१-३ (३२६१)
एवं ज्ञात्वा विजानीहि यद्ब्रवीमि तपोधन ।
व्रतस्थे नियमोपेते यथा वर्ताम्यहं त्वयि ॥ १-७१-४ (३२६२)
स समावृतविद्यो मां भक्तां भजितुमर्हसि ।
गृहाण पाणिं विधिवन्मम मन्त्रपुरस्कृतम् ॥
कच उवाच। १-७१-५ (३२६३)
पूज्यो मान्यश्च भगवान्यथा तव पिता मम ।
तथा त्वमनवद्याङ्गि पूजनीयतरा मम ॥ १-७१-६ (३२६४)
प्राणेभ्योऽपि प्रियतरा भार्गवस्य महात्मनः ।
त्वं भद्रे धर्मतः पूज्या गुरुपुत्री सदा मम ॥ १-७१-७ (३२६५)
यथा मम गुरुर्नित्यं मान्यः शुक्रः पिता तव ।
देवयानि तथैव त्वं नैवं मां वक्तुमर्हसि ॥ १-७१-८ (३२६६)
देवयान्युवाच। १-७१-९क्ष् (३५८)
गुरुपुत्रस्य पुत्रो वै न त्वं पुत्रश्च मे पितुः ।
तस्मात्पूज्यश्च मान्यश्च ममापि त्वं द्विजोत्तम ॥ १-७१-९ (३२६७)

असुरैर्हन्यमाने च कच त्वयि पुनःपुनः ।
तदाप्रभृति या प्रीतिस्तां त्वमद्य स्मरस्व मे ॥ १-७१-१० (३२६८)
सौहार्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम् ।
न मामर्हसि धर्मज्ञ त्यक्तुं भक्तामनागसम् ॥ १-७१-११ (३२६९)
कच उवाच। १-७१-१२क्ष् (३५९)
अनियोज्ये नियोक्तुं मां देवयानि न चार्हसि ।
प्रसीद सुभ्रु त्वं मह्यं गुरोर्गुरुतरा शुभे ॥ १-७१-१२ (३२७०)
यत्रोषितं विशालाक्षि त्वया चन्द्रनिभानने ।
तत्राहमुषितो भद्रे कुक्षौ काव्यस्य भामिनि ॥ १-७१-१३ (३२७१)
भगिनी धर्मतो मे त्वं मैवं वोचः सुमध्यमे ।
सुखमस्म्युषितो भद्रे न मन्युर्विद्यते मम ॥ १-७१-१४ (३२७२)
आपृच्छे त्वां गमिष्यामि शिवमाशंस मे पथि ।
अविरोधेन धर्मस्य स्मर्तव्योऽस्मि कथान्तरे ।
अप्रमत्तोत्थिता नित्यमाराधय गुरुं मम ॥ १-७१-१५ (३२७३)
देवयान्युवाच। १-७१-१६क्ष् (३६०)
यदि मां धर्मकामार्थे प्रत्याख्यास्यसि याचितः ।
ततः कच न ते विद्या सिद्धिमेषा गमिष्यति ॥ १-७१-१६ (३२७४)
कच उवाच। १-७१-१७क्ष् (३६१)
गुरुपुत्रीति कृत्वाऽहं प्रत्याचक्षे न दोषतः ।
गुरुणा चाननुज्ञातः काममेवं शपस्व माम् ॥ १-७१-१७ (३२७५)
आर्षं धर्मं ब्रुवाणोऽहं देवयानि यथा त्वया ।
शप्तो ह्यनर्हः शापस्य कामतोऽद्य न धर्मतः ॥ १-७१-१८ (३२७६)
तस्माद्भवत्या यः कामो न तथा स भविष्यति ।
ऋषिपुत्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति ॥ १-७१-१९ (३२७७)
फलिष्यति न ते विद्या यत्त्वं मामात्थ तत्तथा ।
अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति ॥ १-७१-२० (३२७८)
वैशम्पायन उवाच। १-७१-२१क्ष् (३६२)
एवमुक्त्वा द्विजश्रेष्ठो देवयानीं कचस्तदा ।
त्रिदशेशालयं शीघ्रं जगाम द्विजसत्तमः ॥ १-७१-२१ (३२७९)
तमागतमभिप्रेक्ष्य देवा इन्द्रपुरोगमाः ।
बृहस्पतिं सभाज्येदं कचं वचनमब्रुवन् ॥ १-७१-२२ (३२८०)
देवा ऊचुः। १-७१-२३क्ष् (३६३)
यत्त्वयास्मद्धितं कर्म कृतं वै परमाद्भुतम् ।
न ते यशः प्रणशिता भागभाक्च भविष्यसि ॥ ॥ १-७१-२३ (३२८१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि एकसप्ततितमोऽध्यायः

॥ ७१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७१-१ समावृतव्रतं समाप्तव्रतम् ॥
१-७१-९ गुरुः पुत्रो यस्य अङ्गिरसः पुत्रः पौत्रः ॥
१-७१-१५ उत्थिता अनलसा ॥
१-७१-१७ अननुज्ञातस्त्वदुक्तकार्ये ॥
१-७१-२३ प्रणशिता प्रणङ्क्ष्यति ॥
एकसप्ततितमोऽध्यायः ॥
७१ ॥

आदिपर्व - अध्याय ०७२
॥ श्रीः ॥
१.७२. अध्यायः ७२

Mahabharata - Adi Parva - Chapter Topics

स्वर्गप्रत्यागतात्कचात्संजीविन्यध्ययनेन देवानां कृतार्थता ॥ १ ॥
शुक्रवृषपर्वणोर्विरोधोत्पादनार्थमिन्द्रकृतं कन्यानां
वस्त्रमिश्रणम् ॥ २ ॥
वस्त्रमिश्रणेन शर्मिष्ठादेवयान्योर्विरोधः ॥ ३ ॥
शर्मिष्ठया कूपे प्रक्षिप्ताया देवयान्या ययातिना कूपादुद्धरणम् ॥ ४ ॥
शुक्रस्य कूपसमीपागमनं देवयानीसान्त्वनं च ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-७२-० (३२८२)
वैशम्पायन उवाच। १-७२-०क्ष् (३६४)
कृतविद्ये कचे प्राप्ते हृष्टरूपा दिवौकसः ।
कचादधीत्य तां विद्यां कृतार्था भरतर्षभ ॥ १-७२-१ (३२८३)
सर्व एव समागम्य शतक्रतुमथाब्रुवन् ।
कालस्ते विक्रमस्याद्य जहि शत्रून्पुरन्दर ॥ १-७२-२ (३२८४)
वैशम्पायन उवाच। १-७२-३क्ष् (३६५)
एवमुक्तस्तु सहितैस्त्रिदशैर्मघवांस्तदा ।
तथेत्युक्त्वा प्रचक्राम सोऽपश्यत वने स्त्रियः ॥ १-७२-३ (३२८५)
क्रीडन्तीनां तु कन्यानां वने चैत्ररथोपमे ।
वायुभूतः स वस्त्राणि सर्वाण्येव व्यमिश्रयत् ॥ १-७२-४ (३२८६)
ततो जलात्समुत्तीर्य कन्यास्ताः सहितास्तदा ।

वस्त्राणि जगृहुस्तानि यथाऽऽसन्नान्यनेकशः ॥१-७२-५ (३२८७)
तत्र वासो देवयानयाः शर्मिष्ठा जगृहे तदा ।
व्यतिमिश्रमजानन्ती दुहिता वृषपर्वणः ॥१-७२-६ (३२८८)
ततस्तयोर्मिथस्तत्र विरोधः समजायत ।
देवयान्याश्च राजेन्द्र शर्मिष्ठायाश्च तत्कृते ॥१-७२-७ (३२८९)
देवयान्युवाच।१-७२-८क्ष् (३६६)
कस्माद्गृह्णासि मे वस्त्रं शिष्या भूत्वा ममासुरि ।
समुदाचारहीनाया न ते साधु भविष्यति ॥१-७२-८ (३२९०)
सर्मिष्ठोवाच।१-७२-९क्ष् (३६७)
आसीनं च शयानं च पिता ते पितरं मम ।
स्तौतिबन्दीव चाभीक्ष्णं नीचैः स्थित्वा विनीतवत् ॥१-७२-९ (३२९१)
याचतस्त्वं हि दुहिता स्तुवतः प्रतिगृह्णतः ।
सुताहं स्तूयमानस्य ददतोऽप्रतिगृह्णतः ॥१-७२-१० (३२९२)
आदुन्वस्व विदुन्वस्व द्रुह्य कुप्यस्व याचकि ।
अनायुधा सायुधाया रिक्ता क्षुभ्यसि भिक्षुकि ॥१-७२-११ (३२९३)
लप्स्यसे प्रतियोद्धारं न हि त्वां गणयाम्यहम् ।
ग्प्रतिकूलं वदसि चेदितःप्रभृति याचकि ॥' १-७२-१२ (३२९४)
वैशम्पायन उवाच।१-७२-१३क्ष् (३६८)
समुच्छ्रयं देवयानीं गतां सक्तां च वाससि ।
शर्मिष्ठा प्राक्षिपत्कूपे ततः स्वपुरमागमत् ।
हतेयमिति विज्ञाय शर्मिष्ठा पापनिश्चया ॥ १-७२-१३ (३२९५)
अनवेक्ष्य ययौ वेश्म क्रोधवेगपरायणा ।
ग्प्रविश्य स्वगृहं स्वस्था धर्ममासुरमास्थिता।'
अथ तं देशमभ्यागाद्ययातिर्नहुषात्मजः ॥ १-७२-१४ (३२९६)
श्रान्तयुग्यः श्रान्तहयो मृगलिप्सुः पिपासितः ।
स नाहुषः प्रेक्षमाण उदपानं गतोदकम् ॥१-७२-१५ (३२९७)
ददर्श राजा तां तत्र कन्यामग्निशिखामिव ।
तामपृच्छत्स दृष्ट्वैव कन्याममरवर्णिनीम् ॥१-७२-१६ (३२९८)
सान्त्वयित्वा नृपश्रेष्ठः साम्ना परमवल्गुना ।
का त्वं ताम्रनखी श्यामा सुमृष्टमणिकुण्डला ॥१-७२-१७ (३२९९)
दीर्घं ध्यायसि चात्यर्थं कस्माच्छ्वसिषि चातुरा ।
कथं च पतिताऽस्यस्मिन्कूपे वीरुत्तृणावृते ॥१-७२-१८ (३३००)
दुहिता चैव कस्य त्वं वद सत्यं सुमध्यमे। १-७२-१९ (३३०१)
देवयान्युवाच ।
योऽसौ देवैर्हतान्दैत्यानुत्थापयति विद्यया ॥ १-७२-२०क्ष् (३६९)
तस्य शुक्रस्य कन्याहं स मां नूनं न बुध्यते ।

एष मे दक्षिणो राजन्पाणिस्ताम्रनखाङ्गुलिः ॥ १-७२-२० (३३०२)
समुद्धर गृहीत्वा मां कुलीनस्त्वं हि मे मतः ।
जानामि हि त्वां संशान्तं वीर्यवन्तं यशस्विनम् ॥ १-७२-२१ (३३०३)
तस्मान्मां पतितामस्मात्कूपादुद्धर्तुमर्हसि। १-७२-२२ (३३०४)
वैशम्पायन उवाच ।
तामथो ब्राह्मणीं कन्यां विज्ञायनहुषात्मजः ॥ १-७२-२२क्ष् (३७०)
गृहीत्वा दक्षिणे पाणावुज्जहार ततोऽवटात् ।
उद्धृत्य चैनां तरसा तस्मात्कूपान्नराधिपः ॥ १-७२-२३ (३३०५)
ग्ययातिरुवाच। १-७२-२४क्ष् (३७१)
गच्छ भद्रे यथाकामं न भयं विद्यते तव ।
इत्युच्यमाना नृपतिं देवयानीदमुत्तरम् ॥ १-७२-२४ (३३०६)
उवाच मामुपादाय गच्छ शीघ्रं प्रियो हि मे ।
गृहीताहं त्वया पाणौ तस्माद्भर्ता भविष्यसि ॥ १-७२-२५ (३३०७)
इत्येवमुक्तो नृपतिराह क्षत्रकुलोद्भवः ।
त्वं भद्रे ब्राह्मणी तस्मान्मया नार्हसि सङ्गमम् ॥ १-७२-२६ (३३०८)
सर्वलोकगुरुः काव्यस्त्वं तस्य दुहिता शुभे ।
तस्मादपि भयं मेऽद्य ततः कल्याणि नार्हसि ॥ १-७२-२७ (३३०९)
देवयान्युवाच। १-७२-२८क्ष् (३७२)
यदि मद्वचनान्नाद्य मां नेच्छसि नराधिप ।
त्वामेव वरये पित्रा तस्माल्लप्स्यसि गच्छ हि ॥ १-७२-२८ (३३१०)
वैशम्पायन उवाच। १-७२-२९क्ष् (३७३)
आमन्त्रयित्वा सुश्रोणीं ययातिः स्वपुरं ययौ ।
गते तु नाहुषे तस्मिन्देवयान्यप्यनिन्दिता ॥ १-७२-२९ (३३११)
क्वचिद्गत्वा च रुदती वृक्षमाश्रित्य धिष्ठिता ।
ततश्चिरायमाणायां दुहितर्यथ भार्गवः ॥ १-७२-३० (३३१२)
संस्मृत्योवाच धात्रीं तां दुहितुः स्नेहविक्लवः ।
धात्रि त्वमानय क्षिप्रं देवयानीं समुध्यमाम् ॥ १-७२-३१ (३३१३)
इत्युक्तमात्रे सा धात्री त्वरिताऽऽनयितुं गता ।
यत्रयत्र सशीभिः सा गता पदममार्गत ॥ १-७२-३२ (३३१४)
सा ददर्श तथा दीनां श्रमार्तां रुदतीं स्थिताम् ।
वृत्तान्तं किमिदं भद्रे शीघ्रं वद पिताह्वयत् ॥ १-७२-३३ (३३१५)
एवमुक्ताह धात्रीं तां शर्मिष्ठावृजिनं कृतम् ।
उवाच शोकसंतप्ता घूर्णिकामागतां पुरः'॥ १-७२-३४ (३३१६)
देवयान्युवाच। १-७२-३५क्ष् (३७४)
त्वरितं घूर्णिके गच्छ शीघ्रमाचक्ष्व मे पितुः ॥ १-७२-३५ (३३१७)
नेदानीं संप्रवेक्ष्यामि नगरं वृषपर्वणः। १-७२-३६ (३३१८)

वैशम्पायन उवाच ।
सा तत्र त्वरितं गत्वा घूर्णिकाऽसुरमन्दिरम् ॥ १-७२-३६क्ष् (३७५)
दृष्ट्वा काव्यमुवाचेदं संभ्रमाविष्टचेतना ।
आचचक्षे महाप्राज्ञं देवयानीं वने हताम् ॥ १-७२-३७ (३३१९)
शर्मिष्ठया महाभाग दुहित्रा वृषपर्वणः ।
श्रुत्वा दुहितरं काव्यस्तत्र शर्मिष्ठया हताम् ॥ १-७२-३८ (३३२०)
त्वरया निर्ययौ दुःखान्मार्गमाणः सुतां वने ।
दृष्ट्वा दुहितरं काव्यो देवयानीं ततो वने ॥ १-७२-३९ (३३२१)
बाहुभ्यां संपरिष्वज्य दुःखितो वाक्यमब्रवीत् ।
आत्मदोषैर्नियच्छन्ति सर्वे दुःखसुखे जनाः ॥ १-७२-४० (३३२२)
मन्ये दुश्चरितं तेऽस्ति यस्येयं निष्कृतिः कृता। १-७२-४१ (३३२३)
देवयान्युवाच ।
निष्कृतिर्मेऽस्तु वा मास्तु शृणुष्वावहितो मम ॥ १-७२-४१क्ष् (३७६)
शर्मिष्ठया यदुक्ताऽस्मि दुहित्रा वृषपर्वणः ॥
सत्यं किलैतत्सा प्राह दैत्यानामसि गायनः ॥ १-७२-४२ (३३२४)
एवं हि मे कथयति शर्मिष्ठा वार्षपर्वणी ।
वचनं तीक्ष्णपरुषं क्रोधरक्तेक्षणा भृशम् ॥ १-७२-४३ (३३२५)
स्तुवतो दुहिता नित्यं याचतः प्रतिगृह्णतः ।
अहं तु स्तूयमानस्य ददतोऽप्रतिगृह्णतः ॥ १-७२-४४ (३३२६)
इदं मामाह शर्मिष्ठा दुहिता वृषपर्वणः ।
क्रोधसंरक्तनयना दर्पपूर्णा पुनः पुनः ॥ १-७२-४५ (३३२७)
यद्यह स्तुवतस्तात दुहिता प्रतिगृह्णतः ।
प्रसादयिष्ये शर्मिष्ठामित्युक्ता तु सखी मया ॥ १-७२-४६ (३३२८)
ग्उक्ताप्येवं भृशं मां सा निगृह्य विजने वने ।
कूपे प्रक्षेपयामास प्रक्षिप्य गृहमागमत् ॥' १-७२-४७ (३३२९)
शुक्र उवाच। १-७२-४८क्ष् (३७७)
स्तुवतो दुहिता न त्वं याचतः प्रतिगृह्णतः ।
अस्तोतुः स्तूयमानस्य दुहिता देवयान्यसि ॥ १-७२-४८ (३३३०)
वृषपर्वैव तद्वेद शक्रो राजा च नाहुषः ।
अचिन्त्यं ब्रह्म निर्द्वन्द्वमैश्वरं हि बलं मम ॥ १-७२-४९ (३३३१)
ग्जानामि जीविनीं विद्यां लोकेस्मिञ्शाश्वतीं ध्रुवम् ।
मृतः संजीवते जन्तुर्यया कमललोचने ॥ १-७२-५० (३३३२)
कत्थनं स्वगुणानां च कृत्वा तप्यति सज्जनः ।
ततो वक्तुमशक्तोऽस्मित्वं मे जानासि यद्बलम् ॥ १-७२-५१ (३३३३)
तसमादुत्तिष्ठ गच्छामः स्वगृहं कुलनन्दिनि ।
क्षमां कृत्वा विशालाक्षि क्षमासारा हि साधवः'॥ १-७२-५२ (३३३४)

यच्च किंचित्सर्वगतं भूमौ वा यदि वा दिवि ।
तस्याहमीश्वरो नित्यं तुष्टेनोक्तः स्वयंभुवा ॥१-७२-५३ (३३३५)
अहं जलं विमुञ्चामि प्रजानां हितकाम्यया ।
पुष्णाम्यौषधयः सर्वा इति सत्यं ब्रवीमि ते ॥१-७२-५४ (३३३६)
वैशम्पायन उवाच।१-७२-५५क्ष् (३७८)
एवं विषादमापन्नां मन्युना संप्रपीडिताम् ।
वचनैर्मधुरैः श्लक्ष्णैः सान्त्वयामास तां पिता ॥ ॥१-७२-५५ (३३३७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि द्विसप्ततितमोऽध्यायः
॥ ७२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-७२-३ प्रचक्राम भूतलं प्रतीति शेषः ॥
१-७२-८ समुदाचारः सदाचारः ॥
१-७२-११ आदुन्वस्व आभिमुख्येन वक्षस्ताडनादिना संतापं प्राप्नुहि ।विदुन्वस्व पांसुषु लुण्ठनादिना।द्रुह्य द्रोहं चिरकालिकं क्रोधं कुरु।कुप्यस्व सद्यः परानिष्टफलो यत्नः कोपस्तं कुरु।रिक्ता दरिद्रा ॥
१-७२-१२ प्रतियोद्धारं प्रहर्तारम् ॥
१-७२-१५ युग्या रथवाहकाः ।हयाः केवलाश्वाः।उदकं पीयतेस्मादित्युदपानं कूपः ॥
१-७२-२३ अवटाद्गर्तात् ॥
१-७२-३४ घूर्णिकां दासीम् ॥
१-७२-३७ हतां ताडिताम् ॥
१-७२-४० नियच्छन्ति प्रयच्छन्ति प्राप्नुवन्तीति भावः ॥
१-७२-४१ एतदेवाह मन्ये इति ।निष्कृतिः फलभोगेन निरसनम् ॥
१-७२-४५ इदं पूर्वोक्तम् ॥
१-७२-४९ नाहुषो ययातिः ।मम ऐश्वरं निर्द्वन्द्वमप्रतिपक्षं बलमस्ति ॥
द्विसप्ततितमोऽध्यायः ॥
७२ ॥

आदिपर्व - अध्याय ०७३
॥ श्रीः ॥
१.७३. अध्यायः ७३

Mahabharata - Adi Parva - Chapter Topics
शुक्रदेवयानीसंवादः ॥१ ॥

१-७३-० (३३३८)
शुक्र उवाच। १-७३-०क्ष् (३७९)
यः परेषां नरो नित्यमतिवादांस्तितिक्षते ।
देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ १-७३-१ (३३३९)
यः समुत्पतितं क्रोधं निगृह्णाति हयं यथा ।
स यन्तेत्युच्यते सद्भिर्न यो रश्मिषु लम्बते ॥ १-७३-२ (३३४०)
यः समुत्पतितं क्रोधमक्रोधेन निरस्यति ।
देवयानि विजानीहि तेन सर्वमिदं जितम् ॥ १-७३-३ (३३४१)
यः समुत्पतितं क्रोधं क्षमयेह निरस्यति ।
यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥ १-७३-४ (३३४२)
यः संधारयते मन्युं योऽतिवादांस्तितिक्षते ।
यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम् ॥ १-७३-५ (३३४३)
यो यजेदपरिश्रान्तो मासिमासि शतं समाः ।
न क्रुद्ध्येद्यश्च सर्वस्य तयोरक्रोधनोऽधिकः ॥ १-७३-६ (३३४४)
ग्तस्मादक्रोधनः श्रेष्ठः कामक्रोधौ विगर्हितौ ।
क्रुद्धस्य निष्फलान्येव दानयज्ञतपांसि च ॥ १-७३-७ (३३४५)
तस्मादक्रोधने यज्ञतपोदानफलं महत् ।
भवेदसंशयं भद्रे नेतरस्मिन्कदाचन ॥ १-७३-८ (३३४६)
न यतिर्न तपस्वी च न यज्वा न च धर्मभाक् ।
क्रोधस्य यो वशं गच्छेत्तस्य लोकद्वयं न च ॥ १-७३-९ (३३४७)
पुत्रो भृत्यः सुहृद्भ्राता भार्या धर्मश्च सत्यता ।
तस्यैतान्यपयास्यन्ति क्रोधशीलस्य निश्चितम् ॥ १-७३-१० (३३४८)
यत्कुमाराः कुमार्यश्च वैरं कुर्युरचेतसः ।
न तत्प्राज्ञोऽनुकुर्वीत न विदुस्ते बलाबलम् ॥ १-७३-११ (३३४९)
देवयान्युवाच। १-७३-१२क्ष् (३८०)
वेदाहं तात बालाऽपि धर्माणां यदिहान्तरम् ।
अक्रोधे चातिवादे च वेद चापि बलाबलम् ॥ १-७३-१२ (३३५०)
ग्स्ववृत्तिमननुष्ठाय धर्ममुत्सृज्य तत्त्वतः।'
शिष्यस्याशिष्यवृत्तेस्तु न क्षन्तव्यं बुभूषता ॥ १-७३-१३ (३३५१)
ग्प्रेष्यः शिष्यः स्ववृत्तिं हि विसृज्य विफलं गतः।'
तस्मात्संकीर्णवृत्तेषु वासो मम न रोचते ॥ १-७३-१४ (३३५२)
पुमांसो ये हि निन्दन्ति वृत्तेनाभिजनेन च ।
न तेषु निवसेत्प्राज्ञः श्रेयोऽर्थी पापबुद्धिषु ॥ १-७३-१५ (३३५३)

ये त्वेनमभिजानन्ति वृत्तेनाभिजनेन वा ।
तेषु साधुषु वस्तव्यं स वासः श्रेष्ठ उच्यते ॥ १-७३-१६ (३३५४)
ग्सुयन्त्रितपरा नित्यं विहीनाश्च धनैर्वराः ।
दुर्वृत्ताः पापकर्माणश्चण्डाला धनिनोपि च ॥ १-७३-१७ (३३५५)
नैव जात्या हि चण्डालाः स्वकर्मविहितैर्विना ।
धनाभिजनविद्यासु सक्ताश्चण्डालधर्मिणः ॥ १-७३-१८ (३३५६)
अकारणाश्च द्वेष्यन्ति परिवादं वदन्ति ते ।
साधोस्तत्र न वासोस्ति पापिभिः पापतां व्रजेत् ॥ १-७३-१९ (३३५७)
सुकृते दुष्कृते वापि यत्र सज्जति यो नरः ।
ध्रुवं रतिर्भवेत्तस्य तस्माद्द्वेषं न रोचयेत् ॥' १-७३-२० (३३५८)
वाग्दुरुक्तं महाघोरं दुहितुर्वृषपर्वणः ।
मम मथ्नाति हृदयमग्निकाम इवारणिम् ॥ १-७३-२१ (३३५९)
न ह्यतो दुष्करतरं मन्ये लोकेष्वपि त्रिषु ।
यः सपत्नश्रियं दीप्तां हीनश्रीः पर्युपासते ॥ १-७३-२२ (३३६०)
मरणं शोभनं तस्य इति विद्वज्जना विदुः ।
ग्अवमानमवाप्नोति शनैर्नीचसमागमात् ॥ १-७३-२३ (३३६१)
अतिवादा वक्त्रतो निःसरन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य वै मर्मसु ते पतन्ति
तस्माद्धीरो नैव मुच्येत्परेषु ॥ १-७३-२४ (३३६२)
निरोहेदायुधैश्छिन्नं संरोहेद्दग्धमाग्निना ।
वाक्क्षतं च न संरोहेदाशरीरं शरीरिणाम् ॥ १-७३-२५ (३३६३)
संरोहित शरैर्विद्धं नवं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहेत वाक्क्षतम्'॥ ॥ १-७३-२६ (३३६४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि त्रिसप्ततितमोऽध्यायः
॥ ७३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७३-२ रश्मिषु क्रोधफलभूतास्वापत्सु । पक्षे स्पष्टोऽर्थः ॥
१-७३-३ अक्रोधेन क्रोधविरोधिना सहनेन ॥
त्रिसप्ततितमोऽध्यायः ॥
७३ ॥

आदिपर्व - अध्याय ०७४
॥ श्रीः ॥
१.७४. अध्यायः ७४

Mahabharata - Adi Parva - Chapter Topics
शुक्रवृषपर्वणोः संवादः ॥ १ ॥
शुक्रकोपशान्तये वृषपर्वनियोगात् शर्मिष्ठया
देवयानीदास्याङ्गीकारः ॥ २ ॥
प्रसन्नया देवयान्या सह शुक्रस्य पुरप्रवेशनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-७४-० (३३६५)
वैशम्पायन उवाच। १-७४-०क्ष् (३८१)
ततः काव्यो भृगुश्रेष्ठः समन्युरुपगम्य ह ।
वृषपर्वाणमासीनमित्युवाचाविचारयन् ॥ १-७४-१ (३३६६)
नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ।
शनैरावर्त्यमानो हि कर्तुर्मूलानि कृन्तति ॥ १-७४-२ (३३६७)
पुत्रेषु वा नप्तृषु वा न चेदात्मनि पश्यति ।
फलत्येव ध्रुवं पापं गुरुभुक्तमिवोदरे ॥ १-७४-३ (३३६८)
ग्अधीयानं हितं राजन्क्षमावन्तं जितेन्द्रियम्।'
यदघातयथा विप्रं कचमाङ्गिरसं तदा ।
अपापशीलं धर्मज्ञं शुश्रूषुं मद्गृहे रतम् ॥ १-७४-४ (३३६९)
ग्शर्मिष्ठया देवयानी क्रूरमुक्ता बहु प्रभो ।
विप्रकृत्य च संरम्भात्कूपे क्षिप्ता मनस्विनी ॥ १-७४-५ (३३७०)
सा न कल्पेत वासाय तयाहं रहितः कथम् ।
वसेयमिह तस्मात्ते त्यजामि विषयं नृप ॥' १-७४-६ (३३७१)
वधादनर्हतस्तस्य वधाच्च दुहितुर्मम ।
वषपर्वन्निबोधेयं त्यक्ष्यामि त्वां सबान्धवम् ।
स्थातुं त्वद्विषये राजन्न शक्ष्यामि त्वया सह ॥ १-७४-७ (३३७२)
ग्मा शोच वृषपर्वंस्त्वं मा क्रुध्यस्व विशांपते ।
स्थातुं ते विषये राजन्न शक्ष्यामि तया विना ।
अस्या गतिर्गतिर्मह्यं प्रियमस्याः प्रियं मम ॥ १-७४-८ (३३७३)
वृषपर्वोवाच। १-७४-९क्ष् (३८२)
यदि ब्रह्मन्घातयामि यदि वा क्रोशयाम्यहम् ।
शर्मिष्ठया देवयानीं तेन गच्छाम्यसद्गतिम् ॥ १-७४-९ (३३७४)
शुक्र उवाच।' १-७४-१०क्ष् (३८३)
अहो मामभिजानासि दैत्य मिथ्याप्रलापिनम् ।
यथेममात्मनो दोषं न नियच्छस्युपेक्षसे ॥ १-७४-१० (३३७५)

वृषपर्वोवाच। १-७४-११क्ष् (३८४)
नाधर्मं न मृषावादं त्वयि जानामि भार्गव ।
त्वयि धर्मश्च सत्यं च तत्प्रसीदतु नो भवान् ॥ १-७४-११ (३३७६)
यद्यस्मानपहाय त्वमितो गच्छसि भार्गव ।
समुद्रं संप्रवेक्ष्यामि पूर्वं मद्बान्धवैः सह ॥ १-७४-१२ (३३७७)
पातालमथवा चाग्निं नान्यदस्ति परायणम् ।
यद्येव देवान्गाच्छेस्त्वं मां च त्यक्त्वा ग्रहाधिप ।
सर्वत्यागं ततः कृत्वा प्रविशामि हुताशनम्'॥ १-७४-१३ (३३७८)
शुक्र उवाच। १-७४-१४क्ष् (३८५)
समुद्रं प्रविशध्वं वा दिशो वा द्रवतासुराः ।
दुहितुर्नाप्रियं सोढुं शक्तोऽहं दयिता हि मे ॥ १-७४-१४ (३३७९)
प्रसाद्यतां देवयानी जीवितं यत्र मे स्थितम् ।
योगक्षेमकरस्तेऽहमिन्द्रस्येव बृहस्पतिः ॥ १-७४-१५ (३३८०)
वृषपर्वोवाच। १-७४-१६क्ष् (३८६)
यत्किंचिदसुरेन्द्राणां विद्यते वसु भार्गव ।
भुवि हस्तिगवाश्वं च तस्य त्वं मम चेश्वरः ॥ १-७४-१६ (३३८१)
शुक्र उवाच। १-७४-१७क्ष् (३८७)
यत्किंचिदस्ति द्रविणं दैत्येन्द्राणां महासुर ।
तस्येश्वरोस्मि यद्येषा देवयानी प्रसाद्यताम् ॥ १-७४-१७ (३३८२)
वैशम्पायन उवाच। १-७४-१८क्ष् (३८८)
एवमुक्तस्तथेत्याह वृषपर्वा महाकविम् ।
देवयान्यन्तिकं गत्वा तमर्थं प्राह भार्गवः ॥ १-७४-१८ (३३८३)
देवयान्युवाच। १-७४-१९क्ष् (३८९)
यदि त्वमीश्वरस्तात राज्ञो वित्तस्य भार्गव ।
नाभिजानामि तत्तेऽहं राजा तु वदतु स्वयम् ॥ १-७४-१९ (३३८४)
'वैशम्पायन उवाच। १-७४-२०क्ष् (३९०)
शुक्रस्य वचनं श्रुत्वा वृषपर्वा सबान्धवः ।
देवयानि प्रसीदेति पपात भुवि पादयोः ॥ १-७४-२० (३३८५)
वृषपर्वोवाच। १-७४-२१क्ष् (३९१)
स्तुत्यो वन्द्यश्च सततं मया तातश्च ते शुभे।'
यं काममभिकामाऽसि देवयानि शुचिस्मिते ।
तत्तेऽहं संप्रदास्यामि यदि वापि हि दुर्लभम् ॥ १-७४-२१ (३३८६)
देवयान्युवाच। १-७४-२२क्ष् (३९२)
दासीं कन्यासहस्रेण शर्मिष्ठामभिकामये ।
अनु मां तत्र गच्छेत्सा यत्र दद्याच्च मे पिता ॥ १-७४-२२ (३३८७)
वृषपर्वोवाच। १-७४-२३क्ष् (३९३)

उत्तिष्ठ त्वं गच्छ धात्रि शर्मिष्ठां शीघ्रमानय ।
यं च कामयते कामं देवयानी करोतु तम् ॥१-७४-२३ (३३८८)
गत्यजेदेकं कुलस्यार्थे ग्रामार्थे च कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्'॥१-७४-२४ (३३८९)
वैशम्पायन उवाच।१-७४-२५क्ष् (३९४)
ततो धात्री तत्र गत्वा शर्मिष्ठां वाक्यमब्रवीत् ।
उत्तिष्ठ भद्रे शर्मिष्ठे ज्ञातीनां सुखमावह ॥१-७४-२५ (३३९०)
त्यजति ब्राह्मणः शिष्यान्देवयान्या प्रचोदितः ।
सायं कामयते कां स कार्योऽद्य त्वयाऽनघे ॥१-७४-२६ (३३९१)
शर्मिष्ठोवाच।१-७४-२७क्ष् (३९५)
यं सा कामयते कां करवाण्यहमद्य तम् ।
यद्येवमाह्वयेच्छुक्रो देवयानीकृते हि माम् ।
मद्दोषान्मागमच्छुक्रो देवयानी च मत्कृते ॥ १-७४-२७ (३३९२)
वैशम्पायन उवाच।१-७४-२८क्ष् (३९६)
ततः कन्यासहस्रेण वृता शिबिकया तदा ।
पितुर्नियोगात्त्वरिता निश्चक्राम पुरोत्तमात् ॥१-७४-२८ (३३९३)
शर्मिष्ठोवाच।१-७४-२९क्ष् (३९७)
अहं दासीसहस्रेण दासी ते परिचारिका ।
अनु त्वां तत्र यास्यामि यत्र दास्यति ते पिता ॥१-७४-२९ (३३९४)
देवयान्युवाच।१-७४-३०क्ष् (३९८)
स्तुवतो दुहिताऽहं ते याचतः प्रतिगृह्णतः ।
स्तूयमानस्य दुहिता कथं दासी भविष्यसि ॥१-७४-३० (३३९५)
शर्मिष्ठोवाच।१-७४-३१क्ष् (३९९)
येनकेनचिदार्तानां ज्ञातीनां सुखमावहेत् ।
अतस्त्वामनुयास्यामि तत्र दास्यति ते पिता ॥१-७४-३१ (३३९६)
वैशम्पायन उवाच।१-७४-३२क्ष् (४००)
प्रतिश्रुते दासभावे दुहित्रा वृषपर्वणः ।
देवयानी नृपश्रेष्ठ पितरं वाक्यमब्रवीत् ॥१-७४-३२ (३३९७)
देवयान्युवाच।१-७४-३३क्ष् (४०१)
प्रविशामि पुरं तात तुष्टाऽस्मि द्विजसत्तम ।
अमोघं तव विज्ञानमस्ति विद्याबलं च ते ॥१-७४-३३ (३३९८)
वैशम्पायन उवाच।१-७४-३४क्ष् (४०२)
एवमुक्तो दुहित्रा स द्विजश्रेष्ठो महायशाः ।
प्रविवेश पुरं हृष्टः पूजितः सर्वदानैवः ॥ ॥१-७४-३४ (३३९९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि

आदिपर्व - अध्याय ०७५
॥ श्रीः ॥
१.७५. अध्यायः ७५

Mahabharata - Adi Parva - Chapter Topics
मृगयार्थं गतस्य ययातेः पुनर्देवयानीसमागमः ॥ १ ॥
शुक्राज्ञया तयोर्विवाहः ॥ २ ॥
देवयानीशर्मिष्ठायां सह ययातेः स्वपुरप्रवेशः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-७५-० (३४००)
वैशम्पायन उवाच। १-७५-०क्ष् (४०३)
अथ दीर्घस्य कालस्य देवयानी नृपोत्तम ।
वनं तदेव निर्याता क्रीडार्थं वरवर्णिनी ॥ १-७५-१ (३४०१)
तेन दासीसहस्रेण सार्धं शर्मिष्ठया तदा ।
तमेव देशं संप्राप्ता यथाकामं चचार सा ॥ १-७५-२ (३४०२)
ताभिः सखीभिः सहिता सर्वाभिर्मुदिता भृशम् ।
क्रीडन्त्योऽभिरताः सर्वाः पिबन्त्यो मधुमाधवीं ॥ १-७५-३ (३४०३)
खादन्त्यो विविधान्भक्ष्यान्विदशन्त्यः फलानि च ।
पुनश्च नाहुषो राजा मृगलिप्सुर्यदृच्छया ॥ १-७५-४ (३४०४)
तमेव देशं संप्राप्तो जलार्थी श्रमकर्शितः ।
ददर्श देवयानीं स शर्मिष्ठां ताश्च योषितः ॥ १-७५-५ (३४०५)
पिबन्तीर्ललमानाश्च दिव्याभरणभूषिताः ।
आसनप्रवरे दिव्ये सर्वरत्नविभूषिते ।
उपविष्टां च ददृशे देवयानीं शुचिस्मिताम् ॥ १-७५-६ (३४०६)
रूपेणाप्रतिमां तासां स्त्रीणां मध्ये वराङ्गनम् ।
ग्आसनाच्च ततः किंचिद्विहीनां हेमभीषिताम् ॥ १-७५-७ (३४०७)
असुरेन्द्रसुतां चापि निषण्णां चारुहासिनीम् ।
ददर्श पादौ विप्रायाः संवहन्तीमनिन्दिताम् ॥ १-७५-८ (३४०८)
गायन्त्योऽथ प्रनृत्यन्त्यो वादयन्त्योऽथ भारत ।
दृष्ट्वा ययातिमतुलं लज्जयाऽवनताः स्थिताः ॥' १-७५-९ (३४०९)
ययातिरुवाच। १-७५-१०क्ष् (४०४)
द्वाभ्यां कन्यासहस्राभ्यां द्वे कन्ये परिवारिते ।
गोत्रे च नामनी चैव द्वयोः पृच्छाम्यहं शुभे। १-७५-१० (३४१०)

देवयान्युवाच। १-७५-११क्ष् (४०५)
आख्यास्याम्यहमादत्स्व वचनं मे नराधिप ।
शुक्रो नामासुरगुरुः सुतां जानीहि तस्य माम् ॥ १-७५-११ (३४११)
इयं च मे सखी दासी यत्राहं तत्र गामिनी ।
दुहिता दानवेन्द्रस्य शर्मिष्ठा वृषपर्वणः ॥ १-७५-१२ (३४१२)
ययातिरुवाच। १-७५-१३क्ष् (४०६)
कथं तु ते सखी दासी कन्येयं वरवर्णिनी ।
असुरेन्द्रसुता सुभ्रूः परं कौतूहलं हि मे ॥ १-७५-१३ (३४१३)
ग्नैव देवी न गन्धर्वी न यक्षी न च किन्नरी ।
नैवंरूपा मया नारी दृष्टपूर्वा महीतले ॥ १-७५-१४ (३४१४)
श्रीरिवायतपद्माक्षी सर्वलक्षणशोभना ।
असुरेन्द्रसुता कन्या सर्वालङ्कारभूषिता ॥ १-७५-१५ (३४१५)
दैवेनोपहता सुभ्रूरुताहो तपसापि वा ।
अन्यथैषाऽनवद्याङ्गी दासी नेह भविष्यति ॥ १-७५-१६ (३४१६)
अस्या रूपेण ते रूपं न किंचित्सदृशं भवेत् ।
पुरा दुश्चरितेनेयं तव दासी भवत्यहो ॥' १-७५-१७ (३४१७)
देवयान्युवाच। १-७५-१८क्ष् (४०७)
सर्व एव नरश्रेष्ठ विधानमनुवर्तते ।
विधानविहितं मत्वा मा विचित्राः कथाःकृथाः ॥ १-७५-१८ (३४१८)
राजवद्रूपवेषौ ते ब्राह्मीं वाचं बिभर्षि च ।
को नाम त्वं कुतश्चासि कस्य पुत्रश्च शस मे ॥ १-७५-१९ (३४१९)
ययातिरुवाच। १-७५-२०क्ष् (४०८)
ब्रह्मचर्येण वेदो मे कृत्स्नः श्रुतिपथं गतः ।
राजाहं राजपुत्रश्च ययातिरिति विश्रुतः ॥ १-७५-२० (३४२०)
देवयान्युवाच। १-७५-२१क्ष् (४०९)
केनास्यर्थेन नृपते इमं देशमुपागतः ।
जिघृक्षुर्वारिजं किंचिदथवा मृगलिप्सया ॥ १-७५-२१ (३४२१)
ययातिरुवाच। १-७५-२२क्ष् (४१०)
मृगलिप्सुरहं भद्रे पानीयार्थमुपागतः ।
बहुधाऽप्यनुयुक्तोऽस्मि तदनुज्ञातुमर्हसि ॥ १-७५-२२ (३४२२)
देवयान्युवाच। १-७५-२३क्ष् (४११)
द्वाभ्यां कन्यासहस्राभ्यां दास्या शर्मिष्ठया सह ।
त्वदधीनाऽस्मि भद्रं ते सखा भर्ता च मे भव ॥ १-७५-२३ (३४२३)
ग्वैशम्पायन उवाच। १-७५-२४क्ष् (४१२)
असुरेन्द्रसुतामीक्ष्य तस्यां सक्तेन चेतसा ।
शर्मिष्ठा महिषी मह्यमिति मत्वा वचोऽब्रवीत्'॥ १-७५-२४ (३४२४)

ययातिरुवाच। १-७५-२५क्ष् (४१३)
विद्ध्यौशनसि भद्रं ते न त्वामर्होऽस्मि भामिनि ।
अविवाह्या हि राजानो देवयानि पितुस्तव ॥१-७५-२५ (३४२५)
ग्परभार्या स्वसा श्रेष्ठा सगोत्रा पतिता स्नुषा ।
अवरा भिक्षुकाऽस्वस्था अगम्याः कीर्तिता बुधैः ॥१-७५-२६ (३४२६)
देवयान्युवाच। १-७५-२७क्ष् (४१४)
संसृष्टं ब्रह्मणा क्षत्रं क्षत्रेण ब्रह्म संहितम् ।
ग्अन्यत्वमस्ति न तयोरेकान्ततरमास्थिते।'
ऋषिश्चाप्यृषिपुत्रश्च नाहुषाङ्ग वहस्व माम् ॥ १-७५-२७ (३४२७)
ययातिरुवाच। १-७५-२८क्ष् (४१५)
एकदेहोद्भवा वर्णाश्चत्वारोऽपि वराङ्गने ।
पृथग्धर्माः पृथक्शौचास्तेषां तु ब्राह्मणो वरः ॥१-७५-२८ (३४२८)
देवयान्युवाच। १-७५-२९क्ष् (४१६)
पाणि धर्मो नाहुषाऽयं न पुंभिः सेवितः पुरा ।
तं मे त्वमग्रहीरग्रे वृणोमि त्वामहं ततः ॥१-७५-२९ (३४२९)
कथं नु मे मनस्विन्याः पाणिमन्यः पुमान्स्पृशेत् ।
गृहीतमृषिपुत्रेण स्वयं वाप्यृषिणा त्वया ॥१-७५-३० (३४३०)
ययातिरुवाच। १-७५-३१क्ष् (४१७)
क्रुद्धादाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् ।
दुराधर्षतरो विप्रो ज्ञेयः पुंसा विजानता ॥१-७५-३१ (३४३१)
देवयान्युवाच। १-७५-३२क्ष् (४१८)
कथमाशीविषात्सर्पाज्ज्वलनात्सर्वतोमुखात् ।
दुराधर्षतरो विप्र इत्यात्थ पुरुषर्षभ ॥१-७५-३२ (३४३२)
ययातिरुवाच। १-७५-३३क्ष् (४१९)
एकमाशीविषो हन्ति शस्त्रेणैकश्च वध्यते ।
हन्ति विप्रः सराष्ट्राणि पुराण्यपि हि कोपितः ॥१-७५-३३ (३४३३)
दुराधर्षतरो विप्रस्तस्माद्भीरु मतो मम ।
अतोऽदत्तां च पित्रा त्वां भद्रे न विवहाम्यहम् ॥१-७५-३४ (३४३४)
देवयान्युवाच। १-७५-३५क्ष् (४२०)
दत्तां वहस्व तन्मा त्वं पित्रा राजन्वृतो मया ।
आयचतो भयं नास्ति दत्तां च प्रतिगृह्णतः ॥१-७५-३५ (३४३५)
गतिष्ठ राजन्मुहूर्तं च प्रेषयिष्याम्यहं पितुः ।
गच्छ त्वं धात्रिके शीघ्रं ब्रह्मकल्पमिहानय ।
स्वयंवरे वृतं शीघ्रं निवेदय च नाहुषम्'॥ १-७५-३६ (३४३६)
वैशम्पायन उवाच। १-७५-३७क्ष् (४२१)
त्वरितं देवयान्याथ संदिष्टं पितुरात्मनः ।

सर्वं निवेदयामास धात्री तस्मै यथातथम् ॥१-७५-३७ (३४३७)
श्रुत्वैव च स राजानं दर्शयामास भार्गवः ।
दृष्ट्वैव चागतं शुक्रं ययातिः पृथिवीपतिः ।
ववन्दे ब्राह्मणं काव्यं प्राञ्जलिः प्रणतः स्थितः ॥ १-७५-३८ (३४३८)
देवयान्युवाच। १-७५-३९क्ष् (४२२)
राजायं नाहुषस्तात दुर्गमे पाणिमग्रहीत् ।
नान्यपूर्वगृहीतं मे तेनाहमभया कृता ।
नमस्ते देहि मामस्मै लोके नान्यं पतिं वृणे ॥ १-७५-३९ (३४३९)
शुक्र उवाच। १-७५-४०क्ष् (४२३)
अन्यो धर्मः प्रियस्त्वन्यो वृतस्ते नाहुषः पतिः ।
कचशापात्त्वया पूर्वं नान्यङ्गवितुमर्हति ॥१-७५-४० (३४४०)
वृतोऽनया पतिर्वीर सुतया त्वं ममेष्टया ।
स्वयं ग्रहे महान्दोषो ब्राह्मण्या वर्णसंकरात् ।
गृहाणेमां मया दत्तां महिषीं नहुषात्मज ॥ १-७५-४१ (३४४१)
ययातिरुवाच। १-७५-४२क्ष् (४२४)
अधर्मो न स्पृशेदेष महान्मामिह भार्गव ।
वर्णसंकरजो ब्रह्मन्निति त्वां प्रवृणोम्यहम् ॥१-७५-४२ (३४४२)
शुक्र उवाच। १-७५-४३क्ष् (४२५)
अधर्मात्त्वां विमुञ्चामि शृणु त्वं वरमीप्सितम् ।
अस्मिन्विवाहे मा म्लासीरहं पापं नुदामि ते ॥१-७५-४३ (३४४३)
वहस्व भार्यां धर्मेण देवयानीं सुमध्यमाम् ।
अनया सह संप्रीतिमतुलां समवाप्नुहि ॥१-७५-४४ (३४४४)
इयं चापि कुमारी ते शर्मिष्ठा वार्षपर्वणी ।
संपूज्या सततं राजन्मा चैनां शयने ह्वयेः ॥१-७५-४५ (३४४५)
रहस्येनां समाहूय न वदेर्न च संस्पृशेः ।
वहस्व भार्यां भद्रं ते यथा काममवाप्स्यसि ॥१-७५-४६ (३४४६)
वैशम्पायन उवाच। १-७५-४७क्ष् (४२६)
एवमुक्तो ययातिस्तु शुक्रं कृत्वा प्रदक्षिणम् ।
शास्त्रोक्तविधिना राजा विवाहमकरोच्छुभम् ॥१-७५-४७ (३४४७)
लब्ध्वा शुक्रान्महद्वित्तं देवयानीं तदोत्तमाम् ।
द्विसहस्रेण कन्यानां तथा शर्मिष्ठया सह ॥१-७५-४८ (३४४८)
संपूजितश्च शुक्रेण दैत्यैश्च नृपसत्तमः ।
जगाम स्वपुरं हृष्टोऽनुज्ञातोऽथ महात्मना ॥ ॥१-७५-४९ (३४४९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७५-३ मधुमाधवीं मधुवृक्षमदिराम् ॥
१-७५-१८ विधानं दैवं अनुवर्तते अनुसृत्यास्ति ॥
१-७५-२१ अर्थेन कार्येण । वारिजं मीनं पद्मादि वा ॥
१-७५-२२ अनुयुक्तोस्मि पलायिते मृगे श्रान्तोस्मि ॥
१-७५-२७ संसृष्टं उच्छिन्नस्य क्षत्रस्य ब्राह्मणवीर्यादेव पुनरुद्भवाद्ब्रह्मणा क्षत्रं संसृष्टम् । क्षत्रियकन्यासु लोपामुद्रादिषु ब्राह्मणानामुत्पत्तिदर्शनात्क्षत्रेण ब्रह्म संहितं मिश्रम् ॥
१-७५-२८ एकस्येश्वरस्य देहो देहावयवाः मुखबाहूरुपादास्तदुद्भवाः ॥
१-७५-३५ मा मां भयं क्षत्रियेण ब्राह्मणीपरिणयनदोषजम् ॥
१-७५-३९ दुर्गमे संकटे ॥
१-७५-४३ ईप्सितं वरं च वृणीष्वेत्युक्तोऽपीदानीं न वृतवान् पश्चात्त्वन्यत्र जरासंक्रमणसामर्थ्यरूपः शुक्रेणैव स्वप्रतिज्ञासिद्धये दत्त इति ध्येयम् ॥
पञ्चसप्ततितमोऽध्यायः ॥
७५ ॥

आदिपर्व - अध्याय ०७६
॥ श्रीः ॥
१.७६. अध्यायः ७६

Mahabharata - Adi Parva - Chapter Topics
देवयान्याः पुत्रोत्पत्तिः ॥ १ ॥
अशोकवनिकायां शर्मिष्ठाया ययातिसमागमात्पुत्रोत्पत्तिः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-७६-० (३४५०)
वैशम्पायन उवाच । १-७६-०क्ष् (४२७)
ययातिः स्वपुरं प्राप्य महेन्द्रपुरसंनिभम् ।
प्रविश्यान्तःपुरं तत्र देवयानीं न्यवेशयत् ॥ १-७६-१ (३४५१)
देवयान्याश्चानुमते सुतां तां वृषपर्वणः ।
अशोकवनिकाभ्याशे गृहं कृत्वा न्यवेशयत् ॥ १-७६-२ (३४५२)
वृतां दासीसहस्रेण शर्मिष्ठां वार्षपर्वणीम् ।
वासोभरन्नपानैश्च संविभज्य सुसत्कृताम् ॥ १-७६-३ (३४५३)

देवयान्या तु सहितः स नृपो नहुषात्मजः ।
ग्प्रीत्या परमया युक्तो मुमुदे शाश्वतीः समाः ॥१-७६-४ (३४५४)
अशोकवनिकामध्ये देवयानी समागता ।
शर्मिष्ठया सा क्रीडित्वा रमणीये मनोरमे ॥१-७६-५ (३४५५)
तत्रैव तां तु निर्दिश्य राज्ञा सह ययौ गृहम् ।
एवमेव सह प्रीत्या बहु कालं मुमोद च ॥' १-७६-६ (३४५६)
विजहार बहूनब्दान्देववन्मुदितः सुखी ॥ १-७६-७ (३४५७)
ऋतुकाले तु संप्राप्ते देवयानी वराङ्गना ।
लेभे गर्भं प्रथमतः कुमारं च व्यजायत ॥१-७६-८ (३४५८)
गते वर्षसहस्रे तु शर्मिष्ठा वार्षपर्वणी ।
ददर्श यौवनं प्राप्ता ऋतुं सा चान्वचिन्तयत् ॥१-७६-९ (३४५९)
ग्शुद्धा स्नाता तु शर्मिष्ठा सर्वालङ्कारशोभिता ।
अशोकशाखामालम्ब्य सुपुष्पस्तबकैर्वृताम् ॥१-७६-१० (३४६०)
आदर्शे मुखमुद्वीक्ष्य भर्तुर्दर्शनलालसा ।
शोकमोहसमाविष्टा वचनं चेदमब्रवीत् ॥१-७६-११ (३४६१)
अशोक शोकापनुद शोकोपहतचेतसाम् ।
त्वन्नामानं कुरुष्वाद्य प्रियसंदर्शनेन माम् ।
एवमुक्तवती सा तु शर्मिष्ठा पुनरब्रवीत् ॥' १-७६-१२ (३४६२)
ऋतुकालश्च संप्राप्तो न च मेऽस्ति वृतः पतिः ।
किं प्राप्तं किं नु कर्तव्यं किं वा कृत्वा सुखं भवेत् ॥१-७६-१३ (३४६३)
देवयानी प्रजाताऽसौ वृथाऽहं प्राप्तयौवना ।
यथा तया वृतो भर्ता तथैवाहं वृणोमि तम् ॥१-७६-१४ (३४६४)
राज्ञा पुत्रफलं देयमिति मे निश्चिता मतिः ।
अपीदानीं स धर्मात्मा ईयान्मे दर्शनं रहः ॥१-७६-१५ (३४६५)
ग्केशैर्बध्या तु राजानं याचेऽहं सदृशं पतिम् ।
स्पृहेदिदं देवयानी पुत्रमीक्ष्य पुनःपुनः ।
क्रीडन्नन्तःपुरे तस्याः क्वचित्क्षणमवाप्य च ॥ १-७६-१६ (३४६६)
वैशम्पायन उवाच।' १-७६-१७क्ष् (४२८)
अथ निष्क्रम्य राजाऽसौ तस्मिन्काले यदृच्छया ।
अशोकवनिकाभ्याशे शर्मिष्ठां प्राप तिष्ठतीम् ॥१-७६-१७ (३४६७)
तमेकं रहिते दृष्ट्वा शर्मिष्ठा चारुहासिनी ।
प्रत्युद्गम्याञ्जलिं कृत्वा राजानं वाक्यमब्रवीत् ॥१-७६-१८ (३४६८)
शर्मिष्ठोवाच।१-७६-१९क्ष् (४२९)
सोमस्येन्द्रस्य विष्णोर्वा यमस्य वरुणस्य वा ।
तव वा नाहुष गृहे कः स्त्रियं द्रष्टुमर्हति ॥१-७६-१९ (३४६९)
रूपाभिजनशीलैर्हि त्वं राजन्वेत्थ मां सदा ।

सा त्वां याचे प्रसाद्याहमृतुं देहि नराधिप ॥ १-७६-२० (३४७०)
ययातिरुवाच। १-७६-२१क्ष् (४३०)
वेद्मि त्वां शीलसंपन्नां दैत्यकन्यामनिन्दिताम् ।
रूपं च ते न पश्यामि सूच्यग्रमपि निन्दितम् ॥ १-७६-२१ (३४७१)
ग्तदाप्रभृति दृष्ट्वा त्वां स्मराम्यनिशमुत्तमे'।
अब्रवीदुशना काव्यो देवयानीं यदाऽवहम् ।
नेयमाह्वयितव्या ते शयने वार्षपर्वणी ॥ १-७६-२२ (३४७२)
ग्देवयान्याः प्रियं कृत्वा शर्मिष्ठामपि पोषय ॥' १-७६-२३ (३४७३)
शर्मिष्ठोवाच। १-७६-२४क्ष् (४३१)
न नर्मयुक्तमनृतं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥ १-७६-२४ (३४७४)
पृष्टं तु साक्ष्ये प्रवदन्तमन्यथा
वदन्ति मिथ्या पतितं नरेन्द्र ।
एकार्थतायां तु समाहितायां
मिथ्या वदन्तं ह्यनृतं हिनस्ति ॥ १-७६-२५ (३४७५)
ग्अनृतं नानृतं स्त्रीषु परिहासविवाहयोः ।
आत्मप्राणार्थघाते च तदेवोत्तमतां व्रजेत् ॥' १-७६-२६ (३४७६)
ययातिरुवाच। १-७६-२७क्ष् (४३२)
राजा प्रमाणं भूतानां स नश्येत मृषा वदन् ।
अर्थकृच्छ्रमपि प्राप्य न मिथ्या कर्तुमुत्सहे ॥ १-७६-२७ (३४७७)
शर्मिष्ठोवाच। १-७६-२८क्ष् (४३३)
समावेतौ मतो राजन्पतिः सख्याश्च यः पतिः ।
समं विवाहमित्याहुः सख्या मेऽसि वृतः पतिः ॥ १-७६-२८ (३४७८)
ग्सह दत्तास्मि काव्येन देवयान्या मनीषिणा ।
पूज्या पोषयितव्येति न मृषा कर्तुमर्हसि ॥' १-७६-२९ (३४७९)
सुवर्णमणिमुक्तानि वस्त्राण्याभरणानि च ।
याचितॄणां ददासि त्वं गोभूम्यादीनि यानि च ॥ १-७६-३० (३४८०)
बहिःस्थं दानमित्युक्तं न शरीराश्रितं नृप ।
दुष्करं पुत्रदानं च आत्मदानं च दुष्करम् ॥ १-७६-३१ (३४८१)
शरीरदानात्तत्सर्वं दत्तं भवति मारिष ।
यस्य यस्य यथा कामस्तस्य तस्य ददाम्यहम् ॥ १-७६-३२ (३४८२)
इत्युक्त्वा नगरे राजंस्त्रिकालं घोषितं त्वया ।
त्वयोक्तमनृतं राजन्वृथा घोषितमेव वा ।
तत्सत्यं कुरु राजेन्द्र यथा वैश्रवणस्तथा ॥ १-७६-३३ (३४८३)

ययातिरुवाच। १-७६-३४क्ष् (४३४)
दातव्यं याचमानेभ्य इति मे व्रतमाहितम् ।
त्वं च याचसि मां कामं ब्रूहि किं करवाणि ते ॥ १-७६-३४ (३४८४)
ग्धनं वा यदि वा किंचिद्राज्यं वाऽपि शुचिस्मिते।' १-७६-३५ (३४८५)
शर्मिष्ठोवाच ।
अधर्मात्पाहि मां राजन्धर्मं च प्रतिपादय ॥ १-७६-३५क्ष् (४३५)
ग्नान्यं वृणे पुत्रकामा पुत्रात्परतरं न च।'
त्वत्तोऽपत्यवती लोके चरेयं धर्ममुत्तमम् ॥ १-७६-३६ (३४८६)
त्रय एवाधना राजन्भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥ १-७६-३७ (३४८७)
ग्पुत्रार्थं भर्तृपोषार्थं स्त्रियः सृष्टाः स्वयंभुवा ।
अपतिर्वापि या कन्या अनपत्या च या भवेत् ।
तासां जन्म वृथा लोके गतिस्तासां न विद्यते ॥' १-७६-३८ (३४८८)
देवयान्या भुजिष्याऽस्मि वश्या च तव भार्गवी ।
सा चाहं च त्वया राजन्भजनीये भजस्व माम् ॥ १-७६-३९ (३४८९)
वैशम्पायन उवाच। १-७६-४०क्ष् (४३६)
एवमुक्तस्तु राजा स तथ्यमित्यभिजज्ञिवान् ।
पूजयामास शर्मिष्ठां धर्मं च प्रत्यपादयत् ॥ १-७६-४० (३४९०)
स समागम्य शर्मिष्ठां यथा काममवाप्य च ।
अन्योन्यं चाभिसंपूज्य जग्मतुस्तौ यथागतम् ॥ १-७६-४१ (३४९१)
तस्मिन्समागमे सुभ्रूः शर्मिष्ठा चारुहासिनी ।
लेभे गर्भं प्रथमतस्तस्मान्नृपतिसत्तमात् ॥ १-७६-४२ (३४९२)
प्रयज्ञे च ततः काले राजन्राजीवलोचना ।
कुमारं देवगर्भाभं राजीवनिभलोचनम् ॥ ॥ १-७६-४३ (३४९३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि षट्सप्ततितमोऽध्यायः
॥ ७६ ॥

आदिपर्व - अध्याय ०७७
॥ श्रीः ॥
१.७७. अध्यायः ७७

Mahabharata - Adi Parva - Chapter Topics
शर्मिष्ठापुत्रदर्शनेन देवयान्याः शर्मिष्ठया सह संवादः ॥ १ ॥
देवयानीशर्मिष्ठयोः पुत्रान्तरोत्पत्तिः ॥ २ ॥
शर्मिष्ठापुत्रान्ययातिजाञ्ज्ञात्वा कुपितायाः देवयान्याः शुक्रसमीपे
गमनम् ॥ ३ ॥

ययातेः शुक्रशापाज्जराप्राप्तिः ॥ ४ ॥
तस्या अन्यस्मिन्संक्रमणरूपवरप्राप्तिः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-७७-० (३४९४)
वैशम्पायन उवाच। १-७७-०क्ष् (४३७)
ग्तस्मिन्नक्षत्रसंयोगे शुक्ले पुण्यर्क्षगेन्दुना ।
स राजा मुमुदे सम्राट् तया शर्मिष्ठया सह ॥ १-७७-१ (३४९५)
प्रजानां श्रीरिवाभ्याशे शर्मिष्ठा ह्यभवद्वधूः ।
पन्नगीवोग्ररूपा वै देवयानी ममाप्यभूत् ॥ १-७७-२ (३४९६)
पर्जन्य इव सस्यानां देवानाममृतं यथा ।
तद्वन्ममापि संभूता शर्मिष्ठा वार्षपर्वणी ।
इत्येवं मनसा ज्ञात्वा देवयानीमवर्जयत् ॥' १-७७-३ (३४९७)
श्रुत्वा कुमारं जातं तु देवयानी शुचिस्मिता ।
चिन्तयामास दुःखार्ता शर्मिष्ठां प्रति भारत ॥ १-७७-४ (३४९८)
अभिगम्य च शर्मिष्ठां देवयान्यब्रवीदिदम्। १-७७-५ (३४९९)
देवयान्वुवाच ।
किमिदं वृजिनं सुभ्रु कृतं वै कामलुब्धया ॥ १-७७-५क्ष् (४३८)
शर्मिष्ठोवाच। १-७७-६क्ष् (४३९)
ऋषिरभ्यागतः कश्चिद्धर्मात्मा वेदपारगः ।
स मया वरदः कामं याचितो धर्मसंहितम् ॥ १-७७-६ (३५००)
ग्अपत्यार्थे स तु मया वृतो वै चारुहासिनि'।
नाहमन्यायतः काममाचरामि शुचिस्मिते ।
तस्मादृषेर्ममापत्यमिति सत्यं ब्रवीमि ते ॥ १-७७-७ (३५०१)
देवयान्युवाच। १-७७-८क्ष् (४४०)
शोभनं भीरु यद्येवमथ स ज्ञायते द्विजः ।
गोत्रनामाभिजनतो वेत्तुमिच्छामि तं द्विजम् ॥ १-७७-८ (३५०२)
शर्मिष्ठोवाच। १-७७-९क्ष् (४४१)
तपसा तेजसा चैव दीप्यमानं यथा रविम् ।
तं दृष्ट्वा मम संप्रष्टुं शक्तिर्नासीच्छुचिस्मिते ॥ १-७७-९ (३५०३)
देवयान्युवाच। १-७७-१०क्ष् (४४२)
यद्येतदेवं शर्मिष्ठे न मन्युर्विद्यते मम ।
अपत्यं यदि ते लब्धं ज्येष्ठाच्छ्रेष्ठाच्च वै द्विजात् ॥ १-७७-१० (३५०४)
वैशम्पायन उवाच। १-७७-११क्ष् (४४३)
अन्योन्यमेवमुक्त्वा तु संप्रहस्य च ते मिथः ।

जगाम भार्गवी वेश्म तथ्यमित्यवजग्मुषी ॥ १-७७-११ (३५०५)
ययातिर्देवयान्यां तु पुत्रावजनयन्नृपः ।
यदुं च तुर्वसुं चैव शक्रविष्णू इवापरौ ॥ १-७७-१२ (३५०६)
ग्तस्मिन्काले तु राजर्षिर्ययातिः पृथिवीपतिः ।
माध्वीकरससंयुक्तां मदिरां मदवर्धनीम् ॥ १-७७-१३ (३५०७)
पाययामास शुक्रस्य तनयां रक्तपिङ्गलाम् ।
पीत्वा पीत्वा च मदिरां देवयानी मुमोह सा ॥ १-७७-१४ (३५०८)
रुदती गायमाना च नृत्यन्ती च मुहुर्मुहुः ।
बहु प्रलपती देवी राजानमिदमब्रवीत् ॥ १-७७-१५ (३५०९)
राजवद्रूपवेषौ ते किमर्थं त्वमिहागतः ।
केन कार्येण संप्राप्तो निर्जनं गहनं वनम् ॥ १-७७-१६ (३५१०)
द्विजश्रेष्ठ नृपश्रेष्ठो ययातिश्चोग्रदर्शनः ।
तस्मादितः पलायस्व हितमिच्छसि चेद्द्विज ॥ १-७७-१७ (३५११)
इत्येवं प्रलपन्तीं तां देवयानीं तु नाहुषः ।
भर्त्सयामास वचनैरनर्हां पापवर्धनीम् ॥ १-७७-१८ (३५१२)
ततो वर्षवरान्मूकान्व्यङ्गान्वृद्धांश्च पङ्गुकान् ।
रक्षणे देवयान्याः स पोषणे च शशास तान् ॥ १-७७-१९ (३५१३)
ततस्तु नाहुषो राजा शर्मिष्ठां प्राप्य बुद्धिमान् ।
रेमे च सुचिरं कालं तया शर्मिष्ठया सह ॥' १-७७-२० (३५१४)
तस्मादेव तु राजर्षेः शर्मिष्ठा वार्षपर्वणी ।
द्रुह्युं चानुं च पूरुं च त्रीन्कुमारानजीजनत् ॥ १-७७-२१ (३५१५)
ततः काले तु कस्मिंश्चिद्देवयानी शुचिस्मिता ।
ययातिसहिता राजञ्जगाम रहितं वनम् ॥ १-७७-२२ (३५१६)
ददर्श च तदा तत्र कुमारान्देवरूपिणः ।
क्रीडमानान्सुविश्रब्धान्विस्मिता चेदमब्रवीत् ॥ १-७७-२३ (३५१७)
देवयान्युवाच। १-७७-२४क्ष् (४४४)
ग्कस्यैते दारका राजन्देवपुत्रोपमाः शुभाः ।
वर्चसा रूपतश्चैव सदृशा मे मतास्तव ॥ १-७७-२४ (३५१८)
वैशम्पायन उवाच। १-७७-२५क्ष् (४४५)
एवं पृष्ट्वा तु राजानं कुमारान्पर्यपृच्छत ॥ १-७७-२५ (३५१९)
तस्मिन्काले तु तच्छ्रुत्वा धात्री तेषां वचोऽब्रवीत् ।
किं न ब्रूत कुमारा वः पितरं वै द्विजर्षभम् ॥ १-७७-२६ (३५२०)
कुमारा ऊचुः। १-७७-२७क्ष् (४४६)
ऋषिश्च ब्राह्मणश्चैव द्विजातिश्चैव नः पिता ।
शर्मिष्ठा नानृतं ब्रूते देवयानि क्षमस्व नः ॥' १-७७-२७ (३५२१)
देवयान्युवाच। १-७७-२८क्ष् (४४७)

किंनामधेयगोत्रो वः पुत्रका ब्राह्मणः पिता ।
प्रब्रूत तत्त्वतः क्षिप्रं कश्चासौ क्व च वर्तते ॥ १-७७-२८ (३५२२)
प्रब्रूत मे यथा तथ्यं श्रोतुमिच्छामि तं ह्यहम् ।
एवमुक्ताः कुमारस्ते देवयान्या सुमध्यया ॥ १-७७-२९ (३५२३)
तेऽदर्शयन्प्रदेशिन्या तमेव नृपसत्तमम् ।
शर्मिष्ठां मातरं चैव तथाऽऽचख्युश्च दारकाः ॥ १-७७-३० (३५२४)
वैशम्पायन उवाच। १-७७-३१क्ष् (४४८)
इत्युक्त्वा सहितास्ते तु राजानमुपचक्रमुः ।
नाभ्यनन्दत तान्राजा देवयान्यास्तदान्तिके ॥ १-७७-३१ (३५२५)
रुदन्तस्तेऽथ शर्मिष्ठामभ्ययुर्बालकास्ततः ।
ग्अविब्रुवन्ती किंचिच्च राजानं चारुलोचना ॥ १-७७-३२ (३५२६)
नातिदूराच्च राजानं सा चातिष्ठदवाङ्मुखी ।
श्रुत्वा तेषां तु बालानां सव्रीड इव पार्थिवः ॥ १-७७-३३ (३५२७)
प्रतिवक्तुमशक्तोऽभूत्तूर्णींभूतोऽभवन्नृपः ।
दृष्ट्वा तु तेषां बालानां प्रणयं पार्थिवं प्रति ॥ १-७७-३४ (३५२८)
बुद्ध्वा तु तत्त्वतो देवी शर्मिष्ठापिदमब्रवीत् ।
अभ्यागच्छति मां कश्चिदृषिरित्येवमब्रवीः ॥ १-७७-३५ (३५२९)
ययातिमेवं राजानं त्वं गोपायसि भामिनि ।
पूर्वमेव मया प्रोक्तं त्वया तु वृजिनं कृतम् ॥ १-७७-३६ (३५३०)
मदधीना सती कस्मादकार्षीर्विप्रियं मम ।
तमेवाऽऽसुरधर्मं त्वमास्थिता न बिभेषि मे ॥' १-७७-३७ (३५३१)
शर्मिष्ठोवाच। १-७७-३८क्ष् (४४९)
यदुक्तमृषिरित्येव तत्सत्यं चारुहासिनि ।
न्यायतो धर्मतश्चैव चरन्ती न बिभेमि ते ॥ १-७७-३८ (३५३२)
यदा त्वया वृतो भर्ता वृत एव तदा मया ।
सखीभर्ता हि धर्मेण भर्ता भवति शोभने ॥ १-७७-३९ (३५३३)
पूज्यासि मम मान्या च ज्येष्ठा च ब्राह्मणी ह्यसि ।
त्वत्तोपि मे पूज्यतमो राजर्षिः किं न वेत्थ तत् ॥ १-७७-४० (३५३४)
ग्त्वत्पित्रा मम गुरुणा सह दत्ते उभे शुभे ।
ततो भर्ता च पूज्यश्च पोष्यां पोषयतीह माम् ॥ १-७७-४१ (३५३५)
वैशम्पायन उवाच। १-७७-४२क्ष् (४५०)
श्रुत्वा तस्यास्ततो वाक्यं देवयान्यब्रवीदिदम् ।
रमस्वेह यथाकामं देव्या शर्मिष्ठया सह ॥ १-७७-४२ (३५३६)
राजन्नाद्येह वत्स्यामि विप्रियं मे कृतं त्वया ।
इति जज्वाल कोपेन देवयानी ततो भृशम् ॥ १-७७-४३ (३५३७)
निर्दहन्तीव सव्रीडां शर्मिष्ठां समुदीक्ष्य च ।

अपविध्य च सर्वाणि भूषणान्यसितेक्षणा ॥' १-७७-४४ (३५३८)
सहसोत्पतितां श्यामां दृष्ट्वा तां साश्रुलोचनाम् ।
तूर्णं सकाशं काव्यस्य प्रस्थितां व्यथितस्तदा ॥ १-७७-४५ (३५३९)
अनुवव्राज संभ्रान्तः पृष्ठतः सान्त्वयन्नृपः ।
न्यवर्तत नचैव स्म क्रोधसंरक्तलोचना ॥ १-७७-४६ (३५४०)
अविब्रुवन्ती किंचित्सा राजानं साश्रुलोचना ।
अचिरादेव संप्राप्ता काव्यस्योशनसोऽन्तिकम् ॥ १-७७-४७ (३५४१)
सा तु दृष्ट्वै पितरमभिवाद्याग्रतः स्थिता ।
अनन्तरं यायातिस्तु पूजयामास भार्गवम् ॥ १-७७-४८ (३५४२)
देवयान्युवाच। १-७७-४९क्ष् (४५१)
अधर्मेण जितो धर्मः प्रवृत्तमधरोत्तरम् ।
शर्मिष्ठयाऽतिवृत्ताऽस्मि दुहित्रा वृषपर्वणः ॥ १-७७-४९ (३५४३)
त्रयोऽस्यां जनिताः पुत्रा राज्ञाऽनेन ययातिना ।
दुर्भगाया मम द्वौ तु पुत्रौ तात ब्रवीमि ते ॥ १-७७-५० (३५४४)
धर्मज्ञ इति विख्यात एष राजा भृगूद्वह ।
अतिक्रान्तश्च मर्यादां काव्यैतत्कथयामि ते ॥ १-७७-५१ (३५४५)
शुक्र उवाच। १-७७-५२क्ष् (४५२)
धर्मज्ञः सन्महाराज योऽधर्ममकृथाः प्रियम् ।
तस्माज्जरा त्वामचिराद्धर्षयिष्यति दुर्जया ॥ १-७७-५२ (३५४६)
ययातिरुवाच। १-७७-५३क्ष् (४५३)
ऋतुं वै याचमानाया भगवन्नान्यचेतसा ।
दुहितुर्दानवेन्द्रस्य धर्म्यमेतत्कृतं मया ॥ १-७७-५३ (३५४७)
ऋतुं वै याचमानाया न ददाति पुमानृतुम् ।
भ्रूणहेत्युच्यते ब्रह्मन् स इह ब्रह्मवादिभिः ॥ १-७७-५४ (३५४८)
अभिकामां स्त्रियं यश्च गम्यां रहसि याचितः ।
नोपैति स च धर्मेषु भ्रूणहेत्युच्यते बुधैः ॥ १-७७-५५ (३५४९)
ग्यद्यद्वृणोति मां कश्चित्तत्तद्देयमिति व्रतम् ।
त्वया च सापि दत्ता मे नान्यं नाथमिहेच्छति'॥ १-७७-५६ (३५५०)
इत्येतानि समीक्ष्याहं कारणानि भृगूद्वह ।
अधर्मभयसंविग्नः शर्मिष्ठामुपजग्मिवान् ।
ग्मत्वैतन्मे धर्म इति कृतं ब्रह्मन्क्षमस्व माम् ॥' १-७७-५७ (३५५१)
शुक्र उवाच। १-७७-५८क्ष् (४५४)
नन्वहं प्रत्यवेक्ष्यस्ते मदधीनोऽसि पार्थिव ।
मिथ्याचारस्य धर्मेषु चौर्यं भवति नाहुष ॥ १-७७-५८ (३५५२)
वैशम्पायन उवाच। १-७७-५९क्ष् (४५५)
क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषस्तदा ।

पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यत ॥१-७७-५९ (३५५३)
ययातिरुवाच।१-७७-६०क्ष् (४५६)
अतृप्तो यौवनस्याहं देवयान्यां भृगूद्वह ।
प्रसादं कुरु मे ब्रह्मञ्जरेयं न विशेच्च माम् ॥१-७७-६० (३५५४)
शुक्र उवाच।१-७७-६१क्ष् (४५७)
नाहं मृषा ब्रवीम्येतज्जरां प्राप्तोऽसि भूमिप ।
जरां त्वेतां त्वमन्यस्मिन्संक्रामय यदीच्छसि ॥१-७७-६१ (३५५५)
ययातिरुवाच।१-७७-६२क्ष् (४५८)
राज्यभाक्स भवेद्ब्रह्मन्पुण्यभाक्कीर्तिभाक्तथा ।
यो मे दद्याद्वयः पुत्रस्तद्भवाननुमन्यताम् ॥१-७७-६२ (३५५६)
शुक्र उवाच।१-७७-६३क्ष् (४५९)
संक्रामयिष्यसि जरां येथेष्टं नहुषात्मज ।
मामनुध्याय भावेन न च पापमवाप्स्यसि ॥१-७७-६३ (३५५७)
वयो दास्यति ते पुत्रो यः स राजा भविष्यति ।
आयुष्मान्कीर्तिमांश्चैव बह्वपत्यस्तथैव च ॥ ॥१-७७-६४ (३५५८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-७७-४९ अधरोत्तरं नीचस्याभिवृद्धिरुत्तमस्य
ह्रासः ।अतिवृत्तास्मि राज्ञः
सकाशादपत्यत्रयाधिगमनेतिक्रान्तोल्लङ्घिताऽस्मि ॥
१-७७-५२ अधर्ममेव प्रियमकृथाः ॥
१-७७-५३ नान्यचेतसा न कामलोभेन ॥
१-७७-५८ प्रत्यवेक्ष्यः अस्मिन्मकर्मणि मदाज्ञापि त्वया प्रार्थनीयेति भावः ॥
१-७७-६२ ज्येष्ठस्य राज्याप्रदानजं पापम् ॥
सप्तसप्ततितमोऽध्यायः ॥
७७ ॥

आदिपर्व - अध्याय ०७८
॥ श्रीः ॥
१.७८. अध्यायः ७८

Mahabharata - Adi Parva - Chapter Topics
स्वजरामनङ्गीकुर्वतां यदुप्रभृतीनां ययातिना शापः ॥ १ ॥
तामङ्गीकुर्वतः पूरोर्वरदानम् ॥ २ ॥

१-७८-० (३५५९)
वैशम्पायन उवाच। १-७८-०क्ष् (४६०)
जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठं च यदुमित्यब्रवीद्वचः ॥ १-७८-१ (३५६०)
ययातिरुवाच। १-७८-२क्ष् (४६१)
जरावली च मां तात पलितानि च पर्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥ १-७८-२ (३५६१)
त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥ १-७८-३ (३५६२)
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा स्वं प्रतिपत्स्यामि पाप्मानं जरया सह ॥ १-७८-४ (३५६३)
यदुरुवाच। १-७८-५क्ष् (४६२)
जरायां बहवो दोषाः पानभोजनकारिताः ।
तस्माज्जरां न ते राजन्ग्रहीष्य इति मे मतिः ॥ १-७८-५ (३५६४)
सितश्मश्रुर्निरानन्दो जरया शिथिलीकृतः ।
वलीसङ्गतगात्रस्तु दुर्दर्शो दुर्बलः कृशः ॥ १-७८-६ (३५६५)
अशक्तः कार्यकरणे परिभूतः स यौवतैः ।
सहोपजीविभिश्चैव तां जरां नाभिकामये ॥ १-७८-७ (३५६६)
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ।
जरां ग्रहीतुं धर्मज्ञ तस्मादन्यं वृणीष्व वै ॥ १-७८-८ (३५६७)
ययातिरुवाच। १-७८-९क्ष् (४६३)
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मादराज्यभाक्तात प्रजा तव भविष्यति ॥ १-७८-९ (३५६८)
‘प्रत्याख्यातस्तु राजा स तुर्वसुं प्रत्युवाच ह।’
तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ॥ १-७८-१० (३५६९)
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ १-७८-११ (३५७०)
तुर्वसुरुवाच। १-७८-१२क्ष् (४६४)
न कामये जरां तात कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम् ॥ १-७८-१२ (३५७१)
ययातिरुवाच। १-७८-१३क्ष् (४६५)
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।

तस्मात्प्रजा समुच्छेदं तुर्वसो तव यास्यति ॥ १-७८-१३ (३५७२)
संकीर्णाचारधर्मेषु प्रतिलोमचरेषु च ।
पिशिताशिषु चान्त्येषु मूढ राजा भविष्यसि ॥ १-७८-१४ (३५७३)
गुरुदारप्रसक्तेषु तिर्यग्योनिगतेषु च ।
पशुधर्मेषु पापेषु म्लेच्छेषु त्वं भविष्यसि ॥ १-७८-१५ (३५७४)
वैशम्पायन उवाच। १-७८-१६क्ष् (४६६)
एवं स तुर्वसुं शप्त्वा ययातिः सुतमात्मनः ।
शर्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥ १-७८-१६ (३५७५)
ययातिरुवाच। १-७८-१७क्ष् (४६७)
द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम् ।
जरां वर्षसहस्रं मे यौवनं स्वं ददस्व च ॥ १-७८-१७ (३५७६)
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वं चादास्यामि भूयोऽहं पाप्मानं जरया सह ॥ १-७८-१८ (३५७७)
द्रुह्युरुवाच। १-७८-१९क्ष् (४६८)
न गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् ।
वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये ॥ १-७८-१९ (३५७८)
ययातिरुवाच। १-७८-२०क्ष् (४६९)
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्माद्द्रुह्यो प्रियः कामो न ते संपत्स्यते क्वचित् ॥ १-७८-२० (३५७९)
यत्राश्वरथमुख्यानामश्वानां स्याद्गतं न च ।
हस्तिनां पीठकानां च गर्दभानां तथैव च ॥ १-७८-२१ (३५८०)
बस्तानां च गवां चैव शिबिकायास्तथैव च ।
उडुपप्लवसंतारो यत्र नित्यं भविष्यति। १-७८-२२ (३५८१)
ययातिरुवाच। १-७८-२३क्ष् (४७०)
अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
एकं वर्षसहस्रं तु चरेयं यौवनेन ते ॥ १-७८-२३ (३५८२)
अनुरुवाच। १-७८-२४क्ष् (४७१)
जीर्णः शिशुवदादत्ते कालेऽन्नमशुचिर्यथा ।
न जुहोति च कालेऽग्निं तां जरां नाभिकामये ॥ १-७८-२४ (३५८३)
ययातिरुवाच। १-७८-२५क्ष् (४७२)
यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
जरादोषस्त्वया प्रोक्तस्तस्मात्त्वं प्रतिलप्स्यसे ॥ १-७८-२५ (३५८४)
प्रजाश्च यौवनप्राप्ता विनशिष्यन्त्यनो तव ।
अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि ॥ १-७८-२६ (३५८५)
वैशम्पायन उवाच। १-७८-२७क्ष् (४७३)
प्रत्याख्यातश्चतुर्भिश्च शप्त्वा तान्यदुपूर्वकान् ।

पूरोः सकाशमगमन्मत्त्वा पूरुमलङ्घनम् ॥ १-७८-२७ (३५८६)
ययातिरुवाच। १-७८-२८क्ष् (४७४)
पूरो त्वं मे प्रियः पुत्रस्त्वं वरीयान्भविष्यसि ।
जरा वली च मांतात पलितानि च पर्यगुः ॥ १-७८-२८ (३५८७)
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ।
पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ।
कंचित्कालं चरेयं वै विषयान्वयसातव ॥ १-७८-२९ (३५८८)
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वं चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥ १-७८-३० (३५८९)
वैशम्पायन उवाच। १-७८-३१क्ष् (४७५)
एवमुक्तः प्रत्युवाच पूरुः पितरमज्जसा ।
यदात्थ मां महाराज तत्करिष्यामि ते वचः ॥ १-७८-३१ (३५९०)
ग्गुरोर्वै वचनं पुण्यं स्वर्ग्यमायुष्करं नृणाम् ।
गुरुप्रसादात्त्रैलोक्यमन्वशासच्छतक्रतुः ॥ १-७८-३२ (३५९१)
गुरोरनुमतं प्राप्य सर्वान्कामानमाप्नुयात् ।
यावदिच्छसि तावच्च धारयिष्यामि ते जराम्'॥ १-७८-३३ (३५९२)
प्रतिपत्स्यामि ते राजन्पाप्मानं जरया सह ।
गृहाण यौवनं मत्तश्चर कामान्यथेप्सितान् ॥ १-७८-३४ (३५९३)
जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथात्थमाम् ॥ १-७८-३५ (३५९४)
ययातिरुवाच। १-७८-३६क्ष् (४७६)
पूरो प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥ १-७८-३६ (३५९५)
वैशम्पायन उवाच। १-७८-३७क्ष् (४७७)
एवमुक्त्वा ययातिस्तु स्मृत्वा काव्यं महातपाः ।
संक्रामयामास जरां तदा पूरौ महात्मनि ॥ ॥ १-७८-३७ (३५९६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-७८-२ वली त्वचःसंवलनम् । पलितानि केशरोम्णां शौक्ल्यम्। पर्यगुः परितः शरीरे गतानि प्राप्तानियौवने यौवनसाध्ये कामभोगे ॥
१-७८-३ पाप्मानं भोगसामर्थ्येऽपि तदिच्छारूपं चित्तस्य दौस्थ्यम् । चरेयं भुञ्जीय ॥
१-७८-५ दोषाः कफाद्याधिक्याद्वमनादयः ॥

१-७८-१५ तिर्यग्योनीनामिव गतं प्रकाशं मैथुनाद्याचरणं येप तेषु ॥
१-७८-२१ पीठकानां राजयोग्यानां नरयानविशेषाणां तखतरावा इति म्लेच्छेषु प्रसिद्धानाम् ॥
१-७८-२६ अग्निप्रस्कन्दनं श्रौतस्मार्ताद्यग्निसाध्यकर्मत्यागस्तत्परः ॥
१-७८-२८ वरीयान्स्वभ्रातृभ्यो महान् । जरो देहेन्द्रियशक्तिघातः ॥
१-७८-३१ अञ्जसा आर्जवेन ॥
१-७८-३४ यथेप्सितान् यावज्जीवम् ॥
अष्टसप्ततितमोऽध्यायः ॥
७८ ॥

आदिपर्व - अध्याय ०७९
॥ श्रीः ॥
१.७९. अध्यायः ७९

Mahabharata - Adi Parva - Chapter Topics
विषयानुभवेन ययातेर्वैराग्यप्राप्तिः ॥ १ ॥
पूरोः ययातिना यौवनप्रत्यर्पणम् ॥ २ ॥
तस्य राज्याभिषेकः ॥ ३ ॥
ययातेर्वनं प्रति गमनम् ॥ ४ ॥
यदुप्रभृतीनां वंशकथनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-७९-० (३५९७)
वैशम्पायन उवाच। १-७९-०क्ष् (४७८)
पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
ग्रूपयौवनसंपन्नः कुमारः समपद्यत।'
प्रीतियुक्तो नृपश्रेष्ठश्चरा विषयान्प्रियान् ॥ १-७९-१ (३५९८)
यथाकामं यथोत्साहं यथाकालं यथासुखम् ।
धर्माविरुद्धं राजेन्द्रो यथा भवति सोऽन्वभूत् ॥ १-७९-२ (३५९९)
देवानतर्पयद्यज्ञैः श्राद्धैस्तद्वित्पितॄनपि ।
दीनाननुग्रहैरिष्टैः कामैश्च द्विजसत्तमान् ॥ १-७९-३ (३६००)
अतिथीनन्नपानैश्च विशश्च परिपालनैः ।
आनृशंस्येन शूद्रांश्च दस्यून्सन्निग्रहेण च ॥ १-७९-४ (३६०१)
धर्मेण च प्रजाः सर्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥ १-७९-५ (३६०२)
स राजा सिंहविक्रान्तो युवा विषयगोचरः ।

अविरोधेन धर्मस्य चचार सुखमुत्तमम् ॥१-७९-६ (३६०३)
स संप्राप्य शुभान्कामांस्तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ॥१-७९-७ (३६०४)
परिसंख्याय कालज्ञः कलाः काष्ठाश्च वीर्यवान् ।
यौवनं प्राप्य राजर्षिः सहस्रपरिवत्सरान् ॥१-७९-८ (३६०५)
विश्वाच्या सहितो रेमे व्यभ्राजन्नन्दने वने ।
अलकायां स कालं तु मेरुशृङ्गे तथोत्तरे ॥१-७९-९ (३६०६)
यदा स पश्यते कालं धर्मात्मा तं महीपतिः ।
पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥१-७९-१० (३६०७)
यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव ॥१-७९-११ (३६०८)
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥१-७९-१२ (३६०९)
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
एकस्यापि न पर्याप्तं तस्मात्तृष्णां परित्यजेत् ॥१-७९-१३ (३६१०)
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तांतृष्णां त्यजतः सुखम् ॥१-७९-१४ (३६११)
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ॥१-७९-१५ (३६१२)
तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निर्ममो भूत्वा चरिष्यामि मृगैः सह ॥१-७९-१६ (३६१३)
पूरो प्रीतोऽस्मि भद्रं ते गृहाणेदं स्वयौवनम् ।
राज्यं चेदं गृहाण त्वं ग्यावदिच्छसि यौवनम् ।
तावद्दीर्घायुषा भुङ्क्ष्व' त्वं हि मे प्रियकृत्सुतः ॥ १-७९-१७ (३६१४)
वैशम्पायन उवाच।' १-७९-१८क्ष् (४७९)
प्रतिपेदे जरां राजा ययातिर्नाहुषस्तदा ।
यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मवान् ॥१-७९-१८ (३६१५)
अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम् ।
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥१-७९-१९ (३६१६)
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ।
ज्येष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रयच्छसि ॥१-७९-२० (३६१७)
यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्वसुः ।
शर्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥१-७९-२१ (३६१८)
कथं ज्येष्ठानतिक्रम्य कनीयान्राज्यमर्हति ।
एतत्संबोधयामस्त्वां धर्मं त्वं प्रतिपालय ॥१-७९-२२ (३६१९)
ययातिरुवाच।१-७९-२३क्ष् (४८०)

ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथंचन ॥१-७९-२३ (३६२०)
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ॥१-७९-२४ (३६२१)
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः ।
स पुत्रः पुत्रवद्यश्च वर्तते पितृमातृषु ॥१-७९-२५ (३६२२)
ग्पुदिति नरकस्याख्या दुःखं च नरकं विदुः ।
पुतस्त्राणात्ततः पुत्त्रमिहेच्छन्ति परत्र च ॥१-७९-२६ (३६२३)
आत्मनः सदृशः पुत्रः पितृदेवर्षिपूजने ।
यो बहूनां गुणकरः स पुत्रो ज्येष्ठ उच्यते ॥१-७९-२७ (३६२४)
मूकोऽन्धो बधिरः श्वित्री स्वधर्मं नानुतिष्ठति ।
चोरः किल्बिषिकः पुत्रो ज्येष्ठो न ज्येष्ठ उच्यते ॥१-७९-२८ (३६२५)
ज्येष्ठांशहारी गुणकृदिह लोके परत्र च ।
श्रेयान्पुत्रो गुणोपेतः स पुत्रो नेतरो वृथा ।
वदन्ति धर्मं धर्मज्ञाः पितॄणां पुत्रकारणात् ॥ १-७९-२९ (३६२६)
वेदोक्तं संभवं मह्यमनेन हृदयोद्भवम् ।
तस्य जातमिदं कृत्स्नमात्मा पुत्र इति श्रुतिः'॥१-७९-३० (३६२७)
यदुनाऽहमवज्ञातस्तथा तुर्वसुनापि च ।
द्रुह्युना चानुना चैव मय्यवज्ञ कृता भृशम् ॥१-७९-३१ (३६२८)
पूरुणा तु कृतं वाक्यं मानितं च विशेषतः ।
कनीयान्मम दायादो धृता येन जरा मम ॥१-७९-३२ (३६२९)
मम कामः स च कृतः पूरुणा मित्ररूपिणा ।
शुक्रेण च वरोदत्तः काव्येनोशनसा स्वयम् ॥१-७९-३३ (३६३०)
पुत्रो यस्त्वाऽनुवर्तेत स राजा पृथिवीपतिः ।
ग्यो वानुवर्ती पुत्राणां स पुत्रो दायभाग्भवेत्'॥१-७९-३४ (३६३१)
भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम्। १-७९-३५ (३६३२)
प्रकृतय ऊचुः ।
यः पुत्रो गुणसंपन्नो मातापित्रोर्हितः सदा ॥ १-७९-३६क्ष् (४८१)
सर्वमर्हति कल्याणं कनीयानपि सत्तमः ।
ग्वेद धमार्थशास्त्रेषु मुनिभिः कथितं पुरा'॥१-७९-३६ (३६३३)
अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव ।
वरदानेन शुक्रस्य न शक्यं वक्तुमुत्तरम् ॥१-७९-३७ (३६३४)
वैशम्पायन उवाच।१-७९-३८क्ष् (४८२)
पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा ।
अभ्यषिञ्चत्ततः पूरुं राज्ये स्वे सुतमात्मनः ॥१-७९-३८ (३६३५)
ग्यदुं च तुर्वसुं चोभौ द्रुह्युं चैव सहानुजम् ।

अन्तेषु स विनिक्षिप्य नाहुषः स्वात्मजान्सुतान्'॥ १-७९-३९ (३६३६)
दत्त्वा च पूरवे राज्यं वनवासाय दीक्षितः ।
पुरात्स निर्ययौ राजा ब्राह्मणैस्तापसैः सह ॥ १-७९-४० (३६३७)
'देवयान्या च सहितः शर्मिष्ठया च भारत ।
अकरोत्स वने राजा सभार्यस्तप उत्तमम्'॥ १-७९-४१ (३६३८)
यदोस्तु यादवा जातास्तुर्वसोर्यवनाः स्मृताः ।
द्रुह्योः सुतास्तु वै भोजा अनोस्तु म्लेच्छजातयः ॥ १-७९-४२ (३६३९)
पूरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव ।
इदं वर्षसहस्राणि राज्यं कारयितुं वशी ॥ ॥ १-७९-४३ (३६४०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि ऊनाशीतितमोऽध्यायः ॥ ७९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-७९-१ चचार बुभोज ॥
१-७९-६ विषया दिव्यगन्धादयो गोचरे वशे यस्य स विषयगोचरः ॥
१-७९-१९ कनीयसं कनीयांसम् ॥

आदिपर्व - अध्याय ०८०
॥ श्रीः ॥
१.८०. अध्यायः ८०

॥ उत्तरयायातारम्भः ॥
Mahabharata - Adi Parva - Chapter Topics
ययातेः स्वर्गगमनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८०-० (३६४१)
वैशम्पायन उवाच। १-८०-०क्ष् (४८३)
एवं स नाहुषो राजा ययातिः पुत्रमीप्सितम् ।
राज्येऽभिषिच्य मुदितो वानप्रस्थोऽभवन्मुनिः ॥ १-८०-१ (३६४२)
उषित्वा च वने वासं ब्राह्मणैः संशितव्रतः ।
फलमूलाशनो दान्तस्ततः स्वर्गमितो गतः ॥ १-८०-२ (३६४३)
स गतः स्वर्निवासं तं निवसन्मुदितः सुखी ।
कालेन नातिमहता पुनः शक्रेण पातितः ॥ १-८०-३ (३६४४)
'साधुभिः संगतिं लब्ध्वा पुनः स्वर्गमुपेयिवान्। १-८०-४ (३६४५)
जनमेजय उवाच ।

स्वर्गतश्च पुनर्ब्रह्मन्निवसन्देववेश्मनि ।
कालेन नातिमहता कथं शक्रेण पातितः'॥ १-८०-४क्ष् (४८४)
निपतन्प्रच्युतः स्वर्गादप्राप्तो मेदिनीतलम् ।
स्थित आसीदन्तरिक्षे स तदेति श्रुतं मया ॥ १-८०-५ (३६४६)
तत एव पुनश्चापि गतः स्वर्गमिति श्रुतम् ।
राज्ञा वसुमता सार्धमष्टकेन च वीर्यवान् ॥ १-८०-६ (३६४७)
प्रतर्दनेन शिविना समेत्य किल संसदि ।
कर्मणा केन स दिवं पुनः प्राप्तो महीपतिः ॥ १-८०-७ (३६४८)
सर्वमेतदशेषेण श्रोतुमिच्छामि तत्त्वतः ।
कथ्यमानं त्वया विप्र विप्रर्षिगणसंनिधौ ॥ १-८०-८ (३६४९)
देवराजसमो ह्यासीद्ययातिः पृथिवीपतिः ।
वर्धनः कुरुवंशस्य विभावसुसमद्युतिः ॥ १-८०-९ (३६५०)
तस्य विस्तीर्णयशसः सत्यकीर्तेर्महात्मनः ।
चरितं श्रोतुमिच्छामि दिवि चेह च सर्वशः ॥ १-८०-१० (३६५१)
वैशम्पायन उवाच। १-८०-११क्ष् (४८५)
हन्त ते कथयिष्यामि ययातेरुत्तरां कथाम् ।
दिवि चेह च पुण्यार्थां सर्वपापप्रणाशिनीम् ॥ १-८०-११ (३६५२)
ययातिर्नाहुषो राजा पूरुं पुत्रं कनीयसम् ।
राज्येऽभिषिच्य मुदितः प्रवव्राज वनं तदा ॥ १-८०-१२ (३६५३)
अन्त्युषे स विनिक्षिप्य पुत्रान्यदुपुरोगमान् ।
फलमूलाशनो राजा वने संन्यवसच्चिरम् ॥ १-८०-१३ (३६५४)
शंसितात्मा जितक्रोधस्तर्पयन्पितृदेवताः ।
अग्नींश्च विधिवज्जुह्वन्वानप्रस्थविधानतः ॥ १-८०-१४ (३६५५)
अथितीन्पूजयामास वन्येन हविषा विभुः ।
शिलोञ्छवृत्तिमास्थाय शेषान्नकृतभोजनः ॥ १-८०-१५ (३६५६)
पूर्णं वर्षसहस्रं च एवंवृत्तिरभून्नृपः ।
अब्भक्षः शरदस्त्रिंशदासीन्नियतवाङ्मनाः ॥ १-८०-१६ (३६५७)
ततश्च वायुभक्षोऽभूत्संवत्सरमतन्द्रितः ।
तथा पञ्चाग्निमध्ये च तपस्तेपे स वत्सरम् ॥ १-८०-१७ (३६५८)
एकपादः स्तितश्चासीत्षण्मासाननिलाशनः ।
पुण्यकीर्तिस्ततः स्वर्गं जगामावृत्य रोदसी ॥ ॥ १-८०-१८ (३६५९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८०-१३ अन्त्येषु म्लेच्छेषु ॥

१-८०-१७ पञ्चाग्नयश्चत्वारोऽग्नयः पञ्चमः सूर्यः ॥
१-८०-१८ आवृत्य व्याप्य । रोदसी द्यावभूमी। पृथिव्यामिव स्वर्गेपि मुख्योऽभूदित्यर्थः ॥
अशीतितमोऽध्यायः ॥
८० ॥

आदिपर्व - अध्याय ०८१
॥ श्रीः ॥
१.८१. अध्यायः ८१

Mahabharata - Adi Parva - Chapter Topics
इन्द्रययातिसंवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८१-० (३६६०)
वैशम्पायन उवाच। १-८१-०क्ष् (४८६)
स्वर्गतः स तु राजेन्द्रो निवसन्देववेश्मनि ।
पूजितस्त्रिदशैः साध्यैर्मरुद्भिर्वसुभिस्तथा ॥ १-८१-१ (३६६१)
देवलोकं ब्रह्मलोकं संचरन्पुण्यकृद्वशी ।
अवसत्पृथिवीपालो दीर्घकालमिति श्रुतिः ॥ १-८१-२ (३६६२)
स कदाचिन्नृपश्रेष्ठो ययातिः शक्रमागमत् ।
कथान्ते तत्र शक्रेण स पृष्टः पृथिवीपतिः ॥ १-८१-३ (३६६३)
शक्र उवाच। १-८१-४क्ष् (४८७)
यदा स पूरुस्तव रूपेण राज-
ञ्जरां गृहीत्वा प्रचचार भूमौ ।
तदा च राज्यं संप्रदायैव तस्मै
त्वया किमुक्तः कथयेह सत्यम् ॥ १-८१-४ (३६६४)
ययातिरुवाच। १-८१-५क्ष् (४८८)
गङ्गायमुनयोर्मध्ये कृत्स्नोयं विषयस्तव ।
मध्ये पृथिव्यास्त्वं राजा भ्रातरोऽन्त्याधिपास्तव ॥ १-८१-५ (३६६५)
ग्न च कुर्यान्नरो दैन्यं शाठ्यं क्रोधं तथैव च ।
जैहयं च मत्सरं वैरं सर्वत्रेदं न कारयेत् ॥ १-८१-६ (३६६६)
मातरं पितरं ज्येष्ठं विद्वांसं च तपोधनम् ।
क्षमावन्तं च राजेन्द्र नावमन्येत बुद्धिमान् ॥ १-८१-७ (३६६७)
ळशक्तस्तु क्षमते नित्यमशक्तः क्रुध्यते नरः ।
दुर्जनः सुजनं द्वेष्टि दुर्बलो बलवत्तरम् ॥ १-८१-८ (३६६८)

रूपवन्तमरूपी च धनवन्तं च निर्धनः ।
अकर्मी कर्मिणं द्वेष्टि धार्मिकं च नधार्मिकः ॥१-८१-९ (३६६९)
निर्गुणो गुणवन्तं च पुत्रैतत्कलिलक्षणम् ।
विपरीतं च राजेन्द्र एतेषु कृतलक्षणम् ॥१-८१-१० (३६७०)
ब्राह्मणो वाथ वा राजा वैश्यो वा शूद्र एव वा ।
प्रशस्तेषु प्रसक्ताश्चेत्प्रशस्यन्ते यशस्विनः ॥१-८१-११ (३६७१)
तस्मात्प्रशस्ते राजेन्द्र नरः सक्तमना भवेत् ।
अलोकज्ञा ह्यप्रशस्ता भ्रातरस्ते ह्यबुद्धयः ॥१-८१-१२ (३६७२)
अन्त्याधिपतयः सर्वे ह्यभवन्गुरुशासनात्। १-८१-१३ (३६७३)
इन्द्र उवाच ।
त्वं हि धर्मविदो राजन्कत्थसे धर्मसुत्तमम् ।
कथयस्व पुनर्मेऽद्य लोकवृत्तान्तमुत्तमम् ॥ १-८१-१३क्ष् (४८९)
ययातिरुवाच' १-८१-१४क्ष् (४९०)
अक्रोधनः क्रोधनेभ्यो विशिष्ट-
स्तथा तितिक्षुरतितिक्षोर्विशिष्टः ।
अमानुषेभ्यो मानुषाश्च प्रधाना
विद्वांस्तथैवाविदुषः प्रधानः ॥ १-८१-१४ (३६७४)
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥१-८१-१५ (३६७५)
नारुन्तुदः स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।
ययाऽस्य वाचा पर उद्विजेत
न तां वदेद्रुशतीं पापलोक्याम् ॥ १-८१-१६ (३६७६)
अरुन्तुदं पुरुषं तीक्ष्णवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यन् ।
विद्यादलक्ष्मीकतमं जनानां
मुखे निबद्धां निर्ऋतिं वहन्तम् ॥ १-८१-१७ (३६७७)
सद्भिः पुरस्तादभिपूजितः स्या-
त्सद्भिस्तथा पृष्ठतो रक्षितः स्यात् ।
सदाऽसतामतिवादांस्तितिक्षे-
त्सतां वृत्तं चाददीतार्यवृत्तः ॥ १-८१-१८ (३६७८)
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य ये मर्मसु संपतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ १-८१-१९ (३६७९)
नहीदृशं संवननं त्रिषु लोकेषु विद्यते ।

दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥१-८१-२० (३६८०)
तस्मात्सान्त्वं सदा वाच्यं न वाच्यं परुषं क्वचित् ।
पूज्यान्संपूजयेद्दद्यान्न च याचेत्कदाचन ॥ ॥१-८१-२१ (३६८१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-८१-१६ अस्य आक्रोष्टुः सुकृतं तितिक्षुर्विन्दति । रुशतीं अकल्याणी ॥
१-८१-१७ निर्ऋतिं दुर्देवताम् ॥
१-८१-२० संवननं वशीकरणम् ॥
एकाशीतितमोऽध्यायः ॥
८१ ॥

आदिपर्व - अध्याय ०८२
॥ श्रीः ॥
१.८२. अध्यायः ८२

Mahabharata - Adi Parva - Chapter Topics
स्वर्गतो ययातेः पतनं । अष्टकप्रश्नश्च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८२-० (३६८२)
इन्द्र उवाच। १-८२-०क्ष् (४९१)
सर्वाणि कर्माणि समाप्य राजन्
गृहं परित्यज्य वनं गतोऽसि ।
तत्त्वां पृच्छामि नहुषस्य पुत्र
केनासि तुल्यस्तपसा ययाते ॥ १-८२-१ (३६८३)
ययातिरुवाच। १-८२-२क्ष् (४९२)
नाहं देवमनुष्येषु गन्धर्वेषु महर्षिषु ।
आत्मनस्तपसा तुल्यं कंचित्पश्यामि वासव ॥१-८२-२ (३६८४)
इन्द्र उवाच। १-८२-३क्ष् (४९३)
यदाऽवमंस्थाः सदृशः श्रेयसश्च
अल्पीयसश्चाविदितप्रभावः ।
तस्माल्लोकास्त्वन्तवन्तस्तवेमे
क्षीणे पुण्ये पतिताऽस्यद्य राजन् ॥ १-८२-३ (३६८५)
ययातिरुवाच। १-८२-४क्ष् (४९४)

सुरर्षिगन्धर्वनरावमाना-
त्क्षयं गता मे यदि शक्रलोकाः ।
इच्छाम्यहं सुरलोकाद्विहीनः
सतां मध्ये पतितुं देवराज ॥ १-८२-४ (३६८६)
इन्द्र उवाच।१-८२-५क्ष् (४९५)
सतां सकाशे पतिताऽसि राजं-
श्च्युतः प्रतिष्ठां यत्र लब्धासि भूयः ।
एतद्विदित्वा च पुनर्ययाते
त्वं माऽवमंस्थाः सदृशः श्रेयसश्च ॥ १-८२-५ (३६८७)
वैशम्पायन उवाच।१-८२-६क्ष् (४९६)
ततः प्रहायामरराजजुष्टा-
न्पुण्याँल्लोकान्पतमानं ययातिम् ।
संप्रेक्ष्य राजर्षिवरोऽष्टकस्त-
मुवाच सद्धर्मविधानगोप्ता ॥ १-८२-६ (३६८८)
अष्टक उवाच।१-८२-७क्ष् (४९७)
कस्त्वं युवा वासवतुल्यरूपः
स्वतेजसा दीप्यमानो यथाऽग्निः ।
पतस्युदीर्णाम्बुधरान्धकारा-
त्खात्खेचराणां प्रवरो यथाऽर्कः ॥ १-८२-७ (३६८९)
दृष्ट्वा च त्वां सूर्यपथात्पतन्तं
वैश्वानरार्कद्युतिमप्रमेयम् ।
किं नु स्विदेतत्पततीति सर्वे
वितर्कयन्तः परिमोहिताः स्मः ॥ १-८२-८ (३६९०)
दृष्ट्वा च त्वां धिष्ठितं देवमार्गे
शक्रार्कविष्णुप्रतिमप्रभावम् ।
अभ्युद्गतास्त्वां वयमद्य सर्वे
तत्त्वं प्रपाते तव जिज्ञासमानाः ॥ १-८२-९ (३६९१)
न चापि त्वां धृष्णुमः प्रष्टुमग्रे
न च त्वमस्मान्पृच्छसि ये वयं स्मः ।
तत्त्वां पृच्छामि स्पृहणीयरूप
कस्य त्वं वा किंनिमित्तं त्वमागाः ॥ १-८२-१० (३६९२)
भयं तु ते व्येतु विषादमोहौ
त्यजाशु चैवेन्द्रसमप्रभाव ।
त्वां वर्तमानं हि सतां सकाशे
नालं प्रसोढुं बलहाऽपि शक्रः ॥ १-८२-११ (३६९३)
सन्तः प्रतिष्ठा हि सुखच्युतानां

सतां सदैवामरराजकल्प ।
ते सङ्गताः स्थावरजङ्गमेशाः
प्रतिष्ठितस्त्वं सदृशेषु सत्सु ॥ १-८२-१२ (३६९४)
प्रभुरग्निः प्रतपने भूमिरावपने प्रभुः ।
प्रभुः सूर्यः प्रकाशित्वे सतां चाभ्यागतः प्रभुः ॥ ॥ १-८२-१३ (३६९५)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि द्व्यशीतितमोऽध्यायः
॥ ८२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-८२-३ अवमंस्थाः सर्वेभ्य आत्मन आधिक्योक्त्या । सदृशः सदृशान् ॥
१-८२-५ यत्र पतिता प्रतिष्ठां लब्धासि लप्स्यसि ॥
१-८२-१० धुष्णुमः प्रगल्भामहे ॥
१-८२-१३ आवपने संग्रहे बीजावापे वा ॥
द्व्यशीतितमोऽध्यायः ॥
८२ ॥

आदिपर्व - अध्याय ०८३
॥ श्रीः ॥
१.८३. अध्यायः ८३

Mahabharata - Adi Parva - Chapter Topics
ययातेः स्वनामकथनपूर्वकं अष्टकेन सह संवादः ॥ १ ॥
तत्र ययातिना स्वस्य स्वर्गादधःपतनकारणकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-८३-० (३६९६)
ययातिरुवाच। १-८३-०क्ष् (४९८)
अहं ययातिर्नहुषस्य पुत्रः
पूरोः पिता सर्वभूतावमानात् ।
प्रभ्रंशितः सुरसिद्धर्षिलोका-
त्परिच्युतः प्रपताम्यल्पपुण्यः ॥ १-८३-१ (३६९७)
अहं हि पूर्वो वयसा भवद्भ्य-
स्तेनाभिवादं भवतां न प्रयुञ्जे ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥ १-८३-२ (३६९८)

अष्टक उवाच। १-८३-३क्ष् (४९९)
अवादीस्त्वं वयसा यः प्रवृद्धः
स वै राजन्नाभ्यधिकः कथ्यते च ।
यो विद्यया तपसा संप्रवृद्धः
स एव पूज्यो भवति द्विजानाम् ॥ १-८३-३ (३६९९)
ययातिरुवाच। १-८३-४क्ष् (५००)
प्रतिकूलं कर्मणां पापमाहु-
स्तद्वर्ततेऽप्रवणे पापलोक्यम् ।
सन्तोऽसतां नानुवर्तन्ति चैत-
द्यथा चैषामनुकूलास्तथाऽऽसन् ॥ १-८३-४ (३७००)
अभूद्धनं मे विपुलं गतं त-
द्विचेष्टमानो नाधिगन्ता तदस्मि ।
एवं प्रधार्यात्महिते निविष्टो
यो वर्तते स विजानाति जीवः ॥ १-८३-५ (३७०१)
महाधनो यो यजते सुयज्ञै-
र्यः सर्वविद्यासु विनीतबुद्धिः ।
वेदानधीत्य तपसा योज्य देहं
दिवं स यायात्पुरुषो वीतमोहः ॥ १-८३-६ (३७०२)
न जातु हृष्येन्महता धनेन
वेदानधीयीतानहंकृतः स्यात् ।
नानाभावा बहवो जीवलोके
दैवाधीना नष्टचेष्टाधिकाराः ।
तत्तत्प्राप्य न विहन्येत धीरो
दिष्टं बलीय इति मत्वाऽऽत्मबुद्ध्या ॥ १-८३-७ (३७०३)
सुखं हि जन्तुर्यदि वाऽपि दुःखं
दैवाधीनं विन्दते नात्मशक्त्या ।
तस्माद्दिष्टं बलवन्मन्यमानो
न संज्वरेन्नापि हृष्येत्कथंचित् ॥ १-८३-८ (३७०४)
दुःखैर्न तप्येन्न सुखैः प्रहृष्ये-
त्समेन वर्तेत सदैव धीरः ।
दिष्टं बलीय इति मन्यमानो
न संज्वरेन्नापि हृष्येत्कथंचित् ॥ १-८३-९ (३७०५)
भये न मुह्याम्यष्टकाहं कदाचि-
त्सन्तापो मे मानसो नास्ति कश्चित् ।
धाता यथा मां विदधीत लोके
ध्रुवं तथाऽहं भवितेति मत्वा ॥ १-८३-१० (३७०६)

संस्वेदजा अण्डजाश्चोद्भिदश्च
सरीसृपाः कृमयोऽथाप्सु मत्स्याः ।
तथाश्मनस्तृणकाष्ठं च सर्वे
दिष्टक्षये स्वां प्रकृतिं भजन्ति ॥ १-८३-११ (३७०७)
अनित्यतां सुखदुःखस्य बुद्ध्वा
कस्मात्संतापमष्टकाहं भजेयम् ।
किं कुर्यां वै किं च कृत्वा न तप्ये
तस्मात्सन्तापं वर्जयाम्यप्रमत्तः ॥ १-८३-१२ (३७०८)
वैशम्पायन उवाच। १-८३-१३क्ष् (५०१)
एवं ब्रुवाणं नृपतिं ययाति-
मथाष्टकः पुनरेवान्वपृच्छत् ।
मातामहं सर्वगुणोपपन्नं
तत्रस्थितं स्वर्गलोके यथावत् ॥ १-८३-१३ (३७०९)
अष्टक उवाच। १-८३-१४क्ष् (५०२)
ये ये लोकाः पार्थिवेन्द्रप्रधाना-
स्त्वया भुक्ता यं च कालं यथावत् ।
तान्मे राजन्ब्रूहि सर्वान्यथाव-
त्क्षेत्रज्ञवद्भाषसे त्वं हि धर्मान् ॥ १-८३-१४ (३७१०)
ययातिरुवाच। १-८३-१५क्ष् (५०३)
राजाऽहमासमिह सार्वभौम-
स्ततो लोकान्महतश्चाजयं वै ।
तत्रावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १-८३-१५ (३७११)
ततः पुरीं पुरुहूतस्य रम्यां
सहस्रद्वारां शतयोजनायताम् ।
अध्यावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १-८३-१६ (३७१२)
ततो दिव्यमजरं प्राप्य लोकं
प्रजापतेर्लोकपतेर्दुरापम् ।
तत्रावसं वर्षसहस्रमात्रं
ततो लोकं परमस्म्यभ्युपेतः ॥ १-८३-१७ (३७१३)
स देवदेवस्य निवेशने च
विहृत्य लोकानवसं यथेष्टम् ।
संपूज्यमानस्त्रिदशैः समस्तै-
स्तुल्यप्रभावद्युतिरीश्वराणाम् ॥ १-८३-१८ (३७१४)
तथाऽऽवसं नन्दने कामरूपी

संवत्सराणामयुतं शतानाम् ।
सहाप्सरोभिर्विहरन्पुण्यगन्धा-
न्पश्यन्नगान्पुष्पितांश्चारुरूपान् ॥ १-८३-१९ (३७१५)
तत्र स्थितं मां देव सुखेषु सक्तं
कालेऽतीते महति ततोऽतिमात्रम् ।
दूतो देवानामब्रवीदुग्ररूपो
ध्वंसेत्युच्चैस्त्रिः प्लुतेन स्वरेण ॥ १-८३-२० (३७१६)
एतावन्मे विदितं राजसिंह
ततो भ्रष्टोऽहं नन्दनात्क्षीणपुण्यः ।
वाचोऽश्रौषं चान्तरिक्षे सुराणां
सानुक्रोशाः शोचतां मां नरेन्द्र ॥ १-८३-२१ (३७१७)
अहो कष्टं क्षीणपुण्यो ययातिः
पतत्यसौ पुण्यकृत्पुण्यकीर्तिः ।
तानब्रुवं पतमानस्ततोऽहं
सतां मध्ये निपतेयं कथं नु ॥ १-८३-२२ (३७१८)
तैराख्याता भवतां यज्ञभूमिः
समीक्ष्य चेमां त्वरितमुपागतोऽस्मि ।
हविर्गन्धं देशिकं यज्ञभूमे-
र्धूमापाङ्गं प्रतिगृह्य प्रतीतः ॥ ॥ १-८३-२३ (३७१९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि त्र्यशीतितमोऽध्यायः
॥ ८३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८३-२ ययातिरपनीततपोविद्यागर्वत्वाद्वयोज्यैष्ठ्यमेव पुरस्कृत्याह
। अहं हीति। तदेवोपपादयत्युत्तरार्धेन ॥
१-८३-३ तदसहमानोऽष्टक आह । अवादीरिति। त्वं च
विद्यातपःसंप्रवृद्ध इति भावः ॥
१-८३-४ विद्यातपसोः श्रैष्ठ्ये अष्टकेन स्तुते तत्र स्वानुभूतं
विघ्नं दर्शयन्ययातिरुवाच । प्रतिकूलमिति। कर्मणां पुण्यानां
प्रतिकूलं नाशकं पापं गर्वस्तच्चाप्रवणेऽनम्रे दर्पवति
वर्तते। पापलोक्यं नरकप्रदम्। एतत्पापमसतां संबन्धि सन्तो
नानुवर्तन्ते इदानीमपि। किंच प्राञ्चोपि सन्तो यथैषां कर्मणामनुकूला
उपबृंहकाः स्युस्तथा तेन प्रकारेण दम्भदर्पादिराहित्येन आसन्। अहं
त्वत द्विधत्वात्स्वर्गादिन्द्रेण च्यावित इत्याशयः ॥
१-८३-५ तद्दम्भादिराहित्येन प्रसिद्धं धनं पुण्यं मे मम विपुलं

यदभूत्तद्गतं नष्टं दर्पादित्यर्थः ।पुनरिदानीं तच्चेष्टमानोऽपि
तत्पुनर्नाधिगन्तास्मि।एवं प्रधार्य मामिकां गतिं ज्ञात्वा य आत्महिते
निविष्टो यो वर्तते स धीरो जानाति नान्य इत्यर्थः ॥
१-८३-७ एतदेवाह ।न जात्विति धनेन तपसा तर्हि त्वमे
कुतोऽहंकारं कृतवानित्यत आह।नानेति।जीवलोकेऽस्मिन्
जीवा नानाभावाः पृथक्स्वभावाः केचिद्धर्मरुचयः
केचिद्विपरीताः।यतो दैवाधीनाः।अतएव नष्टा वृथाभूता
चेष्टा उद्योगोऽधिकारः सामर्थ्यं च येषां ते तथा।दृष्टा इति
शेषः।मूढानां पुण्ये पण्डितानां पापे च प्रवृत्तिकरं दैवमेव
बलवदित्यर्थः।एवं विद्वांस्तत्तत्प्राप्य तत्सुखं दुःखं वा प्राप्य
न विहन्येत।हर्षविषादाभ्यामात्मानं न हिंस्यादित्यर्थः ॥
१-८३-८ एतदेव विवृणोति ।सुखं हीति द्वाभ्याम् ॥
१-८३-१० भयं तु ते व्येतु विषादमोहाविति यदष्टकेनोक्तं
तत्रोत्तरमाह ।भये इति।धाता दिष्टं ॥
१-८३-११ अहमिवान्येऽपि दिष्टाधीना एवेत्याह ।संस्वेदजा
इति।एतेपि दिष्टक्षये पुण्यपापानुभवानन्तरम्।स्वां प्रकृतिं
स्वकर्मशेषानुगुणां योनिं भजन्ति प्राप्नुवन्ति ॥
१-८३-१२ अहं तु दिष्टक्षयाभावात्प्राप्तेपि दुःखे न तप्ये इत्याह
।अनित्यतामिति ॥
१-८३-१४ क्षेत्रज्ञवत् ज्ञानिवत् ॥
१-८३-२३ तैरिति ।देशिकमुपदेष्टारमिव स्थितं।हविषां गन्धो
यत्र तं धूमापाङ्गं धूमप्रान्तं प्रतिगृह्य आघ्राय प्रतीतः
जातप्रत्ययः ॥
त्र्यशीतितमोऽध्यायः ॥
८३ ॥

आदिपर्व - अध्याय ०८४
॥ श्रीः ॥
१.८४. अध्यायः ८४

Mahabharata - Adi Parva - Chapter Topics
मृतस्य स्वर्गादिभोगानन्तरं पुनर्जननप्रकारकथनम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-८४-० (३७२०)
अष्टक उवाच।१-८४-०क्ष् (५०४)

यदाऽवसो नन्दने कामरूपी
संवत्सराणामयुतं शतानाम् ।
किं कारणं कार्तयुगप्रधान
हित्वा च त्वं वसुधामन्वपद्यः ॥ १-८४-१ (३७२१)
ययातिरुवाच। १-८४-२क्ष् (५०५)
ज्ञातिः सुहृत्स्वजनो वा यथेह
क्षीणे वित्ते त्यज्यते मानवैर्हि ।
तथा तत्र क्षीणपुण्यं मनुष्यं
त्यजन्ति सद्यः सेश्वरा देवसङ्घाः ॥ १-८४-२ (३७२२)
अष्टक उवाच। १-८४-३क्ष् (५०६)
तस्मिन्कथं क्षीणपुण्या भवन्ति
संमुह्यते मेऽत्र मनोऽतिमात्रम् ।
किं वा विशिष्टाः कस्य धामोपयान्ति
तद्वै ब्रूहि क्षेत्रवित्त्वं मतो मे ॥ १-८४-३ (३७२३)
ययातिरुवाच। १-८४-४क्ष् (५०७)
इमं भौमं नरकं ते पतन्ति
ललाप्यमाना नरदेव सर्वे ।
ते कङ्कगोमायुबलाशनार्थे
क्षीणे पुण्ये बहुधा प्रव्रजन्ति ॥ १-८४-४ (३७२४)
तस्मादेतद्वर्जनीयं नरेन्द्र
दुष्टं लोके गर्हणीयं च कर्म ।
आख्यातं ते पार्थिव सर्वमेव
भूयश्चेदानीं वद किं ते वदामि ॥ १-८४-५ (३७२५)
अष्टक उवाच। १-८४-६क्ष् (५०८)
यदा तु तान्वितुदन्ते वयांसि
तथा गृध्राः शितिकण्ठाः पतङ्गाः ।
कथं भवन्ति कथमाभवन्ति
न भौममन्यं नरकं शृणोमि ॥ १-८४-६ (३७२६)
ययातिरुवाच। १-८४-७क्ष् (५०९)
ऊर्ध्वं देहात्कर्मणो जृम्भमाणा-
द्व्यक्तं पृथिव्यामनुसंचरन्ति ।
इमं भौमं नरकं ते पतन्ति
नावेक्षन्ते वर्षपूगाननेकान् ॥ १-८४-७ (३७२७)
षष्टिं सहस्राणि पतन्ति व्योम्नि
तथा अशीतिं परिवत्सराणि ।
तान्वै तुदन्ति पततः प्रपातं

भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ॥ १-८४-८ (३७२८)
अष्टक उवाच। १-८४-९क्ष् (५१०)
यदेनसस्ते पततस्तुदन्ति
भीमा भौमा राक्षसास्तीक्ष्णदंष्ट्राः ।
कथं भवन्ति कथमाभवन्ति
कथंभूता गर्भभूता भवन्ति ॥ १-८४-९ (३७२९)
ययातिरुवाच। १-८४-१०क्ष् (५११)
अस्रं रेतः पुष्पफलानुपृक्त-
मन्वेति तद्वै पुरुषेण सृष्टम् ।
स वै तस्या रज आपद्यते वै
स गर्भभूतः समुपैति तत्र ॥ १-८४-१० (३७३०)
वनस्पतीनोषधीश्चाविशन्ति
आपो वायुं पृथिवीं चान्तरिक्षम् ।
चतुष्पदं द्विपदं चाति सर्व-
मेवंभूता गर्भभूता भवन्ति ॥ १-८४-११ (३७३१)
अष्टक उवाच। १-८४-१२क्ष् (५१२)
अन्यद्वपुर्विदधातीह गर्भ-
मुताहोस्वित्स्वेन कायेन याति ।
आपद्यमानो नरयोनिमेता-
माचक्ष्व मे संशयात्प्रब्रवीमि ॥ १-८४-१२ (३७३२)
शरीरदेहातिसमुच्छ्रयं च
चक्षुःश्रोत्रे लभते केन संज्ञाम् ।
एतत्तत्त्वं सर्वमाचक्ष्व पृष्टः
क्षेत्रज्ञं त्वां तात मन्याम सर्वे ॥ १-८४-१३ (३७३३)
ययातिरुवाच। १-८४-१४क्ष् (५१३)
वायुः समुत्कर्षति गर्भयोनि-
मृतौ रेतः पुष्पफलानुपृक्तम् ।
स तत्र तन्मात्रकृताधिकारः
क्रमेण संवर्धयतीह गर्भम् ॥ १-८४-१४ (३७३४)
स जायमानो विगृहीतमात्रः
संज्ञामधिष्ठाय ततो मनुष्यः ।
स श्रोत्राभ्यां वेदयतीह शब्दं
स वै रूपं पश्यति चक्षुषा च ॥ १-८४-१५ (३७३५)
घ्राणेन गन्धं जिह्वयाऽथो रसं च
त्वचा स्पर्शं मनसा वेदभावम् ।
इत्यष्टकेहोपहितं हि विद्धि

महात्मनः प्राणभृतः शरीरे ॥ १-८४-१६ (३७३६)
अष्टक उवाच। १-८४-१७क्ष् (५१४)
यः संस्थितः पुरुषो दह्यते वा
निखन्यते वापि निकृष्यते वा ।
अभावभूतः स विनाशमेत्य
केनात्मानं चेतयते परस्तात् ॥ १-८४-१७ (३७३७)
ययातिरुवाच। १-८४-१८क्ष् (५१५)
हित्वा सोऽसून्सुप्तवन्निष्टनित्वा
पुरोधाय सुकृतं दुष्कृतं वा ।
अन्यां योनिं पवनाग्रानुसारी
हित्वा देहं भजते राजसिंह ॥ १-८४-१८ (३७३८)
पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ॥ १-८४-१९ (३७३९)
चतुष्पदा द्विपदाः षट्पदाश्च
तथाभूता गर्भभूता भवन्ति ।
आख्यातमेतन्निखिलेन सर्वं
भूयस्तु किं पृच्छसि राजसिंह ॥ १-८४-२० (३७४०)
अष्टक उवाच। १-८४-२१क्ष् (५१६)
किंस्वित्कृत्वा लभते तात लोका-
न्मर्त्यः श्रेष्ठांस्तपसा विद्यया च ।
तन्मे पृष्टः शंस सर्वं यथाव-
च्छुभाँल्लोकान्येन गच्छेत्क्रमेण ॥ १-८४-२१ (३७४१)
ययातिरुवाच। १-८४-२२क्ष् (५१७)
तपश्च दानं च शमो दमश्च
ह्रीरार्जवं सर्वभूतानुकम्पा ।
स्वर्गस्य लोकस्य वदन्ति सन्तो
द्वाराणि सप्तैव महान्ति पुंसाम् ।
नश्यन्ति मानेन तमोऽभिभूताः
पुंसः सदैवेति वदन्ति सन्तः ॥ १-८४-२२ (३७४२)
अधीयानः पण्डितंमन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
तस्यान्तवन्तश्च भवन्ति लोका
न चास्य तद्ब्रह्म फलं ददाति ॥ १-८४-२३ (३७४३)
चत्वारि कर्माण्यभयङ्कराणि

भयं प्रयच्छन्त्ययथाकृतानि ।
मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ॥ १-८४-२४ (३७४४)
न मानमान्यो मुदमाददीत
न सन्तापं प्राप्नुयाच्चावमानात् ।
सन्तः सतः पूजयन्तीह लोके
नासाधवः साधुबुद्धिं लभन्ते ॥ १-८४-२५ (३७४५)
इति दद्यामिति यज इत्यदीय इति व्रतम् ।
इत्येतानि भयान्याहुस्तानि वर्ज्यानि सर्वशः ॥१-८४-२६ (३७४६)
ये चाश्रयं वेदयन्ते पुराणं
मनीषिणो मानसमार्गरुद्धम् ।
तन्निःश्रेयस्तेन संयोगमेत्य
परां शान्तिं प्रत्युः प्रेत्य चेह ॥ ॥ १-८४-२७ (३७४७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुरशीतितमोऽध्यायः ॥८४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-८४-१ कार्तयुगप्रधाना कृतयुगे भवाः कार्तयुगा
अत्यन्तनिष्पापास्तेषां मुख्यतमेत्यर्थः ॥
१-८४-३ तत्र क्षीणपुण्याः कथं किंप्रकारा भवन्ति ।ततश्च
किंविशिष्टाः कीदृसाः सन्तः कस्य धाम स्थानं यान्ति कं लोकं
यान्तीत्यर्थः ॥
१-८४-४ तत्र कस्य धामेत्यस्योत्तरं इमं भौममिति ।पुण्ये क्षीणे
सति नरकं नरकोपमं बौमं भूसम्बन्धिनं इमं लोकं प्रति
पतन्ति। कथं भवन्तीत्यस्योत्तरं ते कङ्केति। कङ्काश्च
गोमायवश्च तेषां बलं सङ्घः तस्या शनार्थे
अशनविषयीभूतैतद्देहरक्षणार्थे बहुधा प्रव्रजन्ति पर्यटन्ति ॥
१-८४-५ तस्मादेतत्काम्यकर्म दुष्टं विषिद्धं गर्हणीयम् ॥
१-८४-६ ननु कङ्कादिभक्षितस्य कथं स्वरूपसत्ता कथं वा
शरीरान्तरेणाविर्भाव इति देहात्मवादमाश्रित्य शङ्कते ।भौमो
नरकश्च क इति पृच्छति च। यदा तु तानिति ॥
१-८४-७ ऊर्ध्वं देहात् देहक्षयानन्तरम् ।जृम्भमाणात्प्रबुद्धात्कर्मणो
हेतोः व्यक्तं स्थूलं शरीरं अनु अनुप्रविश्य जीवाः संचरन्ति
कर्मफलानि भुञ्जते इति यत् तदेव भौमो नरकः। कुतोऽस्य
नरकत्वमत आह। नावेक्षन्ते वर्षपूगाननेकान् यस्मादत्र पतिता

गतं वयो न बुध्यन्ते कर्मभूमिं प्राप्यापि स्वहिताय न यतन्तेऽत इत्यर्थः। एतेन कङ्कादिभक्षितस्यापि सत्वं देहयोगश्चास्तीत्युक्तम् ॥
१-८४-८ षष्टिं सहस्राण्यशीतिं च सहस्राणि परिवत्सराणि व्योम्नि स्वर्गे स्थित्वा पतन्ति । दारादयो भौमा राक्षसाः। पातं भूमिस्थितिं प्रपततः अनुभवतः ॥
१-८४-९ यत् यान् एनसः पापाद्धेतोः पततः स्वर्गाद्ध्यवमानान् ते राक्षसास्तुदन्ति ते पुरुषाः कथं भवन्ति प्रपातभ्रष्टा इव कथं न शीर्यन्ते । कथं वा आभवन्ति इन्द्रियादिमन्तो भवन्ति। कथं वा गर्भत्वं प्राप्नुवन्तीति प्रश्नत्रयम् ॥
१-८४-१० रेतः कर्तृ । अस्रं स्त्रीरजः कर्मभूतं अन्वेति। तद्द्वयं पुष्पफलादिभावेनानुपृक्तं कललादिरूपं भवति। तत् आहारादिवत्कथं न जीर्यत इत्यत आह। पुरुषेणेति। ईश्वरेणेत्यर्थः। रजः तदुपलक्षितान् धातून्। समुपैति दुःखादीनीति शेषः ॥
१-८४-११ मात्रुदरपर्यन्तं प्रवेशक्रममाह । वनस्पतीति ॥
१-८४-१२ नरयोनिमापद्यमानो जीवः स्वेन कायेन जैवेनैव रूपेण गर्भं मातुरुदरं याति उत तत्र प्रवेष्टुमन्यद्वपुर्विदधाति ॥
१-८४-१३ शरीरदेहातिसमुच्छ्रयं मातुः शरीरे गर्भदेहस्यातिसमुच्छ्रयं वृद्धिम् । चक्षुःश्रोत्रे इतीन्द्रियमात्रोपलक्षणम् ॥
१-८४-१४ देहसमुच्छ्रयक्रममाह । वायुरिति। ऋतौ तत्काले वायुः गर्भयोनिं अस्रं प्रति रेतः समुत्कर्षति प्रापयति। ततश्च पुष्पफलानुपृक्तं कललादिरूपगर्भं सएव तत्र गर्भाशये क्रमेण संवर्धयति। कथंभूतः तन्मात्रे वृद्धिमात्रएव कृताधिकारः समर्थः ॥
१-८४-१५ स जीवः विगृहीता मात्रा सूक्ष्मशरीरं येन सः ॥
१-८४-१६ श्रोत्रादिकं इत्युपहितं संबद्धं विद्धि ॥
१-८४-१७ देहात्मवादेन पुनः शङ्कते । यः संस्थित इति। परस्तात् आत्मानं केन कारणेन चेतयते जानाति। देहातिरिक्तजीवाभावादिति बावः ॥
१-८४-१८ जीवो देहाद्भिन्नः पूर्वदेहं त्यक्त्वा सूक्ष्मदेहेन देहान्तरं प्राप्नोतीत्याह । हित्वेति। पवनाग्रानुसारी आतिवाहिकपवनानुसारी ॥
१-८४-१९ कर्मानुसारेण योनिप्राप्तिमाह । पुण्यामिति ॥
१-८४-२१ किंस्वित्कृत्वेति सामान्यप्रश्नः । तपसा विद्ययेति विशेषप्रश्नः। चो वार्थे ॥
१-८४-२२ पुंसः पुमांसः ॥
१-८४-२३ दर्पवता कृतमध्ययनादि न मोक्षोपयोगि नापि स्वर्गदं प्रत्युत भयावहमित्याह द्वाभ्याम् । अधीयान इति ॥

१-८४-२५ अतो मानापमानादिद्वन्द्वसहिष्णुर्भवेदित्याह ।न मानमान्य इति ॥
१-८४-२६ इति दद्यामिति दाम्भिकस्य स्वधर्मप्रकाशनाभिनयः ॥
१-८४-२७ मानसमार्गरुद्धं ध्यानविषयीभूतं ।वेदयन्ते
जानन्ति। तद्वेदनं निःश्रेयः सुखसाधनम् ॥
चतुरशीतितमोऽध्यायः ॥
८४ ॥

आदिपर्व - अध्याय ०८५
॥ श्रीः ॥
१.८५. अध्यायः ८५

Mahabharata - Adi Parva - Chapter Topics
ब्रह्मचर्याद्याश्रमविषयकाष्टकययातिप्रश्नप्रतिवचनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८५-० (३७४८)
अष्टक उवाच। १-८५-०क्ष् (५१८)
चरन्गृहस्थः कथमेति धर्मा-
न्कथं भिक्षुः कथमाचार्यकर्मा ।
वानप्रस्थः सत्पथे सन्निविष्टो
बहून्यस्मिन्संप्रति वेदयन्ति ॥ १-८५-१ (३७४९)
ययातिरुवाच। १-८५-२क्ष् (५१९)
आहूताध्यायी गुरुकर्मस्वचोद्यः
पूर्वोत्थायी चरमं चोपशायी ।
मृदुर्दान्तो धृतिमानप्रमत्तः
स्वाध्यायशीलः सिध्यति ब्रह्मचारी ॥ १-८५-२ (३७५०)
धर्मागतं प्राप्य धनं यजेत
दद्यात्सदैवातिथीन्भोजयेच्च ।
अनाददानश्च परैरदत्तं
सैषा गृहस्थोपनिषत्पुराणी ॥ १-८५-३ (३७५१)
स्ववीर्यजीवी वृजिनान्निवृत्तो
दाता परेभ्यो न परोपतापी ।
तादृङ्मुनिः सिद्धिमुपैति मुख्यां
वसन्नरण्ये नियताहारचेष्टः ॥ १-८५-४ (३७५२)
अशिल्पजीवी गुणवांश्चैव नित्यं
जितेन्द्रियः सर्वतो विप्रयुक्तः ।

अनोकशायी लघुरल्पप्रसार-
श्चरन्देशानेकचरः स भिक्षुः ॥ १-८५-५ (३७५३)
रात्र्या यया वाऽभिजिताश्च लोका
भवन्ति कामाभिजिताः सुखाश्च ।
तामेव रात्रिं प्रयतेत विद्वा-
नरण्यसंस्थो भवितुं यतात्मा ॥ १-८५-६ (३७५४)
दशैव पूर्वान्दश चापरांश्च
ज्ञातीनथात्मानमथैकविंशम् ।
अरण्यवासी सुकृते दधाति
विमुच्यारण्ये स्वशरीरधातून् ॥ १-८५-७ (३७५५)
अष्टक उवाच। १-८५-८क्ष् (५२०)
कतिस्विदेव मुनयः कति मौनानि चाप्युत ।
भवन्तीति तदाचक्ष्व श्रोतुमिच्छामहे वयम् ॥ १-८५-८ (३७५६)
ययातिरुवाच। १-८५-९क्ष् (५२१)
अरण्ये वसतो यस्य ग्रामो भवति पृष्ठतः ।
ग्रामे वा वसतोऽरण्यं स मुनिः स्याज्जनाधिप ॥ १-८५-९ (३७५७)
अष्टक उवाच। १-८५-१०क्ष् (५२२)
कथंस्विद्वसतोऽरण्ये ग्रामो भवति पृष्ठतः ।
ग्रामे वा वसतोऽरण्यं कथं भवति पृष्ठतः ॥ १-८५-१० (३७५८)
ययातिरुवाच। १-८५-११क्ष् (५२३)
न ग्राम्यमुपयुञ्जीत य आरण्यो मुनिर्भवेत् ।
तथास्य वसतोऽरण्ये ग्रामो भवति पृष्ठतः ॥ १-८५-११ (३७५९)
अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ॥ १-८५-१२ (३७६०)
यावत्प्राणाभिसन्धानं तावदिच्छेच्च भोजनम् ।
तथाऽस्य वसतो ग्रामेऽरण्यं भवति पृष्ठतः ॥ १-८५-१३ (३७६१)
यस्तु कामान्परित्यज्य त्यक्तकर्मा जितेन्द्रियः ।
आतिष्ठेच्च मुनिर्मौनं स लोके सिद्धिमाप्नुयात् ॥ १-८५-१४ (३७६२)
धौतदन्तं कृत्तनखं सदा स्नातमलङ्कृतम् ।
असितं सितकर्माणं कस्तमर्हति नार्चितुम् ॥ १-८५-१५ (३७६३)
तपसा कर्शितः क्षामः क्षीणमांसास्थिशोणितः ।
स च लोकमिमं जित्वा लोकं विजयते परम् ॥ १-८५-१६ (३७६४)
यदा भवति निर्द्वन्द्वो मुनिर्मौनं समास्थितः ।
अथ लोकमिमं जित्वा लोकं विजयते परम् ॥ १-८५-१७ (३७६५)
आस्येन तु यदाऽहारं गोवन्मृगयते मुनिः ।
अथास्य लोकः सर्वोऽयं सोऽमृतत्वाय कल्पते ॥ १-८५-१८ (३७६६)

सामान्यधर्मः सर्वेषां क्रोधो लोभो द्रुहाऽक्षमा ।
विहाय मत्सरं शाठ्यं दर्पं दम्भं च पैशुनम् ।
क्रोधं लोभं ममत्वं च यस्य नास्ति स धर्मवित् ॥ १-८५-१९ (३७६७)
अष्टक उवाच। १-८५-२०क्ष् (५२४)
नित्याशनो ब्रह्मचारी गृहस्थो वनगो मुनिः ।
नाधर्ममशनात्प्राप्येत्कथं ब्रूहीह पृच्छते ॥ १-८५-२० (३७६८)
ययातिरुवाच। १-८५-२१क्ष् (५२५)
अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ॥ १-८५-२१ (३७६९)
इत्येवं कारणैर्ज्ञेयमष्टकैतच्छुभाशुभम् ॥ ॥ १-८५-२२ (३७७०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८५-१ अस्मिन्धर्मे विषये बहूनि प्राप्तिद्वाराणि वेदयन्ति वैदिकाः ॥
१-८५-४ स्ववीर्यजीवी स्वप्रयत्नलब्धजीविकः ॥
१-८५-५ अनोकशायी यत्र क्वचनशायी । लघुः परिग्रहशून्यः ॥
१-८५-६ तामेव रात्रिं तदैव सर्वपरिग्रहं संन्यस्य अरण्यसंस्थो भवितुं प्रयतेत ॥
१-८५-८ संन्यासः कतिधेति पृच्छति । कतिस्विदिति ॥
१-८५-९ संन्यासं चतुष्प्रकारमभिप्रेत्य प्रथमं कुटीचकबहूदकरूपं भेदद्वयमाह । अरण्येति ॥
१-८५-१० ग्रामारण्ययोः पृष्ठतःकरणं कथमिति पृच्छति । कथमिति ॥
१-८५-११ कुटीचकं विशिनष्टि । न ग्राम्यमिति ॥
१-८५-१२ बहूदकं विशिनष्टि । अनग्निरिति ॥
१-८५-१४ हंसपरमहंसौ प्रस्तौति । यस्त्विति ॥
१-८५-१५ धौतदन्तं शुद्धाहारम् । कृत्तनखं त्यक्तहिंसासाधनम्। सदा स्नातं नित्यं शुद्धचित्तम्। अलंकृतं शमादिना। असितं बन्धरहितम्। सितकर्माणं शुद्धकर्माणम् ॥
१-८५-१८ आस्यस्य यावदपेक्षितं तावदेव मृगयते नतु परदिनार्थणार्जयतीत्यर्थः ॥
पञ्चाशीतितमोऽध्यायः ॥
८५ ॥

आदिपर्व - अध्याय ०८६
॥ श्रीः ॥

१.८६. अध्यायः ८६

Mahabharata - Adi Parva - Chapter Topics
स्वर्गाच्च्युतस्य ययातेरष्टकादियज्ञभूमिं प्रत्यागमननिमित्तकथनम्
॥ १ ॥
अष्टकप्रतर्दनयोर्ययातिना संवादः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-८६-० (३७७१)
अष्टक उवाच। १-८६-०क्ष् (५२६)
कतरस्त्वनयोः पूर्वं देवानामेति साम्यताम् ।
उभयोर्धावतो राजन्सूर्याचन्द्रमसोरिव ॥ १-८६-१ (३७७२)
ययातिरुवाच। १-८६-२क्ष् (५२७)
अनिकेतो गृहस्थेषु कामवृत्तेषु संयतः ।
ग्राम एव वसन्भिक्षुस्तयोः पूर्वतरं गतः ॥ १-८६-२ (३७७३)
अप्राप्य दीर्घमायुस्तु यः प्राप्तो विकृतिं चरेत् ।
तप्यते यदि तत्कृत्वा चरेत्सोऽन्यत्तपस्ततः ॥ १-८६-३ (३७७४)
पापानां कर्मणां नित्यं बिभीयाद्यस्तु मानवः ।
सुखमप्याचरन्नित्यं सोऽत्यन्तं सुखमेधते ॥ १-८६-४ (३७७५)
यद्वै नृशंसं तदसत्यमाहु-
र्यः सेवते धर्ममनर्थबुद्धिः ।
अस्वोऽप्यनीशश्च तथैव राजं-
स्तदार्जवं स समाधिस्तदार्यम् ॥ १-८६-५ (३७७६)
अष्टक उवाच। १-८६-६क्ष् (५२८)
केनासि हूतः प्रहितोऽसि राज-
न्युवा स्रग्वी दर्शनीयः सुवर्चाः ।
कुतश्च आयातः कतरस्यां दिशि त्व-
मुताहोस्वित्पार्थिवं स्थानमस्ति ॥ १-८६-६ (३७७७)
ययातिरुवाच। १-८६-७क्ष् (५२९)
इमं भौमं नरकं क्षीणपुण्यः
प्रवेष्टुमुर्वीं गगनाद्विप्रहीणः ।
गविद्वांश्चैवं मतिमानार्यबुद्धि-
र्ममाभवत्कर्मलोक्यं च सर्वम्'।
उक्त्वाऽहं वः प्रपतिष्याम्यनन्तरं
त्वरन्ति मां लोकपा ब्राह्मणा ये ॥ १-८६-७ (३७७८)

सतां सकाशे तु वृतः प्रपात-
स्ते सङ्गता गुणवन्तश्च सर्वे ।
शक्राच्च लब्धो हि वरो मयैष
पतिष्यता भूमितलं नरेन्द्र ॥ १-८६-८ (३७७९)
अष्टक उवाच। १-८६-९क्ष् (५३०)
पृच्छामि त्वां मा प्रपत प्रपातं
यदि लोकाः पार्थिव सन्ति मेऽत्र ।
यद्यन्तरिक्षे यदि वा दिवि स्थिताः
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १-८६-९ (३७८०)
ययातिरुवाच। १-८६-१०क्ष् (५३१)
यावत्पृथिव्यां विहितं गवाश्वं
सहारण्यैः पशुभिः पार्वतैश्च ।
तावल्लोका दिवि ते संस्थिता वै
तथा विजानीहि नरेन्द्रसिंह ॥ १-८६-१० (३७८१)
अष्टक उवाच। १-८६-११क्ष् (५३२)
तांस्ते ददामि मा प्रपत प्रपातं
ये मे लोका दिवि राजेन्द्र सन्ति ।
यद्यन्तरिक्षे यदि वा दिवि श्रिता-
स्तानाक्रम क्षिप्रमपेतमोहः ॥ १-८६-११ (३७८२)
ययातिरुवाच। १-८६-१२क्ष् (५३३)
नास्मद्विधोऽब्राह्मणो ब्रह्मविच्च
प्रतिग्रहे वर्तते राजमुख्य ।
यथा प्रदेयं सततं द्विजेभ्य-
स्तथाऽददं पूर्वमहं नरेन्द्र ॥ १-८६-१२ (३७८३)
नाब्राह्मणः कृपणो जातु जीवे-
द्या चाप्यस्याऽब्राह्मणी वीरपत्नी ।
सोऽहं नैवाकृतपूर्वं चरेयं
विधित्समानः किमु तत्र साधुः ॥ १-८६-१३ (३७८४)
प्रतर्दन उवाच। १-८६-१४क्ष् (५३४)
पृच्छामि त्वां स्पृहणीयरूप
प्रतर्दनोऽहं यदि मे सन्ति लोकाः ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १-८६-१४ (३७८५)
ययातिरुवाच। १-८६-१५क्ष् (५३५)
सन्ति लोका बहवस्ते नरेन्द्र
अप्येकैकः सप्तसप्ताप्यहानि ।

मधुच्युतो घृतपृक्ता विशोका-
स्ते नान्तवन्तः प्रतिपालयन्ति ॥ १-८६-१५ (३७८६)
प्रतर्दन उवाच। १-८६-१६क्ष् (५३६)
तांस्ते ददानि मा प्रपत प्रपातं
ये मे लोकास्तव ते वै भवन्तु ।
यद्यन्तरिक्षे यदि वा दिवि श्रिता-
स्तानाक्रम क्षिप्रमपेतमोहः ॥ १-८६-१६ (३७८७)
ययातिरुवाच। १-८६-१७क्ष् (५३७)
न तुल्यतेजाः सुकृतं कामयेत
योगक्षेमं पार्थिव पार्थिवः सन् ।
दैवादेशादापदं प्राप्य विद्वां-
श्चरेन्नृशंसं न हि जातु राजा ॥ १-८६-१७ (३७८८)
धर्म्यं मार्गं यतमानो यशस्यं
कुर्यान्नृपो धर्ममवेक्षमाणः ।
न मद्विधो धर्मबुद्धिः प्रजान-
न्कुर्यादेवं कृपणं मां यथाऽऽत्थ ॥ १-८६-१८ (३७८९)
कुर्यादपूर्वं न कृतं यदन्यै-
र्विधित्समानः किमु तत्र साधु ।
ग्धर्माधर्मौ सुविनिश्चित्य सम्य-
क्कार्याकार्येष्वप्रमत्तश्चरेद्यः ॥ १-८६-१९ (३७९०)
स वै धीमान्सत्यसन्धः कृतात्मा
राजा भवेल्लोकपालो महिम्ना ।
यदा भवेत्संशयो धर्मकार्ये
कामार्थौ वा यत्र विन्दन्ति सम्यक् ॥ १-८६-२० (३७९१)
कार्यं तत्र प्रथमं धर्मकार्यं
यन्नो विरुध्यादर्थकामौ स धर्मः १-८६-२१ (३७९२)
वैशम्पायन उवाच।'
ब्रुवाणमेवं नृपतिं ययातिं
नृपोत्तमो वसुमानब्रवीत्तम् ॥ ॥ १-८६-२१क्ष् (५३८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि षडशीतितमोऽध्यायः
॥ ८६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८६-१ अनयोः कुटीचकबहूदकयोः ॥
१-८६-२ गृहस्थेषु शरीरस्थेष्विन्द्रियेषु ॥

१-८६-३ दीर्घमायुः प्राप्तः सिद्धिमप्राप्य यो विकृतिं पापं चरेत्
। तत्कृत्वा तप्येत यदि सोन्यत्तपः प्रायश्चित्तं चरेत् ॥
१-८६-४ कर्मणां सकाशात् बिभीयात् । सुखं यथेच्छम् ॥
१-८६-५ नृशंसं हिंस्रं यत्कर्म तदसत्यं असत्संबन्धि
। अनर्थबुद्धिः फलेच्छारहितः। अनीशः ईशत्वबुद्धिरहितः ॥
१-८६-६ केन कतरस्यां दिशि प्रहिहितोसीत्यन्वयः ॥
१-८६-७ विप्रहीणश्च्युतः । उक्त्वा आपृच्छ्य। वो युष्मान्। ब्राह्मणाः
ब्रह्मनियुक्ताः ॥
१-८६-१२ अब्राह्मणः ब्राह्मणेतरः ब्राह्मणस्यैव भिक्षावृत्तित्वात्
। ब्रह्मविद्वेदार्थवेत्। न वर्तते न प्रवर्तते। प्रत्युत पूर्वमददमेव
॥
१-८६-१३ कृपणो याचकः । या चाप्यस्य क्षत्रियस्य अब्राह्मणी
क्षत्रिया सापि कृपणा नजीवेत्। तद्विधित्समानः कर्तुमिच्छुः तत्र
तदा किमु साधुः स्यां अपितु नैवेत्यर्थः ॥
१-८६-१५ प्रत्येकं सप्तसप्ताप्यहानि सेविताः सन्तो नान्तवन्तः
। मधुच्युतः सुखस्रवः। घृतपृक्तास्तेजोयुक्ताः। ते त्वां
प्रतिपालयन्ति प्रतीक्षन्ते ॥
१-८६-१७ नृशंसं निन्द्यं ॥
१-८६-१९ अन्यै राजभिर्यत्प्रतिग्रहाख्यं न कृतं तदपूर्वम् ॥
षडशीतितमोऽध्यायः ॥
८६ ॥

आदिपर्व - अध्याय ०८७
॥ श्रीः ॥
१.८७. अध्यायः ८७

Mahabharata - Adi Parva - Chapter Topics
वसुमतः शिबेश्च ययातिना संवादः ॥ १ ॥
पुनरष्टकययातिसंवादः ॥ २ ॥
तत्रागतया माधव्या स्वपुत्रान्प्रति यया तेर्मातामहत्वकथनम् ॥ ३ ॥
तद्वचनेन ययातेरष्टकादिदत्तपुण्यस्वीकारपूर्वकमष्टकादिभिः सह
स्वर्गगमनम् ॥ ४ ॥
ययातिना मार्गे अष्टकादीन्प्रति विस्तरेण स्ववृत्तान्तकथनम् ॥ ५ ॥
ययात्युपाख्यानश्रवणादिफलकथनम् ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-८७-० (३७९३)
वसुमानुवाच। १-८७-०क्ष् (५३९)
पृच्छामि त्वां वसुमानौषदश्वि-
र्यद्यस्ति लोको दिवि मे नरेन्द्र ।
यद्यन्तरिक्षे प्रथितो महात्मन्
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १-८७-१ (३७९४)
ययातिरुवाच। १-८७-२क्ष् (५४०)
यदन्तरिक्षं पृथिवी दिशश्च
यत्तेजसा तपते भानुमांश्च ।
लोकास्तावन्तो दिवि संस्थिता वै
तेनान्तवन्तः प्रतिपालयन्ति ॥ १-८७-२ (३७९५)
वसुमानुवाच। १-८७-३क्ष् (५४१)
तांस्ते ददानि मा प्रपत प्रपातं
ये मे लोकास्तव ते वै भवन्तु ।
क्रीणीष्वैतांस्तृणकेनापि राज-
न्प्रतिग्रहस्ते यदि धीमन्प्रदुष्टः ॥ १-८७-३ (३७९६)
ययातिरुवाच। १-८७-४क्ष् (५४२)
न मिथ्याऽहं विक्रयं वै स्मरामि
वृथा गृहीतं शिशुकाच्छङ्कमानः ।
कुर्यां न चैवाकृतपूर्वमन्यै-
र्विधित्समानः किमु तत्र साधुः ॥ १-८७-४ (३७९७)
वसुमानुवाच। १-८७-५क्ष् (५४३)
तांस्त्वं लोकान्प्रतिपद्यस्व राज-
न्मया दत्तान्यदि नेष्टः क्रयस्ते ।
अहं न तान्वै प्रतिगन्ता नरेन्द्र
सर्वे लोकास्तव ते वै भवन्तु ॥ १-८७-५ (३७९८)
शिबिरुवाच। १-८७-६क्ष् (५४४)
पृच्छामि त्वां शिबिरौशीनरोऽहं
ममापि लोका यदि सन्तीह तात ।
यद्यन्तरिक्षे यदि वा दिवि श्रिताः
क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ॥ १-८७-६ (३७९९)
ययातिरुवाच। १-८७-७क्ष् (५४५)
यत्त्वं वाचा हृदयेनापि साधू-
न्परीप्समानान्नावमंस्था नरेन्द्र ।
तेनानन्ता दिवि लोकाः श्रितास्ते
विद्युद्रूपाः स्वनवन्तो महान्तः ॥ १-८७-७ (३८००)

शिबिरुवाच। १-८७-८क्ष् (५४६)
तांस्त्वं लोकान्प्रतिपद्यस्व राज-
न्मया दत्तान्यदि नेष्टः क्रयस्ते ।
न चाहं तान्प्रतिपत्स्ये ह दत्त्वा
यत्र गत्वा नानुशोचन्ति धीराः ॥ १-८७-८ (३८०१)
ययातिरुवाच। १-८७-९क्ष् (५४७)
यथा त्वमिन्द्रप्रतिमप्रभाव-
स्ते चाप्यनन्ता नरदेव लोकाः ।
तथाऽद्य लोके न रमेऽन्यदत्ते
तस्माच्छिबे नाभिनन्दामि दायम् ॥ १-८७-९ (३८०२)
अष्टक उवाच। १-८७-१०क्ष् (५४८)
न चेदेकैकशो राजँल्लोकान्नः प्रतिनन्दसि ।
सर्वे प्रदाय भवते गन्तारो नरकं वयम् ॥ १-८७-१० (३८०३)
ययातिरुवाच। १-८७-११क्ष् (५४९)
यदर्होऽहं तद्यतध्वं सन्तः सत्याभिनन्दिनः ।
अहं तन्नाभिजानामि यत्कृतं न मया पुरा ॥ १-८७-११ (३८०४)
अष्टक उवाच। १-८७-१२क्ष् (५५०)
कस्यैते प्रतिदृश्यन्ते रथाः पञ्च हिरण्मयाः ।
यानारुह्य नरो लोकानभिवाञ्छति शाश्वतान् ॥ १-८७-१२ (३८०५)
ययातिरुवाच। १-८७-१३क्ष् (५५१)
युष्मानेते वहिष्यन्ति रथाः पञ्च हिरण्मयाः ।
उच्चैः सन्तः प्रकाशन्ते ज्वलन्तोऽग्निशिखा इव ॥ १-८७-१३ (३८०६)
ग्वैशम्पायन उवाच। १-८७-१४क्ष् (५५२)
अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ।
हयस्य यानि चाङ्गानि संनिकृत्य यथाक्रमम् ॥ १-८७-१४ (३८०७)
होताऽध्वर्युरथोद्गाता ब्रह्मणा सह भारत ।
अग्नौ प्रास्यन्ति विधिवत्समस्ताः षोडशर्त्विजः ॥ १-८७-१५ (३८०८)
धूमगन्धं च पापिष्ठा ये जिघ्रन्ति नरा भुवि ।
विमुक्तपापाः पूतास्ते तत्क्षणेनाभवन्नराः ॥ १-८७-१६ (३८०९)
एतस्मिन्नन्तरे चैव माधवी सा तपोधना ।
मृगचर्मपरीताङ्गी परिधाय मृगत्वचम् ॥ १-८७-१७ (३८१०)
मृगैः परिचरन्ती सा मृगाहारविचेष्टिता ।
यज्ञवाटं मृगगणैः प्रविश्य भृशविस्मिता ॥ १-८७-१८ (३८११)
आघ्रायन्ती धूमगन्धं मृगैरेव चचार सा ।
यज्ञवाटमटन्ती सा पुत्रांस्तानपराजितान् ॥ १-८७-१९ (३८१२)
पश्यन्ती यज्ञमाहात्म्यं मुदं लेभे च माधवी ।

असंस्पृशन्तं वसुधां ययातिं नाहुषं यदा ॥ १-८७-२० (३८१३)
दिविष्ठं प्राप्तमाज्ञाय ववन्दे पितरं तदा ।
तदा वसुमनापृच्छन्मातरं वै तपस्विनीम् ॥ १-८७-२१ (३८१४)
भवत्या यत्कृतमिदं वन्दनं पादयोरिह ।
कोयं देवोपमो राजा याऽभिवन्दसि मे वद ॥ १-८७-२२ (३८१५)
माधव्युवाच। १-८७-२३क्ष् (५५३)
शृणुध्वं सहिताः पुत्रा नाहुषोयं पिता मम ।
ययातिर्मम पुत्राणां मातामह इति स्मृतः ॥ १-८७-२३ (३८१६)
पूरुं मे भ्रातरं राज्ये समावेश्य दिवं गतः ।
केन वा कारणेनैवमिह प्राप्तो महायशाः ॥ १-८७-२४ (३८१७)
वैशम्पायन उवाच। १-८७-२५क्ष् (५५४)
तस्यास्तद्वचनं श्रुत्वा स्वर्गाद्भ्रष्टेति चाब्रवीत् ।
सा पुत्रस्य वचः श्रुत्वा संभ्रमाविष्टचेतना ॥ १-८७-२५ (३८१८)
माधवी पितरं प्राह दौहित्रपरिवारितम् ।
तपसा निर्जिताँल्लोकान्प्रतिगृह्णीष्व मामकान् ॥ १-८७-२६ (३८१९)
पुत्राणामिव पौत्राणां धर्मादधिगतं धनम् ।
स्वार्थणेव वदन्तीह ऋषयो धर्मपाठकाः ।
तस्माद्दानेन तपसा चास्माकं दिवमाव्रज ॥ १-८७-२७ (३८२०)
ययातिरुवाच। १-८७-२८क्ष् (५५५)
यदि धर्मफलं ह्येतच्छोभनं भविता तव ।
दुहित्रा चैव दौहित्रैस्तारितोऽहं महात्मभिः ॥ १-८७-२८ (३८२१)
तस्मात्पवित्रं दौहित्रमद्यप्रभृति पैतृके ।
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ॥ १-८७-२९ (३८२२)
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ।
भोक्तारः परिवेष्टारः श्रावितारः पवित्रकाः ॥ १-८७-३० (३८२३)
दिवसस्याष्टमे भागे मन्दीभवति भास्करे ।
स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ॥ १-८७-३१ (३८२४)
तिलाः पिशाचाद्रक्षन्ति दर्भा रक्षन्ति राक्षसात् ।
रक्षन्ति श्रोत्रियाः पङ्क्तिं यतिभिर्भुक्तमक्षयम् ॥ १-८७-३२ (३८२५)
लब्ध्वा पात्रं तु विद्वांसं श्रोत्रियं सुव्रतं शुचिम् ।
स कालः कालतो दत्तं नान्यथा काल इष्यते ॥ १-८७-३३ (३८२६)
वैशम्पायन उवाच। १-८७-३४क्ष् (५५६)
एवमुक्त्वा ययातिस्तु पुनः प्रोवाच बुद्धिमान् ।
सर्वे ह्यवभृथस्नातास्त्वरध्वं कार्यगौरवात् ॥' १-८७-३४ (३८२७)
अष्टक उवाच। १-८७-३५क्ष् (५५७)
आतिष्ठ स्वरथं राजन्विक्रमस्व विहायसम् ।

वयमप्यनुयास्यामो यदा कालो भविष्यति ॥१-८७-३५ (३८२८)
ययातिरुवाच।१-८७-३६क्ष् (५५८)
सर्वैरिदानीं गन्तव्यं सह स्वर्गजितो वयम् ।
एष नो विरजाः पन्था दृश्यते देवसद्मनः ॥१-८७-३६ (३८२९)
वैशम्पायन उवाच।१-८७-३७क्ष् (५५९)
ग्अष्टकश्च शिबिश्चैव काशेयश्च प्रतर्दनः ।
ऐक्ष्वाकवो वसुमनाश्चत्वारो भूमिपास्तदा ।
सर्वे ह्यवभृथस्नाताः स्वर्गताः साधवः सह ॥' १-८७-३७ (३८३०)
तेऽधिरुह्य रथान्सर्वे प्रयाता नृपसत्तमाः ।
आक्रमन्तो दिवं भाभिर्धर्मेणावृत्य रोदसी ॥१-८७-३८ (३८३१)
अष्टक उवाच।१-८७-३९क्ष् (५६०)
अहं मन्ये पूर्वमेकोऽस्मि गन्ता
सखा चेन्द्रः सर्वथा मे महात्मा ।
कस्मादेवं शिबिरौशीनरोऽय-
मेकोऽत्यगात्सर्ववेगेन वाहान् ॥ १-८७-३९ (३८३२)
ययातिरुवाच।१-८७-४०क्ष् (५६१)
अददद्याचमानाय यावद्वित्तमविन्दत ।
उशीनरस्य पुत्रोऽयं तस्माच्छ्रेष्ठोहि वः शिबिः ॥१-८७-४० (३८३३)
दानं तपः सत्यमथाऽपि धर्मो
ह्रीः श्रीः क्षमा सौम्यमथो विधित्सा ।
राजन्नेतान्यप्रमेयाणि राज्ञः
शिबेः स्थितान्यप्रतिमस्य बुद्ध्या ॥ १-८७-४१ (३८३४)
एवं वृत्तो ह्रीनिषेवश्च यस्मा-
त्तस्माच्छिबिरत्यगाद्वै रथेन। १-८७-४२ (३८३५)
वैशम्पायन उवाच ।
अथाष्टकः पुनरेवान्वपृच्छ-
न्मातामहं कौतुकेनेन्द्रकल्पम् ॥ १-८७-४२क्ष् (५६२)
पृच्छामि त्वां नृपते ब्रूहि सत्यं
कुतश्च कश्चासि सुतश्च कस्य ।
कृतं त्वया यद्धि न तस्य कर्ता
लोके त्वदन्यः क्षत्रियो ब्राह्मणो वा ॥ १-८७-४३ (३८३६)
ययातिरुवाच।१-८७-४४क्ष् (५६३)
ययातिरस्मि नहुषस्य पुत्रः
पूरोः पिता सार्वबौमस्त्विहासम् ।
गुह्यं चार्थं मामकेभ्यो ब्रवीमि
मातामहोऽहं भवतां प्रकाशम् ॥ १-८७-४४ (३८३७)

सर्वामिमां पृथिवीं निर्जिगाय
दत्त्वा प्रतस्थे विपिनं ब्राह्मणेभ्यः ।
मेध्यानश्वानेकशतान्सुरूपां-
स्तदा देवाः पुण्यभाजो भवन्ति ॥ १-८७-४५ (३८३८)
अदामहं पृथिवीं ब्राह्मणेभ्यः
पूर्णामिमामखिलां वाहनेन ।
गोभिः सुवर्णेन धनैश्च मुख्यै-
स्तदाऽददं गाः शथमर्बुदानि ॥ १-८७-४६ (३८३९)
सत्येन मे द्यौश्च वसुन्धरा च
तथैवाग्निर्ज्वलते मानुषेषु ।
न मे वृथा व्याहृतमेव वाक्यं
सत्यं हि सन्तः प्रतिपूजयन्ति ॥ १-८७-४७ (३८४०)
यदष्टक प्रब्रवीमीह सत्यं
प्रतर्दनं चौषदश्विं तथैव ।
सर्वे च लोका मुनयश्च देवाः
सत्येन पूज्या इति मे मनोगतम् ॥ १-८७-४८ (३८४१)
यो नः स्वर्गजितः सर्वान्यथावृत्तं निवेदयेत् ।
अनसूयुर्द्विजाग्र्येभ्यः स लभेन्नः सलोकताम् ॥ १-८७-४९ (३८४२)
वैशम्पायन उवाच। १-८७-५०क्ष् (५६४)
एवं राजा स महात्मा ह्यतीव
स्वैर्दौहित्रैस्तारितोऽमित्रसाह ।
त्यक्त्वा महीं परमोदारकर्मा
स्वर्गं गतः कर्मभिर्व्याप्य पृथ्वीम् ॥ ॥ १-८७-५० (३८४३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि सप्ताशीतितमोऽध्यायः
॥ ८७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८७-२ यत् यत् तपते प्रकाशयति ॥
१-८७-४ शिशुकात् शैशवमारभ्य ॥
१-८७-७ परीप्समानान् याचकान् । नावमंस्था नावमानं
कृतवानसि। स्वनवन्तः संगीतादिध्वनियुक्ताः ॥
१-८७-१० गन्तारो मृत्वा प्राप्स्यामः । नरकं भूलोकम् ॥
१-८७-११ यतध्वं कर्तुम् । नाभिजानामि नाङ्गीकरोमि ॥
१-८७-१३ प्रकाशन्ते दृश्यन्ते । ज्वलन्तो दीप्यमानाः ॥
१-८७-१४ अकृतहोमसमाप्तीनामवभृथायोगात् होमोपि समापित इत्याह

।अश्वमेध इति।पुरा स्वयंभुविहिते कर्तव्यतया विहिते अश्वमेधे अष्टकादिभिः क्रियमाणे ॥
१-८७-४१ सौम्यमक्रूरत्वम् ।विधित्सा पालनेच्छा ॥
१-८७-४२ सत्यमेव श्रेयःसाधनमिति विधातुं पूर्वोक्तप्रश्नोत्तरे अनुवदति ।अथाष्टक इत्यादिना ॥
१-८७-४४ प्रकाशं प्रागुक्तमपि स्पष्टतरम् ॥
१-८७-४५ एवं कृते सति पुण्यभाजः सन्तः देवा भवन्ति ॥
सप्ताशीतितमोऽध्यायः ॥
८७ ॥

आदिपर्व - अध्याय ०८८
॥ श्रीः ॥
१.८८. अध्यायः ८८

Mahabharata - Adi Parva - Chapter Topics
पूरुवंशकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८८-० (३८४४)
जनमेजय उवाच।१-८८-०क्ष् (५६५)
पुत्रं ययातेः प्रबूहि पूरुं धर्मभृतां वरम् ।
आनुपूर्व्येण ये चान्ये पूरोर्वंशविवर्धनाः ॥१-८८-१ (३८४५)
विस्तरेण पुनर्ब्रूहि दौष्यन्तेर्जनमेजयात् ।
संबभूव यथा राजा भरतो द्विजसत्तम ॥१-८८-२ (३८४६)
वैशम्पायन उवाच।१-८८-३क्ष् (५६६)
पूरुर्नृपतिशार्दूलो यथैवास्य पिता नृप ।
धर्मनित्यः स्थितो राज्ये शक्रतुल्यपराक्रमः ॥१-८८-३ (३८४७)
प्रवीरेश्वररौद्राश्वास्त्रयः पुत्रा महारथाः ।
पूरोः पौष्यामजायन्त प्रवीरो वंशकृत्ततः ॥१-८८-४ (३८४८)
मनस्युरभवत्तस्माच्छूरसेनीसुतः प्रभुः ।
पृथिव्याश्चतुरन्ताया गोप्ता राजीवलोचनः ॥१-८८-५ (३८४९)
शक्तः संहननो वाग्मी सौवीरीतनयास्त्रयः ।
मनस्योरभवन्पुत्राः शूराः सर्वे महारथाः ॥१-८८-६ (३८५०)
अन्वग्भानुप्रभृतयो मिश्रकेश्यां मनस्विनः ।
रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः ॥१-८८-७ (३८५१)
यज्वानो जज्ञिरे शूराः प्रजावन्तो बहुश्रुताः ।

सर्वे सर्वास्त्रविद्वासः सर्वे धर्मपरायणाः ॥ १-८८-८ (३८५२)
ऋचेयुरथ कक्षेयुः कृकणेयुश्च वीर्यवान् ।
स्थण्डिलेयुर्वनेयुश्च जलेयुश्च महायशाः ॥ १-८८-९ (३८५३)
तेजेयुर्बलावान्धीमान्सत्येयुश्चन्द्रविक्रमः ।
धर्मेयुः सन्नतेयुश्च दशमो देवविक्रमः ॥ १-८८-१० (३८५४)
अनाधृष्टिरभूत्तेषां विद्वान्भुवि तथैकराट् ।
ऋचेयुरथ विक्रान्तो देवानामिव वासवः ॥ १-८८-११ (३८५५)
अनाधृष्टिसुतस्त्वासीद्राजसूयाश्वमेधकृत् ।
मतिनार इति ख्यातो राजा परमधार्मिकः ॥ १-८८-१२ (३८५६)
मतिनारसुता राजंश्चत्वारोऽमितविक्रमाः ।
तंसुर्महानतिरथो द्रुह्युश्चाप्रतिमद्युतिः ॥ १-८८-१३ (३८५७)
तेषां तंसुर्महावीर्यः पौरवं वंशमुद्वहन् ।
आजहार यशो दीप्तं जिगाय च वसुंधराम् ॥ १-८८-१४ (३८५८)
ईलिनं तु सुतं तंसुर्जनयामास वीर्यवान् ।
सोऽपि कृत्स्नामिमां भूमिं विजिग्ये जयतां वरः ॥ १-८८-१५ (३८५९)
रथन्तर्यां सुतान्पञ्च पञ्चभूतोपमांस्ततः ।
ईलिनो जनयामास दुष्यन्तप्रभृतीन्नृपान् ॥ १-८८-१६ (३८६०)
दुष्यन्तं शूरभीमौ च प्रवसुं वसुमेव च ।
तेषां श्रेष्ठोऽभवद्राजा दुष्यन्तो दुर्जयो युधि ॥ १-८८-१७ (३८६१)
दुष्यन्ताल्लक्षणायां तु जज्ञे वै जनमेजयः ।
शकुन्तलायां भरतो दौष्यन्तिरभवत्सुतः ॥ १-८८-१८ (३८६२)
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ ॥ १-८८-१९ (३८६३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि अष्टाशीतितमोऽध्यायः
॥ ८८ ॥

आदिपर्व - अध्याय ०८९
॥ श्रीः ॥
१.८९. अध्यायः ८९

Mahabharata - Adi Parva - Chapter Topics
शकुन्तलोपाख्यानारम्भः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-८९-० (३८६४)
जनमेजय उवाच। १-८९-०क्ष् (५६७)

भगवन्विस्तरेणेह भरतस्य महात्मनः ।
जन्म कर्म च सुश्रूषोस्तन्मे शंसितुमर्हसि ॥ १-८९-१ (३८६५)
वैशम्पायन उवाच। १-८९-२क्ष् (५६८)
पौरवाणां वंशकरो दुष्यन्तो नाम वीर्यवान् ।
पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ॥ १-८९-२ (३८६६)
चतुर्भागं भुवः कृत्स्नं यो भुङ्क्ते मनुजेश्वरः ।
समुद्रावरणांश्चापि देशान्स समितिंजयः ॥ १-८९-३ (३८६७)
आम्लेच्छावधिकान्सर्वान्स भुङ्क्ते रिपुमर्दनः ।
रत्नाकरसमुद्रान्तांश्चातुर्वर्ण्यजनावृतान् ॥ १-८९-४ (३८६८)
न वर्णसङ्करकरो न कृष्याकरकृज्जनः ।
न पापकृत्कश्चिदासीत्तस्मिन्राजनि शासति ॥ १-८९-५ (३८६९)
धर्मे रतिं सेवमाना धर्मार्थावभिपेदिरे ।
तदा नरा नरव्याघ्र तस्मिञ्जनपदेश्वरे ॥ १-८९-६ (३८७०)
नासीच्चोरभयं तात न क्षुधाभयमण्वपि ।
नासीद्व्याधिभयं चापि तस्मिञ्जनपदेश्वरे ॥ १-८९-७ (३८७१)
स्वधर्मै रेमिरे वर्णा दैवे कर्मणि निःस्पृहाः ।
तमाश्रित्य महीपालमासंश्चैवाकुतोभयाः ॥ १-८९-८ (३८७२)
कालवर्षी च पर्जन्यः सस्यानि रसवन्ति च ।
सर्वरत्नसमृद्धा च मही पशुमती तथा ॥ १-८९-९ (३८७३)
स्वकर्मनिरता विप्रा नानृतं तेषु विद्यते ।
स चाद्भुतमहावीर्यो वज्रसंहननो युवा ॥ १-८९-१० (३८७४)
उद्यम्य मन्दरं दोर्भ्यां वहेत्सवनकाननम् ।
चतुष्पथगदायुद्धे सर्वप्रहरणेषु च ॥ १-८९-११ (३८७५)
नागपृष्ठेऽश्वपृष्ठे च बभूव परिनिष्ठितः ।
बले विष्णुसमश्चासीत्तेजसा भास्करोपमः ॥ १-८९-१२ (३८७६)
अक्षोभ्यत्वेऽर्णवसमः सहिष्णुत्वे धरासमः ।
संमतः स महीपालः प्रसन्नपुरराष्ट्रवान् ॥ १-८९-१३ (३८७७)
भूयो धर्मपरैर्भावैर्मुदितं जनमादिशत् ॥ ॥ १-८९-१४ (३८७८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-८९-५ न कृष्याकरकृत् कृषिकृन्न भुवोऽकृष्टपच्यत्वात् । आकरः सुवर्णादिधातूत्पत्तिस्थानं तत्रापि यत्नं न करोति पृथिव्या रत्नैर्धातुभिश्च पूर्णत्वात् ॥

१-८९-८ दैवे कर्मणि वृष्ट्याद्यर्थे कारीर्यादिकाम्यकर्मणि ॥
१-८९-९ तदेवाह कालेति ॥
१-८९-१० वज्रसंहननो दृढदेहः ॥
१-८९-११ सवनकाननं वनं जलमुपवनं वा ॥
१-८९-१४ आदिशत् शशास ॥
एकोननवतितमोऽध्यायः ॥
८९ ॥

आदिपर्व - अध्याय ०९०
॥ श्रीः ॥
१.९०. अध्यायः ९०

Mahabharata - Adi Parva - Chapter Topics
मृगयार्थं दुष्यन्तस्यारण्यगमनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-९०-० (३८७९)
जनमेजय उवाच। १-९०-०क्ष् (५६९)
संभवं भरतस्याहं चरितं च महामतेः ।
शकुन्तलायाश्चोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ १-९०-१ (३८८०)
दुष्यन्तेन च वीरेण यथा प्राप्ता शकुन्तला ।
तं वै पुरुषसिंहस्य भगवन्विस्तरं त्वहम् ॥ १-९०-२ (३८८१)
श्रोतुमिच्छामि तत्त्वज्ञ सर्वं मतिमतां वर। १-९०-३ (३८८२)
वैशम्पायन उवाच ।
स कदाचिन्महाबाहुः प्रभूतबलवाहनः ॥ १-९०-३क्ष् (५७०)
वनं जगाम गहनं हयनागशतैर्वृतः ।
बलेन चतुरङ्गेण वृतः परमवल्गुना ॥ १-९०-४ (३८८३)
खड्गशक्तिधरैर्वीरैर्गदामुसलपाणिभिः ।
प्रासतोमरहस्तैश्च ययौ योधशतैर्वृतः ॥ १-९०-५ (३८८४)
सिंहनादैश्च योधानां शङ्खदुनदुभिनिःस्वनैः ।
रथनेमिस्वनैश्चैव सनागवरबृंहितैः ॥ १-९०-६ (३८८५)
नानायुधधरैश्चापि नानावेषधरैस्तथा ।
ह्रेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः ॥ १-९०-७ (३८८६)
आसीत्किलकिलाशब्दस्तस्मिन्गच्छति पार्थिवे ।
प्रासादवरशृङ्गस्थाः परया नृपशोभया ॥ १-९०-८ (३८८७)
ददृशुस्तं स्त्रियस्तत्र शूरमात्मयशस्करम् ।

शक्रोपममित्रघ्नं परवारणवारणम् ॥१-९०-९ (३८८८)
पश्यन्तः स्त्रीगणास्तत्र वज्रपाणिं स्म मेनिरे ।
अयं स पुरुषव्याघ्रो रणे वसुपराक्रमः ॥१-९०-१० (३८८९)
यस्य बाहुबलं प्राप्य न भवन्त्यसुहृद्गणाः ।
इति वाचो ब्रुवन्त्यस्ताः स्त्रियः प्रेम्णा नराधिपं ॥१-९०-११ (३८९०)
तुष्टुवुः पुष्पवृष्टीश्च ससृजुस्तस्य मूर्धनि ।
तत्रतत्र च विप्रेन्द्रैः स्तूयमानः समन्ततः ॥१-९०-१२ (३८९१)
निर्ययौ परमप्रीत्या वनं मृगजिघांसया ।
तं देवराजप्रतिमं मत्तवारणधूर्गतम् ॥१-९०-१३ (३८९२)
द्विजक्षत्रियविट्शूद्रा निर्यान्तमनुजग्मिरे ।
ददृशुर्वर्धमानास्ते आशीर्भिश्च जयेन च ॥१-९०-१४ (३८९३)
सुदूरमनुजग्मुस्तं पौरजानपदास्तथा ।
न्यवर्तन्त ततः पश्चादनुज्ञाता नृपेण ह ॥१-९०-१५ (३८९४)
सुपर्णप्रतिमेनाथ रथेन वसुधाधिपः ।
महीमापूरयामास घोषेण त्रिदिवं तथा ॥१-९०-१६ (३८९५)
स गच्छन्ददृशे धीमान्नन्दनप्रतिमं वनम् ।
बिल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ॥१-९०-१७ (३८९६)
विषमं पर्वतस्रस्तै रश्मभिश्च समावृतम् ।
निर्जलं निर्मनुष्यं च बहुयोजनमायतम् ॥१-९०-१८ (३८९७)
मृगसिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः ।
तद्वनं मनुजव्याघ्रः सभृत्यबलवाहनः ॥१-९०-१९ (३८९८)
लोडयामास दुष्यन्तः सूदयन्विविधान्मृगान् ।
बाणगोचरसंप्राप्तांस्तत्र व्याघ्रगणान्बहून् ॥१-९०-२० (३८९९)
पातयामास दुष्यन्तो निर्बिभेद च सायकैः ।
दूरस्थान्सायकैः कांश्चिदभिनत्स नराधिपः ॥१-९०-२१ (३९००)
अभ्याशमागतांश्चान्यान्खड्गेन निरकृन्तत ।
कांश्चिदेणान्समाजघ्ने शक्त्या शक्तिमतां वरः ॥१-९०-२२ (३९०१)
गदामण्डलतत्त्वज्ञश्चचारामितविक्रमः ।
तोमरैरसिभिश्चापि गदामुसलकम्पनैः ॥१-९०-२३ (३९०२)
चचार स विनिघ्नन्वै वन्यांस्तत्र मृगद्विजान् ।
राज्ञा चाद्भुतवीर्येण योधैश्च समरप्रियैः ॥१-९०-२४ (३९०३)
लोड्यमानं महारण्यं तत्यजुः स्म मृगाधिपाः ।
तत्र विद्रुतयूथानि हतयूथपतीनि च ॥१-९०-२५ (३९०४)
मृगयूथान्यथौत्सुक्याच्छब्दं चक्रुस्ततस्ततः ।
शुष्काश्चापि नदीर्गत्वा जलनैराश्यकर्शिताः ॥१-९०-२६ (३९०५)
व्यायामक्लान्तहृदयाः पतन्ति स्म विचेतसः ।

क्षुत्पिपासापरीताश्च श्रान्ताश्च पतिता भुवि ॥ १-९०-२७ (३९०६)
केचित्तत्र नरव्याघ्रैरभक्ष्यन्त बुभुक्षितैः ।
केचिदग्निमथोत्पाद्य संसाध्य च वनेचराः ॥ १-९०-२८ (३९०७)
भक्षयन्ति स्म मांसानि प्रकुट्य विधिवत्तदा ।
तत्र केचिद्गजा मत्ता बलिनः शस्त्रविक्षताः ॥ १-९०-२९ (३९०८)
संकोच्याग्रकरान्भीताः प्राद्रवन्ति स्म वेगिताः ।
शकृन्मूत्रं सृजन्तश्च क्षरन्तः शोणितं बहु ॥ १-९०-३० (३९०९)
वन्या गजवरास्तत्र ममृदुर्मनुजान्बहून् ।
तद्वनं बलमेघेन शरधारेण संवृतम् ।
व्यरोचत मृगाकीर्णं राज्ञा हतमृगाधिपम् ॥ ॥ १-९०-३१ (३९१०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि नवतितमोऽध्यायः ॥ ९० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-९०-९ परवारणवारणं शत्रगजानां निवारकम् ॥
१-९०-१३ धर्गतं स्कन्धारूढम् ॥
१-९०-२८ संसाध्य पाकादिना संस्कृत्य ॥
१-९०-२९ प्रकुट्य चूर्णीकृत्य । गजा वनगजाः ॥
नवतितमोऽध्यायः ॥
९० ॥

आदिपर्व - अध्याय ०९१
॥ श्रीः ॥
१.९१. अध्यायः ९१

Mahabharata - Adi Parva - Chapter Topics
मृगयाप्रसङ्गेन दुष्यन्तस्य कण्वाश्रमगमनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-९१-० (३९११)
वैशम्पायन उवाच । १-९१-०क्ष् (५७१)
ततो मृगसहस्राणि हत्वा सबलवाहनः ।
तत्र मेघघनप्रख्यं सिद्धचारणसेवितम् ॥ १-९१-१ (३९१२)
वनमालोकयामास नगराद्योजनद्वये ।
मृगाननुचरन्वन्याञ्श्रमेण परिपीडितः ॥ १-९१-२ (३९१३)
मृगाननुचरन्राजा वेगेनाश्वानचोदयत् ।

राजा मृगप्रसङ्गेन वनमन्यद्विवेश ह ॥१-९१-३ (३९१४)
एक एवोत्तमबलः क्षुत्पिपासाश्रमान्वितः ।
स वनस्यान्तमासाद्य महच्छून्यं समासदत् ॥१-९१-४ (३९१५)
तच्चाप्यतीत्य नृपतिरुत्तमाश्रमसंयुतम् ।
मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥१-९१-५ (३९१६)
सीतमारुतसंयुक्तं जगामान्यन्महद्वनम् ।
पुष्पितैः पादपैः कीर्णमतीव सुखशाद्वलम् ॥१-९१-६ (३९१७)
विपुलं मधुरारावैर्नादितं विहगैस्तथा ।
पुंस्कोकिलनिनादैश्च झिल्लीकगणनादितम् ॥१-९१-७ (३९१८)
प्रवृद्धविटपैर्वृक्षैः सुखच्छायैः समावृतम् ।
षट्पदाघूर्णिततलं लक्ष्म्या परमया युतम् ॥१-९१-८ (३९१९)
नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी ।
षट्पदैर्नाप्यपाकीर्णस्तस्मिन्वै काननेऽभवत् ॥१-९१-९ (३९२०)
विगहैर्नादितं पुष्पैरलङ्कृतमतीव च ।
सर्वर्तुकुसुमैर्वृक्षैः सुखच्छायैः समावृतम् ॥१-९१-१० (३९२१)
मनोरमं सहेष्वासो विवेश वनमुत्तमम् ।
मारुता कलितास्तत्र द्रुमाः कुसुमशाखिनः ॥१-९१-११ (३९२२)
पुष्पवृष्टिं विचित्रां तु व्यसजंस्ते पुनः पुनः ।
दिवस्पृशोऽथ संघुष्टाः पक्षिभिर्मधुरस्वनैः ॥१-९१-१२ (३९२३)
विरेजुः पादपास्तत्र विचित्रकुसुमाम्बराः ।
तेषां तत्र प्रवालेषु पुष्पभारावनामिषु ॥१-९१-१३ (३९२४)
रुवन्ति रावान्मधुरान्षट्पदा मधुलिप्सवः ।
तत्र प्रदेशांश्च बहून्कुसुमोत्करमण्डितान् ॥१-९१-१४ (३९२५)
लतागृहपरिक्षिप्तान्मनसः प्रीतिवर्धनान् ।
संपश्यन्सुमहातेजा बभूव मुदितस्तदा ॥१-९१-१५ (३९२६)
परस्पराश्लिष्टशाखैः पादपैः कुसुमान्वितैः ।
अशोभत वनं तत्तु महेन्द्रध्वजसन्निभैः ॥१-९१-१६ (३९२७)
सिद्धचारणसङ्घैश्च गन्धर्वाप्सरसां गणैः ।
सेवितं वनमत्यर्थं मत्तवानरकिन्नरैः ॥१-९१-१७ (३९२८)
सुखः शीतः सुगन्धी च पुष्परेणुवहोऽनिलः ।
परिक्रामन्वने वृक्षानुपैतीव रिरंसया ॥१-९१-१८ (३९२९)
एवंगुणसमायुक्तं ददर्श स वनं नृपः ।
नदीकच्छोद्भं कान्तमुच्छ्रितध्वजसन्निभम् ॥१-९१-१९ (३९३०)
प्रेक्षमाणो वनं तत्तु सुप्रहृष्टविहङ्गमम् ।
आश्रमप्रवरं रम्यं ददर्श च मनोरमम् ॥१-९१-२० (३९३१)
नानावृक्षसमाकीर्णं संप्रज्वलितपावकम् ।

तं तदाऽप्रतिमं श्रीमानाश्रमं प्रत्यपूजयत् ॥ १-९१-२१ (३९३२)
यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितम् ।
अग्न्यगारैश्च बहुभिः पुष्पसंस्तरसंस्तृतम् ॥ १-९१-२२ (३९३३)
महाकच्छैर्बृहद्भिश्च विभ्राजितमतीव च ।
मालिनीमभितो राजन्नदीं पुण्यां सुखोदकाम् ॥ १-९१-२३ (३९३४)
नैकपक्षिगणाकीर्णां तपोवनमनोरमाम् ।
तत्रव्यालमृगान्सौम्यान्पश्यन्प्रीतिमवाप सः ॥ १-९१-२४ (३९३५)
तं चाप्रतिरथः श्रीमानाश्रमं प्रत्यपद्यत ।
देवलोकप्रतीकाशं सर्वतः सुमनोहरम् ॥ १-९१-२५ (३९३६)
नदीं चाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः ।
सर्वप्राणभृतां तत्र जननीमिव धिष्ठिताम् ॥ १-९१-२६ (३९३७)
सचक्रवाकपुलिनां पुष्पफेनप्रवाहिनीम् ।
सकिन्नरगणावासां वारनर्क्षनिषेविताम् ॥ १-९१-२७ (३९३८)
पुण्यस्वाध्यायसंघुष्टा पुलिनैरुपशोभिताम् ।
मत्तवारणशार्दूलभुजगेन्द्रनिषेविताम् ॥ १-९१-२८ (३९३९)
तस्यास्तीरे भगवतः काश्यपस्य महात्मनः ।
आश्रमप्रवरं रम्यं महर्षिगणसेवितम् ॥ १-९१-२९ (३९४०)
नदीमाश्रमसंबद्धां दृष्ट्वाश्रमपदं तथा ।
चकाराभिप्रवेशाय मतिं स नृपतिस्तदा ॥ १-९१-३० (३९४१)
अलङ्कृतं द्वीपवत्या मालिन्या रम्यतीरया ।
नरनारायणस्थानं गङ्गयेवोपशोभितम् ॥ १-९१-३१ (३९४२)
मत्तबर्हिणसंघुष्टं प्रविवेश महद्वनम् ।
तत्स चैत्ररथप्रख्यं समुपेत्य नरर्षभः ॥ १-९१-३२ (३९४३)
अतीव गुणसंपन्नमनिर्देश्यं च वर्चसा ।
महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम् ॥ १-९१-३३ (३९४४)
ध्वजिनीमश्वसंबाधां पदातिगजसङ्कुलाम् ।
अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ॥ १-९१-३४ (३९४५)
मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनम् ।
काश्यपं स्थीयतामत्र यावदागमनं मम ॥ १-९१-३५ (३९४६)
तद्वनं नन्दनप्रख्यमासाद्य मनुजेश्वरः ॥
क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलाम् ॥ १-९१-३६ (३९४७)
सामात्यो राजलिङ्गानि सोपनीय नराधिपः ।
पुरोहितसहायश्च जगामाश्रममुत्तमम् ॥ १-९१-३७ (३९४८)
दिदृक्षुस्तत्र तमृषिं तपोराशिमथाव्ययम् ।
ब्रह्मलोकप्रतीकाशमाश्रमं सोऽभिवीक्ष्य ह ।
षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतम् ॥ १-९१-३८ (३९४९)

विस्मयोत्फुल्लनयनो राजा प्रीतो बभूवह ।
ऋचो बह्वचमुख्यैश्च प्रेर्यमाणाः पदक्रमैः ।
शुश्राव मनुजव्याघ्रो विततेष्विह कर्मसु ॥ १-९१-३९ (३९५०)
यज्ञविद्याङ्गविद्भिश्च यजुर्विद्भिश्च शोभितम् ।
मधुरैः सामगीतैश्च ऋषिभिर्नियतव्रतैः ॥१-९१-४० (३९५१)
भारुण्डसामगीताभिरथर्वशिरसोद्गतैः ।
यतात्मभिः सुनियतैः शुशुभे स तदाश्रमः ॥१-९१-४१ (३९५२)
अथर्ववेदप्रवराः पूगयज्ञियसामगाः ।
संहितामीरयन्ति स्म पदक्रमयुतां तु ते ॥१-९१-४२ (३९५३)
शब्दसंस्कारसंयुक्तब्रुवद्भिश्चापरैर्द्विजैः ।
नादितः स बभौ श्रीमान्ब्रह्मलोक इवापरः ॥१-९१-४३ (३९५४)
यज्ञसंस्तरविद्भिश्च क्रमशिक्षाविशारदैः ।
न्यायतत्त्वात्मविज्ञानसंपन्नैर्वेदपारगैः ॥१-९१-४४ (३९५५)
नानावाक्यसमाहारसमवायविशारदैः ।
विशेषकार्यविद्भिश्च मोक्षधर्मपरायणैः ॥१-९१-४५ (३९५६)
स्तापनाक्षेपसिद्धान्तपरमार्थज्ञतां गतैः ।
शब्दच्छन्दोनिरुक्तज्ञैः कालज्ञानविशारदैः ॥१-९१-४६ (३९५७)
द्रव्यकर्मगुणज्ञैश्च कार्यकारणवेदिभिः ।
पक्षिवानररुतज्ञैश्च व्यासग्रन्थसमाश्रितैः ॥१-९१-४७ (३९५८)
नानाशास्त्रेषु मुख्यैश्च शुश्राव स्वनमीरितम् ।
लोकायतिकमुख्यैश्च समन्तादनुनादितम् ॥१-९१-४८ (३९५९)
तत्रतत्र च विप्रेन्द्रान्नियतान्संशितव्रतान् ।
जपहोमपरान्विप्रान्ददर्श परवीरहा ॥१-९१-४९ (३९६०)
आसनानि विचित्राणि रुचिराणि महीपतिः ।
प्रयत्नोपहितानि स्म दृष्ट्वा विस्मयमागमत् ॥१-९१-५० (३९६१)
देवतायतनानां च प्रेक्ष्य पूजां कृतां द्विजैः ।
ब्रह्मलोकस्थमात्मानं मेने स नृपसत्तमः ॥१-९१-५१ (३९६२)
स काश्यपतपोगुप्तमाश्रमप्रवरं शुभम् ।
नातृप्यत्प्रेक्षमाणो वै तपोवनगुणैर्युतम् ॥१-९१-५२ (३९६३)
स काश्यपस्यायतनं महाव्रतै-
र्वृतं समान्तादृषिभिस्तपोधनैः ।
विवेश सामात्यपुरोहितोऽरिहा
विविक्तमत्यर्थमनोहरं शुभम् ॥ ॥ १-९१-५३ (३९६४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि एकनवतितमोऽध्यायः
॥ ९१ ॥

१-९१-४ शून्यं वृक्षादिरहितमूषरम् ॥
१-९१-१८ रिरंसया रमयितुमिच्छया ॥
१-९१-१९ नदीकच्छोद्भवं कच्छः सजलोऽनूपप्रदेशः ॥
१-९१-२९ काश्यपस्य कश्यपगोत्रस्य कण्वस्य ॥
१-९१-३९ विततेषु वैतानिकेषु इष्टिपशुसोमादिषु प्रवर्तमानेषु ॥
१-९१-४० यज्ञविद्यायामङ्गभूतानि कल्पसूत्रादीनि ॥
१-९१-४१ भारुण्डसामानि पूगयज्ञियसामानि च साम्नामवान्तरभेदाः ॥
१-९१-४६ स्थापनं प्रथमं स्वसिद्धान्तव्यवस्था ततस्तत्र
शङ्काऽऽक्षेपः तस्याः परिहारः सिद्धान्तस्तैर्या परमार्थज्ञता
तां गतैः ॥
१-९१-४८ लोके एव आयतन्ते ते लोकायतिकाः तेषु लोकरञ्जनपरेषु मुख्यैः ॥
एकनवतितमोऽध्यायः ॥
९१ ॥

आदिपर्व - अध्याय ०९२
॥ श्रीः ॥
१.९२. अध्यायः ९२

Mahabharata - Adi Parva - Chapter Topics
कण्वाश्रमे दुष्यन्तशकुन्तलासंवादः ॥ १ ॥
शकुन्तलायाः स्वजन्मवृत्तान्तकथनारम्भः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-९२-० (३९६५)
वैशम्पायन उवाच। १-९२-०क्ष् (५७२)
ततो गच्छन्महाबाहुरेकोऽमात्यान्विसृज्य तान् ।
नापश्यच्चाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ १-९२-१ (३९६६)
सोऽपश्यमानस्तमृषिं शून्यं दृष्ट्वा तथाऽऽश्रमम् ।
उवाच क इहेत्युच्चैर्वनं सन्नादयन्निव ॥ १-९२-२ (३९६७)
श्रुत्वाऽथ तस्य तं शब्दं कन्या श्रीरिव रूपिणी ।
निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ॥ १-९२-३ (३९६८)
सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा ।
ग्सुप्रीताऽभ्यागतं तं तु पूज्यं प्राप्तमथेश्वरम् ॥ १-९२-४ (३९६९)
रूपयौवनसंपन्ना शीलाचारवती शुभा ।

सा तमायतपद्माक्षं व्यूढोरस्कं महाभुजम् ॥ १-९२-५ (३९७०)
सिंहस्कन्धं दीर्घबाहुं सर्वलक्षणपूजितम् ।
स्पृष्टं मधुरया वाचा साऽब्रवीज्जनमेजया ॥' १-९२-६ (३९७१)
स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ।
आसनेनार्चयित्वा च पाद्येनार्घ्येण चैव हि ॥ १-९२-७ (३९७२)
पप्रच्छानामयं राजन्कुशलं च नराधिपम् ।
यथावदर्चयित्वाऽथ पृष्ट्वा चानामयं तदा ॥ १-९२-८ (३९७३)
उवाच स्मयमानेव किं कार्यं क्रियतामिति ।
ग्आश्रमस्याभिगमने किं त्वं कार्यं चिकीर्षसि ॥ १-९२-९ (३९७४)
कस्त्वमद्येह संप्राप्तो महर्षेराश्रमं शुभम्।'
तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ॥ १-९२-१० (३९७५)
दृष्ट्वा सर्वानवद्याङ्गीं यथावत्प्रतिपूजितः ।
ग्राजर्षेस्तस्य पुत्रोऽहमिलिनस्य महात्मनः ॥ १-९२-११ (३९७६)
दुष्यन्त इति मे नाम सत्यं पुष्करलोचने।'
आगतोऽहं महाभागमृषिं कण्वमुपासितुम् ॥ १-९२-१२ (३९७७)
क्व गतो भगवान्भद्रे गन्ममाचक्ष्व शोभने। १-९२-१३ (३९७८)
शकुन्तलोवाच ।
गतः पिता मे भगवान्फलान्याहर्तुमाश्रमात् ।
मुहूर्तं संप्रतीक्षस्व द्रष्टास्येनमुपागतम् ॥ १-९२-१३क्ष् (५७३)
वैशम्पायन उवाच। १-९२-१४क्ष् (५७४)
अपश्यमानस्तमृषिं तथा चोक्तस्तया च सः ।
तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीम् ॥ १-९२-१४ (३९७९)
विभ्राजमानां वपुषा तपसा च दमेन च ।
रूपयौवनसंपन्नामित्युवाच महीपतिः ॥ १-९२-१५ (३९८०)
का त्वं कस्यासि सुश्रोणि किमर्थं चागता वनम् ।
एवंरूपगुणोपेता कुतस्त्वमसि शोभने ॥ १-९२-१६ (३९८१)
दर्शनादेव हि शुभे त्वया मेऽपहृतं मनः ।
इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ॥ १-९२-१७ (३९८२)
ग्स्थितोस्म्यमितसौभाग्ये विवक्षुस्त्वास्मि किंचन ।
शृणु मे नागनासोरु वचनं मत्तकाशिनि ॥ १-९२-१८ (३९८३)
राजर्षेरन्वये जातः पूरोरस्मि विशेषतः ।
वृण्वे त्वामद्य सुश्रोणि दुष्यन्तो वरवर्णिनि ॥ १-९२-१९ (३९८४)
न मेऽन्यत्र क्षत्रियाया मनो जातु प्रवर्तते ।
ऋषिपुत्रीषु चान्यासु नावरासु परासु च ॥ १-९२-२० (३९८५)
तस्मात्प्रणिहितात्मानं विद्धि मां कलभाषिणि ।
यस्यां मे त्वयि भावोऽस्ति क्षत्रिया ह्यसि का वदा ॥ १-९२-२१ (३९८६)

न हि मे भीरु विप्रायां मनः प्रसहते गतिम् ।
भजे त्वामायतापाङ्गे भक्तं भजितुमर्हसि ।
भुङ्क्ष राज्यं विशालाक्षि बुद्धिं मात्वन्यथा कृथाः'॥ १-९२-२२ (३९८७)
एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे ।
उवाच हसती वाक्यमिदं सुमधुराक्षरम् ॥१-९२-२३ (३९८८)
कण्वस्याहं भगवतो दुष्यन्त दुहिता मता ।
तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः ॥१-९२-२४ (३९८९)
\`अस्वतन्त्रास्मि राजेन्द्र काश्यपो मे गुरुः पिता ।
तमेव प्रार्थय स्वार्थं नायुक्तं कर्तुमर्हसि ॥' १-९२-२५ (३९९०)
दुष्यन्त उवाच।१-९२-२६क्ष् (५७५)
ऊर्ध्वरेता महाभागे भगवाँल्लोकपूजितः ।
चलेद्धि वृत्ताद्धर्मोपि न चलेत्संशितव्रतः ॥१-९२-२६ (३९९१)
कथं त्वं तस्य दुहिता संभूता वरवर्णिनी ।
संशयो मे महानत्र तन्मे छेत्तुमिहार्हसि ॥१-९२-२७ (३९९२)
शकुन्तलोवाच।१-९२-२८क्ष् (५७६)
यथाऽयमागमो मह्यं यथा चेदमभूत्पुरा ।
\`अन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ॥१-९२-२८ (३९९३)
स पापेनावृतो मूर्खस्तेन आत्मापहारकः।'
शृणु राजन्यथातत्त्वं यथाऽस्मि दुहिता मुनेः ॥ १-९२-२९ (३९९४)
ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् ।
\`ऊर्ध्वरेता यथासि त्वं कुतस्त्वेयं शकुन्तला ॥१-९२-३० (३९९५)
पुत्री त्वत्तः कथं जाता तत्त्वं मे ब्रूहि काश्यप।'
तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिवा ॥ १-९२-३१ (३९९६)
कण्व उवाच।१-९२-३२क्ष् (५७७)
तप्यमानः किल पुरा विश्वामित्रो महत्तपः ।
सुभृशं तापयामास शक्रं सुरगणेश्वरम् ॥१-९२-३२ (३९९७)
तपसा दीप्तवीर्योऽयं स्थानान्मां च्यावयेदिति ।
भीतः पुरन्दरस्तस्मान्मेनकामिदमब्रवीत् ॥१-९२-३३ (३९९८)
गुणैरप्सरसां दिव्यैर्मेनके त्वं विशिष्यसे ।
श्रेयो मे कुरु कल्याणि यत्त्वां वक्ष्यामि तच्छृणु ॥१-९२-३४ (३९९९)
असावादित्यशङ्काशो विश्वामित्रो महातपाः ।
तप्यमानस्तपो घोरं मम कम्पयते मनः ॥१-९२-३५ (४०००)
मेनके तव भारोऽयं विश्वामित्रः सुमध्यमे ।
शंसितात्मा सुदुर्धर्ष उग्रे तपसि वर्तते ॥१-९२-३६ (४००१)
स मां न च्यावयेत्स्थानात्तं वै गत्वा प्रलोभय ।
चर तस्य तपोविघ्नं कुरु मे प्रियमुत्तमम् ॥१-९२-३७ (४००२)

रूपयौवनमाधुर्यचेष्टितस्मितभाषणैः ।
लोभयित्वा वरारोहे तपसस्तं निवर्तय ॥ १-९२-३८ (४००३)
मेनकोवाच। १-९२-३९क्ष् (५७८)
महातेजाः स भगवांस्तथैव च महातपाः ।
कोपनश्च तथा ह्येनं जानाति भगवानपि ॥ १-९२-३९ (४००४)
तेजस्तपसश्चैव कोपस्य च महात्मनः ।
त्वमप्युद्विजसे यस्य नोद्विजेयमहं कथम् ॥ १-९२-४० (४००५)
महाभागं वसिष्ठं यः पुत्रैरिष्टैर्व्ययोजयत् ।
क्षत्रजातश्च यः पूर्वमभवद्ब्राह्मणो बलात् ॥ १-९२-४१ (४००६)
शौचार्थं यो नदीं चक्रे दुर्गमां बहुभिर्जलैः ।
यां तां पुण्यतमां लोके कौशिकीति विदुर्जनाः ॥ १-९२-४२ (४००७)
बभार यत्रास्य पुरा काले दुर्गे महात्मनः ।
दारान्मतङ्गो धर्मात्मा राजर्षिर्व्याधतां गतः ॥ १-९२-४३ (४००८)
अतीतकाले दुर्भिक्षे अभ्येत्य पुनराक्षमम् ।
मुनिः पारेति नद्या वै नाम चक्रे तदा प्रभुः ॥ १-९२-४४ (४००९)
मतङ्गं याजयाञ्चक्रे यत्र प्रीतमनाः स्वयम् ।
त्वं च सोमं भयाद्यस्य गतः पातुं सुरेश्वर ॥ १-९२-४५ (४०१०)
चकारान्यं च लोकं वै क्रुद्धो नक्षत्रसंपदा ।
प्रतिश्रवणपूर्वाणि नक्षत्राणि चकार यः ।
गुरुशापहतस्यापि त्रिशङ्कोः शरणं ददौ ॥ १-९२-४६ (४०११)
ब्रह्मर्षिशापं राजर्षिः कथं मोक्ष्यति कौशिकः ।
अवमत्य तदा देवैर्यज्ञाङ्गं तद्विनाशितम् ॥ १-९२-४७ (४०१२)
अन्यानि च महातेजा यज्ञाङ्गान्यसृजत्प्रभुः ।
निनाय च तदा स्वर्गं त्रिशङ्कुं स महातपाः ॥ १-९२-४८ (४०१३)
एतानि यस्य कर्माणि तस्याहं भृशमुद्विजे ।
यथाऽसौ न दहेत्क्रुद्धस्तथाऽऽज्ञापय मां विभो ॥ १-९२-४९ (४०१४)
तेजसा निर्दहेल्लोकान्कम्पयेद्धरणीं पदा ।
संक्षिपेच्च महामेरुं तूर्णमावर्तयेद्दिशः ॥ १-९२-५० (४०१५)
तादृशं तपसा युक्तं प्रदीप्तमिव पावकम् ।
कथमस्मद्विधा नारी जितेन्द्रियमभिस्पृशेत् ॥ १-९२-५१ (४०१६)
हुताशनमुखं दीप्तं सूर्यचन्द्राक्षितारकम् ।
कालजिह्वं सुरश्रेष्ठ कथमस्मद्विधा स्पृशेत् ॥ १-९२-५२ (४०१७)
यमश्च सोमश्च महर्षयश्च
साध्या विश्वे वालखिल्याश्च सर्वे ।
एतेऽपि यस्योद्विजन्ते प्रभावा-
त्तस्मात्कस्मान्मादृशी नोद्विजेत ॥ १-९२-५३ (४०१८)

त्वयैवमुक्ता च कथं समीप-
मृषेर्न गच्छेयमहं सुरेन्द्र ।
रक्षां च मे चिन्तय देवराज
यथा त्वदर्थं रक्षिताऽहं चरेयम् ॥ १-९२-५४ (४०१९)
कामं तु मे मारुतस्तत्र वासः
प्रक्रीडितााया विवृणोतु देव ।
भवेच्च मे मन्मथस्तत्र कार्ये
सहायभूतस्तु तव प्रसादात् ॥ १-९२-५५ (४०२०)
वनाच्च वायुः सुरभिः प्रवाया-
त्तस्मिन्काले तमृषिं लोभयन्त्याः ।
तथेत्युक्त्वा विहिते चैव तस्मिं-
स्ततो ययौ साऽऽश्रमं कौशिकस्य ॥ ॥ १-९२-५६ (४०२१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि द्विनवतितमोऽध्यायः
॥ ९२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-९२-२३ हसती हसन्ती ॥
१-९२-३० अभ्यचोदयत् पृष्टवान् ॥
१-९२-४३ बभार पोषितवान् । मतङ्गस्त्रिशङ्कुः ॥
१-९२-४४ आश्रममभ्येत्य तपस्तप्त्वेति शेषः । नद्याः कौशिक्याः ॥
१-९२-४९ तस्य तस्मात् ॥
१-९२-५० आवर्तयेदेकीकुर्यात् ॥
१-९२-५२ सूर्यचन्द्रावेवाक्ष्णोः संबन्धिनी तारके यस्य तावपि
भ्रूभङ्गमात्रेण स्रष्टुं समर्थ इत्यर्थः ॥
१-९२-५५ प्रक्रीडितायाः प्रकृष्टं क्रीडितं यस्याः । विवृणोतु अपसारयतु ॥
द्विनवतितमोऽध्यायः ॥
९२ ॥

आदिपर्व - अध्याय ०९३
॥ श्रीः ॥
१.९३. अध्यायः ९३

Mahabharata - Adi Parva - Chapter Topics
विश्वामित्रान्मेनकायां शकुन्तलाया जन्मकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-९३-० (४०२२)
कण्व उवाच। १-९३-०क्ष् (५७९)
एवमुक्तस्तया शक्रः संदिदेश सदागतिम् ।
प्रातिष्ठत तदा काले मेनका वायुना सह ॥ १-९३-१ (४०२३)
अथापश्यद्वरारोहा तपसा दग्धकिल्बिषम् ।
मिश्वामित्रं तप्यमानं मेनका भीरुराश्रमे ॥ १-९३-२ (४०२४)
अभिवाद्य ततः सा तं प्राक्रीडदृषिसन्निधौ ।
अपोवाह च वासोऽस्या मारुतः शशिसंनिभम् ॥ १-९३-३ (४०२५)
सागच्छत्त्वरिता भूमिं वासस्तदभिलिप्सती ।
कुत्सयन्तीव सव्रीडं मारुतं वरवर्णिनी ॥ १-९३-४ (४०२६)
पश्यतस्तस्य राजर्षेरप्यग्निसमतेजसः ।
विश्वामित्रस्ततस्तां तु विषमस्थामनिन्दिताम् ॥ १-९३-५ (४०२७)
गृद्धां वाससि संभ्रान्तां मेनकां मुनिसत्तमः ।
अनिर्देश्यवयोरूपामपश्यद्विवृतां तदा ॥ १-९३-६ (४०२८)
तस्या रूपगुणान्दृष्ट्वा स तु विप्रर्षभस्तदा ।
चकार भावं संसर्गे तया कामवशं गतः ॥ १-९३-७ (४०२९)
न्यमन्त्रयत चाप्येनां सा चाप्यैच्छदनिन्दिता ।
तौ तत्र सुचिरं कालमुभौ व्यवहरतां तदा ॥ १-९३-८ (४०३०)
रममाणौ यथाकामं यतैकदिवसं तथा ।
ग्एवं वर्षसहस्राणामतीतं नान्वचिन्तयत् ॥ १-९३-९ (४०३१)
कामक्रोधावजितवान्मुनिर्नित्यं समाहितः ।
चिरार्जितस्य तपसः क्षयं स कृतवान्मुनिः ॥ १-९३-१० (४०३२)
तपसः संक्षयादेव मुनिर्मोहं समाविशत् ।
मोहाभिभूतः क्रोधात्मा ग्रसन्मूलफलान्मुनिः ॥ १-९३-११ (४०३३)
पादैर्जलरवं कृत्वा अन्तर्द्वीपे कुटीं गतः ।
मेनका गन्तुकामा तु शुश्राव जलनिस्वनम् ॥ १-९३-१२ (४०३४)
तपसा दीप्तवीर्योऽसावाकाशादेति याति च ।
अद्य संज्ञां विजानामि ययाऽद्य तपसः क्षयः ॥ १-९३-१३ (४०३५)
गन्तुं न युक्तमित्युक्त्वा ऋतुस्नाताथ मेनका ।
कामरागाभिभूतस्य मुनेः पार्स्वं जगाम ह ॥' १-९३-१४ (४०३६)
जनयामास स मुनिर्मेनकायां शकुन्तलाम् ।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ॥ १-९३-१५ (४०३७)
ग्देवगर्भोपमां बालां सर्वाभरणभूषिताम् ।
शयानां शयने रम्ये मेनका वाक्यमब्रवीत् ॥ १-९३-१६ (४०३८)
महर्षेरुग्रतपसस्तेजस्त्वमसि भामिनि ।

तस्मात्स्वर्गं गमिष्यामि देवकार्यार्थमागता ॥' १-९३-१७ (४०३९)
जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ।
कृतकार्या ततस्तूर्णमगच्छच्छक्रसंसदम् ॥१-९३-१८ (४०४०)
तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ।
दृष्ट्वा शयानं शकुनाः समन्तात्पर्यवारयन् ।
नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः ॥ १-९३-१९ (४०४१)
पर्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ।
उपस्प्रष्टुं गतश्चाहमपश्यं शयितामिमाम् ॥१-९३-२० (४०४२)
निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ।
ग्मां दृष्ट्वैवाभ्यपद्यन्त पादयोः पतिता द्विजाः ।
अब्रुव्शकुनाः सर्वे कलं मधुरभाषिणः ॥ १-९३-२१ (४०४३)
विश्वामित्रसुतां ब्रह्मन्न्यासभूतां भरस्व वै ।
कामक्रोधावजितवान्सखा ते कौशिकीं गतः ॥१-९३-२२ (४०४४)
तस्मात्पोषय तत्पुत्रीं दयावानिति तेऽब्रुवन् ।
सर्वभूतरुतज्ञोऽहं दयावान्सर्वजन्तुषु ॥' १-९३-२३ (४०४५)
आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम् ॥ १-९३-२४ (४०४६)
शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जते ।
क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्मशासने ॥१-९३-२५ (४०४७)
निर्जने तु वने यस्माच्छकुन्तैः परिवारिता ।
शकुन्तलेति नामास्याः कृतं चापि ततो मया ॥१-९३-२६ (४०४८)
एवं दुहितरं विद्धि मम विप्र शकुन्तलाम् ।
शकुन्तला च पितरं मन्यते मामनिन्दिता ॥१-९३-२७ (४०४९)
शकुन्तलोवाच।१-९३-२८क्ष् (५८०)
एतदाचष्ट पृष्टः सन्मम जन्म महर्षये ।
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप ॥१-९३-२८ (४०५०)
कण्वं हि पितरं मन्ये पितरं स्वमजानती ।
इति ते कथितं राजन्यथावृत्तं श्रुतं मया ॥ ॥१-९३-२९ (४०५१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि त्रिनवतितमोऽध्यायः
॥ ९३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-९३-१ सदागतिम् वायुम् ॥
१-९३-६ गृद्धां सक्ताम् । विवृतामनाच्छादिताम् ॥
१-९३-८ न्यमन्त्रयत एहीत्याकारितवान् । व्यहरतां विहारं चक्रतुः ॥
१-९३-२० उपस्प्रष्टुं आचमनादिकं कर्तुम् ॥

१-९३-२५ शरीरकृन्निषेक्ता ।प्राणदाताऽभयप्रदः ॥
त्रिनवतितमोऽध्यायः ॥
९३ ॥

आदिपर्व - अध्याय ०९४
॥ श्रीः ॥
१.९४. अध्यायः ९४

Mahabharata - Adi Parva - Chapter Topics
समयबन्धपूर्वकं गान्धर्वेण विवाहेन शकुन्तलापाणिग्रहणम् ॥ १ ॥
कण्वस्य स्वाश्रमं प्रति प्रत्यागमनम् ॥ २ ॥
कण्वशकुन्तलासंवादः ॥ ३ ॥
कण्वाच्छकुन्तलाया वरलाभः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-९४-० (४०५२)
दुष्यन्त उवाच।१-९४-०क्ष् (५८१)
सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ।
भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥१-९४-१ (४०५३)
सुवर्णमालां वासांसि कुण्डले परिहाटके ।
नानापत्तनजे शुभ्रे मणिरत्ने च शोभने ॥१-९४-२ (४०५४)
आहरामि तवाद्याहं निष्कादीन्यजिनानि च ।
सर्वं राज्यं तवाद्यास्तु भार्या मे भव शोभने ॥१-९४-३ (४०५५)
गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि ।
विवाहानां हि रम्भोरु गान्धर्वः श्रेष्ठ उच्यते ॥१-९४-४ (४०५६)
शकुन्तलोवाच।१-९४-५क्ष् (५८२)
फलाहारो गतो राजन्पिता मे इत आश्रमात् ।
मुहूर्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥१-९४-५ (४०५७)
गपिता हि मे प्रभुर्नित्यं दैवतं परमं मम ।
यस्मै मां दास्यति पिता स मे भर्ता भविष्यति ॥१-९४-६ (४०५८)
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥१-९४-७ (४०५९)
समन्यमाना राजेन्द्र पितरं मे तपस्विनम् ।
अधर्मेण हि धर्मिष्ठ कथं वरमुपास्महे ॥१-९४-८ (४०६०)
दुष्यन्त उवाच।१-९४-९क्ष् (५८३)
मामैवं वद कल्याणि तपोराशिं दमात्मकम्। १-९४-९ (४०६१)

शकुन्तलोवाच ।
मन्युप्रहरणा विप्रा न विप्राः शस्त्रपाणयः ॥ १-९४-९क्ष् (५८४)
मन्युना घ्नन्ति ते शत्रून्वज्रेणेन्द्र इवासुरान् ।
अग्निर्दहति तेजोभिः सूर्यो दहति रश्मिभिः ॥ १-९४-१० (४०६२)
राजा दहति दण्डेन ब्राह्मणो मन्युना दहेत् ।
क्रोधिता मन्युना घ्नन्ति वज्रपाणिरिवासुरान् ॥ १-९४-११ (४०६३)
दुष्यन्त उवाच। १-९४-१२क्ष् (५८५)
जाने भद्रे महर्षिं तं तस्य मन्युर्न विद्यते।'
इच्छामि त्वां वरारोहे भजमानामनिन्दिते ।
त्वदर्थं मां स्थितं विद्धि त्वद्गतं हि मनो मम ॥ १-९४-१२ (४०६४)
आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः ॥ १-९४-१३ (४०६५)
अष्टावेव समासेन विवाहा धर्मतः स्मृताः ।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः ॥ १-९४-१४ (४०६६)
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः ।
तेषां धर्म्यान्यथापूर्वं मनुः स्वायंभुवोऽब्रवीत् ॥ १-९४-१५ (४०६७)
प्रशस्तांश्चतुरः पूर्वान्ब्राह्मणस्योपधारय ।
षडानुपूर्व्या क्षत्रस्य विद्धि धर्म्याननिन्दिते ॥ १-९४-१६ (४०६८)
राज्ञां तु राक्षसोऽप्युक्तो विट्शूद्रेष्वासुरः स्मृतः ।
पञ्चानां तु त्रयो धर्म्या अधर्म्यौ द्वौ स्मृताविह ॥ १-९४-१७ (४०६९)
पैशाच आसुरश्चैव न कर्तव्यौ कदाचन ।
अनेन विधिना कार्यो धर्मस्यैषा गतिः स्मृता ॥ १-९४-१८ (४०७०)
गान्धर्वराक्षसौ क्षत्रे धर्म्यौ तौ मा विशङ्किथाः ।
पृथग्वा यदि वा मिश्रौ कर्तव्यौ नात्र संशयः ॥ १-९४-१९ (४०७१)
सा त्वं मम सकामस्य सकामा वरवर्णिनी ।
गान्धर्वेण विवाहेन भार्या भवितुमर्हसि ॥ १-९४-२० (४०७२)
शकुन्तलोवाच। १-९४-२१क्ष् (५८६)
यदि धर्मपथस्त्वेव यदि चात्मा प्रभुर्मम ।
प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ॥ १-९४-२१ (४०७३)
सत्यं मे प्रतिजानीहि यथा वक्ष्याम्यहं रहः ।
मयि जायेत यः पुत्रः स भवेत्त्वदनन्तरः ॥ १-९४-२२ (४०७४)
युवराजो महाराज सत्यमेतद्ब्रवीमि ते ।
यद्येतदेवं दुष्यन्त अस्तु मे सङ्गमस्त्वया ॥ १-९४-२३ (४०७५)
वैशम्पायन उवाच। १-९४-२४क्ष् (५८७)
गतस्यास्तु सर्वं संश्रुत्य यथोक्तं स विशांपतिः ।
दुष्यन्तः पुनरेवाह यद्यदिच्छसि तद्वद ॥ १-९४-२४ (४०७६)

शकुन्तलोवाच।१-९४-२५क्ष् (५८८)
ख्यातो लोकप्रवादोयं विवाह इति शास्त्रतः ।
वैवाहिकीं क्रियां सन्तः प्रशंसन्ति प्रजाहिताम् ॥१-९४-२५ (४०७७)
लोकप्रवादशान्त्यर्थं विवाहं विधिना कुरु ।
सन्त्यत्र यज्ञपात्राणि दर्भाः सुमनसोऽक्षताः ॥१-९४-२६ (४०७८)
यथा युक्तो विवाहः स्यात्तथा युक्ता प्रजा भवेत् ।
तस्मादाज्यं हविर्लाजाः सिकता ब्राह्मणास्तव ॥१-९४-२७ (४०७९)
वैवाहिकानि चान्यानि समस्तानीह पार्थिव ।
दुरुक्तमपि राजेन्द्र क्षन्तव्यं धर्मकारणात् ॥१-९४-२८ (४०८०)
वैशम्पायन उवाच।' १-९४-२९क्ष् (५८९)
एवमस्त्विति तां राजा प्रत्युवाचाविचारयन् ।
अपि च त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते ॥१-९४-२९ (४०८१)
यथा त्वमर्हा सुश्रोणि मन्यसे तद्ब्रवीमि ते ।
एवमुक्त्वा स राजर्षिस्तामनिन्दितगामिनीम् ॥१-९४-३० (४०८२)
ग्पुरोहितं समाहूय वचनं युक्तमब्रवीत् ।
राजपुत्र्या यदुक्तं वै न वृथा कर्तुमुत्सहे ॥१-९४-३१ (४०८३)
क्रियाहीनो हि न भवेन्मम पुत्रो महाद्युतिः ।
तथा कुरुष्व शास्त्रोक्तं विवाहं मा चिरंकुरु ॥१-९४-३२ (४०८४)
एवमुक्तो नृपतिना द्विजः परमयन्त्रितः ।
शोभनं राजराजेति विधिना कृतवान्द्विजः ॥१-९४-३३ (४०८५)
शासनाद्विप्रमुख्यस्य कृतकौतुकमङ्गलः।'
जग्राह विधिवत्पाणावुवास च तया सह ॥ १-९४-३४ (४०८६)
विश्वास्य चैनां स प्रायादब्रवीच्च पुनः पुनः ।
प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥१-९४-३५ (४०८७)
ग्त्रैविद्यवृद्धैः सहितां नानाराजजनैः सह ।
शिबिकासहस्रैः सहिता वयमायान्ति बान्धवाः ॥१-९४-३६ (४०८८)
मूकाश्चैव किराताश्च कुब्जा वामनकैः सह ।
सहिताः कञ्चुकिवरैर्वाहिनी सूतमागधैः ॥१-९४-३७ (४०८९)
शङ्खदुन्दुभिनिर्घोषैर्वनं च समुपैष्यति ।
तथा त्वामानयिष्यामि नगरं स्वं शुचिस्मिते ॥१-९४-३८ (४०९०)
अन्यथा त्वां न नेष्यामि स्वनिवेशमसत्कृताम् ।
सर्वमङ्गलसत्कारैः सुभ्रु सत्यं करोमि ते ॥१-९४-३९ (४०९१)
वैशम्पायन उवाच।१-९४-४०क्ष् (५९०)
एवमुक्त्वा स राजर्षिस्तामनिन्दितगामिनीम् ।
परिष्वज्य च बाहुभ्यां स्मितपूर्वमुदैक्षत ॥१-९४-४० (४०९२)
प्रदक्षिणीकृतां देवीं पुनस्तां परिषस्वजे ।

शकुन्तला सा सुमुखी पपात नृपपादयोः ॥१-९४-४१ (४०९३)
तां देवीं पुनरुत्थाप्य मा शुचेति पुनः पुनः ।
शपेयं सुकृतेनैव प्रापयिष्ये नृपात्मजे ॥' १-९४-४२ (४०९४)
इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय ।
मनसा चिन्तयन्प्रायात्काश्यपं प्रति पार्थिव ॥१-९४-४३ (४०९५)
भगवांस्तपसा युक्तः श्रुत्वा किं नु करिष्यति ।
तं न प्रसाद्यागतोऽहं प्रसीदेति द्विजोत्तमम् ।
एवं संचिन्तयन्नेव प्रविवेश स्वकं पुरम् ॥ १-९४-४४ (४०९६)
ततो मुहूर्ते याते तु कण्वोऽप्याश्रममागमत् ।
शकुन्तला च पितरं ह्रिया नोपजगाम तम् ॥१-९४-४५ (४०९७)
ग्शङ्कितेव च विप्रर्षिमुपचक्राम सा शनैः ।
ततोऽस्य भारं जग्राह आसनं चाप्यकल्पयत् ॥१-९४-४६ (४०९८)
प्राक्षालयच्च सा पादौ काश्यपस्य महात्मनः ।
न चैनं लज्जयाऽशक्नोदक्षिभ्यामभिवीक्षितुम् ॥१-९४-४७ (४०९९)
शकुन्तला च सव्रीडा तमृषिं नाभ्यभाषत ।
तस्मात्स्वधर्मात्स्खलिता भीता सा भरतर्षभ ॥१-९४-४८ (४१००)
अभवद्दोषदर्शित्वाद्ब्रह्मचारिण्ययन्त्रिता ।
स तदा व्रीडितां दृष्ट्वा ऋषिस्तां प्रत्यभाषत ॥१-९४-४९ (४१०१)
कण्व उवाच।१-९५-५०क्ष् (५९१)
सव्रीडैव च दीर्घायुः पुरेव भविता न च ।
वृत्तं कथय रम्भोरु मा त्रासं च प्रकल्पय ॥१-९४-५० (४१०२)
वैशम्पायन उवाच।१-९४-५१क्ष् (५९२)
ततः प्रक्षाल्य पादौ सा विश्रान्तं पुनरब्रवीत् ।
निधाय कामं तस्यर्षेः कन्दानि च फलानि च ॥१-९४-५१ (४१०३)
ततः संवाह्य पादौ सा विश्रान्तं वेदिमध्यमा ।
शकुन्तला पौरवाणां दुष्यन्तं जग्मुषी पतिम् ॥१-९४-५२ (४१०४)
ततः कृच्छ्रादतिशुभा सव्रीडा श्रमती तदा ।
सगद्गदमुवाचेदं काश्यपं सा शुचिस्मिता ॥१-९४-५३ (४१०५)
शकुन्तलोवाच।१-९४-५४क्ष् (५९३)
राजा ताताजगामेह दुष्यन्त इलिलात्मजः ।
मया पतिर्वृतो योऽसौ दैवयोगादिहागतः ॥१-९४-५४ (४१०६)
तस्य तात प्रसीद त्वं भर्ता मे सुमहायशाः ।
अतः सर्वं तु यद्वृत्तं दिव्यज्ञानेन पश्यसि ॥१-९४-५५ (४१०७)
अभयं क्षत्रियकुले प्रसादं कर्तुमर्हसि। १-९४-५६ (४१०८)
वैशम्पायन उवाच ।
चक्षुषा स तु दिव्येन सर्वं विज्ञाय काश्यपः ॥ १-९४-५६क्ष् (५९४)

ततो धर्मिष्ठतां मत्वा धर्मे चास्खलितं मनः ।
उवाच भगवान्प्रीतस्तद्वृत्तं सुमहातपाः ॥ १-९४-५७ (४१०९)
कण्व उवाच। १-९४-५८क्ष् (५९५)
एवमेतन्मया ज्ञातं दृष्टं दिव्येन चक्षुषा ।
त्वयाऽद्य राजान्वयया मामनादृत्य यत्कृतम्'॥ १-९४-५८ (४११०)
पुंसा सह समायोगो न स धर्मोपघातकः ।
न भयं विद्यते भद्रे मा शुचः सुकृतं कृतम् ॥ १-९४-५९ (४१११)
क्षत्रियस्य तु गान्धर्वो विवाहः श्रेष्ठ उच्यते ।
सकामायाः सकामेन निमन्त्रः श्रेष्ठ उच्यते ॥ १-९४-६० (४११२)
गकिं पुनर्विधिवत्कृत्वा सुप्रजस्त्वमवाप्स्यसि।'
धर्मात्मा च महात्मा च दुष्यन्तः पुरुषोत्तमः ॥ १-९४-६१ (४११३)
अभ्यागच्छत्पतिर्यस्त्वां भजमानां शकुन्तले ।
महात्मा जनिता लोके पुत्रस्तव महायशाः ॥ १-९४-६२ (४११४)
स च सर्वां समुद्रान्तां कृत्स्नां भोक्ष्यति मेदिनीम् ।
परं चाभिप्रयातस्य चक्रं तस्य महात्मनः ॥ १-९४-६३ (४११५)
भविष्यत्यप्रतिहतं सततं चक्रवर्तिनः ।
प्रसन्न एव तस्याहं त्वकृते वरवर्णिनि ॥ १-९४-६४ (४११६)
ऋतवो बहवस्ते वै गता व्यर्थाः शुचिस्मिते ।
सार्थकं सांप्रतं ह्येतन्न च पाप्मास्ति तेऽनघे ।
गृहाण च वरं मत्तस्तत्कृते यदभीप्सितम् ॥ १-९४-६५ (४११७)
शकुन्तलोवाच। १-९४-६६क्ष् (५९६)
मया पतिर्वृतो योऽसौ दुष्यन्तः पुरुषोत्तमः ।
मम चैव पतिर्दृष्टो देवतानां समक्षतः ।
तस्मै ससचिवाय त्वं प्रसादं कर्तुमर्हसि ॥ १-९४-६६ (४११८)
वैशम्पायन उवाच। १-९४-६७क्ष् (५९७)
इत्येवमुक्त्वा मनसा प्रणिधाय मनस्विनी ।
ततो धर्मिष्ठतां वव्रे राज्ये चास्खलनं तथा ॥ १-९४-६७ (४११९)
शकुन्तलां पौरवाणां दुष्यन्तहितकाम्यया ।
गएवमस्त्विति तां प्राह कण्वो धर्मभृतां वरः ॥ १-९४-६८ (४१२०)
पस्पर्श चापि पाणिभ्यां सुतां श्रीमिवरूपिणीम् ॥ १-९४-६९ (४१२१)
कण्व उवाच। १-९४-७०क्ष् (५९८)
अद्यप्रभृति देवी त्वं दुष्यन्तस्य महात्मनः ।
पतिव्रतानां या वृत्तिस्तां वृत्तिमनुपालय ॥ १-९४-७० (४१२२)
वैशम्पायन उवाच। १-९४-७१क्ष् (५९९)
इत्येवमुक्त्वा धर्मात्मा तां विशुद्ध्यर्थमस्पृशत् ।
स्पृष्टमात्रे शरीरे तु परं हर्षमवाप सा ॥' ॥ १-९४-७१ (४१२३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-९४-४ गान्धर्वो वरवध्वोरैकमत्येन कृतः ॥
१-९४-५ फलाहारः फळन्याहर्तुं गतः ॥
१-९४-१७ पञ्चानां ब्राह्मादीनां त्रयो ब्राह्मदैवप्राजापत्या धर्म्याः
। द्वावर्षासुरो कन्याशुल्कग्रहणादधर्म्यौ ॥
१-९४-१८ तयोरप्यासुरः पैशाचवदत्यन्तं हेय इत्याह । पैशाच इति ॥
१-९४-१९ परिशेषाद्गन्धर्वराक्षसौ क्षत्रियस्य धर्म्यावित्याह
गान्धर्वेति ॥
१-९४-४२ शपेयं शपथं कुर्याम् ॥
चतुर्नवतितमोऽध्यायः ॥
९४ ॥

आदिपर्व - अध्याय ०९५
॥ श्रीः ॥
१.९५. अध्यायः ९५

Mahabharata - Adi Parva - Chapter Topics
शकुन्तलायाः पुत्रोत्पत्तिः ॥ १ ॥
तस्य सर्वदमनेतिनामप्राप्तिः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-९५-० (४१२४)
वैशम्पायन उवाच। १-९५-०क्ष् (६००)
प्रतिज्ञाय च दुष्यन्ते प्रतियाते दिने दिने ।
ग्गर्भश्च ववृधे तस्यां राजपुत्र्यां महात्मनः ॥' १-९५-१ (४१२५)
शकुन्तला चिन्तयन्ती राजानं कार्यगौरवात् ।
दिवारात्रमनिद्रैव स्नानभोजनवर्जिता ॥ १-९५-२ (४१२६)
राजप्रेषणिका विप्राश्चतुरङ्गबलान्विताः ।
अद्य श्वो वा परश्वो वा समायान्तीति निस्चिता ॥ १-९५-३ (४१२७)
दिनान्पक्षानृतून्मासानयनानि च सर्वशः ।
गण्यमानानि वर्षाणि व्यतीयुस्त्रीणि भारत ॥ १-९५-४ (४१२८)
त्रिषु वर्षेषु पूर्णेषु ऋषेर्वचनगौरवात् ।

ऋषिपत्न्यः सुबहुशो हेतुमद्वाक्यमब्रुवन् ॥ १-९५-५ (४१२९)
ऋषिपत्न्य ऊचुः। १-९५-६क्ष् (६०१)
शृणु भद्रे लोकवृत्तं श्रुत्वा यद्रोचते तव ।
तत्कुरुष्व हितं देवि नावमान्यं गुरोर्वचः ॥ १-९५-६ (४१३०)
देवानां दैवतं विष्णुर्विप्राणामग्निर्ब्रह्म च ।
नारीणां दैवतं भर्ता लोकानां ब्राह्मणो गुरुः ॥ १-९५-७ (४१३१)
सूतिकाले प्रसूष्वेति भगवांस्ते पिताऽब्रवीत् ।
करिष्यामीति कर्तव्यं तदा ते सुकृतं भवेत् ॥ १-९५-८ (४१३२)
वैशम्पायन उवाच। १-९५-९क्ष् (६०२)
पत्नीनां वचनं श्रुत्वा साधु साध्वित्यचिन्तयत्।'
गर्भं सुषाव वामोरूः कुमारममितौजसम् ॥ १-९५-९ (४१३३)
त्रिषु वर्षेषु पूर्णेषु प्राजायत शकुन्तला ।
रूपौदार्यगुणोपेतं दौष्यन्तिं जनमेजय ॥ १-९५-१० (४१३४)
ग्जाते' तस्मिन्नन्तरिक्षात्पुष्पवृष्टिः पपात ह ।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥ १-९५-११ (४१३५)
गायद्भिर्मधुरं तत्र देवैः शक्रोऽभ्युवाच ह ।
शकुन्तले तव सुतश्चक्रवर्ती भविष्यति ॥ १-९५-१२ (४१३६)
बलं तेजश्च रूपं च न समं भुवि केनचित् ।
आहर्ता वाजिमेधस्य शतसङ्ख्यस्य पौरवः ॥ १-९५-१३ (४१३७)
अनेकारपि साहस्रै राजसूयादिभिर्मखैः ।
स्वार्थं ब्राह्मणसात्कृत्वा दक्षिणाममितां ददत् ॥ १-९५-१४ (४१३८)
देवतानां वचः श्रुत्वा कण्वाश्रमनिवासिनः ।
सभाजयन्तः कण्वस्य सुतां सर्वे महर्षयः ॥ १-९५-१५ (४१३९)
शकुन्तला च तच्छ्रुत्वा परं हर्षमवाप सा ।
द्विजानाहूय मुनिभिः सत्कृत्य च महायशाः।' १-९५-१६ (४१४०)
जातकर्मादिसंस्कारं कण्वः पुण्यवतां वरः ।
तस्याथ कारयामास वर्धमानस्य चासकृत् ॥ १-९५-१७ (४१४१)
यथाविधि यथान्यायं क्रियाः सर्वास्त्वकारयत् ।
दन्तैः शुक्लैः शिखरिभिःसिंहसंहननोऽभवत् ॥ १-९५-१८ (४१४२)
चक्राङ्कितकरः श्रीमान्स्वयं विष्णुरिवापरः ।
ग्चतुष्किष्कुर्महातेजा महामूर्धा महाबलः ॥' १-९५-१९ (४१४३)
कुमारो देवगर्भाभः स तत्राशु व्यवर्धत ।
ग्ऋषेर्भयात्तु दुष्यन्तः स्मरन्नैवाह्वयत्तदा ॥ १-९५-२० (४१४४)
गते काले तु महति न सस्मार तपोधनाम्।'
षड्वर्षेषु ततो बालः कण्वाश्रमपदं प्रति ॥ १-९५-२१ (४१४५)
व्याघ्रान्सिंहान्वराहांश्च वृकांश्च महिषांस्तथा ।

ग्ऋक्षांश्चाभ्यहनद्व्यालान्पङ्क्त्यामाश्रमपीडकान् ॥१-९५-२२ (४१४६)
बलाद्भुजाभ्यां संगृह्य बलवान्संनियम्य च।'
बद्ध्वा वृक्षेषु दौष्यन्तिराश्रमस्य समन्ततः ॥ १-९५-२३ (४१४७)
आरुरोह द्रुमांश्चैव क्रीडन्स्म परिधावति ।
ग्वनं च लोडयामास सिंहव्याघ्रगणैर्वृतम् ॥१-९५-२४ (४१४८)
ततश्च राक्षसान्सर्वान्पिशाचांश्च रिपून्रणे ।
मुष्टियुद्धेन तान्हत्वा ऋषीनाराधयत्तदा ॥१-९५-२५ (४१४९)
कश्चिद्दितिसुतस्तं तु हन्तुकामो महाबलः ।
वध्यमानांस्तु दैतेयानमर्षी तं समभ्ययात् ॥१-९५-२६ (४१५०)
तमागतं प्रहस्यैव बाहुभ्यां परिगृह्य च ।
दृढं चाबध्य बाहुभ्यां पीडयामास तं तदा ॥१-९५-२७ (४१५१)
मर्दितो न शशाकास्मान्मोचितुं बलवत्तया ।
प्राक्रोशद्भैरवं तत्र द्वारेभ्यो निःसृतं त्वसृक् ॥१-९५-२८ (४१५२)
तेन शब्देन वित्रस्ता मृगाः सिंहादयो गणाः ।
सुस्रुवुश्च शकृन्मूत्रमाश्रमस्थाश्च सुस्रुवुः ॥१-९५-२९ (४१५३)
निरसुं जानुभिः कृत्वा विससर्ज च सोऽपतत् ।
तद्दृष्ट्वा विस्मयं जग्मुः कुमारस्य विचेष्टितम् ॥१-९५-३० (४१५४)
नित्यकालं वध्यमाना दैतेया राक्षसैः सह ।
कुमारस्य भयादेव नैव जग्मुस्तदाश्रमम् ॥' १-९५-३१ (४१५५)
ततोऽस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ।
कण्वेन सहिताः सर्वे दृष्ट्वा कर्मातिमानुषम् ॥१-९५-३२ (४१५६)
अस्त्वयं सर्वदमनः सर्वं हि दमयत्यसौ ।
स सर्वदमनो नाम कुमारः समपद्यत ॥१-९५-३३ (४१५७)
विक्रमेणौजसा चैव बलेन च समन्वितः ।
ग्अप्रेषयति दुष्यन्ते महिष्यास्तनयस्य च ॥१-९५-३४ (४१५८)
पाण्डुभावपरीताङ्गीं चिन्तया समभिप्लुताम् ।
लम्बालकां कृशां दीनां तथा मलिनवाससम् ॥१-९५-३५ (४१५९)
ग्शकुन्तलां च संप्रेक्ष्य प्रदध्यौ स मुनिस्तदा ।
शास्त्राणि सर्ववेदाश्च द्वादशाब्दस्य चाभवन्'॥ ॥१-९५-३६ (४१६०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

आदिपर्व - अध्याय ०९६
॥ श्रीः ॥
१.९६. अध्यायः ९६

Mahabharata - Adi Parva - Chapter Topics

शकुन्तलाया दुष्यन्तं प्रति प्रेषयितुं कण्वकृत उपदेशः ॥ १ ॥
हास्तिनपुरगमनविषयेकण्वशकुन्तलासर्वदमनानां विवादः ॥ २ ॥
कण्वेन स्वशिष्यद्वारा शकुन्तलासर्वदमनयोर्हास्तिनपुरप्रेषणम् ॥ ३ ॥
पुरप्रवेशान्निर्विण्णैः शिष्यैः कण्वाश्रमं प्रति निवर्तनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-९६-० (४१६१)
वैशम्पायन उवाच। १-९६-०क्ष् (६०३)
तं कुमारमृषिर्दृष्ट्वा कर्म चास्यातिमानुषम् ।
समयो यौवराज्याय इत्यनुध्याय स द्विजः ॥ १-९६-१ (४१६२)
ग्शकुन्तलां समाहूय कण्वो वचनमब्रवीत्। १-९६-२ (४१६३)
कण्व उवाच ।
शृणु भद्रे मम सुते मम वाक्यं शुचिस्मिते ॥ १-९६-२क्ष् (६०४)
पतिव्रतानां नारीणां विशिष्टमिति चोच्यते ।
पतिशुश्रूषणं पूर्वं मनोवाक्कायचेष्टितैः ॥ १-९६-३ (४१६४)
अनुज्ञाता मया पूर्वं पूजयैतद्व्रतं तव ।
एतेनैव च वृत्तेन पुण्याँल्लोकानवाप्य च ॥ १-९६-४ (४१६५)
तस्यान्ते मानुषे लोके विशिष्टां तप्स्यसे श्रियम् ।
तस्माद्भद्रेऽद्य यातव्यं समीपं पौरवस्य ह ॥ १-९६-५ (४१६६)
स्वयं नायाति मत्वा ते गतं कालं शुचिस्मिते ।
गत्वाऽऽराधय राजानं दुष्यन्तं हितकाम्यया ॥ १-९६-६ (४१६७)
दौष्यन्तिं यौवराज्यस्थं दृष्ट्वा प्रीतिमवाप्स्यसि ।
देवतानां गुरूणां च क्षत्रियाणां च भामिनि ॥ १-९६-७ (४१६८)
भर्तॄणां च विशेषेम हितं संगमनं भवेत् ।
तस्मात्पुत्रि कुमारेण गन्तव्यं मत्प्रियेप्सया ॥ १-९६-८ (४१६९)
प्रतिवाक्यं न दद्यास्त्वं शपिता मम पादयोः ॥ १-९६-९ (४१७०)
वैशम्पायन उवाच। १-९६-१०क्ष् (६०५)
एवमुक्त्वा सुतां तत्र पौत्रं कण्वोऽभ्यभाषत ।
परिष्वज्य च बाहुभ्यां मूर्ध्न्युपाघ्राय पौरवम् ॥ १-९६-१० (४१७१)
सोमवंशोद्भवो राजा दुष्यन्त इति विश्रुतः ।
तस्याग्रमहिषी चैषा तव माता शुचिव्रता ॥ १-९६-११ (४१७२)
गन्तुकामा भर्तृपार्श्वं त्वया सह सुमध्यमा ।
गत्वाऽभिवाद्य राजनं यौवराज्यमवाप्स्यसि ॥ १-९६-१२ (४१७३)
स पिता तव राजेन्द्रस्तस्य त्वं वशगो भव ।

पितृपैतामहं राज्यमातिष्ठस्व स्वभावतः ॥ १-९६-१३ (४१७४)
तस्मिन्काले स्वराज्यस्थो मामनुस्मर पौरव ॥ १-९६-१४ (४१७५)
वैशम्पायन उवाच। १-९६-१५क्ष् (६०६)
अभिवाद्य मुनेः पादौ पौरवो वाक्यमब्रवीत् ।
त्वं पिता मम विप्रर्षे त्वं माता त्वं गतिश्च मे ॥ १-९६-१५ (४१७६)
न चान्यं पितरं मन्ये त्वामृते तु महातपः ।
तव शुश्रूषणं पुण्यमिह लोके परत्र च ॥ १-९६-१६ (४१७७)
शकुन्तला भर्तृकामा स्वयं यातु यथेष्टतः ।
अहं सुश्रूषणपरः पादमूले वसामि वः ॥ १-९६-१७ (४१७८)
क्रीडां व्यालमृगैः सार्धं करिष्ये न पुरा यथा ।
त्वच्छासनपरो नित्यं स्वाध्यायं च करोम्यहम् ॥ १-९६-१८ (४१७९)
एवमुक्त्वा तु संश्लिष्य पादौ कण्वस्य तिष्ठतः ।
तस्य तद्वचनं श्रुत्वा प्ररुरोद शकुन्तला ॥ १-९६-१९ (४१८०)
स्नेहात्पितुश्च पुत्रस्य हर्षशोकसमन्विता ।
निशाम्य रुदतीमार्तां दौष्यन्तिर्वाक्यमब्रवीत् ॥ १-९६-२० (४१८१)
श्रुत्वा भगवतो वाक्यं किं रोदिषि शकुन्तले ।
गन्तव्यं काल्य उत्थाय भर्तृप्रीतिस्ववास्ति चेत् ॥ १-९६-२१ (४१८२)
शकुन्तलोवाच। १-९६-२२क्ष् (६०७)
एकस्तु कुरुते पापं फलं भुङ्क्ते महाजनः ।
मया निवारितो नित्यं न करोषि वचो मम ॥ १-९६-२२ (४१८३)
निःसृतान्कुञ्जरान्नित्यं बाहुभ्यां संप्रमथ्य वै ।
वनं च लोडयन्नित्यं सिंहव्याघ्रगणैर्वृतम् ॥ १-९६-२३ (४१८४)
एवंविधानि चान्यानि कृत्वा वै पुरुनन्दन ।
रुषितो भगवांस्तात तस्मादावां विवासितौ ॥ १-९६-२४ (४१८५)
नाहं गच्छामि दुष्यन्तं नास्मि पुत्र हितैषिणी ।
पादमूले वसिष्यामि महर्षेर्भावितात्मनः ॥ १-९६-२५ (४१८६)
वैशम्पायन उवाच। १-९६-२६क्ष् (६०८)
एवमुक्त्वा तु रुदती पपात मुनिपादयोः ।
एवं विलपतीं कण्वश्चानुनीय च हेतुभिः ।
पुनः प्रोवाच भगवानानृशंस्याद्धितं वचः ॥ १-९६-२६ (४१८७)
कण्व उवाच। १-९६-२७क्ष् (६०९)
शकुन्तले शृणुष्वेदं हितं पथ्यं च भामिनि ।
पतिव्रताभावगुणान्हित्वा साध्यं न किंचन ॥ १-९६-२७ (४१८८)
प्रतिव्रतानां देवा वै तुष्टाः सर्वरप्रदाः ।
प्रसादं च करिष्यन्ति आपदो मोक्षयन्ति च ॥ १-९६-२८ (४१८९)
पतिप्रसादात्पुण्यं च प्राप्नुवन्ति न चाशुभम् ।

तस्माद्गत्वा तु राजानमाराधय शुचिस्मिते ॥ १-९६-२९ (४१९०)
वैशम्पायन उवाच। १-९६-३०क्ष् (६१०)
शकुन्तलां तथोक्त्वा वै शाकुन्तलमथाब्रवीत् ।
दौहित्रो मम पौत्रस्त्वमिलिलस्य महात्मनः ॥ १-९६-३० (४१९१)
शृणुष्व वचनं सत्यं प्रब्रवीमि तवानघ ।
मनसा भर्तृकामा वै वाग्भिरुक्त्वा पृथग्विधम् ॥ १-९६-३१ (४१९२)
गन्तुं नेच्छति कल्याणी तस्मात्तात वहस्व वै ।
शक्तस्त्वं प्रतिगन्तुं च मुनिभिः सह पौरव ॥' १-९६-३२ (४१९३)
इत्युक्त्वा सर्वदमनं कण्वः शिष्यानथाब्रवीत् ।
शकुन्तलामिमां शीघ्रं सपुत्रामाश्रमादितः ॥ १-९६-३३ (४१९४)
भर्तुः प्रापयताभ्याशं सर्वलक्षणपूजिताम् ।
नारीणां चिरवासो हि बान्धवेषु न रोचते ॥ १-९६-३४ (४१९५)
कीर्तिचारित्रधर्म्नस्तस्मान्नयत मा चिरम् ॥ १-९६-३५ (४१९६)
ग्वैशम्पायन उवाच। १-९६-३६क्ष् (६११)
धर्माभिपूजितं पुत्रं काश्यपेन निशाम्य तु ।
काश्यपात्प्राप्य चानुज्ञां मुमुदे च शकुन्तला ॥ १-९६-३६ (४१९७)
कण्वस्य वचनं श्रुत्वा प्रतिगच्छेति चासकृत् ।
तथेत्युक्त्वा तु कण्वं च मातरं पौरवोऽब्रवीत् ।
किं चिरायसि मातस्त्वं गमिष्यामो नृपालयम् ॥ १-९६-३७ (४१९८)
एवमुक्त्वा तु तां देवीं दुष्यन्तस्य महात्मनः ।
अभिवाद्य मुनेः पादौ गन्तुमैच्छत्स पौरवः ॥ १-९६-३८ (४१९९)
शकुन्तला च पितरमभिवाद्य कृताञ्जलिः ।
प्रदक्षिणीकृत्य तदा पितरं वाक्यमब्रवीत् ॥ १-९६-३९ (४२००)
अज्ञानान्मे पिता चेति दुरुक्तं वापि चानृतम् ।
अकार्यं वाप्यनिष्टं वा क्षन्तुमर्हति तद्भवान् ॥ १-९६-४० (४२०१)
एवमुक्तो नतशिरा मुनिर्नोवाच किंचन ।
मनुष्यभावात्कण्वोऽपि मुनिरश्रूण्यवर्तयत् ॥ १-९६-४१ (४२०२)
अब्भक्षान्वायुभक्षांश्च शीर्णपर्णाशनान्मुनीन् ।
फलमूलाशिनो दान्तान्कृशान्धमनिसंततान् ॥ १-९६-४२ (४२०३)
व्रतिनो जटिलान्मुण्डान्वल्कलाजिनसंवृतान् ।
समाहूय मुनिः कण्वः कारुण्यादिदमब्रवीत् ॥ १-९६-४३ (४२०४)
मया तु लालिता नित्यं मम पुत्री यशस्विनी ।
वने जाता विवृद्धा च न च जानाति किंचन ॥ १-९६-४४ (४२०५)
आश्रमात्तु पथा सर्वैर्नीयतां क्षत्रियालयम् ।
द्वितीययोजने विप्राः प्रतिष्ठानं प्रतिष्ठितम् ॥ १-९६-४५ (४२०६)
प्रतिष्ठाने पुरे राजा शाकुन्तलपितामहः ।

अध्युवास चिरं कालमुर्वश्या सहितः पुरा ॥१-९६-४६ (४२०७)
अनूपजाङ्गलयुतं धनधान्यसमाकुलम् ।
प्रतिष्ठितं पुरवरं गङ्गायामुनसङ्गमे ॥१-९६-४७ (४२०८)
तत्र सङ्गममासाद्य स्नात्वा हुतहुताशनाः ।
शाकमूलफलाहारा निवर्तध्वं तपोधनाः ।
अन्यथा तु भवेद्विप्रा अध्वनो गमने श्रमः ॥' १-९६-४८ (४२०९)
तथेत्युक्त्वा च ते सर्वे प्रातिष्ठन्त महौजसः ।
ग्शकुन्तलां पुरस्कृत्य दुष्यन्तस्य पुरं प्रति ॥१-९६-४९ (४२१०)
गृहीत्वा चामरप्रख्यं पुत्रं कमललोचनम् ।
आजग्मुश्च पुरं रम्यं दुष्यन्ताध्युषितं वनात् ॥१-९६-५० (४२११)
शकुन्तलां समादाय मुनयो धर्मवत्सलाः ।
ते वनानि नदीः शैलान्गिरिप्रस्रवणानि च ॥१-९६-५१ (४२१२)
कन्दराणि नितम्बांश्च राष्ट्राणि नगराणि च ।
आश्रमाणि च पुण्यानि गत्वा चैव गतश्रमाः ॥१-९६-५२ (४२१३)
शनैर्मध्याह्नवेलायां प्रतिष्ठानं समाययुः ।
तां पुरीं पुरुहूतेन ऐलस्यार्थे विनिर्मिताम् ॥१-९६-५३ (४२१४)
परिघाट्टालकैर्मुख्यैरुपकल्पशतैरपि ।
शतघ्नीचक्रयन्त्रैश्च गुप्तामन्यैर्दुरासदाम् ॥१-९६-५४ (४२१५)
हर्म्यप्रसादसंबाधां नानापण्यविभूषिताम् ।
मण्टपैः ससभै रम्यैः प्रपाभिश्च समावृताम् ॥१-९६-५५ (४२१६)
राजमार्गेण महता सुविभक्तेन शोभिताम् ।
कैलासशिखराकारैर्गोपुरैः समलङ्कृताम् ॥१-९६-५६ (४२१७)
द्वारतोरणनिर्यूहैर्मङ्गलैरुपशोभिताम् ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥१-९६-५७ (४२१८)
सर्वपुष्करिणीभिश्च उद्यानैश्च समावृताम् ।
वर्णाश्रमैः स्वधर्मस्थैर्नित्योत्सवसमाहितैः ॥१-९६-५८ (४२१९)
धनधान्यसमृद्धैश्च संतुष्टै रत्नपूजितैः ।
कृतयज्ञैश्च विद्वद्भिरग्निहोत्रपरैः सदा ॥१-९६-५९ (४२२०)
वर्जिता कार्यकरणैर्दानशीलैर्दयापरैः ।
अधर्मभीरुभिः सर्वैः स्वर्गलोकजिगीषुभिः ॥१-९६-६० (४२२१)
एवंविधजनोपेतमिन्द्रलोकमिवापरम् ।
तस्मिन्नगरमध्ये तु राजवेश्म प्रतिष्ठितम् ॥१-९६-६१ (४२२२)
इन्द्रसद्मप्रतीकाशं संपूर्णं वित्तसंचयैः ।
तस्य मध्ये सभा दिव्या नानारत्नविभूषिता ॥१-९६-६२ (४२२३)
तस्यां सभायां राजर्षिः सर्वालङ्कारभूषितः ।
ब्राह्मणैः क्षत्रियैश्चापि मन्त्रिभिश्चापि संवृतः ॥१-९६-६३ (४२२४)

संस्तूयमानो राजेन्द्रः सूतमागधबन्दिभिः ।
कार्यार्थिषु तदाऽभ्येत्य कृत्वा कार्यं गतेषु सः ॥ १-९६-६४ (४२२५)
सुखासीनोऽभवद्राजा तस्मिन्काले महर्षयः ।
शकुन्तानां स्वनं श्रुत्वा निमित्तज्ञास्त्वलक्षयन् ॥ १-९६-६५ (४२२६)
शकुन्तले निमित्तानि शोभनानि भवन्ति नः ।
कार्यसिद्धिं वदन्त्येते ध्रुवं राज्ञी भविष्यसि ।
अस्मिंस्तु दिवसे पुत्रो युवराजो भविष्यति ॥ १-९६-६६ (४२२७)
वैशम्पायन उवाच। १-९६-६७क्ष् (६१२)
वर्धमानपुरद्वारं तूर्यघोषनिनादितम् ।
शकुन्तलां पुरस्कृत्य विविशुस्ते महर्षयः ॥ १-९६-६७ (४२२८)
प्रविशन्तं नृपसुतं प्रशशंसुश्च वीक्षकाः ।
वर्धमानपुरद्वारं प्रविशन्नेव पौरवः ॥ १-९६-६८ (४२२९)
इन्द्रलोकस्थमात्मानं मेने हर्षसमन्वितः ॥ १-९६-६९ (४२३०)
ततो वै नागराः सर्वे समाहूय परस्परम् ।
द्रष्टुकामा नृपसुतं समपद्यन्त भारत ॥ १-९६-७० (४२३१)
नागरा ऊचुः। १-९६-७१क्ष् (६१३)
देवतेव जनस्याग्रे भ्राजते श्रीरिवागता ।
जयन्तेनेव पौलोमी इन्द्रलोकादिहागता ॥ १-९६-७१ (४२३२)
इति ब्रुवन्तस्ते सर्वे महर्षीनिदमब्रुवन् ।
अभिवादयन्तः सहिता महर्षीन्देववर्चसः ॥ १-९६-७२ (४२३३)
अद्य नः सफलं जन्म कृतार्थाश्च ततो वयम् ।
एवं ये स्म प्रपश्यामो महर्षीन्सूर्यवर्चसः ॥ १-९६-७३ (४२३४)
वैशम्पायन उवाच। १-९६-७४क्ष् (६१४)
इत्युक्त्वा सहिताः केचिदन्वगच्छन्त पौरवम् ।
हैमवत्याः सुतमिव कुमारं पुष्करेक्षणम् ॥ १-९६-७४ (४२३५)
ये केचिदब्रुवन्मूढाः शाकुन्तलदिदृक्षवः ।
कृष्णाजिनेन संछन्नानिच्छन्तो ह्यवेक्षितुम् ॥ १-९६-७५ (४२३६)
पिशाचा इव दृश्यन्ते नागराणां विरूपिणः ।
विना सन्ध्यां पिशाचास्ते प्रविशन्ति पुरोत्तमम् ॥ १-९६-७६ (४२३७)
क्षुत्पिपासार्दितान्दीनान्वल्कलाजिनवाससः ।
त्वगस्थिभूतान्निर्मांसान्धमनीसन्ततानपि ॥ १-९६-७७ (४२३८)
पिङ्गलाक्षान्पिङ्गजटान्दीर्घदन्तान्निरूदरान् ।
विशीर्षकानूर्ध्वहस्तान्दृष्ट्वा हास्यन्ति नागराः ॥ १-९६-७८ (४२३९)
एवमुक्तवतां तेषां गिरं श्रुत्वा महर्षयः ।
अन्योन्यं ते समाहूय इदं वचनमब्रुवन् ॥ १-९६-७९ (४२४०)
उक्तं भगवता वाक्यं न कृतं सत्यवादिना ।

पुरप्रवेशनं नात्र कर्तव्यमिति शासनम् ॥१-९६-८० (४२४१)
किं कारणं प्रवेक्ष्यामो नगरं दुर्जनैर्वृतम् ।
त्यक्तसङ्गस्य च मुनेर्नगरे किं प्रयोजनम् ॥१-९६-८१ (४२४२)
गमिष्यामो वनं तस्माद्गङ्गायामुनसङ्गमम् ।
एवमुक्त्वा मुनिगणाः प्रतिजग्मुर्यथागतम् ॥ ॥१-९६-८२ (४२४३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि षण्णवतितमोऽध्यायः
॥ ९६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-९६-१० पुत्र्याः पुत्रः पौत्रः दौहित्र इत्यर्थः ॥

आदिपर्व - अध्याय ०९७
॥ श्रीः ॥
१.९७. अध्यायः ९७

Mahabharata - Adi Parva - Chapter Topics
सपुत्रायाः शकुन्तलाया दुष्यन्तसमीपगमनं ॥१ ॥
तयोः संवादश्च ॥२ ॥

Mahabharata - Adi Parva - Chapter Text

१-९७-० (४२४४)
वैशम्पायन उवाच।१-९७-०क्ष् (६१५)
गतान्मुनिगणान्दृष्ट्वा पुत्रं संगृह्य पाणिना ।
मातापितृभ्यां रहिता यथा शोचन्ति दारकाः ॥१-९७-१ (४२४५)
तथा शोकपरीताङ्गी धृतिमालम्ब्य दुःखिता ।
गतेषु तेषु विप्रेषु राजमार्गेण भामिनी ॥१-९७-२ (४२४६)
पुत्रेणैव सहायेन सा जगाम शनैः शनैः ।
अदृष्टपूर्वान्पश्यन्वै राजमार्गेण पौरवः ॥१-९७-३ (४२४७)
हर्म्यप्रसादचैत्यांश्च सभा दिव्या विचित्रिताः ।
कौतूहलसमाविष्टो दृष्ट्वा विस्मयमागतः ॥१-९७-४ (४२४८)
सर्वे ब्रुवन्ति तां दृष्ट्वा पद्महीनामिव श्रियम् ।
गत्या च संहीसदृशीं कोकिलेन स्वरे समाम् ॥१-९७-५ (४२४९)
मुखेन चन्द्रसदृशीं श्रिया पद्मालयासमाम् ।
स्मितेन कुन्दसदृशीं पद्मगर्भसमत्वचम् ॥१-९७-६ (४२५०)

पद्मपत्रविशालाक्षीं तप्तजाम्बूनदप्रभाम् ।
करान्तमितमध्यैषा सुकेशी संहतस्तनी ॥ १-९७-७ (४२५१)
जघनं सुविशालं वै ऊरू करिकरोपमौ ।
रक्ततुङ्गतलौ पादौ धरण्यां सुप्रतिष्ठितौ ॥ १-९७-८ (४२५२)
एवं रूपसमायुक्ता स्वर्गलोकादिवागता ।
इति स्म सर्वेऽमन्यन्त दुष्यन्तनगरे जनाः ॥ १-९७-९ (४२५३)
पुनः पुनरवोचंस्ते शाकुन्तलगुणानपि ।
सिंहेक्षणः सिंहदंष्ट्रः सिंहस्कन्धो महाभुजः ॥ १-९७-१० (४२५४)
सिंहोरस्कः सिंहबलः सिंहविक्रान्तगाम्ययम् ।
पृथ्वंसः पृथुवक्षाश्च छत्राकारशिरा महान् ॥ १-९७-११ (४२५५)
पाणिपादतले रक्तो रक्तास्यो दुन्दुभिस्वनः ।
राजलक्षणयुक्तश्च राजश्रीश्चास्य लक्ष्यते ॥ १-९७-१२ (४२५६)
आकारेण च रूपेण शरीरेणापि तेजसा ।
दुष्यन्तेन समो ह्येष कस्य पुत्रो भविष्यति ॥ १-९७-१३ (४२५७)
एवं ब्रुवन्तस्ते सर्वे प्रशशंसुः सहस्रशः ।
युक्तिवादानवोचन्त सर्वाः प्राणभृतः स्त्रियः ॥ १-९७-१४ (४२५८)
बान्धवा इव सस्नेहा अनुजग्मुः शकुन्तलाम् ।
पौराणां तद्वचः श्रुत्वा तूष्णींभूता शकुन्तला ॥ १-९७-१५ (४२५९)
वेश्मद्वारं समासाद्य विह्वला सा नृपात्मजा ।
चिन्तयामास सहसा कार्यगौरवकारणात् ॥ १-९७-१६ (४२६०)
लज्जया च परीताङ्गी राजन्राजसमक्षतः ।
अघृणा किं नु वक्ष्यामि दुष्यन्तं मम कारणात् ॥ १-९७-१७ (४२६१)
एवमुक्त्वा तु कृपणा चिन्तयन्ती शकुन्तला ।'
अभिसृत्य च राजानं वेदिता सा प्रवेशिता ॥ १-९७-१८ (४२६२)
सह तेन कुमारेण तरुणादित्यवर्चसा ।
ŗसिंहासनस्थं राजानं महेन्द्रसदृशद्युतिम् ॥ १-९७-१९ (४२६३)
शकुन्तला नतशिराः परं हर्षमवाप्य च ।'
पूजयित्वा यथान्यायमब्रवीत्तं शकुन्तला ॥ १-९७-२० (४२६४)
ŗअभिवादय राजानं पितरं ते दृढव्रतम् ।
एवमुक्त्वा सुतं तत्र लज्जानतमुखी स्थिता ॥ १-९७-२१ (४२६५)
स्तम्भमालिङ्ग्य राजानं प्रसीदस्वेत्युवाच सा ।
शाकुन्तलोपि राजानमभिवाद्य कृताञ्जलिः ॥ १-९७-२२ (४२६६)
हर्षेणोत्फुल्लनयनो राजानं चान्ववैक्षत ।
दुष्यन्तो धर्मबुद्ध्या तु चिन्तयन्नेव सोब्रवीत् ॥ १-९७-२३ (४२६७)
किमागमनकार्यं ते ब्रूहि त्वं वरवर्णिनि ।
करिष्यामि न संदेहः सपुत्राया विशेषतः ॥ १-९७-२४ (४२६८)

शकुन्तलोवाच। १-९७-२५क्ष् (६१६)
प्रसीदस्व महाराज वक्ष्यामि पुरुषोत्तम ।
एष पुत्रो हि ते राजन्मय्युत्पन्नः परंतप ॥ १-९७-२५ (४२६९)
तस्मात्पुत्रस्त्वया राजन्यौवराज्येऽभिषिच्यताम् ।
यथोक्तमाश्रमे तस्मिन्वर्तस्व पुरुषोत्तम ॥ १-९७-२६ (४२७०)
मया समागमे पूर्वं कृतः स समयस्त्वया ।
तत्त्वं स्मर महाबाहो कण्वाश्रमपदं प्रति ॥ १-९७-२७ (४२७१)
वैशम्पायन उवाच। १-९७-२८क्ष् (६१७)
तस्योपभोगसक्तस्य स्त्रीषु चान्यासु भारत ।
शकुन्तला सपुत्रा च मनस्यन्तरधीयत ॥ १-९७-२८ (४२७२)
स धारयन्मनस्येनां सपुत्रां सस्मितां तदा ।
तदोपगृह्य मनसा चिरं सुखमवाप सः ॥ १-९७-२९ (४२७३)
सोऽथ श्रुत्वापि तद्वाक्यं तस्या राजा स्मरन्नपि ।
अब्रवीन्न स्मरामीति त्वया भद्रे समागमम् ॥ १-९७-३० (४२७४)
मैथुनं च वृथा नाहं गच्छेयमिति मे मतिः ।
नाभिजानामि कल्याणि त्वया सह समागमम्'॥ १-९७-३१ (४२७५)
धर्मार्थकामसंबन्धं न स्मरामि त्वया सह ।
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ॥ ॥ १-९७-३२ (४२७६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥

आदिपर्व - अध्याय ०९८
॥ श्रीः ॥
१.९८. अध्यायः ९८

Mahabharata - Adi Parva - Chapter Topics
शकुन्तलायाः स्वपाणिग्रहणमनङ्गीकुर्वता दुष्यन्तेन सह विवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

एवमुक्ता वरारोहा व्रीडितेव मनस्विनी ।
विसंज्ञेव च दुःखेन तस्थौ स्थूणेव निश्चला ॥ १-९८-१ (४२७७)
संरम्भामर्षताम्राक्षी स्फुरमाणोष्ठसंपुटा ।
कटाक्षैर्निर्दहन्तीव तिर्यग्राजानमैक्षत ॥ १-९८-२ (४२७८)
आकारं गूहमाना च मन्युना च समीरितम् ।
तपसा संभृतं तेजो धारयामास वै तदा ॥ १-९८-३ (४२७९)

सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ।
भर्तारमभिसंप्रेक्ष्य यथान्यायं वचोऽब्रवीत् ॥१-९८-४ (४२८०)
जानन्नपि महाराज कस्मादेवं प्रभाषसे ।
न जानामीति निःशङ्कं यथान्यः प्राकृतस्तथा ॥१-९८-५ (४२८१)
तस्य ते हृदयं वेद सत्यस्यैवानृतस्य च ।
साक्षिणं बत कल्याणमात्मानमवमन्यसे ॥१-९८-६ (४२८२)
योऽन्यथा सन्तमात्मानन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥१-९८-७ (४२८३)
एकोऽहमस्मीति च मन्यसे त्वं
न हृच्छयं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्मणः पापकस्य
तस्यान्तिके त्वं वृजिनं करोषि ॥ १-९८-८ (४२८४)
'धर्म एव हि साधूनां सर्वेषां हितकारणम् ।
नित्यं मिथ्याविहीनानां न च दुःखावहो भवेत्'॥१-९८-९ (४२८५)
मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥१-९८-१० (४२८६)
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥ १-९८-११ (४२८७)
यमो वैवस्वतस्तस्य निर्यातयति दुष्कृतम् ।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥१-९८-१२ (४२८८)
न तुष्यति च यस्यैष पुरुषस्य दुरात्मनः ।
तं यमः पापकर्माणं निर्भर्त्सयति दुष्कृतम् ॥१-९८-१३ (४२८९)
योऽवमत्यात्मनात्मानमन्यथा प्रतिपद्यते ।
न तस्य देवाः श्रेयांसो यस्यात्मापि न कारणम् ॥१-९८-१४ (४२९०)
स्वयं प्राप्तेति मामेवं मावमंस्था पतिव्रताम् ।
अर्चार्हां नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥१-९८-१५ (४२९१)
किमर्थं मां प्राकृतवदुपप्रेक्षसि संसदि ।
नखल्वहमिदं शून्ये रौमि किं न शृणोषि मे ॥१-९८-१६ (४२९२)
यदि मे याचमानाया वचनं न करिष्यसि ।
दुष्यन्त शतधा त्वद्य मूर्धा ते विफलिष्यति ॥१-९८-१७ (४२९३)
जायां पतिः संप्रविश्य यदस्यां जायते पुनः ।
जायायास्तद्धि जायात्वं पौराणाः कवयो विदुः ॥१-९८-१८ (४२९४)
यदागमवतः पुंसस्तदपत्यं प्रजायते ।
तत्तारयति संतत्या पूर्वप्रेतान्पितामहान् ॥१-९८-१९ (४२९५)

पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ।
तस्मात्पुत्र इति प्रोक्तः पूर्वमेव स्वयंभुवा ॥१-९८-२० (४२९६)
ग्पुत्रेण लोकाञ्जयन्ति पौत्रेणानन्त्यमश्नुते ।
अथ पौत्रस्य पुत्रेण मोदन्ते प्रपितामहाः ॥' १-९८-२१ (४२९७)
सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥१-९८-२२ (४२९८)
अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।
भार्या मूलं त्रिवर्गस्य यः सभार्यः स बन्धुमान् ॥१-९८-२३ (४२९९)
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियावृताः ॥१-९८-२४ (४३००)
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥१-९८-२५ (४३०१)
कान्तारेष्वपि विश्रामो जनस्याध्वनि कस्य वै ।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः। १-९८-२६ (४३०२)
संसरन्तमभिप्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥१-९८-२७ (४३०३)
प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वप्रेतं तु भर्तारं पश्चात्साप्यनुगच्छति ॥१-९८-२८ (४३०४)
एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यामिह लोके परत्र च ॥१-९८-२९ (४३०५)
ग्पोषणार्थं शरीरस्य पाथेयं स्वर्गतस्य वै।'
आत्माऽऽत्मनैव जनितः पुत्र इत्युच्यते बुधैः ॥ १-९८-३० (४३०६)
तस्माद्भार्यां पतिः पश्येन्मातृवत्पुत्रमातरम् ।
ग्अन्तरात्मैव सर्वस्य पुत्रो नामोच्यते सदा ॥१-९८-३१ (४३०७)
गती रूपं च चेष्टा च आवर्ता लक्षणानि च ।
पितॄणां यानि दृश्यन्ते पुत्राणां सन्ति तानि च ॥१-९८-३२ (४३०८)
तेषां शीलगुणाचारास्तत्संपर्काच्छुभाशुभात्।'
भार्यायां जनितं पुत्रमादर्शे स्वमिवाननम् ॥ १-९८-३३ (४३०९)
जनिता मोदते प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ।
ग्पतिव्रतारूपधराः परबीजस्य संग्रहात् ॥१-९८-३४ (४३१०)
कुलं विनाश्य भर्तॄणां नरकं यान्ति दारुणम् ।
परेण जनिताः पुत्राः स्वभार्यायां यथेष्टतः ॥१-९८-३५ (४३११)
मम पुत्रा इति मतास्ते पुत्रा अपि शत्रवः ।
द्विषन्ति प्रतिकुर्वन्ति न ते वचनंकारिणः ॥१-९८-३६ (४३१२)
द्वेष्टि तांश्च पिता चापि स्वबीजे न तथा नृप ।
न द्वेष्टि पितरं पुत्रो जनितारमथापि वा ॥१-९८-३७ (४३१३)

न द्वेष्टि जनिता पुत्रं तस्मादात्मा सुतो भवेत्।'
दह्यमाना मनोदुःखैर्व्याधिभिस्तुमुलैर्जनः ॥ १-९८-३८ (४३१४)
ह्लादन्ते स्वेषु दारेषु घर्मार्ताः सलिलेष्विव ।
ग्विप्रवासकृशा दीना नरा मलिनवाससः ॥ १-९८-३९ (४३१५)
तेऽपि स्वदारांस्तुष्यन्ति दरिद्रा धनलाभवत्।'
अप्रियोक्तोपि दाराणां न ब्रूयादप्रियं बुधः ॥ १-९८-४० (४३१६)
रतिं प्रीतिं च धर्मं च तदायत्तमवेक्ष्य च ।
ग्आत्मनोऽर्धमिति श्रौतं सा रक्षति धनं प्रजाः ॥ १-९८-४१ (४३१७)
शरीरं लोकयात्रां वै धर्मं स्वर्गमृषीन्पितॄन्।'
आत्मनो जन्मनः क्षेत्रं पुण्या रामाः सनातनाः ॥ १-९८-४२ (४३१८)
ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजा-।
ग्देवानामपि का शक्तिः कर्तुं संभवमात्मनः ॥ १-९८-४३ (४३१९)
पण्डितस्यापि लोकेषु स्त्रीषु सृष्टिः प्रतिष्ठिता ।
ऋषिभ्यो ह्यषयः केचिच्चण्डालीष्वपि जज्ञिरे'॥ १-९८-४४ (४३२०)
परिसृत्य यथा सूनुर्धरणीरेणुकुण्ठितः ।
पितुरालिङ्गतेऽङ्गानि किमस्त्यभ्यधिकं ततः ॥ १-९८-४५ (४३२१)
स त्वं सूनुमनुप्राप्तं साभिलाषं मनस्विनम् ।
प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ॥ १-९८-४६ (४३२२)
अण्डानि बिभ्रति स्वानि न त्यजन्ति पिपीलिकाः ।
किं पुनस्त्वं न मन्येथाः सर्वथा पुत्रमीदृशम् ॥ १-९८-४७ (४३२३)
न भरेथाः कथं नु त्वं मयि जातं स्वमात्मजम् ।
ग्ममाण्डानीति वर्ध्ते कोकिलाण्डानि वायसाः ॥ १-९८-४८ (४३२४)
किं पुनस्त्वं न मन्येथाः सर्वज्ञः पुत्रमीदृशम् ।
मलयाच्चन्दनं जातमतिशीतं वदन्ति वै ॥ १-९८-४९ (४३२५)
शिशोरालिङ्गनं तस्माच्चन्दनादधिकं भवेत्।'
न वाससां न रामाणां नापां स्पर्शस्तथाविधः ॥ १-९८-५० (४३२६)
शिशुनालिङ्ग्यमानस्य स्पर्शः सूनोर्यथा सुखः ।
पुत्रस्पर्शात्प्रियतरः स्पर्शो लोके न विद्यते ॥ १-९८-५१ (४३२७)
स्पृशतु त्वां समालिङ्ग्य पुत्रोऽयं प्रियदर्शनः ।
ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ॥ १-९८-५२ (४३२८)
मुरुर्गरीयसां श्रेष्टः पुत्रः स्पर्शवतां वरः ॥
त्रिषु वर्षेषु पूर्णेषु प्रजातोऽयमरिन्दमः ॥ १-९८-५३ (४३२९)
ग्अद्यायं मन्नियोगात्तु तवाह्वानं प्रतीक्षते ।
कुमारो राजशार्दूल तव शोकप्रणाशनः ॥' १-९८-५४ (४३३०)
आहर्ता वाजिमेधस्य शतसङ्ख्यस्य पौरवः ।
ग्राजसूयादिकानन्यान्क्रतूनमितदक्षिणान् ॥ १-९८-५५ (४३३१)

इति गौरन्तरिक्षे मां सूतके ह्यवदत्पुरा ।
हन्त स्वमङ्कमारोप्य स्नेहाद्ग्रामान्तरं गताः ॥ १-९८-५६ (४३३२)
मूर्ध्नि पुत्रानुपाघ्राय प्रतिनन्दन्ति मानवाः ।
वेदेष्वपि वदन्तीमं मन्त्रग्रामं द्विजातयः ॥ १-९८-५७ (४३३३)
जातकर्मणि पुत्राणां तवापि विदितं ध्रुवम् ।
अङ्गादङ्गात्संभवसि हृदयादधिजायसे ॥ १-९८-५८ (४३३४)
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ।
उपजिघ्रन्ति पितरो मन्त्रेणानेन मूर्धनि ॥ १-९८-५९ (४३३५)
पोषणं त्वदधीनं मे सन्तानमपि चाक्षयम् ।
तस्मात्त्वं जीव मे पुत्र स सुखी शरदां शतम् ॥ १-९८-६० (४३३६)
एको भूत्वा द्विधा भूत इति वादः प्रवर्तते ।
त्वदङ्गेभ्यः प्रसूतोऽयं पुरुषात्पुरुषः परः ॥ १-९८-६१ (४३३७)
सरसीवामलेऽऽत्मानं द्वितीयं पश्य ते सुतम् ।
‘सरसीवामले सोमं प्रेक्षात्मानं त्वमात्मनि’॥ १-९८-६२ (४३३८)
यथाचाहवनीयोऽग्निर्वर्हपत्यात्प्रणीयते ।
एवं त्वत्तः प्रणीतोऽयं त्वमेकः सन्द्विधा कृतः ॥ १-९८-६३ (४३३९)
मृगापकृष्टेन हि वै मृगयां परिधावता ।
अहमासादिता राजन्कुमारी पितुराश्रमे ॥ १-९८-६४ (४३४०)
उर्वशी पूर्वचित्तिश्च सहजन्या च मेनका ।
विश्वाची च घृताची च षडेवाप्सरसां वराः ॥ १-९८-६५ (४३४१)
तासां वै मेनका नाम ब्रह्मयोनिर्वराप्सराः ।
दिवः संप्राप्य जगतीं विश्वामित्रादजीजनत् ॥ १-९८-६६ (४३४२)
‘श्रीमानृषिर्धर्मपरो वैश्वानर इवापरः ।
ब्रह्मयोनिः कुशो नाम विश्वामित्रपितामहः ॥ १-९८-६७ (४३४३)
कुशस्य पुत्रो बलवान्कुशनाभश्च धार्मिकः ।
गाधिस्तस्य सुतो राजन्विश्वामित्रस्तु गाधिजः ॥ १-९८-६८ (४३४४)
एवंविधो मम पिता मेनका जननी वरा।’
सा मां हिमवतः पृष्ठे सुषुवे मेनकाऽप्सराः ॥ १-९८-६९ (४३४५)
परित्यज्य च मां याता परात्मजमिवासती ।
‘पक्षिणः पुम्यवन्तस्ते सहिता धर्मतस्तदा ॥ १-९८-७० (४३४६)
पक्षैस्तैरभिगुप्ता च तस्मादस्मि शकुन्तला ।
ततोऽहमृषिणा दृष्टा काश्यपेन महात्मना ॥ १-९८-७१ (४३४७)
जलार्थमग्निहोत्रस्य गतं दृष्ट्वा तु पक्षिणः ।
न्यासभूतामिव मुनेः प्रददुर्मां दयावतः ॥ १-९८-७२ (४३४८)
कण्वस्त्वालोक्य मां प्रीतो हसन्तीति हविर्भुजः ।
स माऽरणिमिवादाय स्वमाश्रममुपागमत् ॥ १-९८-७३ (४३४९)

सा वै संभाविता राजन्ननुक्रोशान्महर्षिणा ।
तेनैव स्वसुतेवाहं राजन्वै वरवर्णिनी ॥ १-९८-७४ (४३५०)
विश्वामित्रसुता चाहं वर्धिता मुनिना नृप ।
यौवने वर्तमानां च दृष्टवानसि मां नृप ॥ १-९८-७५ (४३५१)
आश्रमे पर्णशालायां कुमारीं विजने तदा ।
धात्रा प्रचोदितां शून्ये पित्रा विरहितां मिथः ॥ १-९८-७६ (४३५२)
वाग्भिस्त्वं सूनृताभिर्मामपत्यार्थमचूचुदः ।
अकार्षीस्त्वाश्रमे वासं धर्मकामार्थनिश्चितम् ॥ १-९८-७७ (४३५३)
गान्धर्वेण विवाहेन विधिना पाणिमग्रहीः ।
साऽहं कुलं च शीलं च सत्यवादित्वमात्मनः ॥ १-९८-७८ (४३५४)
स्वधर्मं च पुरस्कृत्य त्वामद्य शरणं गता ।
तस्मान्नार्हसि संश्रुत्य तथेति वितथं वचः ॥ १-९८-७९ (४३५५)
स्वधर्मं पृष्ठतः कृत्वा परित्यक्तुमुपस्थिताम् ।
त्वन्नाथां लोकनाथस्त्वं नार्हसि त्वमनागसम्'॥ १-९८-८० (४३५६)
किं नु कर्माशुभं पूर्वं कृतवत्यस्मि पार्थिव ।
यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति वै त्वया ॥ १-९८-८१ (४३५७)
कामं त्वया परित्यक्ता गमिष्याम्यहमाश्रमम् ।
इमं बालं तु संत्युक्तं नार्हस्यात्मजमात्मना ॥ १-९८-८२ (४३५८)
दुष्यन्त उवाच। १-९८-८३क्ष् (६१८)
न पुत्रमभिजानामि त्वयि जातं शकुन्तले ।
असत्वचना नार्यः कस्ते श्रद्धास्यते वचः ॥ १-९८-८३ (४३५९)
ग्अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे ।
विशेषतो मत्सकाशे दुष्टतापसि गम्यताम्'॥ १-९८-८४ (४३६०)
क्व महर्षिस्तपस्युग्रः क्वाप्सराः सा च मेनका ।
क्व च त्वमेवं कृपणा तापसीवेषधारिणी ॥ १-९८-८५ (४३६१)
अतिकायश्च पुत्रस्ते बालोऽतिबलवानयम् ।
कथमल्पेन कालेन सालस्कन्ध इवोद्गतः ॥ १-९८-८६ (४३६२)
सुनिकृष्टा च योनिस्ते पुंश्चली प्रतिभासि मे ।
यदृच्छया कामरागाज्जाता मेनकया ह्यसि ॥ १-९८-८७ (४३६३)
सर्वमेव परोक्षं मे यत्त्वं वदसि तापसि ।
ग्सर्वा वामाः स्त्रियो लोके सर्वाः कामपरायणाः ॥ १-९८-८८ (४३६४)
सर्वाः स्त्रियः परवशाः सर्वाः क्रोधसमाकुलाः ।
असत्योक्ताः स्त्रियः सर्वा न कण्वं वक्तुमर्हसि'॥ १-९८-८९ (४३६५)
मेनका निरनुक्रोशा वर्धकी जननी तव ।
यया हिमवतः पादे निर्माल्यवदुपेक्षिता ॥ १-९८-९० (४३६६)
स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव ।

विश्वामित्रो ब्राह्मणत्वे लुब्धः कामपरायणः ॥१-९८-९१ (४३६७)
सुषाव सुरनारी मां विश्वामित्राद्यथेष्टतः ।
अहो जानामि ते जन्म कुत्सितं कुलटे जनैः ॥१-९८-९२ (४३६८)
मेनकाऽप्सरसां श्रेष्ठा महर्षिश्चापि ते पिता ।
तयोरपत्यं कस्मात्त्वं पुंश्चलीवाभिभाषसे ॥१-९८-९३ (४३६९)
जातिश्चापि निकृष्टो ते कुलीनेति विजल्पसे ।
जनयित्वा त्वमुत्सृष्टा कोकिलेन परैर्भृता ॥१-९८-९४ (४३७०)
अरिष्टैरिव दुर्बद्धिः कण्वो वर्धयिता पिता ।
अश्रद्धेयमिदं वाक्यं यत्त्वं जल्पसि तापसि ॥१-९८-९५ (४३७१)
ब्रुवन्ती राजसान्निध्ये गम्यतां यत्र चेच्छसि ।
ग्सुवर्णमणिमुक्तानि वस्त्राण्याभरणानि च ॥१-९८-९६ (४३७२)
यदिहेच्छसि भोगार्थं तापसि प्रतिगृह्यताम् ।
नाहं त्वां द्रष्टुमिच्छामि यथेष्टं गम्यतामितः'॥ ॥१-९८-९७ (४३७३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि अष्टनवतितमोऽध्यायः
॥ ९८ ॥

आदिपर्व - अध्याय ०९९
॥ श्रीः ॥
१.९९. अध्यायः ९९

Mahabharata - Adi Parva - Chapter Topics
दुष्यन्तशकुन्तलाविवादः ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-९९-० (४३७४)
शकुन्तलोवाच।१-९९-०क्ष् (६१९)
राजन्सर्षपमात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यसि ॥१-९९-१ (४३७५)
मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम् ।
ममैवोद्रिच्यते जन्म दुष्यन्त तव जन्मतः ॥१-९९-२ (४३७६)
क्षितौ चरसि राजंस्त्वमन्तरिक्षे चराम्यहम् ।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥१-९९-३ (४३७७)
महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च ।
भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥१-९९-४ (४३७८)
ग्पुरा नरवरः पुत्र उर्वश्यां जनितस्तदा ।

आयुर्नाम महाराज तव पूर्वपितामहः ॥१-९९-५ (४३७९)
महर्षयश्च बहवः क्षत्रियाश्च परन्तपाः ।
अप्सरःसु ऋषीणां च मातृदोषो न विद्यते ॥' १-९९-६ (४३८०)
सत्यश्चापि प्रवादोऽयं प्रवक्ष्यामि च ते नृप ।
निदर्शनार्थं न द्वेषाच्छ्रुत्वा तत्क्षन्तुमर्हसि ॥१-९९-७ (४३८१)
विरूपो यावदादर्शे नात्मनो वीक्षते मुखम् ।
मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम् ॥१-९९-८ (४३८२)
यदा तु रूपमादर्शे विरूपं सोऽभिवीक्षते ।
तदा ह्रीमांस्तु जानीयादन्तरं नेतरं जनम् ॥१-९९-९ (४३८३)
अतीव रूपसंपन्नो न कंचिदवमन्यते ।
अतीव जल्पन्दुर्वाचो भवतीह विहेतुकः ॥१-९९-१० (४३८४)
ग्पांसुपातेन हृष्यन्ति कुञ्जरा मदशालिनः ।
तथा परिवदन्नन्यान्हृष्टो भवति दुर्मतिः ॥१-९९-११ (४३८५)
सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
सुनास्तिकोप्युद्विजते जनः किं पुनरास्तिकः ॥१-९९-१२ (४३८६)
स्वयमुत्पाद्य पुत्रं वै सदृशं योऽवमन्यते ।
तस्य देवाः श्रियं घ्नन्ति तत्रैनं कलिराविशेत् ॥१-९९-१३ (४३८७)
अभव्येऽप्यनृतेऽशुद्धे नास्तिके पापकर्मणि ।
दुराचारे कलिर्ह्याशु न कलिर्धर्मचारिषु ॥' १-९९-१४ (४३८८)
मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥१-९९-१५ (४३८९)
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवाम्भसि ॥१-९९-१६ (४३९०)
ग्आत्मनो दुष्टभावत्वं जानन्नीचोऽप्रसन्नधीः ।
परेषामपि जानाति स्वधर्मसदृशान्गुणान् ॥१-९९-१७ (४३९१)
दह्यमानास्तु तीव्रेण नीचाः परयशोग्निना ।
अशक्तास्तद्गतिं गन्तुं ततो निन्दां प्रकुर्वते ॥' १-९९-१८ (४३९२)
अन्यान्परिवदन्साधुर्यथा हि परितप्यते ।
तथा परिवदन्नन्यान्हृष्टो भवति दुर्जनः ॥१-९९-१९ (४३९३)
ग्अपवादरता मूर्खा भवन्ति हि विशेषतः ।
नापवादरताः सन्तो भवन्ति स्म विशेषतः ॥' १-९९-२० (४३९४)
अभिवाद्य यथा वृद्धान्साधुर्गच्छति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥१-९९-२१ (४३९५)
सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
यथा वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥१-९९-२२ (४३९६)
अतो हास्यतरं लोके किंचिदन्यन्न विद्यते ।

यदि दुर्जन इत्याहुः सज्जनं दुर्जनाः स्वयम् ॥१-९९-२३ (४३९७)
ग्दारुणाल्लोकसंक्लेशाद्दुःखमाप्नोत्यसंशयम् ॥'
कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन् ॥ १-९९-२४ (४३९८)
उत्तमं सर्वधर्माणां तस्मात्पुत्रं तु न त्यजेत् ।
स्वपत्नीप्रभवाँल्लब्धान्कृतान्समयवर्धितान् ॥१-९९-२५ (४३९९)
क्रीतान्कन्यासु चोत्पन्नान्पुत्रान्वै मनुरब्रवीत् ।
ग्ते च षड्वन्धुदायादाः षडदायादबान्धवाः ॥१-९९-२६ (४४००)
धर्मकृत्यवहा नृणां मनसः प्रीतिवर्धनाः ।
त्रायन्ते नरकाज्जाताः पुत्रा धर्मप्लवाः पितॄन् ॥१-९९-२७ (४४०१)
स त्वं नृपतिशार्दूल न पुत्रं त्यक्तुमर्हसि ।
तस्मात्पुत्रं च सत्यं च पालयस्व महीपते ॥१-९९-२८ (४४०२)
उभयं पालयस्वैतन्नानृतं वक्तुमर्हसि।'
आत्मानं सत्यधर्मौ च पालयेथा महीपते ।
नरेन्द्रसिंह कपटं न हि वोढुं त्वमर्हसि ॥ १-९९-२९ (४४०३)
वरं कूपशताद्वापी वरं वापीशतात्क्रतुः ।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥१-९९-३० (४४०४)
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥१-९९-३१ (४४०५)
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् ।
सत्यस्यैव च राजेन्द्र कलां नार्हति षोडशीम् ॥१-९९-३२ (४४०६)
नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परम् ।
न हि तीव्रतरं पापमनृतादिह विद्यते ॥१-९९-३३ (४४०७)
राजन्सत्यं परो धर्मः सत्याच्च समयः परः ।
मात्याक्षीः समयं राजन्सत्यं सङ्गतमस्तु ते ॥१-९९-३४ (४४०८)
ग्यः पापो न विजानीयात्कर्म कृत्वा नराधिप ।
न हि तादृक्परं पापमनृतादिह विद्यते ॥१-९९-३५ (४४०९)
यस्य ते हृदयं वेद सत्यस्यैवानृतस्य च ।
कल्याणावेक्षणं तस्मात्कर्तुमर्हसि धर्मतः ॥१-९९-३६ (४४१०)
यो न कामान्न च क्रोधान्न द्रोहादतिवर्तते ।
अमित्रं वापि मित्रं वा स एवोत्तमपूरुषः ॥' १-९९-३७ (४४११)
अनृतश्चेत्प्रसङ्गस्ते श्रद्दधासि न चेत्स्वयम् ।
आश्रमं गन्तुमिच्छामि त्वादृशो नास्ति सङ्गतं ॥१-९९-३८ (४४१२)
ग्पुत्रत्वे शङ्कमानस्य त्वं बुद्ध्या निश्चयं कुरु ।
गतिः स्वरः स्मृतिः सत्वं शीलं विद्या च विक्रमः ॥१-९९-३९ (४४१३)
धृष्णुप्रकृतिभावौ च आवर्ता रोमराजयः ।
समा यस्य यदा स्युस्ते तस्य पुत्रो न संशयः ॥१-९९-४० (४४१४)

सादृश्येनोद्धृतं बिम्बं तव देहाद्विशांपते ।
तातेति भाषमाणं वै मा स्म राजन्वृथा कृथाः ॥१-९९-४१ (४४१५)
ऋते च गर्दभीक्षीरात्पयः पास्यति मे सुतः।'
ऋतेपि त्वां च दुष्यन्त शैलराजावतंसिकाम् ।
चतुरन्तामिमामुर्वीं पुत्रो मे पालयिष्यति ॥ १-९९-४२ (४४१६)
ग्शकुन्तले तव सुतश्चक्रवर्ती भविष्यति ।
एवमुक्तं महेन्द्रेण भविष्यति न चान्यथा ॥१-९९-४३ (४४१७)
साक्षित्वे बहवो ह्युक्ता देवदूतादयो मया ।
न ब्रुवन्ति तथा सत्यमुताहो नानृतं किल ॥१-९९-४४ (४४१८)
असाक्षिणी मन्दबाग्या गमिष्यामि यथागतम् ॥' १-९९-४५ (४४१९)
वैशम्पायन उवाच।१-९९-४६क्ष् (६२०)
एतावदुक्त्वा वचनं प्रातिष्ठत शकुन्तला ।
ग्तस्याः क्रोधसमुत्थोग्निः सधूमो मूर्ध्न्यदृश्यत ॥१-९९-४६ (४४२०)
संनियम्यात्मनोऽङ्गेषु ततः क्रोधाग्निमात्मजम् ।
प्रस्थितैवानवद्याङ्गी सह पुत्रेण वै वनम्'॥ ॥१-९९-४७ (४४२१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि एकोनशततमोऽध्यायः
॥ ९९ ॥

आदिपर्व - अध्याय १००
॥ श्रीः ॥
१.१००. अध्यायः १००

Mahabharata - Adi Parva - Chapter Topics
आकाशवाणीश्रवणानन्तरं सपुत्रायाः शकुन्तलाया राज्ञाङ्गीकारः ॥१ ॥
भरतेतिनामकरणपूर्वकं पुत्रस्य राज्येऽभिषेकः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१००-० (४४२२)
वैशम्पायन उवाच।१-१००-०क्ष् (६२१)
अथान्तरिक्षे दुष्यन्तं वागुवाचाशरीरिणी ।
ऋत्विक्पुरोहिताचार्यैर्मन्त्रिभिश्चाभिसंवृतम् ॥१-१००-१ (४४२३)
माता भस्त्रा पितुः पुत्रो यस्माज्जातः स एव सः ।
भरस्व पुत्रं दौष्यन्तिं सत्यमाह शकुन्तला ॥१-१००-२ (४४२४)
ग्सर्वेभ्यो ह्यङ्गमङ्गेभ्यः साक्षादुत्पद्यते सुतः ।
आत्मा चैव सुतो नाम तेनैव तव पौरव ॥१-१००-३ (४४२५)

आहितं ह्यात्मनाऽऽत्मानं परिरक्ष इमं सुतम् ।
अनन्यां त्वं प्रतीक्षस्व मावमंस्थाः शकुन्तलाम् ॥ १-१००-४ (४४२६)
स्त्रियः पवित्रमतुलमेतद्दुष्यन्त धर्मतः ।
मासि मासि रजो ह्यासां दुरितान्यपकर्षति ॥ १-१००-५ (४४२७)
ततः सर्वाणि भूतानि व्याजह्रुस्तं समन्ततः। १-१००-६ (४४२८)
देवा ऊचुः ।
आहितस्त्वत्तनोरेष मावमंस्थाः शकुन्तलाम्'॥ १-१००-६क्ष् (६२२)
रेतोधाः पुत्र उन्नयति नरदेव यमक्षयात् ।
त्वं चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ १-१००-७ (४४२९)
ग्पतिर्जायां प्रविशति स तस्यां जायते पुनः ।
अन्योन्यप्रकृतिर्ह्येषा मावमंस्थाः शकुन्तलाम् ॥' १-१००-८ (४४३०)
जाया जनयते पुत्रमात्मनोऽङ्गाद्द्विधा कृतम् ।
तस्माद्भरस्व दुष्यन्त पुत्रं शाकुन्तलं नृप ॥ १-१००-९ (४४३१)
सुभूतिरेषा न त्याज्या जीवितं जीवयात्मजम् ।
शाकुन्तलं महात्मानं दुष्यन्त भर पौरवम् ॥ १-१००-१० (४४३२)
भर्तव्योऽयं त्वया यस्मादस्माकं वचनादपि ।
तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः ॥ १-१००-११ (४४३३)
ग्भरताद्भारती कीर्तिर्येनेदं भारतं कुलम् ।
अपरे ये च पूर्वे च भारता इति तेऽभवन् ॥ १-१००-१२ (४४३४)
वैशम्पायन उवाच। १-१००-१३क्ष् (६२३)
एवमुक्त्वा ततो देवा ऋषयश्च तपोधनाः ।
पतिव्रतेति संहृष्टाः पुष्पवृष्टिं ववर्षिरे ॥' १-१००-१३ (४४३५)
तच्छ्रुत्वा पौरवो वाक्यं व्याहृतं वे दिवौकसाम् ।
ग्सिंहासनात्समुत्थाय प्रणम्य च दिवौकसः ॥' १-१००-१४ (४४३६)
पुरोहितममात्यांश्च संप्रहृष्टोऽब्रवीदिदम् ।
शृण्वन्त्वेतद्भवन्तोऽपि देवदूतस्य भाषितम् ॥ १-१००-१५ (४४३७)
ग्शृण्वन्तु देवतानां च महर्षीणां च भाषितम्'।
अहमप्येवमेवैनं जानामि सुतमात्मजम् ॥ १-१००-१६ (४४३८)
यद्यहं वचनादस्या गृह्णीयामिममात्मजम् ।
भवेद्धि शङ्का लोकस्य नैवं शुद्धो भवेदयम् ॥ १-१००-१७ (४४३९)
वैशम्पायन उवाच। १-१००-१८क्ष् (६२४)
तां विशोध्य तदा राजा देवैः सह महर्षिभिः ।
हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतम् ॥ १-१००-१८ (४४४०)
ततस्तस्य तदा राजा पितृकर्माणि सर्वशः ।
कारयामास मुदितः प्रीतिमानात्मजस्य ह ।
मूर्ध्नि चैनं समाघ्राय सस्नेहं परिषस्वजे ॥ १-१००-१९ (४४४१)

सभाज्यमानो विप्रैश्च स्तूयमानश्च बन्दिभिः ।
मुदं स परमां लेभे पुत्रस्पर्शनजां नृपः ॥१-१००-२० (४४४२)
स्वां चैव भार्यां धर्मज्ञः पूजयामास धर्मतः ।
अब्रवीच्चैव तां राजा सान्त्वपूर्वमिदं वचः ॥१-१००-२१ (४४४३)
लोकस्यायं परोक्षस्तु संबन्धो नौ पुराऽभवत् ।
कृतो लोकसमक्षोऽद्य संबन्धो वै पुनः कृतः ॥१-१००-२२ (४४४४)
तस्मादेतन्मया तस्य तन्निमित्तं प्रभाषितम् ॥ १-१००-२३ (४४४५)
शङ्केत वाऽयं लोकोऽथ स्त्रीभावान्मयि संगतम् ।
तस्मादेतन्मया चापि तच्छुद्ध्यर्थं विचारितम् ॥१-१००-२४ (४४४६)
ग्ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव पृथग्विधाः ।
त्वां देवि वूजयिष्यन्ति निर्विशङ्कां पतिव्रताम्'॥१-१००-२५ (४४४७)
पुत्रश्चायं वृतो राज्ये त्वमग्रमहिषी भव ॥ १-१००-२६ (४४४८)
यच्च कोपनयात्यर्थं त्वयोक्तोऽस्म्यप्रियं प्रिये ।
प्रणयिन्या विशालाक्षितत्क्षान्तं ते मया शुभे ॥१-१००-२७ (४४४९)
ग्अनृतं वाप्यनिष्टं वा दुरुक्तं वातिदुष्कृतम् ।
त्वयाप्येवं विशालाक्षि क्षन्तव्यं मम दुर्वचः ।
क्षान्त्या पतिकृते नार्यः पातिव्रत्यं व्रजन्ति ताः ॥ १-१००-२८ (४४५०)
एवमुक्त्वा तु राजर्षिस्तामनिन्दितगामिनीम् ।
अन्तःपुरं प्रवेश्याथ दुष्यन्तो महिषीं प्रियाम् ॥१-१००-२९ (४४५१)
वासोभिरन्नपानैश्च पूजयित्वा तु भारत ।
ग्स मातरमुपस्थाय रथन्तर्यामभाषत ॥१-१००-३० (४४५२)
मम पुत्रो वने जातस्तव शोकप्रणशनः ।
ऋणादद्य विमुक्तोऽहं तव पौत्रेण शोभने ॥१-१००-३१ (४४५३)
विश्वामित्रसुता चेयं कण्वेन च विवर्धिता ।
स्नुषा तव महाभागे प्रसीदस्व शकुन्तलाम् ॥१-१००-३२ (४४५४)
पुत्रस्य वचनं श्रुत्वा पौत्रं सा परिषस्वजे ।
पादयोः पतितां तत्र रथन्तर्या शकुन्तलाम् ॥१-१००-३३ (४४५५)
परिष्वज्य च बाहुभ्यां हर्षादश्रुण्यवर्तयत् ।
उवाच वचनं सत्यं लक्षये लक्षणानि च ॥१-१००-३४ (४४५६)
तव पुत्रो विशालाक्षि चक्रवर्ती भविष्यति ।
तव भर्ता विशालाक्षि त्रैलोक्यविजयी भवेत् ॥१-१००-३५ (४४५७)
दिव्यान्भोगाननुप्राप्ता भव त्वं वरवर्णिनि ।
एवमुक्ता रथ्तर्या परं हर्षमवाप सा ॥१-१००-३६ (४४५८)
शकुन्तलां तदा राजा शास्त्रोक्तेनैव कर्मणा ।
ततोऽग्रमहिषीं कृत्वा सर्वाभरणभूषिताम् ॥१-१००-३७ (४४५९)
ब्राह्मणेभ्यो धनं दत्त्वा सैनिकानां च भूपतिः ।

दौष्यन्तिं च ततो राजा पुत्रं शाकुन्तलं तदा'॥ १-१००-३८ (४४६०)
भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ।
'भरते भारमावेश्य कृतकृत्योऽभवन्नृपः ॥ १-१००-३९ (४४६१)
ततो वर्षशतं पूर्णं राज्यं कृत्वा नराधिपः ।
गत्वा वनानि दुष्यन्तः स्वर्गलोकमुपेयिवान् ॥' ॥ १-१००-४० (४४६२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि शततमोऽध्यायः ॥ १०० ॥

आदिपर्व - अध्याय १०१
॥ श्रीः ॥
१.१०१. अध्यायः १०१

Mahabharata - Adi Parva - Chapter Topics
भरतचरित्रकथनम् ॥ १ ॥
तद्वंशकथनं च ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०१-० (४४६३)
'वैशम्पायन उवाच। १-१०१-०क्ष् (६२५)
दुष्यन्ताद्भरतो राज्यं यथान्यायमवाप सः।'
तस्य तत्प्रथितं कर्म प्रावर्तत महात्मनः ॥ १-१०१-१ (४४६४)
भास्वरं दिव्यमजितं लोकसंनादनं महत् ।
स विजित्य महीपालांश्चकार वशवर्तिनः ॥ १-१०१-२ (४४६५)
चचार च सतां धर्मं प्राप्य चानुत्तमं यशः ।
स राजा चक्रवर्त्यासीत्सार्वभौमः प्रतापवान् ॥ १-१०१-३ (४४६६)
ईजे च बहुभिर्यज्ञैर्यथा शक्रो मरुत्पतिः ।
याजयामास तं कण्वो दक्षवद्भूरिदक्षिणम् ॥ १-१०१-४ (४४६७)
श्रीमद्गोविततं नाम वाजिमेधमवाप सः ।
यस्मिन्सहस्रं पद्मानां कण्वाय भरतो ददौ ॥ १-१०१-५ (४४६८)
सोऽश्वमेधशतैरीजे यमुनामनु तीरगः ।
त्रिशतैश्च सरस्वत्यां गङ्गामनु चतुःशतैः ॥ १-१०१-६ (४४६९)
दौष्यन्तिर्भरतो यज्ञैरीजे शाकुन्तलो नृपः ।
तस्माद्भरतवंशस्य विप्रतस्थे महद्यशः ॥ १-१०१-७ (४४७०)
भरतस्य वरस्त्रीषु पुत्राः संजज्ञिरे पृथक् ।
नाभ्यनन्दत्तदा राजा नानुरूपा ममेति तान् ॥ १-१०१-८ (४४७१)

ततस्तान्मातरः क्रुद्धाः पुत्रान्निन्युर्यमक्षयम् ।
ततस्तस्य नरेन्द्रस्य वितथं पुत्रजन्म तत् ॥ १-१०१-९ (४४७२)
ततो महद्भिः क्रतुभिरीजानो भरतस्तदा ।
लेभे पुत्रं भरद्‍पाजाद्भुमन्युं नाम भारत ॥ १-१०१-१० (४४७३)
ततः पुत्रिणमात्मानं ज्ञात्वा पौरवनन्दनः ।
भुमन्युं भरतश्रेष्ठ यौवराज्येऽभ्यषेचयत् ॥ १-१०१-११ (४४७४)
ततो दिविरथो नाम भुमन्योरभवत्सुतः ।
सुहोत्रश्च सुहोता च सुहविः सुयजुस्तथा ॥ १-१०१-१२ (४४७५)
पुष्करिण्यामृचीकश्च भुमन्योरभवन्सुताः ।
तेषां ज्येष्ठः सुहोत्रस्तु राज्यमाप महीक्षिताम् ॥ १-१०१-१३ (४४७६)
राजसूयाश्वमेधाद्यैः सोऽयजद्बहुभिः सवैः ।
सुहोत्रः पृथिवीं कृत्स्नां बुभुजे सागराम्बराम् ॥ १-१०१-१४ (४४७७)
पूर्णां हस्तिगवाश्वैश्च बहुरत्नसमाकुलाम् ।
ममज्जेव मही तस्य भूरिभारावपीडिता ॥ १-१०१-१५ (४४७८)
हस्त्यश्वरथसंपूर्णा मनुष्यकलिला भृशम् ।
सुहोत्रे राजनि तदा धर्मतः शासति प्रजाः ॥ १-१०१-१६ (४४७९)
चैत्ययूपाङ्किता चासीद्भूमिः शतसहस्रशः ।
प्रवृद्धजनसस्या च सर्वदैव व्यरोचत ॥ १-१०१-१७ (४४८०)
ऐक्ष्वाकी जनयामास सुहोत्रात्पृथिवीपतेः ।
अजमीढं सुमीढं च पुरुमीढं च भारत ॥ १-१०१-१८ (४४८१)
अजमीढो वरस्तेषां तस्मिन्वंशः प्रतिष्ठितः ।
षट् पुत्रान्सोप्यजनयत्तिसृषु स्त्रीषु भारत ॥ १-१०१-१९ (४४८२)
ऋक्षं धूमिन्यथो नीली दुष्यन्तपरमेष्ठइनौ ।
केशिन्यजनयज्जह्नुं सुतौ च जनरूषिणौ ॥ १-१०१-२० (४४८३)
विदुः संवरणं वीरमृक्षाद्राथन्तरीसुतम् ।
तथेमे सर्वपञ्चाला दुष्यन्तपरमेष्ठिनोः ।
अन्वयाः कुशिका राजञ्जन्होरमिततेजसः ॥ १-१०१-२१ (४४८४)
जनरूषणयोर्ज्येष्ठमृक्षमाहुर्जनाधिपम् ।
ऋक्षात्संवरणो जज्ञे राजन्वंशकरस्तव ॥ १-१०१-२२ (४४८५)
आर्क्षे संवरणे राजन्प्रशासति वसुन्धराम् ।
संक्षयः सुमहानासीत्प्रजानामिति नः श्रुतम् ॥ १-१०१-२३ (४४८६)
व्यशीर्यत ततो राष्ट्रं क्षयैर्नानाविधैस्तदा ।
क्षुन्मृत्युभ्यामनावृष्ट्या व्याधिभिश्च समाहतम् ॥ १-१०१-२४ (४४८७)
अभ्यघ्नन्भारतांश्चैव सपत्नानां बलानि च ।
चालयन्वसुधां चेमां बलेन चतुरङ्गिणा ॥ १-१०१-२५ (४४८८)
अभ्ययात्तं च पाञ्चल्यो विजित्य तरसा महीम् ।

अक्षौहिणीभिर्दशभिः स एनं समरेऽजयत् ॥ १-१०१-२६ (४४८९)
ततः सदारः सामात्यः सपुत्रः ससुहृज्जनः ।
राजा संवरणस्तस्मात्पलायत महाभयात् ॥ १-१०१-२७ (४४९०)
\`ते प्रतीचीं पराभूताः प्रपन्ना भारता दिशम्'।
सिन्धोर्नदस्य महतो निकुञ्जे न्यवसंस्तदा ।
नदीविपयपर्यन्ते पर्वतस्य समीपतः ॥ १-१०१-२८ (४४९१)
तत्रावसन्बहून्कालान्भारता दुर्गमाश्रिताः ।
तेषां निवसतां तत्र सहस्रं परिवत्सरान् ॥ १-१०१-२९ (४४९२)
अथाभ्यगच्छद्भरतान्वसिष्ठो भगवानृषिः ।
तमागतं प्रयत्नेन प्रत्युद्गम्याभिवाद्य च ॥ १-१०१-३० (४४९३)
अर्घ्यमभ्याहरंस्तस्मै ते सर्वे भारतास्तदा ।
निवेद्य सर्वमृषये सत्कारेण सुवर्चसे ॥ १-१०१-३१ (४४९४)
तमासने चोपविष्टं राजा वव्रे स्वयं तदा ।
पुरोहितो भवान्नोऽस्तु राज्याय प्रयतेमहि ॥ १-१०१-३२ (४४९५)
ओमित्येवं वसिष्ठोऽपि भारतान्प्रत्यपद्यत ।
अथाभ्यषिञ्चत्साम्राज्ये सर्वक्षत्रस्य पौरवम् ॥ १-१०१-३३ (४४९६)
विषाणभूतं सर्वस्यां पृथिव्यामिति नः श्रुतम् ।
भरताध्युषितं पूर्वं सोऽध्यतिष्ठत्पुरोतोतमम् ॥ १-१०१-३४ (४४९७)
पुनर्बलिभृतश्चैव चक्रे सर्वमहीक्षितः ।
ततः स पृथिवीं प्राप्य पुनरीजे महाबलः ॥ १-१०१-३५ (४४९८)
आजमीढो महायज्ञैर्बहुभिर्भूरिदक्षिणैः ।
ततः संवरणात्सौरी तपती सुषुवे कुरुम् ॥ १-१०१-३६ (४४९९)
राजत्वे तं प्रजाः सर्वा धर्मज्ञ इति वव्रिरे ।
\`महिम्ना तस्य कुरवो लेभिरे प्रत्ययं भृशम्।'
तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलं ॥ १-१०१-३७ (४५००)
कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः ।
अश्ववन्तमभिष्यन्तं तथा चैत्ररथं मुनिम् ॥ १-१०१-३८ (४५०१)
जनमेजयं च विख्यातं पुत्रांश्चास्यानुशुश्रुम ।
पञ्चैतान्वाहिनी पुत्रान्व्यजायत मनस्विनी ॥ १-१०१-३९ (४५०२)
अविक्षितः परिक्षित्तु शबलाश्वस्तु वीर्यवान् ।
आदिराजो विराजश्च शाल्मलिश्च महाबलः ॥ १-१०१-४० (४५०३)
उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः ।
एतेषामन्ववाये तु ख्यातास्ते कर्मजैर्गुणैः ।
जनमेजयादयः सप्त तथैवान्ये महारथाः ॥ १-१०१-४१ (४५०४)
परीक्षितोऽभवन्पुत्राः सर्वे धर्मार्थकोविदाः ।
कक्षसेनोग्रसेनौ तु चित्रसेनश्च वीर्यवान् ॥ १-१०१-४२ (४५०५)

इन्द्रसेनः सुषेणश्च भीमसेनश्च नामतः ।
जनमेजयस्य तनया भुवि ख्याता महाबलाः ॥ १-१०१-४३ (४५०६)
धृतराष्ट्रः प्रथमजः पाण्डुर्बाह्लीक एव च ।
निषधश्च महातेजास्तथा जाम्बूनदो बली ॥ १-१०१-४४ (४५०७)
कुण्डोदरः पदातिश्च वसातिश्चाष्टमः स्मृतः ।
सर्वे धर्मार्थकुशलाः सर्वभूतहिते रताः ॥ १-१०१-४५ (४५०८)
धृतराष्ट्रोऽथ राजासीत्तस्य पुत्रोऽथ कुण्डिकः ।
हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः ॥ १-१०१-४६ (४५०९)
हविश्रवास्तथेन्द्राभो भुमन्युश्चापराजितः ।
धृतराष्ट्रसुतानां तु त्रीनेतान्प्रथितान्भुवि ॥ १-१०१-४७ (४५१०)
प्रतीपं धर्मनेत्रं च सुनेत्रं चापि भारत ।
प्रतीपः प्रथितस्तेषां बभूवाप्रतिमो भुवि ॥ १-१०१-४८ (४५११)
प्रतीपस्य त्रयः पुत्रा जज्ञिरे भरतर्षभ ।
देवापिः शन्तनुश्चैव बाह्लीकश्च महारथः ॥ १-१०१-४९ (४५१२)
देवापिस्तु प्रवव्राज तेषां धर्महितेप्सया ।
शन्तनुश्च महीं लेभे बाह्लीकश्च महारथः ॥ १-१०१-५० (४५१३)
भरतस्यान्वयास्त्वेते देवकल्पा महारथाः ।
बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः ॥ १-१०१-५१ (४५१४)
एवंविधा महाभागा देवरूपाः प्रहारिणः ।
अन्ववाये महाराज ऐलवंशविवर्धनाः ॥ १-१०१-५२ (४५१५)
ग्गङ्गातीरं समागम्य दीक्षितो जनमेजय ।
अश्वमेधसहस्राणि वाजपेयशतानि च ॥ १-१०१-५३ (४५१६)
पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः ।
अग्निष्टोमातिरात्राणामुक्थानां सोमवत्पुनः ॥ १-१०१-५४ (४५१७)
वाजपेयेष्टिसत्राणां सहस्रैश्च सुसंभृतैः ।
दृष्ट्वा शाकुन्तलो राजा तर्पयित्वा द्विजान्धनैः ॥ १-१०१-५५ (४५१८)
पुनः सहस्रं पद्मानां कण्वाय भरतो ददौ ।
जम्बूनदस्य शुद्धस्य कनकस्य महायशाः ॥ १-१०१-५६ (४५१९)
यस्य यूपाः शतव्यामाः परिणाहेऽथ काञ्चनाः ।
सहस्रव्याममुद्बद्धाः सेन्द्रैर्देवैः समुच्छ्रिताः ॥ १-१०१-५७ (४५२०)
स्वलङ्कृता भ्राजमानाः सर्वरत्नैर्मनोरमैः ।
हिरण्यं द्विरदानश्वान्महिषोष्ट्रगजाविकम् ॥ १-१०१-५८ (४५२१)
दासीदासं धनं धान्यं गाः सुशीलाः सवत्सकाः ।
भूमिं यूपसहस्राङ्कां कण्वाय बहुदक्षिणाम् ॥ १-१०१-५९ (४५२२)
बहूनां ब्रह्मकल्पानां धनं दत्त्वा क्रतून्बहून् ।
ग्रामान्गृहाणि शुभ्राणि कोटिशोथाददत्तदा ॥ १-१०१-६० (४५२३)

भरताद्भारती कीर्तिर्येनेदं भारतं कुलम्।'
भरतस्यान्वये जाता देवकल्पा महारथाः ॥ १-१०१-६१ (४५२४)
बहवो ब्रह्मकल्पाश्च बभूवुः क्षत्रसत्तमाः ।
तेषामपरिमेयानि नामधेयानि सन्त्युत ॥१-१०१-६२ (४५२५)
तेषां कुले यथा मुख्यान्कीर्तयिष्यामि भारत ।
महाभागान्देवकल्पान्सत्यार्जवपरायणान् ॥ ॥१-१०१-६३ (४५२६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकोत्तरशततमोऽध्यायः ॥१०१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१०१-९ वितथं विगतस्तथाभावो जनकसादृश्यं यत्र तत्तादृशं
पुत्रजन्म ॥
१-१०१-२३ आर्क्षे ऋक्षपुत्रे ॥
१-१०१-२४ क्षयैर्नाशहेतुभिः क्षुत्प्रभृतिभिः ॥
१-१०१-२६ अभ्ययात्तं संवरणम् ।एनं संवरणमेव ॥
१-१०१-३५ बलिभृतः करदान् ॥
१-१०१-३६ सौरी सूर्यकन्या ॥
१-१०१-४० अश्ववत एवाविक्षिदिति संज्ञान्तरम् ॥
एकोत्तरशततमोऽध्यायः ॥
१०१ ॥

आदिपर्व - अध्याय १०२
॥श्रीः ॥
१.१०२. अध्यायः १०२

Mahabharata - Adi Parva - Chapter Topics
महाभिषगुपाख्यानम् ॥१ ॥
महाभिषग्गङ्गयोः शापः ॥२ ॥
अष्टवसूनां गङ्गायाश्च संवादः ॥३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०२-० (४५२७)
वैशम्पायन उवाच।१-१०२-०क्ष् (६२६)
इक्ष्वाकुवंशप्रभो राजासीत्पृथिवीपतिः ।
महाभिषगिति ख्यातः सत्यवाक्सत्यविक्रमः ॥१-१०२-१ (४५२८)

सोऽश्वमेधसहस्रेण राजसूयशतेन च ।
तोषयामास देवेशं स्वर्गं लेभे ततः प्रभुः ॥ १-१०२-२ (४५२९)
ततः कदाचिद्ब्रह्माणमुपासांचक्रिरे सुराः ।
तत्र राजर्षयो ह्यासन्स च राजा महाभिषक् ॥ १-१०२-३ (४५३०)
अथ गङ्गा सरिच्छ्रेष्ठा समुपायात्पितामहम् ।
तस्या वासः समुद्धूतं मारुतेन शशिप्रभम् ॥ १-१०२-४ (४५३१)
ततोऽभवन्सुरगणाः सहसाऽवाङ्मुखास्तदा ।
महाभिषक्तु राजर्षिरशङ्को दृष्टवान्नदीम् ॥ १-१०२-५ (४५३२)
सोपध्यातो भगवता ब्रह्मणा तु महाभिषक् ।
उक्तश्च जातो मर्त्येषु पुनर्लोकानवाप्स्यसि ॥ १-१०२-६ (४५३३)
यया हृतमनाश्चासि गङ्गया त्वं हि दुर्मते ।
सा ते वै मानुषे लोके विप्रियाण्याचरिष्यति ॥ १-१०२-७ (४५३४)
यदा ते भविता मन्युस्तदा शापाद्विमोक्ष्यते। १-१०२-८ (४५३५)
वैशम्पायन उवाच ।
स चिन्तयित्वा नृपतिर्नृपानन्यांस्तपोधनान् ॥ १-१०२-८क्ष् (६२७)
प्रतीपं रोचयामास पितरं भूरितेजसम् ।
सा महाभिषजं दृष्ट्वा नदी दैर्याच्च्युतं नृपम् ॥ १-१०२-९ (४५३६)
तमेव मनसा ध्यायन्त्युपावृत्ता सरिद्वरा ।
सा तु विध्वस्तवपुषः कश्मलाभिहतान्नृप ॥ १-१०२-१० (४५३७)
ददर्श पथि गच्छन्ती वसून्देवान्दिवौकसः ।
तथारूपांश्च तान्दृष्ट्वा प्रपच्छ सरितां वरा ॥ १-१०२-११ (४५३८)
किमिदं नष्टरूपाः स्थ कच्चित्क्षेमं दिवौकसाम् ।
तामूचुर्वसवो देवाः शप्ताः स्मो वै महानदि ॥ १-१०२-१२ (४५३९)
अल्पेऽपराधे संरम्भाद्वसिष्ठेन महात्मना ।
विमूढा हि वयं सर्वे प्रच्छन्नमृषिसत्तमम् ॥ १-१०२-१३ (४५४०)
सन्ध्यां वसिष्ठमासीनं तमत्यभिसृताः पुरा ।
तेन कोपाद्वयं शप्ता योनौ संभवतेति ह ॥ १-१०२-१४ (४५४१)
न तच्छक्यं निवर्तयितुं यदुक्तं ब्रह्मवादिना ।
त्वमस्मान्मानुषी भूत्वा सूष्व पुत्रान्वसून्भुवि ॥ १-१०२-१५ (४५४२)
न मानुषीणां जठरं प्रविशेम वयं शुभे ।
इत्युक्ता तैश्च वसुभिस्तथेत्युक्त्वाऽब्रवीदिदम् ॥ १-१०२-१६ (४५४३)
गङ्गोवाच। १-१०२-१७क्ष् (६२८)
मर्त्येषु पुरुषश्रेष्ठः को वः कर्ता भविष्यति। १-१०२-१७ (४५४४)
वसव ऊचुः ।
प्रतीपस्य सुतो राजा शान्तनुर्लोकविश्रुतः ।
भविता मानुषे लोके स नः कर्ता भविष्यति ॥ १-१०२-१७क्ष् (६२९)

गङ्गोवाच। १-१०२-१८क्ष् (६३०)
ममाप्येवं मतं देवा यथा मां वदथानघाः ।
प्रियं तस्य करिष्यामि युष्माकं चेतदीप्सितम् ॥ १-१०२-१८ (४५४५)
वसव ऊचुः। १-१०२-१९क्ष् (६३१)
जातान्कुमारान्स्वानप्सु प्रक्षेप्तुं वै त्वमर्हसि ।
यथा नचिरकालं नो निष्कृतिः स्यात्त्रिलोकगे ॥ १-१०२-१९ (४५४६)
जिघृक्षवो वयं सर्वे सुरभिं मन्दबुद्धयः ।
शप्ता ब्रह्मर्षिणा तेन तांस्त्वं मोचय चाशु नः ॥ १-१०२-२० (४५४७)
गङ्गोवाच। १-१०२-२१क्ष् (६३२)
एवमेतत्करिष्यामि पुत्रस्तस्य विधीयताम् ।
नास्य मोघः सङ्गमः स्यात्पुत्रहेतोर्मया सह ॥ १-१०२-२१ (४५४८)
वसव ऊचुः। १-१०२-२२क्ष् (६३३)
तुरीयार्धं प्रदास्यामो वीर्यस्यैकैकशो वयम् ।
तेन वीर्येण पुत्रस्ते भविता तस्य चेप्सितः ॥ १-१०२-२२ (४५४९)
न संपत्स्यति मर्त्येषु पुनस्तस्य तु सन्ततिः ।
तस्मादपुत्रः पुत्रस्ते भविष्यति स वीर्यवान् ॥ १-१०२-२३ (४५५०)
एवं ते समयं कृत्वा गङ्गया वसवः सह ।
जग्मुः संहृष्टमनसो यथासंकल्पमञ्जसा ॥ ॥ १-१०२-२४ (४५५१)

इति श्रीमन्महाभारते आदिप्रवमि संभवपर्वणि
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१०२-६ अपध्यातः शप्तः ॥
१-१०२-१० विध्वस्तवपुषो दिवश्च्युतत्वात् ॥
१-१०२-१४ अत्यभिसृता अतिक्रान्तवन्तः । वक्ष्यमाणेन
तद्धेनुहरणेनेति शेषः ॥
१-१०२-१९ नचिरकालं शीघ्रम् । नोऽस्माकम् ॥
१-१०२-२२ तुरीयार्धमष्टमांशम् ॥
द्व्यधिकशततमोऽध्यायः ॥
१०२ ॥

आदिपर्व - अध्याय १०३
॥ श्रीः ॥
१.१०३. अध्यायः १०३

Mahabharata - Adi Parva - Chapter Topics

प्रतीपेन गङ्गायाः स्नुषात्वेन परिग्रहः ॥ १ ॥
शान्तनूत्पत्तिः ॥ २ ॥
तस्य राज्येऽभिषेकः ॥ ३ ॥
मृगयार्थं गतस्य शान्त नोर्गङ्गया संवादः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०३-० (४५५२)
वैशम्पायन उवाच। १-१०३-०क्ष् (६३४)
ततः प्रतीपो राजाऽऽसीत्सर्वभूतहितः सदा ।
निषसाद समा बह्वीर्गङ्गाद्वारगतो जपन् ॥ १-१०३-१ (४५५३)
तस्य रूपगुणोपेता गङ्गा स्त्रीरूपधारिणी ।
उत्तीर्य सलिलात्तस्माल्लोभनीयतमाकृतिः ॥ १-१०३-२ (४५५४)
अधीयानस्य राजर्षेर्दिव्यरूपा मनस्विनी ।
दक्षिणं शालसङ्काशमूरुं भेजे शुभानना ॥ १-१०३-३ (४५५५)
प्रतीपस्तु महीपालस्तामुवाच यशस्विनीम् ।
ग्वाक्यं वाक्यविदां श्रेष्ठो धर्मनिश्चयतत्त्ववित्।'
करोमि किं ते कल्याणि प्रियं यत्तेऽभिकाङ्क्षितम् ॥ १-१०३-४ (४५५६)
स्त्र्युवाच। १-१०३-५क्ष् (६३५)
त्वामहं कामये राजन्भजमानां भजस्व माम् ।
त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः ॥ १-१०३-५ (४५५७)
प्रतीप उवाच। १-१०३-६क्ष् (६३६)
नाहं परस्त्रियं कामाद्गच्छेदं वरवर्णिनि ।
न चासवर्णां कल्याणि धर्म्यमेतद्धि मे व्रतम् ॥ १-१०३-६ (४५५८)
ग्यः स्वदारान्परित्यज्य पारक्यां सेवते स्त्रियम् ।
निरयान्नैव मुच्यते यावदाभूतसंप्लवम् ॥' १-१०३-७ (४५५९)
स्त्र्युवाच। १-१०३-८क्ष् (६३७)
नाश्रेयस्यस्मि नागम्या न वक्तव्या च कर्हिचित् ।
भजन्तीं भज मां राजन्दिव्यां कन्यां वरस्त्रियम् ॥ १-१०३-८ (४५६०)
प्रतीप उवाच। १-१०३-९क्ष् (६३८)
त्वया निवृत्तमेतत्तु यन्मां चोदयसि प्रियम् ।
अन्यथा प्रतिपन्नं मां नाशयेद्धर्मविप्लवः ॥ १-१०३-९ (४५६१)
प्राप्य दक्षिणमूरुं मे त्वमाश्लिष्टा वराङ्गने ।
अपत्यानां स्नुषाणां च भीरु विद्ध्येतदासनम् ॥ १-१०३-१० (४५६२)
सव्योरुः कामिनीभोग्यस्त्वया स च विवर्जितः ।
तस्मादहं नाचरिष्ये त्वयि कामं वराङ्गने ॥ १-१०३-११ (४५६३)

स्नुषा मे भव सुश्रोणि पुत्रार्थं त्वां वृणोम्यहम् ।
स्नुषापक्षं हि वामोरु त्वमागम्य समाश्रिता ॥ १-१०३-१२ (४५६४)
स्त्र्युवाच। १-१०३-१३क्ष् (६३९)
एवमप्यस्तु धर्मज्ञ संयुज्येयं सुतेन ते ।
त्वद्भक्त्या तु भजिष्यामि प्रख्यातं भारतं कुलम् ॥ १-१०३-१३ (४५६५)
पृथिव्यां पार्थिवा ये च तेषां यूयं परायणम् ।
गुणा न हि मया शक्या वक्तुं वर्षशतैरपि ॥ १-१०३-१४ (४५६६)
कुलस्य ये वः प्रथितास्तत्साधुत्वमथोत्तमम् ।
समयेनेह धर्मज्ञ आचरेयं च यद्विभो ॥ १-१०३-१५ (४५६७)
तत्सर्वमेव पुत्रस्ते न मीमांसेत कर्हिचित् ।
एवं वसन्ती पुत्रे ते वर्धयिष्याम्यहं रतिम् ॥ १-१०३-१६ (४५६८)
पुत्रैः पुण्यैः प्रियैश्चैव स्वर्गं प्राप्स्यति ते सुतः। १-१०३-१७ (४५६९)
वैशम्पायन उवाच ।
तथेत्युक्त्वा तु सा राजंस्तत्रैवान्तरधीयत ।
ग्अदृश्या राजसिंहस्य पश्यतः साऽभवत्तदा ॥' १-१०३-१७क्ष् (६४०)
पुत्रजन्म प्रतीक्षन्वै स राजा तदधारयत् ।
एतस्मिन्नेव काले तु प्रतीपः क्षत्रियर्षभः ॥ १-१०३-१८ (४५७०)
तपस्तेपे सुतस्यार्थे सभार्यः कुरुनन्दन ।
ग्प्रतीपस्य तु भार्यायां गर्भः श्रीमानवर्धत ॥ १-१०३-१९ (४५७१)
श्रिया परमया युक्तः शरच्छुक्ले यथा शशी ।
ततस्तु दशमे मासि प्राजायत रविप्रभम् ॥ १-१०३-२० (४५७२)
कुमारं देवगर्भाभं प्रतीपमहिषी तदा।'
तयोः समभवत्पुत्रो वृद्धयोः स महाभिषक् ॥ १-१०३-२१ (४५७३)
शान्तस्य जज्ञे सन्तानस्तस्मादासीत्स शान्तनुः ।
ग्तस्य जातस्य कृत्यानि प्रतीपोऽकारयत्प्रभुः ॥ १-१०३-२२ (४५७४)
जातकर्मादि विप्रेण वेदोक्तैः कर्मभिस्तदा ।
नामकर्म च विप्रास्तु चक्रुः परमसत्कृतम् ॥ १-१०३-२३ (४५७५)
शान्तनोरवनीपाल वेदोक्तैः कर्मभिस्तदा ।
ततः संवर्धितो राजा शान्तनुर्लोकधार्मिकः ॥ १-१०३-२४ (४५७६)
स तु लेभे परां निष्ठां प्राप्य धर्मभृतां वरः ।
धनुर्वेदे च वेदे च गतिं स परमा गतः ॥ १-१०३-२५ (४५७७)
यौवनं चापि संप्राप्तः कुमारो वदतां वरः।'
संस्मरंश्चाक्षयाँल्लोकान्विजातान्स्वेन कर्मणा ॥ १-१०३-२६ (४५७८)
पुण्यकर्मकृदेवासीच्छान्तनुः कुरुसत्तमः ।
प्रतीपः शान्तनुं पुत्रं यौवनस्थं ततोऽन्वशात् ॥ १-१०३-२७ (४५७९)
पुरा स्त्री मां समभ्यागाच्छान्तनो भूतये तव ।

त्वामाव्रजेद्यदि रहः सा पुत्र वरवर्णिनी ॥ १-१०३-२८ (४५८०)
कामयानाऽभिरूपाढ्या दिव्यस्त्री पुत्रकाम्यया ।
सा त्वया नानुयोक्तव्या कासि कस्यासि चाङ्गने ॥ १-१०३-२९ (४५८१)
यच्च कुर्यान्न तत्कर्म सा प्रष्टव्या त्वयाऽनघ ।
सन्नियोगाद्भजन्तीं तां भजेथा इत्युवाच तम् ॥ १-१०३-३० (४५८२)
एवं संदिश्य तनयं प्रतीपः शान्तनुं तदा ।
स्वे च राज्येऽभिषिच्यैनं वनं राजा विवेश ह ॥ १-१०३-३१ (४५८३)
स राजा शान्तनुर्धीमान्देवराजसमद्युतिः ।
ग्बभूव सर्वलोकस्य सत्यवागिति संमतः ॥ १-१०३-३२ (४५८४)
पीनस्कन्धो महाबाहुर्मत्तवारणविक्रमः ।
अन्वितः परिपूर्णार्थैः सर्वैर्नृपतिलक्षणैः ॥ १-१०३-३३ (४५८५)
अमात्यलक्षणोपेतः क्षत्रधर्मविशेषवित् ।
वशे चक्रे महीमेको विजित्य वसुधाधिपान् ॥ १-१०३-३४ (४५८६)
वेदानागमयत्कृत्स्नान्राजधर्मांश्च सर्वशः ।
ईजे च बहुभिः सत्रैः क्रतुभिर्भूरिदक्षिणैः ॥ १-१०३-३५ (४५८७)
तर्पयामास विप्रांश्च वेदाध्ययनकोविदान् ।
रत्नैरुच्चावचैर्गोभिर्ग्रामैरश्वैर्धनैरपि ॥ १-१०३-३६ (४५८८)
वयोरूपेण संपन्नः पौरुषेण बलेन च ।
ऐश्वर्येण प्रतापेन विक्रमेण धनेन च ॥ १-१०३-३७ (४५८९)
वर्तमानश्च सत्येन सर्वधर्मविशारदः ।
तं महीपं महीपाला राजराजमकुर्वत ॥ १-१०३-३८ (४५९०)
वीतशोकभयाबाधाः सुखस्वप्नप्रबोधाः ।
श्रिया भरतशार्दूल समपद्यन्त भूमिपाः ॥ १-१०३-३९ (४५९१)
नियमैः सर्ववर्णानां ब्रह्मोत्तरमवर्तत ।
ब्राह्मणाभिमुखं क्षत्रं क्षत्रियाभिमुखा विशः ॥ १-१०३-४० (४५९२)
ब्रह्मक्षत्रानुकूलांश्च शूद्राः पर्यचरन्विशः ।
एवं पशुवराहाणां तथैव मृगपक्षिणाम् ॥ १-१०३-४१ (४५९३)
शान्तनावथ राज्यस्थे नावर्तत वृथा वधः ।
असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ॥ १-१०३-४२ (४५९४)
स एव राजा सर्वेषां भूतानामभवत्पिता ।
स हस्तिनाम्नि धर्मात्मा विहरन्कुरुनन्दनः ॥ १-१०३-४३ (४५९५)
तेजसा सूर्यकल्पोऽभूद्वायुना च समो बले ।
अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ॥ १-१०३-४४ (४५९६)
बभूव राजा सुमतिः प्रजानां सत्यविक्रमः ।
स वनेषु च रम्येषु शैलप्रस्रवणेषु च ॥' १-१०३-४५ (४५९७)
चचार मृगयाशीलः शान्तनुर्वनगोचरः ।

स मृगान्महिषांश्चैव विनिघ्नन्राजसत्तमः ॥ १-१०३-४६ (४५९८)
गङ्गामनु चचारैकः सिद्धचारणसेविताम् ।
स कदाचिन्महाराज ददर्श परमां स्त्रियम् ॥ १-१०३-४७ (४५९९)
जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापराम् ।
सर्वानवद्यां सुदतीं दिव्याभरणभूषिताम् ॥ १-१०३-४८ (४६००)
सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम् ।
गस्नातगात्रां धौतवस्त्रां गङ्गातीररुहे वने ॥ १-१०३-४९ (४६०१)
प्रकीर्णकेशीं पाणिभ्यां संस्पृशन्तीं शिरोरुहान् ।
रूपेण वयसा कान्त्या शरीरावयवैस्तथा ॥ १-१०३-५० (४६०२)
हावभावविलासैश्च लोचनाञ्चलविक्रियैः ।
श्रोणीभारेण मध्येन स्तनाभ्यामुरसा दृशा ॥ १-१०३-५१ (४६०३)
कवरीभरेण पादाभ्यामिङ्गितेन स्मितेन च ।
कोकिलालापसंल्लापैर्न्यक्कुर्वन्तीं त्रिलोकगाम् ॥ १-१०३-५२ (४६०४)
वाणीं च गिरिजां लक्ष्मीं योषितोन्याः सुराङ्गनाः ।
सा च शान्तनुमब्यागादलक्ष्मीमपकर्षती ॥' १-१०३-५३ (४६०५)
तां दृष्ट्वा हृष्टरोमाऽभूद्विस्मितो रूपसंपदा ।
पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः ॥ १-१०३-५४ (४६०६)
सा च दृष्ट्वैव राजानं विचरन्तं महाद्युतिम् ।
स्नेहादागतसौहार्दा नातृप्यत विलासिनी ॥ १-१०३-५५ (४६०७)
गगङ्गा कामेन राजानं प्रेक्षमाणा विलासिनी ।
चञ्चूर्यताग्रतस्तस्य किन्नरीवाप्सरोपमा ॥ १-१०३-५६ (४६०८)
दृष्ट्वा प्रहृष्टरूपोऽभूद्दर्शनादेव शान्तनुः ।
रूपेणातीत्य तिष्ठन्तीं सर्वा राजन्ययोषितः ॥' १-१०३-५७ (४६०९)
तामुवाच ततो राजा सान्त्वयञ्श्लक्ष्णया गिरा ।
देवी वा दानवी वा त्वं गन्धर्वी चाथवाऽप्सराः ॥ १-१०३-५८ (४६१०)
यक्षी वा पन्नगी वाऽपि मानुषी वा सुमध्यमे ।
गयाऽसि काऽसि सुरप्रख्ये महिषी मे भवानघे ॥ १-१०३-५९ (४६११)
त्वां गता हि मम प्रामा वसु यन्मेऽस्ति किंचन।'
याचे त्वां सुरगर्भाभे भार्या मे भव शोभने ॥ ॥ १-१०३-६० (४६१२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१०३-१ तत इति ॥
१-१०३-८ दिव्यां दिवि भवाम् ॥

१-१०३-९ निवृत्तं निरस्तम् ॥
१-१०३-१० आश्लिष्टा संगता ॥
१-१०३-१५ समयेन नियमेन ॥
१-१०३-१६ न मीमांसेत न विचारयेत् ॥
१-१०३-२२ शान्तस्योपरतस्य वंशस्य संतानो विस्तार इति शान्ततनुः ।तकारलोपेन शान्तनुरिति नाम ॥
१-१०३-२६ संस्मरन्निति व्यवहितमपि ज्ञानबलेन जानातीत्यर्थः ॥
१-१०३-२९ नानुयोक्तव्या न प्रष्टव्या ॥
त्र्यधिकशततमोऽध्यायः ॥
१०३ ॥

आदिपर्व - अध्याय १०४
॥ श्रीः ॥
१.१०४. अध्यायः १०४

Mahabharata - Adi Parva - Chapter Topics
समयबन्धपूर्वकं गङ्गाशान्तन्वोर्विवाहः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०४-० (४६१३)
वैशम्पायन उवाच। १-१०४-०क्ष् (६४१)
एतच्छ्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च ।
यशस्विनी च साऽगच्छच्छान्तनोर्भूतये तदा ॥ १-१०४-१ (४६१४)
सा तु दृष्ट्वा नृपश्रेष्ठं चरन्तं तीरमाश्रितम् ।
वसूनां समयं स्मृत्वाऽथाभ्यगच्छदनिन्दिता ॥ १-१०४-२ (४६१५)
प्रजार्थिनी राजपुत्रं शान्तनुं पृथिवीपतिम् ।
प्रतीपवचनं चापि संस्मृत्यैव स्वयं नृपम् ॥ १-१०४-३ (४६१६)
कालोऽयमिति मत्वा सा वसूनां शापचोदिता ।
उवाच चैव राज्ञः सा ह्लादयन्ती मनो गिरा ॥ १-१०४-४ (४६१७)
गङ्गोवाच। १-१०४-५क्ष् (६४२)
भविष्यामि महीपाल महिषी ते वशानुगा ।
न तु त्वं वा द्वितीयो वा ज्ञातुमिच्छेत्कथंचन ॥ १-१०४-५ (४६१८)
यत्तु कुर्यामहं राजञ्शुभं वा यदि वाऽशुभम् ।
न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम् ॥ १-१०४-६ (४६१९)
एवं हि वर्तमानेऽहं त्वयि वत्स्यामि पार्थिव ।
वारिता विप्रियं चोक्ता त्यजेयं त्वामसंशयम् ॥ १-१०४-७ (४६२०)

एष मे समयो राजन्भज मां त्वं यथेप्सितम् ।
अनुनीताऽस्मि ते पित्रा भर्ता मे त्वं भव प्रभो ॥ १-१०४-८ (४६२१)
वैशम्पायन उवाच। १-१०४-९क्ष् (६४३)
तथेति सा यदा तूक्ता तदा भरतसत्तम ।
प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम् ॥ १-१०४-९ (४६२२)
प्रतिज्ञाय तु तत्तस्यास्तथेति मनुजाधिपः ।
रथमारोप्य तां देवीं जगाम स तया सह ॥ १-१०४-१० (४६२३)
सा च शान्तनुमभ्यागात्साक्षाल्लक्ष्मीरिवापरा ।
आसाद्य शान्तनुस्तां च बुभुजे कामतो वशी ॥ १-१०४-११ (४६२४)
न प्रष्टव्येति मन्वानो न स तां किंचिदूचिवान् ।
स तस्याः शीलवृत्तेन रूपौदार्यगुणेन च ॥ १-१०४-१२ (४६२५)
उपचारेण च रहस्तुतोष जगतीपतिः ।
स राजा परमप्रीतः परमस्त्रीप्रलालितः ॥ १-१०४-१३ (४६२६)
दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी ।
मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी ॥ १-१०४-१४ (४६२७)
भाग्योपनतकामस्य भार्या चोपनताऽभवत् ।
शन्तनोर्नृपसिंहस्य देवराजसमद्युतेः ॥ १-१०४-१५ (४६२८)
संभोगस्नेहचातुर्यैर्हावलास्यैर्मनोहरैः ।
राजानं रमयामास यथा रज्येत स प्रभुः ॥ १-१०४-१६ (४६२९)
स राजा रतिसक्तोऽभूदुत्तमस्त्रीगुणैर्हृतः ॥ ॥ १-१०४-१७ (४६३०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

आदिपर्व - अध्याय १०५
॥ श्रीः ॥
१.१०५. अध्यायः १०५

Mahabharata - Adi Parva - Chapter Topics
गङ्गया जातमात्रस्य पुत्रसप्तकस्य हननम् ॥ १ ॥
अष्टमपुत्रहननोद्युक्तां स्वभार्यां प्रति शांन्तनुप्रश्नाः ॥ २ ॥
पूर्ववृत्तकथनपूर्वकं गङ्गायाः प्रतिवचनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०५-० (४६३१)
वैशम्पायन उवाच। १-१०५-०क्ष् (६४४)

संवत्सरानृतून्मासान्बुबुधे न बहून्गतान् ।
रममाणस्तया सार्धं यथाकामं नरेश्वरः ॥ १-१०५-१ (४६३२)
ग्दिविष्ठान्मानुषांश्चैव भोगान्भुङ्क्ते स वै नृपः।'
आसाद्य शान्तनुः श्रीमान्मुमुदे योषितां वराम् ॥ १-१०५-२ (४६३३)
ऋतुकाले तु सा देवी दिव्यं गर्भमधारयत् ।
अष्टावजनयत्पुत्रांस्तस्मादमरसन्निभान् ॥ १-१०५-३ (४६३४)
जातं जातं च सा पुत्रं क्षिपत्यम्भसि भारत ।
सूतके कण्ठमाक्रम्य तान्निनाय यमक्षयम् ॥ १-१०५-४ (४६३५)
प्रीणाम्यहं त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत् ।
तस्य तन्न प्रियं राज्ञः शान्तनोरभवत्तदा ॥ १-१०५-५ (४६३६)
न च तां किंचनोवाच त्यागाद्भीतो महीपतिः ।
ग्अमीमांस्या कर्मयोनिरागमश्चेति शान्तनुः ॥ १-१०५-६ (४६३७)
स्मरन्पितृवचश्चैव नापृच्छत्पुत्रकिल्बिषम् ।
जाताञ्जातांश्च वै हन्ति सा स्त्री सप्त वरान्सुतान् ॥ १-१०५-७ (४६३८)
शान्तनुर्धर्मभङ्गाच्च नापृच्छत्तां कथंचन ।
अष्टमं तु जिघांसन्त्यां चुक्षुभे शान्तनोर्धृतिः ॥' १-१०५-८ (४६३९)
अथैनामष्टमे पुत्रे जाते प्रहसतीमिव ।
उवाच राजा दुःखार्तः परीप्सन्पुत्रमात्मनः ॥ १-१०५-९ (४६४०)
ग्आलभन्तीं तदा दृष्ट्वा तां स कौरवनन्दनः ।
अब्रवीद्भरतश्रेष्ठो वाक्यं परमदुःखितः ॥' १-१०५-१० (४६४१)
मावधीः कस्य काऽसीति किं हिनत्सि सुतानिति ।
पुत्रघ्नि सुमहत्पापं संप्राप्तं ते सुगर्हितम् ॥ १-१०५-११ (४६४२)
गङ्गोवाच। १-१०५-१२क्ष् (६४५)
पुत्रकाम न ते हन्मि पुत्रं पुत्रवतां वर ।
जीर्णस्तु मम वासोऽयं यथा स समयः कृतः ॥ १-१०५-१२ (४६४३)
अहं गङ्गा जह्नुसुता महर्षिगणसेविता ।
देवकार्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह ॥ १-१०५-१३ (४६४४)
इमेऽष्टौ वसवो देवा महाभागा महौजसः ।
वसिष्ठशापदोषेण मानुषत्वमुपागताः ॥ १-१०५-१४ (४६४५)
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते ।
मद्विधा मानुषी धात्री लोके नास्तीह काचन ॥ १-१०५-१५ (४६४६)
तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता ।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः ॥ १-१०५-१६ (४६४७)
देवानां समयस्त्वेष वसूनां संश्रुतो मया ।
जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति ॥ १-१०५-१७ (४६४८)
तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः ।

स्वस्ति तेस्तु गमिष्यामि पुत्रं पाहि महाव्रतम् ॥ १-१०५-१८ (४६४९)
ग्अयं तव सुतस्तेषां वीर्येण कुलनन्दनः ।
संभूतोतिजनं कर्म करिष्यति न संशयः ॥' १-१०५-१९ (४६५०)
एष पर्यायवासो मे वसूनां सन्निधौ कृतः ।
मत्प्रसूतिं विजानीहि गङ्गादत्तमिमं सुतम् ॥ ॥ १-१०५-२० (४६५१)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१०५-११ तेत्वया ॥
१-१०५-१५ धात्री गर्भधारिणी ॥
१-१०५-१७ संश्रुतोऽङ्गीकृतः ॥
१-१०५-१८ आपवस्य वसिष्ठस्य ॥
पञ्चाधिकशततमोऽध्यायः ॥
१०५ ॥

आदिपर्व - अध्याय १०६
॥ श्रीः ॥
१.१०६. अध्यायः १०६

Mahabharata - Adi Parva - Chapter Topics
स्वगोहर्तॄणां वसूनां वसिष्ठेन शापः ॥ १ ॥
पुनस्तत्प्रार्थनया तुष्टने वसिष्टेन शापसंकोचः ॥ २ ॥
गङ्गाया भीष्मेण सह स्वलोकगमनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०६-० (४६५२)
शान्तनुरुवाच। १-१०६-०क्ष् (६४६)
आपवो नाम कोन्वेष वसूनां किं च दुष्कृतम् ।
ग्शशाप यस्मात्कल्याणि स वसूंश्चारुदर्शने।'
यस्याभिशापात्ते सर्वे मानुषीं योनिमागताः ॥ १-१०६-१ (४६५३)
अनेन च कुमारेण त्वया दत्तेन किं कृतम् ।
यस्य चैव कृतेनायं मानुषेषु निवत्स्यति ॥ १-१०६-२ (४६५४)
ईशा वै सर्वलोकस्य वसवस्ते च वै कथम् ।
मानुषेषूदपद्यन्त तन्ममाचक्ष्व जाह्नवि ॥ १-१०६-३ (४६५५)

वैशम्पायन उवाच। १-१०६-४क्ष् (६४७)
एवमुक्ता तदा गङ्गा राजानमिदमब्रवीत् ।
भर्तारं जाह्नवी देवी शान्तनुं पुरुषर्षभ ॥ १-१०६-४ (४६५६)
गङ्गोवाच। १-१०६-५क्ष् (६४८)
यं लेभे वरुणः पुत्रं पुरा भरतसत्तम ।
वसिष्ठनामा स मुनिः ख्यात आपव इत्युत ॥ १-१०६-५ (४६५७)
तस्याश्रमपदं पुण्यं मृगपक्षिसमन्वितम् ।
मेरोः पार्श्वे नगेन्द्रस्य सर्वर्तुकुसुमावृतम् ॥ १-१०६-६ (४६५८)
स वारुणिस्तपस्तेपे तस्मिन्भरतसत्तम ।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ॥ १-१०६-७ (४६५९)
दक्षस्य दुहिता या तु सुरभीत्यभिशब्दिता ।
गां प्रजाता तु सा देवी कश्यपाद्भरतर्षभ ॥ १-१०६-८ (४६६०)
अनुग्रहार्थं जगतः सर्वकामदुहां वराम् ।
तां लेभे गां तु धर्मात्मा होमधेनुं स वारुणिः ॥ १-१०६-९ (४६६१)
सा तस्मिंस्तापसारण्ये वसन्ती मुनिसेविते ।
चचार पुण्ये रम्ये च गौरपेतभया तदा ॥ १-१०६-१० (४६६२)
अथ तद्वनमाजग्मुः कदाचिद्भरतर्षभ ।
पृथ्वाद्या वसवः सर्वे देवा देवर्षिसेवितम् ॥ १-१०६-११ (४६६३)
ते सदारा वनं तच्च व्यचरन्त समन्ततः ।
रेमिरे रमणीयेषु पर्वतेषु वनेषु च ॥ १-१०६-१२ (४६६४)
तत्रैकस्याथ भार्या तु वसोर्वासवविक्रम ।
संचरन्ती वने तस्मिन्गां ददर्श सुमध्यमा ॥ १-१०६-१३ (४६६५)
नन्दिनीं नाम राजेन्द्र सर्वकामधुगुत्तमाम् ।
सा विस्मयसमाविष्टा शीलद्रविणसंपदा ॥ १-१०६-१४ (४६६६)
द्यवे वै दर्शयामास तां गां गोवृषभेक्षण ।
आपीनां च सुदोग्ध्रीं च सुवालधिखुरां शुभां ॥ १-१०६-१५ (४६६७)
उपपन्नां गुणैः सर्वैः शीलेनानुत्तमेन च ।
एवंगुणसमायुक्तां वसवे वसुनन्दिनी ॥ १-१०६-१६ (४६६८)
दर्शयामास राजेन्द्र पुरा पौरवनन्दन ।
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रेन्द्रविक्रम ॥ १-१०६-१७ (४६६९)
उवाच राजंस्तां देवीं तस्या रूपगुणान्वदन् ।
एषा गौरुत्तमा देवी वारुणेरसितेक्षणा ॥ १-१०६-१८ (४६७०)
ऋषेस्तस्य वरारोहे यस्येदं वनमुत्तमम् ।
अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे ॥ १-१०६-१९ (४६७१)
दशवर्षसहस्राणि स जीवेत्स्थिरयौवनः। १-१०६-२० (४६७२)
वैशम्पायन उवाच ।

एतच्छ्रुत्वा तु सा देवी नृपोत्तम सुमध्यमा ॥ १-१०६-२०क्ष् (६४९)
तमुवाचानवद्याङ्गी भर्तारं दीप्ततेजसम् ।
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ॥ १-१०६-२१ (४६७३)
नाम्नाजितवती नाम रूपयौवनशालिनी ।
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ॥ १-१०६-२२ (४६७४)
दुहिता प्रथिता लोके मानुषे रूपसंपदा ।
तस्या हेतोर्महाभाग सवत्सां गां ममेप्सिताम् ॥ १-१०६-२३ (४६७५)
आनयस्वामरश्रेष्ठ त्वरितं पुण्यवर्धन ।
यावदस्याः पयः पीत्वा सा सखी मम मानद ॥ १-१०६-२४ (४६७६)
मानुषेषु भवत्वेका जरारोगविवर्जिता ।
एतन्मम महाभाग कर्तुमर्हस्यनिन्दित ॥ १-१०६-२५ (४६७७)
प्रियात्प्रियतरं ह्यस्मान्नास्ति मेऽन्यत्कथंचन ।
एतच्छ्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ॥ १-१०६-२६ (४६७८)
पृथ्वाद्यैर्भ्रातृभिः सार्धं द्यौस्तदा तां जहार गाम् ।
तया कमलपत्राक्ष्या नियुक्तो द्यौस्तदा नृप ॥ १-१०६-२७ (४६७९)
ऋषेस्तस्य तपस्तीव्रं न शशाक निरीक्षितुम् ।
हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ॥ १-१०६-२८ (४६८०)
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत्स गां तत्र सवत्सां काननोत्तमे ॥ १-१०६-२९ (४६८१)
ततः स मृगयामास वने तस्मिंस्तपोधनः ।
नाध्यागमच्च मृगयंस्तां गां मुनिरुदारधीः ॥ १-१०६-३० (४६८२)
ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ॥ १-१०६-३१ (४६८३)
यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात्सर्वे जनिष्यन्ति मानुषेषु न संशयः ॥ १-१०६-३२ (४६८४)
एवं शशाप भगवान्वसूंस्तान्भरतर्षभ ।
वशं क्रोधस्य संप्राप्त आपवो मुनिसत्तमः ॥ १-१०६-३३ (४६८५)
शप्त्वा च तान्महाभागस्तपस्येव मनो दधे ।
एवं स शप्तवान्राजन्वसूनष्टौ तपोधनः ॥ १-१०६-३४ (४६८६)
महाप्रभावो ब्रह्मर्षिर्देवान्क्रोधसमन्वितः ।
गएवं शप्तास्ततस्तेन मुनिना यामुनेन वै ॥ १-१०६-३५ (४६८७)
अष्टौ समस्ता वसवो दिवो दोषेण सत्तम।'
अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः ॥ १-१०६-३६ (४६८८)
शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः ।
प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ॥ १-१०६-३७ (४६८९)
लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात् ।

आपवात्पुरुषव्याघ्र सर्वधर्मविशारदात् ॥ १-१०६-३८ (४६९०)
उवाच च स धर्मात्मा शप्ता यूयं धरादयः ।
अनुसंवत्सरात्सर्वे शापमोक्षमवाप्स्यथ ॥ १-१०६-३९ (४६९१)
अयं तु यत्कृते यूयं मया शप्ताः स वत्स्यति ।
द्यौस्तदा मानुषे लोके दीर्घकालं स्वकर्मणः ॥ १-१०६-४० (४६९२)
नानृतं तच्चिकीर्षामि क्रुद्धो युष्मान्यदब्रुवम् ।
न प्रजास्यति चाप्येष मानुषेषु महामनाः ॥ १-१०६-४१ (४६९३)
भविष्यति च धर्मात्मा सर्वशास्त्रविशारदः ।
पितुः प्रियहिते युक्तः स्त्रीभोगान्वर्जयिष्यति ॥ १-१०६-४२ (४६९४)
एवमुक्त्वा वसून्सर्वान्सजगाम महानृषिः ।
ततो मामुपजग्मुस्ते समेता वसवस्तदा ॥ १-१०६-४३ (४६९५)
अयाचन्त च मां राजन्वरं तच्च मया कृतम् ।
जाताञ्जातान्प्रक्षिपास्मान्स्वयं गङ्गे त्वमम्भसि ॥ १-१०६-४४ (४६९६)
एवं तेषामहं सम्यक् शप्तानां राजसत्तम ।
मोक्षार्थं मानुषाल्लोकाद्यथावत्कृतवत्यहम् ॥ १-१०६-४५ (४६९७)
अयं शापादृषेस्तस्य एक एव नृपोत्तम ।
द्यौ राजन्मानुषे लोके चिरं वत्स्यति भारत ॥ १-१०६-४६ (४६९८)
अयं कुमारः पुत्रस्ते विवृद्धः पुनरेष्यति ।
अहं च ते भविष्यामि आह्वानोपगता नृप ॥ १-१०६-४७ (४६९९)
वैशम्पायन उवाच। १-१०६-४८क्ष् (६५०)
एतदाख्याय सा देवी तत्रैवान्तरधीयत ।
आदाय च कुमारं तं जगामाथ यथेप्सितम् ॥ १-१०६-४८ (४७००)
स तु देवव्रतो नाम गाङ्गेय इति चाभवत् ।
द्युनामा शान्तनोः पुत्रः शान्तनोरधिको गुणैः ॥ १-१०६-४९ (४७०१)
शान्तनुश्चापि शोकार्तो जगाम स्वपुरं ततः ।
तस्याहं कीर्तयिष्यामि शान्तनोरधिकान्गुणान् ॥ १-१०६-५० (४७०२)
महाभाग्यं च नृपतेर्भारतस्य महात्मनः ।
यस्येतिहासो द्युतिमान्महाभारतमुच्यते ॥ ॥ १-१०६-५१ (४७०३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
षडधिकशततमोऽध्यायः ॥ १०६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१०६-८ गां प्रजाता नन्दिनीं जनितवती ॥
१-१०६-१५ द्यवे द्युसंज्ञाय वसवे । वालधिः पुच्छम् ॥
१-१०६-१६ वसुनन्दिनी वसुप्रिया ॥

१-१०६-२८ प्रपातो वसिष्ठशापरूपः ॥
१-१०६-४१ न प्रजास्यत्यात्मनः प्रजेच्छां न करिष्यति ।क्यजन्तोयम् ॥
षडधिकशततमोऽध्यायः ॥
१०६ ॥

आदिपर्व - अध्याय १०७
॥ श्रीः ॥
१.१०७. अध्यायः १०७

Mahabharata - Adi Parva - Chapter Topics
शान्तनुभीष्मयोश्चरितम् ॥ १ ॥
शान्तनोः पुनर्गङ्गादर्शनं तया सह संवादश्च ॥ २ ॥
गङ्गादत्तेन भीष्मेण सह शान्तनोः स्वपुरप्रवेशः ॥ ३ ॥
भीष्मस्य यौवराज्येभिषेकः ॥ ४ ॥
शान्तनुभावं ज्ञात्वा दाशाशयानुसारेण प्रतिज्ञापूर्वकं भीष्मेण
दाशकन्यानयनम् ॥ ५ ॥
तुष्टेन शान्तनुना भीष्माय स्वच्छन्दमरणवरदानम् ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०७-० (४७०४)
वैशम्पायन उवाच। १-१०७-०क्ष् (६५१)
स राजा शान्तनुर्धीमान्देवराजर्षिसत्कृतः ।
धर्मात्मा सर्वलोकेषु सत्यवागिति विश्रुतः ॥ १-१०७-१ (४७०५)
शान्तनोः कीर्तयिष्यामि सर्वानेव गुणानहम् ।
दमो दानं क्षमा बुद्धिर्ह्रीर्धृतिस्तेज उत्तमम् ।
नित्यान्यासन्महासत्वे शान्तनौ पुरुषर्षभे ॥ १-१०७-२ (४७०६)
एवं स गुणसंपन्नो धर्मार्थकुशलो नृपः ।
आसीद्भरतवंशस्य गोप्ता सर्वजनस्य च ॥ १-१०७-३ (४७०७)
कम्बुग्रीवः पृथुव्यंसो मत्तवारणविक्रमः ।
अन्वितः परिपूर्णार्थैः सर्वैर्नृपतिलक्षणैः ॥ १-१०७-४ (४७०८)
तस्य कीर्तिमतो वृत्तमवेक्ष्य सततं नराः ।
धर्म एव परः कामादर्थाच्चेति व्यवस्थितः ॥ १-१०७-५ (४७०९)
एवमासीन्महासत्वः शान्तनुर्भरतर्षभ ।
न चास्य सदृशः कश्चिद्धर्मतः पार्थिवोऽभवत् ॥ १-१०७-६ (४७१०)
वर्तमानं हि धर्मेषु सर्वधर्मभृतां वरम् ।
तं महीपा महीपालं राजराज्येऽभ्यषेचयन् ॥ १-१०७-७ (४७११)

वीतशोकभयाबाधाः सुखस्वप्ननिबोधनाः ।
पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥ १-१०७-८ (४७१२)
तेन कीर्तिमता शिष्टाः शक्रप्रतिमतेजसा ।
यज्ञदानक्रियाशीलाः समपद्यन्त भूमिपाः ॥ १-१०७-९ (४७१३)
शान्तनुप्रमुखैर्गुप्ते लोके नृपतिभिस्तदा ।
नियमात्सर्ववर्णानां धर्मोत्तरमवर्तत ॥ १-१०७-१० (४७१४)
ब्रह्म पर्यचरत्क्षत्रं विशः क्षत्रमनुव्रताः ।
ब्रह्मक्षत्रानुरक्ताश्च शूद्राः पर्यचरन्विशः ॥ १-१०७-११ (४७१५)
स हास्तिनपुरे रम्ये कुरूणां पुटभेदने ।
वसन्सागरपर्यन्तामन्वशासद्वसुन्धराम् ॥ १-१०७-१२ (४७१६)
स देवराजसदृशो धर्मज्ञः सत्यवागृजुः ।
दानधर्मतपोयोगाच्छ्रिया परमया युतः ॥ १-१०७-१३ (४७१७)
अरागद्वेषसंयुक्तः सोमवत्प्रियदर्शनः ॥
तेजसा सूर्यकल्पोऽभूद्वायुवेगसमो जवे ।
अन्तकप्रतिमः कोपे क्षमया पृथिवीसमः ॥ १-१०७-१४ (४७१८)
वधः पशुवराहाणां तथैव मृगपक्षिणाम् ।
शान्तनौ पृथिवीपाले नावर्तत तथा नृप ॥ १-१०७-१५ (४७१९)
ब्रह्मधर्मोत्तरे राज्ये शान्तनुर्विनयात्मवान् ।
समं शशास भूतानि कामरागविवर्जितः ॥ १-१०७-१६ (४७२०)
ग्चकोरनेत्रस्ताम्रास्यः सिंहर्षभगतिर्युवा ।
गुणैरनुपमैर्युक्तः समस्तैराभिगामिकैः ।
गम्भीरः सत्वसंपन्नः पूर्णचन्द्रनिभाननः ॥' १-१०७-१७ (४७२१)
देवर्षिपितृयज्ञार्थमारभ्यन्त तदा क्रियाः ।
न चाधर्मेण केषांचित्प्राणिनामभवद्वधः ॥ १-१०७-१८ (४७२२)
असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा सर्वेषां भूतानामभवत्पिता ॥ १-१०७-१९ (४७२३)
तस्मिन्कुरुपतिश्रेष्ठे राजराजेश्वरे सति ।
श्रिता वागभवत्सत्यं दानधर्माश्रितं मनः ॥ १-१०७-२० (४७२४)
ग्यज्ञार्थं पशवः सृष्टाः संतानार्थं च मैथुनम् ।'
स समाः षोडशाष्टौ च चतस्रोऽष्टौ तथाऽपराः ।
रतिमप्राप्नुवन्स्त्रीषु बभूव वनगोचरः ॥ १-१०७-२१ (४७२५)
तथारूपस्तथाचारस्तथावृत्तस्तथाश्रुतः ।
गाङ्गेयस्तस्य पुत्रोऽभून्नाम्ना देवव्रतो वसुः ॥ १-१०७-२२ (४७२६)
सर्वास्त्रेषु स निष्णातः पार्थिवेष्वितरेषु च ।
महाबलो महासत्वो महावीर्यो महारथः ॥ १-१०७-२३ (४७२७)
स कदाचिन्मृगं विद्ध्वा गङ्गामनुसरन्नदीम् ।

भागीरथीमल्पजलां शान्तनुर्दृष्टवान्नृपः ॥ १-१०७-२४ (४७२८)
तां दृष्ट्वा चिन्तयामास शान्तनुः पुरुषर्षभः ।
स्यन्दते किं न्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा ॥ १-१०७-२५ (४७२९)
ततो निमित्तमन्विच्छन्ददर्श स महामनाः ।
कुमारं रूपसंपन्नं बृहन्तं चारुदर्शनम् ॥ १-१०७-२६ (४७३०)
दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम् ।
कृत्स्नां गङ्गां समावृत्य शरैस्तीक्ष्णैरवस्थितम् ॥ १-१०७-२७ (४७३१)
तां शरैराचितां दृष्ट्वा नदीं गङ्गां तदन्तिके ।
अभवद्विस्मितो राजा दृष्ट्वा कर्मातिमानुषम् ॥ १-१०७-२८ (४७३२)
जातमात्रं पुरा दृष्टं तं पुत्रं शान्तनुस्तदा ।
नोपलेभे स्मृतिं धीमानभिज्ञातुं तमात्मजम् ॥ १-१०७-२९ (४७३३)
स तु तं पितरं दृष्ट्वा मोहयामास मायया ।
संमोह्य तु ततः क्षिप्रं तत्रैवान्तरधीयत ॥ १-१०७-३० (४७३४)
तदद्भुतं ततो दृष्ट्वा तत्र राजा स शान्तनुः ।
सङ्कमानः सुतं गङ्गामब्रवीद्दर्शयेति ह ॥ १-१०७-३१ (४७३५)
दर्शयामास तं गङ्गा बिभ्रती रूपमुत्तमम् ।
गृहीत्वा दक्षिणे पाणौ तं कुमारमलङ्कृतम् ॥ १-१०७-३२ (४७३६)
अलङ्कृतामाभरणैर्विरजोम्बरधारिणीम् ।
दृष्टपूर्वामपि स तां नाभ्यजानात्स शान्तनुः ॥ १-१०७-३३ (४७३७)
गङ्गोवाच। १-१०७-३४क्ष् (६५२)
यं पुत्रमष्टमं राजंस्त्वं पुरा मय्यविन्दथाः ।
स चायं पुरुषव्याघ्र सर्वास्त्रविदनुत्तमः ॥ १-१०७-३४ (४७३८)
गृहाणेमं महाराज मया संवर्धितं सुतम् ।
आदाय पुरुषव्याघ्र नयस्वैनं गृहं विभो ॥ १-१०७-३५ (४७३९)
वेदानधिजगे साङ्गान्वसिष्ठादेष वीर्यवान् ।
कृतास्त्रः परमेष्वासो देवराजसमो युधि ॥ १-१०७-३६ (४७४०)
सुराणां संमतो नित्यमसुराणां च भारत ।
उशा वेद यच्छास्त्रमयं तद्वेद सर्वशः ॥ १-१०७-३७ (४७४१)
तथैवाङ्गिरसः पुत्रः सुरसुरनमस्कृतः ।
यद्वेद शास्त्रं तच्चापि कृत्स्नमस्मिन्प्रतिष्ठितम् ॥ १-१०७-३८ (४७४२)
तव पुत्रे महाबाहौ साङ्गोपाङ्गं महात्मनि ।
ऋषिः परैरनाधृष्यो जामदग्न्यः प्रतापवान् ॥ १-१०७-३९ (४७४३)
यदस्त्रं वेद राभश्च तदेतस्मिन्प्रतिष्ठितम् ।
महेष्वासमिमं राजन्राजधर्मार्थकोविदम् ॥ १-१०७-४० (४७४४)
मया दत्तं निजं पुत्रं वीरं वीर गृहं नय। १-१०७-४१ (४७४५)
वैशम्पायन उवाच ।

ग्इत्युक्त्वा सा महाभागा तत्रैवान्तरधीयत।'
तयैवं समनुज्ञातः पुत्रमादाय शान्तनुः ॥ १-१०७-४१क्ष् (६५३)
भ्राजमानं यथाऽदित्यमाययौ स्वपुरं प्रति ।
पौरवस्तु पुरीं गत्वा पुरन्दरपुरोपमाम् ॥१-१०७-४२ (४७४६)
सर्वकामसमृद्धार्थं मेने सोत्मानमात्मना ।
पौरवेषु ततः पुत्रं राज्यार्थमभयप्रदम् ॥१-१०७-४३ (४७४७)
गुणवन्तं महात्मानं यौवराज्येऽभ्यषेचयत् ।
पौरवाञ्शान्तनोः पुत्रः पितरं च महायशाः ॥१-१०७-४४ (४७४८)
राष्ट्रं च रञ्जयामास वृत्तेन भरतर्षभ ।
स तथा सह पुत्रेण रममाणो महीपतिः ॥१-१०७-४५ (४७४९)
वर्तयामास वर्षाणि चत्वार्यमितविक्रमः ।
स कदाचिद्वनं यातो यमुनामभितो नदीम् ॥१-१०७-४६ (४७५०)
महीपतिरनिर्देश्यमाजिघ्रद्गन्धमुत्तमम् ।
तस्य प्रभवमन्विच्छन्विचचार समन्ततः ॥१-१०७-४७ (४७५१)
स ददर्श तदा कन्यां दाशानां देवरूपिणीम् ।
तामपृच्छत्स दृष्ट्वैव कन्यामसितलोचनाम् ॥१-१०७-४८ (४७५२)
कस्य त्वमसि का चासि किं च भीरु चिकीर्षसि ।
साऽब्रवीद्दाशकन्याऽस्मि धर्मार्थं वाहये तरिम् ॥१-१०७-४९ (४७५३)
पितुर्नियोगाद्भद्रं ते दाशराज्ञो महात्मनः ।
रूपमाधुर्यगन्धैस्तां संयुक्तां देवरूपिणीम् ॥१-१०७-५० (४७५४)
समीक्ष्य राजा दाशेयीं कामयामास शान्तनुः ।
स गत्वा पितरं तस्या वरयामास तां तदा ॥१-१०७-५१ (४७५५)
पर्यपृच्छत्ततस्तस्याः पितरं सोत्मकारणात् ।
स च तं प्रत्युवाचेदं दाशराजो महीपतिम् ॥१-१०७-५२ (४७५६)
जातमात्रैव मे देया वराय वरवर्णिनी ।
हृदि कामस्तु मे कश्चित्तं निबोध जनेश्वर ॥१-१०७-५३ (४७५७)
यदीमां धर्मपत्नीं त्वं मत्तः प्रार्थयसेऽनघ ।
सत्यवागसि सत्येन समयं कुरु मे ततः ॥१-१०७-५४ (४७५८)
समयेन प्रदद्यां ते कन्यामहमिमां नृप ।
न हि मे त्वत्समः कश्चिद्वरो जातु भविष्यति ॥१-१०७-५५ (४७५९)
शान्तनुरुवाच।१-१०७-५६क्ष् (६५४)
श्रुत्वा तव वरं दाश व्यवस्येयमहं तव ।
दातव्यं चेत्प्रदास्यामि न त्वदेयं कथंचन ॥१-१०७-५६ (४७६०)
दाश उवाच।१-१०७-५७क्ष् (६५५)
अस्यां जायेत यः पुत्रः स राजा पृथिवीपते ।
त्वदूर्ध्वमभिषेक्तव्यो नान्यः कश्चन पार्थिव ॥१-१०७-५७ (४७६१)

वैशम्पायन उवाच। १-१०७-५८क्ष् (६५६)
नाकामयत तं दातुं वरं दाशाय शान्तनुः ।
शरीरजेन तीव्रेण दह्यमानोऽपि भारत ॥ १-१०७-५८ (४७६२)
स चिन्तयन्नेव तदा दाशकन्यां महीपतिः ।
प्रत्ययाद्धास्तिनपुरं कामोपहतचेतनः ॥ १-१०७-५९ (४७६३)
ततः कदाचिच्छोचन्तं शान्तनुं ध्यानमास्थितम् ।
पुत्रो देवव्रतोऽभ्येत्य पितरं वाक्यमब्रवीत् ॥ १-१०७-६० (४७६४)
सर्वतो भवतः क्षेमं विधेयाः सर्वपार्थिवाः ।
तत्किमर्थमिहाभीक्ष्णं परिशोचसि दुःखितः ॥ १-१०७-६१ (४७६५)
ध्यायन्निव च मां राजन्नाभिभाषसि किंचन ।
न चाश्वेन विनिर्यासि विवर्णो हरिणः कृशः ॥ १-१०७-६२ (४७६६)
व्याधिमिच्छामि ते ज्ञातुं प्रतिकुर्यां हि तत्र वै। १-१०७-६३ (४७६७)
ग्वैशम्पायन उवाच ।
स तं काममवाच्यं वै दाशकन्यां प्रतीदृशम् ॥ १-१०७-६३क्ष् (६५७)
विवर्तुं नाशकत्तस्मै पिता पुत्रस्य शान्तनुः।'
एवमुक्तः स पुत्रेण शान्तनुः प्रत्यभाषत ॥ १-१०७-६४ (४७६८)
असंशयं ध्यानपरो यथा वत्स तथा शृणु ।
अपत्यं नस्त्वमेवैकः कुले महति भारत ॥ १-१०७-६५ (४७६९)
शस्त्रनित्यश्च सततं पौरुषे पर्यवस्थितः ।
अनित्यतां च लोकानामनुशोचामि पुत्रक ॥ १-१०७-६६ (४७७०)
कथंचित्तव गाङ्गेय विपत्तौ नास्ति नः कुलम् ।
असंशयं त्वमेवैकः शतादपि वरः सुतः ॥ १-१०७-६७ (४७७१)
न चाप्यहं वृथा भूयो दारान्कर्तुमिहोत्सहे ।
संतानस्याविनाशाय कामये भद्रमस्तु ते ॥ १-१०७-६८ (४७७२)
अनपत्यतैकपुत्रत्वमित्याहुर्धर्मवादिनः ।
ग्चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत ।
चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुलक्षयः ॥' १-१०७-६९ (४७७३)
अग्निहोत्रं त्रयी विद्या यज्ञाश्च सहदक्षिणाः ।
सर्वाण्येतान्यपत्यस्य कलां नार्हन्ति षोडशीम् ॥ १-१०७-७० (४७७४)
एवमेतन्मनुष्येषु तच्च सर्वं प्रजास्विति ।
यदपत्यं महाप्राज्ञ तत्र मे नास्ति संशयः ॥ १-१०७-७१ (४७७५)
ग्अपत्येनानृणो लोके पितॄणां नास्ति संशयः।'
एषा त्रयी पुराणानां देवतानां च शाश्वती ॥ १-१०७-७२ (४७७६)
ग्अपत्यं कर्म विद्या च त्रीणि ज्योतींषि भारत ॥' १-१०७-७३ (४७७७)
त्वं च शूरः सदाऽमर्षी शस्त्रनित्यश्च भारत ।
नान्यत्र युद्धात्तस्मात्ते निधनं विद्यते क्वचित् ॥ १-१०७-७४ (४७७८)

सोऽस्मि संशयमापन्नस्त्वयि शान्ते कथं भवेत् ।
इति ते कारणं तात दुःखस्योक्तमशेषतः ॥ १-१०७-७५ (४७७९)
वैशम्पायन उवाच। १-१०७-७६क्ष् (६५८)
ततस्तत्कारणं राज्ञो ज्ञात्वा सर्वमशेषतः ।
देवव्रतो महाबुद्धिः प्रज्ञया चान्वचिन्तयत् ॥ १-१०७-७६ (४७८०)
अपत्यफलसंयुक्तमेतच्छ्रुत्वा पितुर्वचः ।
सूतं भूयोऽपि संतप्त आह्वयामास वै पितुः ॥ १-१०७-७७ (४७८१)
सूतस्तु कुरुमुख्यस्य उपयातस्तदाज्ञया ।
तमुवाच महाप्राज्ञो भीष्मो वै सारथिं पितुः ॥ १-१०७-७८ (४७८२)
त्वं सारथे पितुर्मह्यं सखासि रथधूर्गतः ।
अपि जानासि यदि वै कस्यां भावो नृपस्य तु ॥ १-१०७-७९ (४७८३)
तदाचक्ष्व भवान्पृष्टः करिष्ये न तदन्यथा। १-१०७-८० (४७८४)
सूत उवाच ।
दाशकन्या कुरुश्रेष्ठ तत्र भावः पितुर्गतः ॥ १-१०७-८०क्ष् (६५९)
वृतः स नरदेवेन तदा वचनमब्रवीत् ।
योऽस्यां पुमान्भवेज्जातः स राजा त्वदनन्तरम् ॥ १-१०७-८१ (४७८५)
नाकामयत तं दातुं पिता तव वरं तदा ।
स चापि निश्चयस्तस्य न च दद्यां ततोऽन्यथा ॥ १-१०७-८२ (४७८६)
एतत्ते कथितं वीर कुरुष्व यदनन्तरम्। १-१०७-८३ (४७८७)
वैशम्पायन उवाच ।
ततः स पितुराज्ञाय मतं सम्यगवेक्ष्य च ।
ज्ञात्वा च मानसं पुत्रः प्रययौ यमुनां प्रति ॥ १-१०७-८३क्ष् (६६०)
क्षत्रियैः सह धर्मात्मा पुराणैर्धर्मचारिभिः ।
उच्चैश्श्रवसमागम्य कन्यां वव्रे पितुः स्वयम्'॥ १-१०७-८४ (४७८८)
तं दाशः प्रतिजग्राह विधिवत्प्रतिपूज्य च ।
अब्रवीच्चैनमासीनं राजसंसदि भारत ॥ १-१०७-८५ (४७८९)
ग्राज्यशुल्का प्रदातव्या कन्येयं याचतां वर ।
अपत्यं यद्भवेदस्याः स राजाऽस्तु पितुः परम् ॥' १-१०७-८६ (४७९०)
त्वमेवात्र महाबाहो शान्तनोर्वंशवर्धनः ।
पुत्रः शस्त्रभृतां श्रेष्ठः किं नु वक्ष्यामि ते वचः ॥ १-१०७-८७
(४७९१)
ग्कुमारिकायाः शुल्कार्थं किंचिद्वक्ष्यामि भारत।'
कोहि संबन्धखं श्लाघ्यमीप्सितं यौनमीदृशम् ।
अतिक्रामन्न तप्येत साक्षादपि शतक्रतुः ॥ १-१०७-८८ (४७९२)
अपत्यं चैतदार्यस्य यो युष्माकं समो गुणैः ।
यस्य शुक्रात्सत्यवती संभूता वरवर्णिनी ॥ १-१०७-८९ (४७९३)

तेन मे बहुशस्तात पिता ते परिकीर्तितः ।
अर्हः सत्यवतीं वोढुं धर्मज्ञः स नराधिपः ॥ १-१०७-९० (४७९४)
ऽइयं सत्यवती देवी पितरं तेऽब्रवीत्तथा ।
अर्थितश्चापिराजर्षिः प्रत्याख्यातः पुरा मया'॥ १-१०७-९१ (४७९५)
कन्यापितृत्वात्किंचित्तु वक्ष्यामि त्वां नराधिप ।
बलवत्सपत्नतामत्र दोषं पश्यामि केवलम् ॥ १-१०७-९२ (४७९६)
ऽभूयांसं त्वयि पश्यामि तद्दोषमपराजित।'
यस्य हि त्वं सपत्नः स्या गन्धर्वस्यासुरस्य वा ॥ १-१०७-९३ (४७९७)
न स जातु चिरं जीवेत्त्वयि क्रुद्धे परन्तप ।
एतावानत्र दोषो हि नान्यः कश्चन पार्थिव ॥ १-१०७-९४ (४७९८)
एतज्जानीहि भद्रं ते दानादाने परन्तप ॥ १-१०७-९५ (४७९९)
वैशम्पायन उवाच। १-१०७-९६क्ष् (६६१)
एवमुक्तस्तु गाङ्गेयस्तद्युक्तं प्रत्यभाषत ।
शृण्वतां भूमिपालानां पितुरर्थाय भारत ॥ १-१०७-९६ (४८००)
ऽइदं वचनमाधत्स्व नास्ति वक्तास्य मत्समः ।
अन्यो जातो न जनिता न च कश्चन संप्रति'॥ १-१०७-९७ (४८०१)
एवमेतत्करिष्यामि यथा त्वमनुभाषसे ।
योऽस्यां जनिष्यते पुत्रः स नो राजा भविष्यति ॥ १-१०७-९८ (४८०२)
इत्युक्तः पुनरेव स्म तं दाशः प्रत्यभाषत ।
चिकीर्षुर्दुष्करं कर्म राज्यार्थे भरतर्षभ ॥ १-१०७-९९ (४८०३)
त्वमेव नाथः संप्राप्तः शान्तनोरमितद्युते ।
कन्यायाश्चैव धर्मात्मन्प्रभुर्दानाय चेश्वरः ॥ १-१०७-१०० (४८०४)
इदं तु वचनं सौम्य कार्यं चैव निबोध मे ।
कौमारिकाणां शीलेन वक्ष्याम्यहमरिन्दम ॥ १-१०७-१०१ (४८०५)
यत्त्वया सत्यवत्यर्थे सत्यधर्मपरायण ।
राजमध्ये प्रतिज्ञातमनुरूपं तवैव तत् ॥ १-१०७-१०२ (४८०६)
नान्यथा तन्महाबाहो संशयोऽत्र न कश्चन ।
तवापत्यं भवेद्यत्तु तत्र नः संशयो महान् ॥ १-१०७-१०३ (४८०७)
वैशम्पायन उवाच। १-१०७-१०४क्ष् (६६२)
तस्यैतन्मतमाज्ञाय सत्यधर्मपरायणः ।
प्रत्यजानात्तदा राजन्पितुः प्रियचिकीर्षया ॥ १-१०७-१०४ (४८०८)
गाङ्गेय उवाच। १-१०७-१०५क्ष् (६६३)
ऽउच्चैश्श्रवः समाधत्स्व प्रतिज्ञां जनसंसदि ।
ऋषयो वाथ वा देवा भूतान्यन्तर्हितानि च ॥ १-१०७-१०५ (४८०९)
यानि यानीह शृण्वन्तु नास्ति वक्तास्य मत्समः।'
दाशराज निबोधेदं वचनं मे नृपोत्तम ॥ १-१०७-१०६ (४८१०)

शृण्वतां भूमिपालानां यद्ब्रवीमि पितुः कृते ।
राज्यं तावत्पूर्वमेव मया त्यक्तं नराधिपाः ॥ १-१०७-१०७ (४८११)
अपत्यहेतोरपि च करिष्येऽद्य विनिश्चयम् ।
अद्यप्रभृति मे दाश ब्रह्मचर्यं भविष्यति ॥ १-१०७-१०८ (४८१२)
अपुत्रस्यापि मे लोका भविष्यन्त्यक्षया दिवि ।
ग्न हि जन्मप्रभृत्युक्तं मया किंचिदिहानृतम् ॥ १-१०७-१०९ (४८१३)
यावत्प्राणा ध्रियन्ते वै मम देहं समाश्रिताः ।
तावन्न जनयिष्यामि पित्रे कन्यां प्रयच्छ मे ॥ १-१०७-११० (४८१४)
परित्यजाम्यहं राज्यं मैथुनं चापि सर्वशः ।
ऊर्ध्वरेता भविष्यामि दाश सत्यं ब्रवीमि ते ॥' १-१०७-१११ (४८१५)
वैशम्पायन उवाच। १-१०७-११२क्ष् (६६४)
तस्य तद्वचनं श्रुत्वा संप्रहृष्टतनूरुहः ।
ददानीत्येव तं दाशो धर्मात्मा प्रत्यभाषत ॥ १-१०७-११२ (४८१६)
ततोन्तरिक्षेऽप्सरसो देवाः सर्षिगणास्तदा ।
ग्तद्दृष्टा दुष्करं कर्म प्रशशंसुश्च पार्थिवाः ॥' १-१०७-११३ (४८१७)
अभ्यवर्षन्त कुसुमैर्भीष्मोऽयमिति चाब्रुवन् ।
ततः स पितुरर्थाय तामुवाच यशस्विनीम् ॥ १-१०७-११४ (४८१८)
अधिरोह रथं मातर्गच्छावः स्वगृहानिति ।
एवमुक्त्वा तु भीष्मस्तां रथमारोप्य भामिनीं ॥ १-१०७-११५ (४८१९)
आगम्य हास्तिनपुरं शान्तनोः संन्यवेदयत् ।
तस्य तद्दुष्करं कर्म प्रशशंसुर्नराधिपाः ॥ १-१०७-११६ (४८२०)
समेताश्च पृथक्चैव भीष्मोयमिति चाब्रुवन् ।
तच्छ्रुत्वा दुष्करं कर्म कृतं भीष्मेण शान्तनुः ॥ १-१०७-११७ (४८२१)
बभूव दुःखितो राजा चिररात्राय भारत ।
स तेन कर्मणा सूनोः प्रीतस्तस्मै वरं ददौ ॥' १-१०७-११८ (४८२२)
स्वच्छन्दमरणं तुष्टो ददौ तस्मै महात्मने ।
न ते मृत्युः प्रभविता यावज्जीवितुमिच्छसि ॥ १-१०७-११९ (४८२३)
त्वत्तो ह्यनुज्ञां संप्राप्य मृत्युः प्रभविताऽनघ ॥ १-१०७-१२० (४८२४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१०७-१२ पुटभेदने पत्तने ॥
१-१०७-१६ ब्रह्मधर्मोत्तरे अहिंसाधर्मप्रधाने ॥
१-१०७-२० वाक् सत्यं श्रिताभवत् ॥

१-१०७-३६ अधिजगे अधीतवान् ॥
१-१०७-४९ तरिं नावम् ॥
१-१०७-५६ व्यवस्येयं विनिश्चिनुयम् ॥
१-१०७-५८ शरीरजेन कामेन ॥
१-१०७-६२ हरिणः पाण्डुगात्रः ॥
१-१०७-७२ पुराणानां पुरातनानाम् ॥
१-१०७-९५ दाने वसुवचनं अदाने बलवत्सपत्नता अत्र कारणमिति शेषः ॥
सप्तोत्तरशततमोऽध्यायः ॥
१०७ ॥

आदिपर्व - अध्याय १०८
॥ श्रीः ॥
१.१०८. अध्यायः १०८

Mahabharata - Adi Parva - Chapter Topics
शान्तनुसत्यवतीविवाहः ॥ १ ॥
चित्राङ्गदविचित्रवीर्ययोरुत्पत्तिः ॥ २ ॥
शान्तनुमरणम् ॥ ३ ॥
चित्राङ्गदमरणम् ॥ ४ ॥
विचित्रवीर्यस्य राज्येऽभिषेकः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०८-० (४८२५)
वैशम्पायन उवाच। १-१०८-०क्ष् (६६५)
ग्चेदिराजसुतां ज्ञात्वा दाशराजेन वर्धिताम् ।
विवाहं कारयामास शास्त्रदृष्टेन कर्मणा ॥' १-१०८-१ (४८२६)
ततो विवाहे निर्वृत्ते स राजा शान्तनुर्नृपः ।
तां कन्यां रूपसंपन्नां स्वगृहे संन्यवेशयत् ॥ १-१०८-२ (४८२७)
ततः शान्तनवो धीमान्सत्यवत्यामजायत ।
वीरश्चित्राङ्गदो नाम वीर्यवान्पुरुषेश्वरः ॥ १-१०८-३ (४८२८)
अथापरं महेष्वासं सत्यवत्यां सुतं प्रभुः ।
विचित्रवीर्यं राजानं जनयामास वीर्यवान् ॥ १-१०८-४ (४८२९)
अप्राप्तवति तस्मिंस्तु यौवनं पुरुषर्षभे ।
स राजा शान्तनुर्धीमान्कालधर्ममुपेयिवान् ॥ १-१०८-५ (४८३०)
स्वर्गते शान्तनौ भीष्मश्चित्राङ्गदमरिन्दनम् ।
स्थापयामास वै राज्ये सत्यवत्या मते स्थितः ॥ १-१०८-६ (४८३१)

स तु चित्राङ्गदः शौर्यात्सर्वांश्चिक्षेप पार्थिवान् ।
मनुष्यं न हि मेन स कंचित्सदृशमात्मनः ॥ १-१०८-७ (४८३२)
तं क्षिपन्तं सुरांश्चैव मनुष्यानसुरांस्तथा ।
गन्धर्वराजो बलवांस्तुल्यनामाऽभ्ययात्तदा ॥ १-१०८-८ (४८३३)
गन्धर्व उवाच। १-१०८-९क्ष् (६६६)
ग्त्वं वै सदृशनामासि युद्धं देहि नृपात्मज ।
नाम वाऽन्यत्प्रगृह्णीष्व यदि युद्धं न दास्यसि ॥ १-१०८-९ (४८३४)
त्वयाहं युद्धमिच्छामि त्वत्सकाशं तु नामतः ।
आगतोस्मि वृथाऽऽभाष्य न गच्छेन्नाम ते मम ॥ १-१०८-१० (४८३५)
इत्युक्त्वा गर्जमानौ तौ हिरण्वत्यास्तटं गतौ'।
तेनास्य सुमहद्युद्धं कुरुक्षेत्रे बभूव ह ॥ १-१०८-११ (४८३६)
तयोर्बलवतोस्तत्र गन्धर्वकुरुमुख्ययोः ।
नद्यास्तीरे हिरण्वत्याः समास्तिस्रोऽभवद्रणः ॥ १-१०८-१२ (४८३७)
तस्मिन्विमर्दे तुमुले शस्त्रवर्षसमाकुले ।
मायाधिकोऽवधीद्वीरं गन्धर्वः कुरुसत्तमम् ॥ १-१०८-१३ (४८३८)
स हत्वा तु नरश्रेष्ठं चित्राङ्गदमरिन्दमम् ।
अन्ताय कृत्वा गन्धर्वो दिवमाचक्रमे ततः ॥ १-१०८-१४ (४८३९)
तस्मिन्पुरुषशार्दूले निहते भूरितेजसि ।
भीष्मः शान्तनवो राजा प्रेतकार्याण्यकारयत् ॥ १-१०८-१५ (४८४०)
विचित्रवीर्यं च तदा बालमप्राप्तयौवनम् ।
कुरुराज्ये महाबाहुरभ्यषिञ्चदनन्तरम् ॥ १-१०८-१६ (४८४१)
विचित्रवीर्यः स तदा भीष्मस्य वचने स्थितः ।
अन्वशासन्महाराज पितृपैतामहं पदम् ॥ १-१०८-१७ (४८४२)
स धर्मशास्त्रकुशलं भीष्मं शान्तनवं नृपः ।
पूजयामास धर्मेण स चैनं प्रत्यपालयत् ॥ ॥ १-१०८-१८ (४८४३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

आदिपर्व - अध्याय १०९
॥ श्रीः ॥
१.१०९. अध्यायः १०९

Mahabharata - Adi Parva - Chapter Topics
भीष्मस्य काशिपतिकन्याहरणार्थं वाराणसीगमनम् ॥ १ ॥
कन्यां हृतवता भीष्मेण युद्धे राज्ञां पराजयः ॥ २ ॥
मध्येमार्गं साल्वपराजयः ॥ ३ ॥

विचित्रवीर्यविवाहोपक्रमे तमनिच्छन्त्या ज्येष्ठाया अम्बयाः साल्वं प्रति गमनम् ॥ ४ ॥
तेन प्रत्याख्यातायाः पुनर्भीष्मं प्राप्ताय अम्ब्रायाः भीष्मेण निराकरणम् ॥ ५ ॥
भीष्मजिघांसया तपस्यन्त्या अम्बायाः प्रसन्नात्कुमारान्मालाप्राप्तिः ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-१०९-० (४८४४)
वैशम्पायन उवाच। १-१०९-०क्ष् (६६७)
हते चित्राङ्गदे भीष्मो बाले भ्रातरि कौरव ।
पालयामास तद्राज्यं सत्यवत्या मते स्थितः ॥ १-१०९-१ (४८४५)
ऽतथा विचित्रवीर्यं तु वर्तमानं सुखेऽतुले।ऽ
संप्राप्तयौवनं दृष्ट्वा भ्रातरं धीमतां वरः ।
भीष्मो विचित्रवीर्यस्य विवाहायाकरोन्मतिम् ॥ १-१०९-२ (४८४६)
अथ काशिपतेर्भीष्मः कन्यास्तिस्रोऽप्सरोपमाः ।
शुश्राव सहिता राजन्वृण्वाना वै स्वयंवरम् ॥ १-१०९-३ (४८४७)
ततः स रथिनां श्रेष्ठो रथेनैकेन शत्रुजित् ।
जगामानुमते मातुः पुरीं वाराणसीं प्रभुः ॥ १-१०९-४ (४८४८)
तत्र राज्ञः समुदितान्सर्वतः समुपागतान् ।
ददर्श कन्यास्ताश्चै भीष्मः शान्तनुनन्दनः ॥ १-१०९-५ (४८४९)
ऽतासां कामेन संमत्ताः सहिताः काशिकोसलाः ।
वङ्गाः पुण्ड्राः कलिङ्गाश्च ते जग्मुस्तां पुरीं प्रति ॥ऽ १-१०९-६ (४८५०)
कीर्त्यमानेषु राज्ञां तु तदा नामसु सर्वशः ।
एकाकिनं तदा भीष्मं वृद्धं शान्तनुनन्दनम् ॥ १-१०९-७ (४८५१)
सोद्विग्ना इव तं दृष्ट्वा कन्याः परमशोभनाः ।
अपाक्रामन्त ताः सर्वा वृद्ध इत्येव चिन्तया ॥ १-१०९-८ (४८५२)
वृद्धः परमधर्मात्मा वलीपलितधारणः ।
किकारणमिहायातो निर्लज्जो भरतर्षभः ॥ १-१०९-९ (४८५३)
मिथ्याप्रतिज्ञो लोकेषु किं वदिष्यति भारत ।
ब्रह्मचारीति भीष्मो हि वृथैव प्रथितो भुवि ॥ १-१०९-१० (४८५४)
इत्येवं प्रबुवन्तस्ते हसन्ति स्म नृपाधमाः। १-१०९-११ (४८५५)
वैशम्पायन उवाच ।
क्षत्रियाणां वचः श्रुत्वा भीष्मश्चुक्रोध भारत ॥ १-१०९-११क्ष् (६६८)
भीष्मस्तदा स्वयं कन्या वरयामास ताः प्रभुः ।
उवाच च महीपालान्राजञ्जलदनिःस्वनः ॥ १-१०९-१२ (४८५६)

रथमारोप्य ताः कन्या भीष्मः प्रहरतां वरः ।
आहूय दानं कन्यानां गुणवद्भ्यः स्मृतं बुधैः ॥ १-१०९-१३ (४८५७)
अलङ्कृत्य यथाशक्ति प्रदाय च धनान्यपि ।
प्रयच्छन्त्यपरे कन्यां मिथुनेन गवामपि ॥ १-१०९-१४ (४८५८)
वित्तेन कथितेनान्ये बलेनान्येऽनुमान्य च ।
प्रमत्तामुपयन्त्यन्ये स्वयमन्ये च विन्दते ॥ १-१०९-१५ (४८५९)
आर्षं विधिं पुरस्कृत्य दारान्विन्दन्ति चापरे ।
अष्टमं तमथो वित्त विवाहं कविभिर्वृतम् ॥ १-१०९-१६ (४८६०)
स्वयंवरं तु राजन्याः प्रशंसन्त्युपयान्ति च ।
प्रमथ्य तु हृतामाहुर्ज्यायसीं धर्मवादिनः ॥ १-१०९-१७ (४८६१)
ता इमाः पृथिवीपाला जिहीर्षामि बलादितः ।
ते यतध्वं परं शक्त्या विजयायेतराय वा ॥ १-१०९-१८ (४८६२)
स्थितोऽहं पृथिवीपाला युद्धाय कृतनिश्चयः। १-१०९-१९ (४८६३)
वैशम्पायन उवाच ।
एवमुक्त्वा महीपालान्काशिराजं च वीर्यवान् ॥ १-१०९-१९क्ष् (६६९)
सर्वाः कन्याः स कौरव्यो रथमारोप्य च स्वकम् ।
आमन्त्र्य च स तान्प्रायाच्छीघ्रं कन्याः प्रगृह्य ताः ॥ १-१०९-२० (४८६४)
ततस्ते पार्थिवाः सर्वे समुत्पेतुरमर्षिताः ।
संस्पृशन्तः स्वकान्बाहून्दशन्तो दशनच्छदान् ॥ १-१०९-२१ (४८६५)
तेषामाभरणान्याशु त्वरितानां विमुञ्चताम् ।
आमुञ्चतां च वर्माणि संभ्रमः सुमहानभूत् ॥ १-१०९-२२ (४८६६)
ताराणामिव संपातो बभूव जनमेजय ।
भूषणानां च सर्वेषां कवचानां च सर्वशः ॥ १-१०९-२३ (४८६७)
सवर्मभिर्भूषणैश्च प्रकीर्यद्भिरितस्ततः ।
सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनाः ॥ १-१०९-२४ (४८६८)
सूतोपक्लृप्तान् रुचिरान्सदश्वैरुपकल्पितान् ।
रथानास्थाय ते वीराः सर्वप्रहरणान्विताः ॥ १-१०९-२५ (४८६९)
प्रयान्तमथ कौरव्यमनुसस्रुरुदायुधाः ।
ततः समभवद्युद्धं तेषां तस्य च भारत ।
एकस्य च बहूनां च तुमुलं रोमहर्षणम् ॥ १-१०९-२६ (४८७०)
ते त्विषून्दशसाहस्रांस्तस्मिन्युगपदाक्षिपन् ।
अप्राप्तांश्चैव तानाशु भीष्मः सर्वांस्तथाऽन्तरा ॥ १-१०९-२७ (४८७१)
अच्छिनच्छरवर्षेण महता लोमवाहिना ।
ततस्ते पार्थिवाः सर्वे सर्वतः परिवार्य तम् ॥ १-१०९-२८ (४८७२)
ववृषुः शरवर्षेण वर्षेणेवाद्रिमम्बुदाः ।
स तं बाणमयं वर्षं शरैरावार्य सर्वतः ॥ १-१०९-२९ (४८७३)

ततः सर्वान्महीपालान्पर्यविध्यत्त्रिभिस्त्रिभिः ।
एकैकस्तु ततो भीष्मं राजन्विव्याध पञ्चभिः ॥ १-१०९-३० (४८७४)
स च तान्प्रतिविव्याध द्वाभ्यां द्वाभ्यां पराक्रमन् ।
तद्युद्धमासीत्तुमुलं घोरं देवासुरोपमम् ॥ १-१०९-३१ (४८७५)
पश्यतां लोकवीराणां शरशक्तिसमाकुलम् ।
स धनूंषि ध्वजाग्राणि वर्माणि च शिरांसि ॥ १-१०९-३२ (४८७६)
चिच्छेद समरे भीष्मः शतशोथ सहस्रशः ।
तस्यातिपुरुषं कर्म लाघवं रथचारिणः ॥ १-१०९-३३ (४८७७)
रक्षणं चात्मनः संख्ये शत्रवोऽप्यभ्यपूजयन् ।
ग्अक्षतः क्षपयित्वान्यानसङ्ख्येयपराक्रमः ॥ १-१०९-३४ (४८७८)
आनिनाय स काश्यस्य सुताः सागरगासुतः।'
तान्विनिर्जित्य तु रणे सर्वशस्त्रभृतां वरः ॥ १-१०९-३५ (४८७९)
कन्याभिः सहितः प्रायाद्भारतो भारतान्प्रति ।
ततस्तं पृष्ठतो राजञ्शाल्वराजो महारथः ॥ १-१०९-३६ (४८८०)
अभ्यगच्छदमेयात्मा भीष्मं शान्तनवं रणे ।
वारणं जघने भिन्दन्दन्ताभ्यामपरो यथा ॥ १-१०९-३७ (४८८१)
वासितामनुसंप्राप्तो यूथपो बलिनां वरः ।
स्त्रीकामस्तिष्ठतिष्ठेति भीष्ममाह स पार्थिवः ॥ १-१०९-३८ (४८८२)
साल्वराजो महाबाहुरमर्षेण प्रचोदितः ।
ततः स पुरुषव्याघ्रो भीष्मः परबलार्दनः ॥ १-१०९-३९ (४८८३)
तद्वाक्याकुलितः क्रोधाद्विधूमोग्निरिव ज्वलन् ।
विततेषुधनुष्पाणिर्विकुञ्चितललाटभृत् ॥ १-१०९-४० (४८८४)
क्षत्रधर्मं समास्थाय व्यपेतभयसंभ्रमः ।
निवर्तयामास रथं साल्वं प्रति महारथः ॥ १-१०९-४१ (४८८५)
निवर्तमानं तं दृष्ट्वा राजानः सर्व एव ते ।
प्रेक्षकाः समपद्यन्त भीष्मसाल्वसमागमे ॥ १-१०९-४२ (४८८६)
तौ वृषाविव नर्दन्तौ बलिनौ वासितान्तरे ।
अन्योन्यमभिवर्तेतां बलविक्रमशालिनौ ॥ १-१०९-४३ (४८८७)
ततो भीष्मं शान्तनवं शरैः शतसहस्रशः ।
साल्वराजो नरश्रेष्ठः समवाकिरदाशुगैः ॥ १-१०९-४४ (४८८८)
पूर्वमभ्यर्दितं दृष्ट्वा भीष्मं साल्वेन ते नृपाः ।
विस्मिताः समपद्यन्त साधुसाध्विति चाब्रुवन् ॥ १-१०९-४५ (४८८९)
लाघवं तस्य ते दृष्ट्वा समरे सर्वपार्थिवाः ।
अपूजयन्त संहृष्टा वाग्भिः साल्वं नराधिपम् ॥ १-१०९-४६ (४८९०)
क्षत्रियाणां ततो वाचः श्रुत्वा परपुञ्जयः ।
क्रुद्धः शान्तनवो भीष्मस्तिष्ठतिष्ठेत्यभाषत ॥ १-१०९-४७ (४८९१)

सारथिं चाब्रवीत्क्रुद्धो याहि यत्रैष पार्थिवः ।
यावदेनं निहन्म्यद्य भुजङ्गमिव पक्षिराट् ॥ १-१०९-४८ (४८९२)
ततोऽस्त्रं वारुणं सम्यग्योजयामास कौरवः ।
तेनाश्वांश्चतुरोऽमृद्नात्साल्वराजस्य भूपते ॥ १-१०९-४९ (४८९३)
अस्त्रैरस्त्राणि संवार्य साल्वराजस्य कौरवः ।
भीष्मो नृपतिशार्दूल न्यवधीत्तस्य सारथिम् ॥ १-१०९-५० (४८९४)
अस्त्रेण चास्याथैन्द्रेण न्यवधीत्तुरगोत्तमान् ।
कन्याहेतोर्नरश्रेष्ठ भीष्मः शान्तनवस्तदा ॥ १-१०९-५१ (४८९५)
जित्वा विसर्जयामास जीवन्तं नृपसत्तमम् ।
ततः साल्वः स्वनगरं प्रययौ भरतर्षभ ॥ १-१०९-५२ (४८९६)
स्वराज्यमन्वशाच्चैव धर्मेण नृपतिस्तदा ।
राजानो ये च तत्रासन्स्वयंवरदिदृक्षवः ॥ १-१०९-५३ (४८९७)
स्वान्येव तेऽपि राष्ट्राणि जग्मुः परपुरञ्जयाः ।
एवं विजित्य ताः कन्या भीष्मः प्रहरतां वरः ॥ १-१०९-५४ (४८९८)
प्रययौ हास्तिनपुरं यत्र राजा स कौरवः ।
विचित्रवीर्यो धर्मात्मा प्रशास्ति वसुधामिमाम् ॥ १-१०९-५५ (४८९९)
यथा पितास्य कौरव्यः शान्तनुर्नृपसत्तमः ।
सोऽचिरेणैव कालेन अत्यक्रामन्नराधिप ॥ १-१०९-५६ (४९००)
वनानि सरितश्चैव शैलांश्च विनिधान्द्रुमान् ।
अक्षतः क्षपयित्वाऽरीन्सङ्ख्येऽसङ्ख्येयविक्रमः ॥ १-१०९-५७ (४९०१)
आनयामास काश्यस्य सुताः सागरगासुतः ।
स्नुषा इव स धर्मात्मा भगिनीरिव चानुजाः ॥ १-१०९-५८ (४९०२)
यथा दुहितश्चैव परिगृह्य ययौ कुरून् ।
आनिन्ये स महाबाहुर्भ्रातुः प्रियचिकीर्षया ॥ १-१०९-५९ (४९०३)
ताः सर्वगुणसंपन्ना भ्राता भ्रात्रे यवीयसे ।
भीष्मो विचित्रवीर्याय प्रददौ विक्रमाहृताः ॥ १-१०९-६० (४९०४)
एवं धर्मेण धर्मज्ञः कृत्वा कर्मातिमानुषम् ।
भ्रातुर्विचित्रवीर्यस्य विवाहायोपचक्रमे ॥ १-१०९-६१ (४९०५)
सत्यवत्या सह मिथः कृत्वा निश्चयमात्मवान् ।
विवाहं कारयिष्यन्तं भीष्मं काशिपतेः सुता ।
ज्येष्ठा तासामिदं वाक्यमब्रवीद्धसती तदा ॥ १-१०९-६२ (४९०६)
मया सौभपतिः पूर्वं मनसा हि वृतः पतिः ।
तेन चास्मि वृता पूर्वमेष कामश्च मे पितुः ॥ १-१०९-६३ (४९०७)
मया वरयितव्योऽभूत्साल्वस्तस्मिन्स्वयंवरे ।
एतद्विज्ञाय धर्मज्ञ धर्मतत्त्वं समाचर ॥ १-१०९-६४ (४९०८)
एवमुक्तस्तया भीष्मः कन्यया विप्रसंसदि ।

चिन्तामभ्यगमद्वीरो युक्तां तस्यैव कर्मणः ॥ १-१०९-६५ (४९०९)
ग्अन्यसक्ता त्वियं कन्या ज्येष्ठा त्वम्बा मया जिता ।
वाचा दत्ता मनोदत्ता कृतमङ्गलवाचना ॥ १-१०९-६६ (४९१०)
निर्दिष्टा तु परस्यैव सा त्याज्या परचिन्तिनी ।
इत्युक्त्वा चानुमान्यैव भ्रातरं स्ववशानुगम् ॥' १-१०९-६७ (४९११)
विनिश्चित्य स धर्मज्ञो ब्राह्मणैर्वेदपारगैः ।
अनुजज्ञे तदा ज्येष्ठामम्बां काशिपतेः सुताम् ॥ १-१०९-६८ (४९१२)
अम्बिकाम्बालिके भार्ये प्रादाद्भ्रात्रे यवीयसे ।
भीष्मो विचित्रवीर्याय विधिदृष्टेन कर्मणा ॥ १-१०९-६९ (४९१३)
तयोः पाणी गृहीत्वा तु रूपयौवनदर्पितः ।
विचित्रवीर्यो धर्मात्मा नाम्बामैच्छत्कथंचन ॥ १-१०९-७० (४९१४)
ग्अम्बामन्यस्य कीर्त्यन्तीमब्रवीच्चारुदर्शनाम्। १-१०९-७१ (४९१५)
विचित्रवीर्य उवाच ।
पापस्य फलमेवैष कामोऽसाधुर्निरर्थकः ।
परतन्त्रोपभोगो मामार्य नाऽऽयोक्तुमर्हसि ॥ १-१०९-७१क्ष् (६७०)
भीष्म उवाच। १-१०९-७२क्ष् (६७१)
प्रातिष्ठच्छान्तनोर्वंशस्तात यस्य त्वमन्वयः ।
अकामवृत्तो धर्मात्मन्साधु मन्ये मतं तव ॥ १-१०९-७२ (४९१६)
इत्युक्त्वाम्बां समालोक्य विधिवद्वाक्यमब्रवीत् ।
विसृष्टा ह्यसि गच्छ त्वं यथाकाममनिन्दिते ॥ १-१०९-७३ (४९१७)
नानियोज्ये समर्थोऽहं नियोक्तुं भ्रातरं प्रियम् ।
अन्यबावगतां चापि को नारीं वासयेद्गृहे ॥ १-१०९-७४ (४९१८)
अतस्त्वां न नियोक्ष्यामि अन्यकामासि गम्यताम् ।
अहमप्यूर्ध्वरेता वै निवृत्तो दारकर्मणि ॥ १-१०९-७५ (४९१९)
न संबन्धस्तदावाभ्यां भविता वै कथंचन। १-१०९-७६ (४९२०)
वैशम्पायन उवाच ।
इत्युक्ता सा गता तत्र सखीभिः परिवारिता ॥ १-१०९-७६क्ष् (६७२)
निर्दिष्टा हि शनै राजन्साल्वराजपुरं प्रति ।
अथाम्बा साल्वमागम्य साऽब्रवीत्प्रतिपूज्य तं ॥ १-१०९-७७ (४९२१)
पुरा निर्दिष्टभावा त्वामागतास्मि वरानन ।
देवव्रतं समुत्सृज्य सानुजं भरतर्षभम् ॥ १-१०९-७८ (४९२२)
प्रतिगृह्णीष्व भद्रं ते विधिवन्मां समुद्यताम् ॥ १-१०९-७९ (४९२३)
वैशम्पायन उवाच। १-१०९-८०क्ष् (६७३)
तयैवमुक्तः साल्वोपि प्रहसन्निदमब्रवीत् ।
निर्जिताऽसीह भीष्मेण मां विनिर्जित्य राजसु ॥ १-१०९-८० (४९२४)
अन्येन निर्जितां भद्रे विसृष्टां तेन चालयात् ।

न गृह्णामि वरारोहे तत्र चैव तु गम्यताम् ॥१-१०९-८१ (४९२५)
वैशम्पायन उवाच।१-१०९-८२क्ष् (६७४)
इत्युक्ता सा समागम्य कुरुराज्यमनुत्तमम् ।
अम्बाब्रवीत्ततो भीष्मं त्वयाऽहं सहसा हृता ॥१-१०९-८२ (४९२६)
क्षत्रधर्ममवेक्षस्व त्वं भर्ता मम धर्मतः ।
यां यः स्वयंवरे कन्यां निर्जयेच्छौर्यसंपदा ॥१-१०९-८३ (४९२७)
राज्ञः सर्वान्विनिर्जित्य स तामुद्वाहयेद्ध्रुवम् ।
अतस्त्वमेव भर्ता मे त्वयाऽहं निर्जिता यतः ॥१-१०९-८४ (४९२८)
तस्माद्वहस्व मां भीष्म निर्जितां संसदि त्वया ।
ऊर्ध्वरेता ह्यहमिति प्रत्युवाच पुनःपुनः ॥१-१०९-८५ (४९२९)
भीष्मं सा चाब्रवीदम्बा यथाजैषीस्तथा कुरु ।
एवमन्वगमद्भीष्मं षट्समाः पुष्करेक्षणा ॥१-१०९-८६ (४९३०)
ऊर्ध्वरेतास्त्वहं भद्रे विवाहविमुखोऽभवम् ।
तमेव साल्वं गच्छ त्वं यः पुरा मनसा वृतः ॥१-१०९-८७ (४९३१)
अन्यसक्तं किमर्थं त्वमात्मानमवदः पुरा ।
अन्यसक्तां वधूं कन्यां वासयेत्स्वगृहे न हि ॥१-१०९-८८ (४९३२)
नाहमुद्वाहयिष्ये त्वां मम भ्रात्रे यवीयसे ।
विचित्रवीर्याय शुभे यथेष्टं गम्यतामिति ॥१-१०९-८९ (४९३३)
भूयः साल्वं समभ्येत्य राजन्गृह्णीष्व मामिति ।
नाहं गृह्णाम्यन्यजितामिति साल्वनिराकृता ॥१-१०९-९० (४९३४)
ऊर्ध्वरेतास्त्वहमिति भीष्मेण च निराकृता ।
अम्बा भीष्मं पुनः साल्वं भीष्मं साल्वं पुनः पुनः ॥१-१०९-९१ (४९३५)
गमनागमनेनैवमनैषीत्षट् समा नृप ।
अश्रुभिर्भूमिमुक्षन्ती शोचन्ती सा मनस्विनी ॥१-१०९-९२ (४९३६)
पीनोन्नतकुचद्वन्द्वा विशालजघनेक्षणा ।
श्रोणीभरालसगमा राकाचन्द्रनिभानना ॥१-१०९-९३ (४९३७)
वर्षत्कादम्बिनीमूर्ध्नि स्फुरन्ती चञ्चलेव सा ।
सा ततो द्वादश समा बाहुदामभितो नदीम् ।
पार्श्वे हिमवतो रम्ये तपो घोरं समाददे ॥ १-१०९-९४ (४९३८)
संक्षिप्तकरणा तत्र तप आस्थाय सुव्रता ।
पादाङ्गुष्ठेन साऽतिष्ठदकम्पन्त ततः सुराः ॥१-१०९-९५ (४९३९)
तस्यास्तत्तु तपो दृष्ट्वा सुराणां क्षोभकारकम् ।
विस्मितश्चैव हृष्टश्च तस्यानुग्रहबुद्धिमान् ॥१-१०९-९६ (४९४०)
अनन्तसेनो भगवान्कुमारो वरदः प्रभुः ।
मानयन्राजपुत्रीं तां ददौ तस्यै शुभां स्रजम् ॥१-१०९-९७ (४९४१)
एषा पुष्करिणी दिव्या यथावत्समुपस्थिता ।

अम्बे त्वच्छोकशमनी माला भुवि भविष्यति ॥ १-१०९-९८ (४९४२)
एतां चैव मया दत्तां मालां यो धारयिष्यति ।
सोऽस्य भीष्मस्य निधने कारणं वै भविष्यति ॥ ॥ १-१०९-९९ (४९४३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
नवाधिकशततमोऽध्यायः ॥ १०९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१०९-१३ आहूयेति ब्राह्मः ॥
१-१०९-१४ मिथुनेन गृहीतेनेत्यार्षः ॥
१-१०९-१५ वित्तेनेत्यासुरः । बलेनेति राक्षसः। अनुमान्येति
गान्धर्वः। प्रमत्तामिति पैशाचः। स्वयमन्ये इति प्राजापत्यः ॥
१-१०९-१६ आर्षं विधिं यज्ञम् । तेन दैव उक्तः। अष्टमं राक्षसं
विवाहम् ॥
१-१०९-१७ प्रशंसति । स्वयंवरमिति ॥
१-१०९-२४ प्रकीर्यद्भिर्भऊषणैरुपलक्षिता अनुसस्रुरिति तृतीयेनान्वयः ॥
१-१०९-४३ वृषौ रेतःसेककामौ गजौ गोवृषावेव वा
तत्साहचर्याद्वासिता पुष्पिणी गौस्तदन्तरे वन्निमित्तम् ॥
१-१०९-५२ जीवन्तं प्राणमात्रावशेषितम् ॥
१-१०९-५८ काश्यस्य काशिराजस्य । अनुजाः कनिष्ठाः ॥
१-१०९-७१ अम्बां दृष्ट्वेति शेषः । अब्रवीत् भीष्ममिति शेषः ॥
नवाधिकशततमः ॥
१०९ ॥

आदिपर्व - अध्याय ११०
॥ श्रीः ॥
१.११०. अध्यायः ११०

Mahabharata - Adi Parva - Chapter Topics
संग्रहेण अम्बाचरित्रकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-११०-० (४९४४)
अम्बोवाच। १-११०-०क्ष् (६७५)
अन्यपूर्वेति मां साल्वो नाभिनन्दति बालिशः ।
साहं धर्माच्च कामाच्च विहीना शोकधारिणी ॥ १-११०-१ (४९४५)

अपतिः क्षत्रियान्सर्वानाक्रन्दामि समन्ततः ।
इयं वः क्षत्रिया माला या भीष्मं निहनिष्यति ॥ १-११०-२ (४९४६)
अहं च भार्या तस्य स्यां यो भीष्मं घातयिष्यति ।
तस्याश्चङ्क्रम्यमाणायाः समाः पञ्च गताः पराः ॥ १-११०-३ (४९४७)
नाभवच्छरणं कश्चित्क्षत्रियो भीष्मजाड्ययात् ।
अगच्छत्सोमकं साऽम्बा पाञ्चालेषु यशस्विनम् ॥ १-११०-४ (४९४८)
सत्यसन्धं महेष्वासं सत्यधर्मपरायणम् ।
सा सभाद्वारमागम्य पाञ्चालैरभिरक्षितम् ॥ १-११०-५ (४९४९)
पाञ्चालराजमाक्रन्दत्प्रगृह्य सुभुजा भुजौ ।
भीष्मेण हन्यमानां मां मज्जन्तीमिव च ह्रदे ॥ १-११०-६ (४९५०)
यज्ञसेनाभिधावेह पाणिमालम्ब्य चोद्धर ।
तेन मे सर्वधर्माश्च रतिभोगाश्च केवलाः ॥ १-११०-७ (४९५१)
उभौ च लोकौ कीर्तिश्च समूलौ सफलौ हृतौ ।
क़क़क़न्त्येवं न विन्दामि राजन्यं शरणं क्वचित् ॥ १-११०-८ (४९५२)
किं नु निःक्षत्रियो लोको यत्रानाथोऽवसीदति ।
समागम्य तु राजानो मयोक्ता राजसत्तमाः ॥ १-११०-९ (४९५३)
शृण्वन्तु सर्वे राजानो मयोक्तं राजसत्तमाः ।
इक्ष्वाकूणां तु ये वृद्धाः पाञ्चालानां च ये वराः ॥ १-११०-१० (४९५४)
त्वत्प्रसादाद्विवाहेऽस्मिन्मा धर्मो मा पराजयेत् ।
प्रसीद यज्ञसेनेह गतिर्मे भव सोमक ॥ १-११०-११ (४९५५)
यज्ञसेन उवाच। १-११०-१२क्ष् (६७६)
जानामि त्वां बोधयामि राजपुत्रि विशेषतः ।
यथाशक्ति यथाधर्मं बलं संधारयाम्यहम् ॥ १-११०-१२ (४९५६)
अन्यस्मात्पार्थिवाद्यत्ते भयं स्यात्पार्थिवात्मजे ।
तस्यापनयने हेतुं संविधातुमहं प्रभुः ॥ १-११०-१३ (४९५७)
नहि शान्तनवस्याहं महास्त्रस्य प्रहारिणः ।
ईश्वरः क्षत्रियाणां हि बलं धर्मोऽनुवर्तते ॥ १-११०-१४ (४९५८)
सा साधु व्रज कल्याणि न मां भीष्मो दहेद्बलात् ।
न प्रत्यगृह्णंस्ते सर्वे किमित्येव न वेद्म्यहम् ॥ १-११०-१५ (४९५९)
न हि भीष्मादहं धर्मं शक्तो दातुं कथंचन। १-११०-१६ (४९६०)
वैशम्पायन उवाच ।
इत्युक्ता स्रजमासज्य द्वारि राज्ञो व्यपाद्रवत् ॥ १-११०-१६क्ष् (६७७)
व्युदस्तां सर्वलोकेषु तपसा संशितव्रताम् ।
तामन्वगच्छद्द्रुपदः सान्त्वं जल्पन्पुनः पुनः ॥ १-११०-१७ (४९६१)
स्रजं गृहाण कल्याणि न नो वैरं प्रसञ्जय ॥ १-११०-१८ (४९६२)
अम्बोवाच। १-११०-१९क्ष् (६७८)

एवमेव त्वया कार्यमिति स्म प्रतिकाङ्क्षते ।
न तु तस्यान्यथा भावो दैवमेतदमानुषम् ॥ १-११०-१९ (४९६३)
यश्चैनां स्रजमादाय स्वयं वै प्रतिमोक्षते ।
स भीष्मं समरे हन्ता मम धर्मप्रणाशनम् ॥ १-११०-२० (४९६४)
वैशम्पायन उवाच । १-११०-२१क्ष् (६७९)
तां स्रजं द्रुपदो राजा कंचित्कालं ररक्ष सः ।
ततो विस्रम्भमास्थाय तूष्णीमेतामुपैक्षत ॥ १-११०-२१ (४९६५)
तां शिखण्डिन्यबध्नात्तु बाला पितुरवज्ञया ।
तां पिता त्वत्यजच्छीघ्रं त्रस्तो भीष्मस्य किल्बिषात् ॥ १-११०-२२ (४९६६)
इषीकं ब्राह्मणं भीता साभ्यगच्छत्तपस्विनम् ।
गङ्गाद्वारि तपस्यन्तं तुष्टिहेतोस्तपस्विनी ॥ १-११०-२३ (४९६७)
उपचाराभितुष्टस्तामब्रवीदृषिसत्तमः ।
गङ्गाद्वारे विभजनं भविता नचिरादिव ॥ १-११०-२४ (४९६८)
तत्र गन्धर्वराजानं तुम्बुरुं प्रियदर्शनम् ।
आराधयितुमीहस्व सम्यक्परिचरस्व तम् ॥ १-११०-२५ (४९६९)
अहमप्यत्र साचिव्यं कर्तास्मि तव शोभने ।
तं तदाचर भद्रं ते स ते श्रेयो विधास्यति ॥ १-११०-२६ (४९७०)
ततो विभजनं तत्र गन्धर्वाणामवर्तत ।
तत्र द्वाववशिष्येतां गन्धर्वावमितौ जसौ ॥ १-११०-२७ (४९७१)
तयोरेकः समीक्ष्यैनां स्त्रीबुभूषुरुवाच ह ।
इदं गृह्णीष्व पुंलिङ्गं वृणे स्त्रीलिङ्गमेव ते ॥ १-११०-२८ (४९७२)
नियमं चक्रतुस्तत्र स्त्री पुमांश्चैव तावुभौ ।
ततः पुमान्समभवच्छिखण्डी परवीरहा ॥ १-११०-२९ (४९७३)
स्त्री भूत्वा ह्यपचक्राम स गन्धर्वो मुदान्वितः ।
लब्ध्वा तु महतीं प्रीतिं याज्ञसेनिर्महायशाः ॥ १-११०-३० (४९७४)
ततो बुद्बुदकं गत्वा पुनरस्त्राणि सोऽकरोत् ।
तत्र चास्त्राणि दिव्यानि कृत्वा स सुमहाद्युतिः ॥ १-११०-३१ (४९७५)
स्वदेशमभिसंपदे पाञ्चालं कुरुनन्दन ।
सोऽभिवाद्य पितुः पादौ महेष्वासः कृताञ्जलिः ॥ १-११०-३२ (४९७६)
उवाच भवता भीष्मान्न भेतव्यं कथंचन ॥ ॥ १-११०-३३ (४९७७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-११०-१० पाञ्चालानां च ये वराः ते राजानः मयोक्ता इति पूर्वेण

संबन्धः ॥
१-११०-१४ ईश्वरो नहि ॥
१-११०-१६ भीष्मात् भीष्ममपेक्ष्य ॥
१-११०-२४ विभजनं उत्सवविशेषः ॥
दशाधिकशततमोऽध्यायः ॥
११० ॥

आदिपर्व - अध्याय १११
॥ श्रीः ॥
१.१११. अध्यायः १११

Mahabharata - Adi Parva - Chapter Topics
विचित्रवीर्यस्य अम्बिकाम्बालिकाभ्यां विवाहः ॥ १ ॥
विचित्रवीर्यमरणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१११-० (४९७८)
वैशम्पायन उवाच। १-१११-०क्ष् (६८०)
अम्बायां निर्गतायां तु भीष्मः शान्तनवस्तदा ।
न्यायेन कारयामास राज्ञो वैवाहिकीं क्रियाम् ॥ १-१११-१ (४९७९)
अम्बिकाम्बालिके चैव परिणीयाग्निसंनिधौ ।
ग्तयोः पाणी गृहीत्वा तु कौरव्यो रूपदर्पितः।'
विचित्रवीर्यो धर्मात्मा कामात्मा समपद्यत ॥ १-१११-२ (४९८०)
ते चापि बृहतीश्यामे नीलकुञ्चितमूर्धजे ।
रक्ततुङ्गनखोपेते पीनश्रोणिपयोधरे ॥ १-१११-३ (४९८१)
आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थिते ।
विचित्रवीर्यं कल्याण्यौ पूजयामासतुः शुभे ॥ १-१११-४ (४९८२)
ग्अन्योन्यं प्रति सक्ते च एकभावे इव स्थिते।'
स चाश्विरूपसदृशो देवतुल्यपराक्रमः ।
सर्वासामेव नारीणां चित्तप्रमथनो रहः ॥ १-१११-५ (४९८३)
ताभ्यां सह समाः सप्त विहरन्पृथिवीपतिः ।
विचित्रवीर्यस्तरुणो यक्ष्मणा समगृह्यत ॥ १-१११-६ (४९८४)
सुहृदां यतमानानामाप्तैः सह चिकित्सकैः ।
जगामास्तमिवादित्यः कौरव्यो यमसादनम् ॥ १-१११-७ (४९८५)
धर्मात्मा स तु गाङ्गेयः चिन्ताशोकपरायणः ।
प्रेतकार्याणि सर्वाणि तस्य सम्यगकारयत् ॥ १-१११-८ (४९८६)

१-१११-९ (४९८७)
राज्ञो विचित्रवीर्यस्य सत्यवत्या मते स्थितः ।
ऋत्विग्भिः सहितो भीष्मः सर्वैश्च कुरुपुङ्गवैः ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१११-३ बृहतीश्यामे बृहतीपुष्पद्रक्तश्यामे ॥
१-१११-४ प्रतिरूपः अनुरूपः ॥
एकादशाधिकशततमोऽध्यायः ॥
१११ ॥

आदिपर्व - अध्याय ११२
॥ श्रीः ॥
१.११२. अध्यायः ११२

Mahabharata - Adi Parva - Chapter Topics
विचित्रवीर्यभार्ययोरम्बिकाम्बालिकयोः पुत्रोत्पादनाय सत्यवत्या नियुक्तेन भीष्मेण तदनङ्गीकारः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-११२-० (४९८८)
वैशम्पायन उवाच। १-११२-०क्ष् (६८१)
ततः सत्यवती दीना कृपणा पुत्रगृद्धिनी ।
पुत्रस्य कृत्वा कार्याणि स्नुषाभ्यां सह भारत ॥ १-११२-१ (४९८९)
समाश्वास्य स्नुषे ते च भर्तृशोकनिपीडिते ।
धर्मं च पितृवंशं च मातृवंशं च भामिनी ।
प्रसमीक्ष्य महाभागा गाङ्गेयं वाक्यमब्रवीत् ॥ १-११२-२ (४९९०)
ग्दुःखार्दिता तु सा देवी मज्जन्ती शोकसागरे ।
शन्तनोर्धर्मनित्यस्य कौरव्यस्य यशस्विनः।'
त्वयि पिण्डश्च कीर्तिश्च संतानश्च प्रतिष्ठितः ॥ १-११२-३ (४९९१)
ग्भ्राता विचित्रवीर्यस्ते भूतानामन्तमेयिवान्।'
यथाकर्म शुभं कृत्वा स्वर्गोपगमनं ध्रुवम् ।
यथा चायुर्ध्रुवं सत्ये त्वयि धर्मस्तथा ध्रुवः ॥ १-११२-४ (४९९२)
वेत्थ धर्मांश्च धर्मज्ञ समासेनेतरेण च ।
विविधास्त्वं श्रुतीर्वेत्थ वेदाङ्गानि च सर्वशः ॥ १-११२-५ (४९९३)
व्यवस्थानं च ते धर्मे कुलाचारं च लक्षये ।
प्रतिपत्तिं च कृच्छ्रेषु शुक्राङ्गिरसयोरिव ॥ १-११२-६ (४९९४)

तस्मात्सुभृशमाश्वस्य त्वयि धर्मभृतां वर ।
कार्ये त्वां विनियोक्ष्यामि तच्छ्रुत्वा कर्तुमर्हसि ॥ १-११२-७ (४९९५)
मम पुत्रस्तव भ्राता वीर्यवान्सुप्रियश्च ते ।
बाल एव गतः स्वर्गमपुत्रः पुरुषर्षभ ॥ १-११२-८ (४९९६)
इमे महिष्यौ भ्रातुस्ते काशिराजसुते शुभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत ॥ १-११२-९ (४९९७)
तयोरुत्पादयापत्यं सन्तानाय कुलस्य नः ।
मन्नियोगान्महाबाहो धर्मं कर्तुमिहार्हसि ॥ १-११२-१० (४९९८)
राज्ये चैवाभिषिच्यस्व भारताननुशाधि च ।
दारांश्च कुरु धर्मेण मा निमज्जीः पितामहान् ॥ १-११२-११ (४९९९)
वैशम्पायन उवाच। १-११२-१२क्ष् (६८२)
तथोच्यमानो मात्रा स सुहृद्भिश्च परन्तपः ।
इत्युवाचाथ धर्मात्मा धर्म्यमेवोत्तरं वचः ॥ १-११२-१२ (५०००)
असंशयं परो धर्मस्त्वया मातरुदाहृतः ।
त्वमपत्यं प्रति च मे प्रतिज्ञां वेत्थ वै परां ॥ १-११२-१३ (५००१)
जानासि च यथावृत्तं शुल्कहेतोस्त्वदन्तरे ।
स सत्यवति सत्यं ते प्रतिजानाम्यहं पुनः ॥ १-११२-१४ (५००२)
परित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः ।
यद्वाऽप्यधिकमेताभ्यां न तु सत्यं कथंचन ॥ १-११२-१५ (५००३)
त्यजेच्च पृथिवी गन्धमापश्च रसमात्मनः ।
ज्योतिस्तथा त्यजेद्रूपं वायुः स्पर्शगुणं त्यजेत् ॥ १-११२-१६ (५००४)
प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्मताम् ।
त्यजेच्छब्दं तथाऽऽकाशं सोमः शीतांशुतां त्यजेत् ॥ १-११२-१७ (५००५)
विक्रमं वृत्रहा जह्याद्धर्मं जह्याच्च धर्मराट् ।
न त्वहं सत्यमुत्स्रष्टुं व्यवसेयं कथंचन ॥ १-११२-१८ (५००६)
ग्तन्न जात्वन्यथा कुर्यां लोकानामपि संक्षये ।
अमरत्वस्य वा हेतोस्त्रैलोक्यस्य धनस्य च ॥' १-११२-१९ (५००७)
एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा ।
माता सत्यवती भीष्ममुवाच तदनन्तरम् ॥ १-११२-२० (५००८)
जानामि ते स्थितिं सत्ये परां सत्यपराक्रम ।
इच्छन्सृजेथास्त्रींल्लोकानन्यांस्त्वं स्वेन तेजसा ॥ १-११२-२१ (५००९)
जानामि चैवं सत्यं तन्मदर्थे यच्च भाषितम् ।
आपद्धर्मं त्वमावेक्ष्य वह पैतामहीं धुरम् ॥ १-११२-२२ (५०१०)
यथा ते कुलतन्तुश्च धर्मश्च न पराभवेत् ।
सुहृदश्च प्रहृष्येरंस्तथा कुरु परन्तप ॥ १-११२-२३ (५०११)
ग्आत्मनश्च हितं तात प्रियं च मम भारत।'

लालप्यमानां तामेवं कृपणां पुत्रगृद्धिनीम् ।
धर्मादपेतं ब्रुवतीं भीष्मो भूयोऽब्रवीदिदम् ॥ १-११२-२४ (५०१२)
राज्ञि धर्मानवेक्षस्व मा नः सर्वान्व्यनीनशः ।
सत्याच्च्युतिः क्षत्रियस्य न धर्मेषु प्रशस्यते ॥ १-११२-२५ (५०१३)
शान्तनोरपि संतानं यथा स्यादक्षयं भुवि ।
तत्ते धर्मं प्रवक्ष्यामि क्षात्रं राज्ञि सनातनम् ॥ १-११२-२६ (५०१४)
श्रुत्वा तं प्रतिपद्यस्व प्राज्ञैः सह पुरोहितैः ।
आपद्धर्मार्थकुशलैर्लोकतन्त्रमवेक्ष्य च ॥ ॥ १-११२-२७ (५०१५)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-११२-११ अभिषिच्यस्व अभिषेचय ।आत्मानमिति शेषः। कुरु
अङ्गीकुरु। मा निमज्जीर्मा निमज्जय ॥
१-११२-१४ त्वदन्तरेत्वन्निमित्तम् ॥
१-११२-२० भूरिद्रविणतेजसा बहुबलोत्साहवता ॥
द्वादशाधिकशततमोऽध्यायः ॥
११२ ॥

आदिपर्व - अध्याय ११३
॥ श्रीः ॥
१.११३. अध्यायः ११३

Mahabharata - Adi Parva - Chapter Topics
दीर्घतमसो ऋषेरुपाख्यानम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-११३-० (५०१६)
भीष्म उवाच। १-११३-०क्ष् (६८३)
जामदग्न्येन रामेण पितुर्वधममृष्यता ।
राजा परशुना पूर्वं हैहयाधिपतिर्हतः ॥ १-११३-१ (५०१७)
शतानि दशबाहूनां निकृत्तान्यर्जुनस्य वै ।
लोकस्याचरितो धर्मस्तेनाति किल दुश्चरः ॥ १-११३-२ (५०१८)
पुनश्च धनुरादाय महास्त्राणि प्रमुञ्चता ।
निर्दग्धं क्षत्रमसकृद्रथेन जयता महीम् ॥ १-११३-३ (५०१९)

एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना ।
त्रिःसप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा ॥ १-११३-४ (५०२०)
एवं निःक्षत्रिये लोके कृते तेन महर्षिणा ।
ततः संभूय सर्वाभिः क्षत्रियाभिः समन्ततः ॥ १-११३-५ (५०२१)
उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः ।
पाणिग्राहस्य तनय इति वेदेषु निश्चितम् ॥ १-११३-६ (५०२२)
धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्ययुः ।
लोकेऽप्याचरितो दृष्टः क्षत्रियाणां पुनर्भवः ॥ १-११३-७ (५०२३)
ततः पुनः समुदितं क्षत्रं समभवत्तदा ।
इमं चैवात्र वक्ष्येऽहमितिहासं पुरातनम् ॥ १-११३-८ (५०२४)
अथोचथ्य इति ख्यात आसीद्धीमानृषिः पुरा ।
ममता नाम तस्यासीद्भार्या परमसंमता ॥ १-११३-९ (५०२५)
उचथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसाम् ।
बृहस्पतिर्बृहत्तेजा ममतामन्वपद्यत ॥ १-११३-१० (५०२६)
उवाच ममता तं तु देवरं वदतां वरम् ।
अन्तर्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारम्यतामिति ॥ १-११३-११ (५०२७)
अयं च मे महाभाग कुक्षावेव बृहस्पते ।
औचथ्यो देवमत्रापि षडङ्गं प्रत्यधीयत ॥ १-११३-१२ (५०२८)
अमोघरेतास्त्वं चापि द्वयोर्नास्त्यत्र संभवः ।
तस्मादेवं गते त्वद्य उपारमितुमर्हसि ॥ १-११३-१३ (५०२९)
वैशम्पायन उवाच। १-११३-१४क्ष् (६८४)
एवमुक्तस्तदा सम्यक् बृहस्पतिरुदारधीः ।
कामात्मानं तदात्मानं न शशाक नियच्छितुम् ॥ १-११३-१४ (५०३०)
स बभूव ततः कामी तया सार्धमकामया ।
उत्सृजन्तं तु तं रेतः स गर्भस्थोऽभ्यभाषत ॥ १-११३-१५ (५०३१)
भोस्तात मा गमः कामं द्वयोर्नास्तीह संभवः ।
अल्पावकाशो भगवन्पूर्वं चाहमिहागतः ॥ १-११३-१६ (५०३२)
अमोघरेताश्च भवान्न पीडां कर्तुमर्हति ।
अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतिः ॥ १-११३-१७ (५०३३)
जगाम मैथुनायैव ममतां चारुलोचनाम् ।
शुक्रोत्सर्गं ततो बुद्ध्वा तस्या गर्भगतो मुनिः ॥ १-११३-१८ (५०३४)
पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पतेः ।
स्थानमप्राप्तमथ तच्छुक्रं प्रतिहतं तदा ॥ १-११३-१९ (५०३५)
पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः ।
तं दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः ॥ १-११३-२० (५०३६)
उचथ्यपुत्रं गर्भस्थं निर्भर्त्स्य भगवानृषिः ।

यन्मां त्वमीदृशे काले सर्वभूतेप्सिते सति ॥ १-११३-२१ (५०३७)
एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्यसि ।
स वै दीर्घतमा नाम शापादृषिरजायत ॥ १-११३-२२ (५०३८)
बृहस्पतेर्बृहत्कीर्तेर्बृहस्पतिरिवौजसा ।
जात्यन्धो वेदवित्प्राज्ञः पत्नीं लेभे स विद्यया ॥ १-११३-२३ (५०३९)
तरुणीं रुपसंपन्नां प्रद्वेषीं नाम ब्राह्मणीम् ।
स पुत्राञ्जनयामास गौतमादीन्महायशाः ॥ १-११३-२४ (५०४०)
ऋषेरुचथ्यस्य तदा सन्तानकुलवृद्धये ।
धर्मात्मा च महात्मा च वेदवेदाङ्गपारगः ॥ १-११३-२५ (५०४१)
गोधर्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनिः ।
प्रावर्तत तदा कर्तुं श्रद्धावांस्तमशङ्कया ॥ १-११३-२६ (५०४२)
ततो वितथमर्यादं तं दृष्ट्वा मुनिसत्तमाः ।
क्रुद्धा मोहाभिभूतास्ते सर्वे तत्राश्रमौकसः ॥ १-११३-२७ (५०४३)
अहोऽयं भिन्नमर्यादो नाश्रमे वस्तुमर्हति ।
तस्मादेनं वयं सर्वे पापात्मानं त्यजामहे ॥ १-११३-२८ (५०४४)
इत्यन्योन्यं समाभाष्य ते दीर्घतमसं मुनिम् ।
पुत्रलाभाच्च सा पत्नी न तुतोष पतिं तदा ॥ १-११३-२९ (५०४५)
प्रद्विषन्तीं पतिर्भार्यां किं मां द्वेक्षीति चाब्रवीत्। १-११३-३० (५०४६)
प्रद्वेष्युवाच ।
भार्याया भरणाद्भर्ता पालनाच्च पतिः स्मृतः ॥ १-११३-३०क्ष् (६८५)
अहं त्वद्भरणाशक्ता जात्यन्धं ससुतं तदा ।
नित्यकालं श्रमेणार्ता न भरेयं महातपः ॥ १-११३-३१ (५०४७)
भीष्म उवाच। १-११३-३२क्ष् (६८६)
तस्मास्तद्वचनं श्रुत्वा ऋषिः कोपसमन्वितः ।
प्रत्युवाच ततः पत्नीं प्रद्वेषीं ससुतां तदा ॥ १-११३-३२ (५०४८)
नीयतां क्षत्रियकुले धनार्थश्च भविष्यति। १-११३-३३ (५०४९)
प्रद्वेष्युवाच ।
त्वया दत्तं धनं विप्र नेच्छेयं दुःखकारणम् ॥ १-११३-३३क्ष् (६८७)
यथेष्टं कुरु विप्रेन्द्र न भरेयं पुरा यथा। १-११३-३४ (५०५०)
दीर्घतमा उवाच ।
अद्यप्रभृति मर्यादा मया लोके प्रतिष्ठिता ॥ १-११३-३४क्ष् (६८८)
एक एव पतिर्नार्या यावज्जीवं परायणम् ।
मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरम् ॥ १-११३-३५ (५०५१)
अभिगम्य परं नारी पतिष्यति न संशयः ।
अपतीनां तु नारीणामद्यप्रभृति पातकम् ॥ १-११३-३६ (५०५२)
यद्यस्ति चेद्धनं सर्वं वृथाभोगा भवन्तु ताः ।

अकीर्तिः परिवादाश्च नित्यं तासां भवन्तु वै ॥ १-११३-३७ (५०५३)
इति तद्वचनं श्रुत्वा ब्राह्मणी भृशकोपिता ।
गङ्गायां नीयतामेष पुत्रा इत्येवमब्रवीत् ॥ १-११३-३८ (५०५४)
लोभमोहाभिभूतास्ते पुत्रास्तं गौतमादयः ।
वद्धवोडुपे परिक्षिप्य गङ्गायां समवासृजन् ॥ १-११३-३९ (५०५५)
कस्मादन्धश्च वृद्धश्च भर्तव्योऽयमिति स्म ते ।
चिन्तयित्वा ततः क्रूराः प्रतिजग्मुरथो गृहान् ॥ १-११३-४० (५०५६)
सोऽनुस्रोतस्तदा विप्रः प्लवमानो यदृच्छया ।
जगाम सुबहून्देशानन्धस्तेनोडुपेन ह ॥ १-११३-४१ (५०५७)
तं तु राजा बलिर्नाम सर्वधर्मविदां वरः ।
अपश्यन्मज्जनगतः स्रोतसाऽभ्याशमागतम् ॥ १-११३-४२ (५०५८)
जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः ।
ज्ञात्वा चैवं स वव्रेऽथ पुत्रार्थे भरतर्षभ ॥ १-११३-४३ (५०५९)
ग्तं पूजयित्वा राजर्षिर्विश्रान्तं मुनिमब्रवीत्।'
सन्तानार्थं महाभाग भार्यासु मम मानद ।
पुत्रान्धर्मार्थकुशलानुत्पादयितुमर्हसि ॥ १-११३-४४ (५०६०)
भीष्म उवाच। १-११३-४५क्ष् (६८९)
एवमुक्तः स तेजस्वी तं तथेत्युक्तवानृषिः ।
तस्मैस राजा स्वां भार्यां सुदेष्णां प्राहिणोत्तदा ॥ १-११३-४६ (५०६१)
अन्धं वृद्धं च तं मत्वा न सा देवी जगाम ह ।
स्वां तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ॥ १-११३-४६ (५०६२)
तस्यां काक्षीवदादीन्स शूद्रयोनावृषिस्तदा ।
जनयामास धर्मात्मा पुत्रानेकादशैव तु ॥ १-११३-४७ (५०६३)
काक्षीवदादीन्पुत्रांस्तान्दृष्ट्वा सर्वानधीयतः ।
उवाच तमृषिं राजा ममेम इति भारत ॥ १-११३-४८ (५०६४)
नेत्युवाच महर्षिस्तं ममेम इति चाब्रवीत् ।
शूद्रयोनौ मया हीमे जाताः काक्षीवदादयः ॥ १-११३-४९ (५०६५)
अन्धं वृद्धं च मां दृष्ट्वा सुदेष्णा महिषी तव ।
अवमन्य ददौ मूढा शूद्रां धात्रेयिकां मम ॥ १-११३-५० (५०६६)
भीष्म उवाच। १-११३-५१क्ष् (६९०)
ततः प्रसादयामास पुनस्तमृषिसत्तमम् ।
बलिः सुदेष्णां स्वां भार्यां तस्मै स प्राहिणोत्पुनः ॥ १-११३-५१ (५०६७)
तां स दीर्घतमाङ्गेषु स्पृष्ट्वा देवीमथाब्रवीत् ।
भविष्यन्ति कुमारास्ते तेजसाऽऽदित्यवर्चसः ॥ १-११३-५२ (५०६८)
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामकथिता भुवि ॥ १-११३-५३ (५०६९)

अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ॥ १-११३-५४ (५०७०)
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्माः सुह्मस्य च स्मृताः ।
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥ १-११३-५५ (५०७१)
एवमन्ये महेष्वासा ब्राह्मणैः क्षत्रिया भुवि ।
जाताः परमधर्मज्ञा वीर्यवन्तो महाबलाः ।
एतच्छ्रुत्वा त्वमप्यत्र मातः कुरु यथेप्सितम् ॥ ॥ १-११३-५६ (५०७२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-११३-१० अन्वपद्यत उपगतवान् ॥
१-११३-११ आरम्यतामुपरम्यताम् ॥
१-११३-१४ आत्मानं चित्तम् । नियच्छितुं नियन्तुम् ॥
१-११३-१६ कामं मैथुनं मा गमः ॥
१-११३-२० तं शशापेति संबन्धः ॥
१-११३-२२ दीर्घं तमः अन्धत्वम् ॥
१-११३-२५ सम्यक् तानं विस्तारो यस्य तस्य कुलस्य वृद्धये विस्तीर्णस्यापि वृद्धये इत्यर्थः ॥
१-११३-२६ गोधर्मं प्रकाशमैथुनम् । सौरभेयात् कामधेनुपुत्रादधीत्याधिगम्य ॥
१-११३-२७ मोहाभिभूतत्वमपापे पापदर्शित्वात् ॥
१-११३-२९ समाभा य क्रुद्धा इति पूर्वेणान्वयः ॥
१-११३-३० द्वेक्षि द्वेषं करोषि । पतिः पालनादुपसर्गेभ्यः। भरणादन्नादिना भर्ता च ॥
१-११३-३१ अहं तु प्रत्युत त्वद्भरणाशक्ता सती न भरेयम् । तदा तदेव। लुप्तोपमा। पूर्ववदित्यर्थः ॥
१-११३-३३ धनमर्थश्चोपभोगादिः ॥
१-११३-३४ न भरेयं यथा पुरा भर्त्रन्तरं करिष्यामीत्याशयः ॥
१-११३-४२ मज्जनगतः स्नानार्थं गतः । स्रोतसा प्रवाहेण। अभ्याशं समीपम् ॥
१-११३-४६ धात्रेयिकां दासीम् ॥
१-११३-५२ अङ्गेषु स्पृष्ट्वा स्वरूपज्ञानार्थमिति भावः । संधिरार्षः ॥
१-११३-५६ यथेप्सितं ब्राह्मणेभ्यो वंशवृद्धिमित्यर्थः ॥
त्रयोदशाधिकशततमोऽध्यायः ॥

आदिपर्व - अध्याय ११४
॥ श्रीः ॥
१.११४. अध्यायः ११४

Mahabharata - Adi Parva - Chapter Topics
सत्यवत्या स्वस्मिन्कन्यात्वावस्थायां व्यासोत्पत्तिकथनम् ॥ १ ॥
स्मरणमात्रादागतेन व्यासेन सह सत्यवत्याः संवादः ॥ २ ॥
व्यासेन अम्बिकाम्बालिकलोः पुत्रोत्पादनाङ्गीकारः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-११४-० (५०७३)
भीष्म उवाच। १-११४-०क्ष् (६९१)
पुनर्भरतवंशस्य हेतुं सन्तानवृद्धये ।
वक्ष्यामि नियतं मातस्तन्मे निगदतः शृणु ॥ १-११४-१ (५०७४)
ब्राह्मणो गुणवान्कश्चिद्धनेनोपनिमन्त्र्यताम् ।
विचित्रवीर्यक्षेत्रेषु यः समुत्पादयेत्प्रजाः ॥ १-११४-२ (५०७५)
ग्वैशम्पायन उवाच। १-११४-३क्ष् (६९२)
भीष्मस्य तु वचः श्रुत्वा धर्महेत्वर्थसंहितम् ।
माता सत्यवती भीष्मं पुनरेवाभ्यभाषत ॥ १-११४-३ (५०७६)
औचथ्यमधिकृत्येदमङ्गं च यदुदाहृतम् ।
पौराणी श्रुतिरित्येषा प्राप्तकालमिदं कुरु ॥ १-११४-४ (५०७७)
त्वं हि पुत्र कुलस्यास्य ज्येष्ठः श्रेष्ठश्च भारत ।
यथा च ते पितुर्वाक्यं मम कार्यं तथाऽनघ ॥ १-११४-५ (५०७८)
मम पुत्रस्तव भ्राता यवीयान्सुप्रियश्च ते ।
बाल एव गतः स्वर्गं भारतो भरतर्षभ ॥ १-११४-६ (५०७९)
इमे महिष्यौ तस्येह काशिराजसुते उभे ।
रूपयौवनसंपन्ने पुत्रकामे च भारत ॥ १-११४-७ (५०८०)
धर्म्यमेतत्परं ज्ञात्वा सन्तानाय कुलस्य च ।
आभ्यां मम नियोगात्तु धर्मं चरितुमर्हसि ॥ १-११४-८ (५०८१)
भीष्म उवाच। १-११४-९क्ष् (६९३)
असंशयं परो धर्मस्त्वयाः मातः प्रकीर्तितः ।
त्वमप्येतां प्रतिज्ञां तु वेत्थ या मयि वर्तते ॥ १-११४-९ (५०८२)
अमरत्वस्य वा हेतोस्त्रैलोक्यसदनस्य वा ।
उत्सृजेयमहं प्राणान्न तु सत्यं कथंचन ॥ १-११४-१० (५०८३)

सत्यवत्युवाच। १-११४-११क्ष् (६९४)
जानामि त्वयि धर्मज्ञ सत्यं सत्यपराक्रम ।
इच्छंस्त्वमिह लोकांस्त्रीन्सृजेरन्यानरिन्दम ॥ १-११४-११ (५०८४)
यथा तु नः कुलं चैव धर्मश्च न पराभवेत् ।
सुहृदश्च प्रहृष्टाः स्युस्तथा त्वं कर्तुमर्हसि ॥ १-११४-१२ (५०८५)
भीष्म उवाच। १-११४-१३क्ष् (६९५)
त्वमेव कुलवृद्धासि गौरवं तु परं त्वयि ।
सोपायं कुलसन्ताने वक्तुमर्हसि नः परम् ॥ १-११४-१३ (५०८६)
स्त्रियो हि परमं गुह्यं धारयन्ति सदा कुले ।
पुरुषांश्चैव मायाभिर्बह्वीभिरुपगृह्णते ॥ १-११४-१४ (५०८७)
सा सत्यवति संपश्य धर्मं सत्यपरायणे ।
यथा न जह्यां सत्यं च न सीदेच्च कुलं हि नः ॥' १-११४-१५ (५०८८)
वैशम्पायन उवाच। १-११४-१६क्ष् (६९६)
ततः सत्यवती भीष्मं वाचा संसज्जमानया ।
विहसन्तीव सव्रीडमिदं वचनमब्रवीत् ॥ १-११४-१६ (५०८९)
सत्यमेतन्महाबाहो यथा वदसि भारत ।
विश्वासात्ते प्रवक्ष्यामि सन्तानाय कुलस्य नः ॥ १-११४-१७ (५०९०)
न ते शक्यमनाख्यातुमापद्धर्मं तथाविधम् ।
त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं परा गतिः ॥ १-११४-१८ (५०९१)
ग्यत्त्वं वक्ष्यसि तत्कार्यमस्माभिरिति मे मतिः।'
तस्मान्निशम्य सत्यं मे कुरुष्व यदनन्तरम् ।
ग्शृणु भीष्म वचो मह्यं धर्मार्थसहितं हितम् ॥ १-११४-१९ (५०९२)
न च विस्रम्भकथितं भवान्सूचितुमर्हति ।
यस्तु राजा वसुर्नाम श्रुतस्ते भरतर्षभ ॥ १-११४-२० (५०९३)
तस्य शुक्लादहं मत्स्या धृता कुक्षौ पुरा किल ।
मातरं मे जलाद्धृत्वा दाशः परमधर्मवित् ॥ १-११४-२१ (५०९४)
मां तु स्वगृहमानीय दुहितृत्वेऽभ्यकल्पयत् ।
धर्मयुक्तः स धर्मेण पिता चासीत्ततो मम ॥' १-११४-२२ (५०९५)
धर्मयुक्तस्य धर्मार्थं पितुरासीत्तरी मम ।
सा कदाचिदहं तत्र गता प्रथमयौवनम् ॥ १-११४-२३ (५०९६)
अथ धर्मविदां श्रेष्ठः परमर्षिः पराशरः ।
आजगाम तरीं धीमांस्तरिष्यन्यमुनां नदीम् ॥ १-११४-२४ (५०९७)
स तार्यमाणो यमुनां मामुपेत्याब्रवीत्तदा ।
सान्त्वपूर्वं मुनिश्रेष्ठः कामार्तो मधुरं वचः ।
उक्त्वा जन्म कुलं मह्यं नासि दाशसुतेति च ॥ १-११४-२५ (५०९८)
तमहं शापभीता च पितुर्भीता च भारत ।

वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे ॥ १-११४-२६ (५०९९)
ग्प्रेक्ष्य तांस्तु महाभागान्पारावारे ऋषीन्स्थितान् ।
यमुनातीरविन्यस्तान्प्रदीप्तानिव पावकान् ॥ १-११४-२७ (५१००)
पुरस्तादरुणश्चैव तरुणः संप्रकाशते ।
येनैषा ताम्रवस्त्रेव द्यौः कृता प्रविजृम्भिता ॥ १-११४-२८ (५१०१)
उक्तमात्रो मया तत्र नीहारमसृजत्प्रभुः ।
पराशरः सत्यधृतिर्द्वीपे च यमुनाम्भसि ॥' १-११४-२९ (५१०२)
अभिभूय स मां बालां तेजसा वशमानयत् ।
तमसा लोकमावृत्य नौगतामेव भारत ॥ १-११४-३० (५१०३)
मत्स्यगन्धो महानासीत्पुरा मम जुगुप्सितः ।
तमपास्य शुभं गन्धमिमं प्रादात्स मे मुनिः ॥ १-११४-३१ (५१०४)
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम् ।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि ॥ १-११४-३२ (५१०५)
कन्यात्वं च ददौ प्रीतः पुनर्विद्वांस्तपोधनः ।
तस्य वीर्यमहं दृष्ट्वा तथा युक्तं महात्मनः ॥ १-११४-३३ (५१०६)
विस्मिता व्यथिता चैव प्रादामात्मानमेव च ।
ततस्तदा महात्मा स कन्यायां मयि भारत ।
प्रहृष्टोऽजनयत्पुत्रं द्वीप एव पराशरः ॥' १-११४-३४ (५१०७)
पाराशर्यो महायोगी स बभूव महानृषिः ।
कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः ॥ १-११४-३५ (५१०८)
यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात्कृष्णत्वमेव च ॥ १-११४-३६ (५१०९)
सत्यवादी शमपरस्तपस्वी दग्धकिल्बिषः ।
सद्योत्पन्नः स तु महान्सह पित्रा ततो गतः ॥ १-११४-३७ (५११०)
स नियुक्तो मया व्यक्तं त्वया चाप्रतिमद्युतिः ।
भ्रातुः क्षेत्रेषु कल्याणमपत्यं जनयिष्यति ॥ १-११४-३८ (५१११)
स हि मामुक्तवांस्तत्र स्मरेः कृच्छ्रेषु मामिति ।
तं स्मरिष्ये महाबाहो यदि भीष्म त्वमिच्छसि ॥ १-११४-३९ (५११२)
तव ह्यनुमते भीष्म नियतं स महातपाः ।
विचित्रवीर्यक्षेत्रेषु पुत्रानुत्पादयिष्यति ॥ १-११४-४० (५११३)
वैशम्पायन उवाच। १-११४-४१क्ष् (६९७)
महर्षेः कीर्तने तस्य भीष्मः प्राञ्जलिरब्रवीत् ।
ग्देशकालौ च जानासि क्रियतामर्थसिद्धये।' १-११४-४१ (५११४)
धर्ममर्थं च कामं च त्रीनेतान्योनुपश्यति ॥ १-११४-४१क्ष् (६९८)
अर्थमर्थानुबन्धं च धर्मं धर्मानुबन्धनम् ।
कामं कामानुबन्धं च विपरीतान्पृथक्पृथक् ॥ १-११४-४२ (५११५)

यो विचिन्त्य धिया धीरो व्यवस्यति स बुद्धिमान् ।
तदिदं धर्मयुक्तं च हितं चैव कुलस्य नः ॥ १-११४-४३ (५११६)
उक्तं भवत्या यच्छ्रेयस्तन्मह्यं रोचते भृशम्। १-११४-४४ (५११७)
वैशम्पायन उवाच ।
ततस्तस्मिन्प्रतिज्ञाते भीष्मेण कुरुनन्दन ॥ १-११४-४४क्ष् (६९९)
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम् ।
स वेदान्विब्रुवन्धीमान्मातुर्विज्ञाय चिन्तितम् ॥ १-११४-४५ (५११८)
प्रादुर्बभूवाविदितः क्षणेन कुरुनन्दन ।
तस्मै पूजां ततः कृत्वा सुताय विधिपूर्वकम् ॥ १-११४-४६ (५११९)
परिष्वज्य च बाहुभ्यां प्रस्नवैरभ्यषिञ्चत ।
मुमोच बाष्पं दाशेयी पुत्रं दृष्ट्वा चिरस्य तु ॥ १-११४-४७ (५१२०)
तामद्भिः परिषिच्यार्तां महर्षिरभिवाद्य च ।
मातरं पूर्वजः पुत्रो व्यासो वचनमब्रवीत् ॥ १-११४-४८ (५१२१)
भवत्या यदभिप्रेतं तदहं कर्तुमागतः ।
शाधि मां धर्मतत्त्वज्ञे करवाणि प्रियं तव ॥ १-११४-४९ (५१२२)
तस्मै पूजां ततोऽकार्षीत्पुरोधाः परमर्षये ।
स च तां प्रतिजग्राह विधिमन्मन्त्रपूर्वकम् ॥ १-११४-५० (५१२३)
पूजितो मन्त्रपूर्वं तु विधिवत्प्रीतिमाप सः ।
तमासनगतं माता पृष्ट्वा कुशलमव्ययम् ॥ १-११४-५१ (५१२४)
सत्यवत्यथ वीक्ष्यैनमुवाचेदमनन्तरम् ।
मातापित्रोः प्रजायन्ते पुत्राः साधारणाः कवे ॥ १-११४-५२ (५१२५)
तेषां पिता यथा स्वीमी तथा माता न संशयः ।
विधानविहितः स त्वं यथा मे प्रथमः सुतः ॥ १-११४-५३ (५१२६)
विचित्रवीर्यो ब्रह्मर्षे तथा मेऽवरजः सुतः ।
यथैव पितृतो भीष्मस्तथा त्वमपि मातृतः ॥ १-११४-५४ (५१२७)
भ्राता विचित्रवीर्यस्य यथा वा पुत्र मन्यसे ।
अयं शान्तनवः सत्यं पालयन्सत्यविक्रमः ॥ १-११४-५५ (५१२८)
बुद्धिं न कुरुतेऽपत्ये तथा राज्याऽनुशासने ।
स त्वं व्यपेक्षया भ्रातुः सन्तानाय कुलस्य च ॥ १-११४-५६ (५१२९)
भीष्मस्य चास्य वचनान्नियोगाच्च ममानघ ।
अनुक्रोशाच्च भूतानां सर्वेषां रक्षणाय च ॥ १-११४-५७ (५१३०)
आनृशंस्याच्च यद्ब्रूयां तच्छ्रुत्वा कर्तुमर्हसि ।
यवीयसस्व भ्रातुर्भार्ये सुरसुतोपमे ॥ १-११४-५८ (५१३१)
रूपयौवनसंपन्ने पुत्रकामे च धर्मतः ।
तयोरुत्पादयापत्यं समर्थो ह्यसि पुत्रक ॥ १-११४-५९ (५१३२)
अनुरूपं कुलस्यास्य संतत्याः प्रसवस्य च। १-११४-६० (५१३३)

व्यास उवाच ।
वेत्थ धर्मं सत्यवति परं चापरमेव च ॥ १-११४-६०क्ष् (७००)
तथा तव महाप्राज्ञे धर्मे प्रणिहिता मतिः ।
तस्मादहं त्वन्नियोगाद्धर्ममुद्दिश्य कारणम् ॥ १-११४-६१ (५१३४)
ईप्सितं ते करिष्यामि दृष्टं ह्येतत्सनातनम् ।
भ्रातुः पुत्रान्प्रदास्यामि मित्रावरुणयोः समान् ॥ १-११४-६२ (५१३५)
व्रतं चरेतां ते देव्यौ निर्दिष्टमिह यन्मया ।
संवत्सरं यथान्यायं ततः शुद्धे भविष्यतः ॥ १-११४-६३ (५१३६)
नहि मामव्रतोपेता उपेयात्काचिदङ्गना। १-११४-६४ (५१३७)
सत्यवत्युवाच ।
सद्यो यथा प्रपद्येते देव्यौ गर्भं तथा कुरु ॥ १-११४-६४क्ष् (७०१)
अराजकेषु राष्ट्रेषु प्रजाऽनाथा विनश्यति ।
नश्यन्ति च क्रियाः सर्वा नास्ति वृष्टिर्न देवता ॥ १-११४-६५ (५१३८)
कथं चाराजकं राष्ट्रं शक्यं धारयितुं प्रभो ।
तस्माद्गर्भं समाधत्स्व भीष्मः संवर्धयिष्यति ॥ १-११४-६६ (५१३९)
व्यास उवाच। १-११४-६७क्ष् (७०२)
यदि पुत्रः प्रदातव्यो मया भ्रातुरकालिकः ।
विरूपतां मे सहतां तयोरेतत्परं व्रतम् ॥ १-११४-६७ (५१४०)
यदि मे सहते गन्धं रूपं वेषं तथा वपुः ।
अद्यैव गर्भं कौसल्या विशिष्टं प्रतिपद्यताम् ॥ १-११४-६८ (५१४१)
गतस्यापि च शतं पुत्रा भवितारो न संशयः ।
गोप्तारः कुरुवंशस्य भवत्याः शोकनाशनाः ॥' १-११४-६९ (५१४२)
वैशम्पायन उवाच। १-११४-७०क्ष् (७०३)
एवमुक्त्वा महातेजा व्यासः सत्यवतीं तदा ।
शयने सा च कौसल्या शुचिवस्त्रा ह्यलङ्कृता ॥ १-११४-७० (५१४३)
समागमनमाकाङ्क्षेदिति सोऽन्तर्हितो मुनिः ।
ततोऽभिगम्य सा देवी स्नुषां रहसि संगताम् ॥ १-११४-७१ (५१४४)
धर्म्यमर्थसमायुक्तमुवाच वचनं हितम् ।
कौसल्ये धर्मतन्त्रं त्वां यद्ब्रवीमि निबोध तत् ॥ १-११४-७२ (५१४५)
भरतानां समुच्छेदो व्यक्तं मद्भाग्यसंक्षयात् ।
व्यथितां मां च संप्रेक्ष्य पितृवंशं च पीडितम् ॥ १-११४-७३ (५१४६)
भीष्मो बुद्धिमदान्मह्यं कुलस्यास्य विवृद्धये ।
सा च बुद्धिस्त्वय्यधीना पुत्रि प्रापय मां तथा ॥ १-११४-७४ (५१४७)
नष्टं च भारतं वंशं पुनरेव समुद्धर ।
पुत्रं जनय सुश्रोणि देवराजसमप्रभम् ॥ १-११४-७५ (५१४८)
स हि राज्यधुरं गुर्वीमुद्वक्ष्यति कुलस्य नः ।

ग्एवमुक्त्वा तु सा देवी स्नुषां सत्यवती तदा ॥' १-११४-७६ (५१४९)
सा धर्मतोऽनुनीयैनां कथंचिद्धर्मचारिणीम् ।
भोजयामास विप्रांश्च देवर्षीनतिथींस्तथा ॥ ॥ १-११४-७७ (५१५०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-११४-१६ संसज्जमानया स्खलनवत्या ॥
१-११४-१७ विश्वासादन्तरङ्गत्वबुद्धेः । संतानाय विस्ताराय ॥
१-११४-१८ आपद्धर्ममवेक्ष्येति शेषः ॥
१-११४-३८ व्यक्तं निःसंशयम् ॥
१-११४-४२ अनुबध्यतेऽनेनेत्यनुबन्धः फलं ॥
१-११४-४५ काली सत्यवती ॥
१-११४-४७ प्रस्रवैः स्नेहस्रुतस्तनैः ॥
१-११४-५३ विधानविहितः पूर्वपुण्यप्रसूतः ॥
१-११४-५६ व्यपेक्षया स्नेहानुबन्धेन ॥
१-११४-५८ आनृशंस्यादनैष्ठुर्यात् ॥
१-११४-६३ देव्यौ राजभार्ये ॥
१-११४-७४ यथा भीष्मेणोक्तं तथा मां प्रापय इष्टार्थेन योजय ॥
१-११४-७६ उद्वक्ष्यति धुरं धुर उद्वहनंम करिष्यति ॥
चतुर्दशाधिकशततमोऽध्यायः ॥
११४ ॥

आदिपर्व - अध्याय ११५
॥ श्रीः ॥
१.११५. अध्यायः ११५

Mahabharata - Adi Parva - Chapter Topics
अम्बिकायां व्यासाद्धृतराष्ट्रस्योत्पत्तिः ॥ १ ॥
अम्बालिकायां पाण्डोरुत्पत्तिः ॥ २ ॥
अम्बिकादास्यां विदुरस्योत्पत्तिः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-११५-० (५१५१)
वैशम्पायन उवाच । १-११५-०क्ष् (७०४)

ततः सत्यवती काले वधूं स्नातामृतौ तदा ।
संवेशयन्ती शयने शनैर्वचनमब्रवीत् ॥ १-११५-१ (५१५२)
कौसल्ये देवरस्तेऽस्ति सोऽद्य त्वाऽनुप्रवेक्ष्यति ।
अप्रमत्ता प्रतीक्षैनं निशीथे ह्यागमिष्यति ॥ १-११५-२ (५१५३)
श्वश्र्वास्तद्वचनं श्रुत्वा शयाना शयने शुभे ।
साऽचिन्तयत्तदा भीष्ममन्यांश्च कुरुपुङ्गवान् ॥ १-११५-३ (५१५४)
ग्ततः सुप्तजनप्रायेऽर्धरात्रे भगवानृषिः ।
दीप्यमानेषु दीपेषु शरणं प्रविवेश ह ॥ १-११५-४ (५१५५)
ततोऽम्बिकायां प्रथमं नियुक्तः सत्यवागृषिः ।
जगाम तस्याः शयनं विपुले तपसि स्थितः ॥ १-११५-५ (५१५६)
तं समीक्ष्य तु कौसल्या दुष्प्रेक्षमतथोचिता ।
विरूप इति वित्रस्ता संकुच्यासीन्निमीलिता ॥ १-११५-६ (५१५७)
विरूपो हि जटी चापि दुर्वर्णः परुषः कृशः ।
सुगन्धेतरगन्धश्च सर्वथा दुष्प्रधर्षणः ॥' १-११५-७ (५१५८)
तस्य कृष्णस्य कपिलां जटां दीप्ते च लोचने ।
बभ्रूणि चैव श्मश्रूमि दृष्ट्वा देवी न्यमीलयत् ॥ १-११५-८ (५१५९)
संभूव तया सार्धं मातुः प्रियचिकीर्षया ।
भयात्काशिसुता तं तु नाशक्नोदभिवीक्षितुम् ॥ १-११५-९ (५१६०)
ततो निष्क्रान्तमागम्य माता पुत्रमुवाच ह ।
अप्यस्यां गुणवान्पुत्र राजपुत्रो भविष्यति ॥ १-११५-१० (५१६१)
निशम्य तद्वचो मातुर्व्यासः सत्यवतीसुतः ।
ग्प्रोवाचातीन्द्रियज्ञानो विधिना संप्रचोदितः ॥' १-११५-११ (५१६२)
नागायुतसमप्राणो विद्वान्राजर्षिसत्तमः ।
महाभागो महावीर्यो महाबुद्धिर्भविष्यति ॥ १-११५-१२ (५१६३)
तस्य चापि शतं पुत्रा भविष्यन्ति महात्मनः ।
किंतु मातुः स वैगुण्यादन्ध एव भविष्यति ॥ १-११५-१३ (५१६४)
तस्य तद्वचनं श्रुत्वा माता पुत्रमथाऽब्रवीत् ।
नान्धः कुरूणां नृपतिरनुरूपस्तपोधन ॥ १-११५-१४ (५१६५)
ज्ञातिवंशस्य गोप्तारं पितॄणां वंशवर्धनम् ।
ग्अपरस्यामपि पुनर्मम शोकविनाशनम् ॥ १-११५-१५ (५१६६)
तस्मादवरजं पुत्रं जनयान्यं नराधिपम् ।
भ्रातुर्भार्याऽवरा चेयं रूपयौवनशालिनी ॥ १-११५-१६ (५१६७)
अस्यामुत्पादयाऽपत्यं मन्नियोगाद्गुणाधिकम् ।'
द्वितीयं कुरुवंशस्य राजानं दातुमर्हसि ॥ १-११५-१७ (५१६८)
स तथेति प्रतिज्ञाय निश्चक्राम महायशाः ।
साऽपि कालेन कौसल्या सुषुवेऽन्धं तमात्मजम् ॥ १-११५-१८ (५१६९)

पुनरेव तु सा देवी परिभाष्य स्नुषां ततः ।
ऋषिमावाहयत्सत्या यथापूर्वमरिन्दम ॥ १-११५-१९ (५१७०)
ग्अम्बालिकां समाहूय तस्यां सत्यवती सुतम् ।
भूयो नियोजयामास सन्तानाय कुलस्य वै ॥ १-११५-२० (५१७१)
विषण्णाम्बालिका साध्वी निषण्णा शयनोत्तमे ।
कोन्वेष्यतीति ध्यायन्ती नियतां संप्रतीक्षते'॥ १-११५-२१ (५१७२)
ततस्तेनैव विधिना महर्षिस्तामपद्यत ।
अम्बालिकामथाऽभ्यागादृषिं दृष्ट्वा च साऽपि तम् ॥ १-११५-२२ (५१७३)
विवर्णा पाण्डुसंकाशा समपद्यत भारत ।
तां भीतां पाण्डुसंकाशां विषण्णां प्रेक्ष्य भारत ॥ १-११५-२३ (५१७४)
व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत् ।
यस्मात्पाण्डुत्वमापन्ना विरूपं प्रेक्ष्य मामिह ॥ १-११५-२४ (५१७५)
तस्मादेष सुतस्ते वै पाण्डुरेव भविष्यति ।
नाम चास्यैतदेवेह भविष्यति शुभानने ॥ १-११५-२५ (५१७६)
इत्युक्त्वा स निराक्रामद्भगवानृषिसत्तमः ।
ततो निष्क्रान्तमालोक्य सत्या पुत्रमथाऽब्रवीत् ॥ १-११५-२६ (५१७७)
ग्कुमारो ब्रूहि मे पुत्र अप्यत्र भविता शुभः।'
शशंस स पुनर्मात्रे तस्य बालस्य पाण्डुताम् ॥ १-११५-२७ (५१७८)
ग्भविष्यति सुविक्रान्तः कुमारो दिक्षु विश्रुतः ।
पाण्डुत्वं वर्णतस्तस्य मातृदोषाद्भविष्यति ॥ १-११५-२८ (५१७९)
तस्य पुत्रा महेष्वासा भविष्यन्तीह पञ्च वै ।
इत्युक्त्वा मातरं तत्र सोऽभिवाद्य जगाम ह ॥' १-११५-२९ (५१८०)
तं माता पुनरेवान्यमेकं पुत्रमयाचत ।
तथेति च महर्षिस्तां मातरं प्रत्यभाषत ॥ १-११५-३० (५१८१)
ततः कुमारं सा देवी प्राप्तकालमजीजनत् ।
पाण्डुलक्षणसंपन्नं दीप्यमानमिव श्रिया ॥ १-११५-३१ (५१८२)
यस्य पुत्रा महेष्वासा जज्ञिरे पञ्च पाण्डवाः ।
ग्तयोर्जन्मक्रियाः सर्वा यथावदनुपूर्वशः ॥ १-११५-३२ (५१८३)
कारयामास वै भीष्मो ब्राह्मणैर्वेदपारगैः ।
अन्धं दृष्ट्वाऽम्बिकापुत्रं जातं सत्यवती सुतम् ॥ १-११५-३३ (५१८४)
कौसल्यार्थे समाहूय पुत्रमन्यमयाचत ।
अन्धोयमन्यमिच्छामि कौसल्यातनयं शुभम् ॥ १-११५-३४ (५१८५)
एवमुक्तो महर्षिस्तां मातरं प्रत्यभाषत ।
नियता यदि कौसल्या भविष्यति पुनःशुभा ॥ १-११५-३५ (५१८६)
भविष्यति कुमारोऽस्या धर्मशास्त्रार्थतत्ववित् ।
तां समाधाय वै भूयः स्नुषां सत्यवती पुनः ॥' १-११५-३६ (५१८७)

ऋतुकाले ततो ज्येष्ठां वधूं तस्मै न्ययोजयत् ।
सा तु रूपं च गन्धं च महर्षेः प्रविचिन्त्य तं ॥ १-११५-३७ (५१८८)
नाकरोद्वचनं देव्या भयात्सुरसुतोपमा ।
ततःस्वैर्भूषणैर्दासीं भूषयित्वाऽप्सरोपमाम् ॥ १-११५-३८ (५१८९)
प्रेषयामास कृष्णाय ततः काशिपतेः सुता ।
सा तं त्वृषिमनुप्राप्तं प्रत्युद्गम्याभिवाद्य च ॥ १-११५-३९ (५१९०)
संविवेशाभ्यनुज्ञाता सत्कृत्योपचचार ह ।
ग्वाग्भावोपप्रदानेन गात्रसंस्पर्शनेन च ॥' १-११५-४० (५१९१)
कामोपभोगेन रहस्तस्यां तुष्टिमगादृषिः ।
तया सहोषितो राजन्महर्षिः संशितव्रतः ॥ १-११५-४१ (५१९२)
उत्तिष्ठन्नब्रवीदेनामभुजिष्या भविष्यसि ।
अयं च ते शुभे गर्भः श्रेयानुदरमागतः ।
धर्मात्मा भविता लोके सर्वबुद्धिमतां वरः ॥ १-११५-४२ (५१९३)
स जज्ञे विदुरो नाम कृष्णद्वैपायनात्मजः ।
धृतराष्ट्रस्य वै भ्राता पाण्डोश्चैव महात्मनः ॥ १-११५-४३ (५१९४)
धर्मो विदुररूपेण शापात्तस्य महात्मनः ।
माण्डव्यस्यार्थतत्त्वज्ञः कामक्रोधविवर्जितः ॥ १-११५-४४ (५१९५)
कृष्णद्वैपायनोऽप्येतत्सत्यवत्यै न्यवेदयत् ।
प्रलम्भमात्मनश्चैव शूद्रायाः पुत्रजन्म च ॥ १-११५-४५ (५१९६)
स धर्मस्यानृणो भूत्वा पुनर्मात्रा समेत्य च ।
तस्यै गर्भं समावेद्य तत्रैवान्तरधीयत ॥ १-११५-४६ (५१९७)
एते विचित्रवीर्यस्य क्षेत्रे द्वैपायनादपि ।
जज्ञिरे देवगर्भाभाः कुरुवंशविवर्धनाः ॥ ॥ १-११५-४७ (५१९८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चादशाधिकशततमोऽध्यायः ॥ ११५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-११५-४२ अभुजिष्या अदासी ॥
१-११५-४५ प्रलम्भमात्मस्थोने दासीनियोजनम् ॥
पञ्चादशाधिकशततमोऽध्यायः ॥
११५ ॥

आदिपर्व - अध्याय ११६
॥ श्रीः ॥
१.११६. अध्यायः ११६

Mahabharata - Adi Parva - Chapter Topics
माण्डव्योपाख्यानम् ॥ १ ॥
राजाज्ञया माण्डव्यस्य शूलारोपणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-११६-० (५१९९)
जनमेजय उवाच। १-११६-०क्ष् (७०५)
किं कृतं कर्म धर्मेण येन शापमुपेयिवान् ।
कस्य शापाच्च ब्रह्मर्षेः शूद्रयोनावजायत ॥ १-११६-१ (५२००)
वैशम्पायन उवाच। १-११६-२क्ष् (७०६)
बभूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः ।
धृतिमान्सर्वधर्मज्ञः सत्ये तपसि च स्थितः ॥ १-११६-२ (५२०१)
ग्स तीर्थयात्रां विचरन्नाजगाम यदृच्छया ।
संनिकृष्टानि तीर्थानि ग्रामाणां यानि कानि च ।
तत्राश्रमपदं कृत्वा वसति स्म महामुनिः ॥' १-११६-३ (५२०२)
स आश्रमपदद्वारि वृक्षमूले महातपाः ।
ऊर्ध्वबाहुर्महायोगी तस्थौ मौनव्रतान्वितः ॥ १-११६-४ (५२०३)
तस्य कालेन महता तस्मिंस्तपसि वर्ततः ।
तमाश्रममनुप्राप्ता दस्यवो लोप्त्रहारिणः ॥ १-११६-५ (५२०४)
अनुसार्यमाणा बहुभी रक्षिभिर्भरतर्षभ ।
ग्तामेव वसतिं जग्मुस्ते ग्रामाल्लोप्त्रहारिणः ॥ १-११६-६ (५२०५)
यस्मिन्नावसथे शेते स मुनिः संशितव्रतः।'
ते तस्यावसथे लोप्त्रं दस्यवः कुरुसत्तम ॥ १-११६-७ (५२०६)
निधाय च भयाल्लीनास्तत्रैवानागते बले ।
तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलम् ॥ १-११६-८ (५२०७)
आजगाम ततोऽपश्यंस्तमृषिं तस्करानुगाः ।
तमपृच्छंस्ततो राजंस्तथावृत्तं तपोधनम् ॥ १-११६-९ (५२०८)
कतरेण पथा याता दस्यवो द्विजसत्तम ।
तेन गच्छामहे ब्रह्मन्यथा शीघ्रतरं वयम् ॥ १-११६-१० (५२०९)
तथा तु रक्षिमां तेषां ब्रुवतां स तपोधनः ।
न किंचिद्वचनं राजन्नब्रवीत्साध्वसाधु वा ॥ १-११६-११ (५२१०)
ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमम् ।
ददृशुस्तत्र लीनांस्तांश्चोरांस्तद्द्रव्यमेव च ॥ १-११६-१२ (५२११)
ततः शङ्का समभवद्रक्षिणां तं मुनिं प्रति ।
संयम्यैनं ततो राज्ञे दस्यूंश्चैव न्यवेदयन् ॥ १-११६-१३ (५२१२)

तं राजा सह तैश्चोरैरन्वशाद्वध्यतामिति ।
स रक्षिभिस्तैरज्ञातः शूले प्रोतो महातपाः ॥ १-११६-१४ (५२१३)
ततस्ते शूलमारोप्य तं मुनिं रक्षिणस्तदा ।
प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ ॥ १-११६-१५ (५२१४)
शूलस्थः स तु धर्मात्मा कालेन महता ततः ।
निराहारोऽपि विप्रर्षिर्मरणं नाभ्यपद्यत ॥ १-११६-१६ (५२१५)
धारयामास च प्राणानृषींश्च समुपानयत् ।
शूलाग्रे तप्यमानेन तपस्तेन महात्मना ॥ १-११६-१७ (५२१६)
सन्तापं परमं जग्मुर्मुनयस्तपसाऽन्विताः ।
ते रात्रौ शकुना भूत्वा सन्निपत्त्य तु भारत ।
दर्शन्तो यथाशक्ति तमपृच्छन्द्विजोत्तमम् ॥ १-११६-१८ (५२१७)
श्रोतुमिच्छामहे ब्रह्मन्किं पापं कृतवानसि ।
येनेह समनुप्राप्तं शूले दुःखभयं महत् ॥ ॥ १-११६-१९ (५२१८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-११६-१ कस्य कीदृशस्य ॥
१-११६-६ लोप्त्रं लुप्यत इति व्युत्पत्त्या चोरापहृतं धनम् ॥
१-११६-८ बले राजसैन्ये ॥
१-११६-१३ संयम्य चोरवन्निगृह्य ॥
१-११६-१४ प्रोतोऽर्पितः ॥
१-११६-१७ समुपानयात् स्वसमीपमिति शेषः ॥
१-११६-१८ दर्शयन्तः स्वानि रूपामि प्रकाशयन्तः ॥
षोडशाधिकशततमोऽध्यायः ॥
११६ ॥

आदिपर्व - अध्याय ११७
॥ श्रीः ॥
१.११७. अध्यायः ११७

Mahabharata - Adi Parva - Chapter Topics

माण्डव्यं ऋषिं ज्ञात्वा भीतेन राज्ञा तस्य शूलाद्विमोक्षणम् ॥ १ ॥
अणीमाण्डव्यस्य यमेन विवादः ॥ २ ॥
माण्डव्यं न यमस्य शापः ॥ ३ ॥

१-११७-० (५२१९)
वैशम्पायन उवाच। १-११७-०क्ष् (७०७)
ततः स मुनिशार्दूलस्तानुवाच तपोधनान् ।
दोषतः कं गमिष्यामि न हि मेऽन्योपराध्यति ॥ १-११७-१ (५२२०)
तं दृष्ट्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि ।
न्यवेदयंस्तथा राज्ञे यथावृत्तं नराधिप ॥ १-११७-२ (५२२१)
राजा च तमृषिं श्रुत्वा निष्क्रम्य सह मन्त्रिभिः ।
प्रसादयामास तदा शूलस्थमृषिसत्तमम् ॥ १-११७-३ (५२२२)
प्रजोवाच। १-११७-४क्ष् (७०८)
यन्मयाऽपकृतं मोहादज्ञानादृषिसत्तम ।
प्रसादये त्वां तत्राहं न मे त्वं क्रोद्धुमर्हसि ॥ १-११७-४ (५२२३)
वैशम्पायन उवाच। १-११७-५क्ष् (७०९)
एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः ।
कृतप्रसादं राजा तं ततः समवतारयत् ॥ १-११७-५ (५२२४)
अवतार्य च शूलाग्रात्तच्छूलं निश्चकर्ष ह ।
अशक्नुवंश्च निष्क्रष्टुं शूलं मूले स चिच्छिदे ॥ १-११७-६ (५२२५)
स तथान्तर्गतेनैव शूलेन व्यचरन्मुनिः ।
कण्ठपार्श्वान्तरस्थेन शङ्कुना मुनिराचत् ।
पुष्पभाजनधारी स्यादिति चिन्तापरोऽभवत् ॥' १-११७-७ (५२२६)
स चातितपसा लोकान्विजिग्ये दुर्लभान्परैः ॥ १-११७-८ (५२२७)
अणीमाण्डव्य इति च ततो लोकेषु गीयते ।
स गत्वा सदनं विप्रो धर्मस्य परमार्थवित् ॥ १-११७-९ (५२२८)
आसनस्थं ततो धर्मं दृष्ट्वोपालभत प्रभुम् ।
किं नु तद्दुष्कृतं कर्म मया कृतमजानता ॥ १-११७-१० (५२२९)
यस्येयं फलनिर्वृत्तिरीदृश्यासादिता मया ।
शीघ्रमाचक्ष्व मे तत्त्वं पश्य मे तपसो बलम् ॥ १-११७-११ (५२३०)
धर्म उवाच। १-११७-१२क्ष् (७१०)
पतङ्गिकानां पुच्छेषु त्वयेषीका प्रवेशिता ।
कर्मणस्तस्य ते प्राप्तं फलमेतत्तपोधन ॥ १-११७-१२ (५२३१)
स्वल्पमेव यथा दत्तं दानं बहुगुणं भवेत् ।
अधर्म एवं विप्रर्षे बहुदुःखफलप्रदः ॥ १-११७-१३ (५२३२)
अणीमाण्डव्य उवाच। १-११७-१४क्ष् (७११)
कस्मिन्काले मया तत्तु कृतं ब्रूहि यथातथम् ।
तेनोक्तं धर्मराजेन बालभावे त्वया कृतम् ॥ १-११७-१४ (५२३३)

अणीमाण्डव्य उवाच। १-११७-१५क्ष् (७१२)
बालो हि द्वादशाद्वर्षाज्जन्मतो यत्करिष्यति ।
न भविष्यत्यधर्मोऽत्र न प्रज्ञास्यति वै दिशः ॥ १-११७-१५ (५२३४)
अल्पेऽपराधेऽपि महान्मम दण्डस्त्वया धृतः ।
गरीयान्ब्राह्मणवधः सर्वभूतवधादपि ॥ १-११७-१६ (५२३५)
शूद्रयोनावतो धर्म मानुषः संभविष्यसि ।
मर्यादां स्थापयाम्यद्य लोके कर्मफलोदयाम् ॥ १-११७-१७ (५२३६)
आ चतुर्दशकाद्वर्षान्न भविष्यति पातकम् ।
परतः कुर्वतामेव दोष एव भविष्यति ॥ १-११७-१८ (५२३७)
वैशम्पायन उवाच। १-११७-१९क्ष् (७१३)
एतेन त्वपराधेन शापात्तस्य महात्मनः ।
धर्मो विदुररूपेण शूद्रयोनावजायत ॥ १-११७-१९ (५२३८)
धर्मे चार्थे च कुशलो लोभक्रोधविवर्जितः ।
दीर्घदर्शी शमपरः कुरूणां च हिते रतः ॥ ॥ १-११७-२० (५२३९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-११७-१ दोषतः कंगमिष्यामि न कमपि दोषिणं कथयामि
। स्वकृतमे भुञ्जे इत्यर्थः ॥
१-११७-९ अणी शूलाग्रं तद्युक्तो माण्डव्यः ॥
१-११७-१० उपालभत गर्हितवान् ॥
१-११७-१५ दिशो देशनाः धर्मशास्त्राणि यतो न प्रज्ञास्यति बालत्वात् ॥
१-११७-१६ ब्राह्मणवधो ब्राह्मणपीडनम् ॥
१-११७-२० दीर्घदर्शी सर्वकालपरामर्शी । शमपरो निर्वैरः ॥
सप्तदशाधिकशततमोऽध्यायः ॥
११७ ॥

आदिपर्व - अध्याय ११८

॥ श्रीः ॥

१.११८. अध्यायः ११८

Mahabharata - Adi Parva - Chapter Topics

कंचित्कालं भीष्मेण राज्यपरिपालनानन्तरं पाण्डो राज्येऽभिषेकः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-११८-० (५२४०)
वैशम्पायन उवाच। १-११८-०क्ष् (७१४)
 'धृतराष्ट्रे च पाण्डौ च विदुरे च महात्मनि।'
एषु त्रिषु कुमारेषु जातेषु कुरुजाङ्गलम् ।
कुरवोऽथ कुरुक्षेत्रं त्रयमेतदवर्धत ॥ १-११८-१ (५२४१)
ऊर्ध्वसस्याऽभवद्भूमिः सस्यानि फलवन्ति च ।
यथर्तुवर्षी पर्जन्यो बहुपुष्पफला द्रुमाः ॥ १-११८-२ (५२४२)
वाहनानि प्रहृष्टानि मुदिता मृगपक्षिणः ।
गन्धवन्ति च माल्यानि रसवन्ति फलानि च ॥ १-११८-३ (५२४३)
वणिग्भिश्चान्वकीर्यन्त नगराण्यथ शिल्पिभिः ।
शूराश्च कृतविद्याश्च सन्तश्च सुखिनोऽभवन् ॥ १-११८-४ (५२४४)
नाभवन्दस्यवः केचिन्नाधर्मरुचयो जनाः ।
प्रदेशेष्वपि राष्ट्राणां कृतं युगमवर्तत ॥ १-११८-५ (५२४५)
धर्मक्रिया यज्ञशीलाः सत्यव्रतपरायणाः ।
अन्योन्यप्रीतिसंयुक्ता व्यवर्धन्त प्रजास्तदा ॥ १-११८-६ (५२४६)
मानक्रोधविहीनाश्च नरा लोभविवर्जिताः ।
अन्योन्यमभ्यनन्दन्त धर्मोत्तरमवर्तत ॥ १-११८-७ (५२४७)
तन्महोदधिवत्पूर्णं नगरं वै व्यरोचत ।
द्वारतोरणनिर्यूहैर्युक्तमभ्रचयोपमैः ॥ १-११८-८ (५२४८)
प्रसादशतसंबाधं महेन्द्रपुरसन्निभम् ।
नदीषु वनखण्डेषु वापीपल्वलसानुषु ।
काननेषु च रम्येषु विजह्रुर्मुदिता जनाः ॥ १-११८-९ (५२४९)
उत्तरैः कुरुभिः सार्धं दक्षिणाः कुरवस्तथा ।
विस्पर्धमाना व्यचरंस्तथा देवर्षिचारणैः ॥ १-११८-१० (५२५०)
नाभवत्कृपणः कश्चिन्नाभवन्विधवाः स्त्रियः ।
तस्मिञ्जनपदे रम्ये कुरुभिर्बहुलीकृते ॥ १-११८-११ (५२५१)
कूपारामसभावाप्यो ब्राह्मणावसथास्तथा ।
बभूवुः सर्वर्द्धियुतास्तस्मिन्राष्ट्रे सदोत्सवाः ॥ १-११८-१२ (५२५२)
भीष्मेण धर्मतो राजन्सर्वतः परिरक्षिते ।
बभूव रमणीयश्च चैत्ययूपशताङ्कितः ॥ १-११८-१३ (५२५३)
स देशः परराष्ट्राणि विमृज्याभिप्रवर्धितः ।
भीष्मेण विहितं राष्ट्रे धर्मचक्रमवर्तत ॥ १-११८-१४ (५२५४)
क्रियमाणेषु कृत्येषु कुमाराणां महात्मनाम् ।
पौरजानपदाः सर्वे बभूवुः परमोत्सुकाः ॥ १-११८-१५ (५२५५)
गृहेषु कुरुमुख्यानां पौराणां च नराधिप ।

दीयतां भुज्यतां चेति वाचोऽश्रूयन्त सर्वशः ॥ १-११८-१६ (५२५६)
धृतराष्ट्रश्च पाण्डुश्च विदुरश्च महामतिः ।
जन्मप्रभृति भीष्मेण पुत्रवत्परिपालिताः ॥ १-११८-१७ (५२५७)
संस्कारैः संस्कृतास्ते तु व्रताध्ययनसंयुताः ।
श्रमव्यायामकुशलाः समपद्यन्त यौवनम् ॥ १-११८-१८ (५२५८)
धनुर्वेदे च वेदे च गदायुद्धेऽसिचर्मणि ।
तथैव गजशिक्षायां नीतिशास्त्रेषु पारगाः ॥ १-११८-१९ (५२५९)
इतिहासपुराणेषु नानाशिक्षासु बोधिताः ।
वेदवेदाङ्गतत्त्वज्ञाः सर्वत्र कृतनिश्चयाः ॥ १-११८-२० (५२६०)
ץवैदिकाध्ययने युक्तो नीतिशास्त्रेषु पारगः ।
भीष्मेण राजा कौरव्यो धृतराष्ट्रोऽभिषेचितः ॥ १-११८-२१ (५२६१)
धनुर्वेदेऽश्वपृष्ठे च गदायुद्धेऽसिचर्मणि ।
तथैव गजशिक्षायामस्त्रेषु विविधेषु च ॥ १-११८-२२ (५२६२)
अर्थधर्मप्रधानासु विद्यासु विविधासु च ।
गतः पारं यदा पाण्डुस्तदा सेनापतिः कृतः ॥ऽ १-११८-२३ (५२६३)
पाण्डुर्धनुषि विक्रान्तो नरेष्वभ्यधिकोऽभवत् ।
अन्येभ्यो बलवानासीद्धृतराष्ट्रो महीपतिः ॥ १-११८-२४ (५२६४)
अमात्यो मनुजेन्द्रस्य बाल एव यशस्विनः ।
भीष्मेण सर्वधर्माणां प्रणेता विदुरः कृतः ॥ १-११८-२५ (५२६५)
ץसर्वशास्त्रार्थतत्त्वज्ञो बुद्धिमेधापटुर्युवा ।
भावेनागमयुक्तेन सर्वं वेदयते जगत् ॥ऽ १-११८-२६ (५२६६)
त्रिषु लोकेषु न त्वासीत्कश्चिद्विदुरसंमितः ।
धर्मनित्यस्तथा राजन्धर्मे च परमं गतः ॥ १-११८-२७ (५२६७)
प्रनष्टं शान्तनोर्वंशं समीक्ष्य पुनरुद्धृतम् ।
ततो निर्वचनं लोके सर्वराष्ट्रेष्ववर्तत ॥ १-११८-२८ (५२६८)
वीरसूनां काशिसुते देशानां कुरुजाङ्गलम् ।
सर्वधर्मविदां भीष्मः पुराणां गजसाह्वयम् ॥ १-११८-२९ (५२६९)
धृतराष्ट्रस्त्वचक्षुष्ट्वाद्राज्यं न प्रत्यपद्यत ।
पारसवत्वाद्विदुरो राजा पाण्डुर्बभूव ह ॥ १-११८-३० (५२७०)
ץअथ शुश्राव विप्रेभ्यः कुन्तिभोजमहीपतेः ।
रूपयौवनसंपन्नां सुतां सागरगासुतः ॥ १-११८-३१ (५२७१)
सुबलस्य च कल्याणीं गान्धाराधिपतेः सुताम् ।
सुतां च मद्रराजस्य रूपेणाप्रतिमां भुवि ॥ऽ १-११८-३२ (५२७२)
कदाचिदथ गाङ्गेयः सर्वनीतिमतां वरः ।
विदुरं धर्मतत्त्वज्ञं वाक्यमाह यथोचितम् ॥ ॥ १-११८-३३ (५२७३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-११८-२ ऊर्ध्वसस्या प्रचुरसस्या ॥
१-११८-१८ श्रमः शास्त्राभ्यासः । व्यायामो बाहुयुद्धाद्यभ्यासः ॥
१-११८-२८ निर्वचनं प्रशंसा ॥
१-११८-३० पारसवत्वाच्छूद्रायां ब्राह्मणाज्जातत्वात् ॥
अष्टादशाधिकशततमोऽध्यायः ॥
११८ ॥

आदिपर्व - अध्याय ११९
॥ श्रीः ॥
१.११९. अध्यायः ११९

Mahabharata - Adi Parva - Chapter Topics
धृतराष्ट्रविवाहार्थं भीष्मविदुरसंवादः ॥ १ ॥
धृतराष्ट्रस्य गान्धार्या विवाहः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-११९-० (५२७४)
भीष्म उवाच। १-११९-०क्ष् (७१५)
गुणैः समुदितं सम्यगिदं नः प्रथितं कुलम् ।
अत्यन्यान्पृथिवीपालान्पृथिव्यामधिराज्यभाक् ॥ १-११९-१ (५२७५)
रक्षितं राजभिः पूर्वं धर्मविद्भिर्महात्मभिः ।
नोत्सादमगमच्चेदं कदाचिदिह नः कुलम् ॥ १-११९-२ (५२७६)
मया च सत्यवत्या च कृष्णेन च महात्मना ।
समवस्थापित भूयो युष्मासु कुलतन्तुषु ॥ १-११९-३ (५२७७)
तच्चैतद्वर्धते भूयः कुलं सागरवद्यथा ।
तथा मया विधातव्यं त्वया चैव न संशयः ॥ १-११९-४ (५२७८)
श्रूयते यादवी कन्या स्वनुरूपा कुलस्य नः ।
सुबलस्यात्मजा चैव तथा मद्रेश्वरस्य च ॥ १-११९-५ (५२७९)
कुलीना रूपवत्यश्च ताः कन्याः पुत्र सर्वशः ।
उचिताश्चैव संबन्धे तेऽस्माकं क्षत्रियर्षभाः ॥ १-११९-६ (५२८०)
मन्ये वरयितव्यास्ता इत्यहं धीमतां वर ।
सन्तानार्थं कुलस्यास्य यद्वा विदुर मन्यसे ॥ १-११९-७ (५२८१)

विदुर उवाच। १-११९-८क्ष् (७१६)
भवान्पिता भावन्माता भवान्नः परमो गुरुः ।
तस्मात्स्वयं कुलस्यास्य विचार्य कुरु यद्धितम् ॥ १-११९-८ (५२८२)
वैशम्पायन उवाच। १-११९-९क्ष् (७१७)
अथ शुश्राव विप्रेभ्यो गान्धारीं सुबलात्मजाम् ।
आराध्य वरदं देवं भगनेत्रहरं हरम् ॥ १-११९-९ (५२८३)
गान्धारी किल पुत्राणां शतं लेभे वरं शुभा ।
इति शुश्राव तत्त्वेन भीष्मः कुरुपितामहः ॥ १-११९-१० (५२८४)
ततो गान्धारराजस्य प्रेषयामास भारत ।
अचक्षुरिति तत्रासीत्सुबलस्य विचारणा ॥ १-११९-११ (५२८५)
कुलं ख्यातिं च वृत्तं च बुद्ध्या तु प्रसमीक्ष्य सः ।
ददै तां धृतराष्ट्राय गान्धारीं धर्मचारिणीम् ॥ १-११९-१२ (५२८६)
गान्धारी त्वथ शुश्राव धृतराष्ट्रमचक्षुषम् ।
आत्मानं दिप्सितं चास्मै पित्रा मात्रा च भारत ॥ १-११९-१३ (५२८७)
ततः सा पटमादाय कृत्वा बहुगुणं तदा ।
बबन्ध नेत्रे स्वे राजन्पतिव्रतपरायणा ॥ १-११९-१४ (५२८८)
नाभ्यसूयां पतिमहमित्येवं कृतनिश्चया ।
ततो गान्धारराजस्य पुत्रः शकुनिरभ्ययात् ॥ १-११९-१५ (५२८९)
स्वसारं परया लक्ष्म्या युक्तामादाय कौरवान् ।
तां तदा धृतराष्ट्राय ददौ परमसत्कृताम् ।
भीष्मस्यानुमते चैव विवाहं समकारयत् ॥ १-११९-१६ (५२९०)
दत्त्वा स भगिनीं वीरो यथार्हं च परिच्छदम् ।
पुनरायात्स्वनगरं भीष्मेण प्रतिपूजितः ॥ १-११९-१७ (५२९१)
गान्धार्यपि वरारोहा शीलाचारविचिषेटितैः ।
तुष्टिं कुरूणां सर्वेषां जनयामास भारत ॥ १-११९-१८ (५२९२)
ग्गान्धारी सा पतिं दृष्ट्वा प्रज्ञाचक्षुषमीश्वरम् ।
अतिचाराद्बृशं भीता भर्तुः सा समचिन्तयत् ॥ १-११९-१९ (५२९३)
सा दृष्टिविनिवृत्त्या हि भर्तुश्च समतां ययौ ।
नहि सूक्ष्मेप्यतीचारे भर्तुः सा ववृते तदा ॥ १-११९-२० (५२९४)
वृत्तेनाराध्य तान्सर्वान्गुरून्पतिपरायणा ।
वाचापि पुरुषानन्यान्सुव्रता नान्वकीर्तयत् ॥ १-११९-२१ (५२९५)
तस्याः सहोदरीः कन्याः पुनरेव ददौ दश ।
गान्धारराजः सुबलो भीष्मेण च वृतस्तदा ॥ १-११९-२२ (५२९६)
सत्यव्रतां सत्यसेनां सुदेष्णां चापि संहिताम् ।
तेजश्श्रवां सुश्रवां च तथैव निकृतिं शुभाम् ॥ १-११९-२३ (५२९७)
शंभ्वठां च दशार्णां च गान्धारीर्दश विश्रुताः ।

एकाह्ना प्रतिजग्राह धृतराष्ट्रो जनेश्वरः ॥ १-११९-२४ (५२९८)
ततः शान्तनवो भीष्मो धानुष्कस्तास्ततस्ततः ।
अददाद्धृतराष्ट्रस्य राजपुत्रीः परश्शतम् ॥' ॥ १-११९-२५ (५२९९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-११९-५ यादवी यादवस्य कुन्तिभोजस्य अपत्यम् ॥
१-११९-११ प्रेषयामास दूतमिति शेषः ॥
१-११९-१३ दित्सितं दातुमिष्टम् ॥
१-११९-१४ बहुगुणं बहुधागुणितम् ॥
१-११९-१५ नाभ्यसूयां पत्युरभिभवं न कुर्याम् ॥
एकोनविंशत्यधिकशततमोऽध्यायः ॥
११९ ॥

आदिपर्व - अध्याय १२०
॥ श्रीः ॥
१.१२०. अध्यायः १२०

Mahabharata - Adi Parva - Chapter Topics
पृथाया बाल्यचरित्रकथनम् ॥ १ ॥
तस्या दुर्वाससो मन्त्रप्राप्तिः ॥ २ ॥
मन्त्रप्रभावजिज्ञासयाऽऽहूतात्सूर्यात्कुन्त्यां कर्णस्योत्पत्तिः ॥ ३ ॥
लोकभयात्कुन्त्या यमुनायां विसृष्टस्य राधाभर्त्रा स्वीकारो वसुषेणेति
नामकरमं च ॥ ४ ॥
संग्रहेण कर्णचरित्रकथनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२०-० (५३००)
वैशम्पायन उवाच। १-१२०-०क्ष् (७१८)
शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत् ।
तस्य कन्या पृथा नाम रूपेणाप्रतिमा भुवि ॥ १-१२०-१ (५३०१)
पितृष्वस्रीयाय स तामनपत्याय भारत ।
अग्र्यमग्रे प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक् ॥ १-१२०-२ (५३०२)
अग्रजामथ तां कन्यां शूरोऽनुग्रहकाङ्क्षिणे ।

प्रददौ कुन्तिभोजाय सखा सख्ये महात्मने ॥ १-१२०-३ (५३०३)
नियुक्ता सा पितुर्गेहे ब्राह्मणातिथिपूजने ।
उग्रं पर्यचरत्तत्र ब्राह्मणं संशितव्रतम् ॥ १-१२०-४ (५३०४)
निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ।
तमुग्रं संशितात्मानं सर्वयत्नैरतोषयत् ॥ १-१२०-५ (५३०५)
ग्दध्याज्यकादिभिर्नित्यं व्यञ्जनैः प्रत्यहं शुभा ।
सहस्रसङ्ख्यैर्योगीन्द्रमुपचारदनुत्तमा ॥ १-१२०-६ (५३०६)
दुर्वासा वत्सरस्यान्ते ददौ मन्त्रमनुत्तमम्'।
यशस्विन्यै पृथायै तदापद्धर्मान्ववेक्षया ।
अभिचाराभिसंयुक्तमब्रवीच्चैव तां मुनिः ॥ १-१२०-७ (५३०७)
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
तस्य तस्य प्रभावेण तव पुत्रो भविष्यति ॥ १-१२०-८ (५३०८)
तथोक्ता सा तु विप्रेण कुन्ती कौतूहलान्विता ।
कन्या सती देवमर्कमाजुहाव यशस्विनी ॥ १-१२०-९ (५३०९)
ततो घनान्तरं कृत्वा स्वमार्गं तपनस्तदा ।
उपतस्थे स तां कन्यां पृथां पृथुललोचनाम् ॥ १-१२०-१० (५३१०)
सा ददर्श तमायान्तं भास्करं लोकभावनम् ।
विस्मिता चानवद्याङ्गी दृष्ट्वा तन्महदद्भुतम् ॥ १-१२०-११ (५३११)
ग्साब्रवीद्भगवन्कस्त्वमाविर्भूतो ममाग्रतः। १-१२०-१२ (५३१२)
आदित्य उवाच ।
आहूतोपस्थितं भद्रे ऋषिमन्त्रेण चोदितम् ।
विद्धि मां पुत्रलाभाय देवमर्कं शुचिस्मिते ॥ १-१२०-१२क्ष् (७१९)
पुत्रस्ते निर्मितः सुभ्रु शृणु महादृक्छुभानने ।
आदित्ये कुण्डले बिभ्रत्कवचं चैव मामकम् ॥ १-१२०-१३ (५३१३)
शस्त्रास्त्राणामभेद्यश्च भविष्यति शुचिस्मिते ।
नास्य किंचिददेयं च ब्राह्मणेभ्यो भविष्यति ॥ १-१२०-१४ (५३१४)
चोद्यमानो मया चापि न क्षमं चिन्तयिष्यति ।
दास्यत्येव हि विप्रेभ्यो मानी चैव भविष्यति ॥ १-१२०-१५ (५३१५)
वैशम्पायन उवाच। १-१२०-१६क्ष् (७२०)
एवमुक्ता ततः कुन्ती गोपतिं प्रत्युवाच ह ।
कन्या पितृसा चाहं पुरुषार्थो न चैव मे ॥' १-१२०-१६ (५३१६)
कश्चिन्मे ब्राह्मणः प्रादाद्वरं विद्यां च शत्रुहन् ।
तद्विजिज्ञासयाऽऽह्वानं कृतवत्यस्मि ते विभो ॥ १-१२०-१७ (५३१७)
एतस्मिन्नपराधे त्वां शिरसाऽहं प्रसादये ।
योषितो हि सदा रक्ष्यास्त्वपराधेऽपि नित्यशः ॥ १-१२०-१८ (५३१८)
सूर्य उवाच। १-१२०-१९क्ष् (७२१)

वेदाहं सर्वमेवैतद्यद्दुर्वासा वरं ददौ ।
संत्यज्य भयमेवेह क्रियतां सङ्गमो मम ॥ १-१२०-१९ (५३१९)
अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे ।
वृथाऽऽह्वानेऽपि ते भीरु दोषः स्यान्नात्र संशयः ॥ १-१२०-२० (५३२०)
ग्यद्येवं मन्यसे भीरु किमाह्वयसि भास्करम् ।
यदि मामवजानासि ऋषिः स न भविष्यति ॥ १-१२०-२१ (५३२१)
मन्त्रदानेन यस्मात्त्वमवलेपेन दर्पिता ।
कुलं च तेऽद्य धक्ष्यामि क्रोधदीप्तेन चक्षुषा'॥ १-१२०-२२ (५३२२)
वैशम्पायन उवाच। १-१२०-२३क्ष् (७२२)
एवमुक्ता बहुविधं सान्त्वपूर्वं विवस्वता ।
सा तु नैच्छद्वरारोहा कन्याहमिति भारत ॥ १-१२०-२३ (५३२३)
बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी ।
तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ ॥ १-१२०-२४ (५३२४)
मत्प्रसादान्न ते राज्ञि भविता दोष इत्युत ॥ १-१२०-२५ (५३२५)
गकुन्त्युवाच। १-१२०-२६क्ष् (७२३)
प्रसीद भगवन्मह्यमवलेपो हि नास्ति मे ।
त्वयैव परिहार्यं स्यात्कन्याभावस्य दूषणम् ॥ १-१२०-२६ (५३२६)
आदित्य उवाच। १-१२०-२७क्ष् (७२४)
व्यपयातु भयं तेऽद्य कुमारं प्रसमीक्षसे ।
मया त्वं चाप्यनुज्ञाता पुनः कन्या भविष्यसि ॥ १-१२०-२७ (५३२७)
वैशम्पायन उवाच। १-१२०-२८क्ष् (७२५)
एवमुक्ता ततः कुन्ती संप्रहृष्टतनूरुहा ।
सङ्गताऽभूत्तदा सुभ्रूरादित्येन महात्मना ॥ १-१२०-२८ (५३२८)
प्रकाशकर्मा तपनः कन्यागर्भं ददौ पुनः।'
तत्र वीरः समभवत्सर्वशस्त्रभृतां वरः ॥ १-१२०-२९ (५३२९)
आमुक्तकवचः श्रीमान्देवगर्भः श्रियान्वितः ।
सहजं कवचं बिभ्रत्कुण्डलोद्द्योतिताननः ॥ १-१२०-३० (५३३०)
अजायत सुतः कर्णः सर्वलोकेषु विश्रुतः ।
प्रादाच्च तस्यै कन्यात्वं पुनः स परमद्युतिः ॥ १-१२०-३१ (५३३१)
दत्त्वा च तपतां श्रेष्ठो दिवमाचक्रमे ततः ।
दृष्ट्वा कुमारं जातं सा वार्ष्णेयी दीनमानसा ॥ १-१२०-३२ (५३३२)
एकाग्रं चिन्तयामास किं कृत्वा सुकृतं भवेत् ।
गूहमानापचारं सा बन्धुपक्षभयात्तदा ॥ १-१२०-३३ (५३३३)
मञ्जूषां रत्नसंपूर्णां कृत्वा बालसमाश्रिताम् ।
उत्ससर्ज कुमारं तं जले कुन्ती महाबलम् ॥ १-१२०-३४ (५३३४)
तमुत्सृष्टं जले गर्भं राधाभर्ता महायशाः ।

पुत्रत्वे कल्पयामास सभार्यः सूतनन्दनः ॥ १-१२०-३५ (५३३५)
नामधेयं च चक्राते तस्य बालस्य तावुभौ ।
वसुना सह जातोऽयं वसुषेणो भवत्विति ॥ १-१२०-३६ (५३३६)
स वर्धमानो बलवान्सर्वास्त्रेषूद्यतोऽभवत् ।
आपृष्ठतापादादित्यमुपातिष्ठत वीर्यवान् ॥ १-१२०-३७ (५३३७)
तस्मिन्काले तु जपतस्तस्य वीरस्य धीमतः ।
नादेयं ब्राह्मणेष्वासीत्किंचिद्वसु महीतले ॥ १-१२०-३८ (५३३८)
ग्ततः काले तु कस्मिंश्चित्स्वप्नान्ते कर्णमब्रवीत् ।
आदित्यो ब्राह्मणो भूत्वा शृणु वीर वचो मम ॥ १-१२०-३९ (५३३९)
प्रभातायां रजन्यां त्वामागमिष्यति वासवः ।
न तस्य भिक्षा दातव्या विप्ररूपी भविष्यति ॥ १-१२०-४० (५३४०)
निश्चयोऽस्यापहर्तुं ते कवचं कुण्डले तथा ।
अतस्त्वां बोधयाम्येष स्मर्तासि वचनं मम ॥ १-१२०-४१ (५३४१)
कर्ण उवाच। १-१२०-४२क्ष् (७२६)
शक्रो मां विप्ररूपेण यदि वै याचते द्विज ।
कथं तस्मै न दास्यामि यथा चास्म्यवबोधितः ॥ १-१२०-४२ (५३४२)
विप्राः पूज्यास्तु देवानां सततं प्रियमिच्छताम् ।
तं देवदेवं जानन्वै न शक्तोऽस्म्यवमन्त्रणे ॥ १-१२०-४३ (५३४३)
सूर्य उवाच। १-१२०-४४क्ष् (७२७)
यद्येवं शृणु मे वीर वरं ते सोऽपि दास्यति ।
शक्तिं त्वमपि याचेथाः सर्वशत्रुविबाधिनीम् ॥ १-१२०-४४ (५३४४)
वैशम्पायन उवाच। १-१२०-४५क्ष् (७२८)
एवमुक्त्वा द्विजः स्वप्ने तत्रैवान्तरधीयत ।
कर्णः प्रबुद्धस्तं स्वप्नं चिन्तयानोऽभवत्तदा ॥ १-१२०-४५ (५३४५)
तमिन्द्रो ब्राह्मणो भूत्वा पुत्रार्थं भूतभावनः ।
कुण्डले प्रार्थयामास कवचं च महाद्युतिः ॥ १-१२०-४६ (५३४६)
उत्कृत्याविमनाः स्वाङ्गात्कवचं रुधिरस्रवम् ।
कर्णौ पार्श्वे च द्वे छित्त्वा प्रायच्छत्स कृताञ्जलिः ॥ १-१२०-४७ (५३४७)
प्रतिगृह्य तु देवेशस्तुष्टस्तेनास्य कर्मणा ।
अहो साहसमित्याह मनसा वासवो हसन् ॥ १-१२०-४८ (५३४८)
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
न तं पश्यामि यो ह्येतत्कर्म कर्ता भविष्यति ॥ १-१२०-४९ (५३४९)
प्रीतोऽस्मि कर्मणा तेन वरं ब्रूहि यदिच्छसि। १-१२०-५० (५३५०)
कर्ण उवाच ।
इच्छामि भगवद्दत्तां शक्तिं शत्रुनिबर्हणीम् ॥ १-१२०-५०क्ष् (७२९)
वैशम्पायन उवाच। १-१२०-५१क्ष् (७३०)

शक्तिं तस्मै ददौ शक्रो विस्मयाद्वाक्यमब्रवीत् ।
देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ॥ १-१२०-५१ (५३५१)
यस्मै क्षेप्स्यसि रुष्टः सन्सोऽनया न भविष्यति ।
हत्वैकं समरे शत्रुं ततो मामागमिष्यति ।
इत्युक्त्वान्तर्दधे शक्रो वरं दत्त्वा तु तस्य वै ॥ १-१२०-५२ (५३५२)
प्राङ्नाम तस्य कथितं वसुषेण इति क्षितौ ।
कर्णो वैकर्तनश्चैव कर्मणा तेन सोऽभवत् ॥ ॥ १-१२०-५३ (५३५३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२०-२ अग्र्यं प्रथमम् । अग्रे जन्मतः पूर्वं प्रतिज्ञाय मया
प्रथममपत्यं तुभ्यं देयमिति प्रतिश्रुत्य ॥
१-१२०-७ अभिचारो वश्याकर्षणादिदृष्टफलं तद्युक्तम् ॥
१-१२०-३६ वसुना कवचकुण्डलादिद्रव्येण बद्ध इति वसुषेणः ॥
१-१२०-३७ आपृष्ठतापात् मध्याह्नात्परत इत्यर्थः ॥
१-१२०-५३ सहजकवचकर्तनात् कर्णः विशेषतः कर्तनेन वैकर्तनः
। स्वार्थे तद्धितः ॥
विंशत्यधिकशततमोऽध्यायः ॥
१२० ॥

आदिपर्व - अध्याय १२१
॥ श्रीः ॥
१.१२१. अध्यायः १२१

Mahabharata - Adi Parva - Chapter Topics
पाण्डोः कुन्त्या विवाहः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२१-० (५३५४)
वैशम्पायन उवाच । १-१२१-०क्ष् (७३१)
सत्वरूपगुणोपेता धर्मारामा महाव्रता ।
दुहिता कुन्तिभोजस्य पृथा पृथुललोचना ॥ १-१२१-१ (५३५५)
तां तु तेजस्विनीं कन्यां रूपयौवनशालिनीम् ।
व्यावृण्वन्पार्थिवाः केचिदतीव स्त्रीगुणैर्युताम् ॥ १-१२१-२ (५३५६)

ततः सा कुन्तिभोजेन राज्ञाहूय नराधिपान् ।
पित्रा स्वयंवरे दत्ता दुहिता राजसत्तम ॥ १-१२१-३ (५३५७)
ततः सा रङ्गमध्यस्थं तेषां राज्ञां मनस्विनी ।
ददर्श राजशार्दूलं पाण्डुं भरतसत्तमम् ॥ १-१२१-४ (५३५८)
सिंहदर्पं महोरस्कं वृषभाक्षं महाबलम् ।
आदित्यमिव सर्वेषां राज्ञां प्रच्छाद्य वै प्रभाः ॥ १-१२१-५ (५३५९)
तिष्ठन्तं राजसमितौ पुरन्दरमिवापरम् ।
तं दृष्ट्वा साऽनवद्याङ्गी कुन्तिभोजसुता शुभा ॥ १-१२१-६ (५३६०)
पाण्डुं नरवरं रङ्गे हृदयेनाकुलाऽभवत् ।
ततः कामपरीताङ्गी सकृत्प्रचलमानसा ॥ १-१२१-७ (५३६१)
व्रीडमान स्रजं कुन्ती राज्ञः स्कन्धे समासजत् ।
तं निशम्य वृतं पाण्डुं कुन्त्या सर्वे नराधिपाः ॥ १-१२१-८ (५३६२)
यथागतं समाजग्मुर्गजैरश्वै रथैस्तथा ।
ततस्तस्याः पिता राजन्विवाहमकरोत्प्रभुः ॥ १-१२१-९ (५३६३)
स तया कुन्तिभोजस्य दुहित्रा कुरुनन्दनः ।
युयुजेऽमितसौभाग्यः पौलोम्या मघवानिव ॥ १-१२१-१० (५३६४)
कुन्त्याः पाण्डोश्च राजेन्द्र कुन्तिभोजो महीपतिः ।
कृत्वोद्वाहं तदा तं तु नानावसुभिरर्चितम् ।
स्वपुरं प्रेषयामास स राजा कुरुसत्तम ॥ १-१२१-११ (५३६५)
ततो बलेन महता नानाध्वजपताकिना ।
स्तूयमानः स चाशीर्भिर्ब्राह्मणैश्च महर्षिभिः ॥ १-१२१-१२ (५३६६)
संप्राप्य नगरं राजा पाण्डुः कौरवनन्दनः ।
न्यवेशत तां भार्यां कुन्तीं स्वभवने प्रभुः ॥ ॥ १-१२१-१३ (५३६७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

आदिपर्व - अध्याय १२२
॥ श्रीः ॥
१.१२२. अध्यायः १२२

Mahabharata - Adi Parva - Chapter Topics
पाण्डोर्माद्रया विवाहः । दिग्विजयश्च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२२-० (५३६८)

वैशम्पायन उवाच। १-१२२-०क्ष् (७३२)
ततः शान्तनवो भीष्मो राज्ञः पाण्डोर्यशस्विनः ।
विवाहस्यापरस्यार्थे चकार मतिमान्मतिम् ॥ १-१२२-१ (५३६९)
सोऽमात्यैः स्थविरैः सार्धं ब्राह्मणैश्च महर्षिभिः ।
बलेन चतुरङ्गेण ययौ मद्रपतेः पुरम् ॥ १-१२२-२ (५३७०)
तमागतमभिश्रुत्य भीष्मं वाहीकपुङ्गवः ।
प्रत्युद्गम्यार्चयित्वा च पुरं प्रावेशयन्नृपः ॥ १-१२२-३ (५३७१)
दत्त्वा तस्यासनं शुभ्रं पाद्यमर्घ्यं तथैव च ।
मधुपर्कं च मद्रेशः पप्रच्छागमनेऽर्थिताम् ॥ १-१२२-४ (५३७२)
तं भीष्मः प्रत्युवाचेदं मद्रराजं कुरूद्वहः ।
आगतं मां विजानीहि कन्यार्थिनमरिन्दम ॥ १-१२२-५ (५३७३)
श्रूयते भवतः साध्वी स्वसा माद्री यशस्विनी ।
तामहं वरयिष्यामि पाण्डोरर्थे यशस्विनीम् ॥ १-१२२-६ (५३७४)
युक्तरूपो हि संबन्धे त्वं नो राजन्वयं तव ।
एतत्संचिन्त्य मद्रेश गृहाणास्मान्यथाविधि ॥ १-१२२-७ (५३७५)
तमेवंवादिनं भीष्मं प्रत्यभाषत मद्रपः ।
न हि मेऽन्यो वरस्त्वत्तः श्रेयानिति मतिर्मम ॥ १-१२२-८ (५३७६)
पूर्वैः प्रवर्तितं किंचित्कुलेऽस्मिन्नृपसत्तमैः ।
साधु वा यदि वाऽसाधु तन्नातिक्रान्तुमुत्सहे ॥ १-१२२-९ (५३७७)
व्यक्तं तद्भवतश्चापि विदितं नात्र संशयः ।
न च युक्तं तथा वक्तुं भवान्देहीति सत्तम ॥ १-१२२-१० (५३७८)
कुलधर्मः स नो वीर प्रमाणं परमं च तत् ।
तेन त्वां न ब्रवीम्येतदसंदिग्धं वचोऽरिहन् ॥ १-१२२-११ (५३७९)
तं भीष्मः प्रत्युवाचेदं मद्रराजं जनाधिपः ।
धर्म एष परो राजन्स्वयमुक्तः स्वयंभुवा ॥ १-१२२-१२ (५३८०)
नात्र कश्चन दोषोऽस्ति पूर्वैर्विधिरयं कृतः ।
विदितेयं च ते शल्य मर्यादा साधुसंमता ॥ १-१२२-१३ (५३८१)
इत्युक्त्वा स महातेजाः शातकुम्भं कृताकृतम् ।
रत्नानि च विचित्राणि शल्यायादात्सहस्रशः ॥ १-१२२-१४ (५३८२)
गजानश्वान्रथांश्चैव वासांस्याभरणानि च ।
मणिमुक्ताप्रवालं च गाङ्गेयो व्यसृजच्छुभम् ॥ १-१२२-१५ (५३८३)
तत्प्रगृह्य धनं सर्वं शल्यः संप्रतीमानसः ।
ददौ तां समलङ्कृत्य स्वसारं कौरवर्षभे ॥ १-१२२-१६ (५३८४)
स तां माद्रीमुपादाय भीष्मः सागरगासुतः ।
आजगाम पुरीं धीमान्प्रविष्टो गजसाह्वयम् ॥ १-१२२-१७ (५३८५)
तत इष्टेऽहनि प्राप्ते मुहूर्ते साधुसंमते ।

गविवाहं कारायामास भीष्मः पाण्डोर्महात्मनः।'
जग्राह विधिवत्पाणिं माद्रयाः पाण्डुर्नराधिपः ॥ १-१२२-१८ (५३८६)
ततो विवाहे निर्वृत्ते स राजा कुरुनन्दनः ।
स्थापयामास तां भार्यां शुभे वेश्मनि भामिनीं ॥१-१२२-१९ (५३८७)
स ताभ्यां व्यचरत्सार्धं भार्याभ्यां राजसत्तमः ।
कुन्त्या माद्रया च राजेन्द्रो यथाकामं यथासुखम् ॥१-१२२-२० (५३८८)
ततः स कौरवो राजा विहृत्य त्रिदशा निशाः ।
जिगीषया महीं पाण्डुर्निरक्रामत्पुरात्प्रभो ॥१-१२२-२१ (५३८९)
स भीष्मप्रमुखान्वृद्धानभिवाद्य प्रणम्य च ।
धृतराष्ट्रं च कौरव्यं तथान्यान्कुरुसत्तमान् ।
आमन्त्र्य प्रययौ राजा तैश्चैवाप्यनुमोजितः ॥ १-१२२-२२ (५३९०)
मङ्गलाचारयुक्ताभिराशीर्भिरभिनन्दितः ।
गजवाजिरथौघेन बलेन महताऽगमत् ॥१-१२२-२३ (५३९१)
स राजा देवगर्भाभो विजिगीषुर्वसुन्धराम् ।
हृष्टपुष्टबलैः प्रायात्पाण्डुः शत्रूननेकशः ॥१-१२२-२४ (५३९२)
पूर्वमागस्कृतो गत्वा दशार्णाः समरे जिताः ।
पाण्डुना नरसिंहेन कौरवाणां यशोभृता ॥१-१२२-२५ (५३९३)
ततः सेनामुपादाय पाण्डुर्नानाविधध्वजाम् ।
प्रभूतहस्त्यश्वयुतां पदातिरथसंकुलाम् ॥१-१२२-२६ (५३९४)
आगस्कारी महीपानां बहूनां बलदर्पितः ।
गोप्ता मगधराष्ट्रस्य दीर्घो राजगृहे हतः ॥१-१२२-२७ (५३९५)
ततः कोशं समादाय वाहनानि च भूरिशः ।
पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः ॥१-१२२-२८ (५३९६)
तथा काशिषु सुह्मेषु पुण्ड्रेषु च नरर्षभ ।
स्वबाहुबलवीर्येण कुरूणामकरोद्यशः ॥१-१२२-२९ (५३९७)
तं शरौघमहाज्वालं शस्त्रार्चिषमरिन्दमम् ।
पाण्डुपावकमासाद्य व्यवह्यन्त नराधिपाः ॥१-१२२-३० (५३९८)
ते ससेनाः ससेनेन विध्वंसितबला नृपाः ।
पाण्डुना वशगाः कृत्वा कुरुकर्मसु योजिताः ॥१-१२२-३१ (५३९९)
तेन ते निर्जिताः सर्वे पृथिव्यां सर्वपार्थिवाः ।
तमेकं मेनिरे शूरं देवेष्विव पुरन्दरम् ॥१-१२२-३२ (५४००)
तं कृताञ्जलयः सर्वे प्रणता वसुधाधिपाः ।
उपाजग्मुर्धनं गृह्य रत्नानि विविधानि च ॥१-१२२-३३ (५४०१)
मणिमुक्ताप्रवालं च सुवर्णं रजतं बहु ।
गोरत्नान्यश्वरत्नानि रथरत्नानि कुञ्जरान् ॥१-१२२-३४ (५४०२)
खरोष्ट्रमहिषांश्चैव यच्च किंचिदजाविकम् ।

कम्लाजिनरत्नानि राङ्कवास्तरणानि च ।
तत्सर्वं प्रतिजग्राह राजा नागपुराधिपः ॥ १-१२२-३५ (५४०३)
तदादाय ययौ पाण्डुः पुनर्मदितवाहनः ।
हर्षयिष्यन्स्वराष्ट्राणि पुरं च गजसाह्वयम् ॥ १-१२२-३६ (५४०४)
शान्तनो राजसिंहस्य भरतस्य च धीमतः ।
प्रनष्टः कीर्तिजः शब्दः पाण्डुना पुनराहृतः ॥ १-१२२-३७ (५४०५)
ये पुरा कुरुराष्ट्राणि जह्रुः कुरुधनानि च ।
ते नागपुरसिंहेन पाण्डुना करदीकृताः ॥ १-१२२-३८ (५४०६)
इत्यभाषन्त राजानो राजामात्याश्च सङ्गताः ।
प्रतीतमनसो हृष्टाः पौरजानपदैः सह ॥ १-१२२-३९ (५४०७)
प्रत्युद्ययुश्च तं प्राप्तं सर्वे भीष्मपुरोगमाः ।
ते नदूरमिवाध्वानं गत्वा नागपुरालयाः ॥ १-१२२-४० (५४०८)
आवृतं ददृशुर्हृष्टा लोकं बहुविधैर्धनैः ।
नानायानसमानीतै रत्नैरुच्चावचैस्तदा ॥ १-१२२-४१ (५४०९)
हस्त्यश्वरथरत्नैश्च गोभिरुष्ट्रैस्तथाऽविभिः ।
नान्तं ददृशुरासाद्य भीष्मेण सह कौरवाः ॥ १-१२२-४२ (५४१०)
सोऽभिवाद्य पितुः पादौ कौसल्यानन्दवर्धनः ।
यथाऽर्हं मानयामास पौरजानपदानपि ॥ १-१२२-४३ (५४११)
प्रमृद्य परराष्ट्राणि कृतार्थं पुनरागतम् ।
पुत्रमाश्लिष्य भीष्मस्तु हर्षादश्रूण्यवर्तयत् ॥ १-१२२-४४ (५४१२)
स तूर्यशतशङ्खानां भेरीणां च महास्वनैः ।
हर्षयन्सर्वशः पौरान्विवेश गजसाह्वयम् ॥ ॥ १-१२२-४५ (५४१३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२२-८ मे वरः मम जामाता ॥
१-१२२-१४ शातकुम्भं काञ्चनम् । कृताकृतं घटितमघटितं च ॥
१-१२२-१५ व्यसृदत् प्रादात् ॥
१-१२२-२१ त्रिदशाः त्रिंशत् ॥
१-१२२-४० नदूरमिव अदूरमिव । जयोत्साहेन मार्गश्रमाभावात् ॥
द्वाविंशत्यधिकशततमोऽध्यायः ॥
१२२ ॥

आदिपर्व - अध्याय १२३
॥ श्रीः ॥

१.१२३. अध्यायः १२३

Mahabharata - Adi Parva - Chapter Topics
सभार्यस्य पाण्डोर्मृगयार्थं वनगमनम् ॥ १ ॥
तत्र मृगरूपस्य मृग्या मैथुनं चरतः किन्दमस्य मुनेर्हननम् ॥ २ ॥
मैथुनकाले त्वं मरिष्यसीति किन्दमेन पाण्डुं प्रति शापः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२३-० (५४१४)
वैशम्पायन उवाच। १-१२३-०क्ष् (७३३)
धृतराष्ट्राभ्यनुज्ञातः स्वबाहुविजितं धनम् ।
भीष्माय सत्यवत्यै च मात्रे चोपजहार सः ॥ १-१२३-१ (५४१५)
विदुराय च वै पाण्डुः प्रेषयामास तद्धनम् ।
सुहृदश्चापि धर्मात्मा धनेन समतर्पयत् ॥ १-१२३-२ (५४१६)
ततः सत्यवतीं भीष्मं कौसल्यां च यशस्विनीम् ।
शुभैः पाण्डुर्जितैरर्थैस्तोषयामास भारत ॥ १-१२३-३ (५४१७)
ननन्द माता कौसल्या तमप्रतिमतेजसम् ।
जयन्तमिव पौलोमी परिष्वज्य नर्षभम् ॥ १-१२३-४ (५४१८)
तस्य वीरस्य विक्रान्तैः सहस्रशतदक्षिणैः ।
अश्वमेधशतैरीजे धृतराष्ट्रो महामखैः ॥ १-१२३-५ (५४१९)
संप्रयुक्तस्तु कुन्त्या च माद्रया च भरतर्षभ ।
जिततन्द्रिस्तदा पाण्डुर्बभूव वनगोचरः ॥ १-१२३-६ (५४२०)
हित्वा प्रासादनिलयं शुभानि शयनानि च ।
अरण्यनित्यः सततं बभूव मृगयापरः ॥ १-१२३-७ (५४२१)
स चरन्दक्षिणं पार्श्वं रम्यं हिमवतो गिरः ।
उवास गिरिपृष्ठेषु महाशालवनेषु च ॥ १-१२३-८ (५४२२)
रराज कुन्त्या माद्रया च पाण्डुः सह वने चरन् ।
करेण्वोरिव मध्यस्थः श्रीमान्पौरन्दरो गजः ॥ १-१२३-९ (५४२३)
भारतं सह भार्याभ्यां खड्गबाणधनुर्धरम् ।
विचित्रकवचं वीरं परमास्त्रविदं नृपम् ।
देवोऽयमित्यमन्यन्त चरन्तं वनवासिनः ॥ १-१२३-१० (५४२४)
तस्य कामांश्च भोगांश्च नरा नित्यमतन्द्रिताः ।
उपजह्रुर्वनान्तेषु धृतराष्ट्रेण चोदिताः ॥ १-१२३-११ (५४२५)
तदासाद्य महारण्यं मृगव्यालनिषेवितम् ।
तत्र मैथुनकालस्थं ददर्श मृगयूथपम् ॥ १-१२३-१२ (५४२६)

ततस्तं च मृगीं चैव रुक्मपुङ्खैः सुपत्रिभिः ।
निर्बिभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिराशुगैः ॥ १-१२३-१३ (५४२७)
स च राजन्महातेजा ऋषिपुत्रस्तपोधनः ।
भार्यया सह तेजस्वी मृगरूपेण सङ्गतः ॥ १-१२३-१४ (५४२८)
स संयुक्तस्तया मृग्या मानुषीं वाचमीरयन् ।
क्षणेन पतितो भूमौ विललापातुरो मृगः ॥ १-१२३-१५ (५४२९)
मृग उवाच। १-१२३-१६क्ष् (७३४)
काममन्युवशं प्राप्ता बुद्ध्यन्तरगता अपि ।
वर्जयन्ति नृशंसानि पापेष्वपि रता नराः ॥ १-१२३-१६ (५४३०)
न विधिं ग्रसते प्रज्ञा प्रज्ञां तु ग्रसते विधिः ।
विधिपर्यागतानर्थान्प्रज्ञावान्प्रतिपद्यते ॥ १-१२३-१७ (५४३१)
शश्वद्धर्मात्मनां मुख्ये कुले जातस्य भारत ।
कामलोभाभिभूतस्य कथं ते चलिता मतिः ॥ १-१२३-१८ (५४३२)
पाण्डुरुवाच। १-१२३-१९क्ष् (७३५)
शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता ।
राज्ञां मृग न मां मोहात्त्वं गर्हयितुमर्हसि ॥ १-१२३-१९ (५४३३)
अच्छद्मनाऽमायया च मृगाणां वध इष्यते ।
स एव धर्मो राज्ञां तु तद्वि त्वं किं नु गर्हसे ॥ १-१२३-२० (५४३४)
अगस्त्यः सत्रमासीनश्चकार मृगयामृषिः ।
आरण्यान्सर्वदैवत्यान्मृगान्प्रोक्ष्य महावने ॥ १-१२३-२१ (५४३५)
प्रमाणदृष्टधर्मेण कथमस्मान्विगर्हसे ।
अगस्त्यस्याभिचारेण युष्माकं विहितो वधः ॥ १-१२३-२२ (५४३६)
न रिपून्वै समुद्दिश्य विमुञ्चन्ति नराः शरान् ।
रन्ध्र एषां विशेषेण वधकालः प्रशस्यते ॥ १-१२३-२३ (५४३७)
प्रमत्तमप्रमत्तं वा विवृतं घ्नन्ति चौजसा ।
उपायैर्विविधैस्तीक्ष्णैः कस्मान्मृग विगर्हसे ॥ १-१२३-२४ (५४३८)
मृग उवाच। १-१२३-२५क्ष् (७३६)
नाहं घ्नन्तं मृगन्राजन्विगर्हे चात्मकारणात् ।
मैथुनं तु प्रतीक्ष्यं मे त्वयेहाद्यानृशंस्यतः ॥ १-१२३-२५ (५४३९)
सर्वभूतहिते काले सर्वभूतेप्सिते तथा ।
को हि विद्वान्मृगं हन्याच्चरन्तं मैथुनं वने ॥ १-१२३-२६ (५४४०)
अस्यां मृग्यां च राजेन्द्र हर्षान्मैथुनमाचरम् ।
पुरुषार्थफलं कर्तुं तत्त्वया विफलीकृतम् ॥ १-१२३-२७ (५४४१)
पौरवाणां महाराज तेषामक्लिष्टकर्मणाम् ।
वंशे जातस्य कौरव्य नानुरूपमिदं तव ॥ १-१२३-२८ (५४४२)
नृशंसं कर्म सुमहत्सर्वलोकविगर्हितम् ।

अस्वर्ग्यमयशस्यं चाप्यधर्मिष्ठं च भारत ॥ १-१२३-२९ (५४४३)
स्त्रीभोगानां विशेषज्ञः शास्त्रधर्मार्थतत्त्ववित् ।
नार्हस्त्वं सुरसङ्काश कर्तुमस्वर्ग्यमीदृशम् ॥ १-१२३-३० (५४४४)
त्वया नृशंसकर्तारः पापाचाराश्च मानवाः ।
निग्राह्याः पार्थिवश्रेष्ठ त्रिवर्गपरिवर्जिताः ॥ १-१२३-३१ (५४४५)
किं कृतं ते नरश्रेष्ठ मामिहानागसं घ्नतः ।
मुनिं मूलफलाहारं मृगवेषधरं नृप ॥ १-१२३-३२ (५४४६)
वसमानमरण्येषु नित्यं शमपरायणम् ।
त्वयाऽहं हिंसितो यस्मात्तस्मात्त्वामप्यनागसः ॥ १-१२३-३३ (५४४७)
द्वयोर्नृशंसकर्तारमवशं काममोहितम् ।
जीवितान्तकरो भावो मैथुने समुपैष्यति ॥ १-१२३-३४ (५४४८)
अहं हि किंदमो नाम तपसा भावितो मुनिः ।
व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरम् ॥ १-१२३-३५ (५४४९)
मृगो भत्वा मृगैः सार्धं चरामि गहने वने ।
न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः ॥ १-१२३-३६ (५४५०)
मृगरूपधरं हत्वा मामेवं काममोहितम् ।
अस्य तु त्वं फलं मूढ प्राप्स्यसीदृशमेव हि ॥ १-१२३-३७ (५४५१)
प्रियया सह संवासं प्राप्य कामविमोहितः ।
त्वमप्यस्यामवस्थायां प्रेतलोकं गमिष्यसि ॥ १-१२३-३८ (५४५२)
अन्तकाले हि संवासं यया गन्तासि कान्तया ।
प्रेतराजपुरं प्राप्तं सर्वभूतदुरत्ययम् ।
भक्त्या मतिमतां श्रेष्ठ सैव त्वाऽनुगमिष्यति ॥ १-१२३-३९ (५४५३)
वर्तमानः सुखे दुःखं यथाऽहं प्रापितस्त्वया ।
तथा त्वां च सुखं प्राप्तं दुःखमभ्यागमिष्यति ॥ १-१२३-४० (५४५४)
वैशम्पायन उवाच। १-१२३-४१क्ष् (७३७)
एवमुक्त्वा सुदुःखार्तो जीवितात्स व्यमुच्यत ।
मृगः पाण्डुश्च दुःखार्तः क्षणेन समपद्यत ॥ ॥ १-१२३-४१ (५४५५)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२३-२३ रन्ध्रे विशस्त्रत्वव्यसनाक्रान्तत्वादिसमये शरान्न विमुञ्चन्तीति संबन्धः । किंत्वेषां शत्रूणां वधकालः सर्वलोकप्रसिद्धः सङ्ग्राम आभिमुख्यादिमान्स एव प्रशश्यतेऽन्यो निन्द्यत इत्यर्थः ॥

१-१२३-२४ प्रमत्तमसावधानम् ॥
१-१२३-३२ ते त्वया ॥
१-१२३-३४ द्वयोः स्त्रीपुंसयोर्नृशंसं निन्द्यं
मैथुनासक्तयोर्वधस्तस्य कर्तारम् ॥
१-१२३-३९ प्राप्तं त्वा त्वाम् ॥
त्रयोविंशत्यधिकशततमोऽध्यायः ॥
१२३ ॥

आदिपर्व - अध्याय १२४
॥ श्रीः ॥
१.१२४. अध्यायः १२४

Mahabharata - Adi Parva - Chapter Topics
किन्दमशापात्खिन्नस्य पाण्डोः पत्नीभ्यां वने वासः ॥ १ ॥
पाण्डोः शतशृङ्गे तपश्चरणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२४-० (५४५६)
वैशम्पायन उवाच। १-१२४-०क्ष् (७३८)
तं व्यतीतमुपक्रम्य राजा स्वमिव बान्धवम् ।
सभार्यः शोकदुःखार्तः पर्यदेवयदातुरः ॥ १-१२४-१ (५४५७)
पाण्डुरुवाच। १-१२४-२क्ष् (७३९)
सतामपि कुले जाताः कर्मणा बत दुर्गतिम् ।
प्राप्नुवन्त्यकृतात्मानः कामजालविमोहिताः ॥ १-१२४-२ (५४५८)
शश्वद्धर्मात्मना जातो बाल एव पिता मम ।
जीवितान्तमनुप्राप्तः कामात्मैवेति नः श्रुतम् ॥ १-१२४-३ (५४५९)
तस्य कामात्मनः क्षेत्रे राज्ञः संयतवागृषिः ।
कृष्णद्वैपायनः साक्षाद्भगवान्मामजीजनत् ॥ १-१२४-४ (५४६०)
तस्याद्य व्यसने बुद्धिः संजातेयं ममाधमा ।
त्यक्तस्य देवैरनयान्मृगयां परिधावतः ॥ १-१२४-५ (५४६१)
मोक्षमेव व्यवस्यामि बन्धो हि व्यसनं महत् ।
सुवृत्तिमनुवर्तिष्ये तामहं पितुरव्ययाम् ॥ १-१२४-६ (५४६२)
अतीव तपसात्मानं योजयिष्याम्यसंशयम् ।
तस्मादेकाहमेकाहमेकैकस्मिन्वनस्पतौ ॥ १-१२४-७ (५४६३)
चरन्भैक्षं मुनिर्मुण्डश्चरिष्याम्याश्रमानिमान् ।
पांसुना समवच्छन्नः शून्यागारकृतालयः ॥ १-१२४-८ (५४६४)

वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः ।
न शोचन्न प्रहृष्यंश्च तुल्यनिन्दात्मसंस्तुतिः ॥ १-१२४-९ (५४६५)
निराशीर्निर्नमस्कारो निर्द्वन्द्वो निष्परिग्रहः ।
न चाप्यवहसन्कंचिन्न कुर्वन्भ्रुकुटीं क्वचित् ॥ १-१२४-१० (५४६६)
प्रसन्नवदनो नित्यं सर्वभूतहिते रतः ।
जङ्गमाजङ्गमं सर्वमविहिंसंश्चतुर्विधम् ॥ १-१२४-११ (५४६७)
स्वासु प्रजास्विव सदा समः प्राणभृतः प्रति ।
एककालं चरन्भैक्षं कुलानि दश पञ्च च ॥ १-१२४-१२ (५४६८)
असंभवे वा भैक्षस्य चरन्ननशनान्यपि ।
अल्पमल्पं च भुञ्जानः पूर्वालाभे न जातुचित् ॥ १-१२४-१३ (५४६९)
अन्यान्यपि चरँल्लोभादलाभे सप्त पूरयन् ।
अलाभे यदि वा लाभे समदर्शी महातपाः ॥ १-१२४-१४ (५४७०)
वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ।
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः ॥ १-१२४-१५ (५४७१)
न जिजीविषुवत्किंचिन्न मुमूर्षुवदाचरन् ।
जीवितं मरणं चैव नाभिन्दन्न च द्विषन् ॥ १-१२४-१६ (५४७२)
याः काश्चिज्जीवता शक्याः कर्तुमभ्युदयक्रियाः ।
ताः सर्वाः समतिक्रम्य निमेषादिव्यवस्थितः ॥ १-१२४-१७ (५४७३)
तासु चाप्यनवस्थासु त्यक्तसर्वेन्द्रियक्रियः ।
संपरित्यक्तधर्मार्थः सुनिर्णिक्तात्मकल्मषः ॥ १-१२४-१८ (५४७४)
निर्मुक्तः सर्वपापेभ्यो व्यतीतः सर्ववागुराः ।
न वशे कस्यचित्तिष्ठन्सधर्मा मातरिश्वनः ॥ १-१२४-१९ (५४७५)
एतया सततं वृत्त्या चरन्नेवंप्रकारया ।
देहं संस्थापयिष्यामि निर्भयं मार्गमास्थितः ॥ १-१२४-२० (५४७६)
नाहं सुकृपणे मार्गे स्ववीर्यक्षयशोचिते ।
स्वधर्मात्सततापेते चरेयं वीर्यवर्जितः ॥ १-१२४-२१ (५४७७)
सत्कृतोऽसत्कृतो वाऽपि योऽन्यां कृपणचक्षुषा ।
उपैति वृत्तिं कामात्मा स शुनां वर्तते पथि ॥ १-१२४-२२ (५४७८)
वैशम्पायन उवाच। १-१२४-२३क्ष् (७४०)
एवमुक्त्वा सुदुःखार्तो निःश्वासपरमो नृपः ।
अवेक्षमाणः कुन्तीं च मान्द्रीं च समभाषत ॥ १-१२४-२३ (५४७९)
कौसल्या विदुरः क्षत्ता राजा च सह बन्धुभिः ।
आर्या सत्यवती भीष्मस्ते च राजपुरोहिताः ॥ १-१२४-२४ (५४८०)
ब्राह्मणाश्च महात्मानः सोमपाः संशितव्रताः ।
पौरवृद्धाश्च ये तत्र निवसन्त्यस्मदाश्रयाः ।
प्रसाद्य सर्वे वक्तव्याः पाण्डुः प्रव्राजितो वने ॥ १-१२४-२५ (५४८१)

निशम्य वचनं भर्तुस्त्यागधर्मकृतात्मनः ।
तत्समं वचनं कुन्ती माद्री च समभाषताम् ॥ १-१२४-२६ (५४८२)
अन्येऽपि ह्याश्रमाः सन्ति ये शक्या भरतर्षभ ।
ग्आवाभ्यां सह वस्तुं वै धर्ममाश्रित्य चिन्त्यताम्।'
आवाभ्यां धर्मपत्नीभ्यां सह तप्तुं तपो महत् ॥ १-१२४-२७ (५४८३)
शरीरस्यापि मोक्षाय धर्मं प्राप्य महाफलम् ।
त्वमेव भविता भर्ता स्वर्गस्यापि न संशयः ॥ १-१२४-२८ (५४८४)
प्रणिधायेन्द्रियग्रामं भर्तृलोकपरायणे ।
त्यक्त्वा कामसुखे ह्यावां तप्स्यवो विपुलं तपः ॥ १-१२४-२९ (५४८५)
यदि चावां महाप्राज्ञ त्यक्ष्यसि त्वं विशांपते ।
अद्यैवावां प्रहास्यावो जीवितं नात्र संशयः ॥ १-१२४-३० (५४८६)
पाण्डुरुवाच। १-१२४-३१क्ष् (७४१)
यदि व्यवसितं ह्येतद्युवयोर्धर्मसंहितम् ।
स्ववृत्तिमनुवर्तिष्ये तामहं पितुरव्ययाम् ॥ १-१२४-३१ (५४८७)
त्यक्त्वा ग्राम्यसुखाहारं तप्यमानो महत्तपः ।
वल्कली फलमूलाशी चरिष्यामि महावने ॥ १-१२४-३२ (५४८८)
अग्नौ जुह्वन्नुभौ कालावुभौ कालावुपस्पृशन् ।
कृशः परिमिताहारश्चीरचर्मजटाधरः ॥ १-१२४-३३ (५४८९)
शीतवातातपसहः क्षुत्पिपासानवेक्षकः ।
तपसा दुश्चरेणेदं शरीरमुपशोषयन् ॥ १-१२४-३४ (५४९०)
एकान्तशीली विमृशन्पक्वापक्वेन वर्तयन् ।
पितृन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ॥ १-१२४-३५ (५४९१)
वानप्रस्थजनस्यापि दर्शनं कुलवासिनः ।
नाप्रियाण्याचरिष्यामि किं पुनर्ग्रामवासिनाम् ॥ १-१२४-३६ (५४९२)
एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिम् ।
काङ्क्षमाणोऽहमास्थास्ये देहस्यास्याऽऽसमापनात् ॥ १-१२४-३७ (५४९३)
वैशम्पायन उवाच। १-१२४-३८क्ष् (७४२)
इत्येवमुक्त्वा भार्ये ते राजा कौरवनन्दनः ।
ततश्चूडामणिं निष्कमङ्गदे कुण्डलानि च ॥ १-१२४-३८ (५४९४)
वासांसि च महार्हाणि स्त्रीणामाभरणानि च ।
ग्वाहनानि च मुख्यानि शस्त्राणि कवचानि च ॥ १-१२४-३९ (५४९५)
हेमभाण्डानि दिव्यानि पर्यङ्कास्तरणानि च ।
मणिमुक्ताप्रवालानि रत्नानि विविधानि च ॥' १-१२४-४० (५४९६)
प्रदाय सर्वं विप्रेभ्यः पाण्डुर्भृत्यानभाषत ।
गत्वा नागपुरं वाच्यं पाण्डुः प्रव्राजितो वने ।
अर्थं कामं सुखं चैव रतिं च परमात्मिकाम् ॥ १-१२४-४१ (५४९७)

प्रतस्थे सर्वमुत्सृज्य सभार्यः कुरुनन्दनः ।
ततस्तस्यानुयातारस्ते चैव परिचारकाः ॥१-१२४-४२ (५४९८)
श्रुत्वा भरतसिंहस्य विविधाः करुणा गिरः ।
भममार्तस्वरं कृत्वा हाहेति परिचुक्रुशुः ॥१-१२४-४३ (५४९९)
उष्णमश्रु विमुञ्चन्तस्तं विहाय महीपतिम् ।
ययुर्नागपुरं तूर्णं सर्वमादाय तद्धनम् ॥१-१२४-४४ (५५००)
ते गत्वा नगरं राज्ञो यथावृत्तं महात्मनः ।
कथयांचक्रिरे राज्ञस्तद्धनं विविधं ददुः ॥१-१२४-४५ (५५०१)
श्रुत्वा तेभ्यस्ततः सर्वं यथावृत्तं महावने ।
धृतराष्ट्रो नरश्रेष्ठः पाण्डुमेवान्वशोचत ॥१-१२४-४६ (५५०२)
न शय्यासनभोगेषु रतिं विन्दति कर्हिचित् ।
भ्रातृशोकसमाविष्टस्तमेवार्थं विचिन्तयन् ॥१-१२४-४७ (५५०३)
राजपुत्रस्तु कौरव्य पाण्डुर्मूलफलाशनः ।
जगाम सह पत्नीभ्यां ततो नागशतं गिरिम् ॥१-१२४-४८ (५५०४)
स चैत्ररथमासाद्य कालकूटमतीत्य च ।
हिमवन्तमतिक्रम्य प्रययौ गन्धमादनम् ॥१-१२४-४९ (५५०५)
रक्ष्यमाणो महाभूतैः सिद्धैश्च परमर्षिभिः ।
उवास स महाराज समेषु विषमेषु च ॥१-१२४-५० (५५०६)
इन्द्रद्युम्नसरः प्राप्य हंसकूटमतीत्य च ।
शतशृङ्गे महाराज तापसः समतप्यत ॥ ॥१-१२४-५१ (५५०७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥१२४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२४-१ व्यतीतं मारितम् ॥
१-१२४-५ देवैस्त्यक्तस्य अपुत्रतया स्वर्गमनानर्हत्वात् ॥
१-१२४-६ मोक्षं मोक्षमार्गं व्यवस्यामि निश्चिनोमि श्रेयस्करत्वेन ।तत्र हि पुत्राद्यनपेक्षा दृष्टा।इष्टमेवैतज्जातमित्याह बन्धो हीति।बन्धः पुत्रैषणादिः।सुवृत्तिं ब्रह्मचर्याख्यां वृत्तिम्।पितुर्व्यासस्य ॥
१-१२४-१० निराशीर्निर्नमस्कारः ।आशिषं नमस्कारं वा नेच्छामीत्यर्थः।निर्द्वन्द्वः सुखदुःखादिहीनः।निष्परिग्रहः कन्थापादुकादिहीनः ॥
१-१२४-११ चतुर्विधं जरायुजादिकम् ॥
१-१२४-१२ कुलानि गृहाणि ॥

१-१२४-१५ वास्या वास्येन काष्ठतक्षणेन ॥
१-१२४-१७ अभ्युदयक्रियाः इष्टसाधनक्रियाः । निमेषादिव्यवस्थितः जीवनसाधनकर्मसु व्यवस्थितः ॥
१-१२४-१८ अनवस्थासु प्रवाहरूपासु तासु जीवनसाधनक्रियासु ॥
१-१२४-२० संस्थापयिष्यामि नाशयिष्यामि । निर्भयं मार्गं संसारभयरहितम् ॥
१-१२४-२५ प्रव्राजितः संन्यासं प्राप्तः ॥
१-१२४-२६ त्यागधर्मः संन्यासः ॥
१-१२४-३५ विमृशन् हिंसादिदोषम् ॥
१-१२४-३८ निष्कं ग्रैवेयकम् ॥
चतुर्विंशत्यधिकशततमोऽध्यायः ॥
१२४ ॥

आदिपर्व - अध्याय १२५
॥ श्रीः ॥
१.१२५. अध्यायः १२५

Mahabharata - Adi Parva - Chapter Topics
ब्रह्मलोकं जिगमिषोः पाण्डोः तव पुत्रा भविष्यन्तीत्युक्त्वा ऋषिभिः प्रतिनिवर्तनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२५-० (५५०८)
वैशम्पायन उवाच। १-१२५-०क्ष् (७४३)
तत्रापि तपसि श्रेष्ठे वर्तमानः स वीर्यवान् ।
सिद्धचारणसङ्घानां बभूव प्रियदर्शनः ॥ १-१२५-१ (५५०९)
सुश्रूषुरनहंवादी संयतात्मा जितेन्द्रियः ।
स्वर्गं गन्तुं पराक्रान्तः स्वेन वीर्येण भारत ॥ १-१२५-२ (५५१०)
केषांचिदभवद्भ्राता केषांचिदभवत्सखा ।
ऋषयस्त्वपरे चैनं पुत्रवत्पर्यपालयन् ॥ १-१२५-३ (५५११)
स तु कालेन महता प्राप्य निष्कल्मषं तपः ।
ब्रह्मर्षिसदृशः पाण्डुर्बभूव भरतर्षभ ॥ १-१२५-४ (५५१२)
अमावास्यां तु सहिता ऋषयः संशितव्रताः ।
ब्रह्माणं द्रष्टुकामास्ते संप्रतस्थुर्महर्षयः ॥ १-१२५-५ (५५१३)
संप्रयातानृषीन्दृष्ट्वा पाण्डुर्वचनमब्रवीत् ।
भवन्तः क्व गमिष्यन्ति ब्रूत मे वदतां वराः ॥ १-१२५-६ (५५१४)

ऋषय ऊचुः।१-१२५-७क्ष् (७४४)
समावायो महानद्य ब्रह्मलोके महात्मनाम् ।
देवानां च ऋषीणां च पितॄणां च महात्मनाम् ।
वयं तत्र गमिष्यामो द्रष्टुकामाः स्वयंभुवम् ॥ १-१२५-७ (५५१५)
वैशम्पायन उवाच।१-१२५-८क्ष् (७४५)
पाण्डुरुत्थाय सहसा गन्तुकामो महर्षिभिः ।
स्वर्गपारं तितीर्षुः स शतशृङ्गादुदङ्मुखः ॥१-१२५-८ (५५१६)
प्रतस्थे सह पत्नीभ्यामब्रुवंस्तं च तापसाः ।
उपर्युपरि गच्छन्तः शैलराजमुदङ्मुखाः ॥१-१२५-९ (५५१७)
दृष्टवन्तो गिरौ रम्ये दुर्गान्देशान्बहून्वयम् ।
विमानशतसंबाधां गीतस्वरनिनादिताम् ॥१-१२५-१० (५५१८)
आक्रीडभूमिं देवानां गन्धर्वाप्सरसां तथा ।
उद्यानानि कुबेरस्य समानि विषमाणि च ॥१-१२५-११ (५५१९)
महानदीनितम्बांश्च गहनान्गिरिगह्वरान् ।
सन्ति नित्यहिमा देशा निर्वृक्षमृगपक्षिणः ॥१-१२५-१२ (५५२०)
सन्ति क्वचिन्महादर्यो दुर्गाः काश्चिद्दुरासदाः ।
नातिक्रामेत पक्षी यान्कुत एवेतरे मृगाः ॥१-१२५-१३ (५५२१)
वायुरेको हि यात्यत्र सिद्धाश्च परमर्षयः ।
गच्छन्त्यौ शैलराजेऽस्मिन्राजपुत्र्यौ कथं न्विमे ॥१-१२५-१४ (५५२२)
न सीदेतामदुःखार्हे मा गमो भरतर्षभ। १-१२५-१५ (५५२३)
पाण्डुरुवाच ।
अप्रजस्य महाभागा न द्वारं परिचक्षते ॥ १-१२५-१५क्ष् (७४६)
स्वर्गे तेनाभितप्तोऽहमप्रजस्तु ब्रवीमि वः ।
सोऽहमुग्रेण तपसा सभार्यस्त्यक्तजीवितः ॥१-१२५-१६ (५५२४)
अनपत्योऽपि विन्देयं स्वर्गमुग्रेण कर्मणा। १-१२५-१७ (५५२५)
ऋषय ऊचुः ।
अस्ति वै तव धर्मात्मन्विद्म देवोपम शुभम् ॥ १-१२५-१७क्ष् (७४७)
अपत्यमनघं राजन्वयं दिव्येन चक्षुषा ।
दैवोद्दिष्टं नरव्याघ्र कर्मणेहोपपादय ॥१-१२५-१८ (५५२६)
अक्लिष्टं फलमव्यग्रो विन्दते बुद्धिमान्नरः ।
तस्मिन्दृष्टे फले राजन्प्रयत्नं कर्तुमर्हसि ॥१-१२५-१९ (५५२७)
अपत्यं गुणसंपन्नं लब्धा प्रीतिकरं ह्यसि। १-१२५-२० (५५२८)
वैशम्पायन उवाच ।
तच्छ्रुत्वा तापसवचः पाण्डुस्चिन्तापरोऽभवत् ॥ १-१२५-२०क्ष् (७४८)
आत्मनो मृगशापेन जानन्नुपहतां क्रियाम् ॥ ॥ १-१२५-२१ (५५२९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि संभवपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२५-५ अमावास्यां प्राप्य ॥
१-१२५-१० विमानशतेन संबाधं संकटं यस्यां सा ॥
१-१२५-१९ अव्यग्रो विन्दतेऽतो व्यग्रो माभूरित्यर्थः ॥
१-१२५-२० लभते इति लब्धा तादृशोऽसि लप्स्यसीत्यर्थः ॥
पञ्चविंशत्यधिकशततमोऽध्यायः ॥
१२५ ॥

आदिपर्व - अध्याय १२६
॥ श्रीः ॥
१.१२६. अध्यायः १२६

Mahabharata - Adi Parva - Chapter Topics
विदुरस्य विवाहः पुत्रोत्पत्तिश्च ॥ १ ॥
व्यासस्य वरेण गान्धार्यां धृतराष्ट्राद्गर्भोत्पत्तिः ॥ २ ॥
पाण्डोः पुत्रोत्पत्तौ चिन्ता ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२६-० (५५३०)
वैशम्पायन उवाच। १-१२६-०क्ष् (७४९)
अथ पारसवीं कन्यां देवकस्य महीपतेः ।
रूपयौवनसंपन्नां स सुश्रावापगासुतः ॥ १-१२६-१ (५५३१)
ततस्तु वरयित्वा तामानीय भरतर्षभः ।
विवाहं कारयामास विदुरस्य महामतेः ॥ १-१२६-२ (५५३२)
तस्यां चोत्पादयामास विदुरः कुरुनन्दन ।
पुत्रान्विनयसंपन्नानात्मनः सदृशान्गुणैः ॥ १-१२६-३ (५५३३)
ततः पुत्रशतं जज्ञे गान्धार्यां जनमेजय ।
धृतराष्ट्रस्य वैश्यायामेकश्चापि शतात्परः ॥ १-१२६-४ (५५३४)
पाण्डोः कुन्त्यां च माद्र्यां च पुत्राः पञ्च महारथाः ।
देवेभ्यः समपद्यन्त सन्तानाय कुलस्य वै ॥ १-१२६-५ (५५३५)
जनमेजय उवाच। १-१२६-६क्ष् (७५०)
कथं पुत्रशतं जज्ञे गान्धार्यां द्विजसत्तम ।
कियता चैव कालेन तेषामायुश्च किं परम् ॥ १-१२६-६ (५५३६)

कथं चैकः स वैश्यायां धृतराष्ट्रसुतोऽभवत् ।
कथं च सदृशीं भार्यां गान्धारीं धर्मचारिणीम् ॥ १-१२६-७ (५५३७)
आनुकूल्ये वर्तमानां धृतराष्ट्रोऽत्यवर्तत ।
कथं च शप्तस्य सतः पाण्डोस्तेन महात्मना ॥ १-१२६-८ (५५३८)
समुत्पन्ना दैवतेभ्यः पुत्राः पञ्च महारथाः ।
एतद्विद्वन्यथान्यायं विस्तरेण तपोधन ॥ १-१२६-९ (५५३९)
कथयस्व न मे तृप्तिः कथ्यमानेषु बन्धुषु। १-१२६-१० (५५४०)
वैशम्पायन उवाच ।
ऋषिं बुभुक्षितं श्रान्तं द्वैपायनमुपस्थितम् ॥ १-१२६-१०क्ष् (७५१)
तोषयामास गान्धारी व्यासस्तस्यै वरं ददौ ।
सा वव्रे सदृशं भर्तुः पुत्राणां शतमात्मनः ॥ १-१२६-११ (५५४१)
ततः कालेन सा गर्भमगृह्णाज्ज्ञानचक्षुषः ॥ १-१२६-१२ (५५४२)
गान्धार्यामाहिते गर्भे पाण्डुरम्बालिकासुतः ।
अगच्छत्परमं दुःखमपत्यार्थमरिन्दम ॥ १-१२६-१३ (५५४३)
गर्भिण्यामथ गान्धार्यां पाण्डुः परमदुःखितः ।
मृगाभिशापादात्मानं शोचन्नुपरतक्रियः ॥ १-१२६-१४ (५५४४)
स गत्वा तपसा सिद्धिं विश्वामित्रो यथा भुवि ।
देहान्यासे कृतमना इदं वचनमब्रवीत् ॥ १-१२६-१५ (५५४५)
पाण्डुरुवाच। १-१२६-१६क्ष् (७५२)
चतुर्भिर्ऋणवानित्थं जायते मनुजो भुवि ।
पितृदेवमनुष्याणामृषीणामथ भामिनि ॥ १-१२६-१६ (५५४६)
एतेभ्यस्तु यथाकालं यो न मुच्येत धर्मवित् ।
न तस्य लोकाः सन्तीति तता लोकविदो विदुः ॥ १-१२६-१७ (५५४७)
यज्ञेन देवान्प्रीणाति स्वाध्यायात्तपसा ऋषीन् ।
पुत्रैः श्राद्धैरपि पितॄनानृशंस्येन मानवान् ॥ १-१२६-१८ (५५४८)
ऋषिदेवमनुष्याणामृणान्मुक्तोऽस्मि धर्मतः ।
पितॄणां तु न मुक्तोऽस्मि तच्च तेभ्यो विशिष्यते ॥ १-१२६-१९ (५५४९)
देहनाशे भवेन्नाशः पितॄणामेष निश्चयः ।
इतरेषां त्रयाणां तु नाशे ह्यात्मा विनश्यति ॥ १-१२६-२० (५५५०)
इह तस्मात्प्रजालाभे प्रयतन्ते द्विजोत्तमाः ।
यथैवाहं पितुः क्षेत्रे सृष्टस्तेन महात्मना ॥ १-१२६-२१ (५५५१)
तथैवास्मिन्मम क्षेत्रे कथं सृज्येत वै प्रजा। १-१२६-२२ (५५५२)
वैशम्पायन उवाच ।
स समानीय कुन्तीं च माद्रीं च भरतर्षभः ॥ १-१२६-२२क्ष् (७५३)
आचष्ट पुत्रलाभस्य व्युष्टिं सर्वक्रियाधिकाम् ।
उत्तमादवराः पुंसः काङ्क्षन्तो पुत्रमापदि ॥ १-१२६-२३ (५५५३)

अपत्यं धर्मफलदं श्रेष्ठादिच्छन्ति साधवः ।
अनुनीय तु ते सम्यङ्महाब्राह्मणसंसदि ।
ब्राह्मणं गुणवन्तं हि चिन्तयामास धर्मवित् ॥ १-१२६-२४ (५५५४)
सोऽब्रवीद्विजने कुन्तीं धर्मपत्नीं यशस्विनीम् ।
अपत्योत्पादने यत्नमापदि त्वं समर्थय ॥ १-१२६-२५ (५५५५)
अपत्यं नाम लोकेषु प्रतिष्ठा धर्मसंहिता ।
इति कुन्ति विदुर्धीराः शाश्वतं धर्मवादिनः ॥ १-१२६-२६ (५५५६)
इष्टं दत्तं तपस्तप्तं नियमश्च स्वनुष्ठितः ।
सर्वमेवानपत्यस्य न पावनमिहोच्यते ॥ १-१२६-२७ (५५५७)
सोऽहमेवं विदित्वैतत्प्रपश्यामि शुचिस्मिते ।
अनपत्यः शुभाँल्लोकान्नप्राप्स्यामीति चिन्तयन् ॥ १-१२६-२८ (५५५८)
'अनपत्यो हि मरणं कामये नैव जीवितम् ।'
मृगाभिशापं जानासि विजने मम केवलम् ।
नृशंसकर्मणा कृत्स्नं यथा ह्युपहतं तथा ॥ १-१२६-२९ (५५५९)
इमे वै बन्धुदायादाः षट् पुत्रा धर्मदर्शने ।
षडेवाबन्धुदायादाः पुत्रास्ताञ्छृणु मे पृथे ॥ १-१२६-३० (५५६०)
स्वयंजातः प्रणीतश्च परिक्रीतश्च यः सुतः ।
पौनर्भवश्च कानीनः स्वैरिण्यां यश्च जायते ॥ १-१२६-३१ (५५६१)
दत्तः क्रीतः कृत्रिमश्च उपगच्छेत्स्वयं च यः ।
सहोढो ज्ञातिरेताश्च हीनयोनिधृतश्च यः ॥ १-१२६-३२ (५५६२)
पूर्वपूर्वतमाभावं मत्वा लिप्सेत वै सुतम् ।
उत्तमाद्देवरात्पुंसः काङ्क्षन्ते पुत्रमापदि ॥ १-१२६-३३ (५५६३)
अपत्यं धर्मफलदं श्रेष्ठं विन्दन्ति मानवाः ।
आत्मशुक्रादपि पृथे मनुः स्वायंभुवोऽब्रवीत् ॥ १-१२६-३४ (५५६४)
तस्मात्प्रहेष्याम्यद्य त्वां हीनः प्रजननात्स्वयम् ॥ १-१२६-३५ (५५६५)
सदृशाच्छ्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनि ।
शृणु कुन्ति कथामेतां शारदण्डायिनीं प्रति ॥ १-१२६-३६ (५५६६)
'या हि ते भगिनी साध्वी श्रुतसेना यशस्विनी ।
अवाह तां तु कैकेयः शारदाण्डायनिर्महान् ॥' १-१२६-३७ (५५६७)
सा वीरपत्नी गुरुणा नियुक्ता पुत्रजन्मनि ।
पुष्पेण प्रयता स्नाता निशि कुन्ति चतुष्पथे ॥ १-१२६-३८ (५५६८)
वरयित्वा द्विजं सिद्धं हुत्वा पुंसवनेऽनलम् ।
कर्मण्यवसिते तस्मिन्सा तेनैव सहावसत् ॥ १-१२६-३९ (५५६९)
तत्र त्रीञ्जनयामास दुर्जयादीन्महारथान् ।
तथा त्वमपि कल्याणि ब्राह्मणात्तपसाधिकात् ।
मन्नियोगाद्यत क्षिप्रमपत्योत्पादनं प्रति ॥ ॥ १-१२६-४० (५५७०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१२६-२६ धर्मसंहिता धर्ममयी ॥
१-१२६-३० धर्मदर्शने धर्मशास्त्रे उक्ता इति शेषः
। बन्धुदायादारिक्थहराः। अबन्धुदायादास्तदन्ये ॥
१-१२६-३५ प्रहेष्यामि गतिवृद्धिकर्मणो हिनोते रूपम् । अद्येति
क्षिप्रवचनसंयोगाल्लृट्। त्वां शरणं गतोऽस्मि वर्धयामि वेति
चार्थः ॥
१-१२६-३६ विद्धि लभस्व । शारदण्डायनेर्भार्याम् ॥
१-१२६-३८ गुरुणा भर्त्रा । पुष्पेण आर्तवेन निमित्तेन स्नाता ॥
१-१२६-४० यत यतस्व ॥
षड्विंशत्यधिकशततमोऽध्यायः ॥
१२६ ॥

आदिपर्व - अध्याय १२७
॥ श्रीः ॥
१.१२७. अध्यायः १२७

Mahabharata - Adi Parva - Chapter Topics
कुन्त्या पाण्डुं प्रति व्युषिताश्वकथाकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२७-० (५५७१)
वैशम्पायन उवाच। १-१२७-०क्ष् (७५४)
एवमुक्ता महाराज कुन्ती पाण्डुमभाषत ।
कुरूणामृषभं वीरं तदा भूमिपतिं पतिम् ॥ १-१२७-१ (५५७२)
कुन्त्युवाच। १-१२७-२क्ष् (७५५)
न मामर्हसि धर्मज्ञ वक्तुमेवं कथंचन ।
धर्मपत्नीमभिरतां त्वयि राजीवलोचने ॥ १-१२७-२ (५५७३)
त्वमेव तु महाबाहो मय्यपत्यानि भारत ।
वीर वीर्योपपन्नानि धर्मतो जनयिष्यसि ॥ १-१२७-३ (५५७४)
स्वर्गं मनुजशार्दूल गच्छेयं सहिता त्वया ।
अपत्याय च मां गच्छ त्वमेव कुरुनन्दन ॥ १-१२७-४ (५५७५)

न ह्यहं मनसाप्यन्यं गच्छेयं त्वदृते नरम् ।
त्वत्तः प्रति विशिष्टश्च कोऽन्योऽस्ति भुवि मानवः ॥ १-१२७-५ (५५७६)
इमां च तावद्धर्मात्मन्पौराणीं शृणु मे कथाम् ।
परिश्रुतां विशालाक्ष कीर्तयिष्यामि यामहम् ॥ १-१२७-६ (५५७७)
व्युषइताश्व इति ख्यातो बभूव किल पार्थिवः ।
पुरा परमधर्मिष्ठः पूरोर्वंशविवर्धनः ॥ १-१२७-७ (५५७८)
तस्मिंश्च यजमाने वै धर्मात्मनि महाभुजे ।
उपागमंस्ततो देवाः सेन्द्रा देवर्षिभिः सह ॥ १-१२७-८ (५५७९)
अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः ।
व्युषिताश्वस्य राजर्षेस्ततो यज्ञे महात्मनः ॥ १-१२७-९ (५५८०)
देवा ब्रह्मर्षयश्चैव चक्रुः कर्म स्वयं तदा ।
व्युषिताश्वस्ततो राजन्नति मर्त्यान्व्यरोचत ॥ १-१२७-१० (५५८१)
सर्वभूतान्प्रति यथा तपनः शिशिरात्यये ।
स विजित्य गृहीत्वा च नृपतीन्राजसत्तमः ॥ १-१२७-११ (५५८२)
प्राच्यानुदिच्यान्पाश्चात्यान्दाक्षिणात्यानकालयत् ।
अश्वमेधे महायज्ञे व्युषिताश्वः प्रतापवान् ॥ १-१२७-१२ (५५८३)
बभूव स हि राजेन्द्रो दशनागबलान्वितः ।
अप्यत्र गाथां गायन्ति ये पुराणविदो जनाः ॥ १-१२७-१३ (५५८४)
व्युषिताश्वे यशोवृद्धे मनुष्येन्द्रे कुरूत्तम ।
व्युषिताश्वः समुद्रान्तां विजित्येमां वसुन्धराम् ॥ १-१२७-१४ (५५८५)
अपालयत्सर्ववर्णान्पिता पुत्रानिवौरसान् ।
यजमानो महायज्ञैर्ब्राह्मणेभ्यो धनं ददौ ॥ १-१२७-१५ (५५८६)
अनन्तरत्नान्यादाय स जहार महाक्रतून् ।
सुषाव च बहून्सोमान्सोमसंस्थास्ततान च ॥ १-१२७-१६ (५५८७)
आसीत्काक्षीवती चास्य भार्या परमसंमता ।
भद्रा नाम मनुष्येन्द्र रूपेणासदृशी भुवि ॥ १-१२७-१७ (५५८८)
कामयामासतुस्तौ च परस्परमिति श्रुतम् ।
स तस्यां कामसंपन्नो यक्ष्मणा समपद्यत ॥ १-१२७-१८ (५५८९)
तेनाचिरेण कालेन जगामास्तमिवांशुमान् ।
तस्मिन्प्रेते मनुष्येन्द्रे भार्याऽस्य भृशदुःखिता ॥ १-१२७-१९ (५५९०)
अपुत्रा पुरुषव्याघ्र विललापेति नः श्रुतम् ।
भद्रा परमदुःखार्ता तन्निबोध जनाधिप ॥ १-१२७-२० (५५९१)
भद्रोवाच। १-१२७-२१क्ष् (७५६)
नारी परमधर्मज्ञ सर्वा भर्तृविनाकृता ।
पतिं विना जीवति या न सा जीवति दुःखिता ॥ १-१२७-२१ (५५९२)
पतिं विना मृतं श्रेयो नार्याः क्षत्रियपुंगव ॥

त्वद्गतिं गन्तुमिच्छामि प्रसीदस्वनयस्वमाम् ॥ १-१२७-२२ (५५९३)
त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे ।
प्रसादं कुरु मे राजन्नितस्तूर्णं नयस्व माम् ॥ १-१२७-२३ (५५९४)
पृष्ठतोऽनुगमिष्यामि समेषु विषमेषु च ।
त्वामहं नरशार्दूल गच्छन्तमनिवर्तितुम् ॥ १-१२७-२४ (५५९५)
छायेवानुगता राजन्सततं वशवर्तिनी ।
भविष्यामि नरव्याघ्र नित्यं प्रियहिते रता ॥ १-१२७-२५ (५५९६)
अद्यप्रभृति मां राजन्कष्टा हृदयशोषणाः ।
आधयोऽभिभविष्यन्ति त्वामृते पुष्करेक्षण ॥ १-१२७-२६ (५५९७)
अभाग्यया मया नूनं वियुक्ताः सहचारिणः ।
तेन मे विप्रयोगोऽयमुपपन्नस्त्वया सह ॥ १-१२७-२७ (५५९८)
विप्रयुक्ता तु या पत्या मुहूर्तमपि जीवति ।
दुःखं जीवति सा पापा नरकस्थेव पार्थिव ॥ १-१२७-२८ (५५९९)
संयुक्ता विप्रयुक्ताश्च पूर्वदेहे कृता मया ।
तदिदं कर्मभिः पापैः पूर्वदेहेषु संचितम् ॥ १-१२७-२९ (५६००)
दुःखं मामनुसंप्राप्तं राजंस्त्वद्विप्रयोगजम् ।
अद्यप्रभृत्यहं राजन्कुशसंस्तरशायिनी ।
भविष्याम्यसुखाविष्टा त्वद्दर्शनपरायणा ॥ १-१२७-३० (५६०१)
दर्शयस्व नरव्याघ्र शाधि मामसुखान्विताम् ।
कृपणां चाथ करुणं विलपन्तीं नरेश्वर ॥ १-१२७-३१ (५६०२)
कन्त्युवाच। १-१२७-३२क्ष् (७५७)
एवं बहुविधं तस्यां विलपन्त्यां पुनःपुनः ।
तं शवं संपरिष्वज्य वाक्किलाऽन्तर्हिताऽब्रवीत् ॥ १-१२७-३२ (५६०३)
उत्तिष्ठ भद्रे गच्छ त्वं ददानीह वरं तव ।
जनयिष्याम्यपत्यानि त्वय्यहं चारुहासिनि ॥ १-१२७-३३ (५६०४)
आत्मकीये वरारोहे शयनीये चतुर्दशीम् ।
अष्टमीं वा ऋतुस्नाता संविशेथा मया सह ॥ १-१२७-३४ (५६०५)
एवमुक्ता तु सा देवी तथा चक्रे पतिव्रता ।
यथोक्तमेव तद्वाक्यं भद्रा पुत्रार्थिनी तदा ॥ १-१२७-३५ (५६०६)
सा तेन सुषुवे देवी शवेन भरतर्षभ ।
त्रीञ्शाल्वांश्चतुरो मद्रान्सुतान्भरतसत्तम ॥ १-१२७-३६ (५६०७)
तथा त्वमपि मय्येवं मनसा भरतर्षभ ।
शक्तो जनयितुं पुत्रांस्तपोयोगबलान्वितः ॥ ॥ १-१२७-३७ (५६०८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१२७-१२ अकालयद्वशीकृतवान् ॥
१-१२७-१६ जहार आहृतवान् चकारेत्यर्थः । सोमसंस्थाः
अग्निष्टोमात्यग्निष्टोमादयः सप्त ॥
१-१२७-२२ मृतं मरा ॥
१-१२७-३२ शवं प्रेवशरीरं संपरिष्वज्य विलपन्त्यामित्यन्वयः ॥
सप्तविंशत्यधिकशततमोऽध्यायः ॥
१२७ ॥

आदिपर्व - अध्याय १२८
॥ श्रीः ॥
१.१२८. अध्यायः १२८

Mahabharata - Adi Parva - Chapter Topics
उद्दालककथा ॥ १ ॥
उद्दालकपुत्रेण श्वेतकेतुना कृता स्त्रीपुरुषमर्यादा ॥ २ ॥
गुणाधिकात् द्विजातेः पुत्रोत्पादनार्थं प्रति पाण्डोराज्ञा ॥ ३ ॥
कुन्त्या दुर्वाससः स्वस्य मन्त्रप्राप्तिकथनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२८-० (५६०९)
वैशम्पायन उवाच। १-१२८-०क्ष् (७५८)
एवमुक्तस्तया राजा तां देवीं पुनरब्रवीत् ।
धर्मविद्धर्मसंयुक्तमिदं वचनमुत्तमम् ॥ १-१२८-१ (५६१०)
पाण्डुरुवाच। १-१२८-२क्ष् (७५९)
एवमेतत्पुरा कुन्ति व्युषिताश्वश्चकार ह ।
यथा त्वयोक्तं कल्याणि स ह्यासीदमरोपमः ॥ १-१२८-२ (५६११)
अथ त्विदं प्रवक्ष्यामि धर्मतत्त्वं निबोध मे ।
पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥ १-१२८-३ (५६१२)
अनावृताः किल पुरा स्त्रिय आसन्वरानने ।
कामचारविहारिण्यः स्वतन्त्राश्चारुहासिनि ॥ १-१२८-४ (५६१३)
तासां व्युच्चरमाणानां कौमारात्सुभगे पतीन् ।
नाधर्मोऽभूद्वरारोहे स हि धर्मः पुराऽभवत् ॥ १-१२८-५ (५६१४)
तं चैव धर्मं पौराणं तिर्यग्योनिगताः प्रजाः ।
अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ॥ १-१२८-६ (५६१५)

प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ।
उत्तरेषु च रम्भोरु कुरुष्वद्यापि पूज्यते ।
स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः ॥ १-१२८-७ (५६१६)
ग्नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ १-१२८-८ (५६१७)
एवं तृष्णा तु नारीणां पुरुषं पुरुषं प्रति ।
अगम्यागमनं स्त्रीणां नास्ति नित्यं शुचिस्मिते ॥ १-१२८-९ (५६१८)
पुत्रं वा किल पौत्रं वा कासांचिद्धातरं तथा ।
रहसीह नरं दृष्ट्वा योनिरुत्क्लिद्यते तदा ॥ १-१२८-१० (५६१९)
एतत्स्वाभाविकं स्त्रीणां न निमित्तकृतं शुभे।'
अस्मिंस्तु लोके नचिरान्मर्यादेयं शुचिस्मिते ॥ १-१२८-११ (५६२०)
स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु ।
बभूवोद्दालको नाम महर्षिरिति नः श्रुतम् ॥ १-१२८-१२ (५६२१)
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः ।
मर्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना ॥ १-१२८-१३ (५६२२)
कोपात्कमलपत्राक्षि यदर्थं तन्निबोध मे ॥ १-१२८-१४ (५६२३)
ग्श्वेतकेतोः पिता देवि तप उग्रं समास्थितः ।
ग्रीष्मे पञ्चतपा भूत्वा वर्षास्वाकाशगोऽभवत् ॥ १-१२८-१५ (५६२४)
शिशइरे सलिलस्थायी सह पत्न्या महातपाः ।
उद्दालकं तपस्यन्तं नियमेन समाहितम् ॥ १-१२८-१६ (५६२५)
तस्य पुत्रः श्वेतकेतुः परिचर्यां चकार ह ।
अभ्यागच्छद्द्विजः कश्चिद्वलीपलितसंततः ॥ १-१२८-१७ (५६२६)
तं दृष्ट्वैव मुनिः प्रीतः पूजयामास शास्त्रतः ।
स्वागतेन च पाद्येन मृदुवाक्यैश्च भारत ॥ १-१२८-१८ (५६२७)
शाकमूलफलाद्यैश्च वन्यैरन्यैरपूजयत् ।
क्षुत्पिपासाश्रमेणार्तः पूजितश्च महर्षिणा ॥ १-१२८-१९ (५६२८)
विश्रान्तो मुनिमासाद्य पर्यपृच्छद्द्विजस्तदा ।
उद्दालक महर्षे त्वं सत्यं मे ब्रूहि माऽनृतम् ॥ १-१२८-२० (५६२९)
ऋषिपुत्रः कुमारोऽयं दर्शनीयो विशेषतः ।
तव पुत्रमिमं मन्ये कृतकृत्योऽसि तद्वद ॥ १-१२८-२१ (५६३०)
उद्दालक उवाच। १-१२८-२२क्ष् (७६०)
मम पत्नी महाप्राज्ञ कुशिकस्य सुता मता ।
मामेवानुगता पत्नी मम नित्यमनुव्रता ॥ १-१२८-२२ (५६३१)
अरुन्धतीव पत्नीनां तपसा कर्शितस्तनी ।
अस्यां जातः श्वेतकेतुर्मम पुत्रो महातपाः ॥ १-१२८-२३ (५६३२)
वेदवेदाङ्गविद्विप्र मच्छासनपरायणः ।

लोकज्ञः सर्वलोकेषु विश्रुतः सत्यवाग्घृणी ॥ १-१२८-२४ (५६३३)
ब्राह्मण उवाच। १-१२८-२५क्ष् (७६१)
अपुत्री भार्यया चार्थी वृद्धोऽहं मन्दचाक्षुषः ।
पित्र्यादृणादनिर्मुक्तः पूर्वमेवाकृतस्त्रियः ॥ १-१२८-२५ (५६३४)
प्रजारणिस्तु पत्नी ते कुलशीलसमन्विता ।
सदृशी मम गोत्रेण वहाम्येनां क्षमस्व मे ॥ १-१२८-२६ (५६३५)
पाण्डुरुवाच। १-१२८-२७क्ष् (७६२)
इत्युक्त्वा मृगशावाक्षीं चीरकृष्णाजिनाम्बराम् ।
यष्ट्याधारः स्रस्तगात्रो मन्दचक्षुरबुद्धिमान् ॥ १-१२८-२७ (५६३६)
स्वव्यापाराक्षमां श्रेष्ठमचित्तामात्मनि द्विजः।'
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः ॥ १-१२८-२८ (५६३७)
जग्राह ब्राह्मणः पापौ गच्छाव इति चाब्रवीत् ।
ऋषिपुत्रस्तदा कोपं चकारामर्षितस्तदा ॥ १-१२८-२९ (५६३८)
मातरं तां तथा दृष्ट्वा नीयमानां बलादिव ।
ग्तपसा दीप्तवीर्यो हि श्वेतकेतुर्न चक्षमे ॥ १-१२८-३० (५६३९)
संगृह्य मातरं हस्ते श्वेतकेतुरभाषत ।
दुर्ब्राह्मण विमुञ्च त्वं मातरं मे पतिव्रताम् ॥ १-१२८-३१ (५६४०)
स्वयं पिता मे ब्रह्मर्षिः क्षमावान्ब्रह्मवित्तमः ।
शापानुग्रहयोः शक्तः तूष्णींभूतो महाव्रतः ॥ १-१२८-३२ (५६४१)
तस्य पत्नी दमोपेता मम माता विशेषतः ।
पतिव्रतां तपोवृद्धां साध्वाचारैरलङ्कृताम् ॥ १-१२८-३३ (५६४२)
अप्रमादेन ते ब्रह्मन्मातृभूतां विमुञ्च वै ॥ १-१२८-३४ (५६४३)
एवमुक्त्वा तु याचन्तं विमुञ्चेति मुहुर्मुहुः ।
प्रत्यवोचद्दिद्वजो राजन्नप्रगल्भमिदं वचः ॥ १-१२८-३५ (५६४४)
ब्राह्मण उवाच। १-१२८-३६क्ष् (७६३)
अपत्यार्थी श्वेतकेतो वृद्धोऽहं मन्दचाक्षुषः ।
पिता ते ऋणनिर्मुक्तस्त्वया पुत्रेण काश्यप ॥ १-१२८-३६ (५६४५)
ऋणादहमनिर्मुक्तो वृद्धोऽहं विगतस्पृहः ।
मम को दास्यति सुतां कन्यां संप्राप्तयौवनाम् ॥ १-१२८-३७ (५६४६)
प्रजारणिमिमां पत्नीं विमुञ्च त्वं महातपः ।
एकया प्रजया प्रीतो मातरं ते ददाम्यहम् ॥ १-१२८-३८ (५६४७)
एवमुक्तः श्वेतकेतुर्लज्जया क्रोधमेयिवान्।'
क्रुद्धं तं तु पिता दृष्ट्वा श्वेतकेतुमुवाच ह ॥ १-१२८-३९ (५६४८)
मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः ।
अनावृता हि सर्वेषां वर्णानामङ्गना भुवि ॥ १-१२८-४० (५६४९)
यथा गावः स्थिताः पुत्र स्वेस्वे वर्णे तथा प्रजाः ।

ग्तथैव च कुटुम्बेषु न प्रमाद्यन्ति कर्हिचित् ॥ १-१२८-४१ (५६५०)
ऋतुकाले तु संप्राप्ते भर्तारं न जहुस्तदा।'
ऋषिपुत्रोऽथ तं धर्मं श्वेतकेतुर्न चक्षमे ॥ १-१२८-४२ (५६५१)
चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि ।
मानुषेषु महाभागे न त्वेवान्येषु जन्तुषु ॥ १-१२८-४३ (५६५२)
तदाप्रभृति मर्यादा स्थितेयमिति नः श्रुतम् ।
व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् ॥ १-१२८-४४ (५६५३)
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ।
ग्अद्याप्यनुविधीयन्ते कामक्रोधविवर्जिताः ॥ १-१२८-४५ (५६५४)
उत्तरेषु महाभागे कुरुष्वेवं यशस्विनि ।
पुराणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ॥' १-१२८-४६ (५६५५)
भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् ।
पतिव्रतामेतदेव भविता पातकं भुवि ॥ १-१२८-४७ (५६५६)
नियुक्ता पतिना भार्या यद्यपत्यस्य कारणात् ।
न कुर्यात्तत्तथा भीरु सैनः सुमहदाप्नुयात् ।
इति तेन पुरा भीरु मर्यादा स्थापिता बलात् ॥ १-१२८-४८ (५६५७)
उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना ।
सौदासेन च रम्भोरु नियुक्ता पुत्रजन्मनि ॥ १-१२८-४९ (५६५८)
मदयन्ती जगामर्षिं वसिष्ठमिति नः श्रुतम् ।
तस्माल्लेभे च सा पुत्रमश्मकं नाम भामिनी ॥ १-१२८-५० (५६५९)
एवं कृतवती सापि भर्तुः प्रियचिकीर्षया ।
अस्माकमपि ते जन्म विदितं कमलेक्षणे ॥ १-१२८-५१ (५६६०)
कृष्णद्वैपायनाद्भीरु कुरूणां वंशवृद्धये ।
अत एतानि सर्वाणि कारणानि समीक्ष्य वै ॥ १-१२८-५२ (५६६१)
ममैतद्वचनं धर्म्यं कर्तुमर्हस्यनिन्दिते ।
ऋतावृतौ राजपुत्रि स्त्रिया भर्ता पतिव्रते ॥ १-१२८-५३ (५६६२)
नातिवर्तव्य इत्येवं धर्मं धर्मविदो विदुः ।
शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलार्हति ॥ १-१२८-५४ (५६६३)
धर्ममेवं जनाः सन्तः पुराणं परिचक्षते ।
भर्ता भार्यां राजपुत्रि धर्म्यं वाऽधर्म्यमेव वा ॥ १-१२८-५५ (५६६४)
यद्ब्रूयात्तत्तथा कार्यमिति वेदविदो विदुः ।
विशेषतः पुत्रगृद्धी हीनः प्रजननात्स्वयम् ॥ १-१२८-५६ (५६६५)
यथाऽहमनवद्याङ्गि पुत्रदर्शनलालसः ।
अयं रक्ताङ्गुलिनखः पद्मपत्रनिभः शुभे ॥ १-१२८-५७ (५६६६)
प्रसादनार्थं सुश्रोणि शिरस्यभ्युद्यतोऽञ्जलिः ।
मन्नियोगात्सुकेशान्ते द्विजातेस्तपसाऽधिकात् ॥ १-१२८-५८ (५६६७)

पुत्रान्गुणसमायुक्तानुत्पादयितुमर्हसि ।
त्वत्कृतेऽहं पृथुश्रोणि गच्छेयं पुत्रिणां गतिम् ॥ १-१२८-५९ (५६६८)
वैशम्पायन उवाच । १-१२८-६०क्ष् (७६४)
एवमुक्ता ततः कुन्ती पाण्डुं परपुरञ्जयम् ।
प्रत्युवाच वरारोहा भर्तुः प्रियहिते रता ॥ १-१२८-६० (५६६९)
ग्अधर्मः सुमहानेषु स्त्रीणां भरतसत्तम ।
यत्प्रसादयते भर्ता प्रसाद्यः क्षत्रियर्षभ ।
शृणु चेदं महाबाहो मम प्रीतिकरं चः ॥' १-१२८-६१ (५६७०)
पितृवेश्मन्यहं बाला नियुक्ताऽतिथिपूजने ।
उग्रं पर्यचरं तत्र ब्राह्मणं संशितव्रतम् ॥ १-१२८-६२ (५६७१)
निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः ।
तमहं संशितात्मानं सर्वयत्नैरतोषयम् ॥ १-१२८-६३ (५६७२)
स मेऽभिचारसंयुक्तमाचष्ट भगवान्वरम् ।
मन्त्रं त्विमं च मे प्रादादब्रवीच्चैव मामिदम् ॥ १-१२८-६४ (५६७३)
यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि ।
अकामो वा सकामो वा वशं ते समुपैष्यति ॥ १-१२८-६५ (५६७४)
तस्य तस्य प्रसादात्ते राज्ञि पुत्रो भविष्यति ।
इत्युक्ताऽहं तदा तेन पितृवेश्मनि भारत ॥ १-१२८-६६ (५६७५)
ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः ।
अनुज्ञाता त्वया देवमाह्वयेयमहं नृप ॥ १-१२८-६७ (५६७६)
ग्यां मे विद्यां महाराज अददात्स महायशाः ।
तयाऽऽहूतः सुरः पुत्रं प्रदास्यति सुरोपमम् ।
अनपत्यकृतं यस्ते शोकं वीर विनेष्यति ॥' ॥ १-१२८-६८ (५६७७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१२८-४ अनावृताः सर्वैर्द्रष्टुं योग्याः । कामचारो रतिसुखं
तदर्थं विहारिण्यः पर्यटनशीलाः । स्वतन्त्रा भर्त्रादिभिरनिवार्याः ॥
१-१२८-५ पतीन्व्युच्चरमाणानां व्यभिचरन्तीनाम् ॥
१-१२८-६ अनुविधीयन्ते अनुसार्यन्ते ईश्वरेण ॥
१-१२८-११ नचिरादल्पकालतः ॥
१-१२८-५५ पुराणं युगान्तरीयम् ॥
१-१२८-५९ त्वत्कृते त्वया ॥
१-१२८-६४ अभिचारो देवताकर्षणशक्तिः ॥

अष्टविंशत्यधिकशततमोऽध्यायः ॥
१२८ ॥

आदिपर्व - अध्याय १२९
॥ श्रीः ॥
१.१२९. अध्यायः १२९

Mahabharata - Adi Parva - Chapter Topics
धर्मात्कुन्त्यां युधिष्ठिरोत्पत्तिः ॥ १ ॥
कुन्त्याः पुत्रोत्पत्तिश्रवणेन दुःखितया गान्धार्या घातितात्स्वोदरान्मांसपेशीजननम् ॥ २ ॥
मांसपेशीं एकोत्तरशतधा विभज्य पृथक्पृथक्कुण्डेषु निधाय रक्षणम् ॥ ३ ॥
वने स्थितस्य पाण्डोः कुन्त्यां वायोर्भीमसेनोत्पत्तिः ॥ ४ ॥
मातुरङ्कात्पतितेन भीमेन शैलशिलासंचूर्णनम् ॥ ५ ॥
दुर्योधनोत्पत्तिः ॥ ६ ॥
ततो मासेन धृतराष्ट्रस्य पुत्रशतोत्पत्तिः । दुःशलाजननं च ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Text

१-१२९-० (५६७८)
गकुन्त्युवाच। १-१२९-०क्ष् (७६५)
अपत्यकाम एवं स्यान्ममापत्यं भवेदिति ।
विप्रं वा गुणसंपन्नं सर्वभूतहिते रतम् ॥ १-१२९-१ (५६७९)
अनुजानीहि भद्रं ते दैवतं हि पतिः स्त्रियः ।
यं त्वं वक्ष्यसि धर्मज्ञ देवं ब्राह्मणमेव च ॥ १-१२९-२ (५६८०)
यथोद्दिष्टं त्वया वीर तत्कर्तास्मि महाभुज ।
देवात्पुत्रफलं सद्यो विप्रात्कालान्तरे भवेत् ॥ १-१२९-३ (५६८१)
आवाहयामि कं देवं कदा वा भरतर्षभ ।
त्वत्त आज्ञां प्रतीक्षन्तीं विद्धयस्मिन्कर्मणीप्सिते ॥ १-१२९-४ (५६८२)
पाण्डुरुवाच। १-१२९-५क्ष् (७६६)
धन्योऽजस्म्यनुगृहीतोऽस्मि त्वं नो धात्री कुलस्य हि ।
नमो महर्षये तस्मै येन दत्तो वरस्तव ॥ १-१२९-५ (५६८३)
न चाधर्मेण धर्मज्ञे शक्याः पालयितुं प्रजाः ।
तस्मात्त्वं पुत्रलाभाय सन्तानाय ममैव च ॥ १-१२९-६ (५६८४)
प्रवरं सर्वदेवानां धर्ममावाहयाबले। १-१२९-७ (५६८५)
वैशम्पायन उवाच ।

पाण्डुना समनुज्ञाता भारतेन यशस्विना ।
मतिं चक्रे महाराज धर्मस्यावाहने तदा ॥' १-१२९-७क्ष् (७६७)
पाण्डुरुवाच। १-१२९-८क्ष् (७६८)
अद्यैव त्वं वरारोहे प्रयतस्व यथाविधि ।
धार्मिकश्च कुरूणां हि भविष्यति न संशयः ॥ १-१२९-८ (५६८६)
दत्तस्य तस्य धर्मेण नाधर्मे रंस्यते मनः ।
धर्मादिकं हि धर्मज्ञे धर्मान्तं धर्ममध्यमम् ॥ १-१२९-९ (५६८७)
अपत्यमिष्टं लोकेषु यशःकीर्तिविवर्धनम् ।
तस्माद्धर्मं पुरस्कृत्य नियता त्वं शुचिस्मिते ॥ १-१२९-१० (५६८८)
आकाराचारसंपन्ना भजस्वाराधय स्वयम् ॥ १-१२९-११ (५६८९)
वैशम्पायन उवाच। १-१२९-१२क्ष् (७६९)
सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना ।
अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमथाकरोत् ॥ १-१२९-१२ (५६९०)
संवत्सरोषिते गर्भे गान्धार्या जनमेजय ।
आजुबहाव ततो धर्मं कुन्ती गर्भार्थमच्युतम् ॥ १-१२९-१३ (५६९१)
सा बलिं त्वरिता देवी धर्मायोपजहार ह ।
जजाप विधिवज्जप्यं दत्तं दुर्वाससा पुरा ॥ १-१२९-१४ (५६९२)
Ŋजानन्ती धर्ममग्र्यं वै धर्मं वशमुपानयत् ।
आहूतो नियमात्कुन्त्या सर्वभूतनमस्कृतः ॥' १-१२९-१५ (५६९३)
आजगाम ततो देवीं धर्मो मन्त्रबलात्ततः ।
विमाने सूर्यसङ्काशे कुन्ती यत्र जपस्थिता ॥ १-१२९-१६ (५६९४)
Ŋददृशे भगवान्धर्मः सन्तानार्थाय पाण्डवे।'
विहस्य तां ततो ब्रूयाः कुन्ति किं ते ददाम्यहम् ।
सा तं विहस्यमानापि पुत्रं देह्यब्रवीदिदम् ॥ १-१२९-१७ (५६९५)
Ŋतस्मिन्बहुमृगेऽरण्ये शतशृङ्गे नगोत्तमे ।
पाण्डोरर्थे महाभागा कुन्ती धर्ममुपागमत् ॥ १-१२९-१८ (५६९६)
ऋतुकाले शुचिः स्नाता शुक्लवस्त्रा यशस्विनी ।
शय्यां जग्राह सुश्रोणी सह धर्मेण सुव्रता ॥' १-१२९-१९ (५६९७)
धर्मेण सह संगम्य योगमूर्तिधरेण सा ।
लेभे पुत्रं महाबाहुं सर्वप्राणभृतां वरम् ॥ १-१२९-२० (५६९८)
ऐन्द्रे चन्द्रमसा युक्ते मुहूर्तेऽभिजितेऽष्टमे ।
दिवा मध्यगते सूर्ये तिथौ पूर्णे हि पूजिते ॥ १-१२९-२१ (५६९९)
समृद्धयसशं कुन्ती सुषाव प्रवरं सुतम् ।
जातमात्रे सुते तस्मिन्वागुवाचाशरीरिणी ॥ १-१२९-२२ (५७००)
एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः ।
विक्रान्तः सत्यवाक्चैव राजा पृथ्व्यां भविष्यति ॥ १-१२९-२३ (५७०१)

युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः ।
यशसा तेजसा चैव वृत्तेन च समन्वितः ॥ १-१२९-२४ (५७०२)
संवत्सरे द्वितीये तु गान्धार्या उदरं महत् ।
न च प्राजायत तदा ततस्तां दुःखमाविशत् ॥ १-१२९-२५ (५७०३)
श्रुत्वा कुन्तीसुतं जातं बालार्कसमतेजसम् ।
उदस्यात्मनः स्थैर्यमुपालभ्य च सौबली ॥ १-१२९-२६ (५७०४)
कौरवस्यापरिज्ञातं यत्नेन महता स्वयम् ।
उदरं घातयामास गान्धारी शोकमूर्च्छिता ॥ १-१२९-२७ (५७०५)
ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता ।
द्विवर्षसंभृता कुक्षौ तामुत्स्रष्टुं प्रचक्रमे ॥ १-१२९-२८ (५७०६)
अथ द्वैपायनो ज्ञात्वा त्वरितः समुपागमत् ।
तां स मांसमयीं पेशीं ददर्श जपतां वरः ॥ १-१२९-२९ (५७०७)
ततोऽवदत्सौबलेयीं किमिदं ते चिकीर्षितम् ।
सा चात्मनो मतं सर्वं शशंस परमर्षये ॥ १-१२९-३० (५७०८)
गान्धार्युवाच। १-१२९-३१क्ष् (७७०)
ज्येष्ठं कुन्तीसुतं जातं श्रुत्वा रविसमप्रभम् ।
दुःखेन परमेणेदमुदरं घातितं मया ॥ १-१२९-३१ (५७०९)
शतं च किल पुत्राणां वितीर्णं मे त्वया पुरा ।
इयं च मे मांसपेशी जाता पुत्रशताय वै ॥ १-१२९-३२ (५७१०)
व्यास उवाच। १-१२९-३३क्ष् (७७१)
एवमेतत्सौबलेयि नैतज्जात्वन्यथा भवेत् ।
वितथं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा ॥ १-१२९-३३ (५७११)
घृतपूर्णं कुण्डशतं क्षिप्रमेव विधीयताम् ।
सुगुप्तेषु च देशेषु रक्षा चैव विधीयताम् ॥ १-१२९-३४ (५७१२)
शीताभिरद्भिरष्ठीलामिमां च परिषिञ्चय ॥ १-१२९-३५ (५७१३)
वैशम्पायन उवाच। १-१२९-३६क्ष् (७७२)
सा सिच्यमाना ह्यष्ठीला ह्यभवच्छतधा तदा ।
अङ्गुष्ठपर्वमात्राणां गर्भाणां तत्क्षणं तथा ॥ १-१२९-३६ (५७१४)
एकाधिकशतं पूर्णं यथायोगं विशांपते ।
ततः कुण्डशतं तत्र आनाय्य तु महानृषिः ॥ १-१२९-३७ (५७१५)
मांसपेश्यास्तदा राजन्क्रमशः कालपर्ययात् ।
ततस्तांस्तेषु कुण्डेषु गर्भान्सर्वान्समादधत् ॥ १-१२९-३८ (५७१६)
स्वनुगुप्तेषु देशेषु रक्षां चैषां व्यधापयत् ।
शशास चैव कृष्णो वै गर्भाणां रक्षणं तथा ॥ १-१२९-३९ (५७१७)
उवाच चैनां भगवान्कालेनैतावता पुनः ।

स्फुटमानेषु कुण्डेषु जाताञ्जानीहि शोभने ॥ १-१२९-४० (५७१८)
उद्धाटनीयान्येतानि कुण्डानीति च सौबलीम् ।
इत्युक्त्वा भगवान्व्यासस्तथा प्रतिविधाय च ॥ १-१२९-४१ (५७१९)
जगाम तपसे धीमान्हिमवन्तं शिलोच्चयम् ।
अह्नोत्तराः कुमारस्ते कुण्डेभ्यस्तु समुत्थिताः ॥ १-१२९-४२ (५७२०)
तेनैवैषां क्रमेणासीज्ज्योष्ठानुज्येष्ठता तदा ।
जन्मतश्च प्रमाणेन ज्येष्ठः कुन्तीसुतोऽभवत् ॥ १-१२९-४३ (५७२१)
धार्मिकं च सुतं दृष्ट्वा पाण्डुः कुन्तीमथाऽब्रवीत् ।
प्राहुः क्षत्रं बलज्येष्ठं बलज्येष्ठं सुतं वृणु ॥ १-१२९-४४ (५७२२)
ततः कुन्तीमभिक्रम्य शशासातीव भारत ।
वायुमावाहयस्वेति स देवो बलवत्तरः ॥ १-१२९-४५ (५७२३)
अश्वमेधः क्रतुश्रेष्ठो ज्योतिःश्रेष्ठो दिवाकरः ।
ब्राह्मणो द्विपदां श्रेष्ठो देवश्रेष्ठश्च मारुतः ॥ १-१२९-४६ (५७२४)
मारुतं मरुतां श्रेष्ठं सर्वप्राणिभिरीडितम् ।
आवाहय त्वं नियमात्पुत्रार्थं वरवर्णिनि ॥ १-१२९-४७ (५७२५)
स नो यं दास्यति सुतं स प्राणबलवान्नृषु ।
भविष्यति वरारोहे बलज्येष्ठा हि भूमिपाः ॥ १-१२९-४८ (५७२६)
वैशम्पायन उवाच। १-१२९-४९क्ष् (७७३)
तथोक्तवति सा काले वायुमेवाजुहाव ह ।
द्वितीयेनोपहारेण तेनोक्तविधिना पुनः ॥ १-१२९-४९ (५७२७)
तैरेव नियमैः स्थित्वा मन्त्रग्राममुदैरयत् ।
आजगाम ततो वायुः किं करोमीति चाब्रवीत् ॥ १-१२९-५० (५७२८)
लज्जान्विता ततः कुन्ती पुत्रमैच्छन्महाबलम् ।
तथास्त्विति च तां वायुः समालभ्य दिवं गतः ॥ १-१२९-५१ (५७२९)
तस्यां जज्ञे महावीर्यो भीमो भीमपराक्रमः ।
तमप्यतिबलं जातं वागुवाचाशरीरिणी ॥ १-१२९-५२ (५७३०)
सर्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत ।
जातमात्रे कुमारे तु सर्वलोकस्य पार्थिवाः ॥ १-१२९-५३ (५७३१)
मूत्रं प्रसुस्रुवुः सर्वे व्यथां चापि प्रपेदिरे ।
वाहनानि व्यशीर्यन्त व्यमुञ्चन्नश्रुबिन्दवः ॥ १-१२९-५४ (५७३२)
यथाऽनिलः समुद्भूतः समर्थः कम्पने भुवः ।
तथा ह्युपचिताङ्गो वै भीमो भीमपराक्रमः ॥ १-१२९-५५ (५७३३)
इदं चाद्भुतमत्रासीज्जातमात्रे वृकोदरे ।
यदर्कात्पतितो मातुः शिलां गात्रैरचूर्णयत् ॥ १-१२९-५६ (५७३४)
कुन्ती तु सह पुत्रेण याता सुरुचिरं सरः ।
स्नात्वा च सुतमादाय दशमेऽहनि यादवी ॥ १-१२९-५७ (५७३५)

दैवतान्यर्चयिष्यन्ती निर्जगामाश्रमात्पृथा ।
शैलाभ्याशेन गच्छन्त्यास्तदा भरतसत्तम ॥ १-१२९-५८ (५७३६)
निश्चक्राम महाव्याघ्रो जिघांसुर्गिरिगह्वरात् ।
तमापतन्तं शार्दूलं विकृष्य धनुरुत्तमम् ॥ १-१२९-५९ (५७३७)
निर्बिभेद शरैः पाण्डुस्त्रिभिस्तिरदशविक्रमः ।
नादेन महता तां तु पूरयन्तं गिरेर्गुहाम् ॥ १-१२९-६० (५७३८)
दृष्ट्वा शैलमुपारोढुमैच्छत्कुन्ती भयात्तदा ।
त्रासात्तस्याः सुतस्त्वङ्कात्पपात भरतर्षभ ॥ १-१२९-६१ (५७३९)
पर्वतस्योपरिस्थायामधस्तादपतच्छिशुः ।
स शिलां चूर्णयामास वज्रवद्वज्रिचोदितः ॥ १-१२९-६२ (५७४०)
पुत्रस्नेहात्ततः पाण्डुरभ्यधावद्गिरेस्तटम् ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता ॥ १-१२९-६३ (५७४१)
शिलां च चूर्णितां दृष्ट्वा परं विस्मयमागमत् ।
स तु जन्मनि भीमस्य विनदन्तं विनादितम् ॥ १-१२९-६४ (५७४२)
ददर्श गिरिशृङ्गस्थं व्याघ्रं व्याघ्रपराक्रमः ।
दारसंरक्षणार्थाय पुत्रसंरक्षणाय च ॥ १-१२९-६५ (५७४३)
सदा बाणधनुष्पाणिरभवत्कुरुनन्दनः ।
मघे चन्द्रमसा युक्ते सिंहे चाभ्युदिते गुरौ ॥ १-१२९-६६ (५७४४)
दिवा मध्यगते सूर्ये तिथौ पुण्ये त्रयोदशे ।
पित्र्ये मुहूर्ते सा कुन्ती सुषुवे भीममच्युतम् ॥ १-१२९-६७ (५७४५)
यस्मिन्नहनि भमस्तु जज्ञे भीमपराक्रमः ।
तामेव रात्रिं पूर्वां तु जज्ञे दुर्योधनो नृपः ॥ १-१२९-६८ (५७४६)
स जातमात्र एवाथ धृतराष्ट्रसुतो नृप ।
रासभारावसदृशं रुराव च ननाद च ॥ १-१२९-६९ (५७४७)
तं खराः प्रत्यभाषन्त गृध्रगोमायुवायसाः ।
क्रव्यादाः प्राणदन्घोराः शिवाश्चाशिवनिस्वनाः ॥ १-१२९-७० (५७४८)
वाताश्च प्रववुश्चापि दिग्दाहश्चाभवत्तदा ।
ततस्तु भीतवद्राजा धृतराष्ट्रोऽब्रवीदिदम् ॥ १-१२९-७१ (५७४९)
समानीय बहून्विप्रान्भीष्मं विदुरमेव च ।
अन्यांश्च सुहृदो राजन्कुरून्सर्वांस्तथैव च ॥ १-१२९-७२ (५७५०)
युधिष्ठिरो राजपुत्रो ज्येष्ठो नः कुलवर्धनः ।
प्राप्तः स्वगुणतो राज्यं न तस्मिन्वाच्यमस्तिनः ॥ १-१२९-७३ (५७५१)
अयं त्वनन्तरस्तस्मादपि राजा भविष्यति ।
एतद्विब्रूत मे तथ्यं यदत्र भविता ध्रुवम् ॥ १-१२९-७४ (५७५२)
ग्अस्मिञ्जाते निमित्तानि शंसन्ती हाशिवं महत् ।
अतो ब्रवीमि विदुर द्रुतं मां भयमाविशत् ॥' १-१२९-७५ (५७५३)

वाक्यस्यैतस्य निधेन दिक्षु सर्वासु भारत ।
क्रव्यादाः प्राणदन्घोराः शिवाश्चाशिवनिस्वनाः ॥ १-१२९-७६ (५७५४)
लक्षयित्वा निमित्तानि तानि घोराणि सर्वशः ।
तेऽब्रुवन्ब्राह्मणा राजन्विदुरश्च महामतिः ॥ १-१२९-७७ (५७५५)
यथेमानि निमित्तानि घोराणि मनुजाधिप ।
उत्थितानि सुते जाते ज्येष्ठे ते पुरुषर्षभ ॥ १-१२९-७८ (५७५६)
व्यक्तं कुलान्तकरणो भवितैष सुतस्तव ।
तस्य शान्तिः परित्यागे गुप्तावपनयो महान् ॥ १-१२९-७९ (५७५७)
गएष दुर्योधनो राजा मधुपिङ्गललोचनः ।
न केवलं कुलस्यान्तं क्षत्रियान्तं करिष्यति ॥' १-१२९-८० (५७५८)
शतमेकोनमप्यस्तु पुत्राणां ते महीपते ।
त्यजैनमेकं शान्तिं चेत्कुलस्येच्छसि भारत ॥ १-१२९-८१ (५७५९)
एकेन कुरु वै क्षेमं कुलस्य जगतस्तथा ।
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ॥ १-१२९-८२ (५७६०)
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।
स तथा विदुरेणोक्तस्तैश्च सर्वैर्द्विजोत्तमैः ॥ १-१२९-८३ (५७६१)
न चकार तथा राजा पुत्रस्नेहसमन्वितः ।
ततः पुत्रशतं पूर्णं धृतराष्ट्रस्य पार्थिव ॥ १-१२९-८४ (५७६२)
अह्नांशतेन संजज्ञे कन्या चैका शताधिका ।
गान्धार्यां क्लिश्यमानायामुदरेण विवर्धता ॥ १-१२९-८५ (५७६३)
गवैश्या सा त्वम्बिकापुत्रं कन्या परिचचार ह ।
तया समभवद्राजा धृतराष्ट्रो यदृच्छया ॥' १-१२९-८६ (५७६४)
तस्मिन्संवत्सरे राजन्धृतराष्ट्रान्महायशाः ।
जज्ञे धीमांस्ततस्तस्यां युयुत्सुः करमो नृप ।
एवं पुत्रशतं जज्ञे धृतराष्ट्रस्य धीमतः ॥ १-१२९-८७ (५७६५)
महारथानां वीराणां कन्या चैका शताधिका ।
युयुत्सुश्च महातेजा वैश्यापुत्रः प्रतापवान् ॥ ॥ १-१२९-८८ (५७६६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकोनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१२९-२१ ऐन्द्रे ज्येष्ठानक्षत्रे । अष्टमे अभिजितेऽभिजिति त्रिंशन्मुहूर्तस्याह्नोऽष्टमे मुहूर्ते। दिवा शुक्लपक्षे। मध्यगते तुलायनगते। तिथौ पूर्णे पूर्णायां पञ्चम्याम्। अयं योगः प्रायेणास्विनशुक्लपञ्चम्याम् ॥

१-१२९-२८ लोहाष्ठीला लोहपिण्डिका ॥
१-१२९-६२ वज्रवद्वज्रिचोदितः वज्रिचोदितवज्रवदित्यर्थः ॥
१-१२९-६४ विनादितं नादं ।विनन्दं कुर्वाणम् ॥
१-१२९-६९ रुराव च ननाद च व्यक्तमव्यक्तं च शब्दं खरसदृशमेवाकरोत् ॥
१-१२९-८७ करण इव करणः क्षत्रियाद्वैश्यायां जातत्वान्न तु वैश्याच्छूद्रायाम् ॥
एकोनत्रिंशदधिकशततमोऽध्यायः ॥
१२९ ॥

आदिपर्व - अध्याय १३०
॥ श्रीः ॥
१.१३०. अध्यायः १३०

Mahabharata - Adi Parva - Chapter Topics
दुःशलाजननप्रकारकथनम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३०-० (५७६७)
जनमेजय उवाच।१-१३०-०क्ष् (७७४)
धृतराष्ट्रस्य पुत्राणामादितः कथितं त्वया ।
ऋषेः प्रसादात्तु शतं न च कन्या प्रकीर्तिता ॥१-१३०-१ (५७६८)
वैश्यापुत्रो युयुत्सुश्च कन्या चैका शताधिका ।
गान्धारराजदुहिता शतपुत्रेति चानघ ॥१-१३०-२ (५७६९)
उक्ता महर्षिणा तेन व्यासेनामिततेजसा ।
कथं त्विदानीं भगवन्कन्यां त्वं तु ब्रवीषि मे ॥१-१३०-३ (५७७०)
यदि भागशतं पेशी कृता तेन महर्षिणा ।
न प्रजास्यति चेद्भूयः सौबलेयी कथंचन ॥१-१३०-४ (५७७१)
कथं तु संभवस्तस्या दुःशलाया वदस्व मे ।
यथावदिह विप्रर्षे परं मेऽत्र कुतूहलम् ॥१-१३०-५ (५७७२)
वैशम्पायन उवाच।१-१३०-६क्ष् (७७५)
साध्वयं प्रश्न उद्दिष्टः पाण्डवेय ब्रवीमि ते ।
तां मांसपेशीं भगवान्स्वयमेव महातपाः ॥१-१३०-६ (५७७३)
शीताभिरद्भिरासिच्य भागं भागमकल्पयत् ।
यो यथा कल्पितो भागस्तंत धात्र्या तथा नृप ॥१-१३०-७ (५७७४)
घृतपूर्णेषु कुण्डेषु एकैकं प्राक्षिपत्तदा ।

एतस्मिन्नन्तरे साध्वी गान्धारी सुदृढव्रता ॥१-१३०-८ (५७७५)
दुहितुः स्नेहसंयोगमनुध्याय वराङ्गना ।
ग्नाब्रवीत्तमृषिं किंचिद्गौरवाच्च यशस्विनी।'
मनसा चिन्तयद्देवी एतत्पुत्रशतं मम ॥ १-१३०-९ (५७७६)
भविष्यति न संदेहो न ब्रवीत्यन्यथा मुनिः ।
ममेयं परमा तुष्टिर्दुहिता मे भवेद्यदि ॥१-१३०-१० (५७७७)
एका शताधिका बाला भविष्यति कनीयसी ।
ततो दौहित्रजाल्लोकादबाह्योऽसौ पतिर्मम ॥१-१३०-११ (५७७८)
अधिका किल नारीणां प्रीतिर्जामातृजा भवेत् ।
यदि नाम ममापि स्याद्दुहितैका शताधिका ॥१-१३०-१२ (५७७९)
कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता ।
यदि सत्यं तपस्तप्तं दत्तं वाऽप्यथवा हुतम् ॥१-१३०-१३ (५७८०)
गुरवस्तोषिता वापि तथाऽस्तु दुहिता मम ।
एतस्मिन्नेव काले तु कृष्णद्वैपायनः स्वयम् ॥१-१३०-१४ (५७८१)
व्यभजत्स तदा पेशीं भगवानृषिसत्तमः ।
ग्गण्यमानेषु कुण्डेषु शते पूर्णे महात्मना ॥१-१३०-१५ (५७८२)
अभवच्चापरं खण्डं वामहस्ते तदा किल।'
गणयित्वा शतं पूर्णमंशानामाह सौबलीम् ॥ १-१३०-१६ (५७८३)
व्यास उवाच।१-१३०-१७क्ष् (७७६)
पूर्णं पुत्रशतं त्वेतन्न मिथ्या वागुदाहृता ।
दैवयोगाच्च भागैकः परिशिष्टः शतात्परः ॥१-१३०-१७ (५७८४)
एषा ते सुभगा कन्या भविष्यति यतेप्सिता। १-१३०-१८ (५७८५)
वैशम्पायन उवाच ।
ततोऽन्यं घृतकुम्भं च समानाय्य महातपाः ॥ १-१३०-१८क्ष् (७७७)
तं चापि प्राक्षिपत्तत्र कन्याभागं तपोधनः ।
ग्संभूता चैव कालेन सर्वेषां च यवीयसी ॥१-१३०-१९ (५७८६)
ऐतत्ते कथितं राजन्दुःशलाजन्म भारत ।
ब्रूहि राजेन्द्र किं भूयो वर्तयिष्यामि तेऽनघ ॥ ॥१-१३०-२० (५७८७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥१३० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१३०-४ न प्रजास्यति प्रजामात्मनो नेच्छति ॥
त्रिंशदधिकशततमोऽध्यायः ॥
१३० ॥

आदिपर्व - अध्याय १३१
॥ श्रीः ॥
१.१३१. अध्यायः १३१

Mahabharata - Adi Parva - Chapter Topics
दुर्योधनादीनां नामकथनम् ॥ १ ॥
दुःशलाविवाहः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३१-० (५७८८)
जनमेजय उवाच। १-१३१-०क्ष् (७७८)
ज्येष्ठाऽनुज्येष्ठतां तेषां नामानि च पृथक्पृथक् ।
धृतराष्ट्रस्य पुत्राणामानुपूर्व्यात्प्रकीर्तय ॥ १-१३१-१ (५७८९)
वैशम्पायन उवाच। १-१३१-२क्ष् (७७९)
दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा ।
दुःसहो दुःशलश्चैव जलसन्धः समः सहः ॥ १-१३१-२ (५७९०)
विन्दानुविन्दौ दुर्धर्षः सुबाहुर्दुष्प्रधर्षणः ।
दुर्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च ॥ १-१३१-३ (५७९१)
विविंशतिर्विकर्णश्च शलः सत्वः सुलोचनः ।
चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥ १-१३१-४ (५७९२)
दुर्मदो दुर्विगाहश्च विवित्सुर्विकटाननः ।
ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ ॥ १-१३१-५ (५७९३)
चित्रबाणश्चित्रवर्मा सुवर्मा दुर्विमोचनः ।
अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः ॥ १-१३१-६ (५७९४)
भीमवेगो भीमबलो बलाकी बलवर्धनः ।
उग्रायुधः सुषेणश्च कुण्डधारो महोदरः ॥ १-१३१-७ (५७९५)
चित्रायुधो निषङ्गी च पाशी वृन्दारकस्तथा ।
दृढवर्मा दृढक्षत्रः सोमकीर्तिरनूदरः ॥ १-१३१-८ (५७९६)
दृढसन्धो जरासन्धः सत्यसन्धः सदः सुवाक् ।
उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः ॥ १-१३१-९ (५७९७)
अपराजितः कुण्डशायी विशालाक्षो दुराधरः ।
दृढहस्तः सुहस्तश्च वातवेगसुवर्चसौ ॥ १-१३१-१० (५७९८)
आदित्यकेतुर्बह्वाशी नागदत्तोऽग्रयाय्यपि ।
कवची क्रथनः कुण्डी कुण्डधारो धनुर्धरः ॥ १-१३१-११ (५७९९)
उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः ।

अभयो रौद्रकर्मा च तथा दृढरथाश्रयः ॥ १-१३१-१२ (५८००)
अनाधृष्यः कुण्डभेदी विरावी चित्रकुण्डलः ।
प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्यवान् ॥ १-१३१-१३ (५८०१)
दीर्घबाहुर्महाबाहुर्व्यूढोराः कनकध्वजः ।
कुण्डाशी विराजाश्चैव दुःशला च शताधिका ॥ १-१३१-१४ (५८०२)
इति पुत्रशतं राजन्कन्या चैव शताधिका ।
नामधेयानुपूर्व्येण विद्धि जन्मक्रमं नृप ॥ १-१३१-१५ (५८०३)
सर्वे त्वतिरथाः शूराः सर्वे युद्धविशारदाः ।
सर्वे वेदविदश्चैव सर्वे सर्वास्त्रकोविदाः ॥ १-१३१-१६ (५८०४)
सर्वेषामनुरूपाश्च कृता दारा महीपते ।
धृतराष्ट्रेण समये परीक्ष्य विधिवन्नृप ॥ १-१३१-१७ (५८०५)
दुःशलां चापि समये धृतराष्ट्रो नराधिपः ।
जयद्रथाय प्रददौ विधिना भरतर्षभ ॥ १-१३१-१८ (५८०६)
ंइति पुत्रशतं राजन्युयुत्सुश्च शताधिकः ।
कन्यका दुःशला चैव यथावत्कीर्तितं मया'॥ ॥ १-१३१-१९ (५८०७)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

आदिपर्व - अध्याय १३२
॥ श्रीः ॥
१.१३२. अध्यायः १३२

Mahabharata - Adi Parva - Chapter Topics
कुन्त्यां इन्द्रादर्जुनोत्पत्तिः ॥ १ ॥
तद्वेलायां आकाशवाण्यादि ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३२-० (५८०८)
वैशम्पायन उवाच। १-१३२-०क्ष् (७८०)
जाते बलवतां श्रेष्ठे पाण्डुश्चिन्तापरोऽभवत् ।
कथमन्यो मम सुतो लोके श्रेष्ठो भवेदिति ॥ १-१३२-१ (५८०९)
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः ।
तत्र दैवं तु विधिना कालयुक्तेन लभ्यते ॥ १-१३२-२ (५८१०)
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् ।
अप्रमेयबलोत्साहो वीर्यवानमितद्युतिः ॥ १-१३२-३ (५८११)

तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम् ।
यं दास्यति स मे पुत्रं स वीरयान्भविष्यति ॥ १-१३२-४ (५८१२)
अमानुषान्मानुषांश्च संग्रामे स हनिष्यति ।
कर्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः ॥ १-१३२-५ (५८१३)
ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः ।
दिदेश कुन्त्याः कौरव्यो व्रतं सांवत्सरं शुभम् ॥ १-१३२-६ (५८१४)
आत्मना च महाबाहुरेकपादस्थितोऽभवत् ।
उग्रं स तप आस्थाय परमेण समाधिना ॥ १-१३२-७ (५८१५)
आरिराधयिषुर्देवं त्रिदशानां तमीश्वरम् ।
सूर्येण सह धर्मात्मा पर्यतप्यत भारत ॥ १-१३२-८ (५८१६)
तं तु कालेन महता वासवः प्रत्यपद्यत। १-१३२-९ (५८१७)
शक्र उवाच ।
पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् ॥ १-१३२-९क्ष् (७८१)
ब्राह्मणानां गवां चैव सुहृदां चार्थसाधकम् ।
दुर्हृदां शोकजननं सर्वबान्धवनन्दनम् ॥ १-१३२-१० (५८१८)
सुतं तेऽग्र्यं प्रदास्यामि सर्वामित्रविनाशनम् ।
इत्युक्तः कारैवो राजा वासवेन महात्मना ॥ १-१३२-११ (५८१९)
उवाच कुन्तीं धर्मात्मा देवराजवचः स्मरन् ।
उदर्कस्तव कल्याणि तुष्टो देवगणेश्वरः ॥ १-१३२-१२ (५८२०)
दातुमिच्छति ते पुत्रं यथा संकल्पितं त्वया ।
अतिमानुषकर्माणं यशस्विनमरिन्दमम् ॥ १-१३२-१३ (५८२१)
नीतिमन्तं महात्मानमादित्यसमतेजसम् ।
दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् ॥ १-१३२-१४ (५८२२)
पुत्रं जनय सुश्रोणि धाम क्षत्रियतेजसाम् ।
लब्धः प्रसादो देवेन्द्रात्तमाह्वय शुचिस्मिते ॥ १-१३२-१५ (५८२३)
वैशम्पायन उवाच। १-१३२-१६क्ष् (७८२)
एवमुक्ता ततः शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्जुनम् ॥ १-१३२-१६ (५८२४)
\`उत्तराभ्यां तु पूर्वाभ्यां फल्गुनीभ्यां ततो दिवा ।
जातस्तु फाल्गुने मासि तेनासौ फल्गुनःस्मृतः'॥ १-१३२-१७ (५८२५)
जातमात्रे कुमारे तु \`सर्वभूतप्रहर्षिणी ।
सूतके वर्तमानां तां' वागुवाचाशरीरिणी ।
महागम्भीरनिर्घोषा नभो नादयती तदा ॥ १-१३२-१८ (५८२६)
शृण्वतां सर्वभूतानां तेषां चाश्रमवासिनाम् ।
कुन्तीमाभाष्य विस्पष्टमुवाचेदं शुचिस्मिताम् ॥ १-१३२-१९ (५८२७)
कार्तवीर्यसमः कुन्ति शिवतुल्यपराक्रमः ।

एष शक्र इवाजय्यो यशस्ते प्रथयिष्यति ॥ १-१३२-२० (५८२८)
अदित्या विष्णुना प्रीतिर्यथाऽभूदभिवर्धिता ।
तथा विष्णुसमः प्रीतिं वर्धयिष्यति तेऽर्जुनः ॥ १-१३२-२१ (५८२९)
एष मद्रान्वशे कृत्वा कुरूंश्च सह सोमकैः ।
चेदिकाशिकरूषांश्च कुरुलक्ष्मीं वहिष्यति ॥ १-१३२-२२ (५८३०)
एतस्य भुजवीर्येण खाण्डवे हव्यवाहनः ।
मेदसा सर्वभूतानां तृप्तिं यास्यति वै पराम् ॥ १-१३२-२३ (५८३१)
ग्रामणीश्च महीपालानेष जित्वा महाबलः ।
भ्रातृभिः सहितो वीरस्त्रीन्मेधानाहरिष्यति ॥ १-१३२-२४ (५८३२)
जामदग्न्यसमः कुन्ति विष्णुतुल्यपराक्रमः ।
एष वीर्यवतां श्रेष्ठो भविष्यति महायशाः ॥ १-१३२-२५ (५८३३)
एष युद्धे महादेवं तोषयिष्यति शङ्करम् ।
अस्त्रं पाशुपतं नाम तस्मात्तुष्टादवाप्स्यति ॥ १-१३२-२६ (५८३४)
निवातकवचा नाम दैत्या विबुधविद्विषः ।
शक्राज्ञया महाबाहुस्तान्वधिष्यति ते सुतः ॥ १-१३२-२७ (५८३५)
तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति ।
विप्रनष्टां श्रियं चायमाहर्ता पुरुषर्षभः ॥ १-१३२-२८ (५८३६)
एतामत्यद्भुतां वाचं कुन्ती शुश्राव सूतके ।
वाचमुच्चरितामुच्चैस्तां निशम्य तपस्विनाम् ॥ १-१३२-२९ (५८३७)
बभूव पमो हर्षः शतशृङ्गनिवासिनाम् ।
तथा देवमहर्षीणां सेन्द्राणां च दिवौकसाम् ॥ १-१३२-३० (५८३८)
आकाशे दुन्दुभीनां च बभूव तुमुलः स्वनः ।
उदतिष्ठन्महाघोरः पुष्पवृष्टिभिरावृतः ॥ १-१३२-३१ (५८३९)
समवेत्य च देवानां गणाः पार्थमपूजयन् ।
काद्रवेया वैनतेया गन्धर्वाप्सरसस्तथा ।
प्रजानां पतयः सर्वे सप्त चैव महर्षयः ॥ १-१३२-३२ (५८४०)
भरद्वाजः खस्यपो गौतमश्च
विश्वामित्रो जमदग्निर्वसिष्ठः ।
यश्चोदितो भास्करेऽभूत्प्रनष्टे
सोऽप्यत्रात्रिर्भगवानाजगाम ॥ १-१३२-३३ (५८४१)
मरीचिरङ्गिराश्चैव पुलस्त्यः पुलहः क्रतुः ।
दक्षः प्रजापतिश्चैव गन्धर्वाप्सरसस्तथा ॥ १-१३२-३४ (५८४२)
दिव्यमाल्याम्बरधराः सर्वालङ्कारभूषिताः ।
उपगायन्ति बीभत्सुं नृत्यन्तेऽप्सरसां गणाः ॥ १-१३२-३५ (५८४३)
तथा महर्षयश्चापि जेपुस्तत्र समन्ततः ।
गन्धर्वैः सहितः श्रीमान्प्रागायत च तुम्बुरुः ॥ १-१३२-३६ (५८४४)

भीमसेनोग्रसेनौ च ऊर्णायुरनघस्तथा ।
गोपतिर्धृतराष्ट्रश्च सूर्यवर्चास्तथाष्टमः ॥ १-१३२-३७ (५८४५)
युगपस्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा ।
त्रयोदशः शालिशिराः पर्जन्यश्च चतुर्दशः ॥ १-१३२-३८ (५८४६)
कलिः पञ्चदशश्चैव नारदश्चात्र षोडशः ।
ऋत्वा बृहत्त्वा बृहकः करालश्च महामनाः ॥ १-१३२-३९ (५८४७)
ब्रह्मचारी बहुगुणः सुवर्णश्चेति विश्रुतः ।
विश्वावसुर्भुमन्युश्च सुचन्द्रश्च शरुस्तथा ॥ १-१३२-४० (५८४८)
गीतमाधुर्यसंपन्नौ विख्यातौ च हहाहुहू ।
इत्येते देवगन्धर्वा जग्मुस्तत्र नराधिप ॥ १-१३२-४१ (५८४९)
तथैवाप्सरसो हृष्टाः सर्वालङ्कारभूषिताः ।
ननृतुर्वै महाभागा जगुश्चायतलोचनाः ॥ १-१३२-४२ (५८५०)
अनूचानाऽनवद्या च गुणमुख्या गुणावरा ।
अद्रिका च तथा सोमा मिश्रकेशी त्वलम्बुषा ॥ १-१३२-४३ (५८५१)
मरीचिः शुचिका चैव विद्युत्पर्णा तिलोत्तमा ।
अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा ॥ १-१३२-४४ (५८५२)
असिता च सुबाहुश्च सुप्रिया च वपुस्तथा ।
पुण्डरीका सुगन्धा च सुरसा च प्रमाथिनी ॥ १-१३२-४५ (५८५३)
काम्या शारद्वती चैव ननृतुस्तत्र संघशः ।
मेनका सहजन्या च कर्णिका पुञ्जिकस्थला ॥ १-१३२-४६ (५८५४)
ऋतुस्थला घृताची च विश्वाची पूर्वचित्त्यपि ।
उम्लोचेति च विख्याता प्रम्लोचेति च ता दश ॥ १-१३२-४७ (५८५५)
उर्वश्येकादशी तासां जगुश्चायतलोचनाः ।
धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ॥ १-१३२-४८ (५८५६)
इन्द्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ १-१३२-४९ (५८५७)
इत्येते द्वादशादित्या ज्वलन्तः सूर्यवर्चसः ॥ १-१३२-५० (५८५८)
मृगव्याधश्च सर्पश्च निर्ऋतिश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी च परंतप ॥ १-१३२-५१ (५८५९)
दहनोऽथेश्वरश्चैव कपाली च विशांपते ।
स्थाणुर्भगश्च भगवान्रुद्रास्तत्रावतस्थिरे ॥ १-१३२-५२ (५८६०)
अश्विनौ वसवश्चाष्टौ मरुतश्च महाबलाः ।
विश्वेदेवास्तथा साध्यास्तत्रासन्परितः स्थिताः ॥ १-१३२-५३ (५८६१)
कर्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गमः ।
कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरगः ॥ १-१३२-५४ (५८६२)
आययुस्तपसा युक्ता महाक्रोधा महाबलाः ।

एते चान्ये च बहवस्तत्र नागा व्यवस्थिताः ॥१-१३२-५५ (५८६३)
तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चासितध्वजः ।
अरुणश्चारुणिश्चैव वैनतेया व्यवस्थिताः ॥१-१३२-५६ (५८६४)
तांश्च देवगणान्सर्वांस्तपःसिद्धा महर्षयः ।
विमानगिर्यग्रगतान्ददृशुर्नेतरे जनाः ॥१-१३२-५७ (५८६५)
तद्दृष्ट्वा महदाश्चर्यं विस्मिता मुनिसत्तमाः ।
अधिकां स्म ततो वृत्तिमवर्तन्पाण्डवं प्रति ॥१-१३२-५८ (५८६६)
पाण्डुः प्रीतेन मनसा देवतादीनपूजयत् ।
पाण्डुना पूजिता देवाः प्रत्यूचुर्नरसत्तमम् ॥१-१३२-५९ (५८६७)
प्रादुर्बूतो ह्ययं धर्मो देवतानां प्रसादतः ।
मातरिश्वा ह्ययं भीमो बलवानरिमर्दनः ॥१-१३२-६० (५८६८)
साक्षादिन्द्रः स्वयं जातः प्रसादाच्च शतक्रतोः ।
पितृत्वाद्देवतानां हि नास्ति पुण्यतरस्त्वया ॥१-१३२-६१ (५८६९)
पितॄणामृणनिर्मुक्तः स्वर्गं प्राप्स्यसि पुण्यभाक् ।
इत्युक्त्वा देवताः सर्वा विप्रजग्मुर्यथागतम् ॥१-१३२-६२ (५८७०)
पाण्डुस्तु पुनरेवैनां पुत्रलोभान्महायशाः ।
प्रादिशद्दर्शनीयार्थी कुन्ती त्वेनमथाब्रवीत् ॥१-१३२-६३ (५८७१)
नातश्चतुर्थं प्रसवमापस्त्वपि वदन्त्युत ।
अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥१-१३२-६४ (५८७२)
स त्वं विद्वन्धर्ममिममधिगम्य कथं नु माम् ।
अपत्यार्थं समुत्क्रम्य प्रमादादिव भाषसे ॥ ॥१-१३२-६५ (५८७३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥१३२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१३२-८ सूर्येण सह उदयादस्तमयावधि ॥
द्वात्रिंशदधिकशततमोऽध्यायः ॥
१३२ ॥

आदिपर्व - अध्याय १३३
॥ श्रीः ॥
१.१३३. अध्यायः १३३

Mahabharata - Adi Parva - Chapter Topics
अश्विभ्यां माद्र्यां नकुलसहदेवयोरुत्पत्तिः ॥१ ॥
युधिष्ठिरादीनां नामकरणम् ॥२ ॥

वसुदेवप्रेषितेन पुरोहितेन पाण्डवानामुपनयनादिसंस्कारकरणम् ॥ ३ ॥
पाण्डवानां शुक्राद्धनुर्वेदशिक्षणम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३३-० (५८७४)
वैशम्पायन उवाच। १-१३३-०क्ष् (७८३)
कुन्तीपुत्रेषु जातेषु धृतराष्ट्रात्मजेषु च ।
मद्रराजसुता पाण्डुं रहो वचनमब्रवीत् ॥ १-१३३-१ (५८७५)
न मेऽस्ति त्वयि सन्तापो विगुणेऽपि परन्तप ।
नावरत्वे वरार्हायाः स्थित्वा चानघ नित्यदा ॥ १-१३३-२ (५८७६)
गान्धार्याश्चैव नृपते जातं पुत्रशतं तथा ।
श्रुत्वा न मे तथा दुःखमभवत्कुरुनन्दन ॥ १-१३३-३ (५८७७)
इदं तु मे महद्दुःखं तुल्यतायामपुत्रता ।
दिष्ट्या त्विदानीं भर्तुर्मे कुन्त्यामप्यस्ति सन्ततिः ॥ १-१३३-४ (५८७८)
यदि त्वपत्यसन्तानं कुन्तिराजसुता मयि ।
कुर्यादनुग्रहो मे स्यात्तव चापि हितं भवेत् ॥ १-१३३-५ (५८७९)
संरम्भो हि सपत्नीत्वाद्वक्तुं कुन्तिसुतां प्रति ।
यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय ॥ १-१३३-६ (५८८०)
पाण्डुरुवाच। १-१३३-७क्ष् (७८४)
ममाप्येष सदा माद्रि हृद्यर्थः परिवर्तते ।
न तु त्वां प्रसहे वक्तुमिष्टानिष्टविवक्षया ॥ १-१३३-७ (५८८१)
तव त्विदं मतं मत्वा प्रयतिष्याम्यतः परम् ।
मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते ॥ १-१३३-८ (५८८२)
वैशम्पायन उवाच। १-१३३-९क्ष् (७८५)
ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत् ।
ґअनुगृह्णीष्व कल्याणि मद्रराजसुतामपि।ʼ
कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम् ॥ १-१३३-९ (५८८३)
मम चापिण्डनाशाय पूर्वेषां च महात्मनाम् ।
मत्प्रियार्थं च कल्याणि कुरु कल्याणमुत्तमम् ॥ १-१३३-१० (५८८४)
यशसोऽर्थाय चैव त्वं कुरु कर्म सुदुष्करम् ।
प्राप्याधिपत्यमिन्द्रेण यज्ञैरिष्टं यशोऽर्थिना ॥ १-१३३-११ (५८८५)
तथा मन्त्रविदो विप्रास्तपस्तप्त्वा सुदुष्करम् ।
गुरूनभ्युपगच्छन्ति यशसोऽर्थाय भामिनि ॥ १-१३३-१२ (५८८६)
तथा राजर्षयः सर्वे ब्राह्मणाश्च तपोधनाः ।
चक्रुरुच्चावचं कर्म यशसोऽर्थाय दुष्करम् ॥ १-१३३-१३ (५८८७)

सा त्वं माद्रीं प्लवेनैव तारयैनामनिन्दिते ।
अपत्यसंविधानेन परां कीर्तिमवाप्नुहि ॥ १-१३३-१४ (५८८८)
ग्कुन्त्युवाच। १-१३३-१५क्ष् (७८६)
धर्मं वै धर्मशास्त्रोक्तं यथा वदसि तत्तथा ।
तस्मादनुग्रहं तस्याः करोमि कुरुनन्दन ॥' १-१३३-१५ (५८८९)
वैशम्पायन उवाच। १-१३३-१६क्ष् (७८७)
एवमुक्ताऽब्रवीन्माद्रीं सकृच्चिन्तय दैवतम् ।
तस्मात्ते भविताऽपत्यमनुरूपमसंशयम् ॥ १-१३३-१६ (५८९०)
ग्ततो मन्त्रे कृते तस्मिन्विधिदृष्टेन कर्मणा ।
ततो राजसुता स्नाता शयने संविवेश ह ॥' १-१३३-१७ (५८९१)
ततो माद्री विचार्यैका जगाम मनसाऽश्विनौ ।
तावागम्य सुतौ तस्यां जनयामासतुर्यमौ ।
नकुलं सहदेवं च रूपेणाप्रतिमौ भुवि ॥ १-१३३-१८ (५८९२)
तथैव तावपि यमौ वागुवाचाशरीरिणी ।
ग्धर्मतो भक्तितश्चैव शीलतो विनयैस्तथा ॥ १-१३३-१९ (५८९३)
सत्वरूपगुणोपेतौ भवतोऽत्यश्विनाविति ।
मासते तेजसाऽत्यर्थं रूपद्रविणसंपदा ॥ १-१३३-२० (५८९४)
नामानि चक्रिरे तेषां शतशृङ्गनिवासिनः ।
भक्त्या च कर्मणा चैव तथाऽऽशीर्भिर्विशांपते ॥ १-१३३-२१ (५८९५)
ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम् ।
अर्जुनेति तृतीयं च कुन्तीपुत्रानकल्पयन् ॥ १-१३३-२२ (५८९६)
पूर्वजं नकुलेत्येवं सहदेवेति चापरम् ।
माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः ॥ १-१३३-२३ (५८९७)
अनुसंवत्सरं जाता अपि ते कुरुसत्तमाः ।
पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव ॥ १-१३३-२४ (५८९८)
महासत्त्वा महावीर्या महाबलपराक्रमाः ।
पाण्डुर्दृष्ट्वा सुतांस्तांस्तु देवरूपान्महौजसः ॥ १-१३३-२५ (५८९९)
मुदं परमिकां लेभे ननन्द च नराधिपः ।
ऋषीणामपि सर्वेषां शतशृङ्गनिवासिनाम् ॥ १-१३३-२६ (५९००)
प्रिया बभूवुस्तासां च तथैव मुनियोषिताम् ।
कुन्तीमथ पुनः पाण्डुर्माद्र्यर्थे समचोदयत् ॥ १-१३३-२७ (५९०१)
तमुवाच पृथा राजन् रहस्युक्ता तदा सती ।
उक्ता सक्वद्द्वन्द्वमेषा लेभे तेनास्मि वञ्चिता ॥ १-१३३-२८ (५९०२)
बिभेम्यस्याः परिभवात्कुस्त्रीणां गतिरिदृशी ।
नाज्ञासिषमहं मूढा द्वन्द्वाह्वाने फलद्वयम् ॥ १-१३३-२९ (५९०३)
तस्मान्नाहं नियोक्तव्या त्वयैषोऽस्तु वरो मम ।

एवं पाण्डोः सुताः पञ्च देवदत्ता महाबलाः ॥१-१३३-३० (५९०४)
संभूताः कीर्तिमन्तश्च कुरुवंशविवर्धनाः ।
शुभलक्षणसंपन्नाः सोमवत्प्रियदर्शनाः ॥१-१३३-३१ (५९०५)
सिंहदर्पा महेष्वासाः सिंहविक्रान्तगामिनः ।
सिंहग्रीवा मनुष्येन्द्रा ववृधुर्देवविक्रमाः ॥१-१३३-३२ (५९०६)
विवर्धमानास्ते तत्र पुण्ये हैमवते गिरौ ।
विस्मयं जनयामासुर्महर्षीणां समेयुषाम् ॥१-१३३-३३ (५९०७)
ग्जातमात्रानुपादाय शतशृङ्गनिवासिनः ।
पाण्डोः पुत्रानमन्यन्त तापसाः स्वानिवात्मजान् ॥१-१३३-३४ (५९०८)
वैशम्पायन उवाच।१-१३३-३५क्ष् (७८८)
ततस्तु वृष्णयः सर्वे वसुदेवपुरोगमाः ॥ १-१३३-३५ (५९०९)
पाण्डुः शापभयाद्भीतः शतशृङ्गमुपेयिवान् ।
तत्रैव मुनिभिः सार्धं तापसोऽभूत्तपस्विभिः ॥१-१३३-३६ (५९१०)
शाकमूलफलाहारस्तपस्वी नियतेन्द्रियः ।
योगध्यानपरो राजा बभूवेति च वादकाः ॥१-१३३-३७ (५९११)
प्रबुवन्ति स्म बहवस्तच्छ्रुत्वा शोककर्शिताः ।
पाण्डोः प्रीतिसमायुक्ताः कदा श्रोष्याम संकथाः ॥१-१३३-३८ (५९१२)
इत्येवं कथयन्तस्ते वृष्णयः सह बान्धवैः ।
पाण्डोः पुत्रागमं श्रुत्वा सर्वे हर्षसमन्विताः ॥१-१३३-३९ (५९१३)
सभाजयन्तस्तेऽन्योन्यं वसुदेवं वचोऽब्रुवन् ।
न भवेरन्क्रियाहीनाः पाण्डुपुत्रा महाबलाः ॥१-१३३-४० (५९१४)
पाण्डोः प्रियहितान्वेषी प्रेषय त्वं पुरोहितम् ।
वसुदेवस्तथेत्युक्त्वा विससर्ज पुरोहितम् ॥१-१३३-४१ (५९१५)
युक्तानि च कुमाराणां पारबर्हाण्यनेकशः ।
कुन्तीं माद्रीं च संदिश्य दासीदासपरिच्छदम् ॥१-१३३-४२ (५९१६)
गावो हिरण्यं रौप्यं च प्रेषयामास भारत ।
तानि सर्वाणि संगृह्य प्रययौ स पुरोहितः ॥१-१३३-४३ (५९१७)
तमागतं द्विजश्रेष्ठं काश्यपं वै पुरोहितम् ।
पूजयामास विधिवत्पाण्डुः परपुरञ्जयः ॥१-१३३-४४ (५९१८)
पृथा माद्री च संहृष्टे वसुदेवं प्रशंसताम् ।
ततः पाण्डुः क्रियाः सर्वाः पाण्डवानामकारयत् ॥१-१३३-४५ (५९१९)
गर्भाधानादिकृत्यानि चौलोपनयनानि च ।
काश्यपः कृतवान्सर्वमुपाकर्म च भारत ॥१-१३३-४६ (५९२०)
चौलोपनयनादूर्ध्वमृषभाक्षा यशस्विनः ।
वैदिकाध्ययने सर्वे समपद्यन्त पारगाः ॥१-१३३-४७ (५९२१)
शर्यातेः प्रथमः पुत्रः शुक्रो नाम परन्तपः ।

येन सागरपर्यन्ता धुषा निर्जिता मही ॥ १-१३३-४८ (५९२२)
अश्वमेधशतैरिष्ट्वा स महात्मा महामखैः ।
आराध्य देवताः सर्वाः पितॄनपि महामतिः ॥ १-१३३-४९ (५९२३)
शतशृङ्गे तपस्तेपे शाकमूलफलाशनः ।
तेनोपकरणश्रेष्ठैः शिक्षया चोपबृंहिताः ॥ १-१३३-५० (५९२४)
तत्प्रसादाद्धनुर्वेदे समपद्यन्त पारगाः ।
गदायां पारगो भीमस्तोमरेषु युधिष्ठिरः ॥ १-१३३-५१ (५९२५)
असिचर्मणि निष्णातौ यमौ सत्त्ववतां वरौ ।
धनुर्वेदे गतः पारं सव्यसाची परन्तपः ॥ १-१३३-५२ (५९२६)
शुक्रेण समनुज्ञातो मत्समोऽयमिति प्रभो ।
अनुज्ञाय ततो राजा शक्तिं खङ्गं ततः शरान् ॥ १-१३३-५३ (५९२७)
धनुश्च दमतां श्रेष्ठस्तालमात्रं महाप्रभम् ।
विपाठक्षुरनाराचान्गृध्रपक्षैरलङ्कृतान् ॥ १-१३३-५४ (५९२८)
ददौ पार्थाय संहृष्टो महोरगसमप्रभान् ।
अवाप्य सर्वशस्त्राणि मुदितो वासवात्मजः ॥ १-१३३-५५ (५९२९)
मेने सर्वान्महीपालानपर्याप्तान्स्वतेजसः ॥ १-१३३-५६ (५९३०)
एकवर्षान्तरास्त्वेवं परस्परमरिन्दमाः ।
अन्ववर्तन्त पार्थाश्च माद्रीपुत्रौ तथैव च ॥' १-१३३-५७ (५९३१)
ते च पञ्च शतं चैव कुरुवंशविवर्धनाः ।
सर्वे ववृधिरेऽल्पेन कालेनाप्स्विव पङ्कजाः ॥ ॥ १-१३३-५८ (५९३२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१३३-२ विगुणे प्रजोत्पादनानधिकृते । अवरत्वे कनिष्ठात्वे। वरार्हायाः कुन्त्या अपेक्षया ॥
१-१३३-६ संरम्भोऽभिमानः ॥
१-१३३-७ इष्टमनिष्टं वा वक्ष्यसीति संदेहेन ॥
१-१३३-८ प्रतिपत्स्यते अङ्गीकरिष्यति ॥
१-१३३-९ सतानमविच्छेदम् ॥
१-१३३-१० मम पूर्वेषां चापिण्डनाशाय पिण्डविनाशाभावाय । बहुषु पुत्रेषु कस्यचिदपि पुत्रस्य संततेरविच्छेदसंभवादित्यर्थः ॥
१-१३३-११ यशस इति कृतकृत्या अपि यशोर्थं देवगुर्वाद्याराधनं कुर्वन्तीत्यर्थः ॥
१-१३३-२० अत्यश्विनौ अश्विभ्यामधिकौ ॥

१-१३३-२४ अनुसंवत्सरं संवत्सरमनु पश्चाज्जाता अपि
देवताभावात्सर्वे पञ्चसंवत्सरा इवादृश्यन्तेत्यर्थः ॥
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥
१३३ ॥

आदिपर्व - अध्याय १३४
॥ श्रीः ॥
१.१३४. अध्यायः १३४

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानामायुष्यकथनम् ॥ १ ॥
माद्र्या मैथुनप्रवृत्तस्य पाण्डोर्मरणम् ॥ २ ॥
पाण्डवप्रलापः ॥ ३ ॥
माद्र्याः सहगमनम् ॥ ४ ॥
मृतस्य पाण्डोर्दहनादिसंस्कारः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३४-० (५९३३)
ग्जनमेजय उवाच। १-१३४-०क्ष् (७८९)
कस्मिन्वयसि संप्राप्ताः पाण्डवा गजसाह्वयम् ।
समपद्यन्त देवेभ्यस्तेषामायुश्च किं परम् ॥ १-१३४-१ (५९३४)
वैशम्पायन उवाच। १-१३४-२क्ष् (७९०)
पाण्डवानामिहायुष्यं शृणु कौरवनन्दन ।
जगाम हास्तिनपुरं षोडशाब्दो युधिष्ठिरः ॥ १-१३४-२ (५९३५)
भीमसेनः पञ्चदशो बीभत्सुर्वै चतुर्दशः ।
त्रयोदशाब्दौ च यमौ जग्मतुर्नागसाह्वयम् ॥ १-१३४-३ (५९३६)
तत्र त्रयोदशाब्दानि धार्तराष्ट्रैः सहोषिताः ।
षण्मासाञ्जातुषगृहान्मुक्ता जातो घटोत्कचः ॥ १-१३४-४ (५९३७)
षण्मासानेकचक्रायां वर्षं पाञ्चालके गृहे ।
धार्तराष्ट्रैः सहोषित्वा पञ्च वर्षाणि भारत ॥ १-१३४-५ (५९३८)
इन्द्रप्रस्थे वसन्तस्ते त्रीणि वर्षाणि विंशतिम् ।
द्वादशाब्दानथैकं च बभूवुर्द्यूतनिर्जिताः ॥ १-१३४-६ (५९३९)
भुक्त्वा षट्त्रिंशतं राजन्सागरान्तां वसुन्धराम् ।
मासैः षड्भिर्महात्मानः सर्वे कृष्णपरायणाः ॥ १-१३४-७ (५९४०)
राज्ये परीक्षितं स्थाप्य दिष्टां गतिमवाप्नुवन् ।
एवं युधिष्ठिरस्यासीदायुरष्टोत्तरं शतम् ॥ १-१३४-८ (५९४१)

अर्जुनात्केशवो ज्येष्ठस्त्रिभिर्मासैर्महाद्युतिः ।
कृष्णात्संकर्षणो ज्येष्ठस्त्रिभिर्मासैर्महाबलः ॥ १-१३४-९ (५९४२)
पाण्डुः पञ्चमहातेजास्तान्पश्यन्पर्वते सुतान् ।
रेमे स काश्यपयुतः पत्नीभ्यां सुभृशं तदा ॥ १-१३४-१० (५९४३)
सुपुष्पितवने काले प्रवृत्ते मधुमाधवे ।
पूर्णे चतुर्दशे वर्षे फल्गुनस्य च धीमतः ॥ १-१३४-११ (५९४४)
यस्मिन्नृक्षे समुत्पन्नः पार्थस्तस्य च धीमतः ।
तस्मिन्नुत्तरफल्गुन्यां प्रवृत्ते स्वस्तिवाचने ॥ १-१३४-१२ (५९४५)
रक्षणे विस्मृता कुन्ती व्यग्रा ब्राह्मणभोजने ।
पुरोहितेन सहितान्ब्राह्मणान्पर्यवेषयत् ॥' १-१३४-१३ (५९४६)
वैशम्पायन उवाच। १-१३४-१४क्ष् (७९१)
दर्शनीयांस्ततः पुत्रान्पाण्डुः पञ्च महावने ।
तान्पश्यन्पर्वते रम्ये स्वबाहुबलमाश्रितः ॥ १-१३४-१४ (५९४७)
सुपुष्पितवने काले कदाचिन्मधुमाधवे ।
भूतसंमोहने राजा सभार्यो व्यचरद्वनम् ॥ १-१३४-१५ (५९४८)
पलाशैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।
अन्यैश्च बहुभिर्वृक्षैः फलपुष्पसमृद्धिभिः ॥ १-१३४-१६ (५९४९)
जलस्थानैश्च विविधैः पद्मिनीभिश्च शोभितम् ।
पाण्डोर्वनं तत्संप्रेक्ष्य प्रजज्ञे हृदि मन्मथः ॥ १-१३४-१७ (५९५०)
प्रहृष्टमनसं तत्र विचरन्तं यथाऽमरम् ।
तं माद्र्यनुजगामैका वसनं बिभ्रती शुभम् ॥ १-१३४-१८ (५९५१)
समीक्षमाणः स तु तां वयःस्थां तनुवाससम् ।
तस्य कामः प्रवृते गहनेऽग्निरिवोद्गतः ॥ १-१३४-१९ (५९५२)
रहस्येकां तु तां दृष्ट्वा राजा राजीवलोचनाम् ।
न शशाक नियन्तुं तं कामं कामवशीकृतः ॥ १-१३४-२० (५९५३)
`अथ सोऽष्टादशे वर्षे ऋतौ माद्रमलङ्कृताम् ।
आजुहाव ततः पाण्डुः परीतात्मा यशस्विनीम् ॥' १-१३४-२१ (५९५४)
तत एनां बलाद्राजा निजग्राह रहोगताम् ।
वार्यमाणस्तया देव्या विस्फुरन्त्या यथाबलम् ॥ १-१३४-२२ (५९५५)
स तु कामपरीतात्मा तं शापं नान्वबुध्यत ।
माद्रीं मैथुनधर्मेण सोऽन्वगच्छद्बलादिव ॥ १-१३४-२३ (५९५६)
जीवितान्ताय कौरव्य मन्मथस्य वशं गतः ।
शापजं भयमुत्सृज्य विधिना संप्रचोदितः ॥ १-१३४-२४ (५९५७)
तस्य कामात्मनो बुद्धिः साक्षात्कालेन मोहिता ।
संप्रमथ्येन्द्रियग्रामं प्रनष्टा सह चेतसा ॥ १-१३४-२५ (५९५८)
स तया सह संगम्य भार्यया कुरुनन्दनः ।

पाण्डुः परमधर्मात्मा युयुजे कालधर्मणा ॥ १-१३४-२६ (५९५९)
ततो माद्री समालिङ्ग्य राजानं गतचेतसम् ।
मुमोच दुःखजं शब्दं पुनः पुनरतीव हि ॥ १-१३४-२७ (५९६०)
सह पुत्रैस्ततः कुन्ती माद्रीपुत्रौ च पाण्डवौ ।
आजग्मुः सहितास्तत्र यत्र राजा तथागतः ॥ १-१३४-२८ (५९६१)
ततो माद्र्यब्रवीद्राजन्नार्ता कुन्तीमिदं वचः ।
एकैव त्वमिहागच्छ तिष्ठन्त्वत्रैव दारकाः ॥ १-१३४-२९ (५९६२)
तच्छ्रुत्वा वचनं तस्यास्तत्रैवाधाय दरकान् ।
हता अमिति विक्रुश्य सहसैवाजगाम सा ॥ १-१३४-३० (५९६३)
दृष्ट्वा पाण्डुं च माद्रीं च शयानौ धरणीतले ।
कुन्ती शोकपरीताङ्गी विललाप सुदुःखिता ॥ १-१३४-३१ (५९६४)
रक्ष्यमाणो मया नित्यं वीरः सततमात्मवान् ।
कथं त्वामत्यतिक्रान्तः शापं जानन्वनौकसः ॥ १-१३४-३२ (५९६५)
ननु नाम त्वया माद्रि रक्षितव्यो नराधिपः ।
सा कथं लोभितवती विजने त्वं नराधिपम् ॥ १-१३४-३३ (५९६६)
कथं दीनस्य सततं त्वामासाद्य रहोगताम् ।
तं विचिन्तयतः शापं प्रहर्षः समजायत ॥ १-१३४-३४ (५९६७)
धन्या त्वमसि बाह्लीकि मत्तो भाग्यतरा तथा ।
दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः ॥ १-१३४-३५ (५९६८)
माद्र्युवाच। १-१३४-३६क्ष् (७९२)
विलपन्त्या मया देवि वार्यमाणेन चासकृत् ।
आत्मा न वारितोऽनेन सत्यं दिष्टं चिकीर्षुणा ॥ १-१३४-३६ (५९६९)
ग्वैशंपायान उवाच। १-१३४-३७क्ष् (७९३)
तस्यास्तद्वचनं श्रुत्वा कुन्ती शोकाग्निदीपिता ।
पपात सहसा भूमौ छिन्नमूल इव द्रुमः ॥ १-१३४-३७ (५९७०)
निश्चेष्टा पतिता भूमौ मोहेन न चचाल सा ।
तस्मिन्क्षणे कृतस्नानमहताम्बरसंवृतम् ॥ १-१३४-३८ (५९७१)
अलङ्कारकृतं पाण्डुं शयानं शयने शुभे ।
कुन्तीमुत्थाप्य माद्री तु मोहेनाविष्टचेतनाम् ॥ १-१३४-३९ (५९७२)
आर्ये एहीति तां कुन्तीं दर्शयामास कौरव ।
पादयोः पतिता कुन्ती पुनरुत्थाय भूमिपम् ॥ १-१३४-४० (५९७३)
रक्तचन्दनदिग्धांङ्गं महारजनवाससम् ।
सस्मितेन च वक्त्रेण वदन्तमिव भारतम् ॥ १-१३४-४१ (५९७४)
परिरभ्य ततो मोहाद्विललापाकुलेन्द्रिया ।
माद्री चापि समालिङ्ग्य राजानं विललाप सा ॥ १-१३४-४२ (५९७५)
तं तथा शायिनं पुत्रा ऋषयः सह चारणैः ।

अभ्येत्य सहिताः सर्वे शोकादश्रूण्यवर्तयन् ॥१-१३४-४३ (५९७६)
अस्तं गतमिवादित्यं संशुष्कमिव सागरम् ।
दृष्ट्वा पाण्डुं नरव्याघ्रं शोचन्ति स्म महर्षयः ॥१-१३४-४४ (५९७७)
समानशोका ऋषयः पाण्डवाश्च बभूविरे ।
ते समाश्वासिते विप्रैर्विलेपतुरनिन्दिते ॥१-१३४-४५ (५९७८)
कुन्त्युवाच।१-१३४-४६क्ष् (७९४)
हा राजन्कस्य नो हित्वा गच्छसि त्रिदशालयम् ।
हा राजन्मम मन्दायाः कथं माद्रीं समेत्य वै ॥१-१३४-४६ (५९७९)
निधनं प्राप्तवान्राजन्मद्भाग्यपरिसंक्षयात् ।
युधिष्ठिरं भीमसेनमर्जुनं च यमावुभौ ॥१-१३४-४७ (५९८०)
कस्य हित्वा प्रियान्पुत्रान्प्रयातोऽसि विशांपते ।
नूनं त्वां त्रिदशा देवाः प्रतिनन्दन्ति भारत ॥१-१३४-४८ (५९८१)
यतो हि तप उग्रं वै चरितं ब्रह्मसंसदि ।
आवाभ्यां सहितो राजन्गमिष्यसि दिवं शुभम् ॥१-१३४-४९ (५९८२)
आजमीढाजमीढानां कर्मणा चरतां गतिम् ।
ननु नाम सहावाभ्यां गमिष्यामीति यत्त्वया ॥१-१३४-५० (५९८३)
प्रतिज्ञाता कुरुश्रेष्ठ यदाऽस्मि वनमागता ।
आवाभ्यां चैव सहितो गमिष्यसि विशांपते ।
मुहूर्तं क्षम्यतां राजन्द्रक्ष्येऽहं च मुखं तव ॥ १-१३४-५१ (५९८४)
वैशम्पायन उवाच।१-१३४-५२क्ष् (७९५)
विलपित्वा भृशं चैव निःसंज्ञे पतिते भुवि ।
यथा हते मृगे मृग्यौ लुब्धैर्वनगते तथा ॥१-१३४-५२ (५९८५)
युधिष्ठिरमुखाः सर्वे पाण्डवा वेदपरागाः ।
तेऽभ्यागत्य पितुर्मूले निःसंज्ञाः पतिता भुवि ॥१-१३४-५३ (५९८६)
पाण्डोः पादौ परिष्वज्य विलपन्ति स्म पाण्डवाः ।
हा विनष्टाः स्म तातेति हा अनाथा भवामहे ॥१-१३४-५४ (५९८७)
त्वद्विहीना महाप्राज्ञ कथं जीवाम बालकाः ।
लोकनाथस्य पुत्राः स्मो न सनाथा भवामहे ॥१-१३४-५५ (५९८८)
क्षणेनैव महाराज अहो लोकस्य चित्रता ।
नास्मद्विधा राजपुत्रा अधन्याः सन्ति भारत ॥१-१३४-५६ (५९८९)
त्वद्विनाशाच्च राजेन्द्र राज्यप्रस्खलनात्तदा ।
पाण्डवाश्च वयं सर्वे प्राप्ताः स्म व्यसनं महत् ॥१-१३४-५७ (५९९०)
किं करिष्यामहे राजन्कर्तव्यं च प्रसीदताम्। १-१३४-५८ (५९९१)
भीमसेन उवाच ।
हित्वा राज्यं च भोगांश्च शतशृङ्गनिवासिना ॥ १-१३४-५८क्ष् (७९६)
त्वया लब्धाः स्म राजेन्द्र महता तपसा वयम् ।

हित्वा मानं वनं गत्वा स्वयमाहृत्य भक्षणम् ॥१-१३४-५९ (५९९२)
शाकमूलफलैर्वन्यैर्भरणं वै त्वया कृतम् ।
पुत्रानुत्पाद्य पितरो यमिच्छित महातम्नः ॥१-१३४-६० (५९९३)
त्रिवर्गफलमिच्छन्तस्तस्य कालोऽयमागतः ।
अभुक्त्वैव फलं राजन्गान्तुं नार्हसि भारत ॥१-१३४-६१ (५९९४)
इत्येवमुक्त्वा पितरं भीमोऽपि विललाप ॥ १-१३४-६२ (५९९५)
अर्जुन उवाच।१-१३४-६३क्ष् (७९७)
प्रनष्टं भारतं वंशं पाण्डुना पुनरुद्धृतम् ।
तस्मिंस्तदा वनगते नष्टं राज्यमराजकम् ॥१-१३४-६३ (५९९६)
पुनर्निःसारितं क्षत्रं पाण्डुपुत्रैश्च पञ्चभिः ।
एतच्छ्रुत्वाऽनुमोदित्वा गन्तुमर्हसि शङ्कर ॥१-१३४-६४ (५९९७)
इत्येवमुक्त्वा पितरं विललाप धनञ्जयः। १-१३४-६५ (५९९८)
यमावूचतुः ।
दुःसहं च तपः कृत्वा लब्ध्वा नो भरतर्षभ ॥ १-१३४-६५क्ष् (७९८)
पुत्रलाभस्य महतः शुश्रूषादिफलं त्वया ।
न चावाप्तं किंचिदेव पुरा दशरथो यथा ॥१-१३४-६६ (५९९९)
एवमुक्त्वा यमौ चापि विलेपतुरथातुरौ ॥' १-१३४-६७ (६०००)
कुन्त्युवाच।१-१३४-६८क्ष् (७९९)
अहं ज्येष्ठा धर्मपत्नी ज्येष्ठं धर्मफलं मम ।
अवश्यं भाविनो भावान्मा मां माद्रि निवर्तय ॥१-१३४-६८ (६००१)
अन्विष्यामीह भर्तारमहं प्रेतवशं गतम् ।
उत्तिष्ठ त्वं विसृज्यैनमिमान्रक्षस्व दारकान् ॥१-१३४-६९ (६००२)
ॽअवाप्य पुत्रांल्लब्धार्थान्वीरपत्नीत्वमर्थये। १-१३४-७० (६००३)
वैशम्पायन उवाच ।
मद्रराजसुता कुन्तीमिदं वचनमब्रवीत् ॥' १-१३४-७०क्ष् (८००)
अहमेवानुयास्यामि भर्तारमपलापिनम् ।
न हि तृप्ताऽस्मि कामानां ज्येष्ठा मामनुमन्यताम् ॥१-१३४-७१ (६००४)
मां चाभिगम्य क्षीणोऽयं कामाद्भरतसत्तमः ।
समुच्छिद्यामि तत्कामं कथं नु यमसादने ॥१-१३४-७२ (६००५)
ॽमम हतोर्हि राजाऽयं दिवं राजर्षिसत्तमः ।
न चैव तादृशी बुद्धिर्बान्धवाश्च न तादृशाः ॥१-१३४-७३ (६००६)
न चोत्सहे धारयितुं प्राणान्भर्त्रा विना कृता ।
तस्मात्तमनुयास्यामि यान्तं वैवस्वतक्षयम् ॥१-१३४-७४ (६००७)
वर्तेयं न समां वृत्तिं जात्वहं न सुतेषु ते ।
तथाहि वर्तमानां मामधर्मः संस्पृशेन्महान् ॥१-१३४-७५ (६००८)
तस्मान्मे सुतयोर्देवि वर्तितव्यं स्वपुत्रवत् ।

अन्वेष्यामि च भर्तारं व्रजन्तं यमसादनम् ॥' १-१३४-७६ (६००९)
मां हि कामयमानोऽयं राजा प्रेतवशं गतः ।
राज्ञः शरीरेण सह मामपीदं कलेवरम् ॥१-१३४-७७ (६०१०)
दग्धव्यं सुप्रतिच्छन्नं त्वेतदार्ये प्रियं कुरु ।
दारकेष्वप्रमत्ता त्वं भवेश्चाभिहिता मया ।
अतोऽहं न प्रपश्यामि संदेष्टव्यं हितं तव ॥ १-१३४-७८ (६०११)
ग्वैशम्पायन उवाच।१-१३४-७९क्ष् (८०१)
ऋषयस्तान्समाश्वास्य पाण्डवान्सत्यविक्रमान् ।
ऊचुः कुन्तीं च माद्रीं च समाश्वास्य तपस्विनः ॥१-१३४-७९ (६०१२)
सुभगे बालपुत्रा तु न मर्तव्यं तथंचन ।
पाण्डवांश्चापि नेष्यामः कुरुराष्ट्रं परन्तपान् ॥१-१३४-८० (६०१३)
अधर्मेष्वर्थजातेषु धृतराष्ट्रश्च लोभवान् ।
स कदाचिन्न वर्तेत पाण्डवेषु यथाविधि ॥१-१३४-८१ (६०१४)
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
माद्र्याश्च बलिनांश्रेष्ठः शल्यो भ्राता महारथः ॥१-१३४-८२ (६०१५)
भर्त्रा तु मरणं सार्धं फलवन्नात्र संशयः ।
युवाभ्यां दुष्करं चैतद्वदन्ति द्विजपुङ्गवाः ॥१-१३४-८३ (६०१६)
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता ।
यमैश्च नियमैः पूता मनोवाक्कायजैः शुभा ॥१-१३४-८४ (६०१७)
भर्तारं चिन्तयन्ती सा भर्तारं निस्तरेच्छुभा ।
तारितश्चापि भर्ता स्यादात्मा पुत्रस्तथैव च ॥१-१३४-८५ (६०१८)
तस्माज्जीवितमेवैतद्युवयोर्विद्म शोभनम् ॥ १-१३४-८६ (६०१९)
कुन्त्युवाच।१-१३४-८७क्ष् (८०२)
यथा पाण्डोस्तु निर्देशस्तथा विप्रगणस्य च ।
आज्ञा शिरसि निक्षिप्ता करिष्यामि च तत्तथा ॥१-१३४-८७ (६०२०)
यदाहुर्भगवन्तोऽपि तन्मन्ये शोभनं परम् ।
भर्तुश्च मम पुत्राणामात्मनश्च न संशयः ॥१-१३४-८८ (६०२१)
माद्र्युवाच।१-१३४-८९क्ष् (८०३)
कुन्ती समर्था पुत्राणां योगक्षेमस्य धारणे ।
अस्या हि न समा बुद्ध्या यद्यपि स्यादरुन्धती ॥१-१३४-८९ (६०२२)
कुन्त्याश्च वृष्णयो नाथाः कुन्तिभोजस्तथैव च ।
नाहं त्वमिव पुत्राणां समर्था धारणे तथा ॥१-१३४-९० (६०२३)
साऽहं भर्तारमन्विष्ये संतृप्ता नापि भोगतः ।
भर्तृलोकस्य तु ज्येष्ठा देवी मामनुमन्यताम् ॥१-१३४-९१ (६०२४)
धर्मज्ञस्य कृतज्ञस्य सत्यसन्धस्य धीमतः ।
पादौ परिचरिष्यामि तथार्याऽद्यानुमन्यताम् ॥१-१३४-९२ (६०२५)

वैशम्पायन उवाच। १-१३४-९३क्ष् (८०४)
एवमुक्त्वा तदा राजन्मद्रराजसुता शुभा ।
ददौ कुन्त्यै यमौ माद्री शिरसाऽभिप्रणम्य च ॥ १-१३४-९३ (६०२६)
अभिवाद्य महर्षीन्सा परिष्वज्य च पाण्डवान् ।
मूर्ध्न्युपाघ्राय बहुशः पार्थानात्मसुतौ तदा ॥ १-१३४-९४ (६०२७)
हस्ते युधिष्ठिरं गृह्य माद्री वाक्यमभाषत ।
कुन्ती माता अहं धात्री युष्माकं तु पिता मृतः ॥ १-१३४-९५ (६०२८)
युधिष्ठिरः पिता ज्येष्ठश्चतुर्णां धर्मतः सदा ।
वृद्धाद्युपासनासक्ताः सत्यधर्मपरायणाः ॥ १-१३४-९६ (६०२९)
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ।
तस्मात्सर्वे कुरुध्वं वै गुरुवृत्तिमतन्द्रिताः ॥ १-१३४-९७ (६०३०)
वैशम्पायन उवाच। १-१३४-९८क्ष् (८०५)
ऋषीणां च पृथायाश्च नमस्कृत्य पुनःपुनः ।
आयासकृपणा माद्री प्रत्युवाच पृथां तदा ॥ १-१३४-९८ (६०३१)
माद्र्युवाच। १-१३४-९९क्ष् (८०६)
ऋषीणां संनिधावेषां यथा वागभ्युदीरिता ।
दिदृक्षमाणायाः स्वर्गं न ममैषा वृथा भवेत् ॥ १-१३४-९९ (६०३२)
धन्या त्वमसि वार्ष्णेयि नास्ति स्त्री सदृशी त्वया ।
वीर्यं तेजश्च योगं च माहात्म्यं च यशस्विनाम् ॥ १-१३४-१०० (६०३३)
कुन्ति द्रक्ष्यसि पुत्राणां पञ्चानाममितौजसाम् ।
आर्या चाप्यभिवाद्या च मम पूज्या च सर्वतः ॥ १-१३४-१०१ (६०३४)
ज्येष्ठा वरिष्ठा त्वं देवि भूषिता स्वगुणैः शुभैः ।
अभ्यनुज्ञातुमिच्छामि त्वया यावनन्दिनि ॥ १-१३४-१०२ (६०३५)
धर्मं स्वर्गं च कीर्तिं च त्वत्कृतेऽहमवाप्नुयाम् ।
यथा तथा विधत्स्वेह मा च कार्षीर्विचारणां ॥ १-१३४-१०३ (६०३६)
वैशम्पायन उवाच। १-१३४-१०४क्ष् (८०७)
बाष्पसंदिग्धया वाचा कुन्त्युवाच यशस्विनी ।
अनुज्ञाताऽसि कल्याणि त्रिदिवे सङ्गमोऽस्तु ते ॥ १-१३४-१०४ (६०३७)
भर्त्रा सह विशालिक्षि क्षिप्रमद्यैव भामिनि ।
संगतास्वर्गलोके त्वं रमेथाः शाश्वतीः समाः ॥ १-१३४-१०५ (६०३८)
वैशम्पायन उवाच। १-१३४-१०६क्ष् (८०८)
ततः पुरोहितः स्नात्वा प्रेतकर्मणि पारगः ।
हिरण्यशकलानाज्यं तिलं दधि च तण्डुलान् ॥ १-१३४-१०६ (६०३९)
उदकुम्भांश्च परशुं समानीय तपस्विभिः ।
अश्वमेधाग्निमाहृत्य यथान्यायं समन्ततः ॥ १-१३४-१०७ (६०४०)
काश्यपः कारयामास पाण्डोः प्रेतस्य तां क्रियाम् ।

पुरोहितोक्तविधिना पाण्डोः पुत्रो युधिष्ठिरः ॥ १-१३४-१०८ (६०४१)
तेनाग्निनाऽदहत्पाण्डुं कृत्वा चापि क्रियास्तदा ।
रुदञ्छोकाभिसंतप्तः पपात भुवि पाण्डवः ॥ १-१३४-१०९ (६०४२)
ऋषीन्पुत्रान्पृथां चैव विसृज्य च नृपात्मज।'
नमस्कृत्य चिताग्निस्थं धर्मपत्नी नरर्षभम् ॥ १-१३४-११० (६०४३)
मद्रराजसुता तूर्णमन्वारोहद्यशस्विनी ॥ १-१३४-१११ (६०४४)
ग्अहताम्बरसंवीतो भ्रातृभिः सहितोऽनघः ।
उदकं कृतवांस्तत्र पुरोहितमते स्थितः ॥ १-१३४-११२ (६०४५)
अर्हतस्तस्य कृत्यानि शतशृङ्गनिवासिनः ।
तापसा विधिवच्चक्रुश्चारणा ऋषिभिः सह ॥ ॥ १-१३४-११३ (६०४६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१३४-१५ मधुभाधवे चैत्रवैशाखयोः संधौ तदात्मके वसन्ते ॥
१-१३४-१९ वयः स्थां युवतीम् । तनुवाससं सूक्ष्मवस्त्रां
किंचिद्विवृताङ्गामित्यर्थः ॥
१-१३४-२३ कामपरीतात्मा कामेन व्याप्तचित्तः ॥
१-१३४-२५ बुद्धिर्भयनिश्चयः । चेतसा विचारेण ॥
१-१३४-२६ कालधर्मणा मृत्युना ॥
१-१३४-२८ तथागतः मृतः ॥
१-१३४-३२ त्वामत्यतिक्रान्तो बलादाक्रान्तवान्
। शोकाकुलत्वादतिशब्दस्याभ्यासः ॥
१-१३४-३४ प्रहर्षः कामः ॥
१-१३४-३६ आत्मा चित्तम् । दिष्टं शापजं दुरदृष्टम् ॥
१-१३४-६९ प्रेतवशं प्रेतराजवशम् । अन्विष्याम्यनुगमिष्यामि ॥
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥
१३४ ॥

आदिपर्व - अध्याय १३५
॥ श्रीः ॥
१.१३५. अध्यायः १३५

Mahabharata - Adi Parva - Chapter Topics
पाण्डवैः सह ऋषीणां हस्तिनापुरगमनम् ॥ १ ॥
पाण्डुवृत्तान्तकथनपूर्वकं पाण्डवान्भीष्माय समर्प्य ऋषीणां

१-१३५-० (६०४७)
वैशम्पायन उवाच। १-१३५-०क्ष् (८०९)
पाण्डोरुपरमं दृष्ट्वा देवकल्पा महर्षयः ।
ततो मन्त्रविदः सर्वे मन्त्रयांचक्रिरे मिथः ॥ १-१३५-१ (६०४८)
तापसा ऊचुः। १-१३५-२क्ष् (८१०)
हित्वा राज्यं च राष्ट्रं च स महात्मा महायशाः ।
अस्मिंस्थाने तपस्तप्त्वा तापसाञ्शरणं गतः ॥ १-१३५-२ (६०४९)
स जातमात्रान्पुत्रांश्च दारांश्च भवतामिह ।
प्रादायोपनिधिं राजा पाण्डुः स्वर्गमितो गतः ॥ १-१३५-३ (६०५०)
तस्येमानात्मजान्देहं भार्यां च सुमहात्मनः ।
स्वराष्ट्रं गृह्य गच्छामो धर्म एष हि नः स्मृतः ॥ १-१३५-४ (६०५१)
वैशम्पायन उवाच। १-१३५-५क्ष् (८११)
ते परस्परमामन्त्र्य देवकल्पा महर्षयः ।
पाण्डोः पुत्रान्पुरस्कृत्य नगरं नागसाह्वयम् ॥ १-१३५-५ (६०५२)
उदारमनसः सिद्धा गमने चक्रिरे मनः ।
भीष्माय पण्डवान्दातुं धृतराष्ट्राय चैव हि ॥ १-१३५-६ (६०५३)
तस्मिन्नेव क्षणे सर्वे तानादाय प्रतस्थिरे ।
पाण्डोर्दारांश्च पुत्रांश्च शरीरे ते च तापसाः ॥ १-१३५-७ (६०५४)
सुखिनी सा पुरा भूत्वा सततं पुत्रवत्सला ।
प्रपन्ना दीर्घमध्वानं संक्षिप्तं तदमन्यत ॥ १-१३५-८ (६०५५)
सा त्वदीर्घेण कालेन संप्राप्ता कुरुजाङ्गलम् ।
वर्धमानपुरद्वारमाससाद यशस्विनी ॥ १-१३५-९ (६०५६)
द्वारिणं तापसा ऊचू राजानं च प्रकाशय ।
ते तु गत्वा क्षणेनैव सभायां विनिवेदिताः ॥ १-१३५-१० (६०५७)
तं चारणसहस्राणां मुनीनामागमं तदा ।
श्रुत्वा नागपुरे नृणां विस्मयः समपद्यत ॥ १-१३५-११ (६०५८)
मुहूर्तोदित आदित्ये सर्वे बालपुरस्कृताः ।
सदारास्तापसान्द्रष्टुं निर्ययुः पुरवासिनः ॥ १-१३५-१२ (६०५९)
स्त्रीसङ्घाः क्षत्रसङ्घाश्च यानसङ्घसमास्थिताः ।
ब्राह्मणैः सह निर्जग्मुर्ब्राह्मणानां च योषितः ॥ १-१३५-१३ (६०६०)
तथा विट्शूद्रसङ्घानां महान्यतिकरोऽभवत् ।
न कश्चिदकरोदीर्ष्यामभवन्धर्मबुद्धयः ॥ १-१३५-१४ (६०६१)

तथा भीष्मः शान्तनवः सोमदत्तो ऽथ बाह्लिकः ।
प्रज्ञाचक्षुश्च राजर्षिः क्षत्ता च विदुरः स्वयम् ॥ १-१३५-१५ (६०६२)
सा च सत्यवती देवी कौसल्या च यशस्विनी ।
राजदारैः परिवृता गान्धारी चापि निर्ययौ ॥ १-१३५-१६ (६०६३)
धृतराष्ट्रस्य दायादा दुर्योधनपुरोगमाः ।
भूषिता भूषणैश्चित्रैः शतसङ्ख्या विनिर्ययुः ॥ १-१३५-१७ (६०६४)
तान्महर्षिगणान्दृष्ट्वा शिरोभिरभिवाद्य च ।
उपोपविविशुः सर्वे कौरव्याः सपुरोहिताः ॥ १-१३५-१८ (६०६५)
तथैव शिरसा भूमावभिवाद्य प्रणम्य च ।
उपोपविविशुः सर्वे पौरजानपदा अपि ॥ १-१३५-१९ (६०६६)
तमकूजमभिज्ञाय जनौघं सर्वशस्तदा ।
पूजयित्वा यथान्यायं पाद्येनार्घ्येण च प्रभो ॥ १-१३५-२० (६०६७)
भीष्मो राज्यं च राष्ट्रं च महर्षिभ्यो न्यवेदयत् ।
तेषामथो वृद्धतमः प्रत्युत्थाय जटाजिनी ।
ऋषीणां मतमाज्ञाय महर्षिरिदमब्रवीत् ॥ १-१३५-२१ (६०६८)
यः स कौरव्यदायादः पाण्डुर्नाम नराधिपः ।
कामभोगान्परित्यज्य शतशृङ्गमितो गतः ॥ १-१३५-२२ (६०६९)
ग़राजा भोगान्परित्यज्य तपस्वी संबभूव ह ।
स यथोक्तं तपस्तेपे पत्रमूलफलाशनः ॥ १-१३५-२३ (६०७०)
पत्नीभ्यां सह धर्मात्मा संचित्कालमतन्द्रितः ।
तेन वृत्तसमाचारैस्तपसा च तपस्विनः ॥ १-१३५-२४ (६०७१)
तोषितास्तापसास्तत्र शतशृङ्गनिवासिनः ।
स्वर्गलोकं गन्तुकामं तापसाः संनिवार्य तम् ॥ १-१३५-२५ (६०७२)
उद्यन्तं सह पत्नीभ्यां विप्रा वचनमब्रुवन् ।
अनपत्यस्य राजेन्द्र पुण्या लोका न सन्ति ते ॥ १-१३५-२६ (६०७३)
तस्माद्धर्मं च वायुं च महेन्द्रं च तथाऽश्विनौ ।
आराधयस्व राजेन्द्र पत्नीभ्यां सह देवताः ॥ १-१३५-२७ (६०७४)
प्रीताः पुत्रान्प्रदास्यन्ति ऋणमुक्तो भविष्यसि ।
तपसा दिव्यचक्षुष्ट्वात्पश्यामस्ते तथा सुतान् ॥ १-१३५-२८ (६०७५)
अस्माकं वचनं श्रुत्वा देवानाराधयत्तदा।'
ब्रह्मचर्यव्रतस्थस्य तस्य दिव्येन हेतुना ॥ १-१३५-२९ (६०७६)
साक्षाद्धर्मादयं पुत्रस्तत्र जातो युधिष्ठिरः ।
तथैनं बलिनां श्रेष्ठं तस्य राज्ञो महात्मनः ॥ १-१३५-३० (६०७७)
मातरिश्वा ददौ पुत्रं भीमं नाम महाबलम् ।
पुरन्दरादयं जज्ञे कुन्त्यां सत्यपराक्रमः ॥ १-१३५-३१ (६०७८)
ग़अस्मिञ्जाते महेष्वासे पृथामिन्द्रस्तदाऽब्रवीत् ।

मत्प्रसादादयं जातः कुन्ति सत्यपराक्रमः ॥ १-१३५-३२ (६०७९)
अजेयानपि जेताऽरीन्देवतादीन्न संशयः।'
यस्य कीर्तिर्महेष्वासान्सर्वानभिभविष्यति ॥ १-१३५-३३ (६०८०)
ग्युधिष्ठिरो राजसूयं भ्रातृवीर्यादवाप्स्यति ।
एष जेता मनुष्यांश्च सर्वान्गान्धर्वराक्षसान् ॥ १-१३५-३४ (६०८१)
एष दुर्योधनादीनां कौरवाणां च जेष्यति ।
वीरस्यैतस्य विक्रान्तैर्धर्मपुत्रो युधिष्ठिरः ॥ १-१३५-३५ (६०८२)
यक्ष्यते राजसूयाद्यैर्धर्म एव परः सदा।'
यौ तु माद्री महेष्वासावसूत पुरुषोत्तमौ ॥ १-१३५-३६ (६०८३)
अश्विभ्यां पुरुषव्याघ्राविमौ तावपि तिष्ठतः ।
ग्नकुलः सहदेवश्च तावप्यमिततेजसौ ॥' १-१३५-३७ (६०८४)
चरता धर्मनित्येन वनवासं यशस्विना ।
एष पैतामहो वंशः पाण्डुना पुनरुद्धृतः ॥ १-१३५-३८ (६०८५)
पुत्राणां जन्म वृद्धिं च वैदिकाध्ययनानि च ।
पश्यन्तः सततं पाण्डोः परां प्रीतिमवाप्स्यथ ॥ १-१३५-३९ (६०८६)
वर्तमानः सतां वृत्ते पुत्रलाभमवाप च ।
पितृलोकं गतः पाण्डुरितः सप्तदशेऽहनि ॥ १-१३५-४० (६०८७)
तं चितागतमाज्ञाय वैश्वानरमुखे हुतम् ।
प्रविष्टा पावकं माद्री हित्वा जीवितमात्मनः ॥ १-१३५-४१ (६०८८)
सा गता सह तेनैव पतिलोकमनुव्रता ।
तस्यास्तस्य च यत्कार्यं क्रियतां तदनन्तरम् ॥' १-१३५-४२ (६०८९)
पृथां च शरणं प्राप्तां पाण्डवांश्च यशस्विनः ।
यथावदनुमन्यन्तां धर्मो ह्येष सनातनः ॥ १-१३५-४३ (६०९०)
इमे तयोः शरीरे द्वे पुत्राश्चेमे तयोर्वराः ।
क्रियाभिरनुगृह्यन्तां सह मात्रा परंतपाः ॥ १-१३५-४४ (६०९१)
प्रेतकार्ये निवृत्ते तु पितृमेधं महायशाः ।
लभतां सर्वधर्मज्ञः पाण्डुः कुरुकुलोद्वहः ॥ १-१३५-४५ (६०९२)
वैशम्पायन उवाच। १-१३५-४६क्ष् (८१२)
एवमुक्त्वा कुरून्सर्वान्कुरूणामेव पश्यताम् ।
क्षणेनान्तर्हिताः सर्वे तापसा गुह्यकैः सह ॥ १-१३५-४६ (६०९३)
गन्धर्वनगराकारं तथैवान्तर्हितं पुनः ।
ऋषिसिद्धगणं दृष्ट्वा विस्मयं ते परं ययुः ॥ ॥ १-१३५-४७ (६०९४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१३५-४ देहं देहयोरस्थीनि ॥
१-१३५-८ तद्गमनं संक्षिप्तममन्यत मुनीनां योगप्रभावात्
स्वदेशगमनौत्कण्ठ्याद्वा ॥
१-१३५-९ वर्धमानपुरद्वारं मुख्यद्वारम् ॥
१-१३५-११ आरण्यानां सहस्रसंख्यानां मुनीनां चेति योज्यम् ॥
१-१३५-१४ व्यतिकरः संघर्षः ॥
१-१३५-२० अकूजं निःशब्दम् ॥
१-१३५-४५ प्रेतकार्ये सपण्डीकरणान्ते । पितृमेधं
यज्ञविशेषम्। वृषोत्सर्गादिकं वा ॥
१-१३५-४७ गन्धर्वनगरं खपुरम् ॥
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥
१३५ ॥

आदिपर्व - अध्याय १३६
॥ श्रीः ॥
१.१३६. अध्यायः १३६

Mahabharata - Adi Parva - Chapter Topics
पाण्डोरस्थिसंस्काराद्यन्त्येष्टिविधिः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३६-० (६०९५)
धृतराष्ट्र उवाच। १-१३६-०क्ष् (८१३)
पाण्डोर्विदुर सर्वाणि प्रेतकार्याणि कारय ।
राजवद्राजसिंहस्य माद्र्याश्चैव विशेषतः ॥ १-१३६-१ (६०९६)
पशून्वासांसि रत्नानि धनानि विविधानि च ।
पाण्डोः प्रयच्छ माद्र्याश्च येभ्यो यावच्च वाञ्छितम् ॥ १-१३६-२ (६०९७)
यथा च कुन्ती सत्कारं कुर्यान्माद्र्यास्तथा कुरु ।
यथा न वायुर्नादित्यः पश्येतां तां सुसंवृताम् ॥ १-१३६-३ (६०९८)
न शोच्यः पाण्डुरनघः प्रशस्यः स नराधिपः ।
यस्य पञ्च सुता वीरा जाताः सुरसुतोपमाः ॥ १-१३६-४ (६०९९)
वैशम्पायन उवाच। १-१३६-५क्ष् (८१४)
विदुरस्तं तथेत्युक्त्वा भीष्मेण सह भारत ।
पाण्डुं संस्कारयामास देशे परमपूजिते ॥ १-१३६-५ (६१००)
ततस्तु नगरात्तूर्णमाज्यगन्धपुरस्कृताः ।

निर्हृताः पावका दीप्ताः पाण्डो राजन्पुरोहितैः ॥ १-१३६-६ (६१०१)
अथैनामार्तवैः पुष्पैर्गन्धैश्च विविधैर्वरैः ।
शिबिकां तामलङ्कृत्य वाससाऽऽच्छाद्य सर्वशः ॥ १-१३६-७ (६१०२)
तां तथा शोभितां माल्यैर्वासोभिश्च महाधनैः ।
अमात्या ज्ञातयश्चैनं सुहृदश्चोपतस्थिरे ॥ १-१३६-८ (६१०३)
नृसिंहं नरयुक्तेन परमालङ्कृतेन तम् ।
अवहन् यानमुख्येन सह माद्रया सुसंवृतम् ॥ १-१३६-९ (६१०४)
पाण्डुरेणातपत्रेण चामरव्यजनेन च ।
सर्ववादित्रनादैश्च समलञ्चक्रिरे ततः ॥ १-१३६-१० (६१०५)
रत्नानि चाप्युपादाय बहूनि शतशो नराः ।
प्रददुः काङ्क्षमाणेभ्यः पाण्डोस्तस्यौर्ध्वदेहिके ॥ १-१३६-११ (६१०६)
अथ च्छत्राणि शुभ्राणि चामराणि बृहन्ति च ।
आजह्रुः कौरवस्यार्थे वासांसि रुचिराणि च ॥ १-१३६-१२ (६१०७)
याजकैः शुक्लवासोभिर्हूयमाना हुताशनाः ।
अगच्छन्नग्रतस्तस्य दीप्यमानाः स्वलङ्कृताः ॥ १-१३६-१३ (६१०८)
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव सहस्रशः ।
रुदन्तः शोकसंतप्ता अनुजग्मुर्नराधिपम् ॥ १-१३६-१४ (६१०९)
अयमस्मानपाहाय दुःखे चाधाय शाश्वते ।
कृत्वा चास्माननाथांश्च क्व यास्यति नराधिपः ॥ १-१३६-१५ (६११०)
क्रोशन्तः पाण्डवाः सर्वे भीष्मो विदुर एव च ।
ग्बाह्लीकः सोमदत्तश्च तथा भूरिश्रवा नृपः ॥ १-१३६-१६ (६१११)
अन्योन्यं वै समाश्लिष्य अनुजग्मुः सहस्रशः।'
रमणीये वनोद्देशे गङ्गातीरे समे शुभे ॥ १-१३६-१७ (६११२)
न्यासयामासुरथं तां शिबिकां सत्यवादिनः ।
सभार्यस्य नृसिंहस्य पाण्डोरक्लिष्टकर्मणः ॥ १-१३६-१८ (६११३)
ततस्तस्य शरीरं तु सर्वगन्धाधिवासितम् ।
शुचिकालीयकादिग्धं दिव्यचन्दनरूषितम् ॥ १-१३६-१९ (६११४)
पर्यषिञ्चञ्जलेनाशु शातकुम्भमयैर्घटैः ।
चन्दनेन च शुक्लेन सर्वतः समलेपयन् ॥ १-१३६-२० (६११५)
कालागुरुविमिश्रेण तथा तुङ्गरसेन च ।
अथैनं देशजैः शुक्लैर्वासोभिः समयोजयन् ॥ १-१३६-२१ (६११६)
संछन्नः स तु वासोभिर्जीवन्निव नराधिपः ।
शुशुभे स नव्याघ्रो महार्हशयनोचितः ॥ १-१३६-२२ (६११७)
ग्हयमेधाग्निना सर्वे याजकाः सपुरोहिताः ।
वेदोक्तेन विधानेन क्रियांचक्रुः समन्त्रकम् ॥' १-१३६-२३ (६११८)
याजकैरभ्यनुज्ञाते प्रेतकर्मण्यनिष्ठिते ।

घृतावसिक्तं राजानं सह माद्र्या स्वलङ्कृतम् ॥१-१३६-२४ (६११९)
तुङ्गपद्मकमिश्रेण चन्दनेन सुगन्धिना ।
ग्सरलं देवदारुं च गुग्गुलं लाक्षया सह ॥१-१३६-२५ (६१२०)
हरिचन्दनकाष्ठैश्च हरिबेरैरुशीरकैः।'
अन्यैश्च विविधैर्गन्धैर्विधिना समदाहयन् ॥ १-१३६-२६ (६१२१)
ततस्तयोः शरीरे द्वे दृष्ट्वा मोहवशं गता ।
हाहा पुत्रेति कौसल्या पपात सहसा भुवि ॥१-१३६-२७ (६१२२)
तां प्रेक्ष्य पतितामार्तां पौरजानपदो जनः ।
रुरोद दुःखसंतप्तो राजभक्त्या कृपाऽन्वितः ॥१-१३६-२८ (६१२३)
कुन्त्याश्चैवार्तनादेन सर्वाणि च विचुक्रुशुः ।
मानुषैः सह भूतानि तिर्यग्योनिगतान्यपि ॥१-१३६-२९ (६१२४)
तथा भीष्मः शान्तनवो विदुरश्च महामतिः ।
सर्वशः कौरवाश्चैव प्राणदन्भृशदुःखिताः ॥१-१३६-३० (६१२५)
ततो भीष्मोऽथ विदुरो राजा च सह पाण्डवैः ।
उदकं चक्रिरे तस्य सर्वाश्च कुरुयोषितः ॥१-१३६-३१ (६१२६)
चुक्रुशुः पाण्डवाः सर्वे भीष्मः शान्तनवस्तथा ।
विदुरो ज्ञातयश्चैव चक्रुश्चाप्युदकक्रियाः ॥१-१३६-३२ (६१२७)
कृतोदकांस्तानादाय पाण्डवाञ्छोककर्शितान् ।
सर्वाः प्रकृतयो राजञ्शोचमाना न्यवारयन् ॥१-१३६-३३ (६१२८)
यथैव पाण्डवा भूमौ सुषुपुः सह बान्धवैः ।
तथैव नागरा राजञ्शिश्यिरे ब्राह्मणादयः ॥१-१३६-३४ (६१२९)
तद्गतानन्दमस्वस्थमाकुमारमहृष्टवत् ।
बभूव पाण्डवैः सार्धं नगरं द्वादश क्षपाः ॥ ॥१-१३६-३५ (६१३०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥१३६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१३६-१९ कालीयकादिग्धं कृष्णागुरुलिप्तम् ॥
१-१३६-२५ तुङ्गपद्मकौ गन्धद्रव्यविशेषौ ॥
षट्त्रिंशदधिकशततमोऽध्यायः ॥
१३६ ॥

आदिपर्व - अध्याय १३७

॥ श्रीः ॥

१.१३७. अध्यायः १३७

Mahabharata - Adi Parva - Chapter Topics
पाण्डोः श्राद्धदानम् ॥ १ ॥
कुमाराणां क्रीडावर्णनम् ॥ २ ॥
क्रीडायां भीमेन दुर्योधनादीनां पराभवः ॥ ३ ॥
दुर्योधनेन प्रमाणकोट्यां पातनं, सर्पैर्दशनं,
विषमिश्रभक्ष्यदानम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३७-० (६१३१)
वैशम्पायन उवाच। १-१३७-०क्ष् (८१५)
ततः क्षत्ता च भीष्मश्च व्यासो राजा च बन्धुभिः ।
ददुः श्राद्धं तदा पाण्डोः स्वधामृतमयं तदा ॥ १-१३७-१ (६१३२)
ग्पुरोहितसहायास्ते यथान्यायमकुर्वत।'
कुरूंश्च विप्रमुख्यांश्च भोजयित्वा सहस्रशः ।
रत्नौघान्द्विजमुख्येभ्यो दत्त्वा ग्रामवरांस्तथा ॥ १-१३७-२ (६१३३)
कृतशौचांस्ततस्तांस्तु पाण्डवान्भरतर्षभान् ।
आदाय विविशुः सर्वे पुरं वारणसाह्वयम् ॥ १-१३७-३ (६१३४)
सततं स्मानुशोचन्तस्तमेव भरतर्षभम् ।
पौरजानपदाः सर्वे मृतं स्वमिव बान्धवम् ॥ १-१३७-४ (६१३५)
श्राद्धावसाने तु तदा दृष्ट्वा तं दुःखितं जनम् ।
संमूढां दुःखशोकार्तां व्यासो मातरमब्रवीत् ॥ १-१३७-५ (६१३६)
अतिक्रान्तसुखाः कालाः पर्युपस्थितदारुणाः ।
श्वःश्वः पापिष्ठदिवसाः पृथिवी गतयौवना ॥ १-१३७-६ (६१३७)
बहुमायासमाकीर्णो नानादोषसमाकुलः ।
लुप्तधर्मक्रियाचारो घोरः कालो भविष्यति ॥ १-१३७-७ (६१३८)
कुरूणामनयाच्चापि पृथिवी न भविष्यति ।
गच्छ त्वं योगमास्थाय युक्ता वस तपोवने ॥ १-१३७-८ (६१३९)
माद्राक्षीस्त्वं कुलस्यास्य घोरं संक्षयमात्मनः ।
तथेति समनुज्ञाय सा प्रविश्याब्रवीत्स्नुषाम् ॥ १-१३७-९ (६१४०)
अम्बिक तव पौत्रस्य दुर्नयात्किल भारताः ।
सानुबन्धा विनङ्क्ष्यन्ति पौराश्चैवेति नः श्रुतम् ॥ १-१३७-१० (६१४१)
तत्कौसल्यामिमामार्तां पुत्रशोकाभिपीडिताम् ।
वनमादाय भद्रं ते गच्छावो यदि मन्यसे ॥ १-१३७-११ (६१४२)
तथेत्युक्ता त्वम्बिकया भीष्ममामन्त्र्य सुव्रता ।
वनं ययौ सत्यवती स्नुषाभ्यां सह भारत ॥ १-१३७-१२ (६१४३)

ताः सुघोरं तपस्तप्त्वा देव्यो भरतसत्तम ॥
देहं त्यक्त्वा महाराज गतिमिष्टां ययुस्तदा ॥ १-१३७-१३ (६१४४)
वैशम्पायन उवाच। १-१३७-१४क्ष् (८१६)
अथाप्तवन्तो वेदोक्तान्संस्कारान्पाण्डवास्तदा ।
संव्यवर्धन्त भोगांस्ते भुञ्जानाः पितृवेश्मनि ॥ १-१३७-१४ (६१४५)
धार्तराष्ट्रैश्च सहिताः क्रीडन्तो मुदिताः सुखम् ।
बालक्रीडासु सर्वासु विशिष्टास्तेजसाऽभवन् ॥ १-१३७-१५ (६१४६)
जवे लक्ष्याभिहरणे भोज्ये पांसुविकर्षणे ।
धार्तराष्ट्रान्भीमसेनः सर्वान्स परिमर्दति ॥ १-१३७-१६ (६१४७)
हर्षात्प्रक्रीडमानांस्तान् गृह्य राजन्निलीयते ।
शिरःसु विनिगृह्यैतान्योजयामास पाण्डवैः ॥ १-१३७-१७ (६१४८)
शतमेकोत्तरं तेषां कुमाराणां महौजसाम् ।
एक एव निगृह्णाति नातिकृच्छ्राद्वृकोदरः ॥ १-१३७-१८ (६१४९)
कचेषु च निगृह्यैनान्विनिहत्य बलाद्बली ।
चकर्ष क्रोशतो भूमौ घृष्टजानुशिरोंसकान् ॥ १-१३७-१९ (६१५०)
दश बालाञ्जले क्रीडन्भुजाभ्यां परिगृह्य सः ।
आस्ते स्म सलिले मग्नो मृतकल्पान्विमुञ्चति ॥ १-१३७-२० (६१५१)
फलानि वृक्षमारुह्य विचिन्वन्ति च ये तदा ।
तदा पादप्रहारेण भीमः कम्पयते द्रुमान् ॥ १-१३७-२१ (६१५२)
प्रहारवेगाभिहता द्रुमा व्याघूर्णितास्ततः ।
सफलाः प्रपतन्ति स्म द्रुमात्त्रस्ताः कुमारकाः ॥ १-१३७-२२ (६१५३)
'केचिद्भग्नशिरोरस्काः केचिद्भग्नकटीमुखाः ।
निपेतुर्भ्रातरः सर्वे भीमसेनभुजार्दिताः ॥' १-१३७-२३ (६१५४)
न ते नियुद्धे न जवे न योग्यासु कदाचन ।
कुमारा उत्तरं चक्रुः स्पर्धमाना वृकोदरम् ॥ १-१३७-२४ (६१५५)
एवं स धार्तराष्ट्रांश्च स्पर्धमानो वृकोदरः ।
अप्रियेऽतिष्ठदत्यन्तं बाल्यान्न द्रोहचेतसा ॥ १-१३७-२५ (६१५६)
ततो बलमतिख्यातं धार्तराष्ट्रः प्रतापवान् ।
भीमसेनस्य तज्ज्ञात्वा दुष्टभावमदर्शयत् ॥ १-१३७-२६ (६१५७)
तस्य धर्मादपेतस्य पापानि परिपश्यतः ।
मोहादैश्वर्यलोभाच्च पापा मतिरजायत ॥ १-१३७-२७ (६१५८)
अयं बलवतां श्रेष्ठः कुन्तीपुत्रो वृकोदरः ।
मध्यमः कुन्तिपुत्राणां निकृत्या सन्निगृह्यतां ॥ १-१३७-२८ (६१५९)
प्राणवान्विक्रमी चैव शौर्येण महताऽन्वितः ।
स्पर्धते चापि सहितानस्मानेको वृकोदरः ॥ १-१३७-२९ (६१६०)
तं तु सुप्तं पुरोद्याने गङ्गायां प्रक्षिपामहे ।

अथ तस्मादवरजं श्रेष्ठं चैव युधिष्ठिरम् ॥ १-१३७-३० (६१६१)
प्रसह्य बन्धने बद्ध्वा प्रशासिष्ये वसुन्धराम् ।
एवं स निश्चयं पापः कृत्वा दुर्योधनस्तदा ।
नित्यमेवान्तरप्रेक्षी भीमस्यासीन्महात्मनः ॥ १-१३७-३१ (६१६२)
ततो जलविहारार्थं कारयामास भारत ।
चैलकम्बलवेश्मानि विचित्राणि महान्ति च ॥ १-१३७-३२ (६१६३)
सर्वकामैः सुपूर्णानि पताकोच्छ्रायवन्ति च ।
तत्र संजनयामास नानागाराण्यनेकशः ॥ १-१३७-३३ (६१६४)
उदकक्रीडनं नाम कारयामास भारत ।
प्रमाणकोट्यां तं देशं स्थलं किंचिदुपेत्यह ॥ १-१३७-३४ (६१६५)
ग्क्रीडावसाने ते सर्वे शुचिवस्त्राः स्वलङ्कृताः ।
सर्वकामसमृद्धं तदन्नं बुभुजिरे शनैः ॥ १-१३७-३५ (६१६६)
दिवसान्ते परिश्रान्ता विहृत्य च कुरूद्वहाः ।
विहारावसथेष्वेव वीरा वासमरोचयन् ॥ १-१३७-३६ (६१६७)
खिन्नस्तु बलवान्भीमो व्यायामाभ्यधिकस्तदा ।
वाहयित्वा कुमारांस्ताञ्जलक्रीडागतान्विभुः ॥ १-१३७-३७ (६१६८)
प्रमाणकोट्यां वासार्थं सुष्वापारुह्य तत्स्थलम् ।
शीतं वासं समासाद्य शान्तो मदविमोहितः ॥ १-१३७-३८ (६१६९)
निश्चेष्टः पाण्डवो राजन्सुष्वाप मृतवत्क्षितौ ।
ततो बद्ध्वा लतापाशैर्भीमं दुर्योधनः शनैः ॥ १-१३७-३९ (६१७०)
प्रमाणकोट्यां संसुप्तं गङ्गायां प्राक्षिपज्जले ।
ततः प्रबुद्धः कौन्तेयः सर्वान्संछिद्य बन्धनान् ॥ १-१३७-४० (६१७१)
उदतिष्ठद्बलाङ्क्यो भीमः प्रहरतां वरः ।
स विमुक्तो महातेजा नाज्ञासीत्तेन तत्कृतम् ॥ १-१३७-४१ (६१७२)
पुनर्निद्रावशं प्राप्तस्तत्रैव प्रास्वपद्बली ।
अर्धरात्र्यां व्यतीतायामुत्तस्थुः कुरुपाण्जवाः ।
दुर्योधनस्तु कौन्तेयं दृष्ट्वा निर्वेदमभ्यगात् ॥ १-१३७-४२ (६१७३)
सुप्तं चापि पुनः सर्पैस्तीक्ष्णदंष्ट्रैर्महाविषैः ।
कुपितैर्दशयामास सर्वेष्वेवाङ्गसन्धिषु ॥ १-१३७-४३ (६१७४)
दंष्ट्राश्च दंष्ट्रिणां मर्मस्वपि तेन निपातिताः ।
त्वचं न चास्य बिभिदुः सारत्वात्पृथुपक्षसः ॥ १-१३७-४४ (६१७५)
प्रबुद्धो भीसेनस्तान्सर्वान्सर्पानपोथयत् ।
सारथिं चास्य दयितमपहस्तेन जघ्निवान् ॥ १-१३७-४५ (६१७६)
तथान्यदिवसे राजन्हन्तुकामोऽत्यमर्षणः ।
वलनेन सहामन्त्र्य सौबलस्य मते स्थितः ॥ १-१३७-४६ (६१७७)
भोजने भीमसेनस्य ततः प्राक्षेपयद्विषम् ।

कालकूटं विषं तीक्ष्णं संभृतं रोमहर्षणम् ॥ १-१३७-४७ (६१७८)
तच्चापि भुक्त्वाऽजरदॉयदविकारो वृकोदरः ।
विकारं नाभ्यजनयत्सुतीक्ष्णमपि तद्विषम् ॥ १-१३७-४८ (६१७९)
भीमसंहननो भीमस्त्समादजरयद्विषम् ।
ततोऽन्यदिवसे राजन्हन्तुकामो वृकोदरम् ॥ १-१३७-४९ (६१८०)
सौबलेन सहायेन धार्तराष्ट्रोऽभ्यचिन्तयत् ।
चिन्तयन्नालभन्निद्रां दिवारात्रमतन्द्रितः ॥ १-१३७-५० (६१८१)
एवं दुर्योधनः कर्णः शकुनिश्चापि सौबलः ।
अनेकैरप्युपायैस्ताञ्जिघांसन्ति स्म पाण्डवान् ॥ १-१३७-५१ (६१८२)
वैश्या पुत्रस्तदाचष्ट पार्थानां हितकाम्यया ।
पाण्डवा ह्यपि तत्सर्वं प्रत्यजानन्नरिन्दमाः ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ॥' ॥ १-१३७-५२ (६१८३)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१३७-६ श्वःश्वः पूर्वपूर्वदिनापेक्षया उत्तरमुत्तरं पापिष्ठण्
। गतयौवना सम्यक्फलसून्या ॥
१-१३७-८ योगं चित्तवृत्तिनिरोधं प्रयाणोद्योगंवा । युक्ता समाहिता ॥
१-१३७-२४ योग्यासु क्रियास्विति शेषः । उत्तरमुत्कर्षम् ॥
१-१३७-२८ निकृत्या कपटेन ॥
१-१३७-२९ प्राणवान् बलवान् ॥
१-१३७-३१ प्रसह्य बलात्कारेण ॥
१-१३७-३४ प्रमाणकोट्यां गङ्गायां प्रदेशविशेषे । स्थलं
किंचिदर्धं जलेऽर्धं स्थले च क्रीडागारम् ॥
१-१३७-४६ वलनेन तन्नामकेन सहचरेण ॥
सप्तत्रिंशदधिकशततमोऽध्यायः ॥
१३७ ॥

आदिपर्व - अध्याय १३८
॥ श्रीः ॥
१.१३८. अध्यायः १३८

Mahabharata - Adi Parva - Chapter Topics
पुनर्भीमाय विषमिश्रभक्ष्यदानम् ॥ १ ॥
शूलकीलितायां शमाणकोट्यां पुनर्भीमसेनस्य पातनम् ॥ २ ॥

पाताललोकं प्राप्तस्य भीमस्य वासुकिदत्तरसपानम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३८-० (६१८४)
ग्वैशम्पायन उवाच। १-१३८-०क्ष् (८१७)
ततस्ते मन्त्रयामासुर्दुर्योधनपुरोगमाः ।
प्राणवान्विक्रमी चापि शौर्ये च महति स्थितः ॥ १-१३८-१ (६१८५)
स्पर्धते चापि सततमस्मानेव वृकोदरः ।
तं तु सुप्तं पुरोद्याने जले शूले क्षिपामहे ॥ १-१३८-२ (६१८६)
ततो जलविहारार्थं कारयामास भारत ।
प्रमाणकोट्यामुद्देशे स्थलं किंचिदुपेत्य ह ॥' १-१३८-३ (६१८७)
भक्ष्यं भोज्यं च पेयं च चोष्यं लेह्यमथापि च ।
उपपादितं नरैस्तत्र कुशलैः सूदकर्मणि ॥ १-१३८-४ (६१८८)
न्यवेदयंस्तत्पुरुषा धार्तराष्ट्राय वै तदा ।
ततो दुर्योधनस्तत्र पाण्डवानाह दुर्मतिः ॥ १-१३८-५ (६१८९)
गङ्गां चैवानुयास्याम उद्यानवनशोभिताम् ।
सहिता भ्रातरः सर्वे जलक्रीडामवाप्नुमः ॥ १-१३८-६ (६१९०)
एवमस्त्विति तं चापि प्रत्युवाच युधिष्ठिरः ।
ते रथैर्नगराकारैर्देशजैश्च गजोत्तमैः ॥ १-१३८-७ (६१९१)
निर्ययुर्नगराच्छूराः कौरवाः पाण्डवैः सह ।
उद्यानवनमासाद्य विसृज्य च महाजनम् ॥ १-१३८-८ (६१९२)
विशन्ति स्म तदा वीराः सिंहा इव गिरेर्गुहाम् ।
उद्यानमभिपश्यन्तो भ्रातरः सर्व एव ते ॥ १-१३८-९ (६१९३)
उपस्थानगृहैः शुभ्रैर्वलभीभिश्च शोभितम् ।
गवाक्षकैस्तथा जालैर्यन्त्रैः सांचारिकैरपि ॥ १-१३८-१० (६१९४)
संमार्जितं सौधकारैश्चित्रकारैश्च चित्रितम् ।
दीर्घिकाभिश्च पूर्णाभिस्तथा पुष्करिणीषु च ॥ १-१३८-११ (६१९५)
जलं तच्छुशुभे च्छन्नं फुल्लैर्जलरुहैस्तथा ।
उपच्छन्ना वसुमती तथा पुष्पैर्यथर्तुकैः ॥ १-१३८-१२ (६१९६)
तत्रोपविष्टास्ते सर्वे पाण्डवाः कौरवाश्च ह ।
उपच्छन्नान्बहून्कामांस्ते भुञ्जन्ति ततस्ततः ॥ १-१३८-१३ (६१९७)
अथोद्यानवरे तस्मिंस्तथा क्रीडागताश्चते ।
परस्परस्य वक्त्रेषु ददुर्भक्ष्यांस्ततस्ततः ॥ १-१३८-१४ (६१९८)
ततो दुर्योधनः पापस्तद्भक्ष्ये कालकूटकम् ।
विषं प्रक्षेपयामास भीमसेनजिघांसया ॥ १-१३८-१५ (६१९९)

स्वयमुत्थाय चैवाथ हृदयेन क्षुरोपमः ।
स वाचाऽमृतकल्पश्च भ्रातृवच्च सुहृद्यथा ॥ १-१३८-१६ (६२००)
स्वयं प्रक्षिपते भक्ष्यं बहु भीमस्य पाकृत् ।
प्रभक्षितं च भीमेन तं वै दोषमजानता ॥ १-१३८-१७ (६२०१)
ततो दुर्योधनस्तत्र हृदयेन हसन्निव ।
कृतकृत्यमीवात्मानं मन्यते पुरुषाधमः ॥ १-१३८-१८ (६२०२)
ततस्ते सहिताः सर्वे जलक्रीडामकुर्वत ।
पाण्डवा धार्तराष्ट्राश्च तदा मुदितमानसाः ॥ १-१३८-१९ (६२०३)
विहारावसथेष्वेव वीरा वासमरोचयन् ।
भीमस्तु बलवान्भुक्त्वा व्यायामाभ्यधिकं जले ॥ १-१३८-२० (६२०४)
वाहयित्वा कुमारांस्ताञ्जलक्रीडागतांस्तदा ।
प्रमाणकोट्यां वासार्थी सुष्वापावाप्य तत्स्थलम् ॥ १-१३८-२१ (६२०५)
शीतं वातं समासाद्य श्रान्तो मदविमोहितः ।
विषेण च परीताङ्गो निश्चेष्टः पाण्डुनन्दनः ॥ १-१३८-२२ (६२०६)
ततो बद्ध्वा लतापाशैर्भीमं दुर्योधनः स्वयम् ।
ग्शूलान्यप्सु निखायाशु प्रादेशाभ्यन्तराणि च ॥ १-१३८-२३ (६२०७)
लतापाशैर्दृढं बद्धं स्थलाज्जलमपातयत् ।
सशेषत्वान्न संप्राप्तो जले शूलिनि पाण्डवः ॥ १-१३८-२४ (६२०८)
पपात यत्र तत्रास्य शूलं नासीद्यदृच्छया।'
स निःसंज्ञो जलस्यान्तमवाग्वै पाण्डवोऽविशत् ।
आक्रामन्नागभवने तदा नागकुमारकान् ॥ १-१३८-२५ (६२०९)
ततः समेत्य बहुभिस्तदा नागैर्महाविषैः ।
अदश्यत भृशं भीमो महादंष्ट्रैर्विपोल्बणैः ॥ १-१३८-२६ (६२१०)
ततोऽस्य दश्यमानस्य तद्विषं कालकूटकम् ।
हतं सर्पविषेणैव स्थावरं जङ्गमेन तु ॥ १-१३८-२७ (६२११)
दंष्ट्राश्च दंष्ट्रिणां तेषां मर्मस्वपि निपातिताः ।
त्वचं नैवास्य बिभिदुः सारत्वात्पृथुवक्षसः ॥ १-१३८-२८ (६२१२)
ततः प्रबुद्धः कौन्तेयः सर्वं संछिद्य बन्धनम् ।
पोथयामास तान्सर्पान्केचिद्भीताः प्रदुद्रुवुः ॥ १-१३८-२९ (६२१३)
हतावशेषा भीमेन सर्वे वासुकिमभ्ययुः ।
ऊचुश्च सर्पराजानं वासुकिं वासवोपमम् ॥ १-१३८-३० (६२१४)
अयं नरो वै नागरेन्द्र ह्यप्सु बद्ध्वा प्रवेशितः ।
यथा च नो मतिर्व्रीर विषपीतो भविष्यति ॥ १-१३८-३१ (६२१५)
निश्चेष्टोऽस्माननुप्राप्तः स च दष्टोऽन्वबुध्यत ।
ससंज्ञश्चापि संवृत्तश्छित्त्वा बन्धनमाशु नः ॥ १-१३८-३२ (६२१६)
पोथयन्तं महाबाहुं त्वं वै तं ज्ञातुमर्हसि ।

ततो वासुकिरभ्येत्य नागैरनुगतस्तदा ॥ १-१३८-३३ (६२१७)
पश्यति स्म महाबाहुं भीमं भीमपराक्रमम् ।
आर्यकेण च दृष्टः स पृथाया आर्यकेम च ॥ १-१३८-३४ (६२१८)
तदा दौहित्रदौहित्रः परिष्वक्तः सुपीडितम् ।
सुप्रीतश्चाभवत्तस्य वासुकिः स महायशाः ॥ १-१३८-३५ (६२१९)
अब्रवीत्तं च नागेन्द्रः किमस्य क्रियतां प्रियम् ।
धनौघो रत्ननिचयो वसु चास्य प्रदीयताम् ॥ १-१३८-३६ (६२२०)
एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत ।
यदि नागेन्द्र तुष्टोऽसि किमस्य धनसंचयैः ॥ १-१३८-३७ (६२२१)
रसं पिबेत्कुमारोऽयं त्वयि प्रीते महाबलः ।
बलं नागसहस्रस्य यस्मिन्कुण्डे प्रतिष्ठितम् ॥ १-१३८-३८ (६२२२)
यावत्पिबति बालोऽयं तावदस्मै प्रदीयताम् ।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत ॥ १-१३८-३९ (६२२३)
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः ।
प्राङ्मुखश्चोपविष्टश्च रसं पिबति पाण्डवः ॥ १-१३८-४० (६२२४)
एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः ।
एवमष्टौ स कुण्डानि ह्यपिबत्पाण्डुनन्दनः ॥ १-१३८-४१ (६२२५)
ततस्तु शयने दिव्ये नागदत्ते महाभुजः ।
अशेत भीमसेनस्तु यथासुखमरिंदमः ॥ ॥ १-१३८-४२ (६२२६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१३८-१० उपस्थानगृहैः यत्र राजानं कार्यिणः
शूराश्चोपतिष्ठन्ति तैर्गृहैः । वलभीभिरुभयतो नमत्पक्षाभिः
स्तम्भशालाभिः। यन्त्रैर्जलयन्त्रैः शतधारादिभिः। यतो
युगपच्छतं धारा उच्छलन्त्यो नीहारीभूय भवनोदरं
व्याप्नुवन्ति। सांचारिकैः संचारयोग्यैः ॥
१-१३८-११ दीर्घिकाभिः कुल्याभिः ॥
१-१३८-१३ उपच्छन्नानुपागतान् ॥
१-१३८-३१ विषपीतः पीतविषः ॥
१-१३८-३४ आर्यकेण नागराजेन । पृथाया आयकेण
मातामहेन। कुन्तिभोजद्वारायं संबन्ध इति गम्यते ॥
१-१३८-३५ दौहित्रदौहित्र इति त्वार्यकनागस्य दौहित्रः
शूरस्तद्दौहित्रो भीम इत्यविरुद्धमेतत् । अन्ये तु शूरमातामह

एवोपचारात कुन्तीमातामहोऽपीत्याहुः ॥
१-१३८-३८ रसं साधितपारदम् ॥
अष्टत्रिंशदधिकशततमोऽध्यायः ॥
१३८ ॥

आदिपर्व - अध्याय १३९
॥ श्रीः ॥
१.१३९. अध्यायः १३९

Mahabharata - Adi Parva - Chapter Topics
भीममनागतं दृष्ट्वा खिन्नायाः कुन्त्या विदुरेण संवादः ॥ १ ॥
रसपानेन नागायुतबलवता भीमेन हस्तिनापुरप्रत्यागमनम् ॥ २ ॥
भीष्मेण धनुर्वेदशिक्षणार्थं कुमाराणां कृपाय निवेदनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१३९-० (६२२७)
वैशम्पायन उवाच। १-१३९-०क्ष् (८१८)
ग्दुर्योधनस्तु पापात्मा भीममाशीविषह्रदे ।
प्रक्षिप्य कृतकृत्यं स्वमात्मानं मन्यते तदा ॥ १-१३९-१ (६२२८)
प्रभातायां रजन्यां च प्रविवेश पुरं ततः ।
ब्रुवाणो भीमसेनस्तु यातो ह्यग्रत एव नः ॥' १-१३९-२ (६२२९)
युधिष्ठिरस्तु धर्मात्मा ह्यविदन्पापमात्मनि ।
स्वेनानुमानेन परं साधुं समनुपश्यति ॥ १-१३९-३ (६२३०)
सोऽभ्युपेत्य तदा पार्थो मातरं भ्रातृवत्सलः ।
अभिवाद्याब्रवीत्कुन्तीमम्ब भीम इहागतः ॥ १-१३९-४ (६२३१)
क्व गतो भविता मातर्नेह पश्यामि तं शुभे ।
उद्यानानि वनं चैव विचितानि समन्ततः ॥ १-१३९-५ (६२३२)
तदर्थं न च तं वीरं दृष्टवन्तो वृकोदरम् ।
मन्यमानास्ततः सर्वे यातो नः पूर्वमेव सः ॥ १-१३९-६ (६२३३)
आगताः स्म महाभागे व्याकुलेनान्तरात्मना ।
इहागम्य क्व नु गतस्त्वया वा प्रेषितः क्व नु ॥ १-१३९-७ (६२३४)
कथयस्व महाबाहुं भीमसेनं यशस्विनि ।
नहि मे शुध्यते भावस्तं वीरं प्रति शोभने ॥ १-१३९-८ (६२३५)
यतः प्रसुप्तं मन्येऽहं भीम् नेति हतस्तु सः ।
इत्युक्ता च ततः कुन्ती धर्मराजेन धीमता ॥ १-१३९-९ (६२३६)
हाहेति कृत्वा संभ्रान्ता प्रत्युवाच युधिष्ठिरम् ।

न पुत्र भीमं पश्यामि न मामभ्येत्यसाविति ॥१-१३९-१० (६२३७)
शीघ्रमन्वेषणे यत्नं कुरु तस्यानुजैः सह ।
द्रुतं गत्वा पुरोद्यानं विचिन्वन्तिस्म पाण्डवाः ॥१-१३९-११ (६२३८)
भीमभीमेति ते वाचा पाण्डवाः समुदैरयन् ।
विचिन्वन्तोऽथ ते सर्वे न स्म पश्यन्ति भ्रातरम् ॥१-१३९-१२ (६२३९)
आगताः स्वगृहं भूय इदमूचुः पृथां तदा ।
न दृश्यते महाबाहुरम्ब भीमो वने चितः ॥१-१३९-१३ (६२४०)
विचितानि च सर्वाणि ह्युद्यानानि नदीस्तथा। १-१३९-१४ (६२४१)
वैशम्पायन उवाच ।
ततो विदुरमानाय्य कुन्ती सा स्वं निवेशनम् ॥ १-१३९-१४क्ष् (८१९)
उवाच बलवान्क्षत्तर्भीमसेनो न दृश्यते ॥ १-१३९-१५ (६२४२)
उद्यानान्निर्गताः सर्वे भ्रातरो भ्रातृभिः सह ।
तत्रैकस्तु महाबाहुर्भीमो नाभ्येति मामिह ॥१-१३९-१६ (६२४३)
न च प्रीणयते चक्षुः सदा दुर्योधनस्य सः ।
क्रूरोऽसौ दुर्मतिः क्षुद्रो राज्यलुब्धोऽनपत्रपः ॥१-१३९-१७ (६२४४)
निहन्यादपि तं वीरं जातमन्युः सुयोधनः ।
तेन मे व्याकुलं चित्तं हृदयं दह्यतीव च ॥१-१३९-१८ (६२४५)
विदुर उवाच।१-१३९-१९क्ष् (८२०)
मैवं वदस्व कल्याणि शेषसंरक्षणं कुरु ।
प्रत्यादिष्टो हि दुष्टात्मा शेषेऽपि प्रहरेत्तव ॥१-१३९-१९ (६२४६)
दीर्घायुषस्तव सुता यथोवाच महामुनिः ।
आगमिष्यति ते पुत्रः प्रीतिं चोत्पादयिष्यति ॥१-१३९-२० (६२४७)
वैशम्पायन उवाच।१-१३९-२१क्ष् (८२१)
एवमुक्त्वा ययौ विद्वान्विदुरः स्वं निवेशनम् ।
कुन्ती चिन्तापरा भूत्वा सहासीना सुतैर्गृहे ॥१-१३९-२१ (६२४८)
ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः ।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली ॥१-१३९-२२ (६२४९)
तं दृष्ट्वा प्रतिबुध्यन्तं पाण्डवं ते भुजङ्गमाः ।
सान्त्वयामासुरव्यग्रा वचनं चेदमब्रुवन् ॥१-१३९-२३ (६२५०)
यत्ते पीतो महाबाहो रसोऽयं वीर्यसंभृतः ।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यसि ॥१-१३९-२४ (६२५१)
गच्छाद्य त्वं च स्वगृहं स्नातो दिव्यैरिमैर्जलैः ।
भ्रातरस्तेऽनुतप्यन्ति त्वां विना कुरुपुङ्गव ॥१-१३९-२५ (६२५२)
ततः स्नातो महाबाहुः शुचिशुक्लाम्बरस्रजः ।
ततो नागस्य भवने कृतकौतुकमङ्गलः ॥१-१३९-२६ (६२५३)
ओषधीभिर्विषघ्नीभिः सुरभीभिर्विशेषतः ।

भुक्तवान्परमान्नं च नागैर्दत्तं महाबलः ॥ १-१३९-२७ (६२५४)
पूजितो भुजगैर्वीर आशीर्भिश्चाभिनन्दितः ।
दिव्याभरणसंछन्नो नागानामन्त्र्य पाण्डवाः ॥ १-१३९-२८ (६२५५)
उदतिष्ठत्प्रहृष्टात्मा नागलोकादरिन्दमः ।
उत्क्षिप्य च तदा नागैर्जलाज्जलरुहेक्षणः ॥ १-१३९-२९ (६२५६)
तस्मिन्नेव वनोद्देशे स्थापितः कुरुनन्दनः ।
ते चान्तर्दधिरे नागाः पाण्डवस्यैव पश्यतः ॥ १-१३९-३० (६२५७)
तत उत्थाय कौन्तेयो भीमसेनो महाबलः ।
आजगाम महाबाहुर्मातुरन्तिकमञ्जसा ॥ १-१३९-३१ (६२५८)
ततोऽभिवाद्य जननीं ज्येष्ठं भ्रातरमेव च ।
कनीयसः समाघ्राय शिरस्स्वरिविमर्दनः ॥ १-१३९-३२ (६२५९)
तैश्चापि संपरिष्वक्तः सह मात्रा नरर्षभैः ।
अन्योन्यगतसौहार्दाद्दिष्ट्या दिष्ट्येति चाब्रुवन् ॥ १-१३९-३३ (६२६०)
ततस्तत्सर्वमाचष्ट दुर्योधनविचेष्टितम् ।
भ्रातॄणां भीमसेनश्च महाबलपराक्रमः ॥ १-१३९-३४ (६२६१)
नागलोके च यद्वृत्तं गुणदोषमशेषतः ।
तच्च सर्वमशेषेण कथयामास पाण्डवः ॥ १-१३९-३५ (६२६२)
ततो युधिष्ठिरो राजा भीममाह वचोऽर्थवत् ।
तूष्णीं भव न ते जल्प्यमिदं कार्यं कथंचन ॥ १-१३९-३६ (६२६३)
इतःप्रभृति कौन्तेयं रक्षतान्योन्यमादृताः ।
एवमुक्त्वा महाबाहुर्धर्मराजो युधिष्ठिरः ॥ १-१३९-३७ (६२६४)
भ्रातृभिः सहितः सर्वैरप्रमत्तोऽभवत्तदा ।
यदा त्ववगतास्ते वै पाण्डवास्तस्य कर्म तत् ॥ १-१३९-३८ (६२६५)
नत्वेव बहुलं चक्रुः प्रयता मन्त्ररक्षणे ।
धर्मात्मा विदुरस्तेषां प्रददौ मतिमान्मतिम् ॥ १-१३९-३९ (६२६६)
दुर्योधनोऽपि तं दृष्ट्वा पाण्डवं पुनरागतम् ।
निश्वसंश्चिन्तयंश्चैवमहन्यहनि तप्यते ॥ १-१३९-४० (६२६७)
कुमारान्क्रीडमानांस्तान्दृष्ट्वा राजातिदुर्मदान् ।
गुरुं शिक्षार्थमन्विष्य गौतमं तान्न्यवेदयत् ॥ १-१३९-४१ (६२६८)
शरस्तम्बे समुद्भूतं वेदशास्त्रार्थपारगम् ।
ग्राज्ञा निवेदितास्तस्मै ते च सर्वे च निष्ठिताः।'
अधिजग्मुश्च कुरवो धनुर्वेदं कृपात्तु ते ॥ ॥ १-१३९-४२ (६२६९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१३९-८ भावश्चित्तं न शुध्यते जीवतीति न मनुते ॥
१-१३९-१९ प्रत्यादिष्टः कुतो भीमं हतवानसीत्युपालब्धः ॥
१-१३९-४१ तान्कुरुबालकान् न्यवेदयत् ॥
ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥
१३९ ॥

आदिपर्व - अध्याय १४०
॥ श्रीः ॥
१.१४०. अध्यायः १४०

Mahabharata - Adi Parva - Chapter Topics
कृपद्रोणाश्वत्थामाचार्याणामुत्पत्तिः ॥ १ ॥
द्रोणाचार्यस्य परशुरामादस्त्रलाभः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४०-० (६२७०)
जनमेजय उवाच। १-१४०-०क्ष् (८२२)
कृपस्यापि मम ब्रह्मन्संभवं वक्तुमर्हसि ।
शरस्तम्बात्कथं जज्ञे कथं वाऽस्त्राण्यवाप्तवान् ॥ १-१४०-१ (६२७१)
वैशम्पायन उवाच। १-१४०-२क्ष् (८२३)
महर्षेर्गौतमस्यासीच्छरद्वान्नाम गौतमः ।
पुत्रः किल महाराज जातः सहशरैर्विभो ॥ १-१४०-२ (६२७२)
न तस्य वेदाध्ययने तथा बुद्धिरजायत ।
यथास्य बुद्धिरभवद्धनुर्वेदे परन्तप ॥ १-१४०-३ (६२७३)
अधिजग्मुर्यथा वेदास्तपसा ब्रह्मचारिणः ।
तथा स तपसोपेतः सर्वाण्यस्त्राण्यवाप ह ॥ १-१४०-४ (६२७४)
धनुर्वेदपरत्वाच्च तपसा विपुलेन च ।
भृशं सन्तापयामास देवराजं स गौतमः ॥ १-१४०-५ (६२७५)
ततो जालवतीं नाम देवकन्यां सुरेश्वरः ।
प्राहिणोत्तपसो विघ्नं कुरु तस्येति कौरव ॥ १-१४०-६ (६२७६)
सा हि गत्वाऽऽश्रमं तस्य रमणीयं शरद्वतः ।
धनुर्बाणधरं बाला लोभयामास गौतमम् ॥ १-१४०-७ (६२७७)
तामेकवसनां दृष्ट्वा गौतमोऽप्सरसं वने ।
लोकेऽप्रतिमसंस्थानां प्रोत्फुल्लनयनोऽभवत् ॥ १-१४०-८ (६२७८)
धनुश्च हि शरास्तस्य कराभ्यामपतन्भुवि ।

वेपथुश्चास्य सहसा शरीरे समजायत ॥१-१४०-९ (६२७९)
स तु ज्ञानगरीयस्त्वात्तपसश्च समर्थनात् ।
अवतस्थे महाप्राज्ञो धैर्येण परमेण ह ॥१-१४०-१० (६२८०)
यस्तस्य सहसा राजन्विकारः समदृश्यत ।
तेन सुस्राव रेतोऽस्य स च तन्नान्वबुध्यत ॥१-१४०-११ (६२८१)
धनुश्च सशरं त्यक्त्वा तथा कृष्णाजिनानि च ।
स विहायाश्रमं तं च तां चैवाप्सरसं मुनिः ॥१-१४०-१२ (६२८२)
जगाम रेतस्तत्तस्य शरस्तम्बे पपात च ।
शरस्तम्बे च पतितं द्विधा तदभवन्नृप ॥१-१४०-१३ (६२८३)
तस्याथ मिथुं जज्ञे गौतमस्य शरद्वतः ।
ग्महर्षेर्गौतमस्यास्य ह्याश्रमस्य समीपतः ॥'
मृगयां चरतो राज्ञः शान्तनोस्तु यदृच्छया ॥ १-१४०-१४ (६२८४)
कश्चित्सेनाचरोऽरण्ये मिथुनं तदपश्यत ।
धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च ॥१-१४०-१५ (६२८५)
ज्ञात्वा द्विजस्य चापत्ये धनुर्वेदान्तगस्य ह ।
स राज्ञे दर्शयामास मिथुनं सशरं धनुः ॥१-१४०-१६ (६२८६)
स तदादाय मिथुनं राजा च कृपयान्वितः ।
आजगाम गृहानेव मम पुत्राविति ब्रुवन् ॥१-१४०-१७ (६२८७)
ततः संवर्धयामास संस्कारैश्चाप्ययोजयत् ।
प्रातिपेयो नरश्रेष्ठो मिथुनं गौतमस्य तत् ॥१-१४०-१८ (६२८८)
कृपया यन्मया बालाविमौ संवर्धिताविति ।
तस्मात्तयोर्नाम चक्रे तदेव स महीपतिः ।
ग्तस्मात्कृप इति ख्यातः कृपी कन्या च साऽभवत् ॥' १-१४०-१९ (६२८९)
पितापि गौतमस्तत्र तपसा तावविन्दित ।
आगत्य तस्मै गोत्रादि सर्वमाख्यातवांस्तदा ॥१-१४०-२० (६२९०)
ग्कृपोऽपि च तदा राजन्धनुर्वेदपरोऽभवत्।'
चतुर्विधं धनुर्वेदं शास्त्राणि विविधानि च ॥ १-१४०-२१ (६२९१)
निशिलेनास्य तत्सर्वं गुह्यमाख्यातवान्पिता ।
सोऽचिरेणैव कालेन परमाचार्यतां गतः ॥१-१४०-२२ (६२९२)
कृपमाहूय गाङ्गेयस्तव शिष्या इति ब्रुवन् ।
पौत्रान्परिसमाधाय कृपमाराधयत्तदा ॥१-१४०-२३ (६२९३)
ततोऽधिजग्मुः सर्वे ते धनुर्वेदं महारथाः ।
धृतराष्ट्रात्मजाश्चैव पाण्डवाः सह यादवैः ॥१-१४०-२४ (६२९४)
वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः ।
ग्कृपमाचार्यमासाद्य परमास्त्रज्ञतां गतः।' १-१४०-२५ (६२९५)
वैशम्पायन उवाच ।

विशेषार्थी ततो भीष्मः पौत्राणां विनयेप्सया ॥ १-१४०-२५क्ष् (८२४)
इष्वस्त्रज्ञान्पर्यपृच्छदाचार्यान्वीर्यसंमतान् ।
नाल्पधीर्नामहाभागस्तथा नानस्त्रकोविदः ॥१-१४०-२६ (६२९६)
नादेवसत्वो विनयेत्कुरूनस्त्रे महावलान् ।
इति संचिन्त्य गाङ्गेयस्तदा भरतसत्तमः ॥१-१४०-२७ (६२९७)
द्रोणाय वेदविदुषे भारद्वाजाय धमते ।
पाण्डवान्कौरवांश्चैव ददौ शिष्यान्नरर्षभ ॥१-१४०-२८ (६२९८)
शास्त्रतः पूजितश्चैव सम्यक्तेन महात्मना ।
स भीष्मेण महाभागस्तुष्टोऽस्त्रविदुषां वरः ॥१-१४०-२९ (६२९९)
प्रतिजग्राह तान्सर्वाञ्शिष्यत्वेन महायशाः ।
शिक्षयामास च द्रोणो धनुर्वेदमशेषतः ॥१-१४०-३० (६३००)
तेऽचिरेणैव कालेन सर्वशस्त्रविशारदाः ।
बभूवुः कौरवा राजन्पाण्डवाश्चामितौजसः ॥१-१४०-३१ (६३०१)
जनमेजय उवाच।१-१४०-३२क्ष् (८२५)
कथं समभवद्द्रोणः कथं चास्त्राण्यवाप्तवान् ।
कथं चागात्कुरून्ब्रह्मन्कस्य पुत्रः स वीर्यवान् ॥१-१४०-३२ (६३०२)
कथं चास्य सुतो जातः सोश्वत्थामाऽस्त्रवित्तमः ।
एतदिच्छाम्यहं श्रोतुं विस्तरेण प्रकीर्तय ॥१-१४०-३३ (६३०३)
वैशम्पायन उवाच।१-१४०-३४क्ष् (८२६)
गङ्गाद्वारं प्रति महान्बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं संशितव्रतः ॥१-१४०-३४ (६३०४)
सोऽभिषेक्तुं गतो गङ्गां पूर्वमेवागतां सतीम् ।
महर्षिभिर्भरद्वाजो हविर्धाने चरन्पुरा ॥१-१४०-३५ (६३०५)
ददर्शाप्सरसं साक्षाद्घृताचीमाप्लुतामृषिः ।
रूपयौवनसंपन्नां मददृप्तां मदालसाम् ॥१-१४०-३६ (६३०६)
तस्या वायुर्नदीतीर वसनं पर्यवर्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥१-१४०-३७ (६३०७)
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
हृष्टस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥१-१४०-३८ (६३०८)
ततः समभवद्द्रोणः कलशे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥१-१४०-३९ (६३०९)
अग्नेरस्त्रमुपादाय यदृषिर्वेद काश्यपः ।
अध्यगच्छद्भरद्वाजस्तदस्त्रं देवकार्यतः ॥१-१४०-४० (६३१०)
अग्निवेश्यं महाभागं भरद्वाजः प्रतापवान् ।
प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदां वरः ॥१-१४०-४१ (६३११)
एकनिष्ठजातं स मुनिर्भ्राता भ्रातरमन्तिके ।

अग्निवेश्यस्तथा द्रोणं तदा भरतसत्तम।'
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत् ॥ १-१४०-४२ (६३१२)
भरद्वाजसखा चासीत्पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तथा समभवत्सुतः ॥१-१४०-४३ (६३१३)
स नित्यमाश्रमं गत्वा द्रोणेन सह पार्थिवः ।
चिक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः ॥१-१४०-४४ (६३१४)
ततो व्यतीते पृषते स राजा द्रुपदोऽभवत् ।
पञ्चालेषु महाबाहुरुत्तरेषु नरेश्वरः ॥१-१४०-४५ (६३१५)
भरद्वाजोऽपि भगवानारुरोह दिवं तदा ।
तत्रैव च वसन्द्रोणस्तपस्तेपे महातपाः ॥१-१४०-४६ (६३१६)
वेदवेदाङ्गविद्वान्स तपसा दग्धकिल्बिषः ।
ततः पितृनियुक्तात्मा पुत्रलोभान्महायशाः ॥१-१४०-४७ (६३१७)
शारद्वतीं ततो भार्यां कृपीं द्रोणोऽन्वविन्दत ।
अग्निहोत्रे च धर्मे च दमे च सतत रताम् ॥१-१४०-४८ (६३१८)
अलभद्गौतमी पुत्रमश्वत्थामानमेव च ।
स जातमात्रो व्यनदद्यथैवोच्चैःश्रवा हयः ॥१-१४०-४९ (६३१९)
तच्छ्रुत्वान्तर्हितं भूतमन्तरिक्षस्थमब्रवीत् ।
अश्वस्येवास्य यत्स्थाम नदतः प्रदिशो गतम् ॥१-१४०-५० (६३२०)
अश्वत्थामैव बालोऽयं तस्मान्नाम्ना भविष्यति ।
सुतेन तेन सुप्रीतो भारद्वाजस्ततोऽभवत् ॥१-१४०-५१ (६३२१)
तत्रैव च वसन्धीमान्धनुर्वेदपरोऽभवत् ।
स शुश्राव महात्मानं जामदग्न्यं परंतपम् ॥१-१४०-५२ (६३२२)
सर्वज्ञानविदं विप्रं सर्वशस्त्रभृतां वरम् ।
ब्राह्मणेभ्यस्तदा राजन्दित्सन्तं वसु सर्वशः ॥१-१४०-५३ (६३२३)
स रामस्य धनुर्वेदं दिव्यान्यस्त्राणि चैव ह ।
श्रउत्वा तेषु मनश्चक्रे नीतिशास्त्रे तथैव च ॥१-१४०-५४ (६३२४)
ततः स व्रतिभिः शिष्यैस्तपोयुक्तैर्महातपाः ।
वृतः प्रायान्महाबाहुर्महेन्द्रं पर्वतोत्तमम् ॥१-१४०-५५ (६३२५)
ततो महेन्द्रमासाद्य भारद्वाजो महातपाः ।
क्षत्रघ्नं तममित्रघ्नमपश्यद्भृगुनन्दनम् ॥१-१४०-५६ (६३२६)
ततो द्रोणो वृतः शिष्यैरुपगम्य भृगूद्वहम् ।
आचख्यावात्मनो नाम जन्म चाङ्गिरसः कुले ॥१-१४०-५७ (६३२७)
निवेद्य शिरसा भूमौ पादौ चैवाभ्यवादयत् ।
ततस्तं सर्वमुत्सृज्य वनं जिगमिषुं तदा ॥१-१४०-५८ (६३२८)
जामदग्न्यं महात्मानं भारद्वाजोऽब्रवीदिदम् ।
भरद्वाजात्समुत्पन्नं तथा त्वं मामयोनिजम् ॥१-१४०-५९ (६३२९)

आगतं वित्तकामं मां विद्धि द्रोणं द्विजोत्तम ।
तमब्रवीन्महात्मा स सर्वक्षत्रियमर्दनः ॥ १-१४०-६० (६३३०)
स्वागतं ते द्विजश्रेष्ठ यदिच्छसि वदस्व मे ।
एवमुक्तस्तु रामेण भारद्वाजोऽब्रवीद्वचः ॥ १-१४०-६१ (६३३१)
रामं प्रहरतां श्रेष्ठं दित्सन्तं विविधं वसु ।
अहं धनमनन्तं हि प्रार्थये विपुलव्रत ॥ १-१४०-६२ (६३३२)
राम उवाच। १-१४०-६३क्ष् (८२७)
हिरण्यं मम यच्चान्यद्वसु किंचिदिह स्थितम् ।
ब्राह्मणेभ्यो मया दत्तं सर्वमेतत्तपोधन ॥ १-१४०-६३ (६३३३)
तथैवेयं धरा देवी सागरान्ता सपत्तना ।
कश्यपाय मया दत्ता कृत्स्ना नगरमालिनी ॥ १-१४०-६४ (६३३४)
शरीरमात्रमेवाद्य ममेदमवशेषितम् ।
अस्त्राणि च महार्हाणि शस्त्राणि विविधानि च ॥ १-१४०-६५ (६३३५)
अस्त्राणि वा शरीरं वा ब्रह्मञ्शस्त्राणि वा पुनः ।
वृणीष्व किं प्रयच्छामि तुभ्यं द्रोण वदाशु तत् ॥ १-१४०-६६ (६३३६)
द्रोण उवाच। १-१४०-६७क्ष् (८२८)
अस्त्राणि मे समग्राणि ससंहाराणि भार्गव ।
स प्रयोगरहस्यानि दातुमर्हस्यशेषतः ॥ १-१४०-६७ (६३३७)
ग्एतद्वसु वसूनां हि सर्वेषां विप्रसत्तम।'
तथेत्युक्त्वा ततस्तस्मै प्रादादस्त्राणि भार्गवः ।
सरहस्यव्रतं चैव धनुर्वेदमशेषतः ॥ १-१४०-६८ (६३३८)
प्रतिगृह्य तु तत्सर्वं कृतास्त्रे द्विजसत्तमः ।
प्रियं सखायं सुप्रीतो जगाम द्रुपदं प्रति ॥ ॥ १-१४०-६९ (६३३९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४०-२ गौतमो गौत्रतः ॥
१-१४०-१० समर्थनात्सामर्थ्यात् ॥
१-१४०-१८ प्रातिपेयः प्रतीपपुत्रः ॥
१-१४०-१९ संवर्धिताविति आलोच्येति शेषः ॥
१-१४०-२५ विनयेप्सया शिक्षेच्छया ॥
१-१४०-२७ अदेवसत्वः नास्ति देवस्येव सत्वं सामर्थ्यं यस्य सः ॥
१-१४०-३८ द्रोणे द्रोण कलशाख्ये यज्ञियपात्रविशेषे ॥
१-१४०-५० स्थामशब्दः सकारस्य तत्कारादेशेऽश्वत्थामेति ॥

चत्वारिंशदधिकशततमोऽध्यायः ॥
१४० ॥

आदिपर्व - अध्याय १४१
॥ श्रीः ॥
१.१४१. अध्यायः १४१

Mahabharata - Adi Parva - Chapter Topics
द्रुपदसमीपं गत्वा तेन सह स्वस्य सखित्वं कथयतो द्रोणस्य
द्रुपदकृतं भर्त्सनम् ॥ १ ॥
तेन कुपितस्य द्रोणस्य हास्तिन पुरगमनम् ॥ २ ॥
क्रीडाकाले कूपपतितयोर्विदाकन्दुकयोरुद्धरणे अशक्नुवतां कुमाराणां
द्रोणकृतोऽधिक्षेपः ॥ ३ ॥
द्रोणेन वीटामुद्रिकयोः कूपादुद्धारः ॥ ४ ॥
द्रोणवृत्तान्तश्रवणेन भीष्मेण स्वगृहनिवासार्थं द्रोणं प्रति
प्रार्थनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४१-० (६३४०)
वैशम्पायन उवाच। १-१४१-०क्ष् (८२९)
ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान् ।
अब्रवीत्पार्थिवं राजन्सखायं विद्धि मामिह ॥ १-१४१-१ (६३४१)
इत्येवमुक्तः सख्या स प्रीतिपूर्वं जनेश्वरः ।
भारद्वाजेन पाञ्चाल्यो नामृष्यत वचोऽस्य तत् ॥ १-१४१-२ (६३४२)
स क्रोधामर्षजिह्मभ्रूः कषायीकृतलोचनः ।
ऐश्वर्यमदसंपन्नो द्रोणं राजाऽब्रवीदिदम् ॥ १-१४१-३ (६३४३)
द्रुपद उवाच। १-१४१-४क्ष् (८३०)
अकृतेयं तव प्रज्ञा ब्रह्मन्नातिसमञ्जसा ।
यन्मां ब्रवीषि प्रसभं सखा तेऽहमिति द्विज ॥ १-१४१-४ (६३४४)
न हि राज्ञामुदीर्णानामेवंभूतैर्नरैः क्वचित् ।
सख्यं भवति मन्दात्मञ्श्रिया हीनैर्धनच्युतैः ॥ १-१४१-५ (६३४५)
सौहृदान्यपि जीर्यन्ते कालेन परिजीर्यतः ।
सौहृदं मे त्वया ह्यासीत्पूर्वं सामर्थ्यबन्धनम् ॥ १-१४१-६ (६३४६)
न सख्यमजरं लोके हृदि तिष्ठति कस्यचित् ।
कामश्चैतन्नाशयति क्रोधो वैनं रहत्युत ॥ १-१४१-७ (६३४७)
मैवं जीर्णमुपास्स्व त्वं सख्यं भवदुपाधिकृत् ।

आसीत्सख्यं द्विजश्रेष्ठ त्वया मेऽर्थनिबन्धनम् ॥१-१४१-८ (६३४८)
न दरिद्रो वसुमतो नाविद्वान्विदुषः सखा ।
न शूरस्य सखा क्लीबः सखिपूर्वं किमिष्यते ॥१-१४१-९ (६३४९)
ययोरेव समं वित्तं ययोरेव समं श्रुतम् ।
तयोर्विवाहः सख्यं च न तु पुष्टविपुष्टयोः ॥१-१४१-१० (६३५०)
नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा ।
नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥१-१४१-११ (६३५१)
वैशम्पायन उवाच।१-१४१-१२क्ष् (८३१)
द्रुपदेनैवमुक्तस्तु भारद्वाजः प्रतापवान् ।
मुहूर्तं चिन्तयित्वा तु मन्युनाऽभिपरिप्लुतः ॥१-१४१-१२ (६३५२)
स विनिश्चित्य मनसा पाञ्चाल्यं प्रतिबुद्धिमान् ।
गशिष्यैः परिवृतः श्रीमान्पुत्रेण सहितस्तथा ॥' १-१४१-१३ (६३५३)
जगाम कुरुमुख्यानां नागरं नागसाह्वयम् ।
तां प्रतिज्ञां प्रतिज्ञाय यां कर्ता नचिरादिव ॥१-१४१-१४ (६३५४)
स नागपुरमागम्य गौतमस्य निवेशने ।
भारद्वाजोऽवसत्तत्र प्रच्छन्नं द्विजसत्तमः ॥१-१४१-१५ (६३५५)
ततोऽस्य तनुजः पार्थान्कृपस्यानन्तरं प्रभुः ।
अस्त्राणि शिक्षयामास नाबुध्यन्त च तं जनाः ॥१-१४१-१६ (६३५६)
एवं स तत्र गूढात्मा कंचित्कालमुवास ह ।
कुमारास्त्वथ निष्क्रम्य समेता गजसाह्वयात् ॥१-१४१-१७ (६३५७)
क्रीडन्तो वीटया तत्र वीराः पर्यचरन्मुदा ।
गतेषां संक्रीडमानानामुदपानेऽङ्गुलीयकम् ॥१-१४१-१८ (६३५८)
पपात धर्मपुत्रस्य वीटा तत्रैव चापतत् ।
गर्तान्बुना प्रतिच्छन्नं तारारूपमिवाम्बरे ॥१-१४१-१९ (६३५९)
दृष्ट्वा चैते कुमाराश्च तं यत्नात्पर्यवारयन्।'
ततस्ते यत्नमातिष्ठन्वीटामुद्धर्तुमादृताः ।
न च ते प्रत्ययद्यन्त कर्म वीटोपलब्धये ॥ १-१४१-२० (६३६०)
ततोऽन्योन्यमवैक्षन्त व्रीडयावनताननाः ।
तस्या योगमविदन्तो भृशं चोत्कण्ठिताभवन् ॥१-१४१-२१ (६३६१)
तेऽपश्यन्ब्राह्मणं श्याममापन्नं पलितं कृशम् ।
कृत्यवन्तमदूरस्थमग्निहोत्रपुरस्कृतम् ॥१-१४१-२२ (६३६२)
ते तं दृष्ट्वा महातमानमुपगम्य कुमारकाः ।
भग्नोत्साहक्रियात्मानो ब्राह्मणं पर्यवारयन् ॥१-१४१-२३ (६३६३)
अथ द्रोणः कुमारांस्तान्दृष्ट्वा कत्यवशस्तदा ।
प्रहस्य मन्दं पैशल्यादभ्यभाषत वीर्यवान् ॥१-१४१-२४ (६३६४)
अहो वो धिग्बलं क्षात्रं धिगेतां वः कृतास्त्रताम् ।

भरतस्यान्वये जाता ये वीटां नाधिगच्छत ॥१-१४१-२५ (६३६५)
वीटां च मुद्रिकां चैव ह्यहमेतदपि द्वयम् ।
उद्धरेयमिषीकाभिर्भोजनं मे प्रदीयताम् ॥१-१४१-२६ (६३६६)
ततोऽब्रवीत्तदा द्रोणं कुन्तीपुत्रो युधिष्ठिरः ।
कृपस्यानुमते ब्रह्मन्भिक्षामाप्नुहि शाश्वतीम् ॥१-१४१-२७ (६३६७)
एवमुक्तः प्रत्युवाच प्रहस्य भरतानिदम्। १-१४१-२८ (६३६८)
द्रोण उवाच ।
एषा मुष्टिरिषीकाणां मयाऽस्त्रेणाभिमन्त्रिता ॥ १-१४१-२८क्ष् (८३२)
अस्या वीर्यं निरीक्षध्वं यदन्येषु न विद्यते ।
वेत्स्यामीषिकया वीटां तामिषीकां तथाऽन्यया ॥१-१४१-२९ (६३६९)
तामन्यया समायोगे वीटाया ग्रहणं मम। १-१४१-३० (६३७०)
वैशम्पायन उवाच ।
ततो यथोक्तं द्रोणेन तत्सर्वं कृतमञ्जसा ॥ १-१४१-३०क्ष् (८३३)
तदवेक्ष्य कुमारास्ते विस्मयोत्फुल्ललोचनाः ।
आश्चर्यमिदमत्यन्तमिति मत्वा वचोऽब्रुवन् ॥१-१४१-३१ (६३७१)
मुद्रिकामपि विप्रर्षे शीघ्रमेतां समुद्धरथ १-१४१-३२ (६३७२)
वैशम्पायन उवाच ।
ततः शरं समादाय धनुश्चापि महायशाः ॥ १-१४१-३२क्ष् (८३४)
शरेण विद्ध्वा मुद्रां तामूर्ध्वमावाहयत्प्रभुः ।
स शरं समुपादाय कूपादङ्गुलिवेष्टनम् ॥१-१४१-३३ (६३७३)
ददौ ततः कुमाराणां विस्मितानामविस्मितः ।
मुद्रिकामुद्धृतां दृष्ट्वा तमाहुस्ते कुमारकाः ॥१-१४१-३४ (६३७४)
अभिवन्दामहे ब्रह्मन्नैतदन्येषु विद्यते ।
कोऽसि कस्यासि जानीमो वयं किं करवामहे ॥१-१४१-३५ (६३७५)
वैशम्पायन उवाच।१-१४१-३६क्ष् (८३५)
एवमुक्तस्ततो द्रोणः प्रत्युवाच कुमारकान् ।
आचक्षध्वं च भीष्माय रूपेण च गुणैश्च माम् ॥१-१४१-३६ (६३७६)
स एव सुमहातेजाः सांप्रतं प्रतिपत्स्यते। १-१४१-३७ (६३७७)
वैशम्पायन उवाच ।
तथेत्युक्त्वा च गत्वा च भीष्ममूचुः कुमारकाः ॥ १-१४१-३७क्ष् (८३६)
ब्राह्मणस्य वचः कृत्स्नं तच्च कर्म तथाविधम् ।
भीष्मः श्रुत्वा कुमाराणां द्रोणं तं प्रत्यजानत ॥१-१४१-३८ (६३७८)
युक्तरूपः स हि गुरुरित्येवमनुचिन्त्य च ।
अथैनमानीय तदा स्वयमेव सुसत्कृतम् ॥१-१४१-३९ (६३७९)
परिपप्रच्छ निपुणं भीष्मः शस्त्रभृतां वरः ।
हेतुमागमने तच्च द्रोणः सर्वं न्यवेदयत् ॥१-१४१-४० (६३८०)

द्रोण उवाच। १-१४१-४१क्ष् (८३७)
महर्षेरग्निवेश्यस्य सकाशमहमच्युत ।
अस्त्रार्थमगमं पूर्वं धनुर्वेदजिघृक्षया ॥ १-१४१-४१ (६३८१)
ब्रह्मचारी विनीतात्मा जटिलो बहुलाः समाः ।
अवसं सुचिरं तत्र गुरुशुश्रूषणे रतः ॥ १-१४१-४२ (६३८२)
पाञ्चाल्यो राजपुत्रश्च यज्ञसेनो महाबलः ।
इष्वस्त्रहेतोर्न्यवसत्तस्मिन्नेव गुरौ प्रभुः ॥ १-१४१-४३ (६३८३)
स मे तत्र सखा चासीदुपकारी प्रियश्च मे ।
तेनाहं सह संगम्य वर्तयन्सुचिरं प्रभो ॥ १-१४१-४४ (६३८४)
बाल्यात्प्रभृति कौरव्य सहाध्ययनमेव च ।
स मे सखा सदा तत्र प्रियवादी प्रियंकरः ॥ १-१४१-४५ (६३८५)
अब्रवीदिति मां भीष्म वचनं प्रीतिवर्धनम् ।
अहं प्रियतमः पुत्रः पितुर्द्रोण महात्मनः ॥ १-१४१-४६ (६३८६)
अभिषेक्ष्यति मां राज्ये स पाञ्चाल्यो यदा तदा ।
तद्भोज्यं भवता राज्यमर्धं सत्येन ते शपे ॥ १-१४१-४७ (६३८७)
मम भोगाश्च वित्तं च त्वदधीनं सुखानि च ।
एवमुक्त्वाऽथ वव्राज कृतास्त्रः पूजितो मया ॥ १-१४१-४८ (६३८८)
तच्च वाक्यमहं नित्यं मनसा धारयंस्तदा ।
सोऽहं पितृनियोगेन पुत्रलोभाद्यशस्विनीम् ॥ १-१४१-४९ (६३८९)
शारद्वतीं महाप्रज्ञामुपयेमे महाव्रताम् ।
अग्निहोत्रे च सत्रे च दमे च सततं रताम् ॥ १-१४१-५० (६३९०)
लेभे च गौतमी पुत्रमश्वत्थामानमौरसम् ।
भीमविक्रमकर्माणमादित्यसमतेजसम् ॥ १-१४१-५१ (६३९१)
पुत्रेण तेन प्रीतोऽहं भरद्वाजो मया यथा ।
गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान् ।
अश्वत्थामारुदद्बालस्तन्मे संदेहयद्दिशः ॥ १-१४१-५२ (६३९२)
न स्नातकोऽवसीदेत वर्तमानः स्वकर्मसु ।
इति संचिन्त्य मनसा तं देशं बहुशो भ्रमन् ॥ १-१४१-५३ (६३९३)
विशुद्धमिच्छन्गाङ्गेय धर्मोपेतं प्रतिग्रहम् ।
अन्तादन्तं परिक्रम्य नाध्यगच्छं पयस्विनीम् ॥ १-१४१-५४ (६३९४)
यवपिष्टोदकेनैनं लोभयेयं कुमारकम् ।
पीत्वा पिष्टरसं बालः क्षीरं पीतं मयाऽपि च ॥ १-१४१-५५ (६३९५)
ननर्तोत्थाय कौरव्य हृष्टो बाल्याद्विमोहितः ।
तं दृष्ट्वा नृत्यमानं तु बालैः परिवृतं सुतम् ॥ १-१४१-५६ (६३९६)
हास्यतामुपसंप्राप्तं कश्मलं तत्र मेऽभवत् ।
द्रोणं धिगस्त्वधनिनं यो धनं नाधिगच्छति ॥ १-१४१-५७ (६३९७)

पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया ।
नृत्यतिस्म मुदाविष्टः क्षीरं पीतं मयाऽप्युत ॥ १-१४१-५८ (६३९८)
इति संभाषतां वाचं श्रुत्वा मे बुद्धिरच्यवत् ।
आत्मानं चात्मना गर्हन्मनसेदं व्यचिन्तयम् ॥ १-१४१-५९ (६३९९)
अपि चाहं पुरा विप्रैर्वर्जितो गर्हितो वसे ।
परोपसेवां पापिष्ठां न च कुर्यां धनेप्सया ॥ १-१४१-६० (६४००)
इति मत्वा प्रियं पुत्रं भीष्मादाय ततो ह्यहम् ।
पूर्वस्नेहानुरागित्वात्सदारः सौमकिं गतः ॥ १-१४१-६१ (६४०१)
अभिषिक्तं तु श्रुत्वैव कृतार्थोऽस्मीति चिन्तयन् ।
प्रियं सखायं सुप्रीतो राज्यस्थं समुपागमम् ॥ १-१४१-६२ (६४०२)
संस्मरन्सङ्गमं चैव वचनं चैव तस्य तत् ।
ततो द्रुपदमागम्य सखइपूर्वमहं प्रभो ॥ १-१४१-६३ (६४०३)
अब्रुवं पुरुषव्याघ्र सखायं विद्धि मामिति ।
उपस्थितस्तु द्रुपदं सखिवच्चास्मि सङ्गतः ॥ १-१४१-६४ (६४०४)
स मां निराकारमिव प्रहसन्निदमब्रवीत् ।
अकृतेयं तव प्रज्ञा ब्रह्मन्नातिसमञ्जसा ॥ १-१४१-६५ (६४०५)
यदात्थ मां त्वं प्रसभं सखा तेऽहमिति द्विज ।
संगतनीह जीर्यन्ति कालेन परिजीर्यतः ॥ १-१४१-६६ (६४०६)
सौहृदं मे त्वया ह्यासीत्पूर्वं सामर्थ्यबन्धनम् ।
नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा ॥ १-१४१-६७ (६४०७)
साम्याद्धि सख्यं भवति वैषम्यान्नोपपद्यते ।
न सख्यमजरं लोके विद्यते जातु कस्यचित् ॥ १-१४१-६८ (६४०८)
कामो वैनं विहरति क्रोधो वैनं रहत्युत ।
मैवं जीर्णमुपास्स्व त्वं सख्यं भवदुपाधिकृत् ॥ १-१४१-६९ (६४०९)
आसीत्सख्यं द्विजश्रेष्ठ त्वया मेऽर्थनिबन्धनम् ।
नह्यनाढ्यः सखाऽऽढ्यस्य नाविद्वान्विदुषः सखा ॥ १-१४१-७० (६४१०)
न शूरस्य सखा क्लीबः सखिपूर्वं किमिष्यते ।
न हि राज्ञामुदीर्णानामेवं भूतैर्नरैः क्वचित् ॥ १-१४१-७१ (६४११)
सख्यं भवति मन्दात्मञ्छ्रिया हीनैर्धनच्युतैः ।
नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा ॥ १-१४१-७२ (६४१२)
नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ।
अहं त्वया न जानामि राज्यार्थे संविदं कृताम् ॥ १-१४१-७३ (६४१३)
एकरात्रं तु ते ब्रह्मन्कामं दास्यामि भोजनम् ।
एवमुक्तस्त्वहं तेन सदारः प्रस्थितस्तदा ॥ १-१४१-७४ (६४१४)
तां प्रतिज्ञां प्रतिज्ञाय यां कर्ताऽस्म्यचिरादिव ।
द्रुपदेनैवमुक्तोऽहं मन्युनाऽभिपरिप्लुतः ॥ १-१४१-७५ (६४१५)

अभ्यागच्छं कुरून्भीष्म शिष्यैरर्थी गुणान्वितैः ।
ततोऽहं भवतः कामं संवर्धयितुमागतः ॥ १-१४१-७६ (६४१६)
इदं नागपुरं रम्यं ब्रूहि किं करवाणि ते। १-१४१-७७ (६४१७)
वैशम्पायन उवाच ।
एवमुक्तस्तदा भीष्मो भारद्वाजमभाषत ॥ १-१४१-७७क्ष् (८३८)
भीष्म उवाच। १-१४१-७८क्ष् (८३९)
अपज्यं क्रियतां चापं साध्वस्त्रं प्रतिपादय ।
भुङ्क्ष भोगान्भृशं प्रीतः पूज्यमानः कुरुक्षये ॥ १-१४१-७८ (६४१८)
कुरूणामस्ति यद्वित्तं राज्यं चेदं सराष्ट्रकम् ।
त्वमेव परमो राजा सर्वे वाक्यकरास्तव ॥ १-१४१-७९ (६४१९)
१-१४१-८० (६४२०)
यच्च ते प्रार्थितं ब्रह्मन्कृतं तदिति चिन्त्यताम् ।
दिष्ट्या प्राप्तोऽसि विप्रर्षे महान्मेऽनुग्रहः कृतः ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४१-४ अकृता असंस्कृता ॥
१-१४१-७ रहति सख्याच्च्यावयति ॥
१-१४१-१३ प्रतिबुद्धिमान् प्रतीवपुद्धिमान् ॥
१-१४१-१८ वीटया कन्दुकेन ॥
१-१४१-२४ पैशल्यात् कौशल्यात् ॥
१-१४१-२७ गौतमीं च महातेजा भिक्षामश्नीत माचिरम् इति पाठान्तरम् ॥
१-१४१-५२ दिशः संदेहयत् दिङ्मोहमनयत् । अडभाव आर्षः ॥
१-१४१-५३ स्नातको यः कश्चिदल्पगोधनः स्वधर्मलोपान्नावसीदेतातो बहुगोधनवतो ब्राह्मणस्य प्रतिग्रहमिच्छन् ॥
१-१४१-५४ अन्तादन्तं देशाद्देशम् ॥
१-१४१-६० वसे उपवसे ॥
१-१४१-७८ अधिज्यं कुरुवीराणां इति पाठान्तरम् । कुरुक्षये कुरुगृहे ॥
एकचत्वारिंशदधिकशततमोऽध्यायः ॥
१४१ ॥

आदिपर्व - अध्याय १४२
॥ श्रीः ॥
१.१४२. अध्यायः १४२

Mahabharata - Adi Parva - Chapter Topics
द्रोणेनास्त्रशिक्षायां कुरुपाण्डवानां शिष्यत्वेनाङ्गीकारः ॥ १ ॥
विद्याभ्याससमाप्त्यनन्तरं बहुशः परीक्षितस्यार्जुनस्य

द्रोणाचार्याद्विशेषशिक्षाप्राप्तिः ॥ २ ॥
मृण्मयद्रोणप्रतिमाराधनेन एकलव्यस्य धनुर्वेदप्रतिभानं ॥ ३ ॥
मृगयार्थं गतेषु कुरुपाण्डवेषु एकलव्येन बाणैः शुनो मुखपूरणम् ॥ ४ ॥
अर्जुनप्रार्थनया द्रोणेनैकलव्यं प्रतिगम्य गुरुदक्षिणात्वेन दक्षिणाङ्गुष्ठ याचनम् ॥ ५ ॥
एकलव्येन दक्षिणाङ्गुष्ठस्य छित्वा दानम् ॥ ६ ॥
द्रोणेन शिष्यपरीक्षा ॥ ७ ॥
शिष्यपरीक्षायां युधिष्ठिरा दीनां निराकरणम् ॥ ८ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४२-० (६४२१)
ग्वैशम्पायन उवाच। १-१४२-०क्ष् (८४०)
प्रतिजग्राह तं भीष्मो गुरुं पाण्डुसुतैः सह ।
पौत्रानादाय तान्सर्वान्वसूनि विविधानि च ॥ १-१४२-१ (६४२२)
शिष्य इति ददौ राजन्द्रोणाय विधिपूर्वकम् ।
तदा द्रोणोऽब्रवीद्वाक्यं भीष्मं बुद्धिमतां वरम् ॥ १-१४२-२ (६४२३)
कृपस्तिष्ठति चाचार्यः शस्त्रज्ञः प्राज्ञसंमतः ।
मयि तिष्ठति चेद्विप्रो वैमनस्यं गमिष्यति ॥ १-१४२-३ (६४२४)
युष्मान्किंचिच्च याचित्वा धनं संगृह्य हर्षितः ।
स्वमाश्रमपदं राजन्गमिष्यामि यथागतम् ॥ १-१४२-४ (६४२५)
एवमुक्ते तु विप्रेन्द्रं भीष्मः प्रहरतां वरः ।
अब्रवीद्द्रोणमाचार्यमुख्यं शस्त्रविदां वरम् ॥ १-१४२-५ (६४२६)
कृपस्तिष्ठतु पूज्यश्च भर्तव्यश्च मया सदा ।
त्वं गुरुर्भव पौत्राणामाचार्यस्त्वं मतो मम ।
प्रतिगृह्णीष्व पुत्रांस्त्वमस्त्रज्ञान्कुरु वै सदा ॥' १-१४२-६ (६४२७)
वैशम्पायन उवाच। १-१४२-७क्ष् (८४१)
ततः संपूजितो द्रोणो भीष्मेण द्विपदां वरः ।
विशश्राम महातेजाः पूजितः कुरुवेश्मनि ॥ १-१४२-७ (६४२८)
विश्रान्तेऽथ गुरौ तस्मिन्पौत्रानादाय कौरवान् ।
शिष्यत्वेन ददौ भीष्मो वसूनि विविधानि च ॥ १-१४२-८ (६४२९)
गृहं च सुपरिच्छन्नं धनधान्यसमाकुलम् ।
भारद्वाजाय सुप्रीतः प्रत्यपादयत प्रभुः ॥ १-१४२-९ (६४३०)
स ताञ्शिष्यान्महेष्वासः प्रतिजग्राह कौरवान् ।
पाण्डवान्धार्तराष्ट्रांश्च द्रोणो मुदितमानसः ॥ १-१४२-१० (६४३१)

प्रतिगृह्य च तान्सर्वान्द्रोणो वचनमब्रवीत् ।
रहस्येकः प्रतीतात्मा कृतोपसदनांस्तथा ॥ १-१४२-११ (६४३२)
द्रोण उवाच। १-१४२-१२क्ष् (८४२)
कार्यं मे काङ्क्षितं किंचिद्धृदि संपरिवर्तते ।
कृतास्त्रैस्तत्प्रदेयं मे तदेतद्वदतानघाः ॥ १-१४२-१२ (६४३३)
वैशम्पायन उवाच। १-१४२-१३क्ष् (८४३)
तच्छ्रुत्वा कौरवेयास्ते तूष्णीमासन्विशांपते ।
अर्जुनस्तु ततः सर्वं प्रतिजज्ञे परन्तप ॥ १-१४२-१३ (६४३४)
ततोऽर्जुनं तदा मूर्ध्नि समाघ्राय पुनः पुनः ।
प्रीतिपूर्वं परिष्वज्य प्ररुरोद मुदा तदा ॥ १-१४२-१४ (६४३५)
ग्अश्वत्थामानमाहूय द्रोणो वचनमब्रवीत् ।
सखायं विद्धि ते पार्थं मया दत्तः प्रगृह्यताम् ॥ १-१४२-१५ (६४३६)
साधुसाध्विति तं पार्थः परिष्वज्येदमब्रवीत् ।
अद्यप्रभृति विप्रेन्द्र परवानस्मि धर्मतः ॥ १-१४२-१६ (६४३७)
शिष्योऽहं त्वत्प्रसादेन जीवामि द्विजसत्तम ।
इत्युक्त्वा तु तदा पार्थः पादौ जग्राह पाण्डवः'॥ १-१४२-१७ (६४३८)
ततो द्रोणः पाण्डुपुत्रानस्त्राणि विविधानि च ।
ग्राहयामास दिव्यानि मानुषाणि च वीर्यवान् ॥ १-१४२-१८ (६४३९)
राजपुत्रास्तथा चान्ये समेत्य भरतर्षभ ।
अभिजग्मुस्ततो द्रोणमस्त्रार्थे द्विजसत्तमम् ॥ १-१४२-१९ (६४४०)
वृष्णयश्चान्धकाश्चैव नानादेश्याश्च पार्थिवाः ।
सूतपुत्रश्च राधेयो गुरुं द्रोणमियात्तदा ॥ १-१४२-२० (६४४१)
स्पर्धमानस्तु पार्थेन सूतपुत्रोऽत्यमर्षणः ।
दुर्योधनं समाश्रित्य सोऽवमन्यत पाण्डवान् ॥ १-१४२-२१ (६४४२)
अभ्ययात्स ततो द्रोणं धनुर्वेदचिकीर्षया ।
शिक्षाभुजवलोद्योगैस्तेषु सर्वेषु पाण्डवः ॥ १-१४२-२२ (६४४३)
अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः ।
तुल्येष्वस्त्रप्रयोगेषु लाघवे सौष्टवेषु च ॥ १-१४२-२३ (६४४४)
सर्वेषामेव शिष्याणां बभूवाभ्यधिकोऽर्जुनः ।
ऐन्द्रिमप्रतिमं द्रोण उपदेशेष्वमन्यत ॥ १-१४२-२४ (६४४५)
एवं सर्वकुमाराणामिष्वस्त्रं प्रत्यपादयत् ।
कमण्डलुं च सर्वेषां प्रायच्छच्चिरकारणात् ॥ १-१४२-२५ (६४४६)
पुत्राय च ददौ कुम्भमविलम्बनकारणात् ।
यावत्ते नोपगच्छिुत तावदस्मै परां क्रियाम् ॥ १-१४२-२६ (६४४७)
द्रोण आचष्ट पुत्राय कर्म तज्जिष्णुरौहत ।
ततः स वारुणास्त्रेण पूरयित्वा कमण्डलुम् ॥ १-१४२-२७ (६४४८)

सममाचार्यपुत्रेण गुरुमभ्येति फाल्गुनः ।
आचार्यपुत्रात्तस्मात्तु विशेषोपचयेऽपृथक् ॥ १-१४२-२८ (६४४९)
न व्यहीयत मेधावी पार्थोऽप्यस्त्रविदां वरः ।
अर्जुनः परमं यत्नमातिष्ठद्गुरुपूजने ॥ १-१४२-२९ (६४५०)
अस्त्रे च परमं योगं प्रियो द्रोणस्य चाभवत् ।
तं दृष्ट्वा नित्यमुद्युक्तमिष्वस्त्रं प्रति फाल्गुनम् ॥ १-१४२-३० (६४५१)
आहूय वचनं द्रोणो रहः सूदमभाषत ।
अन्धकारेऽर्जुनायान्नं न देयं ते कदाचन ।
न चाख्येयमिदं चापि मद्वाक्यं विजयेत्वया ॥ १-१४२-३१ (६४५२)
ततः कदाचिद्भुञ्जाने प्रववौ वायुरर्जुने ।
तेन तत्र प्रदीपः स दीप्यमानो विलोपितः ॥ १-१४२-३२ (६४५३)
भुक्त एव तु कौन्तेयो नास्यादन्यत्र वर्तते ।
हस्तस्तेजस्विनस्तस्य अनुग्रहणकारणात् ॥ १-१४२-३३ (६४५४)
तदभ्यासकृतं मत्वा रात्रावपि स पाण्डवः ।
योग्यां चक्रे महाबाहुर्धनुषा पाण्डुनन्दनः ॥ १-१४२-३४ (६४५५)
तस्य ज्यातलनिर्घोषं द्रोणः शुश्राव भारत ।
उपेत्य चैनमुत्थाय परिष्वज्येदमब्रवीत् ॥ १-१४२-३५ (६४५६)
द्रोण उवाच। १-१४२-३६क्ष् (८४४)
प्रयतिष्ये तथा कर्तुं यथा नान्यो धनुर्धरः ।
त्वत्समो भविता लोके सत्यमेतद्ब्रवीमि ते ॥ १-१४२-३६ (६४५७)
वैशम्पायन उवाच। १-१४२-३७क्ष् (८४५)
ततो द्रोणोऽर्जुनं भूयो हयेषु च गजेषु च ।
रथेषु भूमावपि च रणशिक्षामशिक्षयत् ॥ १-१४२-३७ (६४५८)
गदायुद्धेऽसिचर्यायां तोमरप्रासशक्तिषु ।
द्रोणः संकीर्णयुद्धे च शिक्षयामास कौरवान् ॥ १-१४२-३८ (६४५९)
तस्य तत्कौशलं श्रुत्वा धनुर्वेदजिघृक्षवः ।
सजानो राजपुत्राश्च समाजग्मुः सहस्रशः ॥ १-१४२-३९ (६४६०)
ग्तान्सर्वाञ्शिक्षयामास द्रोणः शस्त्रभृतां वरः।'
ततो निषादराजस्य हिरण्यधनुषः सुतः ।
एकलव्यो महाराज द्रोणमभ्याजगाम ह ॥ १-१४२-४० (६४६१)
न स तं प्रतिजग्राह नैषादिरिति चिन्तयन् ।
शिष्यं धनुषि धर्मज्ञस्तेषामेवान्ववेक्षया ॥ १-१४२-४१ (६४६२)
ग्द्रोण उवाच। १-१४२-४२क्ष् (८४६)
शिष्योऽसि मम नैषादे प्रयोगे बलत्तरः ।
निवर्तस्व गृहानेव अनुज्ञातोऽसि नित्यशः ॥ १-१४२-४२ (६४६३)
वैशम्पायन उवाच।' १-१४२-४३क्ष् (८४७)

स तु द्रोणस्य शिरसा पादौ गृह्य परन्तपः ।
अरण्यमनुसंप्राप्य कृत्वा द्रोणं महीमयम् ॥ १-१४२-४३ (६४६४)
तस्मिन्नाचार्यवृत्तिं च परमामास्थितस्तदा ।
इष्वस्त्रे योगमातस्थे परं नियममास्थितः ॥ १-१४२-४४ (६४६५)
परया श्रद्धयोपेतो योगेन परमेण च ।
विमोक्षादानसन्धाने लघुत्वं परमाप सः ॥ १-१४२-४५ (६४६६)
ग्लाघवं चास्त्रयोगं च नचिरात्प्रत्यपद्यत।'
अथ द्रोणाभ्यनुज्ञाताः कदाचित्कुरुपाण्डवाः ।
रथैर्विनिर्ययुः सर्वे मृगयामरिमर्दनाः ॥ १-१४२-४६ (६४६७)
तत्रोपकरणं गृह्य नरः कश्चिद्यदृच्छया ।
राजन्ननुजगामैकः श्वानमादाय पाण्डवान् ॥ १-१४२-४७ (६४६८)
तेषां विचरतां तत्र तत्तत्कर्मचिकीर्षया ।
श्वाचरन्स पथा क्रीडन्नैषादिं प्रति जग्मिवान् ॥ १-१४२-४८ (६४६९)
स कृष्णमलदिग्धाङ्गं कृष्णाजिनजटाधरम् ।
नैषादिं श्वा समालक्ष्य भषंस्तस्थौ तदन्तिके ॥ १-१४२-४९ (६४७०)
तदा तस्याथ भषतः शुनः सप्त शरान्मुखे ।
लाघवं दर्शन्नस्त्रे मुमोच युगपद्यथा ॥ १-१४२-५० (६४७१)
स तु श्वा शरपूर्णास्यः पाण्डवानाजगाम ह ।
तं दृष्ट्वा पाण्डवा वीराः परं विस्मयमागताः ॥ १-१४२-५१ (६४७२)
लाघवं शब्धवेधित्वं दृष्ट्वा तत्परमं तदा ।
प्रेक्ष्य तं व्रीडिताश्चासन्प्रशशंसुश्च सर्वशः ॥ १-१४२-५२ (६४७३)
तं ततोऽन्वेषमाणास्ते वने वननिवासिनम् ।
ददृशुः पाण्डवा राजन्नस्यन्तमनिशं शरान् ॥ १-१४२-५३ (६४७४)
न चैनमभ्यजानंस्ते तदा विकृतदर्शनम् ।
तथैनं परिपप्रच्छुः को भवान्कस्य वेत्युत ॥ १-१४२-५४ (६४७५)
एकलव्य उवाच। १-१४२-५५क्ष् (८४८)
निषादाधिपतेर्वीरा हिरण्यधनुषः सुतम् ।
द्रोणशिष्यं च मां वित्त धुर्वेदकृतश्रमम् ॥ १-१४२-५५ (६४७६)
वैशम्पायन उवाच। १-१४२-५६क्ष् (८४९)
ते तमाज्ञाय तत्त्वेन पुनरागम्य पाण्डवाः ।
यथा वृत्तं वने सर्वं द्रोणायाचख्युरद्भुतम् ॥ १-१४२-५६ (६४७७)
कौन्तेयस्त्वर्जुनो राजन्नेकलव्यमनुस्मरन् ।
रहो द्रोणं समासाद्य प्रणयादिदमब्रवीत् ॥ १-१४२-५७ (६४७८)
नन्वहं परिरभ्यैकः प्रीतिपूर्वमिदं वचः ।
भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति ॥ १-१४२-५८ (६४७९)
अथ कस्मान्मद्विशिष्टो लोकादपि च वीर्यवान् ।

अन्योऽस्ति भवतः शिष्यो निषादाधिपतेः सुतः। १-१४२-५९ (६४८०)
वैशम्पायन उवाच।१-१४२-६०क्ष् (८५०)
मुहूर्तमिव तं द्रोणश्चिन्तयित्वा विनिश्चयम् ।
सव्यसाचिनमादाय नैषादिं प्रति जग्मिवान् ॥१-१४२-६० (६४८१)
ददर्श मलदिग्धाङ्गं जटिलं चीरवाससम् ।
एकलव्यं धनुष्पाणिमस्यन्तमनिशं शरान् ॥१-१४२-६१ (६४८२)
एकलव्यस्तु तं दृष्ट्वा द्रोणमायान्तमन्तिकात् ।
अभिगम्योपसंगृह्य जगाम शिरसा महीम् ॥१-१४२-६२ (६४८३)
पूजयित्वा ततो द्रोणं विधिवत्स निषादजः ।
निवेद्य शिष्यमात्मानं तस्थौ प्राञ्जलिरग्रतः ॥१-१४२-६३ (६४८४)
ततो द्रोणोऽब्रवीद्राजन्नेकलव्यमिदं वचः ।
यदि शिष्योऽसि मे वीर वेतनं दीयतां मम ॥१-१४२-६४ (६४८५)
एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोऽब्रवीदिदम् ।
किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः ॥१-१४२-६५ (६४८६)
न हि किंचिददेयं मे गुरवे ब्रह्मवित्तम। १-१४२-६६ (६४८७)
वैशम्पायन उवाच ।
तमब्रवीत्त्वयाङ्गुष्ठो दक्षिणो दीयतामिति ॥ १-१४२-६६क्ष् (८५१)
एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणम् ।
प्रतिज्ञामात्मनो रक्षन्सत्ये च नियतः सदा ॥१-१४२-६७ (६४८८)
तथैव हृष्टवदनस्तथैवादीनमानसः ।
छित्त्वाऽविचार्य तं प्रादाद्द्रोणायाङ्गुष्ठमात्मनः ॥१-१४२-६८ (६४८९)
ततः शरं तु नैषादिरङ्गुलीभिर्व्यकर्षत ।
न तथा च स शीघ्रोऽभूद्यथा पूर्वं नराधिप ॥१-१४२-६९ (६४९०)
ततोऽर्जुनः प्रीतमना बभूव विगतज्वरः ।
द्रोणश्च सत्यवागासीन्नान्योऽभिभविताऽर्जुनं ॥१-१४२-७० (६४९१)
द्रोणस्य तु तदा शिष्यौ गदायोग्यौ बभूवतुः ।
दुर्योधनश्च भीमश्च सदा संरब्धणानसौ ॥१-१४२-७१ (६४९२)
अश्वत्थामा रहस्येषु सर्वेष्वभ्यधिकोऽभवत् ।
तथाऽतिपुरुषानन्यान्त्सारुकौ यमजावुभौ ॥१-१४२-७२ (६४९३)
युधिष्ठिरो रथश्रेष्ठः सर्वत्र तु धनञ्जयः ।
प्रथितः सागरान्तायां रथयूथपयूथपः ॥१-१४२-७३ (६४९४)
बुद्धियोगबलोत्साहः सर्वास्त्रेषु च निष्ठितः ।
अस्त्रे गुर्वनुरागे च विशिष्टोऽभवदर्जुनः ॥१-१४२-७४ (६४९५)
तुल्येष्वस्त्रोपदेशेषु सौष्ठवेन च वीर्यवान् ।
एकः सर्वकुमाराणां बभूवातिरथोऽर्जुनः ॥१-१४२-७५ (६४९६)
प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ।

धार्तराष्ट्रा दुरात्मानो नामृष्यन्त परस्परम् ॥ १-१४२-७६ (६४९७)
तांस्तु सर्वान्समानीय सर्वविद्यास्त्रशिक्षितान् ।
द्रोणः प्रहरणज्ञाने जिज्ञासुः पुरुषर्षभः ॥ १-१४२-७७ (६४९८)
कृत्रिमं भासमारोप्य वृक्षाग्रे शिल्पिभिः कृतम् ।
अविज्ञातं कुमाराणां लक्ष्यभूतमुपादिशत् ॥ १-१४२-७८ (६४९९)
द्रोण उवाच। १-१४२-७९क्ष् (८५२)
शीघ्रं भन्तः सर्वेऽपि धनूंष्यादाय सर्वशः ।
भासमेतं समुद्दिश्य तिष्ठध्वं सन्धितेषतः ॥ १-१४२-७९ (६५००)
मद्वाक्यसमकालं तु शिरोऽस्य विनिपात्यताम् ।
एकैकशो नियोक्ष्यामि तथा कुरुत पुत्रकाः ॥ १-१४२-८० (६५०१)
वैशम्पायन उवाच। १-१४२-८१क्ष् (८५३)
ततो युधिष्ठिरं पूर्वमुवाचाङ्गिरसां वरः ।
संधत्स्व बामं दुर्धर्ष मद्वाक्यान्ते विमुञ्चतम् ॥ १-१४२-८१ (६५०२)
ततो युधिष्ठिरः पूर्वं धनुर्गृह्य परन्तपः ।
तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः ॥ १-१४२-८२ (६५०३)
ततो विततधन्वानं द्रोणस्तं कुरुनन्दनम् ।
स मुहूर्तादुवाचेदं वचनं भरतर्षभ ॥ १-१४२-८३ (६५०४)
पश्यसि त्वं द्रुमाग्रस्थं भासं नरवरात्मज ।
पश्यामीत्येवमाचार्यं प्रत्युवाच युधिष्ठिरः ॥ १-१४२-८४ (६५०५)
स मुहूर्तादिव पुनर्द्रोणस्तं प्रत्यभाषत ।
अथ वृक्षमिमं मां वा भ्रातॄन्वाऽपि प्रपश्यसि ॥ १-१४२-८५ (६५०६)
तमुवाच स कौन्तेयः पश्याम्येनं नवस्पतिम् ।
भन्तं च तथा भ्रातॄन्भासं चेति पुनःपुनः ॥ १-१४२-८६ (६५०७)
तमुवाचापसर्पेति द्रोणोऽप्रीतमना इव ।
नैतच्छक्यं त्वया वेद्धुं लक्ष्यमित्येव कुत्सयन् ॥ १-१४२-८७ (६५०८)
ततो दुर्योधनादींस्तान्धार्तराष्ट्रान्महायशाः ।
तेनैव क्रमयोगेन जिज्ञासुः पर्यपृच्छत ॥ १-१४२-८८ (६५०९)
अन्यांश्च शिष्यान्भीमादीन्राज्ञश्चैवान्यदेशजान् ।
यदा च सर्वे तत्सर्वं पश्याम इति कुत्सिताः ॥ ॥ १-१४२-८९ (६५१०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१४२-१२ यत्प्रदेयं मे इति पाठान्तरम् ॥
१-१४२-२२ द्रोणमभ्ययात् द्रोणतुल्योऽभवत् ॥

१-१४२-२७ औहत तर्कितवान् ॥
१-१४२-२८ अपृथक् सहैवास्ते ॥
१-१४२-२९ अतो न व्यहीयत न विहीनोऽभूत् ॥
१-१४२-३० योगमैकाग्र्यम् ॥
१-१४२-३३ अनुग्रहणमभ्यासः ॥
१-१४२-३४ योग्यामभ्यासम् ॥
१-१४२-३५ उत्थायोपेत्येति क्रमः ॥
१-१४२-४१ तेषामन्ववेक्षया तेभ्योऽधिको माभूदिति बुद्ध्या ॥
१-१४२-४३ महीमयं मृण्मयम् ॥
१-१४२-४४ इष्वस्त्रे इषुप्रयोगे योगमैकाग्र्यम् ॥
१-१४२-४५ लघुत्वं शीघ्रप्रयोक्तृत्वम् ॥
१-१४२-६४ वेतनं गुरुदक्षिणारूपम् ॥
१-१४२-७० नाधिकोऽन्योऽर्जुनादभूत इति पाठान्तरम् ॥
१-१४२-७१ गदायोग्यौ गदायुद्धेऽभ्यासवन्तौ ॥
१-१४२-७२ त्सारुकौ खड्गयुद्धे कुशलौ ॥
१-१४२-७९ भासं पक्षिविशेषम् ॥
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥
१४२ ॥

आदिपर्व - अध्याय १४३
॥ श्रीः ॥
१.१४३. अध्यायः १४३

Mahabharata - Adi Parva - Chapter Topics
अर्जुनेन लक्ष्यभूतभासच्छेदः ॥ १ ॥
स्नानार्थं गङ्गामवतीर्णस्य द्रोणस्य ग्राहेण जङ्घायां ग्रहणम् ॥ २ ॥
अर्जुनेन ग्राहहननम् ॥ ३ ॥
अर्जुनस्य ब्रह्मशिरोस्त्रलाभः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४३-० (६५११)
वैशम्पायन उवाच। १-१४३-०क्ष् (८५४)
ततो धनञ्जयं द्रोणः स्मयमानोऽभ्यभाषत ।
त्वयेदानीं प्रहर्तव्यमेतल्लक्ष्यं विलोक्यताम् ॥ १-१४३-१ (६५१२)
मद्वाक्यसमकालं ते मोक्तव्योऽत्र भवेच्छरः ।
वितत्य कार्मुकं पुत्र तिष्ठ तावन्मुहूर्तकम् ॥ १-१४३-२ (६५१३)

एवमुक्तः सव्यसाची मण्डलीकृतकार्मुकः ।
तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः ॥ १-१४३-३ (६५१४)
मुहूर्तादिव तं द्रोणस्तथैव समभाषत ।
पश्यस्येनं स्थितं भासं द्रुमं मामपि चार्जुन ॥ १-१४३-४ (६५१५)
पश्याम्येकं भासमिति द्रोणं पार्थोऽभ्यभाषत ।
न तु वृक्षं भवन्तं वा पश्यामीति च भारत ॥ १-१४३-५ (६५१६)
ततः प्रीतमना द्रोणो मुहूर्तादिव तं पुनः ।
प्रत्यभाषत दुर्धर्षः पाण्डवानां महारथम् ॥ १-१४३-६ (६५१७)
भासं पश्यसि यद्येनं तथा ब्रूहि पुनर्वचः ।
शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत् ॥ १-१४३-७ (६५१८)
अर्जुनेनैवमुक्तस्तु द्रोणो हृष्टतनूरुहः ।
मुञ्चस्वेत्यब्रवीत्पार्थं स मुमोचाविचारयन् ॥ १-१४३-८ (६५१९)
ततस्तस्य गस्थस्य क्षुरेण निशितेन च ।
शिर उत्कृत्य तरसा पातयामास पाण्डवः ॥ १-१४३-९ (६५२०)
तस्मिन्कर्मणि संसिद्धे पर्यष्वजत पाण्डवम् ।
मेने च द्रुपदं सङ्ख्ये सानुबन्धं पराजितम् ॥ १-१४३-१० (६५२१)
कस्य चित्त्वथ कालस्य सशिष्योऽङ्गिरसां वरः ।
जगाम गङ्गामभितो मज्जितुं भरतर्षभ ॥ १-१४३-११ (६५२२)
अवगाढमथो द्रोणं सलिले सलिलेचरः ।
ग्राहो जग्राह बलवाञ्जङ्घान्ते कालचोदितः ॥ १-१४३-१२ (६५२३)
स समर्थोऽपि मोक्षाय शिष्यान्सर्वानचोदयत् ।
ग्राहं हत्वा तु मोक्ष्यध्वं मामिति त्वरयन्निव ॥ १-१४३-१३ (६५२४)
तद्वाक्यसमकालं तु बीभत्सुर्निशितैः शरैः ।
अवार्यैः पञ्चभिर्ग्राहं मग्नमम्भस्यताडयत् ॥ १-१४३-१४ (६५२५)
इतरे त्वथ संमूढास्तत्रपत्र प्रपेदिरे ।
तं तु दृष्ट्वा क्रियोपेतं द्रोणोऽमन्यत पाण्डवम् ॥ १-१४३-१५ (६५२६)
विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ।
स पार्थबाणैर्बहुधा खण्डशः परिकल्पितः ॥ १-१४३-१६ (६५२७)
ग्राहः पञ्चत्वमापेदे जङ्घां त्यक्त्वा महात्मनः ।
गसर्वक्रियाभ्यनुज्ञानात्तथा शिष्यान्समानयत् ॥ १-१४३-१७ (६५२८)
दुर्योधनं चित्रसेनं दुःशासनविविंशती ।
अर्जुनं च समानीय ह्यश्वत्थामानमेव च ॥ १-१४३-१८ (६५२९)
शिशुकं मृण्मयं कृत्वा द्रोणो गङ्गाजले ततः ।
शिष्याणां पश्यतां चैव क्षिपति स्म महाभुजः ॥ १-१४३-१९ (६५३०)
चक्षुषी वाससा चैव बद्ध्वा प्रादाच्छरासनम् ।
शिशुकं विद्ध्यतेमं वै जलस्थं बद्धचक्षुषः ॥ १-१४३-२० (६५३१)

तत्क्षणेनैव बीभत्सुरावापैर्दशभिर्वशी ।
पञ्चकैरनुविव्याध मग्नं शिशुकमम्भसि ॥ १-१४३-२१ (६५३२)
ताः स दृष्ट्वा क्रियाः सर्वा द्रोणोऽमन्यत पाण्डवम् ।
विशिष्टं सर्वशिष्येभ्यः प्रीतिमांश्चाभवत्तदा ।'
तथाब्रवीन्महात्मानं भारद्वाजो महारथम् ॥ १-१४३-२२ (६५३३)
गृहाणेदं महाबाहो विशिष्टमतिदुर्धरम् ।
अस्त्रं ब्रह्मशिरो नाम सप्रयोगनिवर्तनम् ॥ १-१४३-२३ (६५३४)
न च ते मानुषेष्वेतत्प्रयोक्तव्यं कथंचन ।
जगद्विनिर्दहेदेतदल्पतेजसि पातितम् ॥ १-१४३-२४ (६५३५)
असामान्यमिदं तात लोकेष्वस्त्रं निगद्यते ।
तद्धारयेथाः प्रयतः शृणु चेदं वचो मम ॥ १-१४३-२५ (६५३६)
बाधेतामानुषः शत्रुर्यदि त्वां वीर कश्चन ।
तद्वधाय प्रयुञ्जीथास्तदस्त्रमिदमाहवे ॥ १-१४३-२६ (६५३७)
तथेति संप्रतिश्रुत्य बीभत्सुः स कृताञ्जलिः ।
जग्राह परमास्त्रं तदाह चैनं पुनर्गुरुः ।
भविता त्वत्समो नान्यः पुमाँल्लोके धनुर्धरः ॥ ॥ १-१४३-२७ (६५३८)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४३-१२ अवगाढं जलावगाहिनम् ॥
१-१४३-१३ मोक्ष्यध्वं मोचयध्वम् ॥
त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥
१४३ ॥

आदिपर्व - अध्याय १४४
॥ श्रीः ॥
१.१४४. अध्यायः १४४

Mahabharata - Adi Parva - Chapter Topics
कुमाराणां अस्त्रशिक्षापरीक्षार्थं रङ्गनिर्माणम् ॥ १ ॥
शिक्षादर्शनार्थं भीष्मादीनां प्रेक्षागारप्रवेशः ॥ २ ॥
युधिष्ठिरादीनां परीक्षा ॥ ३ ॥
भीमदुर्योधनयोः गदायुद्धपरीक्षा ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४४-० (६५३९)
वैशम्पायन उवाच।१-१४४-०क्ष् (८५५)
कृतास्त्रान्धार्तराष्ट्रांश्च पाण्डुपुत्रांश्च भारत ।
दृष्ट्वा द्रोणोऽब्रवीद्राजन्धृतराष्ट्रं जनेश्वरम् ॥१-१४४-१ (६५४०)
कृपस्य सोमदत्तस्य वाह्लीकस्य च धीमतः ।
गाङ्गेयस्य च सान्निध्ये व्यासस्य विदुरस्य च ॥१-१४४-२ (६५४१)
राजन्संप्राप्तविद्यास्ते कुमाराः कुरुसत्तम ।
ते दर्शयेयुः स्वां शिक्षां राजन्ननुमते तव ॥१-१४४-३ (६५४२)
ततोऽब्रवीन्महाराजः प्रहृष्टेनान्तरात्मना। १-१४४-४ (६५४३)
धृतराष्ट्र उवाच ।
भारद्वाज महत्कर्म कृतं ते द्विजसत्तम ॥ १-१४४-४क्ष् (८५६)
यदानुमन्यसे कालं यस्मिन्देशे यथायथा ।
तथातथा विधानाय स्वयमाज्ञापयस्व माम् ॥१-१४४-५ (६५४४)
स्पृहयाम्यद्य निर्वेदान्पुरुषाणां सचक्षुषाम् ।
अस्त्रहेतोः पराक्रान्तान्ये मे द्रक्ष्यन्ति पुत्रकान् ॥१-१४४-६ (६५४५)
क्षत्तर्यद्गुरुराचार्यो ब्रवीति कुरु तत्तथा ।
न हीदृशं प्रियं मन्ये भविता धर्मवत्सल ॥१-१४४-७ (६५४६)
ततो राजानमामन्त्र्य विदुरानुमतोपि हि ।
भारद्वाजो महाप्राज्ञो मापयामास मेदिनीम् ॥१-१४४-८ (६५४७)
समामवृक्षां निर्गुलमामुदक्प्रवणसंस्थिताम् ।
तस्यां भूमौ बलिं चक्रे तिथौ नक्षत्रपूजिते ॥१-१४४-९ (६५४८)
अवघुष्टं पुरं चापि तदर्थं भरतर्षभ ।
रङ्गभूमौ सुविपुलं शास्त्रदृष्टं यथाविधि ॥१-१४४-१० (६५४९)
प्रेक्षागारं सुविहितं चक्रुस्ते तस्य शिल्पिनः ।
रक्षां सर्वायुधोपेतां स्त्रीणां चैव नरर्षभ ॥१-१४४-११ (६५५०)
मञ्चांश्च कारयामासुर्यत्र जानपदा जनाः ।
विपुलानुच्छ्रयोपेताञ्शिबिकाश्च महाधनाः ॥१-१४४-१२ (६५५१)
तस्मिंस्ततोऽहनि प्राप्ते राजा ससचिवस्तदा ।
ग्सान्तःपुरः सहामात्यो व्यासस्यानुमते तदा।'
भीष्मं प्रमुखतः कृत्वा कृपं चाचार्यसत्तमम् ॥ १-१४४-१३ (६५५२)
ग्बाह्लीकं सोमदत्तं च भूरिश्रवसमेव च ।
कुरूनन्यांश्च सचिवानादाय नगराद्बहिः ॥१-१४४-१४ (६५५३)
रङ्गभूमिं समासाद्य ब्राह्मणैः सहितो नृपः ॥' १-१४४-१५ (६५५४)
मुक्ताजालपरिक्षिप्तं वैदूर्यममिशोभितम् ।
शातकुम्भमयं दिव्यं प्रेक्षागारमुपागमत् ॥१-१४४-१६ (६५५५)

गान्धारी च महाभागा कुन्ती च जयतां वर ।
स्त्रियश्च राज्ञः सर्वास्ताः सप्रेष्याः सपरिच्छदाः ॥ १-१४४-१७ (६५५६)
हर्षादारुरुहुर्मञ्चान्मेरुं देवस्त्रियो यथा ।
ब्राह्मणक्षत्रियाद्यं च चातुर्वर्ण्यं पुराद्द्रुतम् ॥ १-१४४-१८ (६५५७)
दर्शनेप्सुः समभ्यागात्कुमाराणां कृतास्त्रताम् ।
क्षणेनैकस्थतां तत्र दर्शनेप्सुर्जगाम ह ॥ १-१४४-१९ (६५५८)
प्रवादितैश्च वादित्रैर्जनकौतूहलेन च ।
महार्णव इव क्षुब्धः समाजः सोऽभवत्तदा ॥ १-१४४-२० (६५५९)
ततः शुक्लाम्बरधरः शुक्लयज्ञोपवीतवान् ।
शुक्लकेशः सितश्मश्रुः शुक्लाल्यानुलेपनः ॥ १-१४४-२१ (६५६०)
रङ्गमध्यं तदाचार्यः सपुत्रः प्रविवेश ह ।
नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥ १-१४४-२२ (६५६१)
व्यासस्यानुमते चक्रे बलिं बलवतां वरः ।
ब्राह्मणांस्तु सुमन्त्रज्ञान्कारयामास मङ्गलम् ॥ १-१४४-२३ (६५६२)
ग्सुवर्णमणिरत्नानि वस्त्राणि विविधानि च ।
प्रददौ दक्षिणां राजा द्रोणाय च कृपाय च ॥' १-१४४-२४ (६५६३)
सुखपुण्याहघोषस्य पुण्यस्य समनन्तरम् ।
विविशुर्विविधं गृह्य शस्त्रोपकरणं नराः ॥ १-१४४-२५ (६५६४)
ततो बद्धाङ्गुलित्राणा बद्धकक्ष्या महारथाः ।
बद्धतूणाः सधनुषो विविशुर्भरतर्षभाः ॥ १-१४४-२६ (६५६५)
ग्रङ्गमध्ये स्थितं द्रोणमभिवाद्य नरर्षभाः ।
चक्रुः पूजां यथान्यायं द्रोणस्य च कृपस्य च ॥ १-१४४-२७ (६५६६)
आशीर्भिश्च प्रयुक्ताभिः सर्वे संहृष्टमानसाः ।
अभिवाद्य पुनः शस्त्रान्बलिपुष्पैः समर्चितान् ॥ १-१४४-२८ (६५६७)
रक्तचन्दनसंमिश्रैः स्वयमर्चन्ति कौरवाः ।
रक्तचन्दनदिग्धाश्च रक्तमाल्यानुधारिणः ॥ १-१४४-२९ (६५६८)
सर्वे रक्तपताकाश्च सर्वे रक्तान्तलोचनाः ।
द्रोणेन समनुज्ञाता गृह्य शस्त्रं परन्तपाः ॥ १-१४४-३० (६५६९)
धनूंषि पूर्वं संगृह्य तप्तकाञ्चनभूषिताः ।
सज्यानि विविधाकाराः शरैः सन्धाय कौरवा ॥ १-१४४-३१ (६५७०)
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयन् ॥' १-१४४-३२ (६५७१)
अनुज्येष्ठं च ते तत्र युधिष्ठिरपुनरोगमाः ।
चक्रुरस्त्रं महावीर्याः कुमाराः परमाद्भुतम् ॥ १-१४४-३३ (६५७२)
ग्केषांचित्तत्र माल्येषु शरा निपतिता नृप ।
केषांचित्पुष्पमुकुटे निपतन्ति स्म सायकाः ॥ १-१४४-३४ (६५७३)
केचिल्लक्ष्याणि विविधैर्बाणैराहितलक्षणैः ।

बिभिदुर्लाघवोत्सृष्टैर्गुरूणि च लघूनि च ॥' १-१४४-३५ (६५७४)
केचिच्छराक्षेपभयाच्छिरांस्यवनतामिरे ।
मनुजा धृष्टमपरे वीक्षाञ्चक्रुः सुविस्मिताः ॥ १-१४४-३६ (६५७५)
ते स्म लक्ष्याणि बिभिदुर्बाणैर्नामाङ्कशोभितैः ।
विविधैर्लाघवोत्सृष्टैरुह्यन्तो वाजिभिर्द्रुतम् ॥ १-१४४-३७ (६५७६)
तत्कुमारबलं तत्र गृहीतशरकार्मुकम् ।
गन्धर्वनगराकारं प्रेक्ष्य ते विस्मिताभवन् ॥ १-१४४-३८ (६५७७)
सहसा चुक्रुशुश्चान्ये नराः शतसहस्रशः ।
विस्मयोत्फुल्लनयनाः साधुसाध्विति भारत ॥ १-१४४-३९ (६५७८)
कृत्वा धनुषि ते मार्गान्रथचर्यासु चासकृत् ।
गजपृष्ठेऽश्वपृष्ठे च नियुद्धे च महाबलाः ॥ १-१४४-४० (६५७९)
गृहीतखड्गचर्माणस्ततो भूयः प्रहारिणः ।
त्सरुमार्गान्यथोद्दिष्टांश्चेरुः सर्वासु भूमिषु ॥ १-१४४-४१ (६५८०)
लाघवं सौष्ठवं शोभां स्थिरत्वं दृढमुष्टिताम् ।
ददृशुस्तत्र सर्वेषां प्रयोगं खड्गचर्मणोः ॥ १-१४४-४२ (६५८१)
अथ तौ नित्यसंहृष्टौ सुयोधनवृकोदरौ ।
अवतीर्णौ गदाहस्तावेकशृङ्गाविवाचलौ ॥ १-१४४-४३ (६५८२)
बद्धकक्ष्यौ महाबाहू पौरुषे पर्यवस्थितौ ।
बृंहन्तौ वासिताहेतोः समदाविव कुञ्जरौ ॥ १-१४४-४४ (६५८३)
तौ प्रदक्षिणसव्यानि मण्डलानि महाबलौ ।
चेरतुर्मण्डलगतौ समदाविव कुञ्जरौ ॥ १-१४४-४५ (६५८४)
विदुरो धृतराष्ट्राय गान्धार्याः पाण्डवारणिः ।
न्यवेदयेतां तत्सर्वं कुमाराणां विचेष्टितम् ॥ ॥ १-१४४-४६ (६५८५)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१४४-१९ दर्शनेप्सुः जन इति शेषः ॥
१-१४४-२२ अंशुमान् चन्द्रः ॥
१-१४४-३८ गन्धर्वनगराकारमद्भुतरूपम् ॥
१-१४४-४३ संहृष्टौ परस्परं जेतुं सकामौ ॥
१-१४४-४४ बृंहन्तौ शब्दं कुर्वाणौ । वासिता हस्तिनी ॥
१-१४४-४५ मण्डलगताबलातचक्रवद्भ्राम्यमाणगदापरिवेषान्तर्गतौ ॥
१-१४४-४६ पाण्डवारणिः कुन्ती ॥
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥

आदिपर्व - अध्याय १४५
॥ श्रीः ॥
१.१४५. अध्यायः १४५

Mahabharata - Adi Parva - Chapter Topics
अर्जुनस्य परीक्षा ॥ १ ॥
कर्णस्य रङ्गप्रवेशः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४५-० (६५८६)
वैशम्पायन उवाच। १-१४५-०क्ष् (८५७)
कुरुराजे हि रङ्गस्थे भीमे च बलिनां वरे ।
पक्षपातकृतस्नेहः स द्विधेवाभवज्जनः ॥ १-१४५-१ (६५८७)
जय हे कुरुराजेति जय हे भीम इत्युत ।
पुरुषाणां सुविपुलाः प्रणादाः सहसोत्थिताः ॥ १-१४५-२ (६५८८)
ततः क्षुब्धार्णवनिभं रङ्गमालोक्य बुद्धिमान् ।
भारद्वाजः प्रियं पुत्रमश्वत्थामानमब्रवीत् ॥ १-१४५-३ (६५८९)
वारयैतौ महावीर्यौ कृतयोग्यावुभावपि ।
मा भूद्रङ्गप्रकोपोऽयं भीमदुर्योधनोद्भवः ॥ १-१४५-४ (६५९०)
वैशम्पायन उवाच। १-१४५-५क्ष् (८५८)
ग्तत उत्थाय वेगेन अश्वत्थामा न्यवारयत् ।
गुरोराज्ञा भीम इति गान्धारे गुरुशासनम् ।
अलं शिक्षाकृतं वेगमलं साहसमित्युत ॥' १-१४५-५ (६५९१)
ततस्तावुद्यतगतौ गुरुपुत्रेण वारितौ ।
युगान्तानिलसंक्षुब्धौ महावेलाविवार्णवौ ॥ १-१४५-६ (६५९२)
ततो रङ्गाङ्गणगतो द्रोणो वचनमब्रवीत् ।
निवार्य वादित्रगणं महामेघनिभस्वनम् ॥ १-१४५-७ (६५९३)
यो मे पुत्रात्प्रियतरः सर्वशस्त्रविशारदः ।
ऐन्द्रिरिन्द्रानुजसमः स पार्थो दृश्यतामिति ॥ १-१४५-८ (६५९४)
आचार्यवचनेनाथ कृतस्वस्त्ययनो युवा ।
बद्धगोधाङ्गुलित्राणः पूर्णतूणः सकार्मुकः ॥ १-१४५-९ (६५९५)
काञ्चनं कवचं बिभ्रत्प्रत्यदृश्य फाल्गुनः ।
सार्कः सेन्द्रायुधतडित्ससन्ध्य इव तोयदः ॥ १-१४५-१० (६५९६)
ततः सर्वस्य रङ्गस्य समुत्पिञ्जलकोऽभवत् ।

प्रावाद्यन्त च वाद्यानि सशङ्खानि समन्ततः ॥ १-१४५-११ (६५९७)
प्रेक्षका ऊचुः। १-१४५-१२क्ष् (८५९)
एष कुन्तीसुतः श्रीमानेष मध्यमपाण्डवः ।
एष पुत्रो महेन्द्रस्य कुरूणामेष रक्षिता ॥ १-१४५-१२ (६५९८)
एषोऽस्त्रविदुषां श्रेष्ठ एष धर्मभृतां वरः ।
एष शीलवतां चापि शीलज्ञाननिधिः परः ॥ १-१४५-१३ (६५९९)
वैशम्पायन उवाच। १-१४५-१४क्ष् (८६०)
इत्येवं तुमुला वाचः शुश्रुवुः प्रेक्षकेरिताः ।
कुन्त्याः प्रस्रवसंयुक्तैरस्रैः क्लिन्नमुरोऽभवत् ॥ १-१४५-१४ (६६००)
तेन शब्देन महता पूर्णश्रुतिरथाब्रवीत् ।
धृतराष्ट्रो नरश्रेष्ठो विदुरं हृष्टमानसः ॥ १-१४५-१५ (६६०१)
क्षत्तः क्षुब्धार्णवनिभः किमेष सुमहास्वनः ।
सहसैवोत्थितो रङ्गे भिन्दन्निव नभस्तलम् ॥ १-१४५-१६ (६६०२)
विदुर उवाच। १-१४५-१७क्ष् (८६१)
एष पार्थो महाराज फाल्गुनः पाण्डुनन्दनः ।
अवतीर्णः सकवचस्तत्रैव सुमिहास्वनः ॥ १-१४५-१७ (६६०३)
धृतराष्ट्र उवाच। १-१४५-१८क्ष् (८६२)
धन्योऽस्म्यनुगृहीतोऽस्मि रक्षितोऽस्मि महामते ।
पृथारणिसमुद्भूतैस्त्रिभिः पाण्डववह्निभिः ॥ १-१४५-१८ (६६०४)
वैशम्पायन उवाच। १-१४५-१९क्ष् (८६३)
तस्मिन्प्रमुदिते रङ्गे कथंचित्प्रत्युपस्थिते ।
दर्शयामास बीभत्सुराचार्यायास्त्रलाघवम् ॥ १-१४५-१९ (६६०५)
आग्नेयेनासृजद्वह्निं वारुणेनासृजत्पयः ।
वायव्येनासृजद्वह्निं पार्जन्येनासृजद्धनान् ॥ १-१४५-२० (६६०६)
भौमेन प्रासृजद्भूमिं पार्वतेनासृजद्गिरीन् ।
अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥ १-१४५-२१ (६६०७)
क्षणात्प्रांशुः क्षणाद्ध्रस्वः क्षणाच्च रथधूर्गतः ।
क्षणेन रथमध्यस्थः क्षणेनावतरन्महीम् ॥ १-१४५-२२ (६६०८)
सुकुमारं च सूक्ष्मं च गुरु चापि गुरुप्रियः ।
सौष्ठवेनाभिसंयुक्तः सोऽविध्यद्विविधैः शरैः ॥ १-१४५-२३ (६६०९)
भ्रमतश्च वराहस्य लोहस्य प्रमुखे समम् ।
पञ्चबाणानसंक्तान्संमुमोचैकबाणवत् ॥ १-१४५-२४ (६६१०)
गव्ये विषाणकोशे च चले रज्ज्ववलम्बिनि ।
निचखान महावीर्यः सायकानेकविंशतिम् ॥ १-१४५-२५ (६६११)
इत्येवमादि सुमहत्खड्गे धनुषि चानघ ।
गदायां शस्त्रकुशलो मण्डलानि ह्यदर्शयत् ॥ १-१४५-२६ (६६१२)

ततः समाप्तभूयिष्ठे तस्मिन्कर्मणि भारत ।
मन्दीभूते समाजे च वादित्रस्य च निःस्वने ॥ १-१४५-२७ (६६१३)
द्वारदेशात्समुद्भूतो माहात्म्यबलसूचकः ।
वज्रनिष्पेषसदृशः शुश्रुवे भुजनिःस्वनः ॥ १-१४५-२८ (६६१४)
दीर्यन्ते किं नु गिरयः किंस्विद्भूमिर्विदीर्यते ।
किंस्विदापूर्यते व्योम जलधाराघनैर्घनैः ॥ १-१४५-२९ (६६१५)
रङ्गस्यैवं मतिरभूत्क्षणेन वसुधाधिप ।
द्वारं चाभिमुखाः सर्वे बभूवुः प्रेक्षकास्तदा ॥ १-१४५-३० (६६१६)
पञ्चभिर्भ्रातृभिः पार्थैर्द्रोणः परिवृतो वभौ ।
पञ्चतारेण संयुक्तः सावित्रेणेव चन्द्रमाः ॥ १-१४५-३१ (६६१७)
अश्वत्थाम्ना च सहितं भ्रातॄणां शतमूर्जितम् ।
दुर्योधनममित्रघ्नमुत्थितं पर्यवारयत् ॥ १-१४५-३२ (६६१८)
स तैस्तदा भ्रातृभिरुद्यतायुधै-
र्गदाग्रपाणिः समवस्थितैर्वृतः ।
बभौ यथा दानवसंक्षये पुरा
पुनन्दरो देवगणैः समावृतः ॥ ॥ १-१४५-३३ (६६१९)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१४५-४ कृतयोग्यौ सुशिक्षितौ ॥
१-१४५-१० तूणकार्मुककवचानां तत्प्रभाजालस्यार्जुनस्य च क्रमादर्केन्द्रायुधतडित्संध्यातोयदैरुपमा ॥
१-१४५-११ समुत्पिञ्जलक उत्फुल्लता ॥
१-१४५-१४ अस्रैः प्रेमाश्रुभिः ॥
१-१४५-२३ सुकुमारं पूर्णघटकुक्कुटाण्डादीनि लक्ष्याण्यविचाल्याविध्यत् । सूक्ष्मं गुञ्जादि लक्ष्यं, गुरु घनावयवं च सोऽविध्यत् ॥
१-१४५-२५ भूताश्वेभवराहाणां सिंहर्क्षकपिसंमुखान् । बाणान्सप्तासमायुक्तान्स मुमोचैकबाणवत् । इति घपाठः । गव्ये गोसंबन्धिनि ॥
१-१४५-३१ सावित्रेण हस्तनक्षत्रेण ॥
१-१४५-३३ गदा अग्रं आलम्बनं यस्य तादृशः पाणिर्यस्य स गादाग्रपाणिः ॥
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥
१४५ ॥

आदिपर्व - अध्याय १४६

॥ श्रीः ॥
१.१४६. अध्यायः १४६

Mahabharata - Adi Parva - Chapter Topics
कर्णस्य परीक्षा ॥ १ ॥
कर्णार्जुनयोर्युद्धप्रसङ्गः ॥ २ ॥
कृपेण कर्णस्याधिक्षेपः, कर्णस्य दुर्योधनेन राज्याभिषेचनं च ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४६-० (६६२०)
वैशम्पायन उवाच। १-१४६-०क्ष् (८६४)
गएतस्मिन्नेव काले तु तस्मिञ्जनसमागमे।'
दत्तेऽवकाशे पुरुषैर्विस्मयोत्फुल्ललोचनः ।
विवेश रङ्गं विस्तीर्णं कर्णः परपुरञ्जयः ॥ १-१४६-१ (६६२१)
सहजं कवचं बिभ्रत्कुण्डलोद्द्योतिताननः ।
स धनुर्बद्धनिस्त्रिंशः पादचारीव पर्वतः ॥ १-१४६-२ (६६२२)
कन्यागर्भः पृथुयशाः पृथायाः पृथुलोचनः ।
तीक्ष्णांशोर्भास्करस्यांशः कर्णोऽरिगणसूदनः ॥ १-१४६-३ (६६२३)
सिंहर्षभगजेन्द्राणां बलवीर्यपराक्रमः ।
दीप्तिकान्तिद्युतिगुणैः सूर्येन्दुज्वलनोपमः ॥ १-१४६-४ (६६२४)
प्रांशुः कनकतालाभः सिंहसंहननो युवा ।
असङ्ख्येयगुणः श्रीमान्भास्करस्यात्मसंभवः ॥ १-१४६-५ (६६२५)
स निरीक्ष्य महाबाहुः सर्वतो रङ्गमण्डलम् ।
प्रणामं द्रोणकृपयोर्नात्यादृतमिवाकरोत् ॥ १-१४६-६ (६६२६)
स समाजजनः सर्वो निश्चलः स्थिरलोचनः ।
कोऽयमित्यागतक्षोभः कौतूहलपरोऽभवत् ॥ १-१४६-७ (६६२७)
सोऽब्रवीन्मेघगम्भीरस्वरेण वदतां वरः ।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम् ॥ १-१४६-८ (६६२८)
पार्थ यत्ते कृतं कर्म विशेषवदहं ततः ।
करिष्ये पश्यतां नॄणां माऽऽत्मना विस्मयं गमः ॥ १-१४६-९ (६६२९)
असमाप्ते ततस्तस्य वचने वदतां वर ।
यन्त्रोत्क्षिप्त इवोत्तस्थौ क्षिप्रं वै सर्वतो जनः ॥ १-१४६-१० (६६३०)
प्रीतिश्च मनुजव्याघ्र दुर्योधनमुपाविशत् ।
ह्रीश्च क्रोधश्च बीभत्सुं क्षणेनान्वाविवेश ह ॥ १-१४६-११ (६६३१)
ततो द्रोणाभ्यनुज्ञातः कर्णः प्रियरणः सदा ।

यत्कृतं तत्र पार्थेन तच्चकार महाबलः ॥१-१४६-१२ (६६३२)
अथ दुर्योधनस्तत्र भ्रातृभिः सह भारत ।
कर्णं परिष्वज्य मुदा ततो वचनमब्रवीत् ॥१-१४६-१३ (६६३३)
स्वागतं ते महाबाहो दिष्ट्या प्राप्तोऽसि मानद ।
अहं च कुरुराज्यं च यथेष्टमुपभुज्यताम् ॥१-१४६-१४ (६६३४)
कर्ण उवाच। १-१४६-१५क्ष् (८६५)
कृतं सर्वमहं मन्ये सखित्वं च त्वया वृणे ।
द्वन्द्वयुद्धं च पार्थेन कर्तुमिच्छाम्यहं प्रभो ॥१-१४६-१५ (६६३५)
ग्वैशम्पायन उवाच। १-१४६-१६क्ष् (८६६)
एवमुक्तस्तु कर्णेन राजन्दुर्योधनस्तदा ।
कर्णं दीर्घाञ्चितभुजं परिष्वज्येदमब्रवीत् ॥' १-१४६-१६ (६६३६)
भुङ्क्ष्व भोगान्मया सार्धं बन्धूनां प्रियकृद्भव ।
दुर्हृदां कुरु सर्वेषां मूर्ध्नि पादमरिन्दम ॥१-१४६-१७ (६६३७)
वैशम्पायन उवाच। १-१४६-१८क्ष् (८६७)
ततः क्षिप्तमिवात्मानं मत्वा पार्थोऽभ्यभाषत ।
कर्णं भ्रातृसमूहस्य मध्येऽचलमिव स्थितम् ॥१-१४६-१८ (६६३८)
अर्जुन उवाच। १-१४६-१९क्ष् (८६८)
अनाहूतोपसृष्टानामनाहूतोपजल्पिनाम् ।
ये लोकास्तान्हतः कर्ण मया त्वं प्रतिपत्स्यसे ॥१-१४६-१९ (६६३९)
कर्ण उवाच। १-१४६-२०क्ष् (८६९)
रङ्गोऽयं सर्वसामान्यः किमत्र तव फाल्गुन ।
वीर्यश्रेष्ठाश्च राजानो बलं धर्मोऽनुवर्तते ॥१-१४६-२० (६६४०)
किं क्षेपैर्दुर्बलायासैः शरैः कथय भारत ।
गुरोः समक्षं यावत्ते हराम्यद्य शिरः शरैः ॥१-१४६-२१ (६६४१)
वैशम्पायन उवाच। १-१४६-२२क्ष् (८७०)
ततो द्रोणाभ्यनुज्ञातः पार्तः परपुरञ्जयः ।
भ्रातृभिस्त्वरयाश्लिष्टो रणायोपजगाम तम् ॥१-१४६-२२ (६६४२)
ततो दुर्योधनेनापि स भ्रात्रा समरोद्यतः ।
परिष्वक्तः स्थितः कर्णः प्रगृह्य सशरं धनुः ॥१-१४६-२३ (६६४३)
ततः सविद्युत्स्तनितैः सेन्द्रायुधपुरोगमैः ।
आवृतं गगनं मेघैर्बलाकापङ्क्तिहासिभिः ॥१-१४६-२४ (६६४४)
ततः स्नेहाद्धरिहयं दृष्ट्वा रङ्गावलोकिनम् ।
भास्करोऽप्यनयन्नाशं समीपोपगतान्घनान् ॥१-१४६-२५ (६६४५)
मेघच्छायोपगूढस्तु ततोऽदृश्यत फाल्गुनः ।
सूर्यातपपरिक्षिप्तः कर्णोऽपि समदृश्यत ॥१-१४६-२६ (६६४६)
धार्तराष्ट्रा यतः कर्णस्तस्मिन्देशे व्यवस्थिताः ।

भारद्वाजः कृपो भीष्मो यतः पार्थस्ततोऽभवन् ॥ १-१४६-२७ (६६४७)
द्विधा रङ्गः समभवत्स्त्रीणां द्वैधमजायत ।
कुन्तिभोजसुता मोहं विज्ञातार्था जगाम ह ॥ १-१४६-२८ (६६४८)
तां तथा मोहमापन्नां विदुरः सर्वधर्मवित् ।
कुन्तीमाश्वासयामास प्रेष्याभिश्चन्दनोदकैः ॥ १-१४६-२९ (६६४९)
ततः प्रत्यागतप्राणा तावुभौ परिदंशितौ ।
पुत्रौ दृष्ट्वा सुसंभ्रान्ता नान्वपद्यत किंचन ॥ १-१४६-३० (६६५०)
तावुद्यतमहाचापौ कृपः शारद्वतोऽब्रवीत् ।
द्वन्द्वयुद्धसमाचारे कुशलः सर्वधर्मवित् ॥ १-१४६-३१ (६६५१)
अयं पृथायास्तनयः कनीयान्पाण्डुनन्दनः ।
कौरवो भवता सार्धं द्वन्द्वयुद्धं करिष्यति ॥ १-१४६-३२ (६६५२)
त्वमप्येवं महाबाहो मातरं पितरं कुलम् ।
कथयस्व नरेन्द्राणां येषां त्वं कुलभूषणम् ॥ १-१४६-३३ (६६५३)
ततो विदित्वा पार्थस्त्वां प्रतियोत्स्यति वा न वा ।
वृथाकुलसमाचारैर्न युध्यन्ते नृपात्मजाः ॥ १-१४६-३४ (६६५४)
वैशम्पायन उवाच। १-१४६-३५क्ष् (८७१)
एवमुक्तस्य कर्णस्य व्रीडावनतमाननम् ।
बभौ वर्षाम्बुविक्लिन्नं पद्ममागलितं यथा ॥ १-१४६-३५ (६६५५)
दुर्योधन उवाच। १-१४६-३६क्ष् (८७२)
आचार्य त्रिविधा योनी राज्ञां शास्त्रविनिश्चये ।
सत्कुलीनश्च शूरश्च यश्च सेनां प्रकर्षति ॥ १-१४६-३६ (६६५६)
ग्अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥' १-१४६-३७ (६६५७)
यद्ययं फाल्गुनो युद्धे नाराज्ञा योद्धुमिच्छति ।
तस्मादेषोऽङ्गविषये मया राज्येऽभिषिच्यते ॥ १-१४६-३८ (६६५८)
वैशम्पायन उवाच। १-१४६-३९क्ष् (८७३)
ग्ततो राजानमामन्त्र्य गाङ्गेयं च पितामहम् ।
अभिषेकस्य संभारान्समानीय द्विजातिभिः ॥ १-१४६-३९ (६६५९)
गोसहस्रायुतं दत्त्वा युक्तानां पुण्यकर्मणाम् ।
अर्होऽयमङ्गराज्यस्य इति वाच्य द्विजातिभिः'॥ १-१४६-४० (६६६०)
ततस्तस्मिन्क्षणे कर्णः सलाजकुसुमैर्घटैः ।
काञ्चनैः काञ्चने पीठे मन्त्रविद्भिर्महारथः ॥ १-१४६-४१ (६६६१)
अभिषिक्तोऽङ्गराजे स श्रिया युक्तो महाबलः ।
ग्स मौलिहारकेयूरः सहस्ताभरणाङ्गदः ॥ १-१४६-४२ (६६६२)
राजलिङ्गैस्तथाऽन्यैश्च भूषितो भूषणैः शुभैः।'
सच्छत्रवालव्यजनो जयशब्दोत्तरेण च ॥ १-१४६-४३ (६६६३)

उवाच कौरवं राजन्वचनं स वृषस्तदा ।
अस्य राज्यप्रदानस्य सदृशं किं ददानि ते ॥ १-१४६-४४ (६६६४)
प्रब्रूहि राजशार्दूल कर्ता ह्यस्मि तथा नृप ।
अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः ॥ १-१४६-४५ (६६६५)
एवमुक्तस्ततः कर्णस्तथेति प्रत्युवाच तम् ।
हर्षाच्चोभौ समाश्लिष्य परां मुदमवापतुः ॥ ॥ १-१४६-४६ (६६६६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४६-१ दत्तावकाश इति चपाठः ॥
१-१४६-६ नामपूर्वमथाकरोत् इति पाठान्तरम् ॥
१-१४६-२६ सूर्यातपपरिवक्त इति डपाठः ॥
१-१४६-२८ विज्ञातार्था कर्णस्य स्वपुत्रत्वज्ञानवती । हेतुगर्भमेतत् ॥
१-१४६-३४ वृथाकुलसमाचारैः अज्ञातकुलाचारैः ॥
१-१४६-४० वाच्य वाचयित्वा ॥
षट्चत्वारिंशदधिकशततमोऽध्यायझ ॥
१४६ ॥

आदिपर्व - अध्याय १४७
॥ श्रीः ॥
१.१४७. अध्यायः १४७

Mahabharata - Adi Parva - Chapter Topics
कर्णपितुरधिरथस्य रङ्गप्रवेशः ॥ १ ॥
भीमेन कर्णस्याधिक्षेपः ॥ २ ॥
सर्वेषां रङ्गान्निष्क्रमणम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४७-० (६६६७)
वैशम्पायन उवाच । १-१४७-०क्ष् (८७४)
ततः स्रस्तोत्तरपटः सप्रस्वेदः सवेपथुः ।
विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव ॥ १-१४७-१ (६६६८)
तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।
कर्णोऽभिषेकार्द्रशिराः शिरसा समवन्दत ॥ १-१४७-२ (६६६९)

ततः पादाववच्छाद्य पटान्तेन ससंभ्रमः ।
पुत्रेति परिपूर्णार्थमब्रवीद्रथसारथिम् ॥ १-१४७-३ (६६७०)
परिष्वज्य च तस्याथ मूर्धानं स्नेहविक्लवः ।
अङ्गराज्याभिषेकार्द्रमश्रुभिः सिषिचे पुनः ॥ १-१४७-४ (६६७१)
तं दृष्ट्वा सूतपुत्रोऽयमिति संचिन्त्य पाण्डवः ।
भीमसेनस्तदा वाक्यमब्रवीत्प्रहसन्निव ॥ १-१४७-५ (६६७२)
न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम् ।
कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ॥ १-१४७-६ (६६७३)
अङ्गराज्यं च नार्हस्त्वमुपभोक्तुं नराधम ।
श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ॥ १-१४७-७ (६६७४)
वैशम्पायन उवाच। १-१४७-८क्ष् (८७५)
एवमुक्तस्ततः कर्णः किंचित्प्रस्फुरिताधरः ।
गगनस्थं विनिःश्वस्य दिवाकरमुदैक्षत ॥ १-१४७-८ (६६७५)
ततो दुर्योधनः कोपादुत्पपात महाबलः ।
भ्रातृपद्मवनात्तस्मान्मदोत्कट इव द्विपः ॥ १-१४७-९ (६६७६)
सोऽब्रवीद्भीमकर्माणं भीमसेनमवस्थितम् ।
वृकोदर न युक्तं ते वचनं वक्तुमीदृशम् ॥ १-१४७-१० (६६७७)
क्षत्रियाणां बलं ज्यष्ठं योक्तव्यं क्षत्रबन्धुना ।
शूराणां च नदीनां च प्रभवो दुर्विभावनः ॥ १-१४७-११ (६६७८)
सलिलादुत्थितो वह्निर्येन व्याप्तं चराचरम् ।
दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥ १-१४७-१२ (६६७९)
आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि ।
श्रूयते भगवान्देवः सर्वगुह्यमयो गुहः ॥ १-१४७-१३ (६६८०)
क्षत्रियेभ्यश्च ये जाता ब्राह्मणास्ते च ते श्रुताः ।
विश्वामित्रप्रभृतयः प्राप्ता ब्रह्मत्वमव्ययम् ॥ १-१४७-१४ (६६८१)
आचार्यः कलशाज्जातो द्रोणः शस्त्रभृतां वरः ।
गौतमस्यान्ववाये च शरस्तम्बाच्च गौतमः ॥ १-१४७-१५ (६६८२)
भवतां च यथा जन्म तदप्यागमितं मया ।
सकुण्डलं सकवचं सर्वलक्षणलक्षितम् ।
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ॥ १-१४७-१६ (६६८३)
पृथिवीराज्यमर्होऽयं नाङ्गराज्यं नरेश्वरः ।
अनेन बाहुवीर्येण मया चाज्ञानुवर्तिना ॥ १-१४७-१७ (६६८४)
यस्य वा मनुजस्येदं न क्षान्तं मद्विचेष्टितम् ।
रथमारुह्य पद्भ्यां स विनामयतु कार्मुकम् ॥ १-१४७-१८ (६६८५)
ततः सर्वस्य रङ्गस्य हाहाकारो महानभूत् ।
साधुवादानुसंबद्धः सूर्यश्चास्तमुपागमत् ॥ १-१४७-१९ (६६८६)

ततो दुर्योधनः कर्णमालम्ब्याग्रकरे नृपः ।
दीपिकाभिः कृतालोकस्तस्माद्रङ्गाद्विनिर्ययौ ॥१-१४७-२० (६६८७)
पाण्डवाश्च सहद्रोणाः सकृपाश्च विशांपते ।
भीष्मेण सहिताः सर्वे ययुः स्वं स्वं निवेशनम् ॥१-१४७-२१ (६६८८)
अर्जुनेति जनः कश्चित्कश्चित्कर्णेति भारत ।
कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थितास्तदा ॥१-१४७-२२ (६६८९)
कुन्त्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितम् ।
पुत्रमङ्गेश्वरं स्नेहाच्छन्ना प्रीतिरजायत ॥१-१४७-२३ (६६९०)
दुर्योधनस्यापि तदा कर्णमासाद्य पार्थिव ।
भयमर्जुनसंजातं क्षिप्रमन्तरधीयत ॥१-१४७-२४ (६६९१)
स चापि वीरः कृतशस्त्रनिश्रमः
परेण साम्नाऽभ्यवदत्सुयोधनम् ।
युधिष्ठिरस्याप्यभवत्तदा मति-
र्न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ ॥ ॥ १-१४७-२५ (६६९२)

इति श्रीमन्महाभारते आदिप्रवणि संभवपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥१४७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४७-१८ यस्य येन न क्षान्तं न सोढम् ॥
१-१४७-२५ निश्रमो नितरां श्रमः ॥
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥
१४७ ॥

आदिपर्व - अध्याय १४८
॥ श्रीः ॥
१.१४८. अध्यायः १४८

Mahabharata - Adi Parva - Chapter Topics
गुरुदक्षिणात्वेन जीवतो द्रुपदस्य ग्रहणे द्रोणेनाज्ञापिते तदर्थं
तेन सह सर्वशिष्याणां पाञ्चालपुरगमनम् ॥१ ॥
द्रुपदग्रहणाय पाण्डववर्जं गतानां कौरवाणां तेन पराजयः ॥२ ॥
तदनन्तरं गतेषु पाण्डवेषु अर्जुनेन द्रुपदग्रहणम् ॥३ ॥
जीवग्राहं गृहीत्वा भीमार्जुनाभ्यां समर्पितेन द्रुपदेन द्रोणस्य
संवादः ॥४ ॥
द्रोणेनार्धराज्यापहारेण मुक्तस्य द्रुपदस्य पुत्रोत्पादनार्थं प्रयत्नः ॥५ ॥

१-१४८-० (६६९३)
वैशम्पायन उवाच। १-१४८-०क्ष् (८७६)
पाण्डवान्धार्तराष्ट्रांश्च कृतास्त्रान्प्रसमीक्ष्य सः ।
गुर्वर्थं दक्षिणां काले प्राप्तेऽमन्यत वै गुरुः ॥ १-१४८-१ (६६९४)
ग्अस्त्रशिक्षामनुज्ञातान्रङ्गद्वारमुपागतान् ।
भारद्वाजस्ततस्तांस्तु सर्वानेवाभ्यभाषत ॥ १-१४८-२ (६६९५)
इच्छामि दत्तां सहितां मह्यं परमदक्षिणाम् ।
एवमुक्तास्ततः सर्वे शिष्या द्रोणमथाब्रुवन् ।
भगवन्किं प्रयच्छाम आज्ञापयतु नो गुरुः ॥' १-१४८-३ (६६९६)
ततः शिष्यान्समाहूय आचार्योऽर्थमचोदयत् ।
द्रोणः सर्वानशेषेण दक्षिणार्थं महीपते ॥ १-१४८-४ (६६९७)
पञ्चालराजं द्रुपदं गृहित्वा रणमूर्धनि ।
पर्यानयत भद्रं वः सा स्यात्परमदक्षिणा ॥ १-१४८-५ (६६९८)
तथेत्युक्त्वा तु ते सर्वे रथैस्तूर्णं प्रहारिणः ।
आचार्यधनदानार्थं द्रोणेन सहिता ययुः ॥ १-१४८-६ (६६९९)
ततोऽभिजग्मुः पञ्चालान्निघ्नन्तस्ते नरर्षभाः ।
ममृदुस्तस्य नगरं द्रुपदस्य महौजसः ॥ १-१४८-७ (६७००)
दुर्योधनश्च कर्णश्च युयुत्सुश्च महाबलः ।
दुःशासनो विकर्णश्च जलसन्धः सुलोचनः ॥ १-१४८-८ (६७०१)
एते चान्ये च बहवः कुमारा बहुविक्रमाः ।
अहं पूर्वमहं पूर्वमित्येवं क्षत्रियर्षभाः ॥ १-१४८-९ (६७०२)
ततो वरराथारूढाः कुमाराः सादिभिः सह ।
प्रविश्य नगरं सर्वे राजमार्गमुपाययुः ॥ १-१४८-१० (६७०३)
तस्मिन्काले तु पाञ्चालः श्रुत्वा दृष्ट्वा महद्बलम् ।
भ्रातृभिः सहितो राजंस्त्वरया निर्ययौ गृहात् ॥ १-१४८-११ (६७०४)
ततस्तु कृतसन्नाहा यज्ञसेनसहोदराः ।
शरवर्षाणि मुञ्चन्तः प्रणेदुः सर्व एव ते ॥ १-१४८-१२ (६७०५)
ततो रथेन शुभ्रेण समासाद्य तु कौरवान् ।
यज्ञसेनः शरान्घोरान्ववर्ष युधि दुर्जयः ॥ १-१४८-१३ (६७०६)
पूर्वमेव तु संमन्त्र्य पार्थो द्रोणमथाऽब्रवीत् ।
दर्पोद्रिकात्कुमाराणामाचार्यं द्विजसत्तमम् ॥ १-१४८-१४ (६७०७)
एषां पराक्रमस्यान्ते वयं कुर्याम साहसम् ।
एतैरशक्यः पाञ्चालो ग्रहीतुं रणमूर्धनि ॥ १-१४८-१५ (६७०८)
एवमुक्त्वा तु कौन्तेयो भ्रातृभिः सहितोऽनघः ।

अर्धक्रोशे तु नगरादतिष्ठद्बहिरेव सः ॥ १-१४८-१६ (६७०९)
द्रुपदः कौरवान्दृष्ट्वा प्राधावत समन्ततः ।
शरजालेन महता मोहयन्कौरवीं चमूम् ॥ १-१४८-१७ (६७१०)
तमुद्यतं रथेनैकमाशुकारिणमाहवे ।
अनेकमिव सन्त्रासान्मेनिरे तत्र कौरवाः ॥ १-१४८-१८ (६७११)
द्रुपदस्य शरा घोरा विचेरुः सर्वतोदिशम् ।
ततः शङ्खाश्च भेर्यश्च मृदङ्गाश्च सहस्रशः ॥ १-१४८-१९ (६७१२)
प्रावाद्यन्त महाराज पञ्चालानां निवेशने ।
सिंहनादश्च संजज्ञे पञ्चालानां महात्मनाम् ॥ १-१४८-२० (६७१३)
धनुर्ज्यातलशब्दश्च संस्पृश्य गगनं महान् ।
दुर्योधनो विकर्णश्च सुबाहुर्दीर्घलोचनः ॥ १-१४८-२१ (६७१४)
दुःशाशनश्च संक्रुद्धः शरवर्षैरवाकिरन् ।
सोऽतिविद्धो महेष्वासः पार्षतो युधि दुर्जयः ॥ १-१४८-२२ (६७१५)
व्यधमत्तान्यनीकानि तत्क्षणादेव भारत ।
दुर्योधनं विकर्णं च कर्णं चापि महाबलम् ॥ १-१४८-२३ (६७१६)
नानानृपसुतान्वीरान्सैन्यानि विविधानि च ।
अलातचक्रवत्सर्वं चरन्बाणैरतर्पयत् ॥ १-१४८-२४ (६७१७)
ततस्तु नागराः सर्वे मुसलैर्यष्टिभिस्तदा ।
अभ्यवर्षन्त कौरव्यान्वर्षमाणा घा इव ॥ १-१४८-२५ (६७१८)
सबालवृद्धाः काम्पिल्याः कौरवानभ्ययुस्तदा ।
श्रुत्वा सुतुमुलं युद्धं कौरवानेव भारत ॥ १-१४८-२६ (६७१९)
द्रवन्तिस्म नदन्तिस्म क्रोशन्तः पाण्डवान्प्रति ।
पाडवास्तु स्वनं श्रुत्वा आर्तानां रोमहर्षणम् ॥ १-१४८-२७ (६७२०)
अभिवाद्य ततो द्रोणं रथानारुरुहुस्तदा ।
युधिष्ठिरं निवार्याशु मा युध्यस्वेति पाण्डवम् ॥ १-१४८-२८ (६७२१)
माद्रेयौ चक्ररक्षौ तु फाल्गुनश्च तदाऽकरोत् ।
सेनाग्रगो भीमसेनस्तदाभूद्गदया सह ॥ १-१४८-२९ (६७२२)
तदा शत्रुस्वनं श्रुत्वा भ्रातृभिः सहितोऽनघः ।
आयाज्जवेन कौन्तेयो रथेनानादयन्दिशः ॥ १-१४८-३० (६७२३)
पञ्चालानां ततः सेनामुद्धूतार्णवनिःस्वनाम् ।
भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ॥ १-१४८-३१ (६७२४)
प्रविवेश महासेनां मकरः सागरं यथा ।
ग्चतुरङ्गबलाकीर्णे ततस्तस्मिन्रणोत्सवे ॥' १-१४८-३२ (६७२५)
स्वयमभ्यद्रवद्भीमो नागानीकं गदाधरः ॥ १-१४८-३३ (६७२६)
स युद्धकुशलः पार्थो बाहुवीर्येण चातुलः ।
अहनत्कुञ्जरानीकं गदया कालरूपधृक् ॥ १-१४८-३४ (६७२७)

ते गजा गिरिसङ्काशाः क्षरन्तो रुधिरं बहु ।
भीमसेनस्य गदया भिन्नमस्तकपिण्डकाः ॥ १-१४८-३५ (६७२८)
पतन्ति द्विरदा भूमौ वज्रघातादिवाचलाः ।
गजानश्वान्रथांश्चैव पातयामास पाण्डवः ॥ १-१४८-३६ (६७२९)
पदातींश्च रथांश्चैव न्यवधीदर्जुनाग्रजः ।
गोपाल इव दण्डेन यथा पशुगणान्वने ॥ १-१४८-३७ (६७३०)
चालयन्रथनागांश्च संचचाल वृकोदरः ।
भारद्वाजप्रियं कर्तुमुद्यतः फाल्गुनस्तदा ॥ १-१४८-३८ (६७३१)
पार्षतं शरजालेन क्षिपन्नागात्स पाण्डवः ।
हयौघांश्च रथौघांश्च गजौघांश्च समन्ततः ॥ १-१४८-३९ (६७३२)
पातयन्समरे राजन्युगान्ताग्निरिव ज्वलन् ।
ततस्ते हन्यमाना वै पञ्चालाः सृञ्जयास्तथा ॥ १-१४८-४० (६७३३)
शरैर्नानाविधैस्तूर्णं पार्थं संछाद्य सर्वशः ।
सिंहनादं मुखैः कृत्वा समयुध्यन्त पाण्डवम् ॥ १-१४८-४१ (६७३४)
तद्युद्धमभवद्धोरं समुहाद्भुतदर्शनम् ।
सिंहनादस्वनं श्रुत्वा नामृष्यत्पाकशासनिः ॥ १-१४८-४२ (६७३५)
ततः किरीटी सहसा पञ्चालान्समरेऽद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव ॥ १-१४८-४३ (६७३६)
शीघ्रमभ्यस्यतो बाणान्संदधानस्य चानिशम् ।
नान्तरं ददृशे किंचित्कौन्तेयस्य यशस्विनः ॥ १-१४८-४४ (६७३७)
ग्न दिशो नान्तरिक्षं च तदा नैव च मेदिनी ।
अदृश्यत महाराज तत्र किंचिन्न सङ्गरे ॥ १-१४८-४५ (६७३८)
पाञ्चालानां कुरूणां च साधुसाध्विति निस्वनः ।
तत्र तूर्यनिनादश्च शङ्खानां च महास्वनः ॥' १-१४८-४६ (६७३९)
सिंहनादश्च संजज्ञे साधुशब्देन मिश्रितः ।
ततः पाञ्चालराजस्तु तथा सत्यजिता सह ॥ १-१४८-४७ (६७४०)
त्वरमाणोऽभिदुद्राव महेन्द्रं शम्बरो यथा ।
महता शरवर्षेण पार्थः पाञ्चालमावृणोत् ॥ १-१४८-४८ (६७४१)
ततो हलहलाशब्द आसीत्पाञ्चालके बले ।
जिवृक्षति महासिंहे गजानामिव यूथपम् ॥ १-१४८-४९ (६७४२)
दृष्ट्वा पार्थं तदायान्तं सत्यजित्सत्यविक्रमः ।
पाञ्चालं वै परिप्रेप्सुर्धनञ्जयमदुद्रुवत् ॥ १-१४८-५० (६७४३)
ततस्त्वर्जुनपाञ्चालौ युद्धाय समुपागतौ ।
व्यक्षोभयेतां तौ सैन्यमिन्द्रवैरोचनाविव ॥ १-१४८-५१ (६७४४)
ततः सत्यजितं पार्थो दशभिर्मर्मभेदिभिः ।
विव्याध बवलद्गाढं तदद्भुतमिवाभवत् ॥ १-१४८-५२ (६७४५)

ततः शरशतैः पार्थं पाञ्चालः शीघ्रमार्दयत् ।
पार्थस्तु शरवर्षेण च्छाद्यमानो महारथः ॥ १-१४८-५३ (६७४६)
वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च ।
ततः सत्यजितश्चापं छित्वा राजानमभ्ययात् ॥ १-१४८-५४ (६७४७)
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम् ।
साश्वं ससूतं सरथं पार्थं विव्याध सत्वरः ॥ १-१४८-५५ (६७४८)
स तं न ममृषे पार्थः पाञ्चालेनार्दितो युधि ।
ततस्तस्य विनाशार्थं सत्वरं व्यसृजच्छरान् ॥ १-१४८-५६ (६७४९)
हयान्ध्वजं धनुर्मुष्टिमुभौ तौ पार्ष्णिसारथी ।
स तथा भिद्यमानेषु कार्मुकेषु पुनः पुनः ॥ १-१४८-५७ (६७५०)
हयेषु विनिकृत्तेषु विमुखोऽभवदाहवे ।
स सत्यजितमालेक्य तथा विमुखमाहवे ॥ १-१४८-५८ (६७५१)
वेगेन महता राजन्नभ्यधावत पार्षतम् ।
तदा चक्रे महद्युद्धमर्जुनो जयतां वरः ॥ १-१४८-५९ (६७५२)
तस्य पार्थो धनुश्छित्त्वा ध्वजं चोर्व्यामपातयत् ।
पञ्चभिस्तस्य विव्याध हयान्सूतं च सायकैः ॥ १-१४८-६० (६७५३)
तत उत्सृज्य तच्चापमाददानः शरावरम् ।
खड्गमुद्धृत्य कौन्तेयः सिंहनादमथाकरोत् ॥ १-१४८-६१ (६७५४)
पाञ्चालस्य रथस्येषामाप्लुत्य सहसाऽपतत् ।
पाञ्चालरथमास्थाय अवित्रस्तो धनञ्जयः ॥ १-१४८-६२ (६७५५)
विक्षोभ्याम्भोनिधिंताक्ष्र्यस्तंनागमिव सोऽग्रहीत् ।
ततस्तु सर्वपाञ्चाला विद्रवन्ति दिशो दश ॥ १-१४८-६३ (६७५६)
दर्शयन्सर्वसैन्यानां स बाह्वोर्बलमात्मनः ।
सिंहनादस्वनं कृत्वा निर्जगाम धनञ्जयः ॥ १-१४८-६४ (६७५७)
आयान्तमर्जुनं दृष्ट्वा कुमाराः सहितास्तदा ।
ममृदुस्तस्य नगरं द्रुपदस्य महात्मनः ॥ १-१४८-६५ (६७५८)
अर्जुन उवाच। १-१४८-६६क्ष् (८७७)
संबन्धी कुरुवीराणां द्रुपदो राजसत्तमः ।
मा वधीस्तद्बलं भीम गुरुदानं प्रदीयताम् ॥ १-१४८-६६ (६७५९)
वैशम्पायन उवाच। १-१४८-६७क्ष् (८७८)
भीमसेनस्तदा राजन्नर्जुनेन निवारितः ।
अतृप्तो युद्धधर्मेषु न्यवर्तत महाबलः ॥ १-१४८-६७ (६७६०)
ते यज्ञसेनं द्रुपदं गृहीत्वा रणमूर्धनि ।
उपाजग्मुः सहामात्यं द्रोणाय भरतर्षभ ॥ १-१४८-६८ (६७६१)
भग्नदर्पं हृतधनं तं तथा वशमागतम् ।
स वैरं मनसा ध्यात्वा द्रोणो द्रुपदमब्रवीत् ॥ १-१४८-६९ (६७६२)

विमृज्य तरसा राष्ट्रं पुरं ते मृदितं मया ।
प्राप्य जीवन्रिपुवशं सखिपूर्वं किमिष्यते ॥ १-१४८-७० (६७६३)
एवमुक्त्वा प्रहस्यैनं किंचित्स पुनरब्रवीत् ।
मा भैः प्राणभयाद्वीर क्षमिणो ब्राह्मणा वयम् ॥ १-१४८-७१ (६७६४)
आश्रमे क्रीडितं यत्तु त्वया बाल्ये मया सह ।
तेन संवर्धितः स्नेहः प्रीतिश्च क्षत्रियर्षभ ॥ १-१४८-७२ (६७६५)
प्रार्थयेयं त्वया सख्यं पुनरेव जनाधिप ।
वरं ददामि ते राजन्राज्यस्यार्धमवाप्नुहि ॥ १-१४८-७३ (६७६६)
अराजा किल नो राज्ञः सखा भवितुमर्हति ।
अतः प्रयतितं राज्ये यज्ञसेन मया तव ॥ १-१४८-७४ (६७६७)
राजासि दक्षिणे कूले भागीरथ्याहमुत्तरे ।
सखायं मां विजानीहि पाञ्चाल यदि मन्यसे ॥ १-१४८-७५ (६७६८)
द्रुपद उवाच। १-१४८-७६क्ष् (८७९)
अनाश्चर्यमिदं ब्रह्मन्विक्रान्तेषु महात्मसु ।
प्रीये त्वयाऽहं त्वत्तश्च प्रीतिमिच्छामि शाश्वतीम् ॥ १-१४८-७६ (६७६९)
वैशम्पायन उवाच। १-१४८-७७क्ष् (८८०)
एवमुक्तः स तं द्रोणो मोक्षयामास भारत ।
सत्कृत्य चैनं प्रीतात्मा राज्यार्धं प्रत्यपादयत् ॥ १-१४८-७७ (६७७०)
माकन्दीमथ गङ्गायास्तीरे जनपदायुताम् ।
सोऽध्यावसद्दीनमनाः काम्पिल्यं च पुरोत्तमम् ॥ १-१४८-७८ (६७७१)
दक्षिणांश्चापि पञ्चालान्यावच्चर्मण्वती नदी ।
द्रोणेन चैवं द्रुपदः परिभूयाथ पालितः ॥ १-१४८-७९ (६७७२)
क्षात्रेण च बलेनास्य नापश्यत्स पराजयम् ।
हीनं विदित्वा चात्मानं ब्राह्मेण स बलेनतु ॥ १-१४८-८० (६७७३)
पुत्रजन्म परीप्सन्वै पृथिवीमन्वसंचरत् ।
अहिच्छत्रं च विषयं द्रोणः समभिपद्यत ॥ १-१४८-८१ (६७७४)
एवं राजन्नहिच्छत्रा पुरीजनपदायुता ।
युधि निर्जित्य पार्थेन द्रोणाय प्रतिपादिता ॥ ॥ १-१४८-८२ (६७७५)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१४८-६१ शरावरं चर्म ॥
१-१४८-६२ ईषा रथस्य युगचक्रसंलग्नं महादारु ॥
१-१४८-७० प्राप्य जीवन्नृप वशामिति ङ्पाठः ॥

अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥
१४८ ॥

आदिपर्व - अध्याय १४९
॥ श्रीः ॥
१.१४९. अध्यायः १४९

Mahabharata - Adi Parva - Chapter Topics
द्रुपदस्य याजोपयाजसमीपगमनम् ॥ १ ॥
उपयाजेन द्रोणविनाशकपुत्रोत्पादनार्थं याजनाय प्रार्थिते याजनस्य प्रत्याख्यानम् ॥ २ ॥
याजेनाङ्गीकारे यजनारम्भः ॥ ३ ॥
अपत्यप्रदहविःप्राशनार्थं द्रुपदपत्न्या आह्वाने गर्वात्तया विलम्बनम् ॥ ४ ॥
क्रुद्धाभ्यां याजोपयाजाभ्यां अग्नौ हविषो होमेनाग्निकुण्डाद्धृष्टद्युम्नस्योत्पत्तिः ॥ ५ ॥
द्वितीयहविषो होमेन पाञ्चाल्या उत्पत्तिः ॥ ६ ॥
तयोर्नामकरणम् ॥ ७ ॥
द्रोणाद्धृष्टद्युम्नस्यास्त्रशिक्षणम् ॥ ८ ॥

Mahabharata - Adi Parva - Chapter Text

१-१४९-० (६७७६)
ग्वैशम्पायन उवाच। १-१४९-०क्ष् (८८१)
द्रोणेन वैरं द्रुपदो न सुष्वाप स्मरंस्तदा ।
क्षात्रेण वै बलेनास्य नाऽशशंसे पराजयम् ॥ १-१४९-१ (६७७७)
हीनं विदित्वा चात्मानं ब्राह्मेणापि बलेन च ।
द्रुपदोऽमर्षणाद्राजा कर्मसिद्धान्द्विजोत्तमान् ॥ १-१४९-२ (६७७८)
अन्विच्छन्परिचक्राम ब्राह्मणावसथान्बहून् ।
नास्ति श्रेष्ठं ममापत्यं धिग्बन्धूनिति च ब्रुवन् ॥ १-१४९-३ (६७७९)
निश्वासपरमो ह्यासीद्द्रोणं प्रतिचिकीर्षया ।
न सन्ति मम मित्राणि लोकेऽस्मिन्नास्ति वीर्यवान् ॥ १-१४९-४ (६७८०)
पुत्रजन्म परीप्सन्वै पृथिवीमन्वयादिमाम् ।
प्रभावशिक्षाविनयाद्द्रोणस्यास्त्रबलेन च ॥ १-१४९-५ (६७८१)
कर्तुं प्रयतमानो वै न शशाक पराजयम् ।
अभितः सोऽथ कल्माषीं गङ्गातीरे परिभ्रमन् ॥ १-१४९-६ (६७८२)
ब्राह्मणावसथं पुण्यमाससाद महीपतिः ।
तत्र नास्नातकः कश्चिन्न चासीदव्रतो द्विजः ॥ १-१४९-७ (६७८३)

तथैव तौ महाभागौ सोऽपश्यच्छंसितव्रतौ ।
याजोपयाजौ ब्रह्मर्षी भ्रातरौ पृषतात्मजः ॥ १-१४९-८ (६७८४)
संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ।
अरण्ये युक्तरूपौ तौ ब्राह्मणावृषिसत्तमौ ॥ १-१४९-९ (६७८५)
स उपामन्त्रयामास सर्वकामैरतन्द्रितः ।
बुद्ध्वा तयोर्बलं बुद्धिं कनीयांसमुपह्वरे ॥ १-१४९-१० (६७८६)
प्रपेदे छन्दयन्कामैरुपयाजं धृतव्रतम् ।
गुरुशुश्रूषणे युक्तः प्रियकृत्सर्वकामदम् ॥ १-१४९-११ (६७८७)
पाद्येनासनदानेन तथाऽर्घ्येण फलैश्च तम् ।
अर्हयित्वा यथान्यायमुपयाजोऽब्रवीत्ततः ॥ १-१४९-१२ (६७८८)
येन कार्यविशेषेण त्वमस्मानभिकाङ्क्षसे ।
कृतश्चायं समुद्योगस्तद्ब्रवीतु भवानिति ॥ १-१४९-१३ (६७८९)
वैशम्पायन उवाच। १-१४९-१४क्ष् (८८२)
स बुद्ध्वा प्रीतिसंयुक्तमृषीणामुत्तमं तदा ।
उवाच छन्दयन्कामैर्द्रुपदः स तपस्विनम् ॥ १-१४९-१४ (६७९०)
येन मे कर्मणा ब्रह्मन्पुत्रः स्याद्द्रोणमृत्येव ।
उपयाज चरस्वैतत्प्रदास्यामि धनं तव ॥ १-१४९-१५ (६७९१)
उपयाज उवाच। १-१४९-१६क्ष् (८८३)
नाहं फलार्थी द्रुपद योऽर्थी स्यात्तत्र गम्यताम्। १-१४९-१६ (६७९२)
वैशम्पायन उवाच ।
प्रत्याख्यातस्तु तेनैवं स वै सज्जनसंनिधौ ॥ १-१४९-१६क्ष् (८८४)
आराधयिष्यन्द्रुपदः स तं पर्यचरत्तदा ।
ततः संवत्सरस्यान्ते द्रुपदं द्विजसत्तमः ॥ १-१४९-१७ (६७९३)
उपयाजोऽब्रवीद्वाक्यं काले मधुरया गिरा ।
ज्येष्ठो भ्राता न मेऽत्याक्षीद्विचरन्विजने वने ॥ १-१४९-१८ (६७९४)
अपरिज्ञातशौचायां भूमौ निपतितं फलम् ।
तदपश्यमहं भ्रातुरसांप्रतमनुव्रजन् ॥ १-१४९-१९ (६७९५)
विमर्शं हि फलादाने नायं कुर्यात्कथंचन ।
नापश्यत्फलं दृष्ट्वा दोषांस्तस्याऽऽनुबन्धिकान् ॥ १-१४९-२० (६७९६)
विविनक्ति न शौचार्थी सोऽन्यत्रापि कथं भवेत् ।
संहिताध्ययनस्यान्ते पञ्चयज्ञान्निरूप्य च ॥ १-१४९-२१ (६७९७)
भैक्षमुञ्छेन सहितं भुञ्जानस्तु तदा तदा ।
कीर्तयत्येव राजर्षे भोजनस्य रसं पुनः ॥ १-१४९-२२ (६७९८)
संहिताध्ययनं कुर्वन्वने गुरुकुले वसन् ।
भैक्षमुच्छिष्टमन्येषां भुङ्क्ते स्म सततं तथा ॥ १-१४९-२३ (६७९९)
कीर्तयन्गुणमन्नानामथ प्रीतो मुहुर्मुहुः ।

एवं फलार्थिनस्त्समान्मन्येऽहं तर्कचक्षुषा ॥१-१४९-२४ (६८००)
तं वै गच्छेह नृपते त्वां स संयाजयिष्यति ॥ १-१४९-२५ (६८०१)
वैशम्पायन उवाच।१-१४९-२६क्ष् (८८५)
उपयाजवचः श्रुत्वा याजस्याश्रममभ्यगात् ।
जुगुप्समानो नृपतिर्मनसेदं विचिन्तयन् ॥१-१४९-२६ (६८०२)
भृशं संपूज्य पूजार्हमृषिं याजमुवाच ह ।
गोशतानि ददान्यष्टौ याज याजय मां विभो ॥१-१४९-२७ (६८०३)
द्रोणवैरान्तरे तप्तं विषण्णं शरणागतम् ।
ब्रह्मबन्धुप्रणिहितं न क्षत्रं क्षत्रियो जयेत् ॥१-१४९-२८ (६८०४)
तस्माद्द्रोणभयार्तं मां भवांस्त्रातुमिहार्हति ।
येन मे कर्मणा ब्रह्मन्पुत्रः स्याद्द्रोणमृत्यवे ॥१-१४९-२९ (६८०५)
अर्जुनस्यापि वै भार्या भवेद्या वरवर्णिनी ।
स हि ब्रह्मविदां श्रेष्ठो ब्राह्मे क्षात्रेऽप्यनुत्तमः ॥१-१४९-३० (६८०६)
ततो द्रोणस्तु माऽजैषीत्सखिविग्रहकारणात् ।
क्षत्रियो नास्ति तुल्योऽस्य पृथिव्यां कश्चिदग्रणीः ॥१-१४९-३१ (६८०७)
भारताचार्यमुख्यस्य भारद्वाजस्य धीमतः ।
द्रोणस्य शरजालानि रिपुदेहहराणि च ॥१-१४९-३२ (६८०८)
षडरत्नि धनुश्चास्य खड्गमप्रतिम तथा ।
स हि ब्राह्मणवेषेण क्षात्रं वेगमसंशयम् ॥१-१४९-३३ (६८०९)
प्रतिहन्ति महेष्वासो भारद्वाजो महामनाः ।
कार्तवीर्यसमो ह्येष खट्वाङ्गप्रतिमो रणे ॥१-१४९-३४ (६८१०)
क्षत्रोच्छेदाय विहितो जामदग्न्य इवास्थितः ॥ १-१४९-३५ (६८११)
सहितं क्षत्रवेगेन ब्रह्मवेगेन सांप्रतम् ।
उपपन्नं हि मन्येऽहं भारद्वाजं यशस्विनम् ॥१-१४९-३६ (६८१२)
नेषवस्तमपाकुर्युर्न च प्रासा न चासयः ।
ब्राह्मं तस्य महातेजो मन्त्राहुतिहुतं यथा ॥१-१४९-३७ (६८१३)
तस्य ह्यस्त्रबलं घोरमप्रसह्यं परैर्भुवि ।
शत्रून्समेत्य जयति क्षत्रं ब्रह्मपुरस्कृतम् ॥१-१४९-३८ (६८१४)
ब्रह्मक्षत्रे च सहिते ब्रह्मतेजो विशिष्यते ।
सोऽहं क्षत्रबलाद्धीनो ब्रह्मतेजः प्रपेदिवान् ॥१-१४९-३९ (६८१५)
द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्मवित्तमम् ।
द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम् ॥१-१४९-४० (६८१६)
द्रोणमृत्युर्यथा मेऽद्य पुत्रो जायेत वीर्यवान् ।
तत्कर्म कुरु मे याज निर्वपाम्यर्बुद्धं गवाम् ॥१-१४९-४१ (६८१७)
वैशम्पायन उवाच।१-१४९-४२क्ष् (८८६)
तथेत्युक्त्वा तुं तं याजो यज्ञार्थमुपकल्पयन् ।

गुर्वर्थ इति चाकाममुपयाजमचोदयत् ॥ १-१४९-४२ (६८१८)
द्रुपदं च महाराजमिदं वचनमब्रवीत् ।
मा भैस्त्वं संप्रदास्यामि कर्मणा भवतः सुतम् ॥ १-१४९-४३ (६८१९)
क्षिप्रमुत्तिष्ठ चाव्यग्रः संभारानुपकल्पय। १-१४९-४४ (६८२०)
वैशम्पायन उवाच ।
एवमुक्त्वा प्रतिज्ञाय कर्म चास्याददे मुनिः ॥ १-१४९-४४क्ष् (८८७)
ब्राह्मणो द्विपदां श्रेष्ठो यथाविधि कथाक्रमम् ।
याजो द्रोणविनाशाय याजयामास तं नृपम् ॥ १-१४९-४५ (६८२१)
गुर्वर्थेऽयोजयत्कर्म याजस्यापि समीपतः ।
ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः ॥ १-१४९-४६ (६८२२)
आचख्यौ कर्म वैतानं तथा पुत्रफलाय वै ।
इह पुत्रो महावीर्यो महातेजा महाबलः ।
इष्यते यद्विधो राजन्भविता स तथाविधः ॥ १-१४९-४७ (६८२३)
वैशम्पायन उवाच। १-१४९-४८क्ष् (८८८)
भारद्वाजस्य हन्तारं सोऽभिसन्धाय पार्थिवः ।
आजहेऽथ तदा राजन्द्रुपदः कर्म सिद्धये ॥ १-१४९-४८ (६८२४)
ब्राह्मणो द्विपदां श्रेष्ठो जुहाव च यथाविधि ।
कौसवी नाम तस्यासीद्या वै तां पुत्रगृद्धिनः ॥ १-१४९-४९ (६८२५)
सौत्रामणिं तथा पत्नीं ततः कालेऽभ्ययात्तदा ।
याजस्तु सवनस्यान्ते देवीमाह्वापयत्तदा ॥ १-१४९-५० (६८२६)
प्रेहि मां राज्ञि पृषति मिथुनं त्वामुपस्थितम् ।
कुमारश्च कुमारी च पितृवंशविवृद्धये ॥ १-१४९-५१ (६८२७)
पृषत्युवाच। १-१४९-५२क्ष् (८८९)
नालिप्तं वै मम मुखं पुण्यान्गन्धान्बिभर्मि च ।
न पत्नी तेऽस्मि सूत्यर्थे तिष्ठ याज मम प्रिये ॥ १-१४९-५२ (६८२८)
याज उवाच। १-१४९-५३क्ष् (८९०)
याजेन श्रपितं हव्यमुपयाजेन मन्त्रितम् ।
कथं कामं न संदध्यात्पृषति प्रेहि तिष्ठ वा ॥ १-१४९-५३ (६८२९)
वैशम्पायन उवाच। १-१४९-५४क्ष् (८९१)
एवमुक्त्वा तु याजेन हुते हविषि संस्कृते ।
उत्तस्थौ पावकात्तस्मात्कुमारो देवसंनिभः ॥ १-१४९-५४ (६८३०)
ज्वालावर्णो घोररूपः किरीटी वर्म धारयन् ।
वीरः सखड्गः सशरो धनुष्मान्स नदन्मुहुः ॥ १-१४९-५५ (६८३१)
सोऽभ्यरोहद्रथवरं तेन च प्रययौ तदा ।
जातमात्रे कुमारे च वाक्किलान्तर्हिताब्रवीत् ॥ १-१४९-५६ (६८३२)
एष शिष्यश्च मृत्युश्च भारद्वाजस्य जायते ।

भयापहो राजपुत्रः पाञ्चालानां यशस्करः ॥१-१४९-५७ (६८३३)
राज्ञः शोकापहो जात एष द्रोणवधाय हि ।
इत्यवोचन्महद्भूतमदृश्यं खेचरं तदा ॥१-१४९-५८ (६८३४)
ततः प्रणेदुः पाञ्चालाः प्रहृष्टाः साधुसाध्विति ।
द्वितीयायां च होत्रायां हुते हविषि मन्त्रिते ॥१-१४९-५९ (६८३५)
कुमारी चापि पाञ्चाली वेदिमध्यात्समुत्थिता ।
प्रत्याख्याते पृषत्या च याजके भरतर्षभ ॥१-१४९-६० (६८३६)
पुनः कुमारी पाञ्चाली सुभगा वेदिमध्यगा ।
अन्तर्वेद्यां समुद्भूता कन्या सा सुमनोहरा ॥१-१४९-६१ (६८३७)
श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा ।
मानुषं विग्रहं कृत्वा साक्षाच्छ्रीरिव वर्णिनी ॥१-१४९-६२ (६८३८)
ताम्रतुङ्गनखी सुभ्रूश्चारुपीनपयोधरा ।
नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रधावति ॥१-१४९-६३ (६८३९)
या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि ।
देवदानवयक्षाणामीप्सिता वरवर्णिनी ॥१-१४९-६४ (६८४०)
तां चापि जातां सुश्रोणीं वागुवाचाशरीरिणी ।
सर्वयोषिद्वरा कृष्णा क्षयं क्षत्रस्य नेष्यति ॥१-१४९-६५ (६८४१)
सुरकार्यमियं काले करिष्यति सुमध्यमा ।
अस्या हेतोः क्षत्रियाणां महदुत्पत्स्यते भयम् ॥१-१४९-६६ (६८४२)
तच्छ्रुत्वा सर्वपाञ्चालाः प्रणेदुः सिंहसङ्घवत् ।
न चैनान्हर्षसंपन्नानियं सेहे वसुन्धरा ॥१-१४९-६७ (६८४३)
तथा तु मिथुनं जज्ञे द्रुपदस्य महात्मनः ।
कुमारश्च कुमारी च मनोज्ञौ तौ नरर्षभौ ॥१-१४९-६८ (६८४४)
श्रिया परमया युक्तौ क्षात्रेण वपुषा तथा ।
तौ दृष्ट्वा पृषती याजं प्रपेदे सा सुतार्थिनी ॥१-१४९-६९ (६८४५)
न वै मदन्यां जननीं जानीयातामिमाविति ।
तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया ॥१-१४९-७० (६८४६)
तयोस्तु नामनी चक्रुर्द्विजाः संपूर्णमानसाः ।
धृष्टत्वादप्रधृष्यत्वात् द्युम्नाद्युत्संभवादपि ॥१-१४९-७१ (६८४७)
धृष्टद्युम्नः कुमारोऽयं द्रुपद्सय भवत्विति ।
कृष्णेत्येवाभवत्कन्या कृष्णा भूत्सा हि वर्णतः ॥१-१४९-७२ (६८४८)
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ।
वैदिकाध्ययने पारं धृष्टद्युम्नो गतस्तदा ॥१-१४९-७३ (६८४९)
धृष्टद्युम्नं तु पाञ्चाल्यमानीय स्वं निवेशनम् ।
उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ॥१-१४९-७४ (६८५०)
अमोक्षणीयं दैवं हि भावि मत्वा महामतिः ।

तथा तत्कृतवान्द्रोण आत्मकीर्त्यनुरक्षणात् ॥ १-१४९-७५ (६८५१)
सर्वास्त्राणि स तु क्षिप्रमाप्तवान्परया धिया ॥ ॥ १-१४९-७६ (६८५२)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
ऊनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१४९-६३ क्रोशात् क्रोशमभिव्याप्य ॥
१-१४९-७१ द्युम्नाद्युत्संभवात् हिरण्यादिभिः सह जातत्वात् ॥
ऊनपञ्चाशदधिकशततमोऽध्यायः ॥
१४९ ॥

आदिपर्व - अध्याय १५०
॥ श्रीः ॥
१.१५०. अध्यायः १५०

Mahabharata - Adi Parva - Chapter Topics
द्रुपदोत्पत्तिः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५०-० (६८५३)
जनमेजय उवाच। १-१५०-०क्ष् (८९२)
द्रुपदस्यापि विप्रर्षे श्रोतुमिच्छामि संभवम् ।
कथं चापि समुत्पन्नः कथमस्त्राण्यवाप्तवान् ॥' १-१५०-१ (६८५४)
एतदिच्छामि भगवंस्त्वत्तः श्रोतुं द्विजोत्तम ।
कौतूहलं जन्मसु मे कीर्त्यमानेष्वनेकशः ॥ १-१५०-२ (६८५५)
वैशम्पायन उवाच। १-१५०-३क्ष् (८९३)
राजा बभूव पाञ्चालः पुत्रार्थी पुत्रकारणात् ।
वनं गतो महाराजस्तपस्तेपे सुदारुणम् ॥ १-१५०-३ (६८५६)
आराधयन्प्रयत्नेन महर्षीन्संशितव्रतान् ।
तस्य संतप्यमानस्य वने मृगगणायुते ॥ १-१५०-४ (६८५७)
कालस्तु सुमहान्राजन्नत्ययात्सुतकारणात् ।
स तु राजा महातेजास्तपस्तीव्रं समाददे ॥ १-१५०-५ (६८५८)
कंचित्कालं वायुभक्षो निराहारस्तथैव च ।
तथैव तु महाबाहोर्वर्तमानस्य भारत ॥ १-१५०-६ (६८५९)
कालस्तस्य महाराज यातो वै नृपसत्तम ।

ततो नातिचिरात्काले वसन्ते कामदीपने ॥ १-१५०-७ (६८६०)
फुल्लाशोकवने चैव प्राणिनां सुमनोहरे ।
नद्यास्तीरं ततो गत्वा गङ्गायाः पद्मलोचनः ॥ १-१५०-८ (६८६१)
नियमस्थश्च राजासीत्तदा भरतसत्तम ।
ततो नातिचिरात्काले वनं तन्मनुजेश्वर ॥ १-१५०-९ (६८६२)
संप्राप्ता ह्यप्सरा राजन्मेनकेत्यभिविश्रुता ।
पुष्पद्रुमान्सज्जमाना राज्ञो दर्शनमागमत् ॥ १-१५०-१० (६८६३)
न ददर्श तु सा राजंस्तत्र स्थानगतं नृपम् ।
दृष्ट्वा चाप्सरसं तां तु शुक्रं राज्ञोऽपतद्भुवि ॥ १-१५०-११ (६८६४)
ततः स राजा राजेन्द्र लज्जया नृपतिः स्वयम् ।
पद्भ्यामाक्रमतायुष्मंस्ततस्तु द्रुपदोऽभवत् ॥ १-१५०-१२ (६८६५)
ततस्तु तपसा तस्य राजर्षेर्भावितात्मनः ।
पुत्रः समभवच्छीघ्रं पदोस्तस्य क्रमेण तु ॥ १-१५०-१३ (६८६६)
तेनास्य ऋषयः सर्वे समागम्य तपोधनाः ।
नाम चक्रुर्हि विद्वांसो द्रुपदोऽस्त्विति भारत ॥ १-१५०-१४ (६८६७)
स तस्यैवाश्रमे राजन्भरद्वाजस्य भारत ।
ववृधे सुमुखं तत्र कामैः सर्वैर्नृपोत्तम ॥ १-१५०-१५ (६८६८)
पाञ्चालोऽपि हि राजेन्द्र स्वराज्यं गतवान्प्रभुः ।
भरद्वाजस्य विद्यार्थं सुतं दत्वा महात्मनः ॥ १-१५०-१६ (६८६९)
स कुमारस्ततो राजन्द्रोणेन सहितो वने ।
वेदांश्चाधिजगे साङ्गान्धनुर्वेदांश्च भारत ॥ १-१५०-१७ (६८७०)
परया स मुदा युक्तो विचचार वने सुखम् ।
तस्यैवं वर्तमानस्य वने वनचरैः सह ॥ १-१५०-१८ (६८७१)
कालेनातिचिराद्राजन्पिता स्वर्गमुपेयिवान् ।
स समागम्य पाञ्चालैः पाञ्चालेष्वभिषेचितः ॥ १-१५०-१९ (६८७२)
प्राप्तश्च राज्यं राजेन्द्र सुहृदां प्रीतिवर्धनः ।
राज्यं ररक्ष धर्मेण यथा चेन्द्रस्त्रिविष्टपम् ॥ १-१५०-२० (६८७३)
एतन्मया ते राजेन्द्र यथावत्परिकीर्तितम् ।
द्रुपदस्य च राजर्षेर्धृष्टद्युम्नस्य जन्म च ॥ ॥ १-१५०-२१ (६८७४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

आदिपर्व - अध्याय १५१
॥ श्रीः ॥
१.१५१. अध्यायः १५१

Mahabharata - Adi Parva - Chapter Topics
यौवराज्ये युधिष्ठिरस्याभिषेकः ॥ १ ॥
भीमसेनस्य बलरामाद्गदायुद्धशिक्षणम् ॥ २ ॥
द्रोणेनार्जुनस्य ब्रह्मशिरोस्त्रविषये नियमकथनम् ॥ ३ ॥
भीमार्जुनदिग्विजयेन धृतराष्ट्रचिन्ता ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५१-० (६८७५)
वैशम्पायन उवाच। १-१५१-०क्ष् (८९४)
ग्धृतराष्ट्रस्तु राजन्द्रे यदा कौरवनन्दनम् ।
युधिष्ठिरं विजानन्वै समर्थं राज्यरक्षणे ॥ १-१५१-१ (६८७६)
यौवराज्याभिषेकार्थममन्त्रयत मन्त्रिभिः ।
ते तु बुद्धवान्वतप्यन्त धृतराष्ट्रात्मजास्तदा ॥ १-१५१-२ (६८७७)
ततः संवत्सरस्यान्ते यौवराज्याय पार्थिव ।
स्थापितो धृतराष्ट्रेण पाण्डुपुत्रो युधिष्ठिरः ॥ १-१५१-३ (६८७८)
ततोऽदीर्घेण कालेन कुन्तीपुत्रो युधिष्ठिरः ।
पितुरन्तर्दधे कीर्तिं शीलवृत्तसमाधिभिः ॥ १-१५१-४ (६८७९)
असियुद्धे गदायुद्धे रथयुद्धे च पाण्डवः ।
संकर्षणादशिक्षद्वै शश्वच्छिक्षां वृकोदरः ॥ १-१५१-५ (६८८०)
समाप्तशिक्षो भीमस्तु द्युमत्सेनसमो बले ।
पराक्रमेण संपन्नो भ्रातॄणामचरद्वशे ॥ १-१५१-६ (६८८१)
प्रगाढदृढमुष्टित्वे लाघवे वेधने तथा ।
क्षुरनाराचभल्लानां विपाठानां च तत्त्ववित् ॥ १-१५१-७ (६८८२)
ऋजुवक्रविशालानां प्रयोक्ता फाल्गुनोऽभवत् ।
लाघवे सौष्ठवे चैव नान्यः कश्चन विद्यते ॥ १-१५१-८ (६८८३)
बीभत्सुसदृशो लोक इति द्रोणो व्यवस्थितः ।
ततोऽब्रवीद्गुडाकेशं द्रोणः कौरवसंसदि ॥ १-१५१-९ (६८८४)
अगस्त्यस्य धनुर्वेदे शिष्यो मम गुरुः पुरा ।
अग्निवेश्य इति ख्यातस्तस्य शिष्योऽस्मि भारत ॥ १-१५१-१० (६८८५)
तीर्थात्तीर्थं गमयितुमहमेतत्समुद्यतः ।
तपसा यन्मया प्राप्तममोघमशनिप्रभम् ॥ १-१५१-११ (६८८६)
अस्त्रं ब्रह्मशिरो नाम यद्दहेत्पृथिवीमपि ।
ददता गुरुणा चोक्तं न मनुष्येष्विदंत्वया ॥ १-१५१-१२ (६८८७)
भारद्वाज विमोक्तव्यमल्पवीर्येषु संयुगे ।
यद्यदन्तर्हितं भूतं किंचिद्युद्धयेत्त्वया सह ॥ १-१५१-१३ (६८८८)

महातेजस्त्वमेतेन हन्याः शस्त्रेण संयुगे ।
त्वया प्राप्तमिदं वीर दिव्यं नान्योऽर्हति त्विदम् ॥ १-१५१-१४ (६८८९)
समयस्तु त्वया रक्ष्यो मुनिसृष्टो विशांपते ।
आचार्यदक्षिणां देहि ज्ञातिग्रामस्य पश्यतः ॥ १-१५१-१५ (६८९०)
ददानीति प्रतिज्ञाते फाल्गुनेनाब्रवीद्गुरुः ।
युद्धेऽहं प्रतियोद्धव्यो युध्यमानस्त्वयाऽनघ ॥ १-१५१-१६ (६८९१)
तथेति च प्रतिज्ञाय द्रोणाय कुरुपुङ्गवः ।
उपसंगृह्य चरणावुपतस्थे विनीतवत् ॥ १-१५१-१७ (६८९२)
द्रोणो जगाद वचनं समालिङ्ग्य तु फाल्गुनम् ।
यन्मयोक्तं पुरा पार्थ तव लोके नरं क्वचित् ॥ १-१५१-१८ (६८९३)
सदृशं कारये नैव सर्वप्रहरणे युधि ।
तत्कृतं च मया सम्यक्तव तुल्यो न वर्तते ॥ १-१५१-१९ (६८९४)
देवा युधि न शक्तास्त्वां योद्धुं दैत्या न दानवाः ।
नाहं त्वत्तो विशिष्टोऽस्मि किं पुनर्मानवा रणे ॥ १-१५१-२० (६८९५)
एकस्तवाधिको लोके यो हि वृष्णिकुलोद्भवः ।
कृष्णः कमलपत्राक्षः कंसकालियसूदनः ॥ १-१५१-२१ (६८९६)
स जेता सर्वलोकानां सर्वप्रहरणायुधः ।
नैतावता ते पार्थाहं भवाम्यनृतवागिह ॥ १-१५१-२२ (६८९७)
तदधीनं जगत्सर्वं तत्प्रलीनं तदुद्भवम् ।
तत्पदं न विजानन्ति ब्रह्मेशानादयोऽपि वा ॥ १-१५१-२३ (६८९८)
तन्नाभिप्रभवो ब्रह्मा सर्वभूतानि निर्ममे ।
स एव कर्ता भोक्ता च संहर्ता च जगन्मयम् ॥ १-१५१-२४ (६८९९)
स एव भूतं भव्यं च भवच्च पुरुषः परः ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ १-१५१-२५ (६९००)
प्रादुर्भवति योगात्मा पालनार्थं स लीलया ।
तत्तुल्यो हि न जायेत न जातो न जनिष्यते ॥ १-१५१-२६ (६९०१)
स हि मातुलजोऽभूत्ते चराचरगुरुः पिता ।
को हि तं जेतुमीहेत जानन्नात्महितं नरः ॥ १-१५१-२७ (६९०२)
श्यालश्च ते सखा चासौ तस्य त्वं प्राणवल्लभः ।
स्नेहमभ्यधिकं तस्य तव सख्यमवस्थितम् ॥ १-१५१-२८ (६९०३)
न तेन भवतो युद्धं भविता नर्मतोऽपि वा ।
अपिचार्थे तव पुरा शक्रेण किल चोदितः ॥ १-१५१-२९ (६९०४)
गोकुले वर्धमानस्तु नन्दगोपस्य कारणात् ।
ममांशः पाण्डवो लोके पृथिव्यां पुरुषोत्तमः ॥ १-१५१-३० (६९०५)
कौन्तेयावरजः श्रीमानर्जुनो नाम वीर्यवान् ।
भुवो भारापहरणे साहाय्यं ते करिष्यति ॥ १-१५१-३१ (६९०६)

तदर्थमभयं देहि पाहि चास्मत्कृते प्रभो ।
इत्युक्तः पुण्डरीकाक्षस्तदा शक्रेण फल्गुन ॥ १-१५१-३२ (६९०७)
तमुवाच ततः श्रीमाञ्शङ्खचक्रगदाधरः ।
जानामि पाण्डवे वंशे जातं पार्थं पितृष्वसुः ॥ १-१५१-३३ (६९०८)
पुत्रं परमधर्मिष्ठं सर्वशस्त्रभृतां वरम् ।
पालयामि त्वदंशं तं सर्वलोकमहाभुजम् ॥ १-१५१-३४ (६९०९)
आवयोः सख्यसदृशं न च लोके भविष्यति ।
यस्तद्भक्तः समद्भक्तो यस्तं द्वेष्टि स मामपि ॥ १-१५१-३५ (६९१०)
यन्मे वित्तं तु तत्तस्य तं विनाहं न जीवये ।
इति पार्थ पुरा शक्रमाह सर्वेश्वरो हरिः ॥ १-१५१-३६ (६९११)
तस्मात्तवापि सदृशस्त्वं विनाभ्यधिकः पुमान् ।
न चेह भविता लोके तमेव शरणं व्रज ॥ १-१५१-३७ (६९१२)
शरण्यः सर्वभूतानां देवदेवो जनार्दनः ॥' १-१५१-३८ (६९१३)
वैशम्पायन उवाच। १-१५१-३९क्ष् (८९५)
तथेति च प्रतिज्ञाय द्रोणाय कुरुपुङ्गवः ।
उपसंगृह्य चरणौ युधिष्ठिरवशोऽभवत् ॥ १-१५१-३९ (६९१४)
स्वभावादगमच्छब्दो महीं सागरमेखलाम् ।
अर्जुनस्य समो लोके नास्ति कश्चिद्धनुर्धरः ॥ १-१५१-४० (६९१५)
गदायुद्धेऽसियुद्धे च रथयुद्धे च पाण्डवः ।
पारगश्च धनुर्युद्धे बभूवाथ धनञ्जयः ॥ १-१५१-४१ (६९१६)
नीतिमान्सकलां नीतिं विबुधाधिपतेस्तदा ।
`अस्त्रे शस्त्रे च शास्त्रे च रथनागाश्वकर्मणि।'
अवाप्य सहदेवोऽपि भ्रातॄणां ववृते वशे ॥ १-१५१-४२ (६९१७)
द्रोणेनैवं विनीतश्च भ्रातॄणां नकुलः प्रियः ।
चित्रयोधी समाख्यातो बभूवातिरथोदितः ॥ १-१५१-४३ (६९१८)
त्रिवर्षकृतयज्ञस्तु गन्धर्वाणामुपप्लवे ।
अर्जुनप्रमुखैः पार्थैः सौवीरः समरे हतः ॥ १-१५१-४४ (६९१९)
न शशाक वशे कर्तुं यं पाण्डुरपि वीर्यवान् ।
सोऽर्जुनेन वशं नीतो राजासीद्यवनाधिपः ॥ १-१५१-४५ (६९२०)
अतीव बलसंपन्नः सदा मानि कुरून्प्रति ।
विपुलो नाम सौवीरः शस्तः पार्थेन धीमता ॥ १-१५१-४६ (६९२१)
दत्तामित्र इति ख्यातं सङ्ग्रामे कृतनिश्चयम् ।
सुमित्रं नाम सौवीरमर्जुनोऽदमयच्छरैः ॥ १-१५१-४७ (६९२२)
भीमसेनसहायश्च रथानामयुतं च सः ।
अर्जुनः समरे प्राच्यान्सर्वानेकरथोऽजयत् ॥ १-१५१-४८ (६९२३)
तथैवैकरथो गत्वा दक्षिणामजयद्दिशम् ।

धनौघं प्रापयामास कुरुराष्ट्रं धनञ्जयः ॥ १-१५१-४९ (६९२४)
ग्यतः पञ्चदशे वर्षे सर्वमेतच्चकार सः ।
तं दृष्ट्वा धार्तराष्ट्राणां ततो भयमजायत ॥ १-१५१-५० (६९२५)
यः सर्वान्धृतराष्ट्रस्य पुत्रान्विप्रचकार ह ।
भीमसेनो महाबाहुर्बलाद्बलवतां वरः ॥ १-१५१-५१ (६९२६)
अदुष्टभावं तं दोषैर्जगृहुर्दोषबुद्धयः ।
धार्तराष्ट्रास्तथा सर्वे भयाद्भीमस्य कर्मणा ॥ १-१५१-५२ (६९२७)
तं दृष्ट्वा कर्मभिः पार्थान्सर्वानागतलक्षणान् ।
बलाद्बहुगुणांस्तेभ्यो बिभियुर्दोषबुद्धयः ॥' १-१५१-५३ (६९२८)
एवं सर्वे महात्मानः पाण्डवा मनुजोत्तमाः ।
परराष्ट्राणि निर्जित्य स्वराष्ट्रं ववृधुः पुरा ॥ १-१५१-५४ (६९२९)
ततो बलमतिख्यातं विज्ञाय दृढधन्विनाम् ।
दूषितः सहसा भावो धृतराष्ट्रस्य पाण्डुषु ।
स चिन्तापरमो राजा न निद्रामलभन्निशि ॥ ॥ १-१५१-५५ (६९३०)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१५१-९ गुडाका निद्रा तस्या ईशमर्जुनं जितनिद्रं, गुडा स्नुही तद्वत्केशा यस्य ॥
१-१५१-११ तीर्थात्पात्रान्तरं गमयितुं संप्रदायाविच्छेदार्थमित्यर्थः ॥
१-१५१-१४ त्वया ग्राहान्मां मोचयता प्राप्तं प्रागेव ॥
१-१५१-२८ तस्य त्वयीति शेषः । तव तस्मिन्निति शेषः ॥
१-१५१-३५ तस्य मम च ॥
१-१५१-४२ विबुधाधिपतेरुद्धवात् ॥
१-१५१-४३ विनीतः शिक्षितः । अतिरथेषूदितः ख्यातः ॥
१-१५१-४४ गन्धर्वोपप्लवेऽपि यस्य सौवीरस्य यज्ञो न विप्लुत इत्ययोध्यत्वमुक्तम् ॥
१-१५१-४६ शस्तो हिंसितः ॥
१-१५१-५३ बिभियुः बिभ्युः ॥
१-१५१-५४ ववृधुर्वर्धितवन्तः ॥
एकपञ्चाशदधिकशततमोऽध्यायः ॥
१५१ ॥

आदिपर्व - अध्याय १५२
॥ श्रीः ॥

१.१५२. अध्यायः १५२

Mahabharata - Adi Parva - Chapter Topics
युधिष्ठिरः साम्राज्येऽभिषेक्तव्य इति पौरवार्तां श्रुत्वा व्यथितस्य दुर्योधनस्य पित्रा संवादः ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५२-० (६९३१)
वैशम्पायन उवाच। १-१५२-०क्ष् (८९६)
प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ।
दुर्योधनो लक्षयित्वा पर्यतप्यत दुर्मनाः ॥ १-१५२-१ (६९३२)
ततो वैकर्तनः कर्णः शकुनिश्चापि सौबलः ।
अनेकैरभ्युपायैस्ते जिघांसन्ति स्म पाण्डवान् ॥ १-१५२-२ (६९३३)
पाण्डवा अपि तत्सर्वं प्रतिचक्रुर्यथाबलम् ।
उद्भावनमकुर्वन्तो विदुरस्य मते स्थिताः ॥ १-१५२-३ (६९३४)
गुणैः समुदितान्दृष्ट्वा पौराः पाण्डुसुतांस्तदा ।
कथयाञ्चक्रिरे तेषां गुणान्संसत्सु भारत ॥ १-१५२-४ (६९३५)
राज्यप्राप्तिं च संप्राप्तं ज्येष्ठं पाण्डुसुतं तदा ।
कथयन्ति स्म संभूय चत्वरेषु सभासु च ॥ १-१५२-५ (६९३६)
प्रज्ञाचक्षुरचक्षुष्ट्वाद्धृतराष्ट्रो जनेश्वरः ।
राज्यं न प्राप्तवान्पूर्वं स कथं नृपतिर्भवेत् ॥ १-१५२-६ (६९३७)
तथा शान्तनवो भीष्मः सत्यसन्धो महाव्रतः ।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥ १-१५२-७ (६९३८)
ते वयं पाण्डवज्येष्ठं तरुणं वृद्धशीलिनम् ।
अभिषिञ्चाम साध्वद्य सत्यकारुण्यवेदिनम् ॥ १-१५२-८ (६९३९)
स हि भीष्मं शान्तनवं धृतराष्ट्रं च धर्मवित् ।
सपुत्रं विविधैर्भोगैर्योजयिष्यति पूजयन् ॥ १-१५२-९ (६९४०)
वैशम्पायन उवाच। १-१५२-१०क्ष् (८९७)
तेषां दुर्योधनः श्रुत्वा तानि वाक्यानि जल्पताम् ।
युधिष्ठिरानुरक्तानां पर्यतप्यत दुर्मतिः ॥ १-१५२-१० (६९४१)
स तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे ।
ईर्ष्यया चापि संतप्तो धृतराष्ट्रमुपागमत् ॥ १-१५२-११ (६९४२)
ततो विरहितं दृष्ट्वा पितरं प्रतिपूज्य सः ।
पौरानुरागसंतप्तः पश्चादिदमभाषत ॥ १-१५२-१२ (६९४३)
श्रुता मे जल्पतां तात पौराणामशिवा गिरः ।

त्वामनादृत्य भीष्मं च पतिमिच्छन्ति पाण्डवम् ॥१-१५२-१३ (६९४४)
मतमेतच्च भीष्मस्य न स राज्यं बुभुक्षति ।
अस्माकं तु परां पीडां चिकीर्षन्ति पुरे जनाः ॥१-१५२-१४ (६९४५)
पितृतः प्राप्तवान्राज्यं पाण्डुरात्मगुणैः पुरा ।
त्वमन्धगुणसंयोगात्प्राप्तं राज्यं न लब्धवान् ॥१-१५२-१५ (६९४६)
स एष पाण्डोर्दायाद्यं यदि प्राप्नोति पाण्डवः ।
तस्य पुत्रो ध्रुवं प्राप्तस्तस्य तस्यापि चापरः ॥१-१५२-१६ (६९४७)
ते वयं राजवंशेन हीनाः सह सुतैरपि ।
अवज्ञाता भविष्यामो लोकस्य जगतीपते ॥१-१५२-१७ (६९४८)
सततं निरयं प्राप्ताः परपिण्डोपजीविनः ।
न भवेम यथा राजंस्तथा नीतिर्विधीयताम् ॥१-१५२-१८ (६९४९)
यदि त्वं हि पुरा राजन्निदं राज्यमवाप्तवान् ।
ध्रुवं प्राप्स्याम च वयं राज्यमप्यवशे जने ॥१-१५२-१९ (६९५०)
ग्वैशम्पायन उवाच।१-१५२-२०क्ष् (८९८)
धृतराष्ट्रस्तु पुत्रस्य श्रुत्वा वचनमीदृशम् ।
मुहूर्तमिव संचिन्त्य दुर्योधनमथाब्रवीत् ॥१-१५२-२० (६९५१)
धर्मनित्यस्तथा पाण्डुः सुप्रीतो मयि कौरवः ।
सर्वेषु ज्ञातिषु तथा मदीयेषु विशेषतः ॥१-१५२-२१ (६९५२)
नात्र किंचन जानाति भोजनादि चिकीर्षितम् ।
निवेदयति तत्सर्वं मयि धर्मभृतां वरः ॥१-१५२-२२ (६९५३)
तस्य पुत्रो यथा पाण्डुस्तथा धर्मपरः सदा ।
गुणावाँल्लोकविख्यातो नगरे च प्रतिष्ठितः ॥१-१५२-२३ (६९५४)
स कथं शक्यतेऽस्माभिरपाक्रष्टुं नरर्षभः ।
राज्यमेष हि नः प्राप्तः ससहयो विशेषतः ॥१-१५२-२४ (६९५५)
भृता हि पाण्डुनाऽमात्या बलं च सततं मतम् ।
धृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः ॥१-१५२-२५ (६९५६)
ते तथा संस्तुतास्तात विषये पाण्डुना नराः ।
कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ॥१-१५२-२६ (६९५७)
नैते विषयमिच्छेयुर्धर्मत्यागे विशेषतः ।
ते वयं कौरवेन्द्राणामेतेषां च महात्मनाम् ॥१-१५२-२७ (६९५८)
कथं न वाच्यतां तात गच्छेम जगतस्तथा ॥ १-१५२-२८ (६९५९)
दुर्योधन उवाच।१-१५२-२९क्ष् (८९९)
मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि स्थितः ।
यतः पुतस्ततो द्रोणो भविता नात्र संशयः ॥१-१५२-२९ (६९६०)
कृपः शारद्वतश्चैव यत एव वयं ततः ।
बागिनेयं ततो द्रौणिं न त्यक्ष्यति कथंचन ॥१-१५२-३० (६९६१)

क्षत्ता तु बन्धुरस्माकं प्रच्छन्नस्तु ततः परैः ।
न चैकः स समर्थोऽस्मान्पाण्डवार्थे प्रबाधितुम् ॥ १-१५२-३१ (६९६२)
सुविस्रब्धान्पाण्डुसुतान्सह मात्रा विवासय ।
वारणावतमद्यैव नात्र दोषो भविष्यति ॥ १-१५२-३२ (६९६३)
विनिद्राकरणं घोरं हृदि शल्यमिवार्पितम् ।
शोपकपावकमुद्धूतं कर्मणानेन नाशय ॥' ॥ १-१५२-३३ (६९६४)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

आदिपर्व - अध्याय १५३
॥ श्रीः ॥
१.१५३. अध्यायः १५३

Mahabharata - Adi Parva - Chapter Topics
धृतराष्ट्रादीनां कणिकेन दुर्नीत्युपदेशः ॥ १ ॥
जम्बुकोपाख्यानम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५३-० (६९६५)
वैशम्पायन उवाच। १-१५३-०क्ष् (९००)
श्रुत्वा पाण्डुसुतान्वीरान्बलोद्रिक्तान्महौजसः ।
धृतराष्ट्रो महीपालश्चिन्तामगमदातुरः ॥ १-१५३-१ (६९६६)
तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम् ।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीद्वचः ॥ १-१५३-२ (६९६७)
उत्सक्ताः पाण्डवा नित्यं तेभ्योऽसूये द्विजोत्तम ।
तत्र मे निश्चिततमं सन्धिविग्रहकारणम् ।
कणिक त्वं ममाचक्ष्व करिष्ये वचनं तव ॥ १-१५३-३ (६९६८)
वैशम्पायन उवाच। १-१५३-४क्ष् (९०१)
'दुर्योधनोऽथ शकुनिः कर्णदुःशासनावपि ।
कणिकं ह्युपसंगृह्य मन्त्रिणं सौबलस्य च ॥ १-१५३-४ (६९६९)
पप्रच्छुर्भरतश्रेष्ठ पाण्डवान्प्रति नैकधा ।
प्रबुद्धाः पाण्डवा नित्यं सर्वे तेभ्यस्त्रसामहे ॥ १-१५३-५ (६९७०)
अनूनं सर्वपक्षाणां यद्भवेत्क्षेमकारकम् ।
भारद्वाज तदाचक्ष्व करिष्यामः कथं वयम् ॥ १-१५३-६ (६९७१)
वैशम्पायन उवाच।' १-१५३-७क्ष् (९०२)

स प्रसन्नमनास्तेन परिपृष्टो द्विजोत्तमः ।
उवाच वचनं तीक्ष्णं राजशास्त्रार्थदर्शनम् ॥ १-१५३-७ (६९७२)
कणिक उवाच। १-१५३-८क्ष् (९०३)
शृणु राजन्निदं तत्र प्रोच्यमानं मयानघ ।
न मेऽभ्यसूया कर्तव्या श्रुत्वैतत्कुरुसत्तम ॥ १-१५३-८ (६९७३)
नित्यमुद्यतदण्डः स्यान्नित्यं विवृतपौरुषः ।
अच्छिद्रश्छिद्रदर्शी स्यात्परेषां विवरानुगः ॥ १-१५३-९ (६९७४)
नित्यमुद्यतदण्डाद्धि भऋशमुद्विजते जनः ।
तस्मात्सर्वाणि कार्याणि दण्डेनैव विधारयेत् ॥ १-१५३-१० (६९७५)
नास्य च्छिद्रं परः पश्येच्छिद्रेण परमन्वियात् ।
गूहेत्कूर्म इवाङ्गानि रक्षेद्विवरमात्मनः ॥ १-१५३-११ (६९७६)
गनित्यं च ब्राह्मणाः पूज्या नृपेण हितमिच्छता ।
सृष्टो नृपो हि विप्रामां पालने दुष्टनिग्रहे ॥ १-१५३-१२ (६९७७)
उभाब्यां वर्धते धर्मो धर्मवृद्ध्या जितावुभौ ।
लोकश्चायं परश्चैव ततो धर्मं समाचरेत् ॥ १-१५३-१३ (६९७८)
कृतापराधं पुरुषं दृष्ट्वा यः क्षमते नृपः ।
तेनावमानमाप्नोति पापं चेह परत्र च ॥ १-१५३-१४ (६९७९)
यो विभूतिमवाप्योच्चै राज्ञो विकुरुतेऽधमः ।
तमानयित्वा हत्वा च दद्याद्धीनाय तद्धनम् ॥ १-१५३-१५ (६९८०)
नो चेद्धुरि नियुक्ता ये स्थास्यन्ति वशमात्मनः ।
राजा नियुञ्ज्यात्पुरुषानाप्तान्धर्मार्थकोविदान् ॥ १-१५३-१६ (६९८१)
ये नियुक्तास्तथा केचिद्राष्ट्रं वा यदि वा पुरम् ।
ग्रामं जनपदं वापि बाधेयुर्यदि वा न वा ॥ १-१५३-१७ (६९८२)
परीक्षणार्थं विसृजेदानतांश्छन्नरूपिणः ।
परीक्ष्य पापकं जह्याद्धनमादाय सर्वशः ॥' १-१५३-१८ (६९८३)
नासम्यक्कृत्यकारी स्यादुपक्रम्य कदाचन ।
कण्टको ह्यपि दुश्छिन्न आस्रावं जनयेच्चिरम् ॥ १-१५३-१९ (६९८४)
वधमेव प्रशंसन्ति शत्रूणामपकारिणाम् ।
सुविदीर्णं सुविक्रान्तं सुयुद्धं सुपलायितम् ॥ १-१५३-२० (६९८५)
आपद्यापदि काले कुर्वीत न विचारयेत् ।
नावज्ञेयो रिपुस्तात दुर्बलोऽपि कथं चन ॥ १-१५३-२१ (६९८६)
अल्पोऽप्यग्निर्वनं कृत्स्नं दहत्याश्रयसंश्रयात् ।
अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत् ॥ १-१५३-२२ (६९८७)
कुर्यात्तृणमयं चापं शयीत मृगशायिकाम् ।
सान्त्वादिभिरुपायैस्तु हन्याच्छत्रुं वशे स्थितं ॥ १-१५३-२३ (६९८८)
दया न तस्मिन्कर्तव्या शरणागत इत्युत ।

निरुद्विग्नो हि भवति न हताज्जायते भयम् ॥१-१५३-२४ (६९८९)
हन्यादमित्रं दानेन तथा पूर्वापकारिणम् ।
हन्यात्त्रीन्पञ्च सप्तेति परपक्षस्य सर्वशः ॥१-१५३-२५ (६९९०)
मूलमेवादितश्छिन्द्यात्परपक्षस्य नित्यशः ।
ततः सहायांस्तत्पक्षान्सर्वांश्च तदनन्तरम् ॥१-१५३-२६ (६९९१)
छिन्नमूले ह्यधिष्ठाने सर्वे तज्जीविनो हताः ।
कथं नु शाखास्तिष्ठेरंश्छिन्नमूले वनस्पतौ ॥१-१५३-२७ (६९९२)
एकाग्रः स्यादविवृतो नित्यं विवरदर्शकः ।
राजन्नित्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥१-१५३-२८ (६९९३)
अग्न्याधानेन यज्ञेन काषायेण जटाजिनैः ।
लोकान्विश्वासयित्वैव ततो लुम्पेद्यथा वृकः ॥१-१५३-२९ (६९९४)
अङ्कुशं शौचमित्याहुरर्थानामुपधारणे ।
आनाम्य फलितां शाखां पक्वं पक्वं प्रशातयेत् ॥१-१५३-३० (६९९५)
फलार्थोऽयं समारम्भो लोके पुंसां विपश्चिताम् ।
वहेदमित्रं स्कन्धेन यावत्कालस्य पर्ययः ॥१-१५३-३१ (६९९६)
ततः प्रत्यागते काले भिन्द्याद्घटमिवाश्मनि ।
अमित्रो न विमोक्तव्यः कृपणं बह्वपि ब्रुवन् ॥१-१५३-३२ (६९९७)
कृपा न तस्मिन्कर्तव्या हन्यादेवापकारिणम् ।
हन्यादमित्रं सान्त्वेन तथा दानेन वा पुनः ॥१-१५३-३३ (६९९८)
तथैव भेददण्डाभ्यां सर्वोपायैः प्रशातयेत्। १-१५३-३४ (६९९९)
धृतराष्ट्र उवाच ।
कथं सान्त्वेन दानेन भेदैर्दण्डेन वा पुनः ॥ १-१५३-३४क्ष् (९०४)
अमित्रः शक्यते हन्तुं तन्मे ब्रूहि यथातथम्। १-१५३-३५ (७०००)
कणिक उवाच ।
शृणु राजन्यथा वृत्तं वने निवसतः पुरा ॥ १-१५३-३५क्ष् (९०५)
जम्बुकस्य महाराज नीतिशास्त्रार्थदर्शिनः ।
अथ कश्चित्कृतप्रज्ञः शृगालः स्वार्थपण्डितः ॥१-१५३-३६ (७००१)
सखिभिर्न्यवसत्सार्धं व्याघ्राखुवृकबभ्रुभिः ।
तेऽपश्यन्विपिने तस्मिन्बलिनं मृगयूथपम् ॥१-१५३-३७ (७००२)
अशक्ता ग्रहणे तस्य ततो मन्त्रममन्त्रयन्। १-१५३-३८ (७००३)
जम्बुक उवाच ।
असकृद्यतितो ह्येष हन्तुं व्याघ्र वने त्वया ॥ १-१५३-३८क्ष् (९०६)
युवा वै जवसंपन्नो बुद्धिशाली न शक्यते ।
मूषिकोऽस्य शयानस्य चरणौ भक्षयत्वयम् ॥१-१५३-३९ (७००४)
अथैनं भक्षितैः पादैर्व्याघ्रो गृह्णातु वै ततः ।
ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः ॥१-१५३-४० (७००५)

जम्बुकस्य तु तद्वाक्यं तथा चक्रः समाहिताः ।
मूषिकाभक्षितैः पादैर्मृगं व्याघ्रोऽवधीत्तदा ॥ १-१५३-४१ (७००६)
दृष्ट्वैवाचेष्टमानं तु भूमौ मृगकलेवरम् ।
स्नात्वाऽऽगच्छत भद्रं वोरक्षामीत्याह जम्बुकः ॥ १-१५३-४२ (७००७)
शृगालवचनात्तेऽपि गताः सर्वे नदीं ततः ।
स चिन्तापरमो भूत्वा तस्थौ तत्रैव जम्बुकः ॥ १-१५३-४३ (७००८)
अथाजगाम पूर्वं तु स्नात्वा व्याघ्रो महाबलः ।
ददर्श जम्बुकं चैव चिन्ताकुलितमानसम् ॥ १-१५३-४४ (७००९)
व्याघ्र उवाच। १-१५३-४५क्ष् (९०७)
किं शोचसि महाप्राज्ञ त्वं नो बुद्धिमतां वरः ।
अशित्वा पिशितान्यद्य विहरिष्यामहे वयम् ॥ १-१५३-४५ (७०१०)
जम्बुक उवाच। १-१५३-४६क्ष् (९०८)
शृणु मे त्वं महाबाहो यद्वाक्यं मूषिकोऽब्रवीत् ।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः ॥ १-१५३-४६ (७०११)
मद्बाहुबलमाश्रित्य तृप्तिमद्य गमिष्यति ।
तस्यैवं गर्जितं श्रुत्वा ततो भक्ष्यं न रोचये ॥ १-१५३-४७ (७०१२)
व्याघ्र उवाच। १-१५३-४८क्ष् (९०९)
ब्रवीति यदि स ह्येवं काले ह्यस्मि प्रबोधितः ।
स्वबाहुबलमाश्रित्य हनिष्येऽहं वनेचरान् ॥ १-१५३-४८ (७०१३)
खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितोवनम् ।
एतस्मिन्नेव काले तु मूषिकोऽप्याजगाम ह ॥ १-१५३-४९ (७०१४)
तमागतमभिप्रेक्ष्य शृगालोऽप्यब्रवीद्वचः ।
शृणु मीषिक भद्रं ते नकुलो यदिहाब्रवीत् ॥ १-१५३-५० (७०१५)
मृगमांसं न खादेयं गरमेतन्न रोचते ।
मूषिकं भक्षयिष्यामि तद्भवाननुमन्यताम् ॥ १-१५३-५१ (७०१६)
तच्छ्रुत्वा मूषिको वाक्यं संत्रस्तः प्रगतो बिलम् ।
ततः स्नात्वा स वै तत्र आजगाम वृको नपृ ॥ १-१५३-५२ (७०१७)
तमागतमिदं वाक्यमब्रवीज्जम्बुकस्तदा ।
मृगराजो हि संक्रुद्धो न ते साधु भविष्यति ॥ १-१५३-५३ (७०१८)
सकलत्रस्त्विहायाति कुरुष्व यदनन्तरम् ।
एवं संचोदितस्तेन जम्बुकेन तदा वृकः ॥ १-१५३-५४ (७०१९)
ततोऽवलुम्पनं कृत्वा प्रयातः पिशिताशनः ।
एतस्मिन्नेव काले तु नकुलोऽप्याजगाम ह ॥ १-१५३-५५ (७०२०)
तमुवाच महाराज नकुलं जम्बुको वने ।
स्वबाहुबलमाश्रित्य निर्जितास्तेऽन्यतो गताः ॥ १-१५३-५६ (७०२१)
मम दत्वा नियुद्धं त्वं भुङ्क्ष्व मांसं यथेप्सितम्। १-१५३-५७ (७०२२)

नकुल उवाच ।
मृगराजो वृकश्चैव बुद्धिमानपि मूषिकः ॥ १-१५३-५७क्ष् (९१०)
निर्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान् ।
न त्वयाप्युत्सहे योद्धुमित्युक्त्वा सोऽप्युपागमत् ॥१-१५३-५८ (७०२३)
कणिक उवाच।१-१५३-५९क्ष् (९११)
एवं तेषु प्रयातेषु जम्बुको हृष्टमानसः ।
खादति स्म तदा मांसमेकः सन्मन्त्रनिश्चयात् ।
एवं समाचरन्नित्यं सुखमेधेत भूपतिः ॥ १-१५३-५९ (७०२४)
भयेन भेदयेद्भीरुं शूरमञ्जलिकर्मणा ।
लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा ॥१-१५३-६० (७०२५)
एवं ते कथितं राजन् शृणु चाप्यपरं तथा ॥ १-१५३-६१ (७०२६)
पुत्रः सखा वा भ्राता वा पिता वा यदि वा गुरुः ।
रिपुस्थानेषु वर्तन्तो हन्तव्या भूतिमिच्छता ॥१-१५३-६२ (७०२७)
शपथेनाप्यरिं हन्यादर्थदानेन वा पुनः ।
विषेण मायया वापि नोपेक्षेते कथंचन ।
उभौ चेत्संशयोपेतौ श्रद्धवांस्तत्र वर्धते ॥ १-१५३-६३ (७०२८)
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य न्याय्यं भवति शासनम् ॥१-१५३-६४ (७०२९)
क्रुद्धोऽप्यक्रुद्धरूपः स्यात्स्मितपूर्वाभिभाषिता ।
ग्न चैनं क्रोधसंदीप्तं विद्यात्कश्चित्कथंचन।'
न चाप्यन्यमपध्वंसेत्कदाचित्कोपसंयुतः ॥ १-१५३-६५ (७०३०)
प्रहरिष्यन्प्रियं ब्रूयात्प्रहरन्नपि भारत ।
प्रहृत्य च प्रियं ब्रूयाच्छोचन्निव रुदन्निव ॥१-१५३-६६ (७०३१)
आश्वासयेच्चापि परं सान्त्वधर्मार्थवृत्तिभिः ।
अथ तं प्रहरेत्काले तथा विचलितं पथि ॥१-१५३-६७ (७०३२)
अपि घोरापराधस्य धर्ममाश्रित्य तिष्ठतः ।
स हि प्रच्छाद्यते दोषः शैलो मेघैरिवासितैः ॥१-१५३-६८ (७०३३)
यः स्यादनुप्राप्तवधस्तस्यागारं प्रदीपयेत् ।
अधनान्नास्तिकांश्चोरान्विषकर्मसु योजयेत् ॥१-१५३-६९ (७०३४)
प्रत्युत्थानासनाद्येन संप्रदानेन केनचित् ।
अतिविश्रब्धघाती स्यात्तीक्ष्णदंष्ट्रो निमग्नकः ॥१-१५३-७० (७०३५)
अशङ्कितेभ्यः शङ्केत शङ्कितेभ्यश्च सर्वशः ।
अशङ्क्याद्भयमुत्पन्नमपि मूलं निकृन्तति ॥१-१५३-७१ (७०३६)
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥१-१५३-७२ (७०३७)
चारः सुविहितः कार्य आत्मनश्च परस्य वा ।

पाषण्डांस्तापसादींश्च परराष्ट्रेषु योजयेत् ॥ १-१५३-७३ (७०३८)
उद्यानेषु विहारेषु देवतायतनेषु च ।
पानागारेषु रथ्यासु सर्वतीर्थेषु चाप्यथ ॥ १-१५३-७४ (७०३९)
चत्वरेषु च कूपेषु पर्वतेषु वनेषु च ।
समवायेषु सर्वेषु सरित्सु च विचारयेत् ॥ १-१५३-७५ (७०४०)
वाचा भृशं विनीतः स्याद्धृदयेन तथा क्षुरः ।
स्मितपूर्वाभिभाषी स्यात्सृष्टो रौद्रस्य कर्मणः ॥ १-१५३-७६ (७०४१)
अञ्जलिः शपथः सान्त्वं शिरसा पादवन्दनम् ।
आशाकरणमित्येवं कर्तव्यं भूतिमिच्छता ॥ १-१५३-७७ (७०४२)
सुपुष्पितः स्यादफलः फलवान्स्याद्दुरारुहः ।
आमः स्यात्पक्वसङ्काशो नच जीर्येत कर्हिचित् ॥ १-१५३-७८ (७०४३)
त्रिवर्गे त्रिविधा पीडा ह्यनुबन्धास्तथैव च ।
अनुबन्धाः शुभा ज्ञेयाः पीडास्तु परिवर्जयेत् ॥ १-१५३-७९ (७०४४)
धर्मं विचरतः पीडा सापि द्वाभ्यां नियच्छति ।
अर्थं चाप्यर्थलुब्धस्य कामं चातिप्रवर्तिनः ॥ १-१५३-८० (७०४५)
अगर्वितात्मा युक्तश्च सान्त्वयुक्तोऽनसूयिता ।
अवेक्षितार्थः शुद्धात्मा मन्त्रयीत द्विजैः सहा ॥ १-१५३-८१ (७०४६)
कर्मणा येन केनैव मृदुना दारुणेन च ।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत् ॥ १-१५३-८२ (७०४७)
न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ १-१५३-८३ (७०४८)
यस्य बुद्धिः परिभवेत्तमतीतेन सान्त्वयेत् ।
अनागतेन दुर्बुद्धिं प्रत्युत्पन्नेन पण्डितम् ॥ १-१५३-८४ (७०४९)
योऽरिणा सह सन्धाय शयीत कृतकृत्यवत् ।
स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते ॥ १-१५३-८५ (७०५०)
मन्त्रसंवरणे यत्नः सदा कार्योऽनसूयता ।
आकारमभिरक्षेत चारेणाप्यनुपालितः ॥ १-१५३-८६ (७०५१)
ग्न रात्रौ मन्त्रयेद्विद्वान्न च कैश्चिदुपासितः ।
प्रासादाग्रे शिलाग्रे वा विशाले विजनेपि वा ॥ १-१५३-८७ (७०५२)
समन्तात्तत्र पश्यद्भिः सहाप्तैरेव मन्त्रयेत् ।
नैव संवेशयेत्तत्र मन्त्रवेश्मनि शारिकाम् ॥ १-१५३-८८ (७०५३)
शुकान्वा शारिका वापि बालमूर्खजडानपि ।
प्रविष्टानपि निर्वास्य मन्त्रयेद्धार्मिकैर्द्विजैः ॥ १-१५३-८९ (७०५४)
नीतिज्ञैर्न्यायशास्त्रज्ञैरितिहासे सुनिष्ठितैः ।
रक्षां मन्त्रस्य निश्छिद्रां मन्त्रान्ते निश्चयेत्स्वयम् ॥ १-१५३-९० (७०५५)
वीरोपवर्णितात्तस्माद्धर्मार्थाभ्यामथात्मना ।

एकेन वाथ विप्रेण ज्ञातबुद्धिर्विनिश्चयेत् ॥ १-१५३-९१ (७०५६)
तृतीयेन न चान्येन व्रजेन्निश्चयमात्मवान् ।
षट्कर्णश्छिद्यते मन्त्र इति नीतिषु पठ्यते ॥ १-१५३-९२ (७०५७)
निःसृतो नाशयेन्मन्त्रो हस्तप्राप्तामपि श्रियम् ।
स्वमतं च परेषां च विचार्य च पुनःपुनः ।
गुणवद्वाक्यमादद्यान्नैव तृप्येद्विचक्षणः ॥' १-१५३-९३ (७०५८)
नाच्छित्वा परमर्माणि नाकृत्वा कर्म दारुणम् ।
नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियम् ॥ १-१५३-९४ (७०५९)
कर्शितं व्याधितं क्लिन्नमपानीयमघासकम् ।
परिविश्वस्तमन्दं च प्रहर्तव्यमरेर्बलम् ॥ १-१५३-९५ (७०६०)
नार्थिकोऽर्थिनमभ्येति कृतार्थे नास्ति सङ्गतम् ।
तस्मात्सर्वाणि साध्यानि सावशेषाणि कारयेत् ॥ १-१५३-९६ (७०६१)
संग्रहे विग्रहे चैव यत्नः कार्योऽनसूयता ।
उत्साहश्चापि यत्नेन कर्तव्यो भूतिमिच्छता ॥ १-१५३-९७ (७०६२)
नास्य कृत्यानि बुध्येरन्मित्राणि रिपवस्तथा ।
आरब्धान्येव पश्येरन्सुपर्यवसितान्यपि ॥ १-१५३-९८ (७०६३)
भीतवत्संविधातव्यं यावद्भयमनागतम् ।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥ १-१५३-९९ (७०६४)
दैवेनोपहतं शत्रुमनुगृह्णाति यो नरः ।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥ १-१५३-१०० (७०६५)
अनागतं हि बुध्येत यच्च कार्यं पुरः स्थितम् ।
न तु बुद्धिक्षयात्किंचिदतिक्रामेत्प्रयोजनम् ॥ १-१५३-१०१ (७०६६)
उत्साहश्चापि यत्नेन कर्तव्यो भूतिमिच्छता ।
विभज्य देशकालौ च दैवं धर्मादयस्त्रयः ।
नैःश्रेयसौ तु तौ ज्ञेयौ देशकालाविति स्थितिः ॥ १-१५३-१०२ (७०६७)
तालवत्कुरुते मूलं बालः शत्रुरुपेक्षितः ।
गहनेऽग्निरिवोत्सृष्टः क्षिप्रं संजायते महान् ॥ १-१५३-१०३ (७०६८)
अग्निस्तोकमिवात्मानं सन्धुक्षयति यो नरः ।
स वर्धमानो ग्रसते महान्तमपि संचयम् ॥ १-१५३-१०४ (७०६९)
ग्आदावेव ददानीति प्रियं ब्रूयान्निरर्थकम् ॥' १-१५३-१०५ (७०७०)
आशां कालवतीं कुर्यात्कालं विघ्नेन योजयेत् ।
विघ्नं निमित्ततो ब्रूयान्निमित्तं वाऽपि हेतुतः ॥ १-१५३-१०६ (७०७१)
क्षुरो भूत्वा हरेत्प्राणान्निशितः कालसाधनः ।
प्रतिच्छन्नो लोमहारी द्विषतां परिकर्तनः ॥ १-१५३-१०७ (७०७२)
पाण्डवेषु यथान्यायमन्येषु च कुरूद्वह ।
वर्तमानो न मज्जेस्त्वं तथा कृत्यं समाचर ॥ १-१५३-१०८ (७०७३)

सर्वकल्याणसंपन्नो विशिष्ट इति निश्चयः ।
तस्मात्त्वं पाण्डुपुत्रेभ्यो रक्षात्मानं नराधिप ॥ १-१५३-१०९ (७०७४)
भ्रातृव्या बलवन्तस्ते पाण्डुपुत्रा नराधिप ।
पश्चात्तापो यथा न स्यात्तथा नीतिर्विधीयताम् ॥ १-१५३-११० (७०७५)
वैशम्पायन उवाच। १-१५३-१११क्ष् (९१२)
एवमुक्त्वा संप्रतस्थे कणिकः स्वगृहं ततः ।
धृतराष्ट्रोऽपि कौरव्यः शोकार्तः समपद्यत ॥ ॥ १-१५३-१११ (७०७६)

इति श्रीमन्महाभारते आदिपर्वणि संभवपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥ ॥ समाप्तं च
संभवपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१५३-१३ उभाभ्यां ब्राह्मणरक्षणदुष्टनिग्रहाभ्याम् । जितौ संपादितौ
भवेतामिति शेषः ॥
१-१५३-१५ हीनाय दरिद्राय ॥
१-१५३-२० उपसंहरति वधमिति । कथं वधः कर्तव्यं इत्याह
सुविदीर्णमिति। सुविक्रान्तमपि शत्रुं। काले आपद्यापन्नमालभ्य सुविदीर्णं
विनष्टं कुर्वीत। तथा सुयुद्धमपि शत्रुमापदि काले सुपलायितं
कुर्वीति ॥
१-१५३-२२ आश्रयसंश्रयात् आश्रयबलात् ॥
१-१५३-२३ तृणमयं तृणवन्निष्प्रयोजनम् । क्षात्रं धर्मं त्यक्त्वा
शत्रुगृहे भिक्षाभुगपि स्यादित्यर्थः। मृगशायिकां मृगहन्तुः
शय्याम्। यथा व्याधो मृगान्विश्वासयितुं मृषा निद्राति विश्वस्तेषु
च तेषु प्रहरत्येवं स हन्तुमेवाकारं गोपयतीत्यर्थः। उपायैः
वशे स्थितं शत्रुमिति संबन्धः ॥
१-१५३-२५ त्रीन् ऐश्वर्यमन्त्रोत्साहान् । तथा पञ्च अमात्यराष्ट्रदुर्गाणि
कोशो दण्डश्च पञ्चम इत्युक्तान्। दण्डोत्र सैन्यं। सप्त
स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्बलानि येत्युक्तानि ॥
१-१५३-३० शौचमग्न्याधानादि । अत्र दृष्टान्तः आनाम्येति आनामयित्वा ॥
१-१५३-३७ बभ्रुर्नकुलः । मृगयूथपं महान्तं हरिणम् ॥
१-१५३-४१ मूषिकेण आईषद्भक्षितैः ॥
१-१५३-४६ मृगराजस्य व्याघ्रस्य ॥
१-१५३-५१ गरं मूषिकदष्टत्वाद्विषभूतम् ॥
१-१५३-५५ अवलुम्पनं गात्रसंकोचनम् ॥
१-१५३-६३ संशयोपेतौ संशयविषयौ । श्रद्धावान्

मदुक्तादरवान्। श्रद्दधानस्तु बध्यत इति ङ पाठः ॥
१-१५३-६५ अपध्वंसेत् कुत्सयेत् ॥
१-१५३-६९ अनुप्राप्तबधः शीघ्रं हन्तुमिष्टः अधना दरिद्राः नास्तिकाः परलोकश्रद्धारहिताः ॥
१-१५३-७० निमग्नकः नम्रशिराः तीक्ष्णदंष्ट्रः व्याघ्र इव ।तीक्ष्णदंष्ट्र इवोरत इति क ङ पाठः ॥
१-१५३-७३ सुविहितः सम्यक् परीक्षितः ॥
१-१५३-७६ सृष्टो रौद्राय कर्मण इति क घ पाठः ॥
१-१५३-७९ अनुबन्धः फलम् ॥
१-१५३-८० धर्ममत्यन्तं विचरतः पुंसो द्वाभ्यामर्थकामाभ्यां धनव्ययब्रह्मचर्योपक्षिप्ताभ्यां पीडा चित्तवैकल्यं भवति ।सापि पुंसः पीडा धर्मं नियच्छति निगृह्णाति। एवमर्थं चाप्यर्थलुब्धस्य कामं चातिप्रवर्तिन इति व्याख्येयं ॥
१-१५३-८३ उद्देश्यसन्देहेपि नीतिरवश्यमनुसरणीयेत्याह ।न संशयमिति। असंशयमथारुह्येति क घ ट पाठः ॥
१-१५३-८४ परिभवेत् शोकेन ।तमतीतेन नलरामाद्याख्यानेन। दुर्बुद्धिं। लोभाद्युपहतबुद्धिम्। अनागतेन कालान्तरे तव श्रेयो भविष्यतीत्याशाप्रदर्शनेन। पण्डितं प्रत्युत्पन्नेन वर्तमानेन धनादिना सान्त्वयेत् ॥
१-१५३-८६ मन्त्रसंवरणं मन्त्रगूहनम् ॥
१-१५३-९५ अघासकं अनाहारम् ॥
१-१५३-९६ संगतं सख्यम् ॥
१-१५३-९८ आरब्धान्यपि सुपर्यवसितानि संपन्नान्येव पश्येरन् ॥
१-१५३-९९ संविधातव्यं प्रतिकर्तव्यम् ॥
१-१५३-१०२ देशाद्यनुगुण उत्साहोऽपि कर्तव्यो नत्वलसो भवेत् ।दैवं प्राक्तनं कर्म। ये धर्मादयस्त्रयस्तांश्च विभज्य तेषां मध्ये नैःश्रेयसौ श्रेयोहेतू इति स्थितिर्निश्चयः ॥
१-१५३-१०३ बालः अल्पोपि ।बलवत्कुरुते रूपं बाल्यादिति क ङ ट पाठः ॥
१-१५३-१०४ आत्मानं सधुक्षयति सहायादिना वर्धयति ।संचयमिन्धनानां पक्षे शत्रूणाम् ॥
१-१५३-१०६ हेतुतः हेत्वन्तरेण ॥
१-१५३-१११ तदा सपुत्रो राजा च शोकार्त इति ङ पुस्तकपाठः ॥
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥
१५३ ॥

आदिपर्व - अध्याय १५४
॥ श्रीः ॥

१.१५४. अध्यायः १५४

(अथ जतुगृहपर्व ॥ ८ ॥)

Mahabharata - Adi Parva - Chapter Topics

संग्रहेण जतुगृहदाहकथनम् ॥ १ ॥
पुनर्विस्तरेण जतुगृहदाहकथनारम्भः ॥ २ ॥
दुर्योधनधृतराष्ट्रसंवादः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५३४-० (७०७७)
वैशम्पायन उवाच। १-१५३४-०क्ष् (९१३)
कणिकस्य मतं श्रुत्वा कात्स्न्र्येन भरतर्षभ ।
दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
दुशासनचतुर्थास्ते मन्त्रयामासुरेकदा ॥ १-१५४-१ (७०७८)
ते कौरव्यमनुज्ञाप्य धृतराष्ट्रं नराधिपम् ।
दहने तु सपुत्रायाः कुन्त्या बुद्धिमकारयन् ॥ १-१५४-२ (७०७९)
तेषामिङ्गितभावज्ञो विदुरस्तत्त्वदर्शिवान् ।
आकारेण च तं मन्त्रं बुबुधे दुष्टचेतसाम् ॥ १-१५४-३ (७०८०)
ततो विदितवेद्यात्मा पाण्डवानां हिते रतः ।
पलायने मतिं चक्रे कुन्त्याः पुत्रैः सहानघः ॥ १-१५४-४ (७०८१)
ततो वातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
ऊर्मिक्षमां दृढां कृत्वा कुन्तीमिदमुवाच ह ॥ १-१५४-५ (७०८२)
एष जातः कुलस्यास्य कीर्तिवंशप्रणाशनः ।
धृतराष्ट्रः परीतात्मा धर्मं त्यजति शाश्वतम् ॥ १-१५४-६ (७०८३)
इयं वारिपथे युक्ता तरङ्गपवनक्षमा ।
नौर्यया मृत्युपाशात्त्वं सपुत्रा मोक्ष्यसे शुभे ॥ १-१५४-७ (७०८४)
तच्छ्रुत्वा व्यथिता कुन्ती पुत्रैः सह यशस्विनी ।
नावमारुह्य गङ्गायां प्रययौ भरतर्षभ ॥ १-१५४-८ (७०८५)
ततो विदुरवाक्येन नावं विक्षिप्य पाण्डवाः ।
धनं चादाय तैर्दत्तमरिष्टं प्राविशन्वनम् ॥ १-१५४-९ (७०८६)
निषादी पञ्चपुत्रा तु जातेषु तत्र वेश्मनि ।
कारणाभ्यागता दग्धा सह पुत्रैरनागसा ॥ १-१५४-१० (७०८७)
स च म्लेच्छाधमः पापो दग्धस्तत्र पुरोचनः ।
वञ्चिताश्च दुरात्मानो धार्तराष्ट्राः सहानुगाः ॥ १-१५४-११ (७०८८)
अविज्ञाता महात्मनो जनानामक्षतास्तथा ।

जनन्या सह कौन्तेया मुक्ता विदुरमन्त्रिताः ॥ १-१५४-१२ (७०८९)
ततस्तस्मिन्पुरे लोका नगरे वारणावते ।
दृष्ट्वा जतुगृहं दग्धमन्वशोचन्त दुःखिताः ॥ १-१५४-१३ (७०९०)
प्रेषयामासू राजानं यथावृत्तं निवेदितुम् ।
संवृतस्ते महान्कामः पाण्डवान्दग्धवानसि ॥ १-१५४-१४ (७०९१)
सकामो भव कौरव्य भुङ्क्ष्व राज्यं सपुत्रकः ।
तच्छ्रुत्वा धृतराष्ट्रस्तु सहपुत्रेण शोचयन् ॥ १-१५४-१५ (७०९२)
प्रेतकार्याणि च तथा चकार सह बान्धवैः ।
पाण्डवानां तथा क्षत्ता भीष्मश्च कुरुसत्तमः ॥ १-१५४-१६ (७०९३)
जनमेजय उवाच। १-१५४-१७क्ष् (९१४)
पुनर्विस्तरशः श्रोतुमिच्छामि द्विजसत्तम ।
दाहं जतुगृहस्यैव पाण्डवानां च मोक्षणम् ॥ १-१५४-१७ (७०९४)
सुनृशंसमिदं कर्म तेषां क्रूरोपसंहितम् ।
कीर्तयस्व यथावृत्तं परं कौतूहलं मम ॥ १-१५४-१८ (७०९५)
वैशम्पायन उवाच। १-१५४-१९क्ष् (९१५)
शृणु विस्तरशो राजन्वदतो मे परन्तप ।
दाहं जतुगृहस्यैतत्पाण्डवानां च मोक्षणम् ॥ १-१५४-१९ (७०९६)
वैशम्पायन उवाच। १-१५४-२०क्ष् (९१६)
ततो दुर्योधनो राजा धृतराष्ट्रमभाषत ।
पाण्डवेभ्यो भयं नः स्यात्तान्विवासयतां भवान् ।
निपुणेनाभ्युपायेन नगरं वारणावतम् ॥ १-१५४-२० (७०९७)
धृतराष्ट्रस्तु पुत्रेण श्रुत्वा वचनमीरितम् ।
मुहूर्तमिव संचिन्त्य दुर्योधनमथाब्रवीत् ॥ १-१५४-२१ (७०९८)
धर्मनित्यः सदा पाण्डुस्तथा धर्मपरायणः ।
सर्वेषु ज्ञातिषु तथा मयि त्वासीद्विशेषतः ॥ १-१५४-२२ (७०९९)
नासौ किंचिद्विजानाति भोजनादिचिकीर्षितम् ।
निवेदयति नित्यं हि मम राज्यं धृतव्रतः ॥ १-१५४-२३ (७१००)
तस्य पुत्रो यथा पाण्डुस्तथा धर्मपरायणः ।
गुणवान्लोकविख्यातः पौरवाणां सुसंमतः ॥ १-१५४-२४ (७१०१)
स कथं शक्यतेऽस्माभिरपाकर्तुं बलादितः ।
पितृपैतामाहाद्राज्यात्ससहायो विशेषतः ॥ १-१५४-२५ (७१०२)
भृता हि पाण्डुनाऽमात्या बलं च सततं भृतम् ।
भृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः ॥ १-१५४-२६ (७१०३)
ते पुरा सत्कृतास्तात पाण्डुना नागरा जनाः ।
कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ॥ १-१५४-२७ (७१०४)
दुर्योधन उवाच। १-१५४-२८क्ष् (९१७)

एवमेतन्मया तात भावितं दोषमात्मनि ।
दृष्ट्वा प्रकृतयः सर्वा अर्थमानेन पूजिताः ॥ १-१५४-२८ (७१०५)
ध्रुवमस्मत्सहायास्ते भविष्यन्ति प्रधानतः ।
अर्थवर्गः सहामात्यो मत्संस्थोऽद्य महीपते ॥ १-१५४-२९ (७१०६)
स भवान्पाण्डवानाशु विवासयितुमर्हति ।
मृदुनैवाभ्युपायेन नगरं वारणावतम् ॥ १-१५४-३० (७१०७)
यदा प्रतिष्ठितं राज्यं मयि राजन्भविष्यति ।
तदा कुन्ती सहापत्या पुनरेष्यति भारत ॥ १-१५४-३१ (७१०८)
धृतराष्ट्र उवाच। १-१५४-३२क्ष् (९१८)
दुर्योधन ममाप्येतद्धृदि संपरिवर्तते ।
अभिप्रायस्य पापत्वान्नैवं तु विवृणोम्यहम् ॥ १-१५४-३२ (७१०९)
न च भीष्मो न च द्रोणो न च क्षत्ता न गौतमः ।
विवास्यमानान्कौन्तेयाननुमंस्यन्ति कर्हिचित् ॥ १-१५४-३३ (७११०)
समा हि कौरवेयाणां वयं ते चैव पुत्रक ।
नैते विषममिच्छेयुर्धर्मयुक्ता मनस्विनः ॥ १-१५४-३४ (७१११)
ते वयं कौरवेयाणामेतेषां च महात्मनाम् ।
कथं न वध्यतां तात गच्छाम जगतस्तथा ॥ १-१५४-३५ (७११२)
दुर्योधन उवाच। १-१५४-३६क्ष् (९१९)
मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि स्थितः ।
यतः पुत्रस्ततो द्रोणो भविता नात्र संशयः ॥ १-१५४-३६ (७११३)
कृपः शारद्वतश्चैव यत एतौ ततो भवेत् ।
द्रोणं च भागिनेयं च न स त्यक्ष्यति कर्हिचित् ॥ १-१५४-३७ (७११४)
क्षत्ताऽर्थबद्धस्त्वस्माकं प्रच्छन्नं संयतः परैः ।
न चैकः स समर्थोऽस्मान्पाम्डवार्थेऽधिबाधितुम् ॥ १-१५४-३८ (७११५)
सुविस्रब्धः पाण्डुपुत्रान्सह मात्रा प्रवासय ।
वारणावतमद्यैव यथा यान्ति यथा कुरु ॥ १-१५४-३९ (७११६)
विनिद्रकरणं घोरं हृदि शल्यमिवार्पितम् ।
शोकपावकमुद्भूतं कर्मणैतेन नाशय ॥ ॥ १-१५४-४० (७११७)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१५४-२ अनुज्ञाप्य पृष्ट्वा ॥
१-१५४-३ इङ्गितं चेष्टितं तेन भावं चित्ताभिप्रायं जानातीति
इङ्गितभावज्ञः ॥

१-१५४-४ विदितवेद्यो ज्ञाततत्त्व आत्मा चित्तं यस्य ॥
१-१५४-५ यन्त्रयुक्तां यन्त्रं महत्यपि वाते जलाशये नौकास्तम्भकं लोहलङ्गलमयम् ॥
१-१५४-९ अरिष्टं निर्विघ्नम् ॥
१-१५४-१८ क्रूरेण कणिकेनोपसंहितमुपदिष्टम् ॥
चतुःपञ्चाशदधिकशततमोऽध्यायः ॥
१५४ ॥

आदिपर्व - अध्याय १५५
॥ श्रीः ॥
१.१५५. अध्यायः १५५

Mahabharata - Adi Parva - Chapter Topics
दुर्योधनेन दानादिना प्रकृतिवशीकरणम् ॥ १ ॥
पाण्डवानां वारणावतयात्रार्थं धृतराष्ट्रानुज्ञा ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५५-० (७११८)
वैशम्पायन उवाच। १-१५५-०क्ष् (९२०)
ततो दुर्योधनो राजा सर्वास्तु प्रकृतीः शनैः ।
अर्थमानप्रदानाभ्यां संजहार सहानुजः ।
ग्युयुत्सुमपनीयैकं धार्तराष्ट्रं सहोदरम् ॥' १-१५५-१ (७११९)
धृतराष्ट्रप्रयुक्तास्तु केचित्कुशलमन्त्रिणः ।
कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् ॥ १-१५५-२ (७१२०)
अयं समाजः सुमहान्रमणीयतमो भुवि ।
उपस्थितः पशुपतेर्नगरे वारणावते ॥ १-१५५-३ (७१२१)
सर्वरत्नसमाकीर्णे पुण्यदेशे मनोरमे ।
इत्येवं धृतराष्ट्रस्य वचनाच्चक्रिरे कथाः ॥ १-१५५-४ (७१२२)
कथ्यमाने तथा रम्ये नगरे वारणावते ।
गमने पाण्डुपुत्राणां जज्ञे तत्र मतिर्नृप ॥ १-१५५-५ (७१२३)
यदा त्वमन्यत नृपो जातकौतूहला इति ।
उवाचैतानेत्य तदा पाण्डवानम्बिकासुतः ॥ १-१५५-६ (७१२४)
ग्अधीतानि च शास्त्राणि युष्माभिरिह कृत्स्नशः ।
अस्त्राणि च तथा द्रोणाद्गौतमाच्च शरद्वतः ॥ १-१५५-७ (७१२५)
कृतकृत्या भवन्तस्तु सर्वविद्याविशारदाः ।
सोऽहमेवं गते तातांश्चिन्तयामि समन्ततः ।

रक्षणे व्यवहारे च राज्यस्य सततं हिते ॥' १-१५५-८ (७१२६)
ममैते पुरुषा नित्यं कथयन्ति पुनःपुनः ।
रमणीयतमं लोके नगरं वारणावतम् ॥१-१५५-९ (७१२७)
ते ताता यदि मन्यध्वमुत्सवं वारणावते ।
सगणाः सान्वयाश्चैव विहरध्वं यथाऽमराः ॥१-१५५-१० (७१२८)
ब्राह्मणेभ्यश्च रत्नानि गायनेभ्यश्च सर्वशः ।
प्रयच्छध्वं यथाकामं देवा इव सुवर्चसः ॥१-१५५-११ (७१२९)
कंचित्कालं विहृत्यैवमनुभूय परां मुदम् ।
इदं वै हास्तिनपुरं सुखिनः पुनरेष्यथ ॥१-१५५-१२ (७१३०)
ग्निवसध्वं च तत्रैव संरक्षणपरायणाः ।
वैलक्षण्यं न वै तत्र भविष्यति परंतपाः ॥' १-१५५-१३ (७१३१)
वैशम्पायन उवाच।१-१५५-१४क्ष् (९२१)
धृतराष्ट्रस्य तं काममनुबुध्य युधिष्ठिरः ।
आत्मनश्चासहायत्वं तथेति प्रत्युवाच तम् ॥१-१५५-१४ (७१३२)
ततो भीष्मं शान्तनवं विदुरं च महामतिम् ।
द्रोणं च बाह्लिकं चैव सोमदत्तं च कौरवम् ॥१-१५५-१५ (७१३३)
कृपमाचार्यपुत्रं च भूरिश्रवसमेव च ।
मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान् ॥१-१५५-१६ (७१३४)
पुरोहितांश्च पौत्रांश्च गान्धारीं च यशस्विनीम् ।
ग्सर्वा मातॄरुपस्पृष्ट्वा विदुरस्य च योषितः।'
युधिष्ठिरः शनैर्दीन उवाचेदं वचस्तदा ॥ १-१५५-१७ (७१३५)
रमणीये जनाकीर्णे नगरे वारणावते ।
सगणास्तत्र यास्यामो धृतराष्ट्रस्य शासनात् ॥१-१५५-१८ (७१३६)
प्रसन्नमनसः सर्वे पुण्या वाचो विमुञ्चत ।
आशीर्भिर्बृहितानस्मान्न पापं प्रसहिष्यते ॥१-१५५-१९ (७१३७)
वैशम्पायन उवाच।१-१५५-२०क्ष् (९२२)
एवमुक्तास्तु ते सर्वे पाण्डुपुत्रेण कौरवाः ।
प्रसन्नवदना भूत्वा तेऽन्ववर्तन्त पाण्डवान् ॥१-१५५-२० (७१३८)
स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्वशः ।
मा च वोस्त्वशुभं किंचित्सर्वशः पाण्डुनन्दनाः ॥१-१५५-२१ (७१३९)
ततः कृतस्वस्त्ययना राज्यलाभाय पार्थिवाः ।
कृत्वा सर्वाणि कार्याणि प्रययुर्वारणावतम् ॥ ॥१-१५५-२२ (७१४०)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥१५५ ॥

आदिपर्व - अध्याय १५६

॥ श्रीः ॥

१.१५६. अध्यायः १५६

Mahabharata - Adi Parva - Chapter Topics

दुर्योधनादेशात् पुरोचनेन वारणावते जतुगृहनिर्माणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५६-० (७१४१)
वैशम्पायन उवाच। १-१५६-०क्ष् (९२३)
धृतराष्ट्रप्रयुक्तेषु पाण्डुपुत्रेषु भारत ।
दुर्योधनः परं हर्षमगच्छत्स दुरात्मवान् ॥ १-१५६-१ (७१४२)
ग्ततः सुबलपुत्रश्च कर्णदुर्योधनावपि ।
दहने सह पुत्रायाः कुन्त्या मतिमकुर्वत ।
मन्त्रयित्वा स तैः सार्धं दुरात्मा धृतराष्ट्रजः ॥' १-१५६-२ (७१४३)
स पुरोचनमेकान्तमानीय भरतर्षभ ।
गृहीत्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत् ॥ १-१५६-३ (७१४४)
ममेयं वसुसंपूर्णा पुरोचन वसुन्धरा ।
यथैव भविता तात तथा त्वं द्रष्टुमर्हसि ॥ १-१५६-४ (७१४५)
न हि मे कश्चिदन्योऽस्ति विश्वासिकतरस्त्वया ।
सहायो येन सन्धाय मन्त्रयेयं यथा त्वया ॥ १-१५६-५ (७१४६)
संरक्ष तात मन्त्रं च सपत्नांश्च ममोद्धर ।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु ॥ १-१५६-६ (७१४७)
पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम् ।
उत्सवे विहरिष्यन्ति धृतराष्ट्रस्य शासनात् ॥ १-१५६-७ (७१४८)
स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तया कुरु ॥ १-१५६-८ (७१४९)
तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ।
नगरोपान्तमाश्रित्य कारयेथा महाधनम् ॥ १-१५६-९ (७१५०)
शणसर्जरसादीनि यानि द्रव्याणि कानिचित् ।
आग्नेयान्युत सन्तीह तानि तत्र प्रदापय ॥ १-१५६-१० (७१५१)
ग्बल्वजेन च संमिश्रं मधूच्छिष्टेन चैव हि।'
सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया ।
मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु दापय ॥ १-१५६-११ (७१५२)
शणं तैलं घृतं चैव जतु दारूणि चैव हि ।
तस्मिन्वेश्मनि सर्वाणि निक्षिपेथाः समन्ततः ॥ १-१५६-१२ (७१५३)

ग्लाक्षाशममधूच्छिष्टवेष्टितानि मृदापि च ।
लेपयित्वा गुरूण्याशु दारुयन्त्राणि दापय ॥' १-१५६-१३ (७१५४)
यथा च तन्न पश्येरन्परीक्षन्तोऽपि पाण्डवाः ।
आग्नेयमिति तत्कार्यमपि चान्येऽपि मानवाः ॥१-१५६-१४ (७१५५)
वेश्मन्येवं कृते तत्र कृत्वा तान्परमार्चितान् ।
वासयेथाः पाण्डवेयान्कुन्तीं च ससुहृज्जनाम् ॥१-१५६-१५ (७१५६)
आसनानि च दिव्यानि यानानि शयनानि न ।
निघातव्यानि पाण्डूनां यथा तुष्येच्च मे पिता ॥१-१५६-१६ (७१५७)
यथा च तन्न जानन्ति नगरे वारणावते ।
ग्यथा रमेरन्विस्रब्धा नगरे वारणावते।'
तथा सर्वं विधातव्यं यावत्कालस्य पर्ययः ॥ १-१५६-१७ (७१५८)
ज्ञात्वा च तान्सुविश्वस्ताञ्शयानानकुतोभयान् ।
अग्निस्त्वया ततो देयो द्वारतस्तस्य वेश्मनः ॥१-१५६-१८ (७१५९)
दग्धानेवं स्वके गेहे दाहिताः पाण्डवा इति ।
न गर्हयेयुरस्मान्वै पाण्डवार्थाय कर्हिचित् ॥१-१५६-१९ (७१६०)
स तथेति प्रतिज्ञाय कौरवाय पुरोचनः ।
प्रायाद्रासभयुक्तेन स्यन्दनेनाशुगामिना ॥१-१५६-२० (७१६१)
स गत्वा त्वरितं राजन्दुर्योधनमते स्थितः ।
यथोक्तं राजपुत्रेण सर्वं चक्रे पुरोचनः ॥१-१५६-२१ (७१६२)
ग्तेषां तु पाण्डवेयानां गृहं रौद्रमकल्पयत् ॥' ॥ १-१५६-२२ (७१६३)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
षट्पञ्चाशदधिकशततमोऽध्यायः ॥१५६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१५६-६ उद्धर उन्मूलय ॥
१-१५६-१० आग्नेयान्यग्निसंदीपकानि ॥
षट्पञ्चाशदधिकशततमोऽध्यायः ॥
१५६ ॥

आदिपर्व - अध्याय १५७
॥ श्रीः ॥
१.१५७. अध्यायः १५७

Mahabharata - Adi Parva - Chapter Topics
हास्तिनपुरं त्यक्त्वा वारणावतं गच्छता युधिष्ठिरेण अनुगच्छथां
पौराणां निवर्तनम् ॥१ ॥

१-१५७-० (७१६४)
वैशम्पायन उवाच। १-१५७-०क्ष् (९२४)
पाण्डवास्तु रथान्युक्तान्सदश्वैरनिलोपमैः ।
आरोहमाणा भीष्मस्य पादौ जगृहुरार्तवत् ॥ १-१५७-१ (७१६५)
राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः ।
अन्येषां चैव वृद्धानां कृपस्य विदुरस्य च ॥ १-१५७-२ (७१६६)
एवं सर्वान्कुरून्वृद्धानभिवाद्य यतव्रताः ।
समालिङ्ग्य समानान्वै बालैश्चाप्यभिवादिताः ॥ १-१५७-३ (७१६७)
सर्वा मातॄस्तथाऽऽपृच्छ्य कृत्वा चैव प्रदक्षिणम् ।
प्रकृतीरपि सर्वाश्च प्रययुर्वारणावतम् ॥ १-१५७-४ (७१६८)
विदुरश्च महाप्राज्ञस्तथाऽन्ये कुरुपुङ्गवाः ।
पौराश्च पुरुषव्याघ्रानन्वीयुः शोककर्शिताः ॥ १-१५७-५ (७१६९)
तत्र केचिद्ब्रुवन्ति स्म ब्राह्मणा निर्भयास्तदा ।
दीनान्दृष्ट्वा पाण्डुसुतानतीव भृशदुःखिताः ॥ १-१५७-६ (७१७०)
विषमं पश्यते राजा सर्वथा स सुमन्दधीः ।
कौरव्यो धृतराष्ट्रस्तु न च धर्मं प्रपश्यति ॥ १-१५७-७ (७१७१)
न हि पापमपापात्मा रोचयिष्यति पाण्डवः ।
भीमो वा बलिनां श्रेष्ठः कौन्तेयो वा धनञ्जयः ॥ १-१५७-८ (७१७२)
कुत एव महात्मानौ माद्रीपुत्रौ करिष्यतः ।
तान्राज्यं पितृतः प्राप्तान्धृतराष्ट्रो न मृष्यति ॥ १-१५७-९ (७१७३)
अधर्म्यमिदमत्यन्तं कथं भीष्मोऽनुमन्यते ।
विवास्यमानानस्थाने नगरे योऽभिमन्यते ॥ १-१५७-१० (७१७४)
पितेव हि नृपोऽस्माकमभूच्छान्तनवः पुरा ।
विचित्रवीर्यो राजर्षिः पाण्डुश्च कुरुनन्दनः ॥ १-१५७-११ (७१७५)
स तस्मिन्पुरुषव्याघ्रे देवभावं गते सति ।
राजपुत्रानिमान्बालान्धृतराष्ट्रो न मृष्यति ॥ १-१५७-१२ (७१७६)
वयमेतदनिच्छन्तः सर्व एव पुरोत्तमात् ।
गृहान्विहाय गच्छामो यत्र गन्ता युधिष्ठिरः ॥ १-१५७-१३ (७१७७)
वैशम्पायन उवाच। १-१५७-१४क्ष् (९२५)
तांस्तथा वादिनः पौरान्दुःकितान्दुःखकर्शितः ।
उवाच मनसा ध्यात्वा धर्मराजो युधिष्ठिरः ॥ १-१५७-१४ (७१७८)
पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः ।

अशङ्कमानैस्तत्कार्यमस्माभिरिति नो व्रतम् ॥ १-१५७-१५ (७१७९)
भवन्तः सुहृदोऽस्माकं यात कृत्वा प्रदक्षिणम् ।
प्रतिनन्द्य तथाऽऽशीर्भिर्निवर्तध्वं यथागृहम् ॥ १-१५७-१६ (७१८०)
यदा तु कार्यमस्माकं भवद्भिरुपपत्स्यते ।
तदा करिष्यथास्माकं प्रियाणि च हितानि च ॥ १-१५७-१७ (७१८१)
एवमुक्तास्तदा पौराः कृत्वा चापि प्रदक्षिणम् ।
आशीर्भिश्चाभिनन्द्यैताञ्जग्मुर्नगरमेव हि ॥ १-१५७-१८ (७१८२)
पौरेषु विनिवृत्तेषु विदुरः सर्वधर्मवित् ।
बोधयन्पाण्डवश्रेष्ठमिदंवचनमब्रवीत् ॥ १-१५७-१९ (७१८३)
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः ।
यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीम् ।
विज्ञायेह तथा कुर्यादापदं निस्तरेद्यथा ॥ १-१५७-२० (७१८४)
अलोहं निशितं शस्त्रं शरीपरिकर्तनम् ।
यो वेत्ति न तु तं घ्नन्ति प्रतिघातविदं द्विषः ॥ १-१५७-२१ (७१८५)
कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति ॥ १-१५७-२२ (७१८६)
नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः ।
नाधृतिर्भूतिमाप्नोति बुध्यस्वैवं प्रबोधितः ॥ १-१५७-२३ (७१८७)
अनाप्तैर्दत्तमादत्ते नरः शस्त्रमलोहजम् ।
श्वाविच्छरणमासाद्य प्रमुच्येत हुताशनात् ॥ १-१५७-२४ (७१८८)
चरन्मार्गान्विजानाति नक्षत्रैर्विन्दते दिशः ।
आत्मना चात्मनः पञ्च पीडयन्नानुपीड्यते ॥ १-१५७-२५ (७१८९)
एवमुक्तः प्रत्युवाच धर्मराजो युधिष्ठिरः ।
विदुरं विदुषां श्रेष्ठं ज्ञातमित्येव पाण्डवः ॥ १-१५७-२६ (७१९०)
अनुशिक्ष्यानुगम्यैतान्कृत्वा चैव प्रदक्षिणम् ।
पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥ १-१५७-२७ (७१९१)
निवृत्ते विदुरे चापि भीष्मे पौरजने तथा ।
अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत् ॥ १-१५७-२८ (७१९२)
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव ।
त्वया च स तथेत्युक्तो जानीमो न च तद्वयम् ॥ १-१५७-२९ (७१९३)
यदीदं शक्यमस्माभिर्ज्ञातुं नैव च दोषवत् ।
श्रोतुमिच्छामि तत्सर्वं संवादं तव तस्य च ॥ १-१५७-३० (७१९४)
युधिष्ठिर उवाच। १-१५७-३१क्ष् (९२६)
विषादग्नेश्च बोद्धव्यमिति मां विदुरोऽब्रवीत् ।
पन्थानो वेदितव्याश्च नक्षत्रैश्च तथा दिशः ।
ग्कुड्याश्चविदिताःकार्याःस्याच्छुद्धिरितिचाब्रवीत् ॥ १-१५७-३१ (७१९५)

जितेन्द्रियश्च वसुधां प्राप्स्यतीति च मेऽब्रवीत् ।
विज्ञातमिति तत्सर्वं प्रत्युक्तो विदुरो मया ॥ १-१५७-३२ (७१९६)
वैशम्पायन उवाच। १-१५७-३३क्ष् (९२७)
अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥ ॥ १-१५७-३३ (७१९७)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
सप्तपञ्चादशदधिकशततमोऽध्यायः ॥ १५७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१५७-१० अस्थाने अयुक्तम् योऽभिमन्यते स भीष्मः कथमनुमन्यत इत्यर्थः ॥
१-१५७-२० प्राज्ञः ऊहापोहसमर्थः । प्रलापज्ञः अनर्थवचनाभासाभिज्ञः। युधिष्ठिरमप्येतादृशम्। वचनमेवाह। इदमिति। इदं प्रलापात्मकं मम वचो यो जानाति सः परस्य शत्रोः प्रज्ञां स्वबाधार्थं नीत्या प्रयुक्तां विज्ञाय तथा कुर्यात्। यथा स्वयमापदं निस्तरेदित्यन्वयः ॥
१-१५७-२१ प्रलापाकारवचनमेवाह । अलोहमिति। अलोहमग्निमयं शस्त्रमिव शस्त्रं घातकं तस्य प्रतिघातविदं द्विषो न घ्नन्ति। प्रतिघातकृतमिति पाठे प्रतिघाताय कृतमित्यर्थः ॥
१-१५७-२२ अग्निकृते भये ज्ञातेऽपि कथं प्रतीकारस्तत्राह । कक्षघ्न इति। कक्षस्तृणेन्धनं हन्तीति तथा। शिशिरं शीतं हन्तीति तथाविधोऽपि अग्निः महाकक्षे अरण्ये दह्यमानेऽपि बिलौकसो मूषिकादीन्न दहति इत्थमात्मानं यो रक्षति स जीवति। तथा बिलेष्वाविश्यागाराद्रक्षणीय इत्यर्थः ॥
१-१५७-२३ ततश्च बिलनिर्गमानन्तरमरण्यगमनप्रकारमुपदिशति । नाचक्षुरिति। अचक्षुः पूर्वं वर्त्मदर्शनविहीनः पन्थानं रात्रौ न वेत्ति। तथा अचक्षुः विज्ञानविहीनः दिशो न विन्दते न प्रत्यभिजानाति। अतः पूर्वमेव वर्त्मदिशौ द्रष्टव्ये इति भावः। कथमस्माकं बिलप्रवेशनिर्गमाविति चेत्तत्राह। नाधृतिरिति। दुःखे धैर्यरहितो भूतिमैश्वर्यं जीवनं वा न विन्दति। विपदि धैर्यमेव कार्यमित्यर्थः ॥
१-१५७-२४ किंच यत्पुरोचनादिभिः कर्तव्यं तत्स्वयमेव कार्यमित्याह । अनाप्तैरिति। अनाप्तैः पुरोचनादिभिर्दत्तं दातुमारब्धं यदलोहजं शस्त्रं तत्स्वयमादत्ते स्वीकरोति तान्हत्वा आत्मानं रक्षति। पुरोचनादिषु जीवत्सु अनु सारादिशङ्का स्यादिति

भावः। शरणं सुरङ्गाम् ॥
१-१५७-२५ आत्मना सह पञ्च इन्द्रियाणि । आहाराद्यभावेन पीडयम् अनु
पश्चात् न पीड्यते भवानिति शेषः। यद्वा। नाचक्षुरित्युक्तस्यैव
विवरणं। चरन्मार्गानिति। विश्वासार्थं षड्दग्धव्या
इत्याह। आत्मनेति। लुप्तोपममेतत्। त्वत्सदृशेन सह आत्मनः तव
सदृशान्पञ्च नानुपीड्यते भवानिति शेषः ॥
१-१५७-२९ अब्रुवन्निव व्यक्तां वाचमकुर्वन्निव ॥
सप्तपञ्चाशदधिकशततमोऽध्यायः ॥
१५७ ॥

आदिपर्व - अध्याय १५८
॥ श्रीः ॥
१.१५८. अध्यायः १५८

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानां वारणावतप्रवेशः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५८-० (७१९८)
वैशम्पायन उवाच। १-१५८-०क्ष् (९२८)
ततः सर्वाः प्रकृतयो नगराद्वारणावतात् ।
सर्वमङ्गलसंयुक्ता यथाशास्त्रमतन्द्रिताः ॥ १-१५८-१ (७१९९)
श्रुत्वाऽगतान्पाण्डुपुत्रान्नानायानैः सहस्रशः ।
अभिजग्मुर्नरश्रेष्ठाञ्श्रुत्वैव परया मुदा ॥ १-१५८-२ (७२००)
ते समासाद्य कौन्तेयान्वारणावतका जनाः ।
कृत्वा जयाशिषः सर्वे परिवार्योपतस्थिरे ॥ १-१५८-३ (७२०१)
तैर्वृतः पुरुषव्याघ्रो धर्मराजो युधिष्ठिरः ।
विबभौ देवसङ्काशो वज्रपाणिरिवामरैः ॥ १-१५८-४ (७२०२)
सत्कृताश्चैव पौरैस्ते पौरान्सत्कृत्य चानघ ।
अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम् ॥ १-१५८-५ (७२०३)
ते प्रविश्य पुरीं वीरास्तूर्णं जग्मुरथो गृहान् ।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्मसु ॥ १-१५८-६ (७२०४)
नगराधिकृतानां च गृहाणि रथिनां वराः ।
उपतस्थुर्नरश्रेष्ठा वैश्यशूद्रगृहाण्यपि ॥ १-१५८-७ (७२०५)
अर्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ ।
जग्मुरावसथं पश्चात्पुरोचनपुरःसराः ॥ १-१५८-८ (७२०६)

तेभ्यो भक्ष्याणि पानानि शयनानि शुभानि च ।
आसनानि च मुख्यानि प्रददौ स पुरोचनः ॥ १-१५८-९ (७२०७)
तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥ १-१५८-१० (७२०८)
दशरात्रोषितानां तु तत्र तेषां पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं तदा ॥ १-१५८-११ (७२०९)
तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः ।
पुरोचनस्य वचनात्कैलासमिव गुह्यकाः ॥ १-१५८-१२ (७२१०)
तच्चागारमभिप्रेक्ष्य सर्वधर्मभृतां वरः ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ॥ १-१५८-१३ (७२११)
जिघ्राणोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम् ।
कृतं हि व्यक्तमाग्नेयमिदं वेश्म परन्तप ॥ १-१५८-१४ (७२१२)
शणसर्जरसं व्यक्तमानीय गृहकर्मणि ।
मुञ्जबल्वजवंशादिद्रव्यं सर्वं घृतोक्षितम् ॥ १-१५८-१५ (७२१३)
ग्तृणबल्वजकार्पासवंशदारुकटान्यपि ।
आग्नेयान्यत्र क्षिप्तानि परितो वेश्मनस्तथा ॥' १-१५८-१६ (७२१४)
शिल्पिभिः सुकृतं ह्याप्तैर्विनीतैर्वेश्मकर्मणि ।
विश्वस्तं मामयं पापो दग्धुकामः पुरोचनः ॥ १-१५८-१७ (७२१५)
तथा हि वर्तते मन्दः सुयोधनवशे स्थितः ।
इमां तु तां महाबुद्धिर्विदुरो दृष्टवांस्तथा ॥ १-१५८-१८ (७२१६)
आपदं तेन मां पार्थ स संबोधितवान्पुरा ।
ते वयं बोधितास्तेन नित्यमस्मद्धितैषिणा ॥ १-१५८-१९ (७२१७)
पित्रा कनीयसा स्नेहाद्बुद्धिमन्तो शिवं गृहम् ।
अनार्यैः सुकृतं गूढैर्दुर्योधनवशानुगैः ॥ १-१५८-२० (७२१८)
भीमसेन उवाच। १-१५८-२१क्ष् (९२९)
यदीदं गृहामाग्नेयं विहितं मन्यते भवान् ।
तत्रैव साधु गच्छामो यत्र पूर्वोषिता वयम् ॥ १-१५८-२१ (७२१९)
ग्दर्शयित्वा पृथग्गन्तुं न कार्यं प्रतिभाति मे ।
अशुभं वा शुभं वा स्यात्तैर्वसाम सहैव तु ॥ १-१५८-२२ (७२२०)
अद्यप्रभृति चास्मासु गतेषु भयविह्वलः ।
रूढमूलो भवेद्राज्ये धार्तराष्ट्रो जनेश्वरः ॥ १-१५८-२३ (७२२१)
तदीयं तु भवेद्राज्यं तदीयाश्च जना इमे ।
तस्मात्सहैव वत्स्यामो गलन्यस्तपदा वयम् ॥ १-१५८-२४ (७२२२)
अस्माकं कालमासाद्य राज्यमाच्छिद्य शत्रुतः ।
अर्थं पैतृकमस्माकं सुखं भोक्ष्याम शाश्वतम् ॥ १-१५८-२५ (७२२३)
धृतराष्ट्रवचोऽस्माभिः किमर्थमनुपाल्यते ।

तेभ्यो भित्त्वाऽन्यथागन्तुं दौर्बल्यं ते कुतो नृप ॥१-१५८-२६ (७२२४)
आपत्सु रक्षिताऽस्माकं विदुरोऽस्ति महामतिः ।
मध्यस्थ एव गाङ्गेयो राज्यभोगपराङ्मुखः ॥१-१५८-२७ (७२२५)
बाह्लीकप्रमुखा वृद्धा मध्यस्था एव सर्वदा ।
अस्मदीयो भवेद्द्रोणः फल्गुनप्रेमसंयुतः ॥१-१५८-२८ (७२२६)
तस्मात्सहैव वस्तव्यं न गन्तव्यं कथं नृप ।
अथवास्मासु ते कुर्युः किमशक्ताः पराक्रमैः ॥१-१५८-२९ (७२२७)
क्षुद्राः कपटिनो धूर्ता जाग्रत्सु मनुजेश्वर ।
किं न कुर्युः पुरा मह्यं किं न दत्तं महाविषम् ॥१-१५८-३० (७२२८)
आशीविषैर्महाघोरैः सर्पैस्तैः किं न दंशितः ।
प्रमाणकोट्यां संगृह्य निद्रापरवशे मयि ॥१-१५८-३१ (७२२९)
सर्पैर्दृष्टिविषैर्गोरैर्गङ्गायां शूलसन्ततौ ।
किं तैर्न पातितो भूप तदा किं मृतवानहम् ॥१-१५८-३२ (७२३०)
आपत्सु तासु घोरासु दुष्प्रयुक्तासु पापिभिः ।
अस्मानरक्षद्यो देवो जगद्यस्य वशे स्थितम् ॥१-१५८-३३ (७२३१)
चराचरात्मकं सोऽद्य यातः कुत्र नृपोत्तम ।
यावत्सोढव्यमस्माभिस्तावत्सोढास्मि यत्नतः ॥१-१५८-३४ (७२३२)
यदा न शक्ष्यतेऽस्माभिस्तदा पश्याम नो हितम् ।
किं द्रष्टव्यमिहास्माभिर्विगृह्य तरसा बलात् ॥१-१५८-३५ (७२३३)
सान्त्ववादेन दानेन भेदेनापि यतामहे ।
अर्धराज्यस्य संप्राप्त्यै ततो दण्डः प्रशस्यते ॥१-१५८-३६ (७२३४)
तस्मात्सहैव वस्तव्यं तन्मनोर्पितशल्यवत् ।
दर्शयित्वा पृथक् क्वापि न गन्तव्यं सुभीतवत् ॥' १-१५८-३७ (७२३५)
युधिष्ठिर उवाच। १-१५८-३८क्ष् (९३०)
इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये ।
अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः ॥१-१५८-३८ (७२३६)
यदि विन्देत चाकारमस्माकं स पुरोचनः ।
क्षिप्रकारी ततो भूत्वा प्रसह्यापि दहेत्ततः ॥१-१५८-३९ (७२३७)
नायं बिभेत्युपक्रोशादधर्माद्वा पुरोचनः ।
तथा हि वर्तते मन्दः सुयोधनवशे स्थितः ॥१-१५८-४० (७२३८)
अपि चायं प्रदग्धेषु भीष्मोऽस्मासु पितामहः ।
कोपं कुर्यात्किमर्थं वा कौरवान्कोपयीत सः ॥१-१५८-४१ (७२३९)
अथवापीह दग्धेषु भीष्मोऽस्माकं पितामहः ।
धर्म इत्येव कुप्येरन्ये चान्ये कुरुपुङ्गवाः ॥१-१५८-४२ (७२४०)
ग्उपपन्नं तु दग्धेषु कुलवंशानुकीर्तिताः ।
कुप्येरन्यदि धर्मज्ञास्तथान्ये कुरुपुङ्गवाः ॥' १-१५८-४३ (७२४१)

वयं तु यदि दाहस्य बिभ्यतः प्रद्रवेमहि ।
स्पशैर्नो घातयेत्सर्वान्राज्यलुब्धः सुयोधनः ॥ १-१५८-४४ (७२४२)
अपदस्थान्पदे तिष्ठन्नपक्षान्पक्षसंस्थितः ।
हीनकोशान्महाकोशः प्रयोगैर्घातयेद्ध्रुवम् ॥ १-१५८-४५ (७२४३)
तदस्माभिरिमं पापं तं च पापं सुयोधनम् ।
वञ्चयद्भिर्निवस्तव्यं छन्नं वीर क्वचित्क्वचित् ॥ १-१५८-४६ (७२४४)
ते वयं मृगयाशीलाश्चराम वसुधामिमाम् ।
तथा नो विदिता मार्गा भविष्यन्ति पलायतां ॥ १-१५८-४७ (७२४५)
भौमं च बिलमद्यैव करवाम सुसंवृतम् ।
गूढोच्छ्वसतान्न नस्तत्र हुताशः संप्रधक्ष्यति ॥ १-१५८-४८ (७२४६)
द्रवतोऽत्र यथा चास्मान्न बुध्येत पुरोचनः ।
पौरो वापि जनः कश्चित्तथा कार्यमतन्द्रितैः ॥ ॥ १-१५८-४९ (७२४७)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१५८-२२ दर्शयित्वा विरोधमिति शेषः ॥
१-१५८-२९ न गन्तव्यं हास्तिनपुरमिति शेषः ॥
१-१५८-४० उपक्रोशाद्गर्हातः ॥
१-१५८-४१ अयं भीष्म इति संबन्धः ॥
१-१५८-४२ दग्धेष्वस्मास्वग्निदेषु कोपोऽधर्म इत्येव कारणं कृत्वा
भीष्मोऽन्ये च कुप्येरन् ॥
१-१५८-४४ दाहस्य दाहात् । स्पशैश्चारैः ॥
१-१५८-४९ अत्र बिले ॥
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥
१५८ ॥

आदिपर्व - अध्याय १५९
॥ श्रीः ॥
१.१५९. अध्यायः १५९

Mahabharata - Adi Parva - Chapter Topics
खनकेन सुरङ्गकरणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१५९-० (७२४८)
वैशम्पायन उवाच। १-१५९-०क्ष् (९३१)
विदुरस्य सुहृत्कश्चित्खनकः कुशलः क्वचित् ।
विविक्ते पाण्डवान्राजन्निदं वचनमब्रवीत् ॥ १-१५९-१ (७२४९)
प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम् ।
पाण्डवानां प्रियं कार्यमिति किं करवाणि वः ॥ १-१५९-२ (७२५०)
प्रच्छन्नं विदुरेणोक्तं प्रियं यन्म्लेच्छभाषया ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥ १-१५९-३ (७२५१)
कृष्णपक्षे चतुर्दश्यां रात्रावस्यां पुरोचनः ।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥ १-१५९-४ (७२५२)
मात्रा सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः ।
इति व्यवसितं तस्य धार्तराष्ट्रस्य दुर्मतेः ॥ १-१५९-५ (७२५३)
वैशम्पायन उवाच। १-१५९-६क्ष् (९३२)
उवाच तं सत्यधृतिः कुन्तीपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ॥ १-१५९-६ (७२५४)
शुचिमाप्तं प्रियं चैव सदा च दृढभक्तिकम् ।
न विद्यते कवेः किंचिदविज्ञातं प्रयोजनम् ॥ १-१५९-७ (७२५५)
यथा तस्य तथा नस्त्वं निर्विशेषा वयं त्वयि ।
भवतश्च यथा तस्य पालयास्मान्यथा कविः ॥ १-१५९-८ (७२५६)
इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्तराष्ट्रस्य शासनात् ॥ १-१५९-९ (७२५७)
स पापः कोशवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च पापात्मा नित्यकालं प्रबाधते ॥ १-१५९-१० (७२५८)
स भवान्मोक्षयत्वस्मान्यत्नेनास्माद्धुताशनात् ।
अस्मास्विह हि दग्धेषु सकामः स्यात्सुयोधनः ॥ १-१५९-११ (७२५९)
समृद्धमायुधागारमिदं तस्य दुरात्मनः ।
वप्रान्तं निष्प्रतीकारमाश्रित्येदं कृतं महत् ॥ १-१५९-१२ (७२६०)
इदं तदशुभं नूनं तस्य कर्म चिकीर्षितम् ।
प्रागेव विदुरो वेद तेनास्मानन्वबोधयत् ॥ १-१५९-१३ (७२६१)
सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान्पुरा ।
पुरोचनस्याविदितानस्मांस्त्वं प्रतिमोचय ॥ १-१५९-१४ (७२६२)
वैशम्पायन उवाच। १-१५९-१५क्ष् (९३३)
स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः ।
परिखामुत्किरन्नाम चकार च महाबिलम् ॥ १-१५९-१५ (७२६३)
चक्रे च वेश्मनस्तस्य मध्ये नातिमहद्बिलम् ।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत ॥ १-१५९-१६ (७२६४)

पुरोचनभयादेव व्यदधात्संवृतं मुखम् ।
स तस्य तु गृहद्वारि वसत्यशुभधीः सदा ।
तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप ॥ १-१५९-१७ (७२६५)
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम् ।
विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ॥१-१५९-१८ (७२६६)
अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः ॥ १-१५९-१९ (७२६७)
न चैनानन्वबुध्यन्त नरा नगरवासिनः ।
अन्यत्र विदुरामात्यात्तस्मात्खनकसत्तमात् ॥ ॥१-१५९-२० (७२६८)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
ऊनषष्ट्यधिकशततमोऽध्यायः ॥१५९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१५९-४ आर्द्रायां च पुरोचनः । भवनस्य निशि द्वारि इति ङ। पाठः ॥
१-१५९-७ कवेः सर्वज्ञस्य क्रान्तदर्शिनो वा ॥
१-१५९-८ यथा वयं तस्य तथा भवतश्च ॥
१-१५९-९ शरणं गृहम् ॥
१-१५९-१२ वप्रान्तं प्राकारमूलम् । निष्प्रतीकारं
बहिर्निर्गमनप्रकारशून्यम् ॥
१-१५९-१४ अस्मांस्त्वं विप्रवासय इति ङ । पाठः ॥
१-१५९-१५ परिखा प्राकारपरिधिभूतो गर्तस्ताम् । नाम
प्रसिद्धण्। उत्किरन्परिखापरिष्कारव्याजेन बिलान्मृदमुत्किरन् बहिः
क्षिपन् महाबिलं सुरङ्गाख्यं चकार ॥
१-१५९-१६ नातिमहामुखं इति ङ । पाठः ॥
ऊनषष्ट्यधिकशततमोऽध्यायः ॥
१५९ ॥

आदिपर्व - अध्याय १६०
॥ श्रीः ॥
१.१६०. अध्यायः १६०

Mahabharata - Adi Parva - Chapter Topics
रात्रौ कुन्त्या अन्नादिना ब्राह्मणपूजनम् ॥ १ ॥
भीमेन जतुगृहस्यादीपनम् ॥ २ ॥
तस्य कुन्तीं भ्रातॄंश्चादाय सुरङ्गाद्द्वारा बहिर्निर्गमनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६०-० (७२६९)
वैशम्पायन उवाच। १-१६०-०क्ष् (९३४)
तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान् ।
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः ॥ १-१६०-१ (७२७०)
ग्स तु संचिन्तयामास प्रहृष्टेनान्तरात्मना ।
प्राप्तकालमिदं मन्ये पाण्डवानां विनाशने ॥ १-१६०-२ (७२७१)
तमस्यान्तर्गतं भावं विज्ञाय कुरुपुङ्गवः ।
चिन्तयामास मतिमान्धर्मपुत्रो युधिष्ठिरः ॥' १-१६०-३ (७२७२)
पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित् ॥ १-१६०-४ (७२७३)
अस्मानयं सुविश्वस्तान्वेत्ति पापः पुरोचनः ।
वञ्चितोऽयं नृशंसात्मा कालं मन्ये पलायने ॥ १-१६०-५ (७२७४)
आयुधागारमादीप्य दग्ध्वा चैव पुरोचनम् ।
षट्प्राणिनो निधायेह द्रवामोऽनभिलक्षिताः ॥ १-१६०-६ (७२७५)
वैशम्पायन उवाच। १-१६०-७क्ष् (९३५)
अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम् ।
चक्रे निशि महाराज आजग्मुस्तत्र योषितः ॥ १-१६०-७ (७२७६)
ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।
जग्मुर्निशिं गृहानेव समनुज्ञाप्य माधवीम् ॥ १-१६०-८ (७२७७)
ग्पुरोचनप्रणिहिता पृथां या सेवते सदा ।
निषादी दुष्टहृदया नित्यमन्तरचारिणी ॥ १-१६०-९ (७२७८)
निषादी पञ्चपुत्रा सा तस्मिन्भोज्ये यदृच्छया ।
पुराभ्यासकृतस्नेहा सखी कुन्त्याः सुतैः सह ॥ १-१६०-१० (७२७९)
आनीय मधुमूलानि फलानि विविधानि च ।
अन्नार्थिनी समभ्यागात्सपुत्रा कालचोदिता ।
सुपापा पञ्चपुत्रा च सा पृथायाः सखी मता ॥' १-१६०-११ (७२८०)
सा पीत्वा मदिरां मत्ता सपुत्रा मदविह्वला ।
सह सर्वैः सुतै राजंस्तस्मिन्नेव निवेशने ॥ १-१६०-१२ (७२८१)
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ।
अथ प्रवाते तुमुले निशि सुप्ते जने तदा ॥ १-१६०-१३ (७२८२)
तदुपादीपयद्भीमः शेते यत्र पुरोचनः ।
ततो जतुगृहद्वारं दीपयामास पाण्डवः ॥ १-१६०-१४ (७२८३)
समन्ततो ददौ पश्चादग्निं तत्र निवेशने ।
ग्पूर्वमेव गृहं शोध्य भीमसेनो महामतिः ॥ १-१६०-१५ (७२८४)
पाण्डवैः सहितां कुन्तीं प्रावेशयत तद्बिलम् ।

दत्त्वाग्निं सहसा भीमो गृहे तत्परितः सुधीः ॥ १-१६०-१६ (७२८५)
गृहस्थं द्रविणं गृह्य निर्जगाम बिलेन सः।'
ज्ञात्वा तु तद्गृहं सर्वमादीप्तं पाण्डुनन्दनाः ॥ १-१६०-१७ (७२८६)
सुरङ्गां विविशुस्तूर्णं मात्रा सार्धमरिन्दमाः ।
ततः प्रतापः सुमहाञ्छब्दश्चैव विभावसोः ॥ १-१६०-१८ (७२८७)
प्रादुरासीत्तदा तेन बुबुधे स जनव्रजः ।
तदवेक्ष्य गृहं दीप्तमाहुः पौराः कृशाननाः ॥ १-१६०-१९ (७२८८)
दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना ।
गृहमात्मविनाशाय कारितं दाहितं च तत् ॥ १-१६०-२० (७२८९)
अहो धिग्धृतराष्ट्रस्य बुद्धिर्नातिसमञ्जसा ।
यः शुचीन्पाण्डुदायादान्दाहयामास शत्रुवत् ॥ १-१६०-२१ (७२९०)
दिष्ट्या त्विदानीं पापात्मादग्ध्वा दग्धः पुरोचनः ।
अनागसः सुविश्वस्तान्यो ददाह नरोत्तमान् ॥ १-१६०-२२ (७२९१)
वैशम्पायन उवाच। १-१६०-२३क्ष् (९३६)
एवं ते विलपन्ति स्म वारणावतका जनाः ।
परिवार्य गृहं तच्च तस्थू रात्रौ समन्ततः ॥ १-१६०-२३ (७२९२)
पाण्डवाश्चापि ते सर्वे सह मात्रा सुदुःखिताः ।
बिलेन तेन निर्गत्य जग्मुर्द्रुतमलक्षिताः ॥ १-१६०-२४ (७२९३)
तेन निद्रोपरोधेन साध्वसेन च पाण्डवाः ।
न शेकुः सहसा गन्तुं सह मात्रा परन्तपाः ॥ १-१६०-२५ (७२९४)
भीमसेनस्तु राजेन्द्र भीमवेगपराक्रमः ।
जगाम भ्रातॄनादाय सर्वान्मातरमेव च ॥ १-१६०-२६ (७२९५)
स्कन्धमारोप्य जननीं यमावङ्केन वीर्यवान् ।
पार्थौ गृहीत्वा पाणिभ्यां भ्रातरौ सुमहाबलः ॥ १-१६०-२७ (७२९६)
उरसा पादपान्भञ्जन्महीं पद्भ्यां विदारयन् ।
स जगामाशु तेजस्वी वातरंहा वृकोदरः ॥ ॥ १-१६०-२८ (७२९७)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१६०-६ जातुषागारमिति ङ । पाठः ॥
षष्ट्यधिकशततमोऽध्यायः ॥
१६० ॥

आदिपर्व - अध्याय १६१
॥ श्रीः ॥

१.१६१. अध्यायः १६१

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानां विदुरप्रेषितदूतदर्शितनौकया गङ्गोत्तरणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६१-० (७२९८)
वैशम्पायन उवाच। १-१६१-०क्ष् (९३७)
एतस्मिन्नेव काले तु यथासंप्रत्ययं कविः ।
विदुरः प्रेषयामास तद्वनं पुरुषं शुचिम् ॥ १-१६१-१ (७२९९)
ग्आत्मनः पाण्डवानां च विश्वास्यं ज्ञातपूर्वकम् ।
गङ्गासंतरणार्थाय ज्ञाताभिज्ञानवाचिकम् ॥' १-१६१-२ (७३००)
स गत्वा तु यथोद्देशं पाण्डवान्ददृशे वने ।
जनन्या सह कौरव्याननयज्जाह्नवीतटम् ॥ १-१६१-३ (७३०१)
विदितं तन्महाबुद्धेर्विदुरस्य महात्मनः ।
ततस्त्रस्यापि चारेण चेष्टितं पापचेतसः ॥ १-१६१-४ (७३०२)
ततः प्रवासितो विद्वान्विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥ १-१६१-५ (७३०३)
सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्विस्रम्भिभिः कृताम् ॥ १-१६१-६ (७३०४)
ततः पुनरथोवाच ज्ञापकं पूर्वचोदितम् ।
युधिष्ठिर निबोधेयं संज्ञार्थं वचनं कवेः ॥ १-१६१-७ (७३०५)
कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न हन्तीत्येवमात्मानं यो रक्षति स जीवति ।
ग्बोद्धव्यमिति यत्प्राह विदुरस्तदिदं तथा ॥' १-१६१-८ (७३०६)
तेन मां प्रेषितं विद्धि विश्वस्तं संज्ञयाऽनया ।
भूयश्चैवाह मां क्षत्ता विदुरः सर्वतोऽर्थवित् ।
ग्अधिक्षिपन्धार्तराष्ट्रं सभ्रातृकमुदारधीः ॥' १-१६१-९ (७३०७)
कर्णं दुर्योधनं चैव भ्रातृभिः सहितं रणे ।
शकुनिं चैव कौन्तेय विजेताऽसि न संशयः ॥ १-१६१-१० (७३०८)
ग्वैशम्पायन उवाच। १-१६१-११क्ष् (९३८)
पाण्डवाश्चापि गत्वाथ गङ्गायास्तीरमुत्तमम् ।
निषादाधिपतिं वीरं दाशं परमधार्मिकम् ॥ १-१६१-११ (७३०९)
दीपिकाभिः कृतालोकं मार्गमाणं च पाण्डवान् ।
ददृशुः पाण्डवेयास्ते नाविकं त्वरयाऽन्वितम् ॥ १-१६१-१२ (७३१०)

निषादस्तत्र कौन्तेयानभिज्ञानं न्यवेदयत् ।
विदुरस्य महाबुद्धेर्म्लेच्छभाषादि यत्तदा ॥ १-१६१-१३ (७३११)
नाविक उवाच। १-१६१-१४क्ष् (९३९)
विदुरेणास्मि सन्दिष्टो दत्त्वा बहु धनं महत् ।
गङ्गातीरे निविष्टस्त्वं पाण्डवांस्तारयेति ह ॥ १-१६१-१४ (७३१२)
सोऽहं चतुर्दशीमद्य गङ्गाया अविदूरतः ।
चारैरन्वेषयाम्यस्मिन्वने मृगगणान्विते ॥ १-१६१-१५ (७३१३)
प्रभवन्तोऽथ भद्रं वो नावमारुह्य गम्यताम् ।
युक्तारित्रपताकां च निश्छिद्रां मन्दिरोपमाम् ॥' १-१६१-१६ (७३१४)
इयं वारिपथे युक्ता नौरप्सु सुखगामिनी ।
मोचयिष्यति वः सर्वानस्माद्देशान्न संशयः ॥ १-१६१-१७ (७३१५)
वैशम्पायन उवाच। १-१६१-१८क्ष् (९४०)
अथ तान्व्यथितान्दृष्ट्वा सह मात्रा नरोत्तमान् ।
नावमारोप्य गङ्गायां प्रस्थितानब्रवीत्पुनः ॥ १-१६१-१८ (७३१६)
विदुरो मूर्ध्न्युपाघ्राय परिष्वज्य वचो मुहुः ।
अरिष्टं गच्छताव्यग्राः पन्थानमिति चाब्रवीत् ॥ १-१६१-१९ (७३१७)
इत्युक्त्वा स तु तान्वीरान्पुमान्विदुरचोदितः ।
तारयामास राजेन्द्र गङ्गां नावा नरर्षभान् ॥ १-१६१-२० (७३१८)
तारयित्वा ततो गङ्गां पारं प्राप्तांश्च सर्वशः ।
जयाशिषः प्रयुज्याथ यथागतमगाद्धि सः ॥ १-१६१-२१ (७३१९)
पाण्डवाश्च महात्मानः प्रतिसन्दिश्य वै कवेः ।
गङ्गामुत्तीर्य वेगेन जग्मुर्गूढमलक्षिताः ॥ १-१६१-२२ (७३२०)
ग्ततस्ते तत्र तीर्त्वा तु गङ्गामुत्तुङ्गवीचिकाम् ।
जवेन प्रययुर्वीरा दक्षिणां दिशमास्थिताः ॥ १-१६१-२३ (७३२१)
विज्ञाय निशि पन्थानं नक्षत्रैर्दक्षिणामुखाः ।
वनाद्वनान्तरं राजन्गहनं प्रतिपेदिरे ॥ १-१६१-२४ (७३२२)
श्रान्तास्ततः पिपासार्ताः क्षुधिता भयकातराः ।
पुनरूचुर्महावीर्यं भीमसेनमिदं वचः ॥ १-१६१-२५ (७३२३)
इतः कष्टतरं किं नु यद्वयं गहने वने ।
दिशश्च न प्रजानीमो गन्तुं चैतेन शक्नुमः ।
तं च पापं न जानीमो दग्धो वाथ पुरोचनः ॥ १-१६१-२६ (७३२४)
कथं नु विप्रमुच्येम भयादस्मादलक्षिताः ।
शीघ्रमस्मानुपादाय तथैव व्रज भारत ॥ १-१६१-२७ (७३२५)
त्वं हि नो बलवानेको यथा सततगस्तथा ।
इत्युक्तो धर्मराजेन भीमसेनो महाबलः ।
आदाय कुन्तीं भ्रातॄंश्च जगामाशु स पावनिः'॥ ॥ १-१६१-२८ (७३२६)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

आदिपर्व - अध्याय १६२
॥ श्रीः ॥
१.१६२. अध्यायः १६२

Mahabharata - Adi Parva - Chapter Topics
पौरैः प्रातर्जतुगृहसमीपमागत्य पुरोचनसहितानां पाण्डवानां दाहं
निश्चित्य धृतराष्ट्राय दूतमुखेन पाण्डववृत्तान्तनिवेदनम् ॥ १ ॥
तच्छ्रवणेन ज्ञातिभिः सह धृतराष्ट्रेण कुन्त्यादीनां उदकदानम् ॥ २ ॥
भीष्मविदुरयोः संवादः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६२-० (७३२७)
वैशम्पायन उवाच। १-१६२-०क्ष् (९४१)
अथ रात्र्यां व्यतीतायामशेषो नागरो जनः ।
तत्राजगाम त्वरितो दिदृक्षुः पाण्डुनन्दनान् ॥ १-१६२-१ (७३२८)
निर्वापयन्तो ज्वलनं ते जना ददृशुस्ततः ।
जातुषं तद्गृहं दग्धममात्यं च पुरोचनम् ॥ १-१६२-२ (७३२९)
नूनं दुर्योधनेनेदं विहितं पापकर्मणा ।
पाण्डवानां विनाशायेत्येवं ते चुक्रुशुर्जनाः ॥ १-१६२-३ (७३३०)
विदिते धृतराष्ट्रस्य धार्तराष्ट्रो न संशयः ।
दग्धवान्पाण्डुदायादान्न ह्येतत्प्रतिषिद्धवान् ॥ १-१६२-४ (७३३१)
नूनं शान्तनवोऽपीह न धर्मनुवर्तते ।
द्रोणश्च विदुरश्चैव कृपश्चान्ये च कौरवाः ॥ १-१६२-५ (७३३२)
ग्नावेक्षन्ते ह तं धर्मं धर्मात्मानोऽप्यहो विधेः ।
श्रुतवन्तोऽपि विद्वांसो धनवद्वशगा अहो ॥ १-१६२-६ (७३३३)
साधूननाथान्धर्मिष्ठात्सत्यव्रतपरायणान् ।
नावेक्षन्ते महान्तोऽपि दैवं तेषां परायणम् ॥ १-१६२-७ (७३३४)
ते वयं धृतराष्ट्राय प्रेषयामो दुरात्मने ।
संवृत्तस्ते परः कामः पाण्डवान्दग्धवानसि ॥ १-१६२-८ (७३३५)
ततो व्यपोहमानास्ते पाण्डवार्थे हुताशनम् ।
निषादीं ददृशुर्दग्धां पञ्चपुत्रामनागसम् ॥ १-१६२-९ (७३३६)
इतः पश्यत कुन्तीयं दग्धा शेते तपस्विनी ।

पुत्रैः सहैव वार्ष्णेयी हन्तेत्याहुः स्म नागराः ॥१-१६२-१० (७३३७)
खनकेन तु तेनैव वेश्म शोधयता बिलम् ।
पांसुभिः पिहितं तच्च पुरुषैस्तैर्न लक्षितम् ॥१-१६२-११ (७३३८)
ततस्ते प्रेषयामासुर्धृतराष्ट्राय नागराः ।
पाण्डवानग्निना दग्धानमात्यं च पुरोचनम् ॥१-१६२-१२ (७३३९)
श्रुत्वा तु धृतराष्ट्रस्तद्राजा सुमहदप्रियम् ।
विनाशं पाण्डुपुत्राणां विललाप सुदुःखितः ॥१-१६२-१३ (७३४०)
अन्तर्हृष्टमनाश्चासौ बहिर्दुःखसमन्वितः ।
अन्तःशीतो बहिश्चोष्णो ग्रीष्मेऽगाधह्रदोयथा ॥१-१६२-१४ (७३४१)
धृतराष्ट्र उवाच।१-१६२-१५क्ष् (९४२)
अद्य पाण्डुर्मृतो राजा मम भ्राता महायशाः ।
तेषु वीरेषु दग्धेषु मात्रा सह विशेषतः ॥१-१६२-१५ (७३४२)
गच्छन्तु पुरुषाः शीघ्रं नगरं वारणावतम् ।
सत्कारयन्तु तान्वीरान्कुन्तीं राजसुतां च ताम् ॥१-१६२-१६ (७३४३)
ये च तत्र मृतास्तेषां सुहृदः सन्ति तानपि ।
कारयन्तु च कुल्यानि शुभ्राणि च बृहन्ति च ॥१-१६२-१७ (७३४४)
मम दग्धा महात्मानः कुलवंशविवर्धनाः ॥ १-१६२-१८ (७३४५)
एवं गते मया शक्यं यद्यत्कारयितुं हितम् ।
पाण्डवानां च कुन्त्याश्च तत्सर्वं क्रियतां धनैः ॥१-१६२-१९ (७३४६)
ग्वैशम्पायन उवाच।१-१६२-२०क्ष् (९४३)
समेताश्च ततः सर्वे भीष्मेण सह कौरवाः ।
धृतराष्ट्रः सपुत्रश्च गङ्गामभिमुखा ययुः ॥१-१६२-२० (७३४७)
एकवस्त्रा निरानन्दा निराभरणवेष्टनः ।
उदकं कर्तुकामा वै पाण्डवानां महात्मनाम् ॥' १-१६२-२१ (७३४८)
एवं गत्वा ततश्चक्रे ज्ञातिभिः परिवारितः ।
उदकं पाण्डुपुत्राणां धृतराष्ट्रोऽम्बिकासुतः ॥१-१६२-२२ (७३४९)
रुरुदुः सहिताः सर्वे भृशं शोकपरायणाः ।
हा युधिष्ठिर कौरव्य हा भीम इति चापरे ॥१-१६२-२३ (७३५०)
हा फल्गुनेति चाप्यन्ये हा यमाविति चापरे ।
कुन्तीमार्ताश्च शोचन्त उदकं चक्रिरे जनाः ॥१-१६२-२४ (७३५१)
अन्ये पौरजनाश्चैवमन्वशोचन्त पाण्डवान् ।
विदुरस्त्वल्पशश्चक्रे शोकं वेद परं हि सः ॥१-१६२-२५ (७३५२)
विदुरो धृतराष्ट्रस्य जानन्सर्वं मनोगतम् ।
तेनायं विधिना सृष्टः कुटिलः कपटाशयः ॥१-१६२-२६ (७३५३)
इत्येवं चिन्तयन्राजन्विदुरो विदुषां वरः ।
लोकानां दर्शयन्दुःखं दुःखितैः सह बान्धवैः ॥१-१६२-२७ (७३५४)

मनसाऽचिन्तयत्पार्थान्क्रियद्दूरं गता इति ।
सहिताः पाण्डवाः पुत्रा इति चिन्तापरोऽभवत् ॥ १-१६२-२८ (७३५५)
ततः प्रव्यथितो भीष्मः पाण्डुराजसुतान्मृतान् ।
सह मात्रेति तच्छ्रुत्वा विललाप रुरोद च ॥ १-१६२-२९ (७३५६)
भीष्म उवाच। १-१६२-३०क्ष् (९४४)
हा युधिष्ठिर हा भीम हा धनञ्जय हा यमौ ।
हा पृथे सह पुत्रैस्त्वमेकरात्रेण स्वर्गता ॥ १-१६२-३० (७३५७)
मात्रा सह कुमारास्ते सर्वे तत्रैव संस्थिताः ।
न हि तौ नोत्सहेयातां भीमसेनधनञ्जयौ ॥ १-१६२-३१ (७३५८)
तरसा वेगितात्मानौ निर्भेत्तुमपि मन्दरम् ।
परासुत्वं न पश्यामि पृथायाः सह पाण्डवैः ॥ १-१६२-३२ (७३५९)
सर्वथा विकृतं तत्तु यदि ते निधनं गताः ।
धर्मराजः स निर्दिष्टो ननु विप्रैर्युधिष्ठिरः ॥ १-१६२-३३ (७३६०)
पृथिव्यां च रथिश्रेष्ठो भविता स धनञ्जयः ।
सत्यव्रतो धर्मदत्तः सत्यवाक्छुभलक्षणः ॥ १-१६२-३४ (७३६१)
कथं कालवशं प्राप्तः पाण्डवेयो युधिष्ठिरः ।
आत्मानमुपमां कृत्वा परेषां वर्तते तु यः ॥ १-१६२-३५ (७३६२)
मात्रा सहैव कौरव्यः कथं कालवशं गतः ।
पालितः सुचिरं कालं फलकाले यथा द्रुमः ॥ १-१६२-३६ (७३६३)
भग्नः स्याद्वायुवेगेन तथा राजा युधिष्ठिरः ।
यौवराज्येऽभिषिक्तेन पितुर्येनाहृतं यशः ॥ १-१६२-३७ (७३६४)
आत्मनश्च पितुश्चैव सत्यधर्मप्रवृत्तिभिः ।
यच्च सा वनवासेन तन्माता दुःखभागिनी ॥ १-१६२-३८ (७३६५)
कालेन सह संमग्नो धिक्कृतान्तमनर्थकम् ।
यच्च सा वनवासेन तन्माता दुःखभागिनी ॥ १-१६२-३९ (७३६६)
पुत्रगृध्नुतया कुन्ती न भर्तारं मृतात्वनु ।
अल्पकालं कुले जाता भर्तुः प्रीतिमवाप या ॥ १-१६२-४० (७३६७)
दग्धाऽद्य सह पुत्रैः सा असंपूर्णमनोरा ।
मृतो भीम इति श्रुत्वा मनो न श्रद्दधाति मे ॥ १-१६२-४१ (७३६८)
एतच्च चिन्तयानस्य व्यथितं बहुधा मनः ।
अवधूय च मे देहं हृदयेन विदीर्यते ॥ १-१६२-४२ (७३६९)
पीनस्कन्धश्चारुबाहुर्मेरुकूटसमो युवा ।
मृतो भीम इति श्रुत्वा मनो न श्रद्दधाति मे ॥ १-१६२-४३ (७३७०)
अतित्यागी च योधी च क्षिप्रहस्तो दृढायुधः ।
प्रपत्तिमाँल्लब्धलक्षो रथयानविशारदः ॥ १-१६२-४४ (७३७१)
दूरपाती त्वसंभ्रान्तो महावीर्यो महास्त्रवान् ।

अदीनात्मा नरश्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ॥ १-१६२-४५ (७३७२)
येन प्राच्याश्च सौवीरा दाक्षिणात्याश्च निर्जिताः ।
ख्यापितं येन शूरेण त्रिषु लोकेषु पौरुषम् ॥ १-१६२-४६ (७३७३)
यस्मिञ्जाते विशोकाऽभूत्कुन्ती पाण्डुश्च वीर्यवान् ।
पुरन्दरसमो जिष्णुः कथं कालवशं गतः ॥ १-१६२-४७ (७३७४)
कथं तावृषभस्कन्धौ सिंहविक्रान्तगामिनौ ।
मर्त्यधर्ममनुप्राप्तौ यमावरिनिवर्हणौ ॥ १-१६२-४८ (७३७५)
वत्सा गताः क्व मां वृद्धं विहाय भृशमातुरम् ।
हा स्नुषे मम वार्ष्णेयि निधाय हृदि मे शुचम् ॥ १-१६२-४९ (७३७६)
वारणावतयात्रायां के स्युर्वै शकुनाः पथि ।
एवमल्पायुषो लोके भविष्यन्ति पृथासुताः ॥ १-१६२-५० (७३७७)
संशप्ता इति कैर्यूयं वत्सान्दर्शय मे पृथे ।
ममैव नाथा मन्नाथा मम नेत्राणि पाण्डवाः ॥ १-१६२-५१ (७३७८)
हा पाण्डवा मे हे वत्सा हा सिंहशिशवो मम ।
मातङ्गा हा ममोत्तुङ्गा हा ममानन्दवर्धनाः ॥ १-१६२-५२ (७३७९)
मम हीनस्य युष्माभिः सर्वलोकास्तमोवृताः ।
कदा द्रष्टाऽस्मि कौन्तेयांस्तरुणादित्यवर्चसः ॥ १-१६२-५३ (७३८०)
अदृष्ट्वा वो महाबाहून्पुत्रवन्मम नन्दनाः ।
क्व गतिर्मे क्व गच्छामि कुतो द्रक्ष्यामि मे शिशून् ॥ १-१६२-५४ (७३८१)
हा युधिष्ठिर हा भीम हा हा फल्गुन हा यमौ ।
मा गच्छत निवर्तध्वं मयि कोपं विमुञ्चत ॥ १-१६२-५५ (७३८२)
वैशम्पायन उवाच। १-१६२-५६क्ष् (९४५)
श्रुत्वा तत्क्रन्दितं तस्य तिलोदं च प्रसिञ्चतः ।
देशं कालं समाज्ञाय विदुरः प्रत्यभाषत ॥ १-१६२-५६ (७३८३)
मा शोचीस्त्वं नरव्याघ्र जहि शोकं महाधृते ।
न तेषां विद्यते मृत्युः प्राप्तकालं कृतं मया ॥ १-१६२-५७ (७३८४)
एतच्च तेभ्य उदकं विप्रसिञ्च न भारत ।
क्षत्तेदमब्रवीद्भीष्मं कौरवाणामशृण्वताम् ॥ १-१६२-५८ (७३८५)
क्षत्तारमुपसंगम्य बाष्पोत्पीडकलस्वरः ।
मन्दंमन्दमुवाचेदं विदुरं संगमे नृप ॥ १-१६२-५९ (७३८६)
भीष्म उवाच। १-१६२-६०क्ष् (९४६)
कथं ते तात जीवन्ति पाण्डोः पुत्रा महाबलाः ।
कथमस्मत्कृते पक्षः पाण्डोर्न हि निपातितः ॥ १-१६२-६० (७३८७)
कथं मत्प्रमुखाः सर्वे प्रमुक्ता महतो भयात् ।
जननी गरुडेनेव कुरवस्ते समुद्धृताः ॥ १-१६२-६१ (७३८८)
वैशम्पायन उवाच। १-१६२-६२क्ष् (९४७)

एवमुक्तस्तु कौरव्य कौरवाणामशृण्वताम् ।
आचचक्षे स धर्मात्मा भीष्मायाद्भुतकर्मणे ॥ १-१६२-६२ (७३८९)
विदुर उवाच। १-१६२-६३क्ष् (९४८)
धृतराष्ट्रस्य शकुने राज्ञो दुर्योधनस्य च ।
विनाशे पाण्डुपुत्राणां कृतो मतिविनिश्चयः ॥ १-१६२-६३ (७३९०)
तत्राहमपि च ज्ञात्वा तस्य पापस्य निश्चयम् ।
तं जिघांसुरहं चापि तेषामनुमते स्थितः ॥ १-१६२-६४ (७३९१)
ततो जतुगृहं गत्वा दहनेऽस्मिन्नियोजिते ।
पृथायाश्च सपुत्राया धार्तराष्ट्रस्य शासनात् ॥ १-१६२-६५ (७३९२)
ततः खनकमाहूय सुरङ्गं वै बिलं तदा ।
सुगूढं कारयित्वा ते कुन्त्या पाण्डुसुतास्तदा ॥ १-१६२-६६ (७३९३)
निष्क्रामिता मया पूर्वं मा स्म शोके मनः कृथाः ।
ततस्तु नावमारोप्य सहपुत्रां पृथामहम् ॥ १-१६२-६७ (७३९४)
दत्त्वाऽभयं सपुत्रायै कुन्त्यै गृहमदाहयम् ।
तस्मात्ते मा स्म भूद्दुःखं मुक्ताः पापात्तु पाण्डवाः ॥ १-१६२-६८ (७३९५)
निर्गताः पाण्डवा राजन्मात्रा सह परन्तपाः ।
अग्निहादान्महाघोरान्मया तस्मादुपायतः ॥ १-१६२-६९ (७३९६)
मा स्म शोकमिमं कार्षीर्जीवन्त्येव च पाण्डवाः ।
प्रच्छन्ना विचरिष्यन्ति यावत्कालस्य पर्ययः ॥ १-१६२-७० (७३९७)
तस्मिन्युधिष्ठिरं काले द्रक्ष्यन्ति भुवि मानवाः ।
विमलं कृष्णपक्षान्ते जगच्चन्द्रमिवोदितम् ॥ १-१६२-७१ (७३९८)
न तस्य नाशं पश्यामि यस्य भ्राता धनञ्जयः ।
भीमसेनश्च दुर्धर्षौ माद्रीपुत्रौ च तौ यमौ ॥ १-१६२-७२ (७३९९)
वैशम्पायन उवाच। १-१६२-७३क्ष् (९४९)
ततः संहृष्टसर्वाङ्गो भीष्मो विदुरमब्रवीत् ।
दिष्ट्यादिष्ट्येति संहृष्टः पूजयानो महामतिम् ॥ १-१६२-७३ (७४००)
भीष्म उवाच। १-१६२-७४क्ष् (९५०)
युक्तं चैवानुरूपं च कृतं तात शुभं त्वया ।
वयं विमोक्षिता दुःखात्पाण्डुपक्षो न नाशितः ॥ १-१६२-७४ (७४०१)
वैशम्पायन उवाच। १-१६२-७५क्ष् (९५१)
एवमुक्त्वा विवेशाथ पुरं जनशताकुलम् ।
कुरुभिः सहितो राजन्नागरैश्च पितामहः ॥ १-१६२-७५ (७४०२)
अथाम्बिकेयः सामात्यः सकर्णः सहसौबलः ।
सात्मजः पार्थनाशस्य स्मरंस्तथ्यं जर्ष च ॥ १-१६२-७६ (७४०३)
भीष्मश्च राजन्दुर्धर्षो विदुरश्च महामतिः ।
जहृषाते स्मरन्तौ तौ जातुषाग्नेर्विमोचनम् ॥ १-१६२-७७ (७४०४)

सत्यशीलगुणाचारै रागैर्जानपदोद्भवैः ।
द्रोणादयश्च धर्मैस्तु तेषां तान्मोचितान्विदुः ॥ १-१६२-७८ (७४०५)
शौर्यलावण्यमाहात्म्यै रूपैः प्राणबलैरपि ।
स्वस्थान्पार्थानमन्यन्त पौरजानपदास्तथा ॥ १-१६२-७९ (७४०६)
अन्ये जनाः प्राकृताश्च स्त्रियश्च बहुलास्तदा ।
शङ्कमाना वदन्ति स्म दग्धा जीवन्ति वा न वा ॥ ॥ १-१६२-८० (७४०७)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६२-१७ कुल्यानि अस्थीनि कारयन्तु संस्कारयन्तु । कुल्यानि चैत्यानीत्यन्ये ॥
१-१६२-२५ विदुरस्त्वन्यथा चक्र इति घ । पाठः ॥
द्विषष्ट्यधिकशततमोऽध्यायः ॥
१६२ ॥

आदिपर्व - अध्याय १६३
॥ श्रीः ॥
१.१६३. अध्यायः १६३

Mahabharata - Adi Parva - Chapter Topics
तृषार्तान् मातरं भ्रांतृश्च न्यग्रोधमूले स्थापयित्वा जलानयनाय
भीमस्य गमनम् ॥ १ ॥
जलमानीयागतस्य भूमौ सुप्तान्मात्रादीन्पश्यतो भीमस्य प्रलापः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६३-० (७४०८)
वैशम्पायन उवाच । १-१६३-०क्ष् (९५२)
तेन विक्रममाणेन ऊरुवेगसमीरितम् ।
वनं सवृक्षविटपं व्याघूर्णितमिवाभवत् ॥ १-१६३-१ (७४०९)
जङ्घावातो ववौ चास्य शुचिशुक्रागमे यथा ।
आवर्जितालतावृक्षं मार्गं चक्रे महाबलः ॥ १-१६३-२ (७४१०)
स मृद्गन्पुष्पितांश्चैव फलितांश्च वनस्पतीन् ।
अवरुज्य ययौ गुल्मान्पथस्तस्य समीपजान् ॥ १-१६३-३ (७४११)
स रोषित इव क्रुद्धो वने भञ्जन्महाद्रुमान् ।
त्रिप्रस्रुतमदः शुष्मी षष्टिवर्षो मतङ्गराट् ॥ १-१६३-४ (७४१२)

गच्छतस्तस्य वेगेन तार्क्ष्यमारुतरंहसः ।
भीमस्य पाण्डुपुत्राणां मूर्च्छेव समजायत ॥ १-१६३-५ (७४१३)
असकृच्चापि सतीर्य दूरपारं भुजप्लवैः ।
पथि प्रच्छन्नमासेदुर्धार्तराष्ट्रभयात्तदा ॥ १-१६३-६ (७४१४)
कृच्छ्रेण मातरं चैव सुकुमारीं यशस्विनीम् ।
अवहत्स तु पृष्ठेन रोधःसु विषमेषु च ॥ १-१६३-७ (७४१५)
अगमच्च वनोद्देशमल्पमूलफलोदकम् ।
क्रूरपक्षिमृगं घोरं सायाह्ने भरतर्षभ ॥ १-१६३-८ (७४१६)
घोरा समभवत्सन्ध्या दारुणा मृगपक्षिणः ।
अप्रकाशा दिशः सर्वा वातैरासन्ननार्तवैः ॥ १-१६३-९ (७४१७)
शीर्णपर्णफलै राजन्बहुगुल्मक्षुपद्रुमैः ।
भग्नावभुग्नभूयिष्ठैर्नानाद्रुमसमाकुलैः ॥ १-१६३-१० (७४१८)
ते श्रमेण च कौरव्यास्तृष्णया च प्रपीडिताः ।
नाशक्नुवंस्तदा गन्तुं निद्रया च प्रवृद्धया ॥ १-१६३-११ (७४१९)
न्यविशन्ति हि ते सर्वे निरास्वादे महावने ।
ग्रात्र्यामेव गतास्तूर्णं चतुर्विंशतियोजनम्।'
ततस्तृषा परिक्लन्ता कुन्ती वचनमब्रवीत् ॥ १-१६३-१२ (७४२०)
माता सती पाण्डवानां पञ्चानां मध्यतः स्थिता ।
तृष्णया हि परीताऽहमनाथेव महावने ॥ १-१६३-१३ (७४२१)
ग्इतः परं तु शक्ताहं गन्तुं च न पदात्पदम् ।
शयिष्ये वृक्षमूलेऽत्र धार्तराष्ट्रा हरन्तु माम् ॥ १-१६३-१४ (७४२२)
शृणु भीम वचो मह्यं तव बाहुबलात्पुरः ।
स्थातुं न शक्ताः कौरव्याः किं बिभेषि पृथासुत ॥ १-१६३-१५ (७४२३)
अन्यो रथो न मेऽस्तीह भीमसेनादृते भुवि ।
धार्तराष्ट्राद्वृथा भीरुर्न मां स्वप्तुमिहेच्छसि ॥ १-१६३-१६ (७४२४)
वैशम्पायन उवाच। १-१६३-१७क्ष् (९५३)
भीमपृष्ठस्थिता चेत्थं दूयमानेन चेतसा ।
निश्यध्वनि रुदन्ती सा निद्रावशमुपागता ॥' १-१६३-१७ (७४२५)
तच्छ्रुत्वा भीमसेनस्य मातृस्नेहात्प्रजल्पितम् ।
कारुण्येन मनस्तप्तं गमनायोपचक्रमे ॥ १-१६३-१८ (७४२६)
ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयं ददर्श ह ॥ १-१६३-१९ (७४२७)
तत्र निक्षिप्य तान्सर्वानुवाच भरतर्षभः ।
पानीयं मृगयामीह तावद्विश्रम्यतामिह ॥ १-१६३-२० (७४२८)
एते रुवन्ति मधुरं सारसा जलचारिणः ।
ध्रुवमत्र जलस्थानं महच्चेति मतिर्मम ॥ १-१६३-२१ (७४२९)

अनुज्ञातः स गच्छेति भ्रात्रा ज्येष्ठेन भारत ।
जगाम तत्र यत्र स्म सारसा जलचारिणः ॥१-१६३-२२ (७४३०)
ग्अपश्यत्पद्मिनीखण्डमण्डितं स सरोवरम्।'
स तत्र पीत्वा पानीयं स्नात्वा च भरतर्षभ ॥ १-१६३-२३ (७४३१)
तेषामर्थे च जग्राह भ्रातॄणां भ्रातृवत्सलः ।
उत्तरीयेण पानीयमानयामास भारत ॥१-१६३-२४ (७४३२)
ग्पङ्कजानामनेकैश्च पत्रैर्बध्वा पृथक्पृथक्।'
गव्यूतिमात्रादागत्य त्वरितो मातरं प्रति ।
शोकदुःखपरीतात्मा निशश्वासोरगो यथा ॥ १-१६३-२५ (७४३३)
स सुप्तां मातरं ग्भ्रातॄन्निद्राविद्रावितौजसः ।
महारौद्रे वने घोरे वृक्षमूले सुशीतले ॥१-१६३-२६ (७४३४)
विक्षिप्तकरपादांश्च दीर्घोच्छ्वासान्महाबलान् ।
ऊर्ध्ववक्त्रान्महाकायान्पञ्चेन्द्रानिव भूपते ॥१-१६३-२७ (७४३५)
अज्ञातवृक्षनित्यस्थप्रेतराक्षससाध्वसान् ।
दृष्ट्वा वै भृशशोकार्तो बिललापानिलात्मजः ॥' १-१६३-२८ (७४३६)
भृशं शोकपरीत्मा विललाप वृकोदरः ॥ १-१६३-२९ (७४३७)
अतः कष्टतरं किं नु द्रष्टव्यं हि भविष्यति ।
यत्पश्यामि महीसुप्तान्भ्रातॄनद्य सुमन्दभाक् ॥१-१६३-३० (७४३८)
शयनेषु परार्ध्येषु ये पुरा वारणावते ।
नाधिजग्मुस्तदा निद्रां तेऽद्य सुप्ता महीतले ॥१-१६३-३१ (७४३९)
स्वसारं वसुदेवस्य शत्रुसङ्घावमर्दिनः ।
कुन्तिराजसुतां कुन्तीं सर्वलक्षणपूजिताम् ॥१-१६३-३२ (७४४०)
स्नुषां विचित्रवीर्यस्य भार्यां पाण्डोर्महात्मनः ।
तथैव चास्मज्जननीं पुण्डरीकोदरप्रभाम् ॥१-१६३-३३ (७४४१)
सुकुमारतरामेनां महार्हशयनोचिताम् ।
शयानां पश्यताऽद्येह पृथिव्यामतथोचिताम् ॥१-१६३-३४ (७४४२)
धर्मादिन्द्राच्च वाताच्च सुपुवे या सुतानिमान् ।
सेयं भूमौ परिश्रान्ता शेषे प्रासादशायिनी ॥१-१६३-३५ (७४४३)
किं नु दुःखतरं शक्यं मया द्रष्टुमतः परम् ।
योऽहमद्य नरव्याघ्रान्सुप्तान्पश्यामि भूतले ॥१-१६३-३६ (७४४४)
त्रिषु लोकेषु यो राज्यं धर्मनित्योऽर्हते नृपः ।
सोऽयं भूमौ परिश्रान्तः शेते प्राकृतवत्कथम् ॥१-१६३-३७ (७४४५)
अयं नीलाम्बुदश्यामो नरेष्वप्रतिमोऽर्जुनः ।
शेते प्राकृतवद्भूमौ ततो दुःखतरं नु किम् ॥१-१६३-३८ (७४४६)
अश्विनाविव देवानां याविमौ रूपसंपदा ।
तौ प्राकृतवदद्येमौ प्रसुप्तौ धरणीतले ॥१-१६३-३९ (७४४७)

ज्ञातयो यस्य नै स्युर्विषमाः कुलपांसनाः ।
स जीवेत सुखं लोके ग्रामद्रुम इवैकजः ॥ १-१६३-४० (७४४८)
एको वृक्षो हि यो ग्रामे भवेत्पर्णफलान्वितः ।
चैत्यो भवति निर्ज्ञातिरध्वनीनैश्च पूजितः ॥ १-१६३-४१ (७४४९)
येषां च बहवः शूरा ज्ञातयो धर्ममाश्रिताः ।
ते जीवन्ति सुखं लोके भवन्ति च निरामयाः ॥ १-१६३-४२ (७४५०)
बलवन्तः समृद्धार्था मित्रबान्धवनन्दनाः ।
जीवन्त्यन्योन्यमाश्रित्य द्रुमाः काननजा इव ॥ १-१६३-४३ (७४५१)
वयं तु धृतराष्ट्रेण दुष्पुत्रेण दुरात्मना ।
ग्राज्यलुब्धेन मूर्खेण दुर्मन्त्रिसहितेन वै ॥ १-१६३-४४ (७४५२)
दुष्टेनाधर्मशीलेन स्वार्थनिष्ठैकबुद्धिना।'
विवासिता न दग्धाश्च क्षत्तुर्बुद्धिपराक्रमात् ॥ १-१६३-४५ (७४५३)
तस्मान्मुक्ता वयं दाहादिमं वृक्षमुपाश्रिताः ।
कां दिशं प्रतिपत्स्यामः प्राप्ताः क्लेशमनुत्तमम् ॥ १-१६३-४६ (७४५४)
सकामो भव दुर्बुद्धे धार्तराष्ट्राल्पदर्शन ।
नूनं देवाः प्रसन्नास्ते नानुज्ञां मे युधिष्ठिरः ॥ १-१६३-४७ (७४५५)
प्रयच्छति वधे तुभ्यं तेन जीवसि दुर्मते ।
नन्वद्य ससुतामात्यं सकर्णानुजसौबलम् ॥ १-१६३-४८ (७४५६)
गत्वा क्रोधसमाविष्टः प्रेषयिष्ये यमक्षयम् ।
किं नु शक्यं मया कर्तुं यत्तेन क्रुध्यते नृपः ॥ १-१६३-४९ (७४५७)
धर्मात्मा पाण्डवश्रेष्ठः पापाचार युधिष्ठिरः ।
एवमुक्त्वा महाबाहुः क्रोधसन्दीप्तमानसः ॥ १-१६३-५० (७४५८)
करं करेण निष्पिष्य निःश्वसन्दीनमानसः ।
पुनर्दीनमना भूत्वा शान्तार्चिरिव पावकः ॥ १-१६३-५१ (७४५९)
भ्रातॄन्महीतले सुप्तानवैक्षत वृकोदरः ।
विश्वस्तानिव संविष्टान्पृथग्जनसमानिव ॥ १-१६३-५२ (७४६०)
नातिदूरेण नगरं वनादस्माद्धि लक्षये ।
जागर्तव्ये स्वपन्तीमे हन्त जागर्म्यहंस्वयम् ॥ १-१६३-५३ (७४६१)
प्राश्यन्तीमे जलं पश्चात्प्रतिबुद्धा जितक्लमाः ।
इति भीमो व्यवस्यैव जजागार स्वयं तदा ॥ ॥ १-१६३-५४ (७४६२)

इति श्रीमन्महाभारते आदिपर्वणि जतुगृहपर्वणि
त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥ ॥ समाप्तं जतुर्गृहपर्व
॥

१-१६३-२ शुचिशुक्रागमे ज्येष्ठाषाढयोः समये ।आवर्जिताः समीकृता लता वृक्षाश्च यस्मिन् ॥
१-१६३-३ अवरुज्य भङ्क्त्वा ॥
१-१६३-४ रोषितो रोषं प्रापितः ।त्रिषु गण्डकर्णमूलगुह्यदेशेषु प्रस्नुतो मदो यस्य सः।शुष्मी तेजस्वी ॥
१-१६३-९ अनार्तवैरनृतुभवैरुत्पातरूपैरित्यर्थः ॥
१-१६३-१२ तृषा तृष्णया ॥
१-१६३-३० सुमन्दभागतिमन्दभाग्यः ॥
१-१६३-४० एकज एक एव जातोऽसहायः ॥
१-१६३-४३ बान्धवानां नन्दनाः सुखदाः ॥
१-१६३-४८ तुभ्यं तव ॥
त्रिषष्ट्यधिकशततमोऽध्यायः ॥
१६३ ॥

आदिपर्व - अध्याय १६४
॥ श्रीः ॥
१.१६४. अध्यायः १६४

(अथ हिडिम्बवधपर्व ॥ ९ ॥)
Mahabharata - Adi Parva - Chapter Topics
हिडिम्बप्रेरितायाः तद्भगिन्या हिडिम्बायाः पाण्डवसमीपगमनम् ॥ १ ॥
भीमं दृष्ट्वा कामार्ताया हिडिम्बायाः भीमं प्रति वाक्यम् ॥ २ ॥
भीमहिडिम्बासंवादः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६४-० (७४६३)
वैशम्पायन उवाच।१-१६४-०क्ष् (९५४)
तत्र तेषु शयानेषु हिडिम्बो नाम राक्षसः ।
अविदूरे वनात्तस्माच्छालवृक्षं समाश्रितः ॥ १-१६४-१ (७४६४)
क्रूरो मानुषमांसादो महावीर्यपराक्रमः ।
प्रावृड्जलधरश्यामः पिङ्गाक्षो दारुणाकृतिः ॥ १-१६४-२ (७४६५)
दंष्ट्राकरालवदनः करालो भीमदर्शनः ।
लम्बस्फिग्लम्बजठरो रक्तश्मश्रुशिरोरुहः ॥ १-१६४-३ (७४६६)
महावृक्षगलस्कन्धः शङ्कुकर्णो विभीषणः ।
यदृच्छया तानपश्यत्पाण्डुपुत्रान्महारथान् ॥ १-१६४-४ (७४६७)
विरूपरूपः पिङ्गाक्षः करालो घोरदर्शनः ।

पिशितेप्सुः क्षुधार्तश्च जिघ्रन्गान्धं यदृच्छया ॥१-१६४-५ (७४६८)
ऊर्ध्वाङ्गुलिः स कण्डूयन्धुन्वन्रूक्षाञ्शिरोरुहान् ।
जृम्भमाणो महावक्त्रः पुनःपुनरवेक्ष्य च ॥१-१६४-६ (७४६९)
हृष्टो मानुषमांसस्य महाकायो महाबलः ।
आघ्राय मानुषं गन्धं भगिनीमिदमब्रवीत् ॥१-१६४-७ (७४७०)
उपपन्नं चिरस्याद्य भक्ष्यं मम मनःप्रियम् ।
जिघ्रतः प्रस्नुता स्नेहाज्जिह्वा पर्येति मे मुखात् ॥१-१६४-८ (७४७१)
अष्टौ दंष्ट्राः सुतीक्ष्णाग्राश्चिरस्यापातदुःसहाः ।
देहेषु मज्जयिष्यामि स्निग्धेषु पिशितेषु च ॥१-१६४-९ (७४७२)
आक्रम्य मानुषं कण्ठमाच्छिद्य धमनीमपि ।
उष्णं नवं प्रपास्यामि फेनलिं रुधिरं बहु ॥१-१६४-१० (७४७३)
गच्छ जानीहि के त्वेते शेरते वनमाश्रिताः ।
मानुषो बलवान्गन्धो घ्राणं तर्पयतीव मे ॥१-१६४-११ (७४७४)
हत्वैतान्मानुषान्सर्वानानयस्व ममान्तिकम् ।
अस्मद्विषयसुप्तेभ्यो नैतेभ्यो भयमस्ति ते ॥१-१६४-१२ (७४७५)
एषामुत्कृत्य मांसानि मानुषाणां यथेष्टतः ।
भक्षयिष्याव सहितौ कुरु पूर्णं वचो मम ॥१-१६४-१३ (७४७६)
भक्षयित्वा च मांसानि मानुषाणां प्रकामतः ।
नृत्याव सहितावावां दत्ततालावनेकशः ॥१-१६४-१४ (७४७७)
वैशम्पायन उवाच। १-१६४-१५क्ष् (९५५)
एवमुक्ता हिडिम्बा तु हिडिम्बेन महावने ।
भ्रातुर्वचनमाज्ञाय त्वरमाणेव राक्षसी ॥१-१६४-१५ (७४७८)
ग्आप्लुत्याप्लुत्य च तरूनगच्छत्पाण्डवान्प्रति।'
जगाम तत्र यत्र स्म शेरते पाण्डवा वने ॥ १-१६४-१६ (७४७९)
ददर्श तत्र सा गत्वा पाण्डवान्पृथया सह ।
शयानान्भीमसेनं च जाग्रतं त्वपराजितम् ॥१-१६४-१७ (७४८०)
ग्उपास्यमानान्भीमेन रूपयौवनशालिनः ।
सुकुमारांश्च पार्थान्सा व्यायामेन च कर्शितान् ॥१-१६४-१८ (७४८१)
दुःखेन संप्रयुक्तांश्च सहज्येष्ठान्प्रमाथिनः ।
रौद्री सती राजपुत्रं दर्शनीयप्रदर्शनम् ॥' १-१६४-१९ (७४८२)
दृष्ट्वैव भीमसेनं सा सालस्कन्धमिवोद्यतम् ।
राक्षसी कामयामास रूपेणाप्रतिमं भुवि ॥१-१६४-२० (७४८३)
ग्अन्तर्गतेन मनसा चिन्तयामास राक्षसी'।
अयं श्यामो महाबाहुः सिंहस्कन्धो महाद्युतिः ॥१-१६४-२१ (७४८४)
कम्बुग्रीवः पुष्कराक्षो भर्ता युक्तो भवेन्मम ।
नाहं भ्रातृवचो जातु कुर्यां क्रूरमसांप्रतम् ॥१-१६४-२२ (७४८५)

पतिस्नेहोऽतिबलवान्न तथा भ्रातृसौहृदम् ।
मुहूर्तमिव तृप्तिश्च भवेद्भ्रातुर्ममैव च ॥ १-१६४-२३ (७४८६)
हतैरेतैरहत्वा तु मोदिष्ये शाश्वतीः समाः ।
गनिश्चित्येत्थं हिडिम्बा सा भीमं दृष्ट्वा महाभुजं ॥ १-१६४-२४ (७४८७)
उत्सृज्य राक्षसं रूपं मानुषं रूपमास्थिता।'
सा कामरूपिणी रूपं कृत्वा मदनमोहिता ॥ १-१६४-२५ (७४८८)
उपतस्थे महात्मानं भीमसेनमनिन्दिता ।
गइङ्गिताकारकुशला सोपासर्पच्छनैः शनैः ॥ १-१६४-२६ (७४८९)
विनम्यमानेव लता दिव्याभरणभूषिता ।
शनैः शनैश्च तां भीमः समीपमुपसर्पतीम् ॥ १-१६४-२७ (७४९०)
हर्षमाणां तदा पश्यत्तन्वीं पीनपयोधराम् ।
चन्द्राननां पद्मनेत्रां नीलकुञ्चितमूर्धजाम् ॥ १-१६४-२८ (७४९१)
कृष्णां सुपाण्डुरैर्दन्तैर्बिम्बोष्ठीं चारुदर्शनाम् ।
दृष्ट्वा तां रूपसंपन्नां भीमो विस्मयमागतः ॥ १-१६४-२९ (७४९२)
उपचारगुणैर्युक्तां ललितैर्हाससंमितैः ।
समीपमुपसंप्राप्य भीमं साथ वरानता ॥ १-१६४-३० (७४९३)
वचो वचनवेलायां भीमं प्रोवाच भामिनी।'
लज्जया नम्यमानेव सर्वाभरणभूषिता ॥ १-१६४-३१ (७४९४)
स्मितपूर्वमिदं वाक्यं भीमसेनमथाब्रवीत् ।
कुतस्त्वमसि संप्राप्तः कश्चासि पुरुषर्षभ ॥ १-१६४-३२ (७४९५)
क इमे शेरते चेह पुरुषा देवरूपिणः ।
केयं वै बृहती श्यामा सुकुमारी तवानघ ॥ १-१६४-३३ (७४९६)
शेते वनमिदं प्राप्य विश्वस्ता स्वगृहे यथा ।
नेदं जानीथ गहनं वनं राक्षससेवितम् ॥ १-१६४-३४ (७४९७)
वसति ह्यत्र पापात्मा हिडिम्बो नाम राक्षसः ॥ १-१६४-३५ (७४९८)
तेनाहं प्रेषिता भ्रात्रा दुष्टभावेन रक्षसा ।
बिभक्षयिषता मांसं युष्माकममरोपमाः ॥ १-१६४-३६ (७४९९)
साऽहं त्वमभिसंप्रेक्ष्य देवगर्भसमप्रभम् ।
नान्यं भर्तारमिच्छामि सत्यमेतद्ब्रवीमि ते ॥ १-१६४-३७ (७५००)
एतद्विज्ञाय धर्मज्ञ युक्तं मयि समाचर ।
कामोपहतचित्तां हि भजमानां भजस्व माम् ॥ १-१६४-३८ (७५०१)
त्रास्यामि त्वां महाबाहो राक्षसात्पुरुषादकात् ।
वत्स्यावो गिरिदुर्गेषु भर्ता भव ममानघ ॥ १-१६४-३९ (७५०२)
गइच्छामि वीर भद्रं ते मा मे प्राणान्विहासिषः ।
त्वया ह्यहं परित्यक्ता न जीवेयमरिन्दम ॥' १-१६४-४० (७५०३)
अन्तरिक्षचरी ह्यस्मि कामतो विचरामि च ।

अतुलामाप्नुहि प्रीतिं तत्र तत्र मया सह ॥ १-१६४-४१ (७५०४)
भीमसेन उवाच। १-१६४-४२क्ष् (९५६)
ग्एष ज्येष्ठो मम भ्राता मान्यः परमको गुरुः ।
अनिविष्टो हि तन्नाहं परिविद्यां कथंचन ॥' १-१६४-४२ (७५०५)
मातरं भ्रातरं ज्येष्ठं कनिष्ठानपरानपि ।
परित्यजेत कोन्वद्य प्रभवन्निह राक्षसि ॥ १-१६४-४३ (७५०६)
को हि सुप्तानिमान्भ्रातॄन्दत्त्वा राक्षसभोजनम् ।
मातरं च नरो गच्छेत्कामार्त इव मद्विधः ॥ १-१६४-४४ (७५०७)
राक्षस्युवाच। १-१६४-४५क्ष् (९५७)
ग्एकं त्वां मोक्षयिष्यामि सह मात्रा परन्तप ।
सोदरानुत्सृजैनांस्त्वमारोह जघनं मम ॥ १-१६४-४५ (७५०८)
भीम उवाच। १-१६४-४६क्ष् (९५८)
नाहं जीवितुमाशंसे भ्रातॄनुत्सृज्य राक्षसि ।
यथाश्रद्धं व्रजैका हि विप्रियं मे प्रभाषसे ॥ १-१६४-४६ (७५०९)
राक्षस्युवाच।' १-१६४-४७क्ष् (९५९)
यत्ते प्रियं तत्करिष्ये सर्वानेतान्प्रबोधय ।
मोक्षयिष्याम्यहं कामं राक्षसात्पुरुषादकात् ॥ १-१६४-४७ (७५१०)
भीमसेन उवाच। १-१६४-४८क्ष् (९६०)
सुखसुप्तान्वने भ्रातॄन्मातरं चैव राक्षसि ।
न भयाद्बोधयिष्यामि भ्रातुस्तव दुरात्मनः ॥ १-१६४-४८ (७५११)
न हि मे राक्षसा भीरु सोढुं शक्ताः पराक्रमम् ।
न मनुष्या न गन्धर्वा न यक्षाश्चारुलोचने ॥ १-१६४-४९ (७५१२)
गच्छ वा तिष्ठ वा भद्रे यद्वा पीच्छसि तत्कुरु ।
तं वा प्रेषय तन्वङ्गि भ्रातरं पुरुषादकम् ॥ ॥ १-१६४-५० (७५१३)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६४-४ यदृच्छया सालवृक्षं समाश्रित इत्यन्वयः ॥
१-१६४-१० धमनीं नाडीम् ॥
१-१६४-२१ श्यामः तरुणः ॥
१-१६४-३६ बिभक्षयिषता भक्षयितुमिच्छता ॥
चतुःषष्ट्यधिकशततमोऽध्यायः ॥
१६४ ॥

आदिपर्व - अध्याय १६५

॥ श्रीः ॥

१.१६५. अध्यायः १६५

Mahabharata - Adi Parva - Chapter Topics

पाण्डवान्प्रति प्रेषितया हिडिम्बया विलम्बिते हिडिम्बस्य तत्रागमनम् ॥ १ ॥
भीमहिडिम्बयोर्युद्धम् ॥ २ ॥
कुन्त्यादीनां प्रबोधः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६५-० (७५१४)
वैशम्पायन उवाच। १-१६५-०क्ष् (९६१)
तां विदित्वा चिरगतां हिडिम्बो राक्षसेश्वरः ।
अवतीर्य द्रुमात्तस्मादाजगामाशु पाण्डवान् ॥ १-१६५-१ (७५१५)
लोहिताक्षो महाबाहुरूर्ध्वकेशो महाननः ।
मेघसङ्घातवर्ष्मा च तीक्ष्णदंष्ट्रो भयानकः ॥ १-१६५-२ (७५१६)
तलं तलेन संहत्य बाहू विक्षिप्य चासकृत् ।
उद्वृत्तनेत्रः संक्रुद्धो दन्तान्दन्तेषु निष्कुषन् ॥ १-१६५-३ (७५१७)
कोऽद्य मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः ।
न बिभेति हिडिम्बी च प्रेषिता किमनागता ॥ १-१६५-४ (७५१८)
वैशम्पायन उवाच। १-१६५-५क्ष् (९६२)
तमापतन्तं दृष्ट्वै तथा विकृतदर्शनम् ।
हिडिम्बोवाच वित्रस्ता भीमसेनमिदं वचः ॥ १-१६५-५ (७५१९)
आपतत्येष दुष्टात्मा संक्रुद्धः पुरुषादकः ।
साऽहं त्वां भ्रातृभिः सार्धं यद्ब्रवीमि तथा कुरु ॥ १-१६५-६ (७५२०)
अहं कामगमा वीर रक्षोबलसमन्विता ।
आरुहेमां मम श्रोणिं नेष्यामि त्वां विहायसा ॥ १-१६५-७ (७५२१)
प्रबोधयैतान्संसुप्तान्मातरं च परन्तप ।
सर्वानेव गमिष्याभि गृहीत्वा वो विहायसा ॥ १-१६५-८ (७५२२)
भीम उवाच। १-१६५-९क्ष् (९६३)
मा भैस्त्वं पृथुसुश्रोणि नैष कश्चिन्मयि स्थिते ।
अहमेनं हनिष्यामि पश्यन्त्यास्ते सुमध्यमे ॥ १-१६५-९ (७५२३)
नायं प्रतिबलो भीरु राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्वराक्षसाः ॥ १-१६५-१० (७५२४)
पश्य बाहू सुवृत्तौ मे हस्तिहस्तनिभाविमौ ।
ऊरू परिघसङ्काशौ संहतं चाप्युरो महत् ॥ १-१६५-११ (७५२५)

विक्रमं मे यथेन्द्रस्य साऽद्य द्रक्ष्यसि शोभने ।
माऽवमंस्थाः पृथुश्रोणि मत्वा मामिह मानुषम् ॥१-१६५-१२ (७५२६)
हिडिम्बोवाच।१-१६५-१३क्ष् (९६४)
नावमन्ये नरव्याघ्र त्वामहं देवरूपिणम् ।
दृष्टप्रभावस्तु मया मानुषेष्वेव राक्षसः ॥१-१६५-१३ (७५२७)
वैशम्पायन उवाच।१-१६५-१४क्ष् (९६५)
तथा संजल्पतस्तस्य भीमसेनस्य भारत ।
वाचः शुश्राव ताः क्रुद्धो राक्षसः पुरुषादकः ॥१-१६५-१४ (७५२८)
अवेक्षमाणस्तस्याश्च हिडिम्बो मानुषं वपुः ।
स्रग्दामपूरितशिखां समग्रेन्दुनिभाननाम् ॥१-१६५-१५ (७५२९)
सुभ्रूनासाक्षिकेशान्तां सुकुमारनखत्वचम् ।
सर्वाभरणसंयुक्तां सुसूक्ष्माम्बरधारिणीम् ॥१-१६५-१६ (७५३०)
तां तथा मानुषं रूपं बिभ्रतीं सुमनोहरम् ।
पुंस्कामां शङ्कमानश्च चुक्रोध पुरुषादकः ॥१-१६५-१७ (७५३१)
संक्रुद्धो राक्षसस्तस्या भगिन्याः कुरुसत्तम ।
उत्फाल्य विपुले नेत्रे ततस्तामिदमब्रवीत् ॥१-१६५-१८ (७५३२)
को हि मे भोक्तुकामस्य विघ्नं चरति दुर्मतिः ।
न बिभेषि हिडिम्बे किं मत्कोपाद्विप्रमोहिता ॥१-१६५-१९ (७५३३)
धिक्त्वामसति पुंस्कामे मम विप्रियकारिणि ।
पूर्वेषां राक्षसेन्द्राणां सर्वेषामयशस्करि ॥१-१६५-२० (७५३४)
यानिमानाश्रिताऽकार्षीर्विप्रियं समुहन्मम ।
एष तानद्य वै सर्वान्हनिष्यामि त्वया सह ॥१-१६५-२१ (७५३५)
वैशम्पायन उवाच।१-१६५-२२क्ष् (९६६)
एवमुक्त्वा हिडिम्बां स हिडिम्बो लोहितेक्षणः ।
वधायाभिपपातैनान्दन्तैर्दन्तानुपस्पृशन् ॥१-१६५-२२ (७५३६)
गर्जन्तमेवं विजने भीमसेनोऽभिवीक्ष्य तम् ।
रक्षन्प्रबोधं भ्रातॄणां मातुश्च परवीरहा ॥१-१६५-२३ (७५३७)
तमापतान्तं संप्रेक्ष्य भीमः प्रहरतां वरः ।
भर्त्सयामास तेजस्वी तिष्ठतिष्ठेति चाब्रवीत् ॥१-१६५-२४ (७५३८)
वैशम्पायन उवाच।१-१६५-२५क्ष् (९६७)
भीमसेनस्तु तं दृष्ट्वा राक्षसं प्रहसन्निव ।
भगिनीं प्रति सङ्क्रुद्धमिदं वचनमब्रवीत् ॥१-१६५-२५ (७५३९)
किं ते हिडिम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्बुद्धे तरसा त्वं नराशन ॥१-१६५-२६ (७५४०)
मय्येव प्रहरैहि त्वं न स्त्रियं हन्तुमर्हसि ।
विशेषतोऽनपकृते परेणापकृते सति ॥१-१६५-२७ (७५४१)

न हीयं स्ववशा बाला कामयत्यद्य मामिह ।
चोदितैषा ह्यनङ्गेन शरीरान्तरचारिणा ॥१-१६५-२८ (७५४२)
भगिनी तव दुर्वृत्त रक्षसां वै यशोहर ।
त्वन्नियोगेन चैवेयं रूपं मम समीक्ष्य च ॥१-१६५-२९ (७५४३)
कामयत्यद्य मां भीरुस्तव नैषापराध्यति ।
अनङ्गेन कृते दोषे नेमां गर्हितुमर्हसि ॥१-१६५-३० (७५४४)
मयि तिष्ठति दुष्टात्मन्न स्त्रियं हन्तुमर्हसि ।
संगच्छस्व मया सार्धमेकेनैको नराशन ॥१-१६५-३१ (७५४५)
अहमेको गमिष्यामि त्वामद्य यमसादनम् ।
अद्य मद्बलनिष्पिष्टं शिरो राक्षस दीर्यताम् ।
कुञ्जरस्येव पादेन विनिष्पिष्टं बलीयसाः ॥ १-१६५-३२ (७५४६)
अद्य गात्राणि ते कङ्काः श्येना गोमायवस्तथा ।
कर्षन्तु भुवि संहृष्टा निहतस्य मया मृधे ॥१-१६५-३३ (७५४७)
क्षणेनाद्य करिष्येऽहमिदं वनमराक्षसम् ।
पुरा यद्दूषितं नित्यं त्वया भक्षयता नरान् ॥१-१६५-३४ (७५४८)
अद्य त्वां भगिनी रक्षः कृष्यमाणं मयाऽसकृत् ।
द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम् ॥१-१६५-३५ (७५४९)
निराबाधास्त्वयि हते मया राक्षसपांसन ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥१-१६५-३६ (७५५०)
हिडिम्ब उवाच।१-१६५-३७क्ष् (९६८)
गर्जितेन वृथा किं ते कत्थितेन च मानुष ।
कृत्वैतत्कर्मणा सर्वं कत्थेया मा चिरं कृथाः ॥१-१६५-३७ (७५५१)
बलिनं मन्यसे यच्चाप्यात्मानं सपराक्रमम् ।
ज्ञास्यस्यद्य समागम्य मयात्मानं बलाधिकम् ॥१-१६५-३८ (७५५२)
न तावदेतान्हिंसिष्ये स्वपन्त्वेते यथासुखम् ।
एष त्वामेव दुर्बुद्धे निहन्म्यद्याप्रियंवदम् ॥१-१६५-३९ (७५५३)
पीत्वा तवासृग्गात्रेभ्यस्ततः पश्चादिमानपि ।
हनिष्यामि ततः पश्चादिमां विप्रियकारिणीम् ॥१-१६५-४० (७५५४)
वैशम्पायन उवाच।१-१६५-४१क्ष् (९६९)
एवमुक्त्वा ततो बाहुं प्रगृह्य पुरुषादकः ।
अभ्यद्रवत संक्रुद्धो भीमसेनमरिन्दमम् ॥१-१६५-४१ (७५५५)
तस्याभिद्रवतस्तूर्णं भीमो भीमपराक्रमः ।
वेगेन प्रहितं बाहुं निजग्राह हसन्निव ॥१-१६५-४२ (७५५६)
निगृह्य तं बलाद्भीमो विस्फुरन्तं चकर्ष ह ।
तस्माद्देशाद्धनूंष्यष्टौ सिंहः क्षुद्रमृगं यथा ॥१-१६५-४३ (७५५७)
ततः स राक्षसः क्रुद्धः पाण्डवेन बलार्दितः ।

भीमसेनं समालिङ्ग्य व्यनदद्भैरवं रवम् ॥१-१६५-४४ (७५५८)
पुनर्भीमो बलादेनं विचकर्ष महाबलः ।
मा शब्दः सुखसुप्तानां भ्रातॄणां मे भवेदिति ॥१-१६५-४५ (७५५९)
ग्हस्ते गृहीत्वा तद्रक्षो दूरमन्यत्र नीतवान् ।
पृच्छे गृहीत्वा तुण्डेन गरुडः पन्नगं यथा ॥' १-१६५-४६ (७५६०)
अन्योन्यं तौ समासाद्य विचकर्षतुरोजसा ।
हिडिम्बो भीमसेनश्च विक्रमं चक्रतुः परम् ॥१-१६५-४७ (७५६१)
बभञ्जतुस्तदा वृक्षाँल्लताश्चाकर्षतुस्तदा ।
मत्ताविव चं संरब्धौ वारणौ षष्टिहायनौ ॥१-१६५-४८ (७५६२)
ग्पादपानुद्धरन्तौ तावूरुवेगेन वेगितौ ।
स्फोटयन्तौ लताजालान्यूरुभ्यां गृह्य सर्वशः ॥१-१६५-४९ (७५६३)
वित्रासयन्तौ तौ शब्दैः सर्वतो मृगपक्षिणः ।
बलेन बलिनौ मत्तावन्योन्यवधकाङ्क्षिणौ ॥१-१६५-५० (७५६४)
भीमराक्षसयोर्युद्धं तदाऽवर्तत दारुणम् ।
पुरा देवासुरे युद्धे वृत्रवासवयोरिव ॥१-१६५-५१ (७५६५)
भङ्क्त्वा वृक्षान्महाशाखांस्ताडयामासतुः क्रुधा ।
सालतालतमालाम्रवटार्जुनविभीतकान् ॥१-१६५-५२ (७५६६)
न्यग्रोधप्लक्षखर्जूरपनसानश्मकण्टकान् ।
एतानन्यान्महावृक्षानुत्खाय तरसाऽखिलान् ॥१-१६५-५३ (७५६७)
उत्क्षिप्यान्योन्यरोषेण ताडयामासतू रणे ।
यदाऽभवद्वनं सर्वं निर्वृक्षं वृक्षसङ्कुलम् ॥१-१६५-५४ (७५६८)
तदा शिलाश्च कुञ्जांश्च वृक्षान्कण्टकिनस्तथा ।
ततस्तौ गिरिशृङ्गाणि पर्वतांश्चाभ्रलेलिहान् ॥१-१६५-५५ (७५६९)
शैलांश्च गण्डपाषाणानुत्खायादाय वैरिणौ ।
चिक्षेपतुरुपर्याजावन्योन्यं विजयेषिणौ ॥१-१६५-५६ (७५७०)
तद्वनं परितः पञ्चयोजनं निर्महीरुहम् ।
निर्लतागुल्मपाषाणं निर्मृगं चक्रतुर्भृशम् ॥१-१६५-५७ (७५७१)
तयोर्युद्धेन राजेन्द्र तद्वनं भीमरक्षसोः ।
मुहूर्तेनाभवत्कूर्मपृष्ठवच्छ्लक्ष्णमव्ययम् ॥१-१६५-५८ (७५७२)
ऊरुबाहुपरिक्लेशात्कर्षन्तावितरेतरम् ।
उत्कर्षन्तौ विकर्षन्तौ प्रकर्षन्तौ परस्परम् ॥१-१६५-५९ (७५७३)
तौ स्वनेन विना राजन्गार्जन्तौ च परस्परम् ।
पाषाणसंघट्टनिभैः प्रहारैरभिजघ्नतुः ॥१-१६५-६० (७५७४)
अन्योन्यं च समालिङ्ग्य विकर्षन्तौ परस्परम् ।
बाहुयुद्धमभूद्धोरं बलिवासवयोरिव ।
युद्धसंरम्भनिर्गच्छत्फूत्काररवनिस्वनम् ॥' १-१६५-६१ (७५७५)

तयोः शब्देन महता विबुद्धास्ते नरर्षभाः ।
सह मात्रा च ददृशुर्हिडिम्बामग्रतःस्थिताम् ॥ ॥१-१६५-६२ (७५७६)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
पञ्चषष्ट्यधिकशततमोऽध्यायः ॥१६५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६५-२ मेघसंघातवर्ष्मा अतिकृष्णशरीरः ॥
१-१६५-३२ गमिष्यामि गमयिष्यामि ॥
१-१६५-५४ निर्वृक्षं अकण्टकवृक्षरहितम् ॥
पञ्चषष्ट्यधिकशततमोऽध्यायः ॥
१६५ ॥

आदिपर्व - अध्याय १६६
॥ श्रीः ॥
१.१६६. अध्यायः १६६

Mahabharata - Adi Parva - Chapter Topics
कुन्तीहिडिम्बासंवादः ॥१ ॥
हिडिम्बावार्तया भीमं हिडिम्बेन युद्ध्यमानं ज्ञातवतां कुन्त्यादीनां
तत्र गमनम् ॥२ ॥
हिडिम्बवधः ॥३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६६-० (७५७७)
वैशम्पायन उवाच।१-१६६-०क्ष् (९७०)
प्रबुद्धास्ते हिडिम्बाया रूपं दृष्ट्वातिमानुषम् ।
विस्मिताः पुरुषव्याघ्रा बभूवुः पृथया सह ॥१-१६६-१ (७५७८)
ततः कुन्ती समीक्ष्यैनां विस्मिता रूपसंपदा ।
उवाच मधुरं वाक्यं सान्त्वपूर्वमिदं शैनः ॥१-१६६-२ (७५७९)
कस्य त्वं सुरगर्भाभे कावाऽसि वरवर्णिनि ।
केन कार्येण संप्राप्ता कुतश्चागमनं तव ॥१-१६६-३ (७५८०)
यदि वाऽस्य वनस्य त्वं देवता यदि वाऽप्सराः ।
आचक्ष्व मम तत्सर्वं किमर्थं चेह तिष्ठसि ॥१-१६६-४ (७५८१)
हिडिम्बोवाच।१-१६६-५क्ष् (९७१)
यदेतत्पश्यसि वनं नीलमेघनिं महत् ।

निवासो राक्षसस्यैष हिडिम्बस्य ममैव च ॥ १-१६६-५ (७५८२)
तस्य मां राक्षसेन्द्रस्य भगिनीं विद्धि भामिनि ।
भ्रात्रा संप्रेषितामार्ये त्वां सपुत्रां जिघांसता ॥ १-१६६-६ (७५८३)
क्रूरबुद्धेरहं तस्य वचनादागता त्विह ।
अद्राक्षं नवहेमाभं तव पुत्रं महाबलम् ॥ १-१६६-७ (७५८४)
ततोऽहं सर्वभूतानां भावे विचरता शुभे ।
चोदिता तव पुत्रार्थं मन्मथेन वशानुगा ॥ १-१६६-८ (७५८५)
ततो वृतो मया भर्ता तव पुत्रो महाबलः ।
अपनेतुं च यतितो न चैव शकितो मया ॥ १-१६६-९ (७५८६)
चिरायमाणां मां ज्ञात्वा ततः स पुरुषादकः ।
स्वयमेवागतो हन्तुमिमान्सर्वांस्तवात्मजान् ॥ १-१६६-१० (७५८७)
स तेन मम कान्तेन तव पुत्रेण धीमता ।
बलादितो विनिष्पिष्य व्यपनीतो महात्मना ॥ १-१६६-११ (७५८८)
विकर्षन्तौ महावेगौ गर्जमानौ परस्परम् ।
पश्यैवं युधि विक्रान्तावेतौ च नरराक्षसौ ॥ १-१६६-१२ (७५८९)
वैशम्पायन उवाच। १-१६६-१३क्ष् (९७२)
तस्याः श्रुत्वैव वचनमुत्पपात युधिष्ठिरः ।
अर्जुनो नकुलश्चैव सहदेवश्च वीर्यवान् ॥ १-१६६-१३ (७५९०)
तौ ते ददृशुरासक्तौ विकर्षन्तौ परस्परम् ।
काङ्क्षमाणौ जयं चैव सिंहाविव बलोत्कटौ ॥ १-१६६-१४ (७५९१)
अथान्योन्यं समाश्लिष्य विकर्षन्तौ पुनःपुनः ।
दावाग्निधूमसदृशं चक्रतुः पार्थिवं रजः ॥ १-१६६-१५ (७५९२)
वसुधारेणुसंवीतौ वसुधाधरसन्निभौ ।
बभ्राजतुर्यथा शैलौ नीहारेणाभिसंवृतौ ॥ १-१६६-१६ (७५९३)
राक्षसेन तदा भीमं क्लिश्यमानं निरीक्ष्य च ।
उवाचेदं वचः पार्थः प्रहसञ्छनकैरिव ॥ १-१६६-१७ (७५९४)
भीम माभैर्महाबाहो न त्वां बुध्यामहे वयम् ।
समेतं भीमरूपेण रक्षसा श्रमकर्शिताः ॥ १-१६६-१८ (७५९५)
साहाय्येऽस्मि स्थितः पार्थ पातयिष्यामि राक्षसम् ।
नकुलः सहदेवश्च मातरं गोपयिष्यतः ॥ १-१६६-१९ (७५९६)
भीम उवाच। १-१६६-२०क्ष् (९७३)
उदासीनो निरीक्षस्व न कार्यः संभ्रमस्त्वया ।
न जात्वयं पुनर्जीवेन्मद्बाह्वन्तरमागतः ॥ १-१६६-२० (७५९७)
ग्भुजयोरन्तरं प्राप्तो भीमसेनस्य राक्षसः ।
अमृत्वा पार्थवीर्येण मृतो मा भूदिति ध्वनिः ॥ १-१६६-२१ (७५९८)
अयमस्मांस्तु नो हन्याज्जातु पार्थ राक्षसः ।

जीवन्तं न प्रमोक्ष्यामि मा भैषीर्भरतर्षभ ॥' १-१६६-२२ (७५९९)
अर्जुन उवाच। १-१६६-२३क्ष् (९७४)
'पूर्वरात्रे प्रयुक्तोऽसि भीम क्रूरेण रक्षसा ।
क्षपा व्युष्टा न चेदानीं समाप्तोसीन्महारणः ॥' १-१६६-२३ (७६००)
किमेनन चिरं भीम जीवता पापरक्षसा ।
गन्तव्ये न चिरं स्थातुमिह शक्यमरिन्दम ॥ १-१६६-२४ (७६०१)
पुरा संरज्यते प्राची पुरा सन्ध्या प्रवर्तते ।
रौद्रे मुहूर्ते रक्षांसि प्रबलानि भवन्त्युत ॥ १-१६६-२५ (७६०२)
त्वरस्व भीम मा क्रीड जहि रक्षो विभीषणम् ।
पुरा विकुरुते मायां भुजयोः सारमर्पय ॥ १-१६६-२६ (७६०३)
'माहात्म्यमात्मनो वेत्थ नराणां हितकाम्यया ।
रक्षो जहि यथा शक्रः पुरा वृत्रं महाबलम् ॥ १-१६६-२७ (७६०४)
अथवा मन्यसे भारं त्वमिमं राक्षसं युधि ।
आतिष्ठे तव साहाय्यं शीघ्रमेव तु हन्यताम् ॥ १-१६६-२८ (७६०५)
अथवा त्वहमेवैनं हनिष्यामि वृकोदर ।
कृतकर्मा परिश्रान्तः साधु तावदुपारम ॥' १-१६६-२९ (७६०६)
वैशम्पायन उवाच। १-१६६-३०क्ष् (९७५)
अर्जुनेनैवमुक्तस्तु भीमो रोषाज्ज्वलन्निव ।
बलमाहारयामास यद्वायोर्जगतः क्षये ॥ १-१६६-३० (७६०७)
ततस्तस्याम्बुदाभस्य भीमो रोषात्तु रक्षसः ।
अत्क्षिप्याभ्रामयद्देहं तूर्णं शतगुणं तदा ॥ १-१६६-३१ (७६०८)
'इति चोवाच संक्रुद्धो भ्रामयन्राक्षसीं तनुम् ।
भीमसेनो महाबाहुरभिगर्जन्मुहुर्मुहुः ॥' १-१६६-३२ (७६०९)
भीम उवाच। १-१६६-३३क्ष् (९७६)
नरमांसैर्वृथा पुष्टो वृथा वृद्धो वृथामतिः ।
वृथामरणमर्हस्त्वं वृथाद्य न भविष्यसि ॥ १-१६६-३३ (७६१०)
क्षेममद्य करिष्यामि यथा वनमकण्टकम् ।
न पुनर्मानुषान्हत्वा भक्षयिष्यसि राक्षस ॥ १-१६६-३४ (७६११)
वैशम्पायन उवाच। १-१६६-३५क्ष् (९७७)
इत्युक्त्वा भीमसेनस्तं निष्पिष्य धरणीतले ।
बाहुभ्यामवपीड्याशु पशुमारममारयत् ॥ १-१६६-३५ (७६१२)
स मार्यमाणो भीमेन ननाद विपुलं स्वनम् ।
पूरयंस्तद्वनं सर्वं जलार्द्रे इव दुन्दुभिः ॥ १-१६६-३६ (७६१३)
बाहुभ्यां योक्त्रयित्वा तं बलवान्पाण्डुनन्दनः ।
'समुद्भ्राम्य शिरश्चास्य सग्रीवं तदपाहरत् ॥ १-१६६-३७ (७६१४)
ततो भित्त्वा शिरश्चास्य सग्रीवं तदुदाक्षिपत् ।

तस्य निष्कर्णनयनं निर्जिह्वं रुधिरोक्षितम् ॥ १-१६६-३८ (७६१५)
प्राविद्धं भीमसेनेन शिरो विदशनं बभौ ।
प्रसारितभुजोद्धृष्टो भिन्नमांसत्वगन्तरः ॥ १-१६६-३९ (७६१६)
कबन्धभूतस्तत्रासीद्धनुर्वज्रहतो तथा ।
हिडिम्बं निहतं दृष्ट्वा संहृष्टास्ते तरस्विनः ॥ १-१६६-४० (७६१७)
हिडिम्बा सा च संप्रेक्ष्य निहतं राक्षसं रणे ।
अदृश्याश्चैव ये स्वस्स्थाः समेताः सर्षिचारणाः ॥ १-१६६-४१ (७६१८)
पूजयन्ति स्म तं हृष्टाः साधुसाध्विति पाण्डवम् ।
भ्रातरश्चापि संहृष्टा युधिष्ठिरपुरोगमाः ॥ १-१६६-४२ (७६१९)
अपूजयन्नरव्याघ्रं भीमसेनमरिन्दमम् ।'
अभिपूज्य महात्मानं भीमं भीमपराक्रमम् ।
पुनरेवार्जुनो वाक्यमुवाचेदं वृकोदरम् ॥ १-१६६-४३ (७६२०)
अदूरे नगरं मन्ये वनादस्मादहं विभो ।
शीघ्रं गच्छाम भद्रं ते न नो विद्यात्सुयोधनः ॥ १-१६६-४४ (७६२१)
ततः सर्वे तथेत्युक्त्वा मात्रा सह महारथाः ।
प्रययुः पुरुषव्याघ्रा हिडिम्बा चैव राक्षसी ॥ ॥ १-१६६-४५ (७६२२)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वमि
षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६६-८ भावे चित्ते ॥
१-१६६-११ व्यपनीतो दूरे नीतः ॥
१-१६६-२१ इतिध्वनिर्माभूदिति संबन्धः ॥
१-१६६-२४ गन्तव्ये सति चिरं स्थातुं न शक्यम् ॥
१-१६६-२८ अथवेति द्वयं प्रोत्साहनार्थं ॥
१-१६६-३३ वृथामरणं स्वर्गाद्यप्रयोजकं मरणम् ॥
षट्षष्ट्यधिकशततमोऽध्यायः ॥
१६६ ॥

आदिपर्व - अध्याय १६७
॥ श्रीः ॥
१.१६७. अध्यायः १६७

Mahabharata - Adi Parva - Chapter Topics
हिडिम्बावधे प्रवृत्तस्य भीमस्य युधिष्ठिरकृतं निवारणं ॥ १ ॥
हिडिम्बया स्वस्य धर्मज्ञत्वस्य भविष्यज्ज्ञत्वस्य च प्रकटनम् ॥ २ ॥

हिडिम्बाया धर्मिष्ठतां ज्ञात्वा तदङ्गीकरणे भीमं प्रति कुन्त्या आज्ञा ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६७-० (७६२३)
वैशम्पायन उवाच। १-१६७-०क्ष् (९७८)
सा तानेवापतत्तूर्णं भगिनी तस्य रक्षसः ।
अब्रुवाणा हिडिम्बा तु राक्षसी पाण्डवान्प्रति ॥ १-१६७-१ (७६२४)
अभिवाद्य ततः कुन्तीं धर्मराजं च पाण्डवम् ।
अभिपूज्य ततः सर्वान्भीमसेनमभाषत ॥ १-१६७-२ (७६२५)
अहं ते दर्शादेव मन्मथस्य वशं गता ।
क्रूरं भ्रातृवचो हित्वा सा त्वामेवानिरुन्धती ॥ १-१६७-३ (७६२६)
राक्षसे रौद्रसङ्काशे तवापश्यं विचेष्टितम् ।
अहं शुश्रूषुरिच्छेयं तव गात्रं निषेवितुम् ॥' १-१६७-४ (७६२७)
भीमसेन उवाच। १-१६७-५क्ष् (९७९)
स्मरन्ति वैरं रक्षांसि मायामाश्रित्य मोहिनीम् ।
हिडिम्बे व्रज पन्थानं त्वमिमं भ्रातृसेवितम् ॥ १-१६७-५ (७६२८)
युधिष्ठिर उवाच। १-१६७-६क्ष् (९८०)
क्रुद्धोऽपि पुरुषव्याघ्र भीम मा स्म स्त्रियं वधीः ।
शरीरगुप्त्यभ्यधिकं धर्मं गोपाय पाण्डव ॥ १-१६७-६ (७६२९)
वधाभिप्रायमायान्तमवधीस्त्वं महाबलम् ।
रक्षसस्तस्य भगिनी किं नः क्रुद्धा करिष्यति ॥ १-१६७-७ (७६३०)
वैशम्पायन उवाच। १-१६७-८क्ष् (९८१)
हिडिम्बा तु ततः कुन्तीमभिवाद्य कृताञ्जलिः ।
युधिष्ठिरं तु कौन्तेयमिदं वचनमब्रवीत् ॥ १-१६७-८ (७६३१)
आर्ये जानासि यद्दुःखमिह स्त्रीणामनङ्गजम् ।
तदिदं मामनुप्राप्तं भीमसेनकृते शुभे ॥ १-१६७-९ (७६३२)
सोढं तत्परमं दुःखं मया कालप्रतीक्षया ।
सोऽयमभ्यागतः कालो भविता मे सुखोदयः ॥ १-१६७-१० (७६३३)
मया ह्युत्सृज्य सुहृदः स्वधर्मं स्वजनं तथा ।
वृतोऽयं पुरुषव्याघ्रस्तव पुत्रः पतिः शुभे ॥ १-१६७-११ (७६३४)
वीरेणाऽहं तथाऽनेन त्वया चापि यशस्विनी ।
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥ १-१६७-१२ (७६३५)
यदर्हसि कृपां कर्तुं मयि त्वं वरवर्णिनि ।
मत्वा मूढेति तन्मां त्वं भक्ता वाऽनुगतेति वा ॥ १-१६७-१३ (७६३६)

भर्त्राऽनेन महाभागे संयोजय सुतेन ह ।
समुपादाय गच्छेयं यथेष्टं देवरूपिणम् ।
पुनश्चैवानयिष्यामि विस्रम्भं कुरु मे शुभे ॥ १-१६७-१४ (७६३७)
ग्अहं हि समये लप्स्ये प्राग्भ्रातुरपर्वजनात् ।
ततः सोऽभ्यपतद्रात्रौ भीमसेनजिघांसया ॥ १-१६७-१५ (७६३८)
यथायथा विक्रमते यथारिमधितिष्ठति ।
तथातथा समासाद्य पाण्डवं काममोहिता ॥ १-१६७-१६ (७६३९)
न यातुधान्यहं त्वार्ये न चास्मि रजनीचरी ।
ईशा रक्षस्स्वसा ह्यस्मि राज्ञि सालकटङ्कटी ॥ १-१६७-१७ (७६४०)
पुत्रेण तव संयुक्ता युवतिर्देववर्णिनी ।
सर्वान्वोऽहमुपस्थास्ये पुरस्कृत्य वृकोदरम् ॥ १-१६७-१८ (७६४१)
अप्रमत्ता प्रमत्तेषु शुश्रूषुरसकृत्त्वहम् ।'
वृजिने तारयिष्यामि दासीवच्च नरर्षभाः ॥ १-१६७-१९ (७६४२)
पृष्ठेन वो वहिष्यामि विमानं सुकृतानिव ।
यूयं प्रसादं कुरुत भीमसेनो भजेत माम् ॥ १-१६७-२० (७६४३)
ग्एवं ब्रुवन्ती ह तथा प्रत्याख्याता क्रियां प्रति ।
भूम्यां दुष्कृतिनो लोकान्गमिष्येऽहं न संशयः ॥ १-१६७-२१ (७६४४)
अहं हि मनसा ध्यात्वा सर्वं वेत्स्यामि सर्वदा ।'
आपन्निस्तरणे प्राणान्धारयिष्ये न केनचित् ॥ १-१६७-२२ (७६४५)
सर्वमावृत्य कर्तव्यं धर्मं समनुपश्यता ।
आपत्सु यो धारयति स वै धर्मविदुत्तमः ॥ १-१६७-२३ (७६४६)
व्यसनं ह्येव धर्मस्य धर्मिणामापदुच्यते ।
पुम्यात्प्राणान्धारयति पुण्यं वै प्राणधारणम् ॥ १-१६७-२४ (७६४७)
येन केनाचरेद्धर्मं तस्मिन्गार्हा न विद्यते ।
ग्महतोऽत्र स्त्रियं कामाद्बाधितां त्राहि मामपि ॥ १-१६७-२५ (७६४८)
धर्मार्थकाममोक्षेषु दयां कुर्वन्ति साधवः ।
तत्तु धर्ममिति प्राहुर्मुनयो धर्मवत्सलाः ॥ १-१६७-२६ (७६४९)
दिव्यज्ञानेन जानामि व्यतीतानागतानहम् ।
तस्माद्वक्ष्यामि वः श्रेय आसन्नं सर उत्तमम् ॥ १-१६७-२७ (७६५०)
अद्यासाद्य सरः स्नात्वा विश्रम्य च वनस्पतौ ।
श्वः प्रभाते महद्भूतं प्रादुर्भूतं जगत्पतिम् ॥ १-१६७-२८ (७६५१)
व्यासं कमलपत्राक्षं दृष्ट्वा शोकं विहास्यथ ।
धार्तराष्ट्राद्विवासं च दहनं वारणावते ॥ १-१६७-२९ (७६५२)
त्राणं च विदुरात्तुभ्यं विदितं ज्ञानचक्षुषा ।
आवासे शालिहोत्रस्य स वो वासं विधास्यति ॥ १-१६७-३० (७६५३)
वर्षवातातपसहो ह्ययं पुण्यो वनस्पतिः ।

पीतमात्रे तु पानीये क्षुत्पिपासे विनश्यतः ॥१-१६७-३१ (७६५४)
तपसा शालिहोत्रेण सरो वृक्षश्च निर्मितः ।
कादम्बाः सारसा हंसाः कुरर्यः कुररैः सह ॥१-१६७-३२ (७६५५)
रुवन्ति मधुरं गीतं गान्धर्वस्वनमिश्रितम्। १-१६७-३३ (७६५६)
वैशम्पायन उवाच ।
तस्यास्तद्वचनं श्रुत्वा कुन्ती वचनमब्रवीत् ॥ १-१६७-३३क्ष् (९८२)
युधिष्ठिरं महाप्राज्ञं सर्वधर्मविशारदम्। १-१६७-३४ (७६५७)
कुन्त्युवाच ।
त्वं हि धर्मभृतां श्रेष्ठो मयोक्तं शृणु भारत ॥ १-१६७-३४क्ष् (९८३)
राक्षस्येषा हि वाक्येन धर्मं वदति साधु वै ।
भावेन दुष्टा भीमं वै किं करिष्यति राक्षसी ॥१-१६७-३५ (७६५८)
भजतां पाण्डवं वीरमपत्यार्थं यदीच्छसि।' १-१६७-३६ (७६५९)
युधिष्ठिर उवाच ।
एवमेतद्यथाऽऽत्थ त्वं हिडिम्बे नात्र संशयः ॥ १-१६७-३६क्ष् (९८४)
स्थातव्यं तु त्वया धर्मे यथा ब्रूयां सुमध्यमे ।
गनित्यं कृताह्निका स्नाता कृतशौचा सुरूपिणी ॥' १-१६७-३७ (७६६०)
स्नातं कृताह्निकं भद्रे कृतकौतुकमङ्गलम् ।
भीमसेनं भजेथास्त्वमुदिते वै दिवाकरे ॥१-१६७-३८ (७६६१)
अहस्सु विहरानेन यथाकामं मनोजवा ।
अयं त्वानयितव्यस्ते भीमसेनः सदा निशि ॥१-१६७-३९ (७६६२)
प्राक्सन्ध्यातो विमोक्तव्यो रक्षितव्यश्च नित्यशः ।
एवं रमस्व भीमेन यावद्गर्भस्य वेदनम् ॥१-१६७-४० (७६६३)
एष ते समयो भद्रे शुश्रूषा चाप्रमत्तया ।
नित्यानुकूलया भूत्वा कर्तव्यं शोभनं त्वया ॥ ॥१-१६७-४१ (७६६४)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥१६७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६७-५ भ्रातृसेवितं पन्थानं मृत्युम् ॥
सप्तषष्ट्यधिकशततमोऽध्यायः ॥
१६७ ॥

आदिपर्व - अध्याय १६८
॥ श्रीः ॥
१.१६८. अध्यायः १६८

Mahabharata - Adi Parva - Chapter Topics
हिडिम्बया सह पाण्डवानां शालिहोत्रसरोगमनम् ॥ १ ॥
शालिहोत्रेण तेषामातिथ्यकरणम् ॥ २ ॥
समयकरणपूर्वकं भीमेन हिडिम्ब्याः परिग्रहः ॥ ३ ॥
रमणीयेषु प्रदेशेषु भीमेन सह क्रीडित्वा सायाह्ने शालिहोत्राश्रमं प्रति हिडिम्ब्या निवर्तनम् ॥ ४ ॥
तत्र व्यासागमनम् ॥ ५ ॥
व्यासेन कुन्त्या आश्वासनम् ॥ ६ ॥
व्यासस्य प्रतिनिवर्तनम् ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६८-० (७६६५)
वैशम्पायन उवाच। १-१६८-०क्ष् (९८५)
युधिष्ठिरवचः श्रुत्वा कुन्तीमङ्केऽधिरोप्य सा ।
भीमार्जुनान्तरगता यमाभ्यां च पुरस्कृता ॥ १-१६८-१ (७६६६)
तिर्यग्युधिष्ठिरे याति हिडिम्बा भीमगामिनी ।
शालिहोत्रसरो रम्यमाससाद जलार्थिनी ॥ १-१६८-२ (७६६७)
वनस्पतितलं गत्वा परिमृज्य गृहं यथा ।
पाण्डवानां च वासं सा कृत्वा पर्णमयं तथा ॥ १-१६८-३ (७६६८)
आत्मनश्च तथा कुन्त्या एकोद्देशे चकार सा ।
पाण्डवास्तु ततः स्नात्वा शुद्धाः सन्ध्यामुपास्य च ॥ १-१६८-४ (७६६९)
तृषिताः क्षुत्पिपासार्ता जलमात्रेण वर्तयन् ।
शालिहोत्रस्ततो ज्ञात्वा क्षुधार्तान्पाण्डवांस्तदा ॥ १-१६८-५ (७६७०)
मनसा चिन्तयामास पानीयं भोजनं महत् ।
ततस्ते पाण्डवाः सर्वे विश्रान्ताः पृथया सह ॥ १-१६८-६ (७६७१)
यथा जतुगृहे वृत्तं राक्षसेन कृतं च यत् ।
कृत्वा कथा बहुविधाः कथान्ते पाण्डुनन्दनम् ॥ १-१६८-७ (७६७२)
कुन्ती राजसुता वाक्यं भीमसेनमथाब्रवीत् ।
यथा पाण्डुस्तथा मान्यस्तव ज्येष्ठो युधिष्ठिरः ॥ १-१६८-८ (७६७३)
अहं धर्मविदाऽनेन मान्या गुरुतरा तव ।
तस्मात्पाण्डुहितार्थं मे युवराज हितं कुरु ॥ १-१६८-९ (७६७४)
निकृता धार्तराष्ट्रेण पापेनाकृतबुद्धिना ।
दुष्कृतस्य प्रतीकारं न पश्यामि वृकोदर ॥ १-१६८-१० (७६७५)
तस्मात्कतिपयाहेन योगक्षेमं भविष्यति ।
क्षेमं दुर्गमिमं वासं वत्स्याम हि यथा वयम् ॥ १-१६८-११ (७६७६)

इदमन्यन्महदुःखं धर्मकृच्छ्रं वृकोदर ।
दृष्ट्वैव त्वां महाप्राज्ञ अनङ्गाभिप्रचोदिता ॥ १-१६८-१२ (७६७७)
युधिष्ठिरं च मां चैव वरयामास धर्मतः ।
धर्मार्थं देहि पुत्रं त्वं स नः श्रेयः करिष्यति ॥ १-१६८-१३ (७६७८)
प्रतिवाक्यं तु नेच्छामि आवयोर्वचनं कुरु। १-१६८-१४ (७६७९)
वैशम्पायन उवाच ।
तथेति तत्प्रतिज्ञाय भीमसेनोऽब्रवीदिदम् ॥ १-१६८-१४क्ष् (९८६)
शासनं ते करिष्यामि वेदशासनमित्यपि ।
समक्षं भ्रातृमध्ये तु तां चोवाच स राक्षसीम् ॥ १-१६८-१५ (७६८०)
शृणु राक्षसि सत्येन समयं ते वदाम्यहम्।'
यावत्कालेन भवति पुत्रस्योत्पादनं शुभे ॥ १-१६८-१६ (७६८१)
तावत्कालं चरिष्यामि त्वया सह सुमध्यमे ।
ग्विशेषतो मत्सकाशे मा प्रकाशय नीचताम् ॥ १-१६८-१७ (७६८२)
उत्तमस्त्रीगुणोपेता भजेथा वरवर्णिनि। १-१६८-१८ (७६८३)
वैशम्पायन उवाच ।
सा तथेति प्रतिज्ञाय हिडिम्बा राक्षसी तथा ॥ १-१६८-१८क्ष् (९८७)
गताऽहनि निवेशेषु भोज्यं राजार्हमानयत् ।
सा कदाचिद्विहारार्थं हिडिम्बा कामरूपिणी ॥ १-१६८-१९ (७६८४)
भीमसेनमुपादाय ऊर्ध्वमाचक्रमं तदा ।
शैलशृङ्गेषु रम्येषु देवतायतनेषु च ॥ १-१६८-२० (७६८५)
मृगपक्षिविघृष्टेषु रमणीयेषु सर्वेषु ।
कृत्वा सा परमं रूपं सर्वाभरणभूषिता ॥ १-१६८-२१ (७६८६)
संजल्पन्ती सुमधुरं रमयामास पाण्डवम् ।
तथैव वनदुर्गेषु पर्वतद्रुमसानुषु ॥ १-१६८-२२ (७६८७)
सरस्तु रमणीयेषु पद्मोत्पलवनेषु च ।
नदीद्वीपप्रदेशेषु वैडूर्यसिकतेषु च ॥ १-१६८-२३ (७६८८)
देवारण्येषु पुण्येषु तथा पर्वतसानुषु ।
सुतीर्थवनतोयासु तथा गिरिनदीषु च ॥ १-१६८-२४ (७६८९)
सागरस्य प्रदेशेषु भणिहेमयुतेषु च ।
गुह्यकानां निवासेषु कुलपर्वतसानुषु ॥ १-१६८-२५ (७६९०)
सर्वर्तुफलवृक्षेषु मानसेषु वनेषु च ।
बिभ्रती परमं रूपं रमयामास पाण्डवम् ॥ १-१६८-२६ (७६९१)
ग्यथा सुमोदते स्वर्गे सुकृत्यप्सरसा सह ।
सुतरां परमप्रीतस्तथा रेमे महाद्युतिः ॥ १-१६८-२७ (७६९२)
शुभं हि जघनं तस्याः सवर्णमणिमेखलम् ।
न ततर्प तदा मृद्नन्भीमसेनो मुहुर्मुहुः ॥' १-१६८-२८ (७६९३)

रमयन्ती ततो भीमं तत्रतत्र मनोजवा ।
सा रेमे तेन संहर्षात्तृप्यन्ती च मुहुर्मुहुः ॥ १-१६८-२९ (७६९४)
अहस्सु रमयन्ती सा निशाकालेषु पाण्डवम् ।
आनीय वै स्वके गेहे दर्शयामास मातरम् ॥ १-१६८-३० (७६९५)
भ्रातृभिः सहितो नित्यं स्वपते पाण्डवस्तथा ।
कुन्त्याः परिचरन्ती सा तस्याः पार्श्वेवसन्निशां ॥ १-१६८-३१ (७६९६)
कामांश्च मुखवासादीनानयिष्यति भोजनम् ।
तस्यां रात्र्यां व्यतीतायामाजगाम महाव्रतः ॥ १-१६८-३२ (७६९७)
पाराशर्यो महाप्राज्ञो दिव्यदर्शी महातपाः ।
तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं शुभम् ।
तस्थुः प्राञ्जलयः सर्वे सस्नुषा चैव माधवी ॥ १-१६८-३३ (७६९८)
श्रीव्यास उवाच। १-१६८-३४क्ष् (९८८)
मयेदं मनसा पूर्वं विदितं भरतर्षभाः ।
यथा स्थितैरधर्मेण धार्तराष्ट्रैर्विवासिताः ॥ १-१६८-३४ (७६९९)
तद्विदित्वाऽस्मि संप्राप्तश्चिकीर्षुः परं हितम् ।
न विषादो हि वः कार्यः सर्वमेतत्सुखाय वः ॥ १-१६८-३५ (७७००)
सुहृद्वियोजनं कर्म पुराकृतमरिन्दमाः ।
तस्य सिद्धिरियं प्राप्ता मा शोचत परन्तपाः ॥ १-१६८-३६ (७७०१)
समाप्ते दुष्कृते चैव यूयं ते वै न संशयः ।
स्वराष्ट्रे विहरिष्यन्तो भविष्यथ सबान्धवाः ॥ १-१६८-३७ (७७०२)
दीनतो बालतश्चैव स्नेहं कुर्वन्ति बान्धवाः ।
तस्मादभ्यधिकः स्नेहो युष्मासु मम संप्रति ॥ १-१६८-३८ (७७०३)
स्नेहपूर्वं चिकीर्षामि हितं यत्तन्निबोधत ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥ १-१६८-३९ (७७०४)
एतद्वै शालिहोत्रस्य तपसा निर्मितं सरः ।
रमणीयमिदं तोयं क्षुत्पिपासाश्रमापहम् ॥ १-१६८-४० (७७०५)
कार्यार्थिनस्तु षण्मासान्विहरध्वं यथासुखम् ॥ १-१६८-४१ (७७०६)
वैशम्पायन उवाच। १-१६८-४२क्ष् (९८९)
एवं स तान्समाश्वास्य व्यासः पार्थानरिन्दमान् ।
स्नेहाच्च संपरिष्वज्य कुन्तीमाश्वासयत्प्रभुः ॥ १-१६८-४२ (७७०७)
स्नुषे मा रोद मा रोदेत्येवं व्यासोऽब्रवीद्वचः ।
जीवपुत्रे सुतस्तेऽयं धर्मनित्यो युधिष्ठिरः ॥ १-१६८-४३ (७७०८)
पृथिव्यां पार्थइवान्सर्वान्प्रशासिष्यति धर्मराट् ।
धर्मेण जित्वा पृथिवीमखिलां धर्मकृद्वशी ॥ १-१६८-४४ (७७०९)
स्थापयित्वा वशे सर्वां सपर्वतवनां शुभाम् ।
भीमसेनार्जुनबलाद्भोक्ष्यत्यत्ययमसंशयम् ॥ १-१६८-४५ (७७१०)

पुत्रास्तव च माद्रयाश्च पञ्चैते लोकविश्रुताः ।
स्वराष्ट्रे विहरिष्यन्ति सुखं सुमनसस्तदा ॥ १-१६८-४६ (७७११)
यक्ष्यन्ति च नरव्याघ्रा विजित्य पृथिवीमिमाम् ।
राजसूयाश्वमेधाद्यैः क्रतुभिर्भूरिदक्षिणैः ॥ १-१६८-४७ (७७१२)
अनुगृह्य सुहृद्वर्गं धनेन च सुखेन च ।
पितृपैतामहं राज्यमहारिष्यन्ति ते सुताः ॥ १-१६८-४८ (७७१३)
स्नुषा कमलपत्राक्षी नाम्ना कमलपालिका ।
वशवर्तिनी तु भीमस्य पुत्रमेषा जनिष्यति ॥ १-१६८-४९ (७७१४)
तेन पुत्रेण कृच्छ्रेषु भविष्यथ च तारिताः ।
इह मासं प्रतीक्षध्वमागमिष्याम्यहं पुनः ॥ १-१६८-५० (७७१५)
देशकालौ विदित्वैवं यास्यध्वं परमां मुदम् ॥ १-१६८-५१ (७७१६)
वैशम्पायन उवाच। १-१६८-५२क्ष् (९९०)
स तैः प्राञ्जलिभिः सर्वैस्तथेत्युक्तो जनाधिप ।
जगाम भगवान्व्यासो यथागतमृषिः प्रभुः ॥ ॥ १-१६८-५२ (७७१७)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६८-३८ दीनतो बालत इति द्वयं भावप्रधानम् ॥
अष्टषष्ट्युत्तरशततमोऽध्यायः ॥
१६८ ॥

आदिपर्व - अध्याय १६९
॥ श्रीः ॥
१.१६९. अध्यायः १६९

Mahabharata - Adi Parva - Chapter Topics
घटोत्कचोत्पत्तिः ॥ १ ॥
स्मृतिमात्रादागच्छाव इत्युक्त्वा हिडिम्बाघटोत्कचयोर्गमनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१६९-० (७७१८)
वैशम्पायन उवाच। १-१६९-०क्ष् (९९१)
गते भगवति व्यासे पाण्डवा विगतज्वराः ।
ऊषुस्तत्र च षण्मासान्वटवृक्षे यथासुखम् ॥ १-१६९-१ (७७१९)

शाकमूलफलाहारास्तपः कुर्वन्ति पाण्डवाः ।
अनुज्ञाता महाराज ततः कमलपालिका ॥ १-१६९-२ (७७२०)
रमयन्ती सदा भीमं तत्रतत्र मनोजवा ।
दिव्याभरणवस्त्रा हि दिव्यस्रगनुलेपना ॥ १-१६९-३ (७७२१)
एवं भ्रातॄन्सप्त मासान्हिडिम्बाऽवासयद्वने ।
पाण्डवान्भीमसेनार्थे राक्षसी कामरूपिणी ॥ १-१६९-४ (७७२२)
सुखं स विहरन्भीमस्तत्कालं पर्यणामयत् ।
ततोऽलभत सा गर्भं राक्षसी कामरूपिणी ॥ १-१६९-५ (७७२३)
अतृप्ता भीमसेनेन सप्तमासोपसंगता।'
प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलात् ॥ १-१६९-६ (७७२४)
विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम् ।
भीमरूपं सुताम्राक्षं तीक्ष्णदंष्ट्रं महारथम् ॥ १-१६९-७ (७७२५)
महेष्वासं महावीर्यं महासत्वं महाजवम् ।
महाकायं महाकालं महाग्रीवं महाभुजम् ॥ १-१६९-८ (७७२६)
अमानुषं मानुषजं भीमवेगमरिन्दमम् ।
पिशाचकानतीत्यान्यान्बभूवाति स मानुषान् ॥ १-१६९-९ (७७२७)
बालोऽपि विक्रमं प्राप्तो मानुषेषु विशांपते ।
सर्वास्त्रेषु वरो वीरः प्रकाममभवद्बली ॥ १-१६९-१० (७७२८)
सद्यो हि गर्भं राक्षस्यो लभन्ते प्रसवन्ति च ।
कामरूपधराश्चैव भवन्ति बहुरूपिकाः ॥ १-१६९-११ (७७२९)
प्रणम्य विकचः पादावगृह्णात्स पितुस्तदा ।
मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः ॥ १-१६९-१२ (७७३०)
घटोहास्योत्कच इति माता तं प्रत्यभाषत ।
अभवत्तेन नामास्य घटोत्कच इति स्म ह ॥ १-१६९-१३ (७७३१)
अनुरक्तश्च तानासीत्पाण्डवान्स घटोत्कचः ।
तेषां च दयितो नित्यमात्मनित्यो बभूव ह ॥ १-१६९-१४ (७७३२)
घटोत्कचो महाकायः पाण्डवान्पृथया सह ।
अभिवाद्य यथान्यायमब्रवीच्च प्रभाष्य तान् ॥ १-१६९-१५ (७७३३)
किं करोम्यहमार्याणां निःशङ्कं वदतानघाः ।
तं ब्रुवन्तं भैमसेनिं कुन्ती वचनमब्रवीत् ॥ १-१६९-१६ (७७३४)
त्वं कुरूणां कुले जातः साक्षाद्भीमसमो ह्यसि ।
ज्येष्ठः पुत्रोसि पञ्चानां साहाय्यं कुरु पुत्रक ॥ १-१६९-१७ (७७३५)
वैशम्पायन उवाच। १-१६९-१८क्ष् (९९२)
पृथयाप्येवमुक्तस्तु प्रणम्यैव वचोऽब्रवीत् ।
यथा हि रावणो लोके इन्द्रजिच्च महाबलः ।
वर्ष्मवीर्यसमो लोके विशिष्टश्चाभवं नृषु ॥ १-१६९-१८ (७७३६)

कृत्यकाल उपस्थास्ये पितॄनिति घटोत्कचः ।
आमन्त्र्य रक्षसां श्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥ १-१६९-१९ (७७३७)
स हि सृष्टो भगवता शक्तिहेतोर्महात्मना ।
वर्णस्याप्रतिवीर्यस्य प्रतियोद्धा महारथः ॥ १-१६९-२० (७७३८)
ग्भीम उवाच। १-१६९-२१क्ष् (९९३)
सह वासो मया जीर्णस्त्वया कमलपालिके ।
पुनर्द्रक्ष्यसि राज्यस्थानित्यभाषत तां तदा ॥ १-१६९-२१ (७७३९)
हिडिम्बोवाच। १-१६९-२२क्ष् (९९४)
पदा मां संस्मरेः कान्त रिरंसू रहसि प्रभो ।
तदा तव वशं भूय आगन्तास्म्याशु भारत ॥ १-१६९-२२ (७७४०)
इत्युक्त्वा सा जगामाशु भावमासज्य पाण्डवे ।
हिडिम्बा समयं स्मृत्वा स्वां गतिं प्रत्यपद्यत ॥ ॥ १-१६९-२३ (७७४१)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
ऊनसप्तत्युत्तरशततमोऽध्यायः ॥ १६९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१६९-१२ विकचः केशहीनः ॥
१-१६९-१३ घटोहं घटवद्वितर्क्यं आस्यं तदुपलक्षितं
शिरः यस्य स घटोहास्यः सचासावुत्कचश्च घटोहास्योत्कचः
। घटोऽहमुत्कचोऽस्मीति मातरं सोऽभ्यभाषत इति घ ङ। पाठः ॥
१३ ॥
१-१६९-१४ आत्मनिलः स्ववशः ॥
ऊनसप्तत्युत्तरशततमोऽध्यायः ॥
१६९ ॥

आदिपर्व - अध्याय १७०
॥ श्रीः ॥
१.१७०. अध्यायः १७०

Mahabharata - Adi Parva - Chapter Topics
वने चरतां पाण्डवानां व्यासेन सान्त्वनं एकचक्रानगर्यां
ब्राह्मणगृहे स्थापनं च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७०-० (७७४२)

ग्वैशम्पायन उवाच।१-१७०-०क्ष् (९९५)
ततस्ते पाण्डवाः सर्वे शालिहोत्राश्रमे तदा ।
पूजितास्तेन वन्येन तमामन्त्र्य महामुनिम् ॥१-१७०-१ (७७४३)
जटाः कृत्वाऽऽत्मनः सर्वे वल्कलाजिनवाससः ।
कुन्त्या सह महात्मानो बिभ्रतस्तापसं वपुः ॥१-१७०-२ (७७४४)
ब्राह्मं वेदमधीयाना वेदाङ्गानि च सर्वशः ।
नीतिशास्त्रं च धर्मज्ञा न्यायज्ञानं च पाण्डवाः ॥१-१७०-३ (७७४५)
शालिहोत्रप्रसादेन लब्ध्वा प्रीतिमवाप्य च।'
ते वनेन वनं गत्वा घ्नन्तो मृगगणान्बहून् ।
अपक्रम्य ययू राजंस्त्वरमाणा महारथाः ॥ १-१७०-४ (७७४६)
मत्स्यांस्त्रिगर्तान्पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान्प्रेक्षमाणाः सरांसि च ॥१-१७०-५ (७७४७)
क्वचिद्वहन्तो जननीं त्वरमाणा महारथाः ।
ग्क्वचिच्छ्रान्ताश्च कान्तारे क्वचित्तिष्ठन्ति हर्षिताः'॥१-१७०-६ (७७४८)
क्वचिच्छन्देन गच्छन्तस्ते जग्मुः प्रसभं पुनः ।
पथि द्वैपायन सर्वे ददृशुः स्वपितामहम् ॥१-१७०-७ (७७४९)
तेऽभिवाद्य महात्मानं कृष्णद्वैपायनं तदा ।
तस्थुः प्राञ्जलयः सर्वे सह मात्रा परन्तपाः ॥१-१७०-८ (७७५०)
व्यास उवाच।१-१७०-९क्ष् (९९६)
तदाश्रमान्निर्गमनं मया ज्ञातं नरर्षभाः ।
घटोत्कचस्य चोत्पत्तिं ज्ञात्वा प्रीतिरवर्धत ॥१-१७०-९ (७७५१)
इदं नगरमभ्याशे रमणीयं निरामयम् ।
वसतेह प्रतिच्छन्ना ममागमनकाङ्क्षिणः ॥१-१७०-१० (७७५२)
वैशम्पायन उवाच।१-१७०-११क्ष् (९९७)
एवं स तान्समाश्वास्य व्यासः पार्तानरिन्दमान् ।
एकचक्रामभिगतां कुन्तीमाश्वासयत्प्रभुः ॥१-१७०-११ (७७५३)
श्रीव्यास उवाच।१-१७०-१२क्ष् (९९८)
कुर्यान्न केवलं धर्मं दुष्कृतं च तथान नरः ।
सुकृतं दुष्कृतं लोके न कर्ता नास्ति कश्चन ॥१-१७०-१२ (७७५४)
अवश्यं लभते कर्ता फलं वै पुण्यपापयोः ।
दुष्कृतस्य फलेनैव प्राप्तं व्यसनमुत्तमम् ॥१-१७०-१३ (७७५५)
तस्मान्माधवि मानार्हे मा च शोके मनः कृथाः। १-१७०-१४ (७७५६)
वैशम्पायन उवाच ।
एवमुक्त्वा निवेश्यैनान्ब्राह्मणस्य निवेशने ॥ १-१७०-१४क्ष् (९९९)
जगाम भगवान्व्यासो यताकाममृषिः प्रभुः ॥ ॥ १-१७०-१५ (७७५७)

इति श्रीमन्महाभारते आदिपर्वणि हिडिम्बवधपर्वणि
सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ॥ समाप्तं हिडिम्बवधपर्व ॥

आदिपर्व - अध्याय १७१
॥ श्रीः ॥
१.१७१. अध्यायः १७१

(अथ बकवधपर्व ॥ १० ॥)
Mahabharata - Adi Parva - Chapter Topics
एकचक्रायां भिक्षामटतः पाण्डवान्दृष्ट्वा पौराणां वितर्कः ॥ १ ॥
कुम्भकाराङ्गीमस्य महत्तरपात्रलाभः ॥ २ ॥
सभार्यस्य तद्गृहस्वामिनो ब्राह्मणस्य क्रन्दितं श्रुतवत्याः कुन्त्याः
भीमानुमत्या ब्राह्मणान्तर्गृहप्रवेशः ॥ ३ ॥
ब्राह्मणप्रलापः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७१-० (७७५८)
जनमेजय उवाच। १-१७१-०क्ष् (१०००)
एकचक्रां गतास्ते तु कुन्तीपुत्रा महारथाः ।
अत ऊर्ध्वं द्विजश्रेष्ठ किमकुर्वत पाण्डवाः ॥ १-१७१-१ (७७५९)
वैशम्पायन उवाच। १-१७१-२क्ष् (१००१)
एकचक्रां गतास्ते तु कन्तीपुत्रा महारथाः ।
ऊषुर्नातिचिरं कालं ब्राह्मणस्य निवेशने ॥ १-१७१-२ (७७६०)
रमणीयानि पश्यन्तो वनानि विविधानि च ।
पार्थिवानपि चोद्देशान्सरितश्च सरांसि च ॥ १-१७१-३ (७७६१)
चेरुर्भैक्ष्यं तदा ते तु सर्व एव विशांपते ।
ग्युधिष्ठिरं च कुन्तीं च चिन्तयन्त उपासते ॥ १-१७१-४ (७७६२)
भैक्षं चरन्तस्तु तदा जटिला ब्रह्मचारिणः ।
बभूवुर्नागराणां च गुणैः संप्रियदर्शनाः ॥ १-१७१-५ (७७६३)
नागरा ऊचुः। १-१७१-६क्ष् (१००२)
दर्शनीया द्विजाः शुभ्रा देवगर्भोपमाः शुभाः ।
भैक्षानर्हाश्च राज्यार्हाः सुकुमारास्तपस्विनः ॥ १-१७१-६ (७७६४)
नैते यथार्थतो विप्राः सुकुमारास्तपस्विनः ।
चरन्ति भूमौ प्रच्छन्नाः कस्माच्चित्कारणादिह ॥ १-१७१-७ (७७६५)
सर्वलक्षणसंपन्ना भैक्षं नार्हन्ति नित्यशः ।

कार्यार्थिनश्चरन्तीति तर्कयन्त इति ब्रुवन् ॥ १-१७१-८ (७७६६)
बन्धूनामागमान्नित्यमुपचारैस्तु नागराः ।
भाजनानि च पूर्णानि भक्ष्यभोज्यैरकारयन् ॥ १-१७१-९ (७७६७)
मौनव्रतेन संयुक्ता भैक्ष्यं गृह्णन्ति पाण्डवाः ।
माता चिरगतान्ज्ञात्वा शोचन्ती पाण्डवान्प्रति ॥ १-१७१-१० (७७६८)
दुःखाश्रुपूर्णनयना लिखन्त्यास्ते महीतलम् ।
भिक्षित्वा द्विजगेहेषु चिन्तयन्तश्च मातरम् ॥ १-१७१-११ (७७६९)
त्वरमाणा निवर्तन्ते मातृगौरवयन्त्रिताः ।
मात्रे निवेदयन्ति स्म कुन्त्यै भैक्षं दिवानिशम् ॥ १-१७१-१२ (७७७०)
सर्वं संपूर्णभैक्षान्नं मातृदत्तं पृथक्पृथक् ।
विभज्याभुञ्जतेष्टं ते यथाभागं पृथक्पृथक् ॥ १-१७१-१३ (७७७१)
अर्धं स्म भुञ्जते पञ्च सह मात्रा परन्तपाः ।
अर्धं सर्वस्य भैक्षस्य भीमो भुङ्क्ते महाबलः ॥ १-१७१-१४ (७७७२)
स नाशितश्च भवति कल्याणान्नभुजिः पुरा ।
स वैवर्ण्यं च कार्श्यं च जगामातृप्तिकारितम् ॥ १-१७१-१५ (७७७३)
आज्यबिन्दुर्यथा वह्नौ महति ज्वलिते भवेत् ।
तथार्धभागं भीमस्य भिक्षान्नस्य नरोत्तम ॥ १-१७१-१६ (७७७४)
तथैव वसतां तत्र तेषां राजन्महात्मनाम् ।
अतिचक्राम सुमहान्कालोऽथ भरतर्षभ ॥ १-१७१-१७ (७७७५)
भीमोऽपि क्रीडयित्वाथ मिथो ब्राह्मणबन्धुषु ।
कुम्भकारेण संबन्धाल्लेभे पात्रं महत्तरम् ॥ १-१७१-१८ (७७७६)
कुम्भकारोऽददात्पात्रं महत्कृत्वातिमात्रकम् ।
प्रहसन्भीमसेनाय विस्मितस्तस्य कर्मणा ॥ १-१७१-१९ (७७७७)
तस्याद्भुतं कर्म कुर्वन्मृद्भारं महदाददे ।
मृद्भारैः शतसाहस्रैः कुम्भकारमतोषयत् ॥ १-१७१-२० (७७७८)
चक्रे चक्रे च मृद्भाण्डान्सततं भैक्षमाचरन् ।
तदादायागतं दृष्ट्वा हसन्ति प्रहसन्ति च ॥ १-१७१-२१ (७७७९)
भक्ष्यभोज्यानि विविधान्यादाय प्रक्षिपन्ति च ।
एवमेव सदा भुक्त्वा मात्रे वदति वै रहः ।
न चाशितोऽस्मि भवति कल्याणान्नभृतः पुरा ॥' १-१७१-२२ (७७८०)
ततः कदाचिद्भैक्षाय गतास्ते पुरुषर्षभाः ।
संगत्य भीमसेनस्तु तत्रास्ते पृथया सह ॥ १-१७१-२३ (७७८१)
अथार्तिजं महाशब्दं ब्राह्मणस्य निवेशने ।
भृशमुत्पतितं घोरं कुन्ती शुश्राव भारत ॥ १-१७१-२४ (७७८२)
रोरुयमाणांस्तान्दृष्ट्वा परिदेवयतश्च सा ।
कारुण्यात्साधुभावाच्च कुन्ती राजन्न चक्षमे ॥ १-१७१-२५ (७७८३)

मथ्यमानेव दुःखेन हृदयेन पृथा तदा ।
उवाच भीमं कल्याणी कृपान्वितमिदं वचः ॥ १-१७१-२६ (७७८४)
वसामः सुसुखं पुत्र ब्राह्मणस्य निवेशने ।
अज्ञाता धार्तराष्ट्रस्य सत्कृतां वीतमन्यवः ॥ १-१७१-२७ (७७८५)
सा चिन्तये सदा पुत्र ब्राह्मणस्यास्य किं न्वहम् ॥
कदा प्रियं करिष्यामि यत्कुर्युरुषिताः सुखम् ॥ १-१७१-२८ (७७८६)
एतावान्पुरुषस्तात कृतं यस्मिन्न नश्यति ।
यावच्च कुर्यादन्योऽस्य कुर्यादभ्यधिकं ततः ॥ १-१७१-२९ (७७८७)
तदिदं ब्राह्मणस्यास्य दुःखमापतितं ध्रुवम् ।
न तत्र यदि साहाय्यं कुर्याम सुकृतं भवेत् ॥ १-१७१-३० (७७८८)
भीमसेन उवाच। १-१७१-३१क्ष् (१००३)
ज्ञायतामस्य यद्दुःखं यतश्चैव समुत्थितम् ।
विदित्वा व्यवसिष्यामि यद्यपि स्यात्सुदुष्करम् ॥ १-१७१-३१ (७७८९)
वैशम्पायन उवाच। १-१७१-३२क्ष् (१००४)
एवं तौ कथयन्तौ च भूयः सुश्रुवतुः स्वनम् ।
आर्तिजं तस्य विप्रस्य सभार्यस्य विशांपते ॥ १-१७१-३२ (७७९०)
अन्तःपुरं ततस्तस्य ब्राह्मणस्य महात्मनः ।
विवेश त्वरिता कुन्ती बद्धवत्सेव सौरभी ॥ १-१७१-३३ (७७९१)
ततस्तं ब्राह्मणं तत्र भार्यया च सुतेन च ।
दुहित्रा चैव सहितं ददर्श विकृताननम् ॥ १-१७१-३४ (७७९२)
ब्राह्मण उवाच। १-१७१-३५क्ष् (१००५)
धिगिदं जीवितं लोके गतसारमनर्थकम् ।
दुःखमूलं पराधीनं भृशमप्रियभागि च ॥ १-१७१-३५ (७७९३)
जीविते परमं दुःखं जीविते परमो ज्वरः ।
जीविते वर्तमानस्य द्वन्द्वानामागमो ध्रुवः ॥ १-१७१-३६ (७७९४)
आत्मा ह्येको हि धर्मार्थौ कामं चैव निषेवते ।
एतैश्च विप्रयोगोऽपि दुःखं परमनन्तकम् ॥ १-१७१-३७ (७७९५)
आहुः केचित्परं मोक्षं स च नास्ति कथंचन ।
अर्थप्राप्तौ तु नरकः कृत्स्न एवोपपद्यते ॥ १-१७१-३८ (७७९६)
अर्थेप्सुता परं दुःखमर्थप्राप्तौ ततोऽधिकम् ।
जातस्नेहस्य चार्थेषु विप्रयोगे महत्तरम् ॥ १-१७१-३९ (७७९७)
ग्यावन्तो यस्य संयोगा द्रव्यैरिष्टैर्भवन्त्युत ।
तावन्तोऽस्य निख्यन्ते हृदये शोकशङ्कवः ॥ १-१७१-४० (७७९८)
तदिदं जीवितं प्राप्य अल्पकालं महाभयम् ।
त्यागो हि न मया प्राप्तो भार्यया सहितेन च ॥' १-१७१-४१ (७७९९)
न हि योगं प्रपश्यामि येन मुच्येयमापदः ।

पुत्रदारेण वा सार्धं प्राद्रवेयमनामयम् ॥ १-१७१-४२ (७८००)
यतितं वै मया पूर्वं वेत्थ ब्राह्मणि तत्तथा ।
क्षेमं यतस्ततो गन्तुं त्वया तु मम न श्रुतम् ॥ १-१७१-४३ (७८०१)
इह जाता विवृद्धाऽस्मि पिता माता ममेति वै ।
उक्तवत्यसि दुर्मेधे याच्यमाना मयाऽसकृत् ॥ १-१७१-४४ (७८०२)
स्वर्गतोऽपि पिता वृद्धस्तथा माता चिरं तव ।
बन्धवा भूतपूर्वाश्च तत्र वासे तु का रतिः ॥ १-१७१-४५ (७८०३)
ग्न भोजनं विरुद्धं स्यान्न स्त्रीदेशो निबन्धनः ।
सुदूरमपि तं देशं व्रजेद्गरुडहंसवत् ॥' १-१७१-४६ (७८०४)
सोऽयं ते बन्धुकामाया अशृण्वन्त्या वचो मम ।
बन्धुप्रणाशः संप्राप्तो भृशं दुःखकरो मम ॥ १-१७१-४७ (७८०५)
अथवा मद्विनाशो यं न हि शक्ष्यामि कंचन ।
परित्यक्तुमहं बन्धुं स्वयं जीवन्नृशंसवत् ॥ १-१७१-४८ (७८०६)
सहधर्मचरीं दान्तां नित्यं मातृसमां मम ।
सखायं विहितां देवैर्नित्यं परमिकां गतिम् ॥ १-१७१-४९ (७८०७)
पित्रा मात्रा च विहितां सदा गार्हस्थ्यभागिनीम् ।
वरयित्वा यथान्यायं मन्त्रवत्परिणीय च ॥ १-१७१-५० (७८०८)
कुलीनां शीलसंपन्नामपत्यजननीमपि ।
त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ॥ १-१७१-५१ (७८०९)
परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रताम् ।
कुत एव परित्यक्तुं सुतां शक्ष्याम्यहं स्वयम् ॥ १-१७१-५२ (७८१०)
बालामप्राप्तवयसमजातव्यञ्जनाकृतिम् ।
भर्तुरर्थाय निक्षिप्तां न्यासं धात्रा महात्मना ॥ १-१७१-५३ (७८११)
यया दौहित्रजाँल्लोकानाशंसे पितृभिः सह ।
स्वयमुत्पाद्य तां बालां कथमुत्स्रष्टुमुत्सहे ॥ १-१७१-५४ (७८१२)
मन्यन्ते केचिदधिकं स्नेहं पुत्रे पितुर्नराः ।
कन्यायां केचिदपरे मम तुल्यावुभौ स्मृतौ ॥ १-१७१-५५ (७८१३)
यस्यां लोकाः प्रसूतिश्च स्थिता नित्यमथो सुखम् ।
अपापां तामहं बालां कथमुत्स्रष्टुमुत्सहे ॥ १-१७१-५६ (७८१४)
ग्कुत एव परित्यक्तुं सुतं शक्ष्याम्यहं स्वयम् ।
प्रार्थयेयं परां प्रीतिं यस्मिन्स्वर्गफलानि च ॥ १-१७१-५७ (७८१५)
यस्य जातस्य पितरो मुखं दृष्ट्वा दिवं गताः ।
अहं मुक्तः पितृऋणाद्यस्य जातस्य तेजसा ॥ १-१७१-५८ (७८१६)
दयितं मे कथं बालमहं त्यक्तुमिहोत्सहे ।
तमहं ज्येष्ठपुत्रं मे कुलनिर्हारकं विभुम् ॥ १-१७१-५९ (७८१७)
मम पिण्डोदकनिधिं कथं त्यक्ष्यामि पुत्रकम् ।

त्यागोऽयं मम संप्राप्तो ममन्वा मे सुतस्य वा ॥१-१७१-६० (७८१८)
तव वा तव पुत्र्या वा अत्र वासस्य तत्फलम् ।
न शृणोषि वचो मह्यं तत्फलं भुङ्क्ष्व भामिनि ॥१-१७१-६१ (७८१९)
अथवाहं न शक्ष्यामि स्वयं मर्तुं सुतं मम ।
एकं त्यक्तुं न शक्नोति भवतीं च सुतामपि ॥१-१७१-६२ (७८२०)
अथ मद्रक्षणार्थं वा न हि शक्ष्यामि कंचन ।
परित्यक्तुमहं बन्धुं स्वयं जीवन्नृशंसवत् ॥१-१७१-६३ (७८२१)
आत्मानमपि चोत्सृज्य गते प्रेतवशं मयि।'
त्यक्ता ह्येते मया व्यक्तं नेह शक्ष्यन्ति जीवितुम् ॥ १-१७१-६४ (७८२२)
एषां चान्यतमत्यागो नृशंसो गर्हितो बुधैः ।
आत्मत्यागे कृते चेमे मरिष्यन्ति मया विना ॥१-१७१-६५ (७८२३)
स कृच्छ्रामहमापन्नो न शक्तस्तर्तुमापदम् ।
अहो धिक्कां गतिं त्वद्य गमिष्यामि सबान्धवः ।
सर्वैः सह मृतं श्रेयो न च मे जीवितुं क्षमम् ॥ ॥ १-१७१-६६ (७८२४)

इति श्रीमन्महाभारते आदिपर्वणि बकवचपर्वणि
एकसप्तत्यधिकशततमोऽध्यायः ॥१७१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७१-४२ योगमुपायम् ॥
एकसप्तत्यधिकशततमोऽध्यायः ॥
१७१ ॥

आदिपर्व - अध्याय १७२
॥ श्रीः ॥
१.१७२. अध्यायः १७२

Mahabharata - Adi Parva - Chapter Topics
ब्राह्मण प्रति तत्पत्नीवाक्यम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७२-० (७८२५)
ब्राह्मण्युवाच। १-१७२-०क्ष् (१००६)
न सन्तापस्त्वया कार्यः प्राकृतेनेव कर्हिचित् ।
न हि सन्तापकालोऽयं वैद्यस्य तव विद्यते ॥१-१७२-१ (७८२६)
अवश्यं निधनं सर्वैर्गन्तव्यमिह मानवैः ।

अवश्यभाविन्यर्थे वै संतापो नेह विद्यते ॥ १-१७२-२ (७८२७)
भार्या पुत्रोऽथ दुहिता सर्वमात्मार्थमिष्यते ।
व्यथां जहि सुबुद्ध्या त्वं स्वयं यास्यामि तत्र च ॥ १-१७२-३ (७८२८)
एतद्धि परमं नार्याः कार्यं लोके सनातनम् ।
प्राणानपि परित्यज्य यद्भर्तुर्हितमाचरेत् ॥ १-१७२-४ (७८२९)
तच्च तत्र कृतं कर्म तवापीदं सुखावहम् ।
भवत्यमुत्र चाक्षय्यं लोकेऽस्मिंश्च यशस्करम् ॥ १-१७२-५ (७८३०)
एष चैव गुरुर्धर्मो यं प्रवक्ष्याम्यहं तव ।
अर्थश्च तव धर्मश्च भूयानत्र प्रदृश्यते ॥ १-१७२-६ (७८३१)
यदर्थमिष्यते भार्या प्राप्तः सोऽर्थस्त्वया मयि ।
कन्या चैका कुमारश्च कृताहमनृणा त्वया ॥ १-१७२-७ (७८३२)
समर्थः पोषणे चासि सुतयो रक्षणे तथा ।
न त्वहं सुतयोः शक्ता तथा रक्षणपोषणे ॥ १-१७२-८ (७८३३)
मम हि त्वद्विहीनायाः सर्वप्राणधनेश्वर ।
कथं स्यातां सुतौ बालौ भरेयं च कथं त्वहम् ॥ १-१७२-९ (७८३४)
कथं हि विधवाऽनाथा बालपुत्रा विना त्वया ।
मिथुनं जीवयिष्यामि स्थिता साधुगते पथि ॥ १-१७२-१० (७८३५)
अहं कृतावलेपैश्च प्रार्थ्यमानामिमां सुताम् ।
अयुक्तैस्तव संबन्धे कथं शक्ष्यामि रक्षितुम् ॥ १-१७२-११ (७८३६)
उत्सृष्टमामिषं भूमौ प्रार्थयन्ति यथा खगाः ।
प्रार्थयन्ति जनाः सर्वे पतिहीनां तथा स्त्रियम् ॥ १-१७२-१२ (७८३७)
साऽहं विचाल्यमाना वै प्रार्थ्यमाना दुरात्मभिः ।
स्थातुं पथि न शक्ष्यामि सज्जनेष्टे द्विजोत्तम ॥ १-१७२-१३ (७८३८)
ग्स्त्रीजन्म गर्हितं नाथ लोके दुष्टजनाकुले ।
मातापित्रोर्वशे कन्या प्रौढा भर्तृवशे तथा ॥ १-१७२-१४ (७८३९)
अभावे चानयोः पुत्रे स्वतन्त्रा स्त्री विगर्हिता ॥ १-१७२-१५ (७८४०)
अनाथत्वं स्त्रियो द्वारं दुष्टानां विवृतं हि तत् ।
वस्त्रखण्डं घृताक्तं हि यथा संकृष्यते श्वभिः ॥' १-१७२-१६ (७८४१)
कथं तव कुलस्यैकमिमं बालमनागसम् ।
पितृपैतामहे मार्गे नियोक्तुमहमुत्सहे ॥ १-१७२-१७ (७८४२)
कथं शक्ष्यामि बालेऽस्मिन्गुणानाधातुमीप्सितान् ।
अनाथे सर्वतो लुप्ते यथा त्वं धर्मदर्शिवान् ॥ १-१७२-१८ (७८४३)
इमामपि च ते बालामनाथां परिभूय माम् ।
अनर्हाः प्रार्थयिष्यन्ति शूद्रा वेदश्रुतिं यथा ॥ १-१७२-१९ (७८४४)
तां चेदहं न दित्सेयं सद्गुणैरुपबृंहिताम् ।
प्रमथ्यैनां हरेयुस्ते हविर्ध्वाङ्क्षा इवाध्वरात् ॥ १-१७२-२० (७८४५)

संप्रेक्षमाणा पुत्रीं ते नानुरूपमिवात्मनः ।
अनर्हवशमापन्नामिमां चापि सुतां तव ॥ १-१७२-२१ (७८४६)
अवज्ञाता च लोकेषु तथान्मानमजानती ।
अवलिप्तैरैर्ब्रह्मन्मरिष्यामि न संशयः ॥ १-१७२-२२ (७८४७)
तौ च हीनौ मया बालौ त्वया चैव तथात्मजौ ।
विनश्येतां न सन्देहो मत्स्याविव जलक्षये ॥ १-१७२-२३ (७८४८)
त्रितयं सर्वथाप्येवं विनशिष्यत्यसंशयम् ।
त्वया विहीनं तस्मात्त्वं मां परित्यक्तुमर्हसि ॥ १-१७२-२४ (७८४९)
व्युष्टिरेषा परा स्त्रीणां पूर्वं भर्तुः परा गतिः ।
ननु ब्रह्मन्सपुत्राणामिति धर्मविदो विदुः ॥ १-१७२-२५ (७८५०)
ग्अनिष्टमिह पुत्राणां विषये परिवर्तितुम् ।
हरिद्राञ्जनपुष्पादिसौमङ्गल्ययुता सती ॥ १-१७२-२६ (७८५१)
मरणं याति या भर्तुस्तद्दत्तजलपायिनी ।
भर्तृपादार्पितमनाः सा याति गिरिजापदम् ॥ १-१७२-२७ (७८५२)
गिराजायाः सखी भूत्वा मोदते नगकन्यया ।
मितं ददाति हि पिता मितं माता मितं सुतः ॥ १-१७२-२८ (७८५३)
अमितस्य हि दातारं का पतिं नाभिनन्दति ।
आश्रमाश्चाग्निसंस्कारा जपहोमव्रतानि च ॥ १-१७२-२९ (७८५४)
स्त्रीणां नैते विधातव्या विना पतिमनिन्दितम् ।
क्षमा शौचमनाहारमेतावद्विहितं स्त्रियाः ॥' १-१७२-३० (७८५५)
परित्यक्तः सुतश्चायं दुहितेयं तथा मया ।
बान्धवाश्च परित्यक्तास्त्वदर्थं जीवितं च मे ॥ १-१७२-३१ (७८५६)
यज्ञैस्तपोभिर्नियमैर्दानैश्च विविधैस्तथा ।
विशिष्यते स्त्रिया भर्तुर्नित्यं प्रियहिते स्थितिः ॥ १-१७२-३२ (७८५७)
तदिदं यच्चिकीर्षामि धर्मं परमसंमतम् ।
इष्टं चैव हितं चैव तव चैव कुलस्य च ॥ १-१७२-३३ (७८५८)
इष्टानि चाप्यपत्यानि द्रव्याणि सुहृदः प्रियाः ।
आपद्धर्मप्रमोक्षाय भार्या चापि सतां मतम् ॥ १-१७२-३४ (७८५९)
आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ १-१७२-३५ (७८६०)
दृष्टादृष्टफलार्थं हि भार्या पुत्रो धनं गृहम् ।
सर्वमेतद्विधातव्यं बुधानामेष निश्चयः ॥ १-१७२-३६ (७८६१)
एकतो वा कुलं कृत्स्नमात्मा वा कुलवर्धनः ।
ग्उभयोः कोधिको विद्वन्नात्मा चैवाधिकः कुलात् ॥ १-१७२-३७ (७८६२)
आत्मनो विद्यमानत्वाद्भुवनानि चतुर्दश ।
विद्यन्ते द्विजशार्दूल आतमा रक्ष्यस्ततस्त्वया ॥ १-१७२-३८ (७८६३)

आत्मन्यविद्यमाने चेदस्य नास्तीह किंचन ।
एतज्जगदिदं सर्वमात्मना न समं किल ॥' १-१७२-३९ (७८६४)
स कुरुष्व मया कार्यं तारयात्मानमात्मना ।
अनुजानीही मामार्य सुतौ मे परिपालय ॥ १-१७२-४० (७८६५)
अवध्याः स्त्रिय इत्याहुर्धर्मज्ञा धर्मनिश्चये ।
धर्मज्ञान्राक्षसानाहुर्न हन्यात्स च मामपि ॥ १-१७२-४१ (७८६६)
निःसंशयं वधः पुंसां स्त्रीणां संशयितो वधः ।
अतो मामेव धर्मज्ञ प्रस्थापयितुमर्हसि ॥ १-१७२-४२ (७८६७)
भुक्तं प्रियाण्यवाप्तानि धर्मश्च चरितो मया ।
ग्त्वच्छुश्रूषणसंभूता कीर्तिश्चाप्यतुला मम।'
त्वत्प्रसूतिः प्रिया प्राप्ता न मां तप्स्यत्यजीवितं ॥ १-१७२-४३ (७८६८)
जातपुत्रा च वृद्धा च प्रियकामा च ते सदा ।
समीक्ष्यैतदहं सर्वं व्यवसायं करोम्यतः ॥ १-१७२-४४ (७८६९)
उत्सृज्यापि हि मामार्य प्राप्स्यस्यन्यामपि स्त्रियम् ।
ततः प्रतिष्ठितो धर्मो भविष्यति पुनस्तव ॥ १-१७२-४५ (७८७०)
न चाप्यधर्मः कल्याण बहुपत्नीकता नृणाम् ।
स्त्रीणामधर्मः सुमहान्भर्तुः पूर्वस्य लङ्घने ॥ १-१७२-४६ (७८७१)
एतत्सर्वं समीक्ष्य त्वमात्मत्यागं च गर्हितम् ।
आत्मानं तारयाद्याशु कुलं चेमौ च दारकौ ॥ १-१७२-४७ (७८७२)
वैशम्पायन उवाच। १-१७२-४८क्ष् (१००७)
एवमुक्तस्तया भर्ता तां समालिङ्ग्य भारत ।
मुमोच बाष्पं शनकैः सभार्यो भृशदुःखितः ॥ १-१७२-४८ (७८७३)
ग्मैवं वद त्वं कल्याणि तिष्ठ चेह सुमध्यमे ।
न तु भार्यां त्यजेत्प्राज्ञः पुत्रान्वापि कदाचन ॥ १-१७२-४९ (७८७४)
विशेषतः स्त्रियं रक्षेत्पुरुषो बुद्धिमानिह ।
त्यक्त्वा तु पुरुषो जीवेन्न हातव्यानिमान्सदा ।
न वेत्ति कामं धर्मं च अर्थं मोक्षं च तत्त्वतः ॥' ॥ १-१७२-५०
(७८७५)

इति श्रीमन्महाभारते आदिपर्वणि बकवधपर्वणि
द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१७२-१ वैद्यस्य विद्यावनः ॥
१-१७२-२५ परा व्युष्टिर्महद्भाग्यम् ॥
१-१७२-४३ त्वत् त्वत्तः प्रसूतिः संततिः । अजीवितम् मरणं ॥

द्विसप्तत्यधिकशततमोऽध्यायः ॥
१७२ ॥

आदिपर्व - अध्याय १७३
॥ श्रीः ॥
१.१७३. अध्यायः १७३

Mahabharata - Adi Parva - Chapter Topics
ब्राह्मणं प्रति तत्कन्यावाक्यम् ॥ १ ॥
बालस्य पुत्रस्य वचनेन पित्रोः किंचिद्धर्षसमये कुन्त्यास्तत्समीपे गमनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७३-० (७८७६)
वैशम्पायन उवाच। १-१७३-०क्ष् (१००८)
तयोर्दुःखितयोर्वाक्यमतिमात्रं निशम्य तु ।
ततो दुःखपरीताङ्गी कन्या तावभ्यभाषत ॥ १-१७३-१ (७८७७)
किमेवं भृशदुःखार्तौ रोरूयेतामनाथवत् ।
ममापि श्रूयतां वाक्यं श्रुत्वा च क्रियतां क्षमम् ॥ १-१७३-२ (७८७८)
धर्मतोऽहं परित्याज्या युवयोर्नात्र संशयः ।
त्यक्तव्यां मां परित्यज्य त्राहि सर्वं मयैकया ॥ १-१७३-३ (७८७९)
इत्यर्थमिष्यतेऽपत्यं तारयिष्यति मामिति ।
अस्मिन्नुपस्थिते काले तरध्वं प्लववन्मया ॥ १-१७३-४ (७८८०)
इह वा तारयेद्दुर्गादुत वा प्रेत्य भारत ।
सर्वथा तारयेत्पुत्रः पुत्र इत्युच्यते बुधैः ॥ १-१७३-५ (७८८१)
आकाङ्क्षन्ते च दौहित्रान्मयि नित्यं पितामहाः ।
तत्स्वयं वै परित्रास्ये रक्षन्ती जीवितं पितुः ॥ १-१७३-६ (७८८२)
भ्राता च मम बालोऽयं गते लोकममुं त्वयि ।
अचिरेणैव कालेन विनश्येत न संशयः ॥ १-१७३-७ (७८८३)
तातेपि हि गते स्वर्गं विनष्टे च ममानुजे ।
पिण्डः पितॄणां व्युच्छिद्येत्तत्तेषां विप्रियं भवेत् ॥ १-१७३-८ (७८८४)
पित्रा त्यक्ता तथा मात्रा भ्रात्रा चाहमसंशयम् ।
दुःखाद्दुःखतरं प्राप्य म्रियेयमतथोचिताम् ॥ १-१७३-९ (७८८५)
त्वयि त्वरोगे निर्मुक्तो माता भ्राता च मे शिशुः ।
सन्तानश्चैव पिण्डश्च प्रतिष्ठास्यत्यसंशयम् ॥ १-१७३-१० (७८८६)
आत्मा पुत्रः सखी भार्या कृच्छ्रं तु दुहिता किल ।

स कृच्छ्रान्मोचयात्मानं मां च धर्मे नियोजया ॥ १-१७३-११ (७८८७)
अनाथा कृपणा बाला यत्र क्वचन गामिनी ।
भविष्यामि त्वया तात विहीना कृपणा सदा ॥ १-१७३-१२ (७८८८)
अथवाहं करिष्यामि कुलस्यास्य विमोचनम् ।
फलसंस्था भविष्यामि कृत्वा कर्म सुदुष्करम् ॥ १-१७३-१३ (७८८९)
अथवा यास्यसे तत्र त्यक्त्वा मां द्विजसत्तम ।
पीडिताऽहं भविष्यामि तदवेक्षस्व मामपि ॥ १-१७३-१४ (७८९०)
तदस्मदर्थं धर्मार्थं प्रसवार्थं च सत्तम ।
आत्मानं परिरक्षस्व त्यक्तव्यां मां च संत्यज ॥ १-१७३-१५ (७८९१)
अवश्यकरणीये च मा त्वां कालोत्यगादयम् ।
किं त्वतः परमं दुःखं यद्वयं स्वर्गते त्वयि ॥ १-१७३-१६ (७८९२)
याचमानाः परादन्नं परिधावेमहि श्ववत् ।
त्वयि त्वरोगे निर्मुक्ते क्लेशादस्मात्सबान्धवे ।
अमृतेव सती लोके भविष्यामि सुखान्विता ॥ १-१७३-१७ (७८९३)
इतः प्रदाने देवाश्च पितरश्चेति नः श्रुतम् ।
त्वया दत्तेन तोयेन भविष्यति हिताय वै ॥ १-१७३-१८ (७८९४)
ग्इत्येतदुभयं तात निशाम्य तव यद्धितम् ।
तद्भवस्य तथाम्बाया हितं स्वस्य सुतस्य च ॥ १-१७३-१९ (७८९५)
मातापित्रोश्च पुत्रास्तु भवितारो गुणान्विताः ।
न तु पुत्रस्य पितरो पुनर्जातु भविष्यतः ॥' १-१७३-२० (७८९६)
वैशम्पायन उवाच। १-१७३-२१क्ष् (१००९)
एवं बहुविधं तस्या निशम्य परिदेवितम् ।
पिता माता च सा चैव कन्या प्ररुरुदुस्त्रयः ॥ १-१७३-२१ (७८९७)
ततः प्ररुदितान्सर्वान्निशम्याथ सुतस्तदा ।
उत्फुल्लनयनो बालः कलमव्यक्तमब्रवीत् ॥ १-१७३-२२ (७८९८)
मा पिता रुद मा मातर्मा स्वसस्त्विति चाब्रवीत् ।
प्रहसन्निव सर्वांस्तानेकैकमनुसर्पति ॥ १-१७३-२३ (७८९९)
ततः स तृणमादाय प्रहृष्टः पुनरब्रवीत् ।
अनेनाहं हनिष्यामि राक्षसं पुरुषादकम् ॥ १-१७३-२४ (७९००)
वैशम्पायन उवाच। १-१७३-२५क्ष् (१०१०)
तथापि तेषां दुःखेन परीतानां निशम्य तत् ।
बालस्य वाक्यमव्यक्तं हर्षः समभवन्महान् ॥ १-१७३-२५ (७९०१)
अयं काल इति ज्ञात्वा कुन्ती समुपसृत्य तान् ।
गतासूनमृतेनेव जीवयन्तीदमब्रवीत् ॥ ॥ १-१७३-२६ (७९०२)

इति श्रीमन्महाभारते आदिपर्वणि बकवधपर्वणि

त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७३-१५ प्रसवार्थं वंशार्थम् ॥
१-१७३-१७ अमृतेव जीवन्तीव ।इह लोके कीर्तेः सत्त्वात् ॥
१-१७३-१८ इतः प्रदाने अस्मिन् राक्षसाहाराय कन्यादाने दुर्दानत्वात्
पितुर्दुर्मरणाच्च कन्याया देवाश्च पितरश्च हिताय नेति
श्रुतं यद्यपि तथापि त्वया दत्तेनः तोयेन तव मम च हिताय ते
भविष्यन्तीत्यर्थः ॥
१-१७३-२२ कलं मधुरा ॥
त्रिसप्तत्यधिकशततमोऽध्यायः ॥
१७३ ॥

आदिपर्व - अध्याय १७४
॥ श्रीः ॥
१.१७४. अध्यायः १७४

Mahabharata - Adi Parva - Chapter Topics
कुन्त्या रोदनकारणप्रश्ने ब्राह्मणेन बकवृत्तान्तकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७४-० (७९०३)
कुन्त्युवाच। १-१७४-०क्ष् (१०११)
कुतोमूलमिदं दुःखं ज्ञातुमिच्छामि तत्त्वतः ।
विदित्वाप्यपकर्षेयं शक्यं चेदपकर्षितुम् ॥ १-१७४-१ (७९०४)
ब्राह्मण उवाच। १-१७४-२क्ष् (१०१२)
उपपन्नं सतामेतद्यद्ब्रवीपि तपोधने ।
न तु दुःखमिदं शक्यं मानुषेण व्यपोहितुम् ॥ १-१७४-२ (७९०५)
ग्तथापि तत्त्वमाख्यास्ये दुःखस्यैतस्य संभवम् ।
शक्यं वा यदि वाऽशक्यं शृणु भद्रे यथातथम् ॥ १-१७४-३ (७९०६)
समीपे नगरस्यास्य वको वसति राक्षसः ।
इतो गव्यूतिमात्रे ग्नस्ति यमुनागह्वरे गुहा ॥ १-१७४-४ (७९०७)
तस्यां घोरः स वसति जिघांसुः पुरुषादकः ।
बकाभिधानो दुष्टात्मा राक्षसानां कुलाधमः ॥ १-१७४-५ (७९०८)
ईशो जनपदस्यास्य पुरस्य च महाबलः ।
पुष्टो मानुषमांसेन दुर्बुद्धिः पुरुषादकः ॥ १-१७४-६ (७९०९)

प्रबलः कामरूपी च राक्षसस्तु महाबलः ।
तेनोपसृष्टा नगरी वर्षमद्य त्रयोदशम् ॥ १-१७४-७ (७९१०)
तत्कृते परचक्राच्च भूतेभ्यश्च न नो भयम् ।
पुरुषादेन रौद्रेण भक्ष्यमाणा दुरात्मना ॥ १-१७४-८ (७९११)
अनाथा नगरी नाथं त्रातारं नाधिगच्छति ।
गुहायां च वसंस्तत्र बाधते सततं जनम् ॥ १-१७४-९ (७९१२)
स्त्रियो बालांश्च वृद्धांश्च यूनश्चापि दुरात्मवान् ।
अत्र मन्त्रैश्च होमैश्च भोजनैश्च स राक्षसः ॥ १-१७४-१० (७९१३)
ईडितो द्विजमुख्यैश्च पूजितश्च दुरात्मवान् ।
यदा च सकलानेवं प्रसूदयति राक्षसः ॥ १-१७४-११ (७९१४)
अथैनं ब्राह्मणाः सर्वे समये समयोजयन् ।
मा स्म कामाद्वधी रक्षो दास्यामस्ते सदा वयं ॥ १-१७४-१२ (७९१५)
पर्यायेण यथाकाममिह मांसोदनं प्रभो ।
अन्नं मांससमायुक्तं तिलचूर्णसमन्वितम् ॥ १-१७४-१३ (७९१६)
सर्पिषा च समायुक्तं व्यञ्जनैश्च समन्वितम् ।
सूपांस्त्रीन्सतिलान्पिण्डाँल्लाजापूपसुरासवान् ॥ १-१७४-१४ (७९१७)
शृताशृतान्पानकुम्भान्स्थूलमांसं शृताशृतम् ।
वनमाहिषवाराहभाल्लूकं च शृताशृतम् ॥ १-१७४-१५ (७९१८)
सर्पिःकुम्भांश्च विविधान्दधिकुम्भांस्तथा बहून् ।
सद्यःसिद्धसमायुक्तं तिलचूर्णैः समाकुलम् ॥ १-१७४-१६ (७९१९)
कुलाच्च पुरुषं चैकं बलीवर्दौ च कालकौ ।
प्राप्स्यसि त्वमसंक्रुद्धो रक्षोभागं प्रकल्पितम् ॥ १-१७४-१७ (७९२०)
तिष्ठेह समयेऽस्माकमित्ययाचन्त तं द्विजाः ।
बाढमित्येव तद्रक्षस्तद्वचः प्रत्यगृह्णत ॥ १-१७४-१८ (७९२१)
परचक्राटवीकेभ्यो रक्षणं स करोति च ।
तस्मिन्भागे सुनिर्दिष्टे स्थितः स समये बली ॥ १-१७४-१९ (७९२२)
एकैकं चैव पुरुषं संप्रयच्छन्ति वेतनम् ।
स वारो बहुभिर्वर्षैर्भवत्यसुकरो नरैः ॥ १-१७४-२० (७९२३)
तद्विमोक्षाय ये केचिद्यतन्ते पुरुषाः क्वचित् ।
सपुत्रदारांस्तान्हत्वा तद्रक्षो भक्षयत्युत ॥' १-१७४-२१ (७९२४)
वेत्रकीयगृहे राजा नायं नयमिहास्थितः ।
उपायं तं न कुरुते यत्नादपि स मन्दधीः ।
अनामयं जनस्यास्य येन स्यादद्य शाश्वतम् ॥ १-१७४-२२ (७९२५)
एतदर्हा वचं नूनं वसामो दुर्बलस्य ये ।
विषये नित्यवास्तव्याः कुराजानमुपाश्रिताः ॥ १-१७४-२३ (७९२६)
ब्राह्मणाः कस्य वक्तव्याः कस्य वाच्छन्दचारिणः ।

गुणैरेते हि वत्स्यन्ति कामगाः पक्षिणो यथा ॥१-१७४-२४ (७९२७)
राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
ग्राजन्यसति लोकेऽस्मिन्कुतो भार्या कुतो धनम् ।
वयस्य संचयेनास्य ज्ञातीन्पुत्रांश्च तारयेत् ॥ १-१७४-२५ (७९२८)
विपीरतं मया चेदं त्रयं सर्वमुपार्जितम् ।
तदिमामापदं प्राप्य भृशं तप्यामहे वयम् ॥१-१७४-२६ (७९२९)
सोऽयमस्माननुप्राप्तो वारः कुलविनाशनः ।
भोजनं पुरुषश्चैकः प्रदेयं वेतनं मया ॥१-१७४-२७ (७९३०)
न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित् ।
सुहृज्जनं प्रदातुं च न शक्ष्यामि कदाचन ॥१-१७४-२८ (७९३१)
गतिं चान्यां न पश्यामि तस्मान्मोक्षाय रक्षसः ।
सोऽहं दुःखार्णवे मग्नो महत्यसुकरे भृशम् ॥१-१७४-२९ (७९३२)
सहैवैतैर्गमिष्यामि बान्धवैरद्य राक्षसम् ।
ततो नः सहितान्क्षुद्रः सर्वानेवोपभोक्ष्यति ॥१-१७४-३० (७९३३)
ग्दुःखमूलमिदं भद्रे मयोक्तं प्रश्नतोऽनघे ॥' ॥ १-१७४-३१ (७९३४)

इति श्रीमन्महाभारते आदिप्रवणि बकवधपर्वणि
चतुःसप्तत्यधिकशततमोऽध्यायः ॥१७४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१७४-२२ वेत्रकीयगृहे स्थानविशेषे ।इतोऽदूरे
राजास्त्ययमिह नगरे नयं न आस्थितः। अस्य नगरस्यावेक्षां
न करोतीत्यर्थः। स्वयं राक्षसं हन्तुमशक्तत्वात्। नायं
नायमिहास्थित इति खपुस्तकपाठः। नायं नायं बलिं पुनः पुनः
प्रापय्येत्यर्थः। उपायमप्यन्यद्वारा न कुरुते यतो मन्दधीः ॥
१-१७४-२३ एतदर्हाः एतस्य दुःखस्य योग्याः ॥
चतुःसप्तत्यधिकशततमोऽध्यायः ॥
१७४ ॥

आदिपर्व - अध्याय १७५

॥ श्रीः ॥

१.१७५. अध्यायः १७५

Mahabharata - Adi Parva - Chapter Topics

कुन्त्या बकं प्रति स्वपुत्रप्रेषणवचनम् ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७५-० (७९३५)
कुन्त्युवाच। १-१७५-०क्ष् (१०१३)
न विषादस्त्वया कार्यो भयादस्मात्कथंचन ।
उपायः परिदृष्टोऽत्र तस्मान्मोक्षाय रक्षसः ॥ १-१७५-१ (७९३६)
ग्नैव स्वयं सपुत्रस्य गमनं तत्र रोचये।'
एकस्तव सुतो बालः कन्या चैका तपस्विनी ।
न चैतयोस्तथा पत्न्या गमनं तव रोचये ॥ १-१७५-२ (७९३७)
मम पञ्च सुता ब्रह्मंस्तेषामेको गमिष्यति ।
त्वदर्थं बलिमादाय तस्य पापस्य रक्षसः ॥ १-१७५-३ (७९३८)
ब्राह्मण उवाच। १-१७५-४क्ष् (१०१४)
नाहमेतत्करिष्यामि जीवितार्थी कथंचन ।
ब्राह्मणस्यातिथेश्चैव स्वार्थे प्राणान्वियोजयन् ॥ १-१७५-४ (७९३९)
न त्वेतदकुलीनासु नाधर्मिष्ठासु विद्यते ।
यद्ब्राह्मणार्थं विसृजेदात्मानमपि चात्मजम् ॥ १-१७५-५ (७९४०)
आत्मनस्तु वधः श्रेयो बोद्धव्यमिति रोचते ।
ब्रह्मवध्याऽऽत्मवध्या वा श्रेयानात्मवधो मम ॥ १-१७५-६ (७९४१)
ब्रह्मवध्या परं पापं निष्कृतिर्नात्र विद्यते ।
अबुद्धिपूर्वं कृत्वापि प्रत्यवायो हि विद्यते ॥ १-१७५-७ (७९४२)
न त्वहं वधमाकाङ्क्षे स्वयमेवात्मनः शुभे ।
परैः कृते वधे पापं न किंचिन्मयि विद्यते ॥ १-१७५-८ (७९४३)
अभिसंधौ कृते तस्मिन्ब्राह्मणस्य वधे मया ।
निष्कृतिं न प्रपश्यामि नृशंसं क्षुद्रमेव च ॥ १-१७५-९ (७९४४)
आगतस्य गृहं त्यागस्तथैव शरणार्थिनः ।
याचमानस्य च वधो नृशंसो गर्हितो बुधैः ॥ १-१७५-१० (७९४५)
कुर्यान्न निन्दितं कर्म न नृशंसं कथंचन ।
इति पूर्वे महात्मान आपद्धर्मविदो विदुः ॥ १-१७५-११ (७९४६)
श्रेयांस्तु सहदारस्य विनाशोऽद्य मम स्वयम् ।
ब्राह्मणस्य वधं नाहमनुमंस्ये कदाचन ॥ १-१७५-१२ (७९४७)
कुन्त्युवाच। १-१७५-१३क्ष् (१०१५)
ममाप्येषा मतिर्ब्रह्मन्विप्रा रक्ष्या इति स्थिरा ।
न चाप्यनिष्टः पुत्रो मे यदि पुत्रशतं भवेत् ॥ १-१७५-१३ (७९४८)
न चासौ राक्षसः शक्तो मम पुत्रविनाशने ।
वीर्यवान्मन्त्रसिद्धश्च तेजस्वी च सुतो मम ॥ १-१७५-१४ (७९४९)
राक्षसाय च तत्सर्वं प्रापयिष्यति भोजनम् ।
मोक्षयिष्यति चात्मानमिति मे निश्चिता मतिः ॥ १-१७५-१५ (७९५०)

समागताश्च वीरेण दृष्टपूर्वाश्च राक्षसाः ।
बलवन्तो महाकाया निहताश्चाप्यनेकशः ॥ १-१७५-१६ (७९५१)
न त्विदं केषुचिद्ब्रह्मान्व्याहर्तव्यं कथंचन ।
विद्यार्थिनो हि मे पुत्रान्विप्रकुर्युः कुतूहलात् ॥ १-१७५-१७ (७९५२)
गुरुणा चाननुज्ञातो ग्राहयेद्यः सुतो मम ।
न स कुर्यात्तथा कार्यं विद्ययेति सतां मतम् ॥ १-१७५-१८ (७९५३)
वैशम्पायन उवाच। १-१७५-१९क्ष् (१०१६)
एवमुक्तस्तु पृथया स विप्रो भार्यया सह ।
हृष्टः संपूजयामास तद्वाक्यममृतोपमम् ॥ १-१७५-१९ (७९५४)
ततः कुन्ती च विप्रश्च सहितावनिलात्मजम् ।
तमब्रूतां कुरुष्वेति स तथेत्यब्रवीच्च तौ ॥ ॥ १-१७५-२० (७९५५)

इति श्रीमन्महाभारते आदिपर्वणि पञ्चसप्तत्यधिकशततमोऽध्यायः
॥ १७५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७५-९ अभिसन्धौ अभिप्राये ॥
१-१७५-१७ विप्रकुर्युर्वाधेरन् ॥
पञ्चसप्तत्यधिकशततमोऽध्यायः ॥
१७५ ॥

आदिपर्व - अध्याय १७६
॥ श्रीः ॥
१.१७६. अध्यायः १७६

Mahabharata - Adi Parva - Chapter Topics
भिक्षाटनार्थं गतानां युधिष्ठिरादीनां गृहं प्रत्यागमनम् ॥ १ ॥
भीमो बकं प्रति प्रेष्यत इति ज्ञातवतो युधिष्ठिरस्य संतापः ॥ २ ॥
भीमसेनप्रभावकथनेन कुन्त्या कृतं युधिष्ठिराश्वासनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७६-० (७९५६)
वैशम्पायन उवाच। १-१७६-०क्ष् (१०१७)
करिष्य इति भीमेन प्रतिज्ञातेऽथ भारत ।
आजग्मुस्ते ततः सर्वे भैक्षमादाय पाण्डवाः ॥ १-१७६-१ (७९५७)
ग्भीमसेनं ततो दृष्ट्वा आपूर्णवदनं तथा ।

बुबोध धर्मराजस्तु हृषितं भीममच्युतम् ॥ १-१७६-२ (७९५८)
तोषस्य कारणं यत्तु मनसाऽचिन्तयद्गुरुः ।
स समीक्ष्य तदा राजन्योद्धुकामं युधिष्ठिरः ॥' १-१७६-३ (७९५९)
आकारेणैव तं ज्ञात्वा पाण्डुपुत्रो युधिष्ठिरः ।
रहः समुपविश्यैकस्ततः पप्रच्छ मातरम् ॥ १-१७६-४ (७९६०)
किं चिकीर्षत्ययं कर्म भीमो भमपराक्रमः ।
भवत्यनुमते कच्चित्स्वयं वा कर्तुमिच्छति ॥ १-१७६-५ (७९६१)
कुन्त्युवाच। १-१७६-६क्ष् (१०१८)
ममैव वचनादेष करिष्यति परन्तपः ।
ब्राह्मणार्थे महत्कृत्यं मोक्षाय नगरस्य च ॥ १-१७६-६ (७९६२)
ग्बकाय कल्पितं पुत्र महान्तं बलिमुत्तमम् ।
भीमो भुनक्तु सुस्पष्टमप्येकाहं तपःसुतः ॥' १-१७६-७ (७९६३)
युधिष्ठिर उवाच। १-१७६-८क्ष् (१०१९)
किमिदं साहसं तीक्ष्णं भवत्या दुष्करं कृतम् ।
परित्यागं हि पुत्रस्य न प्रशंसन्ति साधवः ॥ १-१७६-८ (७९६४)
कथं परसुतस्यार्थे स्वसुतं त्यक्तुमिच्छसि ।
लोकवेदविरुद्धं हि पुत्रत्यागात्कृतं त्वया ॥ १-१७६-९ (७९६५)
यस्य बाहू समाश्रित्य सुखं सर्वे शयामहे ।
राज्यं चापहृतं क्षुद्रैराजिहीर्षामहे पुनः ॥ १-१७६-१० (७९६६)
यस्य दुर्योधनो वीर्यं चिन्तयन्नमितौजसः ।
न शेते रजनीः सर्वा दुःखाच्छकुनिना सह ॥ १-१७६-११ (७९६७)
यस्य वीरस्य वीर्येण मुक्ता जतुगृहाद्वयम् ।
अन्येभ्यश्चैव पापेभ्यो निहतश्च पुरोचनः ॥ १-१७६-१२ (७९६८)
यस्य वीर्यं समाश्रित्य वसुपूर्णां वसुन्धराम् ।
इमां मन्यामहे प्राप्तां निहत्य धृतराष्ट्रजान् ॥ १-१७६-१३ (७९६९)
तस्य व्यवसितस्त्यागो बुद्धिमास्थाय कां त्वया ।
कच्चिन्नु दुःखैर्बुद्धिस्ते विलुप्ता गतचेतसः ॥ १-१७६-१४ (७९७०)
कुन्त्युवाच। १-१७६-१५क्ष् (१०२०)
युधिष्ठिर न संतापस्त्वया कार्यो वृकोदरे ।
न चायं बुद्धिदौर्बल्याद्व्यवसायः कृतो मया ॥ १-१७६-१५ (७९७१)
ग्न च शोकेन बुद्धिः सा विलुप्ता गतचेकसः।'
इह विप्रस्य भवने वयं पुत्र सुखोषिताः ।
अज्ञाता धार्तराष्ट्राणां सत्कृता वीतमन्यवः ॥ १-१७६-१६ (७९७२)
तस्य प्रतिक्रिया पार्थ मयेयं प्रसमीक्षिता ।
एतावानेव पुरुषः कृतं यस्मिन्न नश्यति ॥ १-१७६-१७ (७९७३)
यावच्च कुर्यादन्योऽस्य कुर्याद्बहुगुमं ततः ।

ग्ब्राह्मणार्थे महान्धर्मो जानामीत्थं वृकोदरे ॥' १-१७६-१८ (७९७४)
दृष्ट्वा भीमस्य विक्रान्तं तदा जतुगृहे महत् ।
हिडिम्बस्य वधाच्चैवं विश्वासो मे वृकोदरे ॥ १-१७६-१९ (७९७५)
बाह्वोर्बलं हि भीमस्य नागायुतसमं महत् ।
येन यूयं गजप्रख्या निर्व्यूढा वारणावतात् ॥ १-१७६-२० (७९७६)
वृकोदरेण सदृशो बलेनान्यो न विद्यते ।
यो व्यतीयाद्युधि श्रेष्ठमपि वज्रधरं स्वयम् ॥ १-१७६-२१ (७९७७)
जातमात्रः पुरा चैव ममाङ्कात्पतितो गिरौ ।
शरीरगौरवादस्य शिला गात्रैर्विचूर्णिता ॥ १-१७६-२२ (७९७८)
तदहं प्रज्ञया ज्ञात्वा बलं भीमस्य पाण्डव ।
प्रतिकार्ये च विप्रस्य ततः कृतवती मतिम् ॥ १-१७६-२३ (७९७९)
नेदं लोभान्न चाज्ञानान्न च मोहाद्विनिश्चितम् ।
बुद्धिपूर्वं तु धर्मस्य व्यवसायः कृतो मया ॥ १-१७६-२४ (७९८०)
अर्थौ द्वावपि निष्पन्नौ युधिष्ठिर भविष्यतः ।
प्रतीकारश्च वासस्य धर्मश्च चरितो महान् ॥ १-१७६-२५ (७९८१)
यो ब्राह्मणस्य साहाय्यं कुर्यादर्थेषु कर्हिचित् ।
क्षत्रियः स शुभाँल्लोकानाप्नुयादिति मे मतिः ॥ १-१७६-२६ (७९८२)
क्षत्रियस्यैव कुर्वाणः क्षत्रियो वधमोक्षणम् ।
विपुलां कीर्तिमाप्नोति लोकेऽस्मिंश्च परत्र च ॥ १-१७६-२७ (७९८३)
वैश्यस्यार्थे च साहाय्यं कुर्वाणः क्षत्रियो भुवि ।
स सर्वेष्वपि लोकेषु प्रजा रञ्जयते ध्रुवम् ॥ १-१७६-२८ (७९८४)
शूद्रं तु मोचयेद्राजा शरणार्थिनमागतम् ।
प्राप्नोतीह कुले जन्म सद्द्रव्ये राजपूजिते ॥ १-१७६-२९ (७९८५)
एवं मां भगवान्व्यासः पुरा पौरवनन्दन ।
प्रोवाचासुकरप्रज्ञस्तस्मादेवं चिकीर्षितम् ॥ ॥ १-१७६-३० (७९८६)

इति श्रीमन्महाभारते आदिपर्वणि बकवधपर्वणि
षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१७६-६ मोक्षाय बकभयादिति शेषः ॥
१-१७६-२५ प्रतीकारः प्रत्युपकारः ॥
षट्सप्तत्यधिकशततमोऽध्यायः ॥
१७६ ॥

आदिपर्व - अध्याय १७७
॥ श्रीः ॥

१.१७७. अध्यायः १७७

Mahabharata - Adi Parva - Chapter Topics
परेद्युः प्रातः ब्राह्मणेन दत्तमन्नं भुक्त्वा बकाय प्रापणीयं
अन्नादिपूर्णं शकटमारुह्य बकवंन प्रति भीमस्य गमनम् ॥ १ ॥
तत्र भीमेन शकटस्तान्नभोजनम् ॥ २ ॥
अन्नं भुञ्जानं भीमं दृष्ट्वा क्रुद्धेन बकेन सह भीमस्य युद्धम् ॥ ३ ॥
बकवधः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७७-० (७९८७)
युधिष्ठिर उवाच। १-१७७-०क्ष् (१०२१)
उपपन्नमिदं मातस्त्वया यद्बुद्धिपूर्वकम् ।
आर्तस्य ब्राह्मणस्यैतदनुक्रोशादिदं कृतम् ॥ १-१७७-१ (७९८८)
ध्रुवमेष्यति भीमोऽयं निहत्य पुरुषादकम् ।
सर्वथा ब्राह्मणस्यार्थे यदनुक्रोशवत्यसि ॥ १-१७७-२ (७९८९)
यथा त्विदं न विन्देयुर्नरा नगरवासिनः ।
तथाऽयं ब्राह्मणो वाच्यः परिग्राह्यश्च यत्नतः ॥ १-१७७-३ (७९९०)
वैशम्पायन उवाच। १-१७७-४क्ष् (१०२२)
ग्युधिष्ठिरेण संमन्त्र्य ब्राह्मणार्थमरिन्दम ।
कुन्ती प्रविश्य तान्सर्वान्मन्त्रयामास भारत ॥ १-१७७-४ (७९९१)
अथ रात्र्यां व्यतीतायां भीमसेनो महाबलः ।
ब्राह्मणं समुपागम्य वचश्चेदमुवाच ह ॥ १-१७७-५ (७९९२)
आपदस्त्वां विमोक्ष्येऽहं सपुत्रं ब्राह्मण प्रियम् ।
मा भैषी राक्षसात्तस्मान्मां ददातु बलिं भवान् ॥ १-१७७-६ (७९९३)
इद मामशितं कर्तुं प्रयतस्व सकृद्गृहे ।
आथात्मानं प्रादास्यामि तस्मै घोराय रक्षसे ॥ १-१७७-७ (७९९४)
त्वरध्वं किं विलम्बध्वे मा चिरं कुरुतानघाः ।
व्यवस्येयं मनः प्राणैर्युष्मान्रक्षितुमद्य वै ॥ १-१७७-८ (७९९५)
वैशम्पायन उवाच। १-१७७-९क्ष् (१०२३)
एवमुक्तः स भीमेन ब्राह्मणो भरतर्षभ ।
सुहृदां तत्समाख्याय ददावन्नं सुसंस्कृतम् ॥ १-१७७-९ (७९९६)
पिशितोदनमाजह्रुरथास्मै पुरवासिनः ।
सघृतं सोपदंशं च सूपैर्नानाविधैः सह ॥ १-१७७-१० (७९९७)
तदाऽशित्वा भीमसेनो मांसानि विविधानि च ।

मोदकानि च मुख्यानि चित्रोदनचयान्बहून् ॥ १-१७७-११ (७९९८)
ततोऽपिबद्दधिघटान्सुबहून्द्रोणसंमितान् ।
तस्य भुक्तवतः पौरा यथावत्समुपार्जितान् ॥ १-१७७-१२ (७९९९)
उपजह्रुर्भृतं भागं समृद्धमनसस्तदा ।
ततो रात्र्यां व्यतीतायां सव्यञ्जनदधिप्लुतम् ॥ १-१७७-१३ (८०००)
समारुह्यान्नसंपूर्णं शकटं स वृकोदरः ।
प्रययौ तूर्यनिर्घोषैः पौरैश्च परिवारितः ॥ १-१७७-१४ (८००१)
आत्मानमेषोऽन्नभूतो राक्षसाय प्रदास्यति ।
तरुणोऽप्रतिरूपश्च दृढ औदरिको युवा ॥ १-१७७-१५ (८००२)
वाग्भिरेवंप्रकाराभिः स्तूयमानो वृकोदरः ।
चुचोद स बलीवर्दौ युक्तौ सर्वाङ्गकालकौ ॥ १-१७७-१६ (८००३)
वादित्राणां प्रवादेन ततस्तं पुरुषादकम् ।
अभ्यगच्छत्सुसंहृष्टः सर्वत्र मनुजैर्वृतः ॥ १-१७७-१७ (८००४)
संप्राप्य स च तं देशमेकाकी समुपाययौ ।
पुरुषादभयाद्भीतस्तत्रैवासीज्जनव्रजः ॥ १-१७७-१८ (८००५)
स गत्वा दूरमध्वानं दक्षिणामभितो दिशम् ।
यतोपदिष्टमुद्देशे ददर्श विपुलं द्रुमम् ॥ १-१७७-१९ (८००६)
केशमज्जास्थिमेदोभिर्बाहूरुचरणैरपि ।
आर्द्रैः शुष्कैश्च संकीर्णमभितोऽथ वनस्पतिम् ॥ १-१७७-२० (८००७)
गृध्रकङ्कबलच्छन्नं गोमायुगणसेवितम् ।
उग्रगन्धमचक्षुष्यं श्मशानमिव दारुणम् ॥ १-१७७-२१ (८००८)
तं प्रविश्य महावृक्षं चिन्तयामास वीर्यवान् ।
यावन्न पश्यते रक्षो बकाभिख्यं बलोत्तरम् ॥ १-१७७-२२ (८००९)
आचितं विविधैर्भोज्यैरन्नैरुच्चावचैरिदम् ।
शकटं सूपसंपूर्णं यावद्द्रक्ष्यति राक्षसः ॥ १-१७७-२३ (८०१०)
तावदेवेह भोक्ष्येऽहं दुर्लभं हि पुनर्भवेत् ।
विप्रकीर्येत सर्वं हि प्रयुद्धे मयि रक्षसा ॥ १-१७७-२४ (८०११)
अभोज्यं हि शवस्पर्शे निगृहीते बके भवेत् ।
स त्वेवं भीमकर्मा तु भीमसेनोऽभिलक्ष्य च ॥ १-१७७-२५ (८०१२)
उपविश्य विविक्तेऽन्नं भुङ्क्ते स्म परमं परः ।
तं ततः सर्वतोऽपश्यन्द्रुमानारुह्य नागराः ॥ १-१७७-२६ (८०१३)
नारक्षो बलिमश्नीयादेवं बहु च मानवाः ।
भुङ्क्ते ब्राह्मणरूपेण बकोऽयमिति चाब्रुवन् ॥ १-१७७-२७ (८०१४)
स तं हसति तेजस्वी तदन्नमुपभुज्य च।'
आसाद्य तु वनं तस्य रक्षसः पाण्डवो बली ।
आजुहाव ततो नाम्ना तदन्नमुपपादयन् ॥ १-१७७-२८ (८०१५)

ततः स राक्षसः क्रुद्धो भीमस्य वचनात्तदा ।
आजगाम सुसंक्रुद्धो यत्र भीमो व्यवस्थितः ॥ १-१७७-२९ (८०१६)
महाकायो महावेगो दारयन्निव मेदिनीम् ।
लोहिताक्षः करालश्च लोहितश्मश्रुमूर्धजः ॥ १-१७७-३० (८०१७)
आकर्णाद्भिन्नवक्त्रश्च शङ्कुकर्णो विभीषणः ।
त्रिशिखां भ्रुकुटिं कृत्वा संदश्य दशनच्छदम् ॥ १-१७७-३१ (८०१८)
भुञ्जानमन्नं तं दृष्ट्वा भीमसेनं स राक्षसः ।
विवृत्य नयने क्रुद्ध इदं वचनमब्रवीत् ॥ १-१७७-३२ (८०१९)
कोऽयमन्नमिदं भुङ्क्ते मदर्थमुपकल्पितम् ।
पश्यतो मम दुर्बुद्धिर्यियासुर्यमसादनम् ॥ १-१७७-३३ (८०२०)
भीमसेनस्ततः श्रुत्वा प्रहसन्निव भारत ।
राक्षसं तमनादृत्य भुङ्क्त एव पराङ्मुखः ॥ १-१७७-३४ (८०२१)
रवं स भैरवं कृत्वा समुद्यम्य करावुभौ ।
अभ्यद्रवद्भीमसेनं जिङांसुः पुरुषादकः ॥ १-१७७-३५ (८०२२)
तथापि परिभूयैनं प्रेक्षमाणो वृकोदरः ।
राक्षसं भुङ्क्त एवान्नं पाण्डवः परवीरहा ॥ १-१७७-३६ (८०२३)
अमर्षेण तु संपूर्णः कुन्तीपुत्रं वृकोदरम् ।
जघान पृष्ठे पाणिभ्यामुभाभ्यां पृष्ठतः स्थितः ॥ १-१७७-३७ (८०२४)
तथा बलवता भीमः पाणिभ्यां भृशमाहतः ।
नैवावलोकयामास राक्षसं भुङ्क्त एव सः ॥ १-१७७-३८ (८०२५)
ततः स भूयः संक्रुद्धो वृक्षमादाय राक्षसः ।
ताडयिष्यंस्तदा भीमं पुनरभ्यद्रवद्बली ॥ १-१७७-३९ (८०२६)
क्षिप्तं क्रुद्धेन तं वृक्षं प्रतिजग्राह वीर्यवान् ।
सव्येन पाणिना भीमो दक्षिणेनाप्यभुङ्क्त ह ॥ १-१७७-४० (८०२७)
ग्शकटान्नं ततो भुक्त्वा रक्षसः पाणिना सह ।
गृह्णन्नेव तदा वृक्षं निःशेषं पर्वतोपमम् ॥ १-१७७-४१ (८०२८)
भीमसेनो हसन्नेव भुक्त्वा त्यक्त्वा च राक्षसम् ।
पीत्वा दधिघटान्पूर्णान्घृतकुम्भाञ्शतं शतम् ॥ १-१७७-४२ (८०२९)
वार्युपस्पृश्य संहृष्टस्तस्थौ गिरिरिवापरः ।
भ्रामयन्तं महावृक्षमायान्तं भीमदर्शनम् ॥ १-१७७-४३ (८०३०)
दृष्ट्वोत्थायाहवे वीरः सिंहनादं व्यनादयत् ।
भुजवेगं तथाऽऽस्फोटं क्ष्वेलितं च महास्वनम् ॥ १-१७७-४४ (८०३१)
कृत्वाऽऽह्वयत संक्रुद्धो भीमसेनोऽथ राक्षसम् ।
उवाचाशनिशब्देन ध्वनिना भीषयन्निव ॥ १-१७७-४५ (८०३२)
भीम उवाच। १-१७७-४६क्ष् (१०२४)
बहुकालं सुपुष्टं ते शरीरं राक्षसाधम ।

द्विपच्चतुष्पन्मांसैश्च बहुभिश्चौदनैरपि ॥ १-१७७-४६ (८०३३)
मद्बाहुबलमाश्रित्य न त्वं भूयस्त्वशिष्यसि ।
अद्य मद्बाहुनिष्पिष्टो गमिष्यसि यमालयम् ॥ १-१७७-४७ (८०३४)
अद्यप्रभृति स्वप्स्यन्ति वेत्रकीयनिवासिनः ।
निरुद्विग्नाः पुरस्यास्य कण्टके सूद्धृते मया ॥ १-१७७-४८ (८०३५)
अद्य युद्धे शरीरं ते कङ्कगोमायुवायसाः ।
मया हतस्य खादन्तु विकर्षन्तु च भूतले ॥ १-१७७-४९ (८०३६)
वैशम्पायन उवाच। १-१७७-५०क्ष् (१०२५)
एवमुक्त्वा सुसंक्रुद्धः पार्थो बकजिघांसया ।
उपाधावद्बकश्चापि पार्थं पार्थिवसत्तम ॥ १-१७७-५० (८०३७)
महाकायो महावेगो दारयन्निव मेदिनीम् ।
पिशङ्गरूपः पिङ्गाक्षो भीमसेनमभिद्रवत् ॥ १-१७७-५१ (८०३८)
त्रिशिखां भ्रुकुटीं कृत्वा संदश्य दशनच्छदम् ।
भृशं स भूयः संक्रुद्धो वृक्षमादाय राक्षसः ॥ १-१७७-५२ (८०३९)
ताडयिष्यंस्तदा भीमं तरसाऽभ्यद्रवद्बली ।
क्रुद्धेनाभिहतं वृक्षं प्रतिजग्राह लीलया ॥ १-१७७-५३ (८०४०)
सव्येन पाणिना भीमः प्रहसन्निव भारत ।
ततः स पुनरुद्यम्य वृक्षान्बहुविधान्बली ॥ १-१७७-५४ (८०४१)
प्राहिणोद्भीमसेनाय बकोऽपि बलवान्रणे ।
सर्वानपोहयद्वृक्षान्स्वस्य हस्तस्य शाखया ॥ १-१७७-५५ (८०४२)
तद्वृक्षयुद्धमभवद्वृक्षषण्डविनाशनम् ॥
महत्सुघोरं राजेन्द्र बकपाण्डवयोस्तदा ॥ १-१७७-५६ (८०४३)
नाम विश्राव्य स बकः समभिद्रुत्य पाण्डवम् ।
समयुध्यत तीव्रेण वेगेन पुरुषादकः ॥ १-१७७-५७ (८०४४)
तयोर्वेगेन महता पृथिवी समकम्पत ।
पादपांश्च महामात्रांश्चूर्णयामासतुः क्षणात् ॥ १-१७७-५८ (८०४५)
द्रुतमागत्य पाणिभ्यां गृहीत्वा चैनमाक्षिपत् ।
आक्षिप्तो भीमसेनश्च पुनरेवोत्थितो हसन् ॥ १-१७७-५९ (८०४६)
आलिङ्ग्यापि बकं भीमो न्यहनद्वसुधातले ।
भीमो विसर्जयित्वैनं समाश्वसिहि राक्षस ॥ १-१७७-६० (८०४७)
इत्युक्त्वा पुनरास्फोट्य उत्तिष्ठेति च सोऽब्रवीत् ।
समुत्पत्य ततः क्रुद्धो रूपं कृत्वा महत्तरम् ॥ १-१७७-६१ (८०४८)
विरूपः सहसा तस्थौ२ तर्जयित्वा वृकोदरम् ।
अहसद्भीमसेनोऽपि राक्षसं भीमदर्शनम् ॥ १-१७७-६२ (८०४९)
असौ गृहीत्वा पाणिभ्यां पृष्ठतश्च व्यवस्थितः ।
जानुभ्यां पीडयित्वाथ पातयामास भूतले ॥ १-१७७-६३ (८०५०)

पुनः क्रुद्धो विसृज्यैनं राक्षसं क्रोधजीवितम् ।
स्वां कटीमीषदुन्नम्य बाहू तस्य परामृशत् ॥ १-१७७-६४ (८०५१)
तस्य बाहू समादाय त्वरमाणो वृकोदरः ।
उत्क्षिप्य चावधूयैनं पातयन्बलवान्भुवि ॥ १-१७७-६५ (८०५२)
तं तु वामेन पादेन क्रुद्धो भीमपराक्रमः ।
उरस्येनं समाजघ्ने भीमस्तु पतितं भुवि ॥ १-१७७-६६ (८०५३)
व्यात्ताननेन घोरेण लम्बजिह्वेन रक्षसा ।
तेनाभिद्रुत्य भीमेन भीमो मूर्ध्नि समाहतः ॥ १-१७७-६७ (८०५४)
एवं निहन्यमानः स राक्षसेन बलीयसा ।
रोषेण महताऽऽविष्टो भीमो भीमपराक्रमः ॥ १-१७७-६८ (८०५५)
गृहीत्वा मध्यमुत्क्षिप्य बली जग्राह राक्षसम् ।
तावन्योन्यं पीडयन्तौ पुरुषादवृकोदरौ ॥ १-१७७-६९ (८०५६)
मत्ताविव महानागावन्योन्यं विचकर्षतुः ॥ १-१७७-७० (८०५७)
बाहुविक्षेपशब्दैश्च भीमराक्षसयोस्तदा ।
वेत्रकीयपुरी सर्वा वित्रस्ता समपद्यत ॥' १-१७७-७१ (८०५८)
तयोर्वेगेन महता तत्र भूमिरकम्पत ।
पादपान्वीरुधश्चैव चूर्णयामासतू रयात् ॥ १-१७७-७२ (८०५९)
समागतौ च तौ वीरावन्योन्यवधकाङ्क्षिणौ ।
गिरिभिर्गिरिशृङ्गैश्च पाषाणैः पर्वतच्युतैः ॥ १-१७७-७३ (८०६०)
अन्योन्यं ताडयन्तौ तौ चूर्णयामासतुस्तदा ।
आयामविस्तराभ्यां च परितो योजनद्वयम् ॥ १-१७७-७४ (८०६१)
निर्महीरुहपाषाणतृणकुञ्जलतावलिम् ।
चक्रतुर्युद्धदुर्मत्तौ कूर्मपृष्ठोपमां महीम् ॥ १-१७७-७५ (८०६२)
मुहूर्तमेवं संयुध्य समं रक्षःकुरूद्वहौ ।
ततो रक्षोविनाशाय मतिं कृत्वा कुरूत्तमः ॥ १-१७७-७६ (८०६३)
दन्तान्कटकटीकृत्य दष्ट्वा च दशनच्छदम् ।
नेत्रे संवृत्य विकटं तिर्यक्प्रैक्षत राक्षसम् ॥ १-१७७-७७ (८०६४)
अथ तं लोलयित्वा तु भीमसेनो महाबलः ।
अगृह्णात्परिरभ्यैनं बाहुभ्यां परिरभ्य च ॥ १-१७७-७८ (८०६५)
जानुभ्यां पार्श्वयोः कुक्षौ पृष्ठे वक्षसि जघ्निवान् ।
भग्नोरुबाहुहृच्चैव विस्रंसद्देहबन्धनः ॥ १-१७७-७९ (८०६६)
प्रस्वेददीर्घनिश्वासो निर्यज्जीवाक्षितारकः ।
अजाण्डास्फोटनं कुर्वन्नाक्रोशंश्च श्वसञ्छनैः ॥ १-१७७-८० (८०६७)
भूमौ निपत्य विलुठन्दण्डाहत इवोरगः ।
विस्फुरन्तं महाकायं परितो विचकर्ष ह ॥ १-१७७-८१ (८०६८)
विकृष्यमाणो वेगेन पाण्डवेन बलीयसा ।

समयुज्यत तीव्रेण श्रमेण पुरुषादकः ॥' १-१७७-८२ (८०६९)
हीयमानबलं रक्षः समीक्ष्य पुरुषर्षभः ।
निष्पिष्य भूमौ जानुभ्यां समाजघ्ने वृकोदरः ॥ १-१७७-८३ (८०७०)
ततो ऽस्य जानुना पृष्ठमवपीड्य बलादिव ।
बाहुना परिजग्राह दक्षिणेन शिरोधराम् ॥ १-१७७-८४ (८०७१)
सव्येन च कटीदेशे गृह्य वाससि पाण्डवः ।
जानुन्यारोप्य तत्पृष्ठं महाशब्दं बभञ्ज ह ॥ १-१७७-८५ (८०७२)
ततोऽस्य रुधिरं वक्त्रात्प्रादुरासीद्विशांपते ।
भज्यमानस्य भीमेन तस्य घोरस्य रक्षसः ॥ ॥ १-१७७-८६ (८०७३)

इति श्रीमन्महाभारते आदिपर्वणि बकवधपर्वणि
सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७७-३१ त्रिशिखां त्रिरेखाम् ॥
सप्तसप्तत्यधिकशततमोऽध्यायः ॥
१७७ ॥

आदिपर्व - अध्याय १७८
॥ श्रीः ॥
१.१७८. अध्यायः १७८

Mahabharata - Adi Parva - Chapter Topics
बकवधानन्तरं समागतानां तत्परिवाराणां भीमेन समयकरणम् ॥ १ ॥
नगरद्वारदेशे बकशरीरं निधाय ब्राह्मणगृहमा गत्य भीमेन
कुन्त्यादीन्प्रति बकवृत्तान्तकथनम् ॥ २ ॥
मृतबकदर्शार्थं पौराणां गमनम् ॥ ३ ॥
ब्रह्ममहोत्सवकरणम् ॥ ४ ॥
बकवधेन पौराणां भीमसेवनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७८-० (८०७४)
वैशम्पायन उवाच। १-१७८-०क्ष् (१०२६)
ततः स भग्नपार्श्वाङ्गो नदित्वा भैरवं रवम् ।
शैलराजप्रतीकाशो गतासुरभवद्बकः ॥ १-१७८-१ (८०७५)
तेन शब्देन वित्रस्तो जनस्तस्याथ रक्षसः ।

निष्पपात गृहाद्राजन्सहैव परिचारिभिः ॥ १-१७८-२ (८०७६)
ग्बकानुजस्तदा राजन्भीमं शरणमेयिवान् ।
ततस्तु निहतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ।
राक्षसाः परमत्रस्ता भीमं शरणमाययुः ॥' १-१७८-३ (८०७७)
तान्भीतान्विगतज्ञानान्भीमः प्रहरतां वरः ।
सांत्वयामास बलवान्समये च न्यवेशयत् ॥ १-१७८-४ (८०७८)
न हिंस्या मानुषा भूयो युष्माभिरिति कर्हिचित् ।
हिंसतां हि वधः शीघ्रमेवमेव भवेदिति ॥ १-१७८-५ (८०७९)
तस्य तद्वचनं श्रुत्वा तानि रक्षांसि भारत ।
एवमस्त्विति तं प्राहुर्जगृहुः समयं च तम् ॥ १-१७८-६ (८०८०)
ग्सगणस्तु बकभ्राता प्राणमत्पाण्डवं तदा।'
ततः प्रभृति रक्षांसि तत्र सौम्यानि भारत ।
नगरे प्रत्यदृश्यन्त नरैर्नगरवासिभिः ॥ १-१७८-७ (८०८१)
ततो भीमस्तमादाय गतासुं पुरुषादकम् ।
ग्निष्कर्णनेत्रं निर्जिह्वं निःसंज्ञं कण्ठपीडनात् ।
कुर्वन्बहुविधां चेष्टां पुरद्वारमकर्षत ॥ १-१७८-८ (८०८२)
द्वारदेशे विनिक्षिप्य पुरमागात्स मारुतिः ।
स एव राक्षसो नूनं पुनरायाति नः पुरीम् ॥ १-१७८-९ (८०८३)
सबालवृद्धाः पुरुषा इति भीताः प्रदुद्रुवुः ।
ततो भीमो बकं हत्वा गत्वा ब्राह्मणवेश्म तत् ॥ १-१७८-१० (८०८४)
बलीवर्दौ च शकटं ब्राह्मणाय न्यवेदयत् ।
तूष्णीमन्तर्गृहं गच्छेत्यभिधाय द्विजोत्तमम् ॥ १-१७८-११ (८०८५)
मातृभ्रातृसमक्षं च गत्वा शयनमेव च ।
आचचक्षेऽथ तत्सर्वं रात्रौ युद्धमभूद्यथा ॥' १-१७८-१२ (८०८६)
ततो नरा विनिष्क्रान्ता नगरात्कल्यमेव तु ।
ददृशुर्निहतं भूमौ राक्षसं रुधिरोक्षितम् ॥ १-१७८-१३ (८०८७)
तमद्रिकूटसदृशं विनिकीर्णं भयानकम् ।
दृष्ट्वा संहृष्टरोमाणो बभूवुस्तत्र नागराः ॥ १-१७८-१४ (८०८८)
एकचक्रां ततो गत्वा प्रवृत्तिं प्रददुः पुरे ।
ततः सहस्रशो राजन्नरा नगरवासिनः ॥ १-१७८-१५ (८०८९)
तत्राजग्मुर्बकं द्रष्टुं सस्त्रीवृद्धकुमारकाः ।
ततस्ते विस्मिताः सर्वे कर्म दृष्ट्वाऽतिमानुषम् ।
दैवतान्यर्चयाञ्चक्रुः प्रार्थितानि पुरा भयात् ॥ १-१७८-१६ (८०९०)
ततः प्रगणयामासुः कस्य वारोऽद्य भोजने ।
ज्ञात्वा चागम्य तं विप्रं पप्रच्छुः सर्व एव ते ॥ १-१७८-१७ (८०९१)
एवं पृष्टः स बहुशो रक्षमाणश्च पाण्डवान् ।

उवाच नागरान्सर्वानिदं विप्रर्षभस्तदा ॥ १-१७८-१८ (८०९२)
ब्राह्मण उवाच। १-१७९-१९क्ष् (१०२७)
आज्ञापितं मामशने रुदन्तं सह बन्धुभिः ।
ददर्श ब्राह्मणः कश्चिन्मन्त्रसिद्धो महामनाः ॥ १-१७८-१९ (८०९३)
परिपृच्छ्य स मां पूर्वं परिक्लेशं पुरस्य च ।
अब्रवीद्ब्राह्मणश्रेष्ठो विश्वास्य प्रहसन्निव ॥ १-१७८-२० (८०९४)
प्रापयिष्याम्यहं तस्मा अन्नमेतद्दुरात्मने ।
मन्निमित्तं भयं चापि न कार्यमिति चाब्रवीत् ॥ १-१७८-२१ (८०९५)
स तदन्नमुपादाय गतो बकवनं प्रति ।
तेन नूनं भवेदेतत्कर्म लोकहितं कृतम् ॥ १-१७८-२२ (८०९६)
ततस्ते ब्राह्मणाः सर्वे क्षत्रियाश्च सुविस्मिताः ।
वैश्याः शूद्राश्च मुदिताश्चक्रुर्ब्रह्ममहं तदा ॥ १-१७८-२३ (८०९७)
ततो जानपदाः सर्वे आजग्मुर्नगरं प्रति ।
तमद्भुततमं द्रष्टुं पार्थास्तत्रैव चावसन् ॥ १-१७८-२४ (८०९८)
वेत्रकीयगृहे सर्वे परिवार्य वृकोदरम् ।
विस्मयादभ्यगच्छन्त भीमं भीमपराक्रमम् ॥ १-१७८-२५ (८०९९)
न वै न संभवेत्सर्वं ब्राह्मणेषु महात्मसु ।
इति सत्कृत्य तं पौराः परिवव्रुः समन्ततः ॥ १-१७८-२६ (८१००)
अयं त्राता हि खेदानां पितेव परमार्थतः ।
अस्य शुश्रूषवः पादौ परिचर्य उपास्महे ॥ १-१७८-२७ (८१०१)
पशुमद्दधिमनच्चास्य वारं भक्तमुपाहरन् ।
तस्मिन्हते ते पुरुषा भीताः समनुबोधनाः ॥ १-१७८-२८ (८१०२)
ततः संप्राद्रवन्पार्थाः सह मात्रा परन्तपाः ।
आगच्छन्नेकचक्रां ते गाण्डवाः संशितव्रताः ॥ १-१७८-२९ (८१०३)
वैदिकाध्ययने युक्ता जटिला ब्रह्मचारिणः ।
अवसंस्ते च तत्रापि ब्राह्मणस्य निवेशने ।
मात्रर सहैकचक्रायां दीर्घकालं सहोषिताः ॥ ॥ १-१७८-३० (८१०४)

इति श्रीमन्महाभारते आदिपर्वणि बकवधपर्वणि
अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ ॥ समाप्तं च
बकवधपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१७८-१३ कल्यं प्रातःकाले ॥
१-१७८-१९ आज्ञापितं राजकीयैरिति शेषः । अशने राक्षसस्य भोजनार्थम् ॥
अष्टसप्तत्यधिकशततमोऽध्यायः ॥

आदिपर्व - अध्याय १७९
॥ श्रीः ॥
१.१७९. अध्यायः १७९

(अथ चैत्ररथपर्व ॥ ११ ॥)
Mahabharata - Adi Parva - Chapter Topics
ब्राह्मणगृहे प्रतिश्रयार्थमागतस्य कस्यचिद्ब्राह्मणस्य मुखात्
पाण्डवानां द्रौपदीस्वयंवरश्रवणम् ॥ १ ॥
पाण्डवकृतधृष्टद्युम्नद्रौपदीसंभवप्रश्नस्य
ब्राह्मणेनोत्तरकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१७९-० (८१०५)
जनमेजय उवाच। १-१७९-०क्ष् (१०२८)
ते तथा पुरुषव्याघ्रा निहत्य बकराक्षसम् ।
अत ऊर्ध्वं ततो ब्रह्मन्किमकुर्वत पाण्डवाः ॥ १-१७९-१ (८१०६)
वैशम्पायन उवाच। १-१७९-२क्ष् (१०२९)
तत्रैव न्यवसन्राजन्निहत्य बकराक्षसम् ।
अधीयानाः परं ब्रह्म ब्राह्मणस्य निवेशने ॥ १-१७९-२ (८१०७)
ततः कतिपयाहस्य ब्राह्मणः संशितव्रतः ।
प्रतिश्रयार्थी तद्वेश्म ब्राह्मणस्याजगाम ह ॥ १-१७९-३ (८१०८)
स म्यक् पूजयित्वा तं विप्रं विप्रर्षभस्तदा ।
ददौ प्रतिश्रयं तस्मै सदा सर्वातिथिव्रतः ॥ १-१७९-४ (८१०९)
ततस्ते पाण्डवाः सर्वे सह कुन्त्या नरर्षभाः ।
उपासाञ्चक्रिरे विप्रं कथयन्तं कथाः शुभाः ॥ १-१७९-५ (८११०)
कथयामास देशांश्च तीर्थानि सरितस्तथा ।
राज्ञश्च विविधाश्चर्यान्देशांश्चैव पुराणि च ॥ १-१७९-६ (८१११)
स तत्राकथयद्विप्रः कथान्ते जनमेजय ।
पञ्चालेष्वद्भुताकारं याज्ञसेन्याः स्वयंवरम् ॥ १-१७९-७ (८११२)
धृष्टद्युम्नस्य चोत्पत्तिमुत्पत्तिं च शिखण्डिनः ।
अयोनिजत्वं कृष्णाया द्रुपदस्य महामखे ॥ १-१७९-८ (८११३)
तदद्भुततमं श्रुत्वा लोके तस्य महात्मनः ।
विस्तरेणैव पप्रच्छुः कथां ते पुरुषर्षभाः ॥ १-१७९-९ (८११४)
पाण्डवा ऊचुः। १-१७९-१०क्ष् (१०३०)

कथं द्रुपदपुत्रस्य धृष्टद्युम्नस्य पावकात् ।
वेदीमध्याच्च कृष्णायाः संभवः कथमद्भुतः ॥ १-१७९-१० (८११५)
कथं द्रोणान्महेष्वासात्सर्वाण्यस्त्राण्यशिक्षत ।
ग्धृष्टद्युम्नो महेष्वासः कथं द्रोणस्य मृत्युदः।'
कथं विप्र सखायौ तौ भिन्नौ कस्य कृतेन वा ॥ १-१७९-११ (८११६)
वैशम्पायन उवाच। १-१७९-१२क्ष् (१०३१)
एवं तैश्चोदितो राजन्स विप्रः पुरुषर्षभैः ।
कथयामास तत्सर्वं द्रौपदीसंभवं तदा ॥ ॥ १-१७९-१२ (८११७)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
ऊनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१७९-७ याज्ञसेन्याः द्रौपद्याः ॥
७ ॥
ऊनाशीत्यधिकशततमोऽध्यायः ॥
१७९ ॥

आदिपर्व - अध्याय १८०
॥ श्रीः ॥
१.१८०. अध्यायः १८०

Mahabharata - Adi Parva - Chapter Topics
धृष्टद्युम्नाद्युत्पत्तिकथनार्थं द्रोणद्रुपदयोरुत्पत्तिकथनपूर्वकं
द्रुपदवृत्तान्तकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८०-० (८११८)
ब्राह्मण उवाच। १-१८०-०क्ष् (१०३२)
गङ्गाद्वारं प्रति महान्बभूवर्षिर्महातपाः ।
भरद्वाजो महाप्राज्ञः सततं संशितव्रतः ॥ १-१८०-१ (८११९)
सोऽभिषेक्तुं गतो गङ्गां पूर्वमेवागतां सतीम् ।
ददर्शाप्सरसं तत्र घृताचीमाप्लुतामृषिः ॥ १-१८०-२ (८१२०)
तस्या वायुर्नदीतीरे वसनं व्यहरत्तदा ।
अपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे तदा ॥ १-१८०-३ (८१२१)
तस्यां संसक्तमनसः कौमारब्रह्मचारिणः ।

चिरस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥ १-१८०-४ (८१२२)
ततः समभवद्द्रोणः कुमारस्तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्वशः ॥ १-१८०-५ (८१२३)
भरद्वाजस्य तु सखा पृषतो नाम पार्थिवः ।
तस्यापि द्रुपदो नाम तदा समभवत्सुतः ॥ १-१८०-६ (८१२४)
स नित्यमाश्रमं गत्वा द्रोणेन सह पार्षतः ।
चिक्रीडाध्ययनं चैव चकार क्षत्रियर्षभः ॥ १-१८०-७ (८१२५)
ततस्तु पृषतेऽतीते स राजा द्रुपदोऽभवत् ।
द्रोणोऽपि रामं शुश्राव दित्सन्तं वसु सर्वशः ॥ १-१८०-८ (८१२६)
वनं तु प्रस्थितं रामं भरद्वाजसुतोऽब्रवीत् ।
आगतं वित्तकामं मां विद्धि द्रोणं द्विजोत्तम ॥ १-१८०-९ (८१२७)
राम उवाच। १-१८०-१०क्ष् (१०३३)
शरीरमात्रमेवाद्य मया समवशेषितम् ।
अस्त्राणि वा शरीरं वा ब्रह्मन्नेकतमं वृणु ॥ १-१८०-१० (८१२८)
द्रोण उवाच। १-१८०-११क्ष् (१०३४)
अस्त्राणि चैव सर्वाणि तेषां संहारमेव च ।
प्रयोगं चैव सर्वेषां दातुमर्हति मे भवान् ॥ १-१८०-११ (८१२९)
ब्राह्मण उवाच। १-१८०-१२क्ष् (१०३५)
तथेत्युक्त्वा ततस्तस्मै प्रददौ भृगुनन्दनः ।
प्रतिगृह्य तदा द्रोणः कृतकृत्योऽभवत्तदा ॥ १-१८०-१२ (८१३०)
संप्रहृष्टमना द्रोणो रामात्परमसम्मतम् ।
ब्रह्मास्त्रं समनुज्ञाप्य नरेष्वभ्यधिकोऽभवत् ॥ १-१८०-१३ (८१३१)
ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान् ।
अब्रवीत्पुरुषव्याघ्रः सखायं विद्धि मामिति ॥ १-१८०-१४ (८१३२)
द्रुपद उवाच। १-१८०-१५क्ष् (१०३६)
नाश्रोत्रियः श्रोत्रियस्य नारथी रथिनः सखा ।
नाराजा पार्थिवस्यापि सखिपूर्वं किमिष्यते ॥ १-१८०-१५ (८१३३)
ब्राह्मण उवाच। १-१८०-१६क्ष् (१०३७)
स विनिश्चित्य मनसा पाञ्चाल्यं प्रति बुद्धिमान् ।
जगाम कुरुमुख्यानां नगरं नागसाह्वयम् ॥ १-१८०-१६ (८१३४)
तस्मै पौत्रान्समादाय वसूनि विविधानि च ।
प्राप्ताय प्रददौ भीष्मः शिष्यान्द्रोणाय धीमते ॥ १-१८०-१७ (८१३५)
द्रोणः शिष्यांस्ततः पार्थानिदं वचनमब्रवीत् ।
समानीय तु ताञ्शिष्यान्द्रुपदस्यासुखाय वै ॥ १-१८०-१८ (८१३६)
आचार्यवेतनं किंचिद्धृदि यद्वर्तते मम ।
कृतास्त्रैस्तत्प्रदेयं स्यात्तदृतं वदतानघाः ।

सोऽर्जुनप्रमुखैरुक्तस्तथाऽस्त्विति गुरुस्तदा ॥ १-१८०-१९ (८१३७)
यदा च पाण्डवाः सर्वे कृतास्त्राः कृतनिश्चयाः ।
ततो द्रोणोऽब्रवीद्भूयो वेतनार्थमिदं वचः ॥ १-१८०-२० (८१३८)
पार्षतो द्रुपदो नाम छत्रवत्यां नरेश्वरः ।
तस्मादाकृष्य तद्राज्यं मम शीघ्रं प्रदीयताम् ॥ १-१८०-२१ (८१३९)
ग्धार्तराष्ट्राश्च ते भीताः पाञ्चालान्पाण्डवादयः ।
धार्तराष्ट्रैश्च सहिताः पुनर्द्रोणेन चोदिताः ॥ १-१८०-२२ (८१४०)
यज्ञसेनेन संगम्य कर्णदुर्योधनादयः ।
निर्जिताः संन्यवर्तन्त तथा ते क्षत्रियर्षभाः ॥' १-१८०-२३ (८१४१)
ततः पाण्डुसुताः पञ्च निर्जित्य द्रुपदं युधि ।
द्रोणाय दर्शयामासुर्बद्ध्वा ससचिवं तदा ॥ १-१८०-२४ (८१४२)
ग्महेन्द्र इव दुर्धर्षो महेन्द्र इव दानवम् ।
महेन्द्रपुत्रः पाञ्चालं जितवानर्जुनस्तदा ॥ १-१८०-२५ (८१४३)
तद्दृष्ट्वा तु महावीर्यं फल्गुनस्य महौजसः ।
व्यस्मयन्त जनाः सर्वे यज्ञसेनस्य बान्धवाः। १-१८०-२६ (८१४४)
द्रोण उवाच। १-१८०-२७क्ष् (१०३८)
प्रार्थयामि त्वया सख्यं पुनरेव नराधिप ।
अराजा किल नो राज्ञः सखा भवितुमर्हति ॥ १-१८०-२७ (८१४५)
अतः प्रयतितं राज्ये यज्ञसेन त्वया सह ।
राजाऽसि दक्षिणे कूले भागीरथ्याहमुत्तरे ॥ १-१८०-२८ (८१४६)
ब्राह्मण उवाच। १-१८०-२९क्ष् (१०३९)
एवमुक्तो हि पाञ्चाल्यो भारद्वाजेन धीमता ।
उवाचास्त्रविदां श्रेष्ठं द्रोणं ब्राह्मणसत्तमम् ॥ १-१८०-२९ (८१४७)
एवं भवतु भद्रं ते भारद्वाज महामते ।
सख्यं तदेव भवतु शश्वद्यदभिमन्यसे ॥ १-१८०-३० (८१४८)
एवमन्योन्यमुक्त्वा तौ कृत्वा सख्यमनुत्तमम् ।
जग्मतुर्द्रोणपाञ्चाल्यौ यथागतमरिन्दमौ ॥ १-१८०-३१ (८१४९)
असत्कारः स तु महान्मुहूर्तमपि तस्य तु ।
नापैति हृदयाद्राज्ञो दुर्मनाः स कृशोऽभवत् ॥ ॥ १-१८०-३२ (८१५०)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१८०-१० एकतममेकतरम् ॥
१-१८०-१३ समनुज्ञाप्य निशम्य । प्राप्येत्यपि पठन्ति ॥

१-१८०-२१ छत्रवत्यामहिच्छत्रे ॥
१-१८०-२८ भागीरथ्याहमिति संधिरार्षः ॥
अशीत्यधिकशततमोऽध्यायः ॥
१८० ॥

आदिपर्व - अध्याय १८१
॥ श्रीः ॥
१.१८१. अध्यायः १८१

Mahabharata - Adi Parva - Chapter Topics
द्रोणहन्तृपुत्रोत्पादनेच्छया याजकान्वेषणार्थमतटो द्रुपदस्य उपयाजवचनेन याजसमीपगमनम् ॥ १ ॥
पुत्रार्थं यज्ञे आरब्धे
अग्निकुण्डाद्धृष्टद्युम्नस्योत्पत्तिस्तच्चरितमाकाशवाणी च ॥ २ ॥
पाञ्चाल्या उत्पत्तिः ॥ ३ ॥
तयोर्नामकरणम् ॥ ४ ॥
द्रोणेन धृष्टद्युम्नस्यास्त्रशिक्षणम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८१-० (८१५१)
ब्राह्मण उवाच। १-१८१-०क्ष् (१०४०)
अमर्षी द्रुपदो राजा कर्मसिद्धान्द्विजर्षभान् ।
अन्विच्छन्परिचक्राम ब्राह्मणावसथान्बहून् ॥ १-१८१-१ (८१५२)
पुत्रजन्म परीप्सन्वै शोकोपहतचेतनः ।
ग्द्रोणेन वैरं द्रुपदो न सुष्वाप स्मरन्सदा।'
नास्ति श्रेष्ठमपत्यं म इति नित्यमचिन्तयत् ॥ १-१८१-२ (८१५३)
जातान्पुत्रान्स निर्वेदाद्धिग्बन्धूनिति चाब्रवीत् ।
निःश्वासपरमश्चासीद्द्रोणं प्रतिचिकीर्षया ॥ १-१८१-३ (८१५४)
प्रभावं विनयं शिक्षां द्रोणस्य चरितानि च ।
क्षात्रेण च बलेनास्य चिन्तयन्नाध्यगच्छत ॥ १-१८१-४ (८१५५)
प्रतिकर्तुं नृपश्रेष्ठो यतमानोऽपि भारत ।
अभितः सोऽथ कल्माषीं गङ्गाकूले परिभ्रमन् ॥ १-१८१-५ (८१५६)
ब्राह्मणावसथं पुम्यमाससाद महीपतिः ।
तत्र नास्नातकः कश्चिन्न चासीदव्रती द्विजः ॥ १-१८१-६ (८१५७)
अधीयानौ महाभागौ सोऽपश्यत्संशितव्रतौ ।
याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ ॥ १-१८१-७ (८१५८)

संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ ।
तारणेयौ युक्तरूपौ ब्राह्मणावृषिसत्तमौ ॥ १-१८१-८ (८१५९)
स तावामन्त्रयामास सर्वकामैरतन्द्रितः ।
बुद्ध्वा बलं तयोस्तत्र कनीयांसमुपह्वरे ॥ १-१८१-९ (८१६०)
प्रपेदे च्छन्दयन्कामैरुपयाजं धृतव्रतम् ।
पादशुश्रूषणे युक्तः प्रियवाक्सर्वकामदः ॥ १-१८१-१० (८१६१)
अर्चयित्वा यथान्यायमुपयाजमुवाच सः ।
येन मे कर्मणा ब्रह्मन्पुत्रः स्याद्द्रोणमृत्यवे ॥ १-१८१-११ (८१६२)
ग्अर्जुनस्य भवेद्भार्या भवेद्या वरवर्णिनी।'
उपयाज कृते तस्मिन् गवां दाताऽस्मि तेऽर्बुदं ॥ १-१८१-१२ (८१६३)
यद्वा तेऽन्यद्द्विजश्रेष्ठ मनसः सुप्रियं भवेत् ।
सर्वं तत्ते प्रदाताऽहं न हि मेऽत्रास्ति संशयः ॥ १-१८१-१३ (८१६४)
इत्युक्तो नाहमित्येवं तमृषिः प्रत्यभाषत ।
आराधयिष्यन्द्रुपदः स तं पर्यचरत्पुनः ॥ १-१८१-१४ (८१६५)
ततः संवत्सरस्यान्ते द्रुपदं स द्विजोत्तमः ।
उपयाजोऽब्रवीत्काले राजन्मधुरया गिरा ॥ १-१८१-१५ (८१६६)
ज्येष्ठो भ्राता ममागृह्णाद्विचरन् गहने वने ।
अपरिज्ञातशौचायां भूमौ निपतितं फलम् ॥ १-१८१-१६ (८१६७)
तदपश्यमहं भ्रातुरसाम्प्रतमनुव्रजन् ।
विमर्शं संकरादाने नायं कुर्यात्कदाचन ॥ १-१८१-१७ (८१६८)
दृष्ट्वा फलस्य नापश्यद्दोषान्पापानुबन्धकान् ।
विविनक्ति न शौचं यः सोऽन्यत्रापि कथं भवेत् ॥ १-१८१-१८ (८१६९)
संहिताध्ययनं कुर्वन्वसन्गुरुकुले च यः ।
भैक्षमुत्सृष्टमन्येषां भुङ्क्ते स्म च यदा तदा ॥ १-१८१-१९ (८१७०)
कीर्तयन्गुणमन्नानामघृणी च पुनः पुनः ।
तं वै फलार्थिनं मन्ये भ्रातरं तर्कचक्षुषा ॥ १-१८१-२० (८१७१)
तं वै गच्छस्व नृपते स त्वां संयाजयिष्यति ।
जुगुप्समानो नृपतिर्मनसेदं विचिन्तयन् ॥ १-१८१-२१ (८१७२)
उपयाजवचः श्रुत्वा याजस्याश्रममभ्यगात् ।
अभिसम्पूज्य पूजार्हमथ याजमुवाच ह ॥ १-१८१-२२ (८१७३)
अयुतानि ददान्यष्टौ गवां याजय मां विभो ।
द्रोणवैराभिसन्तप्तं प्रह्लादयितुमर्हसि ॥ १-१८१-२३ (८१७४)
स हि ब्रह्मविदां श्रेष्ठो ब्रह्मास्त्रे चाप्यनुत्तमः ।
तस्माद्द्रोणः पराजैष्ट मां वै स सखिविग्रहे ॥ १-१८१-२४ (८१७५)
क्षत्रियो नास्ति तस्यास्यां पृथिव्यां कश्चिदग्रणीः ।
कौरवाचार्यमुख्यस्य भारद्वाजस्य धीमतः ॥ १-१८१-२५ (८१७६)

द्रोणस्य शरजालानि प्राणिदेहहराणि च ।
षडरत्नि धनुश्चास्य दृश्यते परमं महत् ॥ १-१८१-२६ (८१७७)
स हि ब्राह्मणवेषेण क्षात्रं वेगमशंसयम् ।
प्रतिहन्ति महेष्वासो भारद्वाजो महामनाः ॥ १-१८१-२७ (८१७८)
क्षत्रोच्छेदाय विहितो जामदग्न्य इवास्थितः ।
तस्य ह्यस्त्रबलं घोरमप्रधृष्यं नरैर्भुवि ॥ १-१८१-२८ (८१७९)
ब्राह्मं सन्धारयंस्तेजो हुताहुतिरिवानलः ।
समेत्य स दहत्याजौ क्षात्रधर्मपुरःसरः ॥ १-१८१-२९ (८१८०)
ब्रह्मक्षत्रे च विहिते ब्राह्मं तेजो विशिष्यते ।
सोऽहं क्षात्राद्बलाद्धीनो ब्राह्मं तेजः प्रपेदिवान् ॥ १-१८१-३० (८१८१)
द्रोणाद्विशिष्टमासाद्य भवन्तं ब्रह्मवित्तमम् ।
द्रोणान्तकमहं पुत्रं लभेयं युधि दुर्जयम् ॥ १-१८१-३१ (८१८२)
तत्कर्म कुरु मे मे याज वितराम्यर्बुदं गवाम् ।
तथेत्युक्त्वा तु तं याजो याज्यार्थमुपकल्पयत् ॥ १-१८१-३२ (८१८३)
गुर्वर्थ इति चाकाममुपयाजमचोदयत् ।
याजो द्रोणविनाशाय प्रतिजज्ञे तथा च सः ॥ १-१८१-३३ (८१८४)
ततस्तस्य नरेन्द्रस्य उपयाजो महातपाः ।
आचख्यौ कर्म वैतानं तदा पुत्रफलाय वै ॥ १-१८१-३४ (८१८५)
स च पुत्रो महावीर्यो महातेजा महाबलः ।
इष्यते यद्विधो राजन्भविता ते तथाविधः ॥ १-१८१-३५ (८१८६)
भारद्वाजस्य हन्तारं सोऽभिसन्धाय भूपतिः ।
आजह्रे तत्तथा सर्वं द्रुपदः कर्मसिद्धये ॥ १-१८१-३६ (८१८७)
याजस्तु हवनस्यान्ते देवीमाज्ञापयत्तदा ।
प्रेहि मां राज्ञि पृषति मिथुनं त्वामुपस्थितम् ॥ १-१८१-३७ (८१८८)
राज्ञ्युवाच। १-१८१-३८क्ष् (१०४१)
अवलिप्तं मुखं ब्रह्मन्दिव्यान्गन्धान्बिभर्मि च ।
सूतार्थे नोपलब्धाऽस्मि तिष्ठ याज मम प्रिये ॥ १-१८१-३८ (८१८९)
याज उवाच। १-१८१-३९क्ष् (१०४२)
याजेन श्रपितं हव्यमुपयाजाभिमन्त्रितम् ।
कथं कामं न सन्दध्यात्सा त्वं विप्रेहि तिष्ठ वा ॥ १-१८१-३९ (८१९०)
ब्राह्मण उवाच। १-१८१-४०क्ष् (१०४३)
एवमुक्त्वा तु याजेन हुते हविषि संस्कृते ।
उत्तस्थौ पावकात्तस्मात्कुमारो देवसन्निभिः ॥ १-१८१-४० (८१९१)
ज्वालावर्णो घोररूपः किरीटी वर्म चोत्तमम् ।
बिभ्रत्सखङ्गः सशरो धनुष्मान्विनदन्मुहुः ॥ १-१८१-४१ (८१९२)
सोऽध्यारोदद्रथवरं तेन च प्रययौ तदा ।

ततः प्रणेदुः पञ्चालाः प्रहृष्टाः साधुसाध्विति ॥ १-१८१-४२ (८१९३)
हर्षाविष्टांस्ततश्चैतान्नेयं सेहे वसुन्धरा ।
भयापहो राजपुत्रः पञ्चालानां यशस्करः ॥ १-१८१-४३ (८१९४)
राज्ञः शोकापहो जात एष द्रोणवधाय वै ।
इत्युवाच महद्भूतमदृश्यं खेचरं तदा ॥ १-१८१-४४ (८१९५)
कुमारी चापि पाञ्चाली वेदीमध्यात्समुत्थिता ।
सुभगा दर्शनीयाङ्गी स्वसितायतलोचना ॥ १-१८१-४५ (८१९६)
श्यामा पद्मपलाशाक्षी नीलकुञ्चितमूर्धजा ।
ताम्रतुङ्गनखी सुभ्रूश्चारुपीनपयोधरा ॥ १-१८१-४६ (८१९७)
मानुषं विग्रहं कृत्वा साक्षादमरवर्णिनी ।
नीलोत्पलसमो गन्धो यस्याः क्रोशात्प्रधावति ॥ १-१८१-४७ (८१९८)
या बिभर्ति परं रूपं यस्या नास्त्युपमा भुवि ।
देवदानवयक्षाणामीप्सितां देवरूपिणीम् ॥ १-१८१-४८ (८१९९)
ग्सदृशी पाण्डुपुत्रस्य अर्जुनस्येति भारत ।
ऊचुः प्रहृष्टमनसो राजभक्तिपुरस्कृताः ॥' १-१८१-४९ (८२००)
तां चापि जातां सुश्रोणीं वागुवाचाशरीरिणी ।
सर्वयोषिद्वरा कृष्णा निनीषुः क्षत्रियान्क्षयम् ॥ १-१८१-५० (८२०१)
सुरकार्यमियं काले करिष्यति सुमध्यमा ।
अस्या हेतोः कौरवाणां महदुत्पत्स्यते भयम् ॥ १-१८१-५१ (८२०२)
तच्छ्रुत्वा सर्वपञ्चालाः प्रणेदुः सिंहसङ्घवत् ।
न चैतान्हर्षसम्पूर्णानियं सेहे वसुन्धरा ॥ १-१८१-५२ (८२०३)
ग्पाञ्चालराजस्तां दृष्ट्वा हर्षादश्रूण्यवर्तयत् ।
परिष्वज्य च तां कृष्णां स्नुषा पाण्डोरिति ब्रुवन् ।
अङ्कमारोप्य पाञ्चालीं राजा हर्षमवाप सः ॥' १-१८१-५३ (८२०४)
तौ दृष्ट्वा पार्षती याजं प्रपेदे वै सुतार्थिनी ।
न वै मदन्यां जननीं जानीयातामिमाविति ॥ १-१८१-५४ (८२०५)
तथेत्युवाच तां याजो राज्ञः प्रियचिकीर्षया ।
तयोश्च नामनी चक्रुर्द्विजाः सम्पूर्णमानसाः ॥ १-१८१-५५ (८२०६)
धृष्टत्वादत्यमर्षित्वाद्द्युम्नाद्युत्संभवादपि ।
धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति ॥ १-१८१-५६ (८२०७)
कृष्णेत्येवाब्रुवकन्कृष्णां कृष्णा ऽभूत्सा हि वर्णतः ।
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे ॥ १-१८१-५७ (८२०८)
ग्वैदिकाध्ययने पारं धृष्टद्युम्नो गतः परम् ॥' १-१८१-५८ (८२०९)
धृष्टद्युम्नं तु पाञ्चाल्यमानीय स्वं निवेशनम् ।
उपाकरोदस्त्रहेतोर्भारद्वाजः प्रतापवान् ॥ १-१८१-५९ (८२१०)
अमोक्षणीयं दैवं हि भावि मत्वा महामतिः ।

तथा तत्कृतवान्द्रोण आत्मकीर्त्यनुरक्षणात् ॥ ॥१-१८१-६० (८२११)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वमि
एकाशीत्यधिकशततमोऽध्यायः ॥१८१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१८१-७ परमे ब्रह्मणि वेदे वा स्थातुं शीलं ययोस्तौ ॥
१-१८१-८ तारणेयौ कुमारीप्रभवौ सूर्यभक्तौ वा ॥
१-१८१-१७ संकरादाने दोषयुक्तवस्त्वादाने ॥
१-१८१-१९ उत्सृष्टं उच्छिष्टम् ॥
१-१८१-२० अघृणी लज्जाहीनः ॥
१-१८१-२१ इदं याजचरितं जुगुप्समानो निन्दन् । विचिन्तयन् स्वकार्यं चेति शेषः ॥
१-१८१-२३ अष्टावयुतानि ददानि । रिक्तपाणिर्न पश्येत राजानं देवतां गुरुमिति स्मृतेरुपायनमात्रमेतत् न दक्षिणा अर्वुदप्रतिज्ञानात् ॥
१-१८१-२४ पराजैष्ट पराजितवान् ॥
१-१८१-२५ तस्य तस्मात् । अग्रणीः श्रेष्ठः ॥
१-१८१-५६ धृष्टत्वात् प्रगल्भत्वात् । अत्यन्तममर्षः शत्र्वुत्कर्षासहिष्णुत्वं तद्वत्त्वात्। द्युम्नं वित्तं तच्च राज्ञां बलमेव कवचकुण्डलादिकं वा सहोत्पन्नं तदादिर्यस्य शस्त्रास्त्रशौर्योत्साहादेस्तद्द्युम्नादि तस्योत्संभवादुत्कर्षेणोत्पत्तेश्च ॥

एकाशीत्यधिकशततमोऽध्यायः ॥
१८१ ॥

आदिपर्व - अध्याय १८२
॥ श्रीः ॥
१.१८२. अध्यायः १८२

Mahabharata - Adi Parva - Chapter Topics

जनवार्तया दुर्योधनेन पाण्डवानां दाहं, स्वपुरोहितवचनेन नाशराहित्यं च, ज्ञातवता तेषां जीवने सन्दिहानेन द्रुपदेन उद्घोषितस्य पुत्रीस्वयंवरस्य कुन्तींप्रति ब्राह्मणेन कथनम् ॥१ ॥
युष्मासु तत्रागतेष्वीश्वरेच्छया त्वत्पुत्राणामन्यतमं पाञ्चाली वृणुयादपीत्युक्तवता ब्राह्मणेन सह पाण्डवानां पाञ्चालनगरं प्रति गमनम् ॥२ ॥

१-१८२-० (८२१२)
ग्ब्राह्मण उवाच। १-१८२-०क्ष् (१०४४)
श्रुत्वा जतुगृहे वृत्तं ब्राह्मणाः संशितव्रताः ।
पाञ्चालराजं द्रुपदमिदं वचनमब्रुवन् ॥ १-१८२-१ (८२१३)
धार्तराष्ट्राः सहामात्या मन्त्रयित्वा परस्परम् ।
पाण्डवानां विनाशाय मतिं चक्रुः सुदुष्कराम् ॥ १-१८२-२ (८२१४)
दुर्योधनेन प्रहितः पुरोचन इति श्रुतः ।
वारणावतमासाद्य कृत्वा जतुगृहं महत् ॥ १-१८२-३ (८२१५)
तस्मिन्गृहे सुविस्रब्धान्पाण्डवान्पृथया सह ।
अर्धरात्रे महाराज दग्धवानतिदुर्मतिः ॥ १-१८२-४ (८२१६)
तेनाग्निना स्वयं चापि दग्धः क्षुद्रो नृशंसवत् ।
एतच्छ्रुत्वा सुसंहृष्टो धृतराष्ट्रः सबान्धवः ॥ १-१८२-५ (८२१७)
अल्पशोकः प्रहृष्टात्मा शशास विदुरं तदा ।
पाण्डवानां महाप्राज्ञ कुरु पिण्डोदकक्रियाम् ॥ १-१८२-६ (८२१८)
अहो विधिवशादेव गतास्ते यमसादनम् ।
इत्युक्त्वा प्रारदत्तत्र धृतराष्ट्रः सबान्धवः ॥ १-१८२-७ (८२१९)
श्रुत्वा भीष्मेण विदुरः कृतवानौर्ध्वदेहिकम् ।
पाण्डवानां विनाशाय कृतं कर्म दुरात्मना ॥ १-१८२-८ (८२२०)
एतत्कार्यस्य कर्ता तु न दृष्टो न श्रुतः पुरा ।
एतद्वृत्तं महाभाग पाण्डवान्प्रति नः श्रुतम् ॥ १-१८२-९ (८२२१)
ब्राह्मण उवाच। १-१८२-१०क्ष् (१०४५)
श्रुत्वा तु वचनं तेषां यज्ञसेनो महामतिः ।
यथा तज्जनकः शोचेदौरसस्य विनाशे ॥ १-१८२-१० (८२२२)
तथाऽतप्यत वै राजा पाण्डवानां विनाशने ।
समाहूय प्रकृतयः सहिताः सर्वनागरैः ॥ १-१८२-११ (८२२३)
कारुण्यादेव पाञ्चालः प्रोवाचेदं वचस्तदा। १-१८२-१२ (८२२४)
द्रुपद उवाच ।
अहो रूपमहो धैर्यमहो वीर्यमहो बलम् ॥ १-१८२-१२क्ष् (१०४६)
चिन्तयामि दिवारात्रमर्जुनं प्रति बान्धवाः ।
भ्रातृभिः सहितो मात्रा सोऽदह्यत हुताशने ॥ १-१८२-१३ (८२२५)
किमाश्चर्यमितो लोके कालो हि दुरतिक्रमः ।
मिथ्याप्रतिज्ञो लोकेषु किं करिष्यामि सांप्रतं ॥ १-१८२-१४ (८२२६)
अन्तर्गतेन दुःखेन दह्यमानो दिवानिशम् ।
याजोपयाजौ सत्कृत्य याचितौ तौ मयाऽनघौ ॥ १-१८२-१५ (८२२७)

भारद्वाजस्य हन्तारं देवीं चाप्यर्जुनस्य वै ।
लोकस्तद्वेद यच्चापि तथा याजेन मे श्रुतम् ॥ १-१८२-१६ (८२२८)
याजेन पुत्रकामीयं हुत्वा चोत्पादिताविमौ ।
धृष्टद्युम्नश्च कृष्णा च मम तुष्टिकरावुभौ ॥ १-१८२-१७ (८२२९)
किं करिष्यामि ते नष्टाः पाण्डवाः पृथया सह। १-१८२-१८ (८२३०)
ब्राह्मण उवाच ।
इत्येवमुक्त्वा पाञ्चालः शुशोच परमातुरः ॥ १-१८२-१८क्ष् (१०४७)
दृष्ट्वा शोचन्तमत्यर्थं पाञ्चालमिदमब्रवीत् ।
पुरोधाः सत्वसंपन्नः सम्यग्विद्याविशेषवित् ॥ १-१८२-१९ (८२३१)
वृद्धानुशासने सक्ताः पाण्डवा धर्मचारिणः ।
तादृशा न विनश्यन्ति नैव यान्ति पराभवम् ॥ १-१८२-२० (८२३२)
मया दृष्टमिदं सत्यं शृणु त्वं मनुजाधिप ।
ब्राह्मणैः कथितं सत्यं वेदेषु च मया श्रुतम् ॥ १-१८२-२१ (८२३३)
बृहस्पतिमतेनाथ पौलोम्या च पुरा श्रुतम् ।
नष्ट इन्द्रो बिसग्रन्थ्यामुपश्रुत्या हि दर्शितः ॥ १-१८२-२२ (८२३४)
उपश्रुतिर्महाराज पाण्डवार्थे मया श्रुता ।
यत्रकुत्रापि जीवन्ति पाण्डवास्ते न संशयः ॥ १-१८२-२३ (८२३५)
मया दृष्टानि लिङ्गानि इहैवैष्यन्ति पाण्डवाः ।
यन्निमित्तमिहायान्ति तच्छृणुष्व नराधिप ॥ १-१८२-२४ (८२३६)
स्वयंवरः क्षत्रियाणां कन्यादाने प्रदर्शितः ।
स्वयंवरस्तु नगरे घुष्यतां राजसत्तम ॥ १-१८२-२५ (८२३७)
यत्र वा निवसन्तस्ते पाण्डवाः पृथया सह ।
दूरस्था वा समीपस्था स्वर्गस्था वाऽपि पाण्डवाः ॥ १-१८२-२६ (८२३८)
श्रुत्वा स्वयंवरं राजन्समेष्यन्ति न संशयः ।
तस्मात्स्वयंवरो राजन्घुष्यतां मा चिरं कृथाः ॥ १-१८२-२७ (८२३९)
ब्राह्मण उवाच। १-१८२-२८क्ष् (१०४८)
श्रुत्वा पुरोहितेनोक्तं पाञ्चालः प्रीतिमांस्तदा ।
घोषयामास नगरे द्रौपद्यास्तु स्वयंवरम् ॥ १-१८२-२८ (८२४०)
पुष्यमासे तु रोहिण्यां शुक्लपक्षे शुभे तिथौ ।
दिवसैः पञ्चसप्तत्या भविष्यति न संशयः ॥ १-१८२-२९ (८२४१)
देवगन्धर्वयक्षाश्च ऋषयश्च तपोधनाः ।
स्वयंवरं द्रष्टुकामा गच्छन्त्येव न संशयः ॥ १-१८२-३० (८२४२)
तव पुत्रा महात्मानो दर्शनीयो विशेषतः ।
यदृच्छया सा पाञ्चाली गच्छेद्वान्यतमं पतिम् ॥ १-१८२-३१ (८२४३)
को हि जानाति लोकेषु प्रजापतिमतं शुभण् ।
तस्मात्सपुत्रा गच्छेथा यदि ब्राह्मणि रोचते ॥ १-१८२-३२ (८२४४)

नित्यकालं सुभिक्षास्ते पाञ्चालास्तु तपोधने ।
यज्ञसेनस्तु राजा स ब्रह्मण्यः सत्यसङ्गरः ॥ १-१८२-३३ (८२४५)
ब्रह्मण्या नागराः सर्वे ब्राह्मणाश्चातिथिप्रियाः ।
नित्यकालं प्रदास्यन्ति आमन्त्रणमयाचितम् ॥ १-१८२-३४ (८२४६)
अहं च तत्र गच्छामि ममैभिः सह शिष्यकैः ।
एकसार्थाः प्रयाताः स्मो ब्राह्मण्या यदि रोचते ॥ १-१८२-३५ (८२४७)
एतावदुक्त्वा वचनं ब्राह्मणो विरराम ह ॥ ॥ १-१८२-३६क्ष् (१०४९)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८२-९ एतत्कार्यस्य एतादृशकार्यस्य ॥
१-१८२-२१ दृष्टं ऊहितम् ॥
द्व्यशीत्यधिकशततमोऽध्यायः ॥
१८२ ॥

आदिपर्व - अध्याय १८३
॥ श्रीः ॥
१.१८३. अध्यायः १८३

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानां द्रुपदनगरप्रथानम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८३-० (८२४८)
वैशम्पायन उवाच। १-१८३-०क्ष् (१०५०)
एतच्छ्रुत्वा ततः सर्वे पाण्डवा भरतर्षभ ।
मनसा द्रौपदीं जग्मुरनङ्गशरपीडिताः ॥' १-१८३-१ (८२४९)
ततस्तां रजनीं राजञ्छल्यविद्धा इवाभवन् ।
सर्वे चास्वस्थमनसो बभूवुस्ते महाबलाः ॥ १-१८३-२ (८२५०)
ततः कुन्ती सुतान्दृष्ट्वा सर्वांस्तद्गतचेतसः ।
युधिष्ठिरमुवाचेदं वचनं सत्यवादिनी ॥ १-१८३-३ (८२५१)
चिररात्रोषिताः स्मेह ब्राह्मणस्य निवेशने ।
रममाणाः पुरे रम्ये लब्धभैक्षा महात्मनः ॥ १-१८३-४ (८२५२)
यानीह रमणीयानि वनान्युपवनानि च ।

सर्वाणि तानि दृष्टानि पुनःपुनररिन्दम ॥ १-१८३-५ (८२५३)
पुनर्दृष्टानि तानीह प्रीणयन्ति न नस्तथा ।
भैक्षं च न तथा वीर लभ्यते कुरुनन्दन ॥ १-१८३-६ (८२५४)
ते वयं साधु पञ्चालान्गच्छाम यदि मन्यसे ।
अपूर्वदर्शनं वीर रमणीयं भविष्यति ॥ १-१८३-७ (८२५५)
सुभिक्षाश्चैव पञ्चालाः श्रूयन्ते शत्रुकर्शन ।
यज्ञसेनश्च राजाऽसौ ब्रह्मण्य इति सुश्रुम ॥ १-१८३-८ (८२५६)
एकत्र चिरवासश्च क्षमो न च मतो मम ।
ते तत्र साधु गच्छामो यदि त्वं पुत्र मन्यसे ॥ १-१८३-९ (८२५७)
युधिष्ठिर उवाच। १-१८३-१०क्ष् (१०५१)
भवत्या यन्मतं कार्यं तदस्माकं परं हितम् ।
अनुजांस्तु न जानामि गच्छेयुर्नेति वा पुनः ॥ १-१८३-१० (८२५८)
वैशम्पायन उवाच। १-१८३-११क्ष् (१०५२)
ततः कुन्ती भीमसेनमर्जुनं यमजौ तथा ।
उवाच गमनं ते च तथेत्येवाब्रुवंस्तदा ॥ १-१८३-११ (८२५९)
तत आमन्त्र्य तं विप्रं कुन्ती राजसुतैः सह ।
प्रतस्थे नगरीं रम्यां द्रुपदस्य महात्मनः ॥ ॥ १-१८३-१२ (८२६०)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

आदिपर्व - अध्याय १८४
॥ श्रीः ॥
१.१८४. अध्यायः १८४

Mahabharata - Adi Parva - Chapter Topics
प्रस्थानसमयागते व्यासेन पाण्डवान्प्रति
द्रौपदीवृत्तान्तकथनपूर्वकं भविष्यद्द्रौपदीलाभकथनम् ॥ १ ॥
व्यासस्य प्रतिनिवर्तनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८४-० (८२६१)
वैशम्पायन उवाच। १-१८४-०क्ष् (१०५३)
वसत्सु तेषु प्रच्छन्नं पाण्डवेषु महात्मसु ।
आजगामाथ तान्द्रष्टुं व्यासः सत्यवतीसुतः ॥ १-१८४-१ (८२६२)
तमागतमभिप्रेक्ष्य प्रत्युद्गम्य परन्तपाः ।

प्रणिपत्याभिवाद्यैनं तस्थुः प्राञ्जलयस्तदा ॥ १-१८४-२ (८२६३)
समनुज्ञाप्य तान्सर्वानासीनान्मुनिरब्रवीत् ।
प्रच्छन्नं पूजितः पार्थैः प्रीतिपूर्वमिदं वचः ॥ १-१८४-३ (८२६४)
अपि धर्मेण वर्तध्वं शास्त्रेण च परन्तपाः ।
अपि विप्रेषु पूजा वः पूजार्हेषु न हीयते ॥ १-१८४-४ (८२६५)
अथ धर्मार्थवद्वाक्यमुक्त्वा स भगवानृषिः ।
विचित्राश्च कथास्तास्ताः पुनरेवेदमब्रवीत् ॥ १-१८४-५ (८२६६)
आसीत्तपोवने काचिदृषेः कन्या महात्मनः ।
विलग्नमध्या सुश्रोणी सुभ्रूः सर्वगुणान्विता ॥ १-१८४-६ (८२६७)
कर्मभिः स्वकृतैः सा तु दुर्भगा समपद्यत ।
नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती ॥ १-१८४-७ (८२६८)
तपस्तप्तुमथारेभे पत्यर्थमसुखा ततः ।
तोषयामास तपसा सा किलोग्रेण शङ्करम् ॥ १-१८४-८ (८२६९)
तस्याः स भगवांस्तुष्टस्तामुवाच यशस्विनीम् ।
वरं वरय भद्रं ते वरदोऽस्मीति शङ्करः ॥ १-१८४-९ (८२७०)
अथेश्वरमुवाचेदमात्मनः सा वचो हितम् ।
पतिं सर्वगुणोपेतमिच्छामीति पुनःपुनः ॥ १-१८४-१० (८२७१)
तामथ प्रत्युवाचेदमीशानो वदतां वरः ।
पञ्च ते पतयो भद्रे भविष्यन्तीति भारताः ॥ १-१८४-११ (८२७२)
एवमुक्ता ततः कन्या देवं वरदमब्रवीत् ।
एकमिच्छाम्यहं देव त्वत्प्रसादात्पतिं प्रभो ॥ १-१८४-१२ (८२७३)
पुनरेवाब्रवीद्देव इदं वचनमुत्तमम् ।
पञ्चकृत्वस्त्वया ह्युक्तः पतिं देहीत्यहं पुनः ॥ १-१८४-१३ (८२७४)
देहमन्यं गतायास्ते यथोक्तं तद्भविष्यति। १-१८४-१४ (८२७५)
व्यास उवाच ।
द्रुपदस्य कुले जज्ञे सा कन्या देवरूपिणी ॥ १-१८४-१४क्ष् (१०५४)
निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिन्दिता ।
पाञ्चालनगरे तस्मान्निवसध्वं महाबलाः ।
सुखिनस्तामनुप्राप्य भविष्यथ न संशयः ॥ १-१८४-१५ (८२७६)
एवमुक्त्वा महाभागः पाण्डवान्स पितामहः ।
पार्थानामन्त्र्य कुन्तीं च प्रातिष्ठत महातपाः ॥ ॥ १-१८४-१६ (८२७७)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८४-६ विलग्नमध्या विलग्नं समदेशे शयने भूतलास्पृष्टं मध्यं शरीरमध्यभागो यस्याः सा कृशमध्येति यावत् ॥
चतुरशीत्यधिकशततमोऽध्यायः ॥
१८४ ॥

आदिपर्व - अध्याय १८५
॥ श्रीः ॥
१.१८५. अध्यायः १८५

Mahabharata - Adi Parva - Chapter Topics
पाञ्चालनगरं गच्छतां पाण्डवानां मार्गे ब्राह्मणैः सह संवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८५-० (८२७८)
वैशम्पायन उवाच। १-१८५-०क्ष् (१०५५)
गते भगवति व्यासे पाण्डवा हृष्टमानसाः ।
ग्ते प्रयाता नरव्याघ्रा मात्रा सह परन्तपाः ॥ १-१८५-१ (८२७९)
ब्राह्मणान्गच्छतो पश्यन्पाञ्चालान्सगणान्पथि ।
अथ ते ब्राह्मणा ऊचुः पाण्डवान्ब्रह्मचारिणः ॥ १-१८५-२ (८२८०)
क्व भवन्तो गमिष्यन्ति कुतो वाऽऽगच्छथेति ह। १-१८५-३ (८२८१)
युधिष्ठिर उवाच ।
प्रयातानेकचक्रायाः सोदर्यान्देवदर्शिनः ॥ १-१८४-३क्ष् (१०५६)
भवन्तो नोऽभिजानन्तु सहितान्ब्रह्मचारिणः ।
गच्छतो नस्तु पाञ्चालान्द्रुपदस्य पुरं प्रति ॥ १-१८५-४ (८२८२)
इच्छामो भवतो ज्ञातुं परं कौतूहलं हि नः ॥ १-१८५-५ (८२८३)
ब्राह्मणा ऊचुः। १-१८५-६क्ष् (१०५७)
एते सार्धं प्रयाताः स्मो वयमप्यत्र गामिनः ।
तत्राप्यद्भुतसङ्काश उत्सवो भविता महान् ॥ १-१८५-६ (८२८४)
ततस्तु यज्ञसेनस्य द्रुपदस्य महात्मनः ।
यासावयोनिजा कन्या स्थास्यते सा स्वयंवरे ॥ १-१८५-७ (८२८५)
दर्शनीयाऽनवद्याङ्गी सुकुमारी यशस्विनी ।
धृष्टद्युम्नस्य भगिनी द्रोणशत्रोः प्रतापिनः ॥ १-१८५-८ (८२८६)
जातो यः पावकाच्छूरः सशरः सशरासनः ।
सुसमिद्धान्महाभागः सोमकानां महारथः ॥ १-१८५-९ (८२८७)
यस्मिन्संजायमाने हि वागुवाचाशरीरिणी ।
एष मृत्युश्च शिष्यश्च भारद्वाजस्य जायते ॥ १-१८५-१० (८२८८)

स्वसा तस्य तु वेद्याश्च जाता तस्मिन्महामखे ।
स्त्रीरत्नमसितापाङ्गी श्यामा नीलोत्पलद्युतिः ॥ १-१८५-११ (८२८९)
तां यज्ञसेनस्य सुतां द्रौपदीं परमां स्त्रियम् ।
गच्छामस्तत्र वै द्रष्टुं तं चैवास्याः स्वयंवरम् ॥ १-१८५-१२ (८२९०)
राजानो राजपुत्राश्च यज्वानो भूरिदक्षिणाः ।
स्वाध्यायवन्तः शुचयो महात्मानो धृतव्रताः ॥ १-१८५-१३ (८२९१)
तरुणा दर्शनीयाश्च बलवन्तो दुरासदाः ।
महारथाः कृतास्त्राश्च समेष्यन्तीह भूमिपाः ॥ १-१८५-१४ (८२९२)
ते तत्र विविधं दानं विजयार्थं नरेश्वराः ।
प्रदास्यन्ति धनं गाश्च भक्ष्यभोज्यानि सर्वशः ॥ १-१८५-१५ (८२९३)
प्रतिलप्स्यामहे सर्वं दृष्ट्वा कृष्णां स्वयंवरे ।
यं च सा क्षत्रियं रङ्गे कुमारी वरयिष्यति ॥ १-१८५-१६ (८२९४)
तदा वैतालिकाश्चैव नर्तकाः सूतमागधाः ।
निबोधकाश्च देशेभ्यः समेष्यन्ति महाबलाः ॥ १-१८५-१७ (८२९५)
एतत्कौतूहलं तत्र दृष्ट्वा वै प्रतिगृह्य च ।
सहास्माभिर्महात्मानो मात्रा सह निवत्स्यथ ॥ १-१८५-१८ (८२९६)
दर्शनीयांश्च वः सर्वानेकरूपानवस्थितान् ।
समीक्ष्य कृष्मा वरयेत्संगत्यान्यतमं पतिम् ॥ १-१८५-१९ (८२९७)
अयमेकश्च वो भ्राता दर्शनीयो महाभुजः ।
नियुध्यमानो विजयेत्संगत्य द्रविणं महत् ॥ १-१८५-२० (८२९८)
युधिष्ठिर उवाच। १-१८५-२१क्ष् (१०५८)
परमं भो गमिष्यामो द्रष्टुं तत्र स्वयंवरम् ।
द्रौपदीं यज्ञसेनस्य कन्यां तस्यास्तथोत्सवम् ॥' ॥ १-१८५-२१ (८२९९)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

आदिपर्व - अध्याय १८६
॥ श्रीः ॥
१.१८६. अध्यायः १८६

Mahabharata - Adi Parva - Chapter Topics
अर्धरात्रे पाण्डवानां गङ्गातीरगमनम् ॥ १ ॥
तत्र स्त्रीभिः सह जलक्रीडां कुर्वता चित्ररथेन गन्धर्वेण सह
अर्जुनस्य युद्धम् ॥ २ ॥
आग्नेयास्त्रेण दग्धादधःपतितस्य तस्यार्जुनेन ग्रहणं ॥ ३ ॥
गन्धर्वपत्न्या प्रार्थितस्य युधिष्ठिरस्याज्ञया गन्धर्वमोचनम् ॥ ४ ॥

गन्धर्वप्रार्थनया आग्नेयास्त्रपरिवर्तनेन
तस्माद्गान्धर्वास्त्रग्रहणानुमोदनम् ॥ ५ ॥
गन्धर्वेण पाण्डवानां पुरोहितसंपादनोपदेशः ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८६-० (८३००)
वैशम्पायन उवाच। १-१८६-०क्ष् (१०५९)
ते प्रतस्थुः पुरस्कृत्य मातरं पुरुषर्षभाः ।
समैरुदङ्मुखैर्मार्गैर्यथोद्दिष्टं च भारत ॥ १-१८६-१ (८३०१)
अहोरात्रेणाभ्यगच्छन्पाञ्चालनगरं प्रति ।
अभ्याजग्मुर्लोकनदीं गङ्गां भागीरथीं प्रति ॥ १-१८६-२ (८३०२)
चन्द्रास्तमयवेलायामर्धरात्रसमागमे ।
वारि चैवानुमज्जन्तस्तीर्थं सोमाश्रयायणम्। १-१८६-३ (८३०३)
आसेदुः पुरुषव्याघ्रा गङ्गायां पाण्डुनन्दनाः ॥
उल्मुकं तु समुद्यम्य तेषामग्रे धनञ्जयः। १-१८६-४ (८३०४)
प्रकाशार्थं ययौ तत्र रक्षार्थं च महारथः ॥
तत्र गङ्गाजले रम्ये विविक्ते क्रीडयन् स्त्रियः। १-१८६-५ (८३०५)
शब्दं तेषां स शुश्राव नदीं समुपसर्पताम् ।
तेन शब्देन चाविष्टश्चुक्रोध बलवद्बली ॥ १-१८६-६ (८३०६)
स दृष्ट्वा पाण्डवांस्तत्र सह मात्रा परन्तपान् ।
विष्फारयन्धनुर्घोरमिदं वचनमब्रवीत् ॥ १-१८६-७ (८३०७)
सन्ध्या संरज्यते घोरा पूर्वरात्रागमेषु या ।
अशीतिभिर्लवैर्हीनं तन्मुहूर्तं प्रचक्षते ॥ १-१८६-८ (८३०८)
विहितं कामचाराणां यक्षगन्धर्वरक्षसाम् ।
शेषमन्यन्मनुष्याणां कर्मचारेषु वै स्मृतम् ॥ १-१८६-९ (८३०९)
लोभात्प्रचारं चरतस्तासु वेलासु वै नरान् ।
उपक्रान्ता निगृह्णीमो राक्षसैः सह बालिशान् ॥ १-१८६-१० (८३१०)
अतो रात्रौ प्राप्नुवतो जलं ब्रह्मविदो जनाः ।
गर्हयन्ति नरान्सर्वान्बलस्थान्नृपतीनपि ॥ १-१८६-११ (८३११)
आराच्च तिष्ठतास्माकं समीपं नोपसर्पत ।
कस्मान्मां नाभिजानीत प्राप्तं भागीरथीजलम् ॥ १-१८६-१२ (८३१२)
अङ्गारपर्णं गन्धर्वं वित्त मां स्वबलाश्रयम् ।
अहं हि मानी चेर्ष्युश्च कुबेरस्य प्रियः सखा ॥ १-१८६-१३ (८३१३)
अङ्गारपर्णमित्येवं ख्यातं चेदं वनं मम ।
अनुगङ्गं चरन्कामांश्चित्रं यत्र रमाम्यहम् ॥ १-१८६-१४ (८३१४)

न कौणपाः शृङ्गिणो वा न देवा न च मानुषाः ।
कुबेरस्य यथोष्णीषं किं मां समुपसर्पथ ॥ १-१८६-१५ (८३१५)
अर्जुन उवाच। १-१८६-१६क्ष् (१०६०)
समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते ।
रात्रावहनि सन्ध्यायां कस्य क्लृप्तः परिग्रहः ॥ १-१८६-१६ (८३१६)
भुक्तो वाऽप्यथ वाऽभुक्तो रात्रावहनि खेचर ।
न कालनियमो ह्यस्ति गङ्गां प्राप्य सरिद्वरां ॥ १-१८६-१७ (८३१७)
वयं च शक्तिसम्पन्ना अकाले त्वामधृष्णुम ।
अशक्ता हि रणे क्रूर युष्मानर्चन्ति मानवाः ॥ १-१८६-१८ (८३१८)
पुरा हिमवतश्चैषा हेमशृङ्गाद्विनिःसृता ।
गङ्गा गत्वा समुद्राम्भः सप्तधा समपद्यत ॥ १-१८६-१९ (८३१९)
गङ्गां च यमुनां चैव प्लक्षजातां सरस्वतीम् ।
रथस्थां सरयूं चैव गोमतीं गण्डकीं तथा ॥ १-१८६-२० (८३२०)
अपर्युषितपापास्ते नदीः सप्त पिबन्ति ये ।
इयं भूत्वा चैकवप्रा शुचिराकाशगा पुनः ॥ १-१८६-२१ (८३२१)
देवेषु गङ्गा गन्धर्व प्राप्नोत्यलकनन्दताम् ।
तथा पितॄन्वैतरणी दुस्तरा पापकर्मभिः ।
गङ्गा भवति वै प्राप्य कृष्णद्वैपायनोऽब्रवीत् ॥ १-१८६-२२ (८३२२)
असम्बाधा देवनदी स्वर्गसंपादनी शुभा ।
कथमिच्छसि तां रोद्धुं नैष धर्मः सनातनः ॥ १-१८६-२३ (८३२३)
अनिवार्यमसम्बाधं तव वाचा कथं वयम् ।
न स्पृशेम यथाकामं पुण्यं भागीरथीजलम् ॥ १-१८६-२४ (८३२४)
वैशम्पायन उवाच। १-१८६-२५क्ष् (१०६१)
अङ्गारपर्णस्तच्छ्रुत्वा क्रुद्ध आनाम्य कार्मुकम् ।
मुमोच बाणान्निशितानहीनाशीविषानिव ॥ १-१८६-२५ (८३२५)
उल्मुकं भ्रामयंस्तूर्णं पाण्डवश्चर्म चोत्तरम् ।
व्यपोहत शरांस्तस्य सर्वानेव धनञ्जयः ॥ १-१८६-२६ (८३२६)
अर्जुन उवाच। १-१८६-२७क्ष् (१०६२)
बिभीषिका वै गन्धर्व नास्त्रज्ञेषु प्रयुज्यते ।
अस्त्रज्ञेषु प्रयुक्तेयं फेनवत्प्रविलीयते ॥ १-१८६-२७ (८३२७)
मानुषानति गन्धर्वान्सर्वान् गन्धर्व लक्षये ।
तस्मादस्त्रेण दिव्येन योत्स्येऽहं न तु मायया ॥ १-१८६-२८ (८३२८)
पुराऽस्त्रमिमाग्नेयं प्रादात्किल बृहस्पतिः ।
भरद्वाजाय गन्धर्व गुरुर्मान्यः शतक्रतोः ॥ १-१८६-२९ (८३२९)
भरद्वजादग्निवेश्य अग्निवेश्याद्गुरुर्मम ।
साध्विदं मह्यमददद्द्रोणो ब्राह्मणसत्तमः ॥ १-१८६-३० (८३३०)

वैशम्पायन उवाच। १-१८६-३१क्ष् (१०६३)
इत्युक्त्वा पाण्डवः क्रुद्धो गन्धर्वाय मुमोच ह ।
प्रदीप्तमस्त्रमाग्नेयं ददाहास्य रथं तु तत् ॥ १-१८६-३१ (८३३१)
विरथं विप्लुतं तं तु स गन्धर्वं महाबलः ।
अस्त्रतेजःप्रमूढं च प्रपतन्तमवाङ्मुखम् ॥ १-१८६-३२ (८३३२)
शिरोरुहेषु जग्राह माल्यवत्सु धनञ्जयः ।
भ्रातॄन्प्रति चकर्षाथ सोऽस्त्रपातादचेतसम् ॥ १-१८६-३३ (८३३३)
युधिष्ठिरं तस्य भार्या प्रपेदे शरणार्थिनी ।
नाम्ना कुम्भीनसी नाम पतित्राणमभीप्सती ॥ १-१८६-३४ (८३३४)
गन्धर्व्युवाच। १-१८६-३५क्ष् (१०६४)
त्रायस्व मां महाभाग पतिं चेमं विमुञ्च मे ।
गन्धर्वी शरणं प्राप्ता नाम्ना कुम्भीनसी प्रभो ॥ १-१८६-३५ (८३३५)
युधिष्ठिर उवाच। १-१८६-३६क्ष् (१०६५)
युद्धे जितं यशोहीनं स्त्रीनाथमपराक्रमम् ।
को निहन्याद्रिपुं तात मुञ्चेमं रिपुसूदन ॥ १-१८६-३६ (८३३६)
अर्जुन उवाच। १-१८६-३७क्ष् (१०६६)
जीवितं प्रतिपद्यस्व गच्छ गन्धर्व मा शुचः ।
प्रदिशत्यभयं तेऽद्य कुरुराजो युधिष्ठिरः ॥ १-१८६-३७ (८३३७)
गन्धर्व उवाच। १-१८६-३८क्ष् (१०६७)
जितोऽहं पूर्वकं नाम मुञ्चाम्यङ्गारपर्णताम् ।
यशोहीनं न च श्लाघ्यं स्वं नाम जनसंसदि ॥ १-१८६-३८ (८३३८)
साध्विमं लब्धवाँल्लाभं योऽहं दिव्यास्त्रधारिणम् ।
गान्धर्व्या माययेच्छामि संयोजयितुमर्जुनम् ॥ १-१८६-३९ (८३३९)
अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवं ॥ १-१८६-४० (८३४०)
संभृता चैव विद्येयं तपसेह मया पुरा ।
निवेदयिष्ये तामद्य प्राणदाय महात्मने ॥ १-१८६-४१ (८३४१)
संस्तम्भयित्वा तरसा जितं शरणमागतम् ।
यो रिपुं योजयेत्प्राणैः कल्याणं किं न सोऽर्हति ॥ १-१८६-४२ (८३४२)
चाक्षुषी नाम विद्येयं यां सोमाय ददौ मनुः ।
ददौ स विश्वावसवे मम विश्वावसुर्ददौ ॥ १-१८६-४३ (८३४३)
सेयं कापुरुषं प्राप्ता गुरुदत्ता प्रणश्यति ।
आगमोऽस्या मया प्रोक्तो वीर्यं प्रतिनिबोध मे ॥ १-१८६-४४ (८३४४)
यच्चक्षुषा द्रष्टुमिच्छेत्त्रिषु लोकेषु किंचन ।
तत्पश्येद्यादृशं चेच्छेत्तादृशं द्रष्टुमर्हति ॥ १-१८६-४५ (८३४५)
एकपादेन षण्मासान्स्थितो विद्यां लभेदिमाम् ।

अनुनेष्याम्यहं विद्यां स्वयं तुभ्यं व्रते कृते ॥ १-१८६-४६ (८३४६)
विद्यया ह्यनया राजन्वयं नृभ्यो विशेषिताः ।
अविशिष्टाश्च देवानामनुभावप्रदर्शिनः ॥ १-१८६-४७ (८३४७)
गन्धर्वजानामश्वानामहं पुरुषसत्तम ।
भ्रातृभ्यस्तव तुभ्यं च पृथग्दाता शतं शतं ॥ १-१८६-४८ (८३४८)
देवगन्धर्ववाहास्ते दिव्यवर्णा मनोजवाः ।
क्षीणाक्षीणा भवन्त्येते न हीयन्ते च रंहसः ॥ १-१८६-४९ (८३४९)
पुरा कृतं महेन्द्रस्य वज्रं वृत्रनिबर्हणम् ।
दशधा शतधा चैव तच्छीर्णं वृत्रमूर्धनि ॥ १-१८६-५० (८३५०)
ततो भागीकृतो देवैर्वज्रभाग उपास्यते ।
लोके यशोधनं किंचित्सैव वज्रतनुः स्मृता ॥ १-१८६-५१ (८३५१)
वज्रपाणिर्ब्राह्मणः स्यात्क्षत्रं वज्ररथं स्मृतम् ।
वैश्या वै दानवज्राश्च कर्मवज्रा यवीयसः ॥ १-१८६-५२ (८३५२)
क्षत्रवज्रस्य भागेन अवध्या वाजिनः स्मृताः ।
रथाङ्गं वडबा सूते शूराश्चाश्वेषु ये मताः ॥ १-१८६-५३ (८३५३)
कामवर्णाः कामजवाः कामतः समुपस्थिताः ।
इति गन्धर्वजाः कामं पूरयिष्यन्ति मे हयाः ॥ १-१८६-५४ (८३५४)
अर्जुन उवाच। १-१८६-५५क्ष् (१०६८)
यदि प्रीतेन मे दत्तं संशये जीवितस्य वा ।
विद्याधं श्रुतं वाऽपि न तद्गन्धर्व रोचये ॥ १-१८६-५५ (८३५५)
गन्धर्व उवाच। १-१८६-५६क्ष् (१०६९)
संयोगो वै प्रीतिकरो महत्सु प्रतिदृश्यते ।
जीवितस्य प्रदानेन प्रीतो विद्यां ददामि ते ॥ १-१८६-५६ (८३५६)
त्वत्तोऽप्यहं ग्रहीष्यामि अस्त्रमाग्नेयमुत्तमम् ।
तथैव योग्यं बीभत्सो चिराय मरतर्षभ ॥ १-१८६-५७ (८३५७)
अर्जुन उवाच। १-१८६-५८क्ष् (१०७०)
त्वत्तोऽस्त्रेण वृणोम्यश्वान्संयोगः शास्वतोऽस्तुनौ ।
सखे तद्ब्रूहि गन्धर्व युष्मभ्यो यद्भयं भवेत् ॥ १-१८६-५८ (८३५८)
कारणं ब्रूहि गन्धर्व किं तद्येन स्म धर्षिताः ।
यान्तो वेदविदः सर्वे सन्तो रात्रावरिन्दमाः ॥ १-१८६-५९ (८३५९)
गन्धर्व उवाच। १-१८६-६०क्ष् (१०७१)
अनग्नयोऽनाहुतयो न च विप्रपुरस्कृताः ।
यूयं ततो धर्षिताः स्थ मया वै पाण्डुनन्दनाः ॥ १-१८६-६० (८३६०)
ग्यक्षराक्षसगन्धर्वपिशाचपतगोरगाः ।
धर्षन्ति नरव्याघ्र न ब्राह्मणपुरस्कृतान् ॥ १-१८६-६१ (८३६१)
जानतापि मया तस्मात्तेजश्चाभिजनं च वः ।

इयमग्निमतां श्रेष्ठ धर्षिता वै पुरागतिः ॥ १-१८६-६२ (८३६२)
को हि वस्त्रिषु लोकेषु न वेद भरतर्षभ ।
स्वैर्गुणैर्विस्तृतं श्रीमद्यशोऽग्र्यं भूरिवर्चसाम्'॥ १-१८६-६३ (८३६३)
यक्षराक्षसगन्धर्वाः पिशाचोरगदानवाः ।
विस्तरं कुरुवंशस्य धीमन्तः कथयन्ति ते ॥ १-१८६-६४ (८३६४)
नारदप्रभृतीनां तु देवर्षीणां मया श्रुतम् ।
गुणान्कथयतां वीर पूर्वेषां तव धीमताम् ॥ १-१८६-६५ (८३६५)
स्वयं चापि मया दृष्टश्चरता सागराम्बराम् ।
इमां वसुमतीं कृत्स्नां प्रभावः सुकुलस्य ते ॥ १-१८६-६६ (८३६६)
वेदे धनुषि चाचार्यमभिजानामि तेऽर्जुन ।
विश्रुतं त्रिषु लोकेषु भारद्वाजं यशस्विनम् ॥ १-१८६-६७ (८३६७)
ग्सर्ववेदविदां श्रेष्ठं सर्वशस्त्रभृतां वरम् ।
द्रोणमिष्वस्त्रकुशलं धनुष्यह्गिरसां वरम् ॥' १-१८६-६८ (८३६८)
धर्मं वायुं च शक्रं च विजानाम्यश्विनौ तथा ।
पाण्डुं च कुरुशार्दूल षडेतान्कुरुवर्धनान् ।
पितॄनेतानहं पार्थ देवमानुषसत्तमान् ॥ १-१८६-६९ (८३६९)
दिव्यात्मानो महात्मानः सर्वशस्त्रभृतां वराः ।
भवन्तो भ्रातरः शूराः सर्वे सुचरितव्रताः ॥ १-१८६-७० (८३७०)
उत्तमां च मनोबुद्धिं भवतां भावितात्मनाम् ।
जानन्नपि च वः पार्थ कृतवानिह धर्षणाम् ॥ १-१८६-७१ (८३७१)
स्त्रीसकाशे च कौरव्य न पुमान्क्षन्तुमर्हति ।
धर्षणामात्मनः पश्यन्बाहुद्रविणमाश्रितः ॥ १-१८६-७२ (८३७२)
नक्तं च बलमस्माकं भूय एवाभिवर्धते ।
यतस्ततो मां कौन्तेय सदारं मन्युराविशत् ॥ १-१८६-७३ (८३७३)
सोऽहं त्वयेह विजितः सङ्ख्ये तापत्यवर्धन ।
येन तेनेह विधिना कीर्त्यमानं निबोध मे ॥ १-१८६-७४ (८३७४)
ब्रह्मचर्यं परो धर्मः स चापि नियतस्त्वयि ।
यस्मात्तस्मादहं पार्थ रणे ञस्मि विजितस्त्वया ॥ १-१८६-७५ (८३७५)
यस्तु स्यात्क्षत्रियः कश्चित्कामवृत्तः परन्तप ।
नक्तं च युधि युध्येत न स जीवेत्कथंचन ॥ १-१८६-७६ (८३७६)
यस्तु स्यात्कामवृत्तोऽपि पार्थ ब्रह्मपुरस्कृतः ।
जयेन्नक्तञ्चरान्सर्वान्स पुरोहितधूर्गतः ॥ १-१८६-७७ (८३७७)
तस्मात्तापत्य यत्किंचिन्नृणां श्रेय इहेप्सितम् ।
तस्मिन्कर्मणि योक्तव्या दान्तात्मानः पुरोहिताः ॥ १-१८६-७८ (८३७८)
वेदे षडङ्गे निरताः शुचयः सत्यवादिनः ।
धर्मात्यागः कृतात्मानः स्युर्नृपाणां पुरोहिताः ॥ १-१८६-७९ (८३७९)

जयश्च नियतो राज्ञः स्वर्गश्च तदनन्तरम् ।
यस्य स्याद्धर्मविद्वाग्मी पुरोधाः शीलवाञ्शुचिः ॥ १-१८६-८० (८३८०)
लाभं लब्धुमलब्धं वा लब्धं वा परिरक्षितुम् ।
पुरोहितं प्रकुर्वीत राजा गुणसमन्वितम् ॥ १-१८६-८१ (८३८१)
पुरोहितमते तिष्ठेद्य इच्छेद्भूतिमात्मनः ।
प्राप्तुं वसुमतीं सर्वां सर्वशः सागराम्बराम् ॥ १-१८६-८२ (८३८२)
न हि केवलशौर्येण तापत्याभिजनेन च ।
जयेदब्राह्मणः कश्चिद्भूमिं भूमिपतिः क्वचित् ॥ १-१८६-८३ (८३८३)
तस्मादेवं विजानीहि कुरूणां वंशवर्धन ।
ब्राह्मणप्रमुखं राज्यं शक्यं पालयितुं चिरम् ॥ ॥ १-१८६-८४ (८३८४)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८६-३ सोमाश्रयश्चन्द्रधरो रुद्रस्तस्य स्थानं सोमाश्रयायणम् ॥
१-१८६-८ पूर्वरात्रागमेषु पश्चिमायां दिशि अर्धास्तमितार्कमण्डलरूपा
या संध्या संरज्यते रक्ता भवति तस्यां मुहूर्तं
प्रस्थानकालमशीतिभिर्लवैर्निमेषार्धैर्हीनं प्रचक्षते ॥
१-१८६-९ तदेव मुहूर्तं यक्षादीनां कर्मचारेषु
विहितमन्यन्मनुष्याणां कर्मचारेषु स्मृतमित्यन्वयः
। संध्यायामशीतिलवोपरि रात्रौ यक्षादीनामेव संचारकालः
अन्यदहर्मनुष्याणामित्यर्थः ॥
१-१८६-१५ शृङ्गिणः अभिचारिकाः ॥
१-१८६-२१ एकवप्रा एकमाकाशरूपं वप्रं यस्याः सा ॥
१-१८६-३६ स्त्री नाथो रक्षिता यस्य तम् ॥
१-१८६-३८ अङ्गारवद्भास्वरं दुःस्पर्शं च पर्णं वाहनं रथो
यस्य सोऽङ्गारपर्णस्तस्य भावस्तत्ताम् ॥
१-१८६-४१ क्षीणाश्चाऽक्षीणाश्च क्षीणाक्षीणाः वृद्धास्तरुणा वा एते
न भवन्ति रंहसो वेगाच्च न हीयन्ते इति नकारानुषङ्गेण योज्यम्
। क्षीणे क्षीणे इति घ। पाठः ॥
१-१८६-५१ तस्य भागः पृथग्भूतः सर्वैर्भूतैदपास्यते इति ङ
। पाठः ॥
१-१८६-५२ वज्रपाणिः पाणिः वज्रं यस्य स । एवमेव वज्ररथमित्यपि ॥
१-१८६-५३ रथाङ्गं च तथा सूतो धनुश्च भरतर्षभ इति ङ
। पाठः ॥

१-१८६-५७ तथैव सख्यं बीभत्सो इति ङ । पाठः ॥
१-१८६-५८ अस्त्रेणास्त्रं वृणे त्वत्तः यद्भयं त्यजेत् इति ङ । पाठः ॥
१-१८६-६० अनग्नयो दारहीनत्वात् । अनाहुतयः
समावृतत्वात्। आश्रमविशेषहीनो ब्राह्मणो धर्षणीय इत्यर्थः ॥
१-१८६-७६ कायवृद्यः कृतदारः ॥
१-१८६-८१ लाभं लब्धव्यं धनं । अलब्धस्य च लाभाय लब्धस्य
परिरक्षणे इति ङ। पाठः ॥
षडशीत्यधिकशततमोऽध्यायः ॥
१८६ ॥

आदिपर्व - अध्याय १८७
॥ श्रीः ॥
१.१८७. अध्यायः १८७

Mahabharata - Adi Parva - Chapter Topics
सूर्यकन्यायाः तपत्या उपाख्यानम्--स्वभक्ताय संवरणाय स्वकन्यां
दातुं सवितुर्निश्चयः ॥ १ ॥
मृगयार्थं गतस्य संवरणस्य गिरौ तपतीदर्शनेन कामोत्पत्तिः ॥ २ ॥
राजनि तया सह भाषितुं प्रवृत्ते तप्त्या अन्तर्धानम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८७-० (८३८५)
अर्जुन उवाच। १-१८७-०क्ष् (१०७२)
तापत्य इति यद्वाक्यमुक्तवानसि मामिह ।
तदहं ज्ञातुमिच्छामि तापत्यार्थं विनिश्चितम् ॥ १-१८७-१ (८३८६)
तपती नाम का चैषा तापत्या यत्कृते वयम् ।
कौन्तेया हि वयं साधो तत्त्वमिच्छामि वेदितुम् ॥ १-१८७-२ (८३८७)
वैशम्पायन उवाच। १-१८७-३क्ष् (१०७३)
एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनञ्जयम् ।
विश्रुतं त्रिषु लोकेषु श्रावयामास वै कथाम् ॥ १-१८७-३ (८३८८)
हन्त ते कथयिष्यामि कथामेतां मनोरमाम् ।
यथावदखिलां पार्थ सर्वबुद्धिमतां वर ॥ १-१८७-४ (८३८९)
उक्तवानस्मि येन त्वां तापत्य इति यद्वचः ।
तत्तेऽहं कथयिष्यामि शृणुष्वैकमना भव ॥ १-१८७-५ (८३९०)
य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा ।
एतस्य तपती नाम बभूव सदृशी सुता ॥ १-१८७-६ (८३९१)

विवस्वतो वै देवस्य सावित्र्यवरजा विभो ।
विश्रुता त्रिषु लोकेषु तपती तपसा युता ॥ १-१८७-७ (८३९२)
न देवी नासुरी चैव न यक्षी न च राक्षसी ।
नाप्सरा न च गन्धर्वी तथा रूपेण काचन ॥ १-१८७-८ (८३९३)
सुविभक्तानवद्याङ्गी स्वसितायतलोचना ।
स्वाचारा चैव साध्वी च सुवेषा चैव भामिनी ॥ १-१८७-९ (८३९४)
त तस्याः सदृशं कंचित्त्रिषु लोकेषु भारत ।
भर्तारं सविता मेने रूपशीलगुणश्रुतैः ॥ १-१८७-१० (८३९५)
संप्राप्तयौवनां पश्यन्देयां दुहितरं तु ताम् ।
ग्द्यष्टवर्षां तु तां श्यामां सविता रूपशालिनीम्।'
नोपलेभे ततः शान्तिं संप्रदानं विचिन्तयन् ॥ १-१८७-११ (८३९६)
अथर्क्षपुत्रः क्रान्तेय कुरूणामृषभो बली ।
सूर्यमाराधयामास नृपः संवरणस्तदा ॥ १-१८७-१२ (८३९७)
अर्घ्यमाल्योपहाराद्यैर्गन्धैश्च नियतः शुचिः ।
नियमैरुपवासैश्च तपोभिर्विविधैरपि ॥ १-१८७-१३ (८३९८)
सुश्रूषुरनहंवादी शुचिः पौरवनन्दन ।
अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् ॥ १-१८७-१४ (८३९९)
ततः कृतज्ञं धर्मज्ञं रूपेणासदृशं भुवि ।
तपत्याः सदृशं मेने सूर्यः संवरणं पतिम् ॥ १-१८७-१५ (८४००)
दातुमैच्छत्ततः कन्यां तस्मै संवरणाय ताम् ।
नृपोत्तमाय कौरव्य विश्रुताभिजनाय च ॥ १-१८७-१६ (८४०१)
यथा हि दिवि दीप्तांशुः प्रभासयति तेजसा ।
तथा भुवि महिपालो दीप्त्या संवरणोऽभवत् ॥ १-१८७-१७ (८४०२)
यथाऽर्चयन्ति चादित्यमुद्यन्तं ब्रह्मवादिनः ।
तथा संवरणं पार्थ ब्राह्मणावरजाः प्रजाः ॥ १-१८७-१८ (८४०३)
स सोममति कान्तत्वादादित्यमति तेजसा ।
बभूव नृपतिः श्रीमान्सुहृदां दुर्हृदामपि ॥ १-१८७-१९ (८४०४)
एवंगुणस्य नृपतेस्तथावृत्तस्य कौरव ।
तस्मै दातुं मनश्चक्रे तपतीं तपनः स्वयम् ॥ १-१८७-२० (८४०५)
स कदाचिदथो राजा श्रीमानमितविक्रमः ।
चचार मृगयां पार्थ पर्वतोपवने किल ॥ १-१८७-२१ (८४०६)
चरतो मृगयां तस्य क्षुत्पिपासासमन्वितः ।
ममार राज्ञः कौन्तेय गिरावप्रतिमो हयः ॥ १-१८७-२२ (८४०७)
स मृताश्वश्चरन्पार्थ पद्भ्यामेव गिरौ नृपः ।
ददर्शासदृशीं लोके कन्यामायतलोचनाम् ॥ १-१८७-२३ (८४०८)
स एव एकामासाद्य कन्यां परबलार्दनः ।

तस्थौ नृपतिशार्दूलः पश्यन्नविचलेक्षणः ॥ १-१८७-२४ (८४०९)
स हि तां तर्कयामास रूपतो नृपतिः श्रियम् ।
पुनः संतर्कयामास रवेर्भ्रष्टामिव प्रभाम् ॥ १-१८७-२५ (८४१०)
वपुषा वर्चसा चैव शिखामिव विभावसोः ।
प्रसन्नत्वेन कान्त्या च चन्द्ररेखामिवामलाम् ॥ १-१८७-२६ (८४११)
गिरिपृष्ठे तु सा यस्मिन्स्थिता स्वसितलोचना ।
विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी ॥ १-१८७-२७ (८४१२)
तस्या रूपेण स गिरिर्वेषेण च विशेषतः ।
ससवृक्षक्षुपलतो हिरण्मय इवाभवत् ॥ १-१८७-२८ (८४१३)
अवमेने च तां दृष्ट्वा सर्वलोकेषु योषितः ।
अवाप्तं चात्मनो मेने स राजा चक्षुषः फलं ॥ १-१८७-२९ (८४१४)
जन्मप्रभृति यत्किचिंद्दृष्टवान्स महीपतिः ।
रूपं न सदृशं तस्यास्तर्कयामास किंचन ॥ १-१८७-३० (८४१५)
तया बद्धमनश्चक्षुः पाशैर्गुणमयैस्तदा ।
न चचाल ततो देशाद्बुबुधे न च किंचन ॥ १-१८७-३१ (८४१६)
अस्या नूनं विशालाक्ष्याः सदेवासुरमानुषम् ।
लोकं निर्मथ्य धात्रेदं रूपमाविष्कृतं कृतम् ॥ १-१८७-३२ (८४१७)
एवं संतर्कयामास रूपद्रविणसंपदा ।
कन्यामसदृशीं लोके नृपः संवरणस्तदा ॥ १-१८७-३३ (८४१८)
तां च दृष्ट्वैव कल्याणीं कल्याणाभिजनो नृपः ।
जगाम मनसा चिन्तां कामबाणेन पीडितः ॥ १-१८७-३४ (८४१९)
दह्यमानः स तीव्रेण नृपतिर्मन्मथाग्निना ।
अप्रगल्भां प्रगल्भस्तां तदोवाच मनोहराम् ॥ १-१८७-३५ (८४२०)
काऽसि कस्यासि रम्भोरु किमर्थं चेह तिष्ठसि ।
कथं च निर्जनेऽरण्ये चरस्येका शुचिस्मिते ॥ १-१८७-३६ (८४२१)
त्वं हि सर्वानवद्याङ्गी सर्वाभरणभूषिता ।
विभूषणमिवैतेषां भूषणानामभीप्सितम् ॥ १-१८७-३७ (८४२२)
न देवीं नासुरीं चैव न यक्षीं न च राक्षसीम् ।
न च भोगवतीं मन्ये न गन्धर्वीं न मानुषीम् ॥ १-१८७-३८ (८४२३)
या हि दृष्टा मया काश्चिच्छ्रुता वाऽपि वराङ्गनाः ।
न तासां सदृशीं मन्ये त्वामहं मत्तकाशिनि ॥ १-१८७-३९ (८४२४)
दृष्ट्वैव चारुवदने चन्द्रात्कान्ततरं तव ।
वदनं पद्मपत्राक्षं मां मथ्नातीव मन्मथः ॥ १-१८७-४० (८४२५)
एवं तां स महीपालो बभाषे न तु सा तदा ।
कामार्तं निर्जनेऽरण्ये प्रत्यबाषथ किंचन ॥ १-१८७-४१ (८४२६)
ततो लालप्यमानस्य पार्थिवस्यायतेक्षणा ।

सौदामिनीव चाभ्रेषु तत्रैवान्तरधीयत ॥ १-१८७-४२ (८४२७)
तामन्वेष्टुं स नृपतिः परिचक्राम सर्वतः ।
वनं वनजपत्राक्षीं भ्रमन्नुन्मत्तवत्तदा ॥ १-१८७-४३ (८४२८)
अपश्यमानः स तु तां बहु तत्र विलप्य च ।
निश्चेष्टः पार्थिवश्रेष्ठो मुहूर्तं स व्यतिष्ठत ॥ ॥ १-१८७-४४ (८४२९)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८७-१ यत् यस्मात् तत् तस्मात् । तापत्यार्थं तापत्यशब्दार्थम् ॥
सप्ताशीत्यधिकशततमोऽध्यायः ॥
१८७ ॥

आदिपर्व - अध्याय १८८
॥ श्रीः ॥
१.१८८. अध्यायः १८८

Mahabharata - Adi Parva - Chapter Topics
भूतले पतितं राजानं दृष्ट्वा तत्समीपे तपत्या आगमनम् ॥ १ ॥
तयोः संवादः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८८-० (८४३०)
गन्धर्व उवाच । १-१८८-०क्ष् (१०७४)
अथ तस्यामदृश्यायां नृपतिः काममोहितः ।
पातनः शत्रुसङ्घानां पपात धरणीतले ॥ १-१८८-१ (८४३१)
तस्मिन्निपतिते भूमावथ सा चारुहासिनी ।
पुनः पीनायतश्रोणी दर्शयामास तं नृपम् ॥ १-१८८-२ (८४३२)
अथाबभाषे कल्याणी वाचा मधुरया नृपम् ।
तं कुरूणां कुलकरं कामाभिहतचेतसम् ॥ १-१८८-३ (८४३३)
उवाच मधुरं वाक्यं तपती हसतीव सा ।
उत्तिष्ठोत्तिष्ठ भद्रं ते न त्वमर्हस्यरिन्दम ॥ १-१८८-४ (८४३४)
मोहं नृपतिशार्दूल गन्तुमाविष्कृतः क्षितौ ।
एवमुक्तोऽथ नृपतिर्वाचा मधुरया तदा ॥ १-१८८-५ (८४३५)
ददर्श विपुलश्रोणीं तामेवाभिमुखे स्थिताम् ।

अथ तामसितापाङ्गीमाबभाषे स पार्थिवः ॥ १-१८८-६ (८४३६)
मन्मथाग्निपरीतात्मा सन्दिग्धाक्षरया गिरा ।
साधु त्वमसितापाङ्गि कामार्तं मत्तकाशिनि ॥ १-१८८-७ (८४३७)
भजस्व भजमानं मां प्राणा हि प्रजहन्ति माम् ।
त्वदर्थं हि विशालाक्षि मामयं निशितैः शरैः ॥ १-१८८-८ (८४३८)
कामः कमलगर्भाभे प्रतिविध्यन्न शाम्यति ।
दष्टमेवमनाक्रन्दे भद्रे काममहाहिना ॥ १-१८८-९ (८४३९)
सा त्वं पीनायतश्रोणी मामाप्नुहि वरानने ।
त्वदधीना हि मे प्राणाः किन्नरोद्गीतभाषिणि ॥ १-१८८-१० (८४४०)
चारुसर्वानवद्याङ्गि पद्मेन्दुप्रतिमानने ।
न ह्यहं त्वदृते भीरु शक्ष्यामि खलु जीवितुम् ॥ १-१८८-११ (८४४१)
कामः कमलपत्राक्षि प्रतिविध्यति मामयम् ।
तस्मात्कुरु विशालाक्षि मय्यनुक्रोशमङ्गने ॥ १-१८८-१२ (८४४२)
भक्तं मामसितापाङ्गि न परित्यक्तुमर्हसि ।
त्वं हि मां प्रीतियोगेन त्रातुमर्हसि भामिनि ॥ १-१८८-१३ (८४४३)
त्वद्दर्शनकृतस्नेहं मनश्चलति मे भृशम् ।
न त्वां दृष्ट्वा पुनश्चान्यां द्रष्टुं कल्याणि रोचते ॥ १-१८८-१४ (८४४४)
प्रसीद वशगोऽहं ते भक्तं मां भज भामिनि ।
दृष्ट्वैव त्वां वरारोहे मन्मथो भृशमङ्गने ॥ १-१८८-१५ (८४४५)
अन्तर्गतं विशालाक्षि विध्यति स्म पतत्त्रिभिः ।
मन्मथाग्निसमुद्भूतं दाहं कमललोचने ॥ १-१८८-१६ (८४४६)
प्रीतिसंयोगयुक्ताभिरद्भिः प्रह्लादयस्व मे ।
पुष्पायुधं दुराधर्षं प्रचण्डशरकार्मुकम् ॥ १-१८८-१७ (८४४७)
त्वद्दर्शनसमुद्भूतं विध्यन्तं दुःसहैः शरैः ।
उपशामय कल्याणि आत्मदानेन भामिनि ॥ १-१८८-१८ (८४४८)
गान्धर्वेण विवाहेन मामुपैहि वराङ्गने ।
विवाहानां हि रम्भोरु गान्धर्वः श्रेष्ठ उच्यते ॥ १-१८८-१९ (८४४९)
तपत्युवाच। १-१८८-२०क्ष् (१०७५)
नाहमीशाऽऽत्मनो राजन्कन्या पितृमती ह्यहम् ।
मयि चेदस्ति ते प्रीतिर्याचस्व पितरं मम ॥ १-१८८-२० (८४५०)
यथा हि ते मया प्राणाः संभृताश्च नरेश्वर ।
दर्शनादेव भूयस्त्वं तथा प्राणान्ममाहरः ॥ १-१८८-२१ (८४५१)
न चाहमीशा देहस्य तस्मान्नृपतिसत्तम ।
समीपं नोपगच्छामि न स्वतन्त्रा हि योषितः ॥ १-१८८-२२ (८४५२)
का हि सर्वेषु लोकेषु विश्रुताभिजनं नृपम् ।
कन्या नाभिलषेन्नाथं भर्तारं भक्तवत्सलम् ॥ १-१८८-२३ (८४५३)

तस्मादेवं गते काले याचस्व पितरं मम ।
आदित्यं प्रणिपातेन तपसा नियमेन च ॥ १-१८८-२४ (८४५४)
स चेत्कामयते दातुं तव मामरिसूदन ।
भविष्याम्यद्य ते राजन्सततं वशवर्तिनी ॥ १-१८८-२५ (८४५५)
अहं हि तपती नाम सावित्र्यवरजा सुता ।
अस्य लोकप्रदीपस्य सवितुः क्षत्रियर्षभ ॥ ॥ १-१८८-२६ (८४५६)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८८-८ प्रजहन्ति प्रजहति ॥
१-१८८-९ अनाक्रन्दे अत्रातरि काले ॥
अष्टाशीत्यधिकशततमोऽध्यायः ॥
१८८ ॥

आदिपर्व - अध्याय १८९
॥ श्रीः ॥
१.१८९. अध्यायः १८९

Mahabharata - Adi Parva - Chapter Topics
पुनरन्तर्हितायां तपत्यां मोहितस्य संवरणस्य समीपे
अमात्यादीनामागमनं ॥ १ ॥
अमात्येनाश्वासितस्य राज्ञः सूर्योपासनसमये वसिष्ठस्यागमनं ॥ २ ॥
सूर्यसमीपं गत्वा वसिष्ठेनादित्यस्तुतिकरणं ॥ ३ ॥
स्तुत्या तुष्टेन सूर्येण संवरणार्थं वसिष्ठाय तपतीदानं ॥ ४ ॥
तस्मिन्नेव तपतीसंवरणयोर्विवाहः ॥ ५ ॥
तया सह तत्रैव रममाणस्य संवरणस्य राज्ये
द्वादशवार्षिक्यनावृष्टिः ॥ ६ ॥
वसिष्ठेनानावृष्टिनिवर्तनं ॥ ७ ॥
तपत्युपाख्यानोपसंहारः ॥ ८ ॥

Mahabharata - Adi Parva - Chapter Text

१-१८९-० (८४५७)
गन्धर्व उवाच। १-१८९-०क्ष् (१०७६)
एवमुक्त्वा ततस्तूर्णं जगामोर्ध्वमनिन्दिता ।

ग्तपतीतपतीत्येव विललापातुरो नृपः ॥१-१८९-१ (८४५८)
प्रास्खलच्चासकृद्राजा पुनरुत्थाय धावति ।
धावमानस्तु तपतीमदृष्ट्वैव महीपतिः।'
स तु राजा पुनर्भूमौ तत्रैव निपपात ह ॥ १-१८९-२ (८४५९)
अन्वेषमाणः सबलस्तं राजानं नृपोत्तमम् ।
अमात्यः सानुयात्रश्च तं ददर्श महावने ॥१-१८९-३ (८४६०)
क्षितौ निपतितं काले शक्रध्वजमिवोच्छ्रितम् ।
त हि दृष्ट्वा महेष्वासं निरस्तं पतितं भुवि ॥१-१८९-४ (८४६१)
बभूव सोऽस्य सचिवः संप्रदीप्त इवाग्निना ।
त्वरया चोपसङ्गम्य स्नेहादागतसंभ्रमः ॥१-१८९-५ (८४६२)
तं समुत्थापयामास नृपतिं काममोहितम् ।
भूतलाद्भूमिपालेशं पितेव पतितं सुतम् ॥१-१८९-६ (८४६३)
प्रज्ञया वयसा चैव वृद्धः कीर्त्या नयेन च ।
अमात्यस्तं समुत्थाप्य बभूव विगतज्वरः ॥१-१८९-७ (८४६४)
उवाच चैनं कल्याण्या वाचा मधुरयोत्थिम् ।
मा भैर्मनुजशार्दूल भद्रमस्तु तवानघ ॥१-१८९-८ (८४६५)
क्षुत्पिपासापरिश्रान्तं तर्कयामास वै नृपम् ।
पतितं पातनं सङ्ख्ये शात्रवाणां महीतले ॥१-१८९-९ (८४६६)
वारिणा च सुशीतेन शिरस्तस्याभ्यषेचयत् ।
अस्पृशन्मुकुटं राज्ञः पुण्डरीकसुगन्धिना ॥१-१८९-१० (८४६७)
ततः प्रत्यागतप्राणस्तद्बलं बलवान्नृपः ।
सर्वं विसर्जयामास तमेकं सचिवं विना ॥१-१८९-११ (८४६८)
ततस्तस्याज्ञया राज्ञो विप्रतस्थे महद्बलम् ।
स तु राजा गिरिप्रस्थे तस्मिन्पुनरुपाविशत् ॥१-१८९-१२ (८४६९)
ततस्तस्मिन् गिरिवरे शुचिर्भूत्वा कृताञ्जलिः ।
आरिराधयिषुः सूर्यं तस्थावूर्ध्वमुखः क्षितौ ॥१-१८९-१३ (८४७०)
जगाम मनसा चैव वसिष्ठमृषिसत्तमम् ।
पुरोहितममित्रघ्नं तदा संवरणो नृपः ॥१-१८९-१४ (८४७१)
नक्तन्दिनमथैकत्र स्थिते तस्मिञ्जनाधिपे ।
अथाजगाम विप्रर्षिस्तदा द्वादशमेऽहनि ॥१-१८९-१५ (८४७२)
स विदित्वैव नृपतिं तपत्या हृतमानसम् ।
दिव्येन विधिना ज्ञात्वा भावितात्मा महानृपिः ॥१-१८९-१६ (८४७३)
तथा तु नियतात्मानं तं नृपं मुनिसत्तमः ।
आबभाषे स धर्मात्मा तस्यैवार्थचिकीर्षया ॥१-१८९-१७ (८४७४)
स तस्य मनुजेन्द्रस्य पश्यतो भगवानृषिः ।
ऊर्ध्वमाचक्रमे द्रष्टुं भास्करं भास्करद्युतिः ॥१-१८९-१८ (८४७५)

ग्योजनानां तु नियुतं क्षणाद्गत्वा तपोधनः।'
सहस्रांशुं ततो विप्रः कृताञ्जलिरुपस्थितः ।
वसिष्ठोहमिति प्रीत्या स चात्मानं न्यवेदयत् ॥ १-१८९-१९ (८४७६)
तमुवाच महातेजा विवस्वान्मुनिसत्तमम् ।
महर्षे स्वागतं तेऽस्तु कथयस्व यथेप्सितम् ॥१-१८९-२० (८४७७)
यदिच्छसि महाभाग मत्तः प्रवदतां वर ।
तत्ते दद्यामभिप्रेतं यद्यपि स्यात्सुदुर्लभम् ॥१-१८९-२१ (८४७८)
एवमुक्तः स तेनर्षिर्वसिष्ठः संस्तुवन्गिरा ।
प्रणिपत्य विवस्वन्तं भानुमन्तमथाब्रवीत् ॥१-१८९-२२ (८४७९)
ग्योजनानां चतुष्षष्टिं निमेषात्त्रिशतं तथा ।
अश्वैर्गच्छति नित्यं यस्तत्पार्श्वस्थोऽब्रवीदिदम् ॥१-१८९-२३ (८४८०)
वसिष्ठ उवाच।१-१८९-२४क्ष् (१०७७)
अजाय लोकत्रयपावनाय
भूतात्मने गोपतये वृषाय ।
सूर्याय सर्गप्रलयालयाय
नमो महाकारुणिकोत्तमाय ॥ १-१८९-२४ (८४८१)
विवस्वते ज्ञानभृतेऽन्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे ।
स्वयंभुवे दीप्तसहस्रचक्षुषे
सुरोत्तमायामिततेजसे नमः ॥ १-१८९-२५ (८४८२)
नमः सवित्रे जगदेकचक्षुषे
जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे
विरिञ्चनारायणशङ्करात्मने ॥ १-१८९-२६ (८४८३)
सूर्य उवाच।१-१८९-२७क्ष् (१०७८)
संस्तुतो वरदः सोऽहं वरं वरय सुव्रत ।
स्तुतिस्त्वयोक्ता भक्तानां जप्येयं वग्दोस्म्यहम्'॥१-१८९-२७ (८४८४)
वसिष्ठ उवाच।१-१८९-२८क्ष् (१०७९)
यैषा ते तपती नाम सावित्र्यवरजा सुता ।
तां त्वां संवरणस्यार्थे वरयामि विभावसो ॥१-१८९-२८ (८४८५)
स हि राजा बृहत्कीर्तिर्धर्मार्थविदुदारधीः ।
युक्तः संवरणो भर्ता दुहितुस्ते विहङ्गम ॥१-१८९-२९ (८४८६)
गन्धर्व उवाच।१-१८९-३०क्ष् (१०८०)
इत्युक्तः स तदा तेन ददानीत्येव निश्चितः ।
प्रत्यभाषत तं विप्रं प्रतीनन्द्य दिवाकरः ॥१-१८९-३० (८४८७)
वरः संवरणो राज्ञां त्वमृषीणां वरो मुने ।

तपती योषितां श्रेष्ठा किमन्यत्रापवर्जनात् ॥ १-१८९-३१ (८४८८)
ततः सर्वानवद्याङ्गीं तपतीं तपनः स्वयम् ।
ददौ संवरणस्यार्थे वसिष्ठाय महात्मने ॥ १-१८९-३२ (८४८९)
प्रतिजग्राह तां कन्यां महर्षिस्तपतीं तदा ।
वसिष्ठोऽथ विसृष्टस्तु पुनरेवाजगाम ह ॥ १-१८९-३३ (८४९०)
यत्र विख्यातकीर्तिः स कुरूणामृषभोऽभवत् ।
स राजा मन्मथाविष्टस्तद्गतेनान्तरात्मना ॥ १-१८९-३४ (८४९१)
दृष्ट्वा च देवकन्यां तां तपतीं चारुहासिनीम् ।
वसिष्ठेन सहायान्तीं संहृष्टोऽभ्यधिकं बभौ ॥ १-१८९-३५ (८४९२)
रुरुचे साऽधिकं सुभ्रूरापतन्ती नभस्तलात् ।
सौदामनीव विभ्रष्टा द्योतयन्ती दिशस्त्विषा ॥ १-१८९-३६ (८४९३)
कृच्छ्राद्द्वादशरात्रे तु तस्य राज्ञः समाहिते ।
आजगाम विशुद्धात्मा वसिष्ठो भगवानृषिः ॥ १-१८९-३७ (८४९४)
तपसाऽऽराध्य वरदं देवं गोपतिमीश्वरम् ।
लेभे संवरणो भार्यां वसिष्ठस्यैव तेजसा ॥ १-१८९-३८ (८४९५)
ततस्तस्मिन्गिरिश्रेष्ठे देवगन्धर्वसेविते ।
जग्राह विधिवत्पाणिं तपत्याः स नरर्षभः ॥ १-१८९-३९ (८४९६)
वसिष्ठेनाभ्यनुज्ञातस्तस्मिन्नेव धराधरे ।
सोऽकामयत राजर्षिर्विहर्तुं सह भार्यया ॥ १-१८९-४० (८४९७)
ततः पुरे च राष्ट्रे च वनेषूपवनेषु च ।
आदिदेश महीपालस्तमेव सचिवं तदा ॥ १-१८९-४१ (८४९८)
नृपतिं त्वभ्यनुज्ञाप्य वसिष्ठोऽथापचक्रमे ।
सोऽथ राजा गिरौ तस्मिन्विजहारामरो यथा ॥ १-१८९-४२ (८४९९)
ततो द्वादशवर्षाणि काननेषु वनेषु च ।
रेमे तस्मिन्गिरौ राजा तयैव सह भार्यया ॥ १-१८९-४३ (८५००)
तस्य राज्ञः पुरे तस्मिन्समा द्वादश सत्तम ।
न ववर्ष सहस्राक्षो राष्ट्रे चैवास्य भारत ॥ १-१८९-४४ (८५०१)
ततस्तस्यामनावृष्ट्यां प्रवृत्तायामरिन्दम ।
प्रजाः क्षयमुपाजग्मुः सर्वाः सस्थाणुजङ्गमाः ॥ १-१८९-४५ (८५०२)
तस्मिंस्तथाविधे काले वर्तमाने सुदारुणे ।
नावश्यायः पपातोर्व्यां ततः सस्यानि नाऽरुहन् ॥ १-१८९-४६ (८५०३)
ततो विभ्रान्तमनसो जनाः क्षुद्भयपीडिताः ।
गृहाणि संपरित्यज्य बभ्रमुः प्रदिशो दिशः ॥ १-१८९-४७ (८५०४)
ततस्तस्मिन्पुरे राष्ट्रे त्यक्तदारपरिग्रहाः ।
परस्परममर्यादाः क्षुधार्ता जघ्निरे जनाः ॥ १-१८९-४८ (८५०५)
तत्क्षुधार्तैर्निरानन्दैः शवभूतैस्तथा नरैः ।

अभवत्प्रेतराजस्य पुरं प्रेतैरिवावृतम् ॥१-१८९-४९ (८५०६)
ततस्तत्तादृशं दृष्ट्वा स एव भगवानृषिः ।
अभ्याद्रवत धर्मात्मा वसिष्ठो मुनिसत्तमः ॥१-१८९-५० (८५०७)
तं च पार्थिवशार्दूलमानयामास तत्पुरम् ।
तपत्या सहितं राजन्वर्षे द्वादशमे गते ।
ततः प्रवृष्टस्तत्रासीद्यथापूर्वं सुरारिहा ॥ १-१८९-५१ (८५०८)
तस्मिन्नृपतिशार्दूले प्रविष्टे नगरं पुनः ।
प्रववर्ष सहस्राक्षः सस्यानि जनयन्प्रभुः ॥१-१८९-५२ (८५०९)
ततः सराष्ट्रं मुमुदे तत्पुरं परया मुदा ।
तेन पार्थिवमुख्येन भावितं भावितात्मना ॥१-१८९-५३ (८५१०)
ततो द्वादश वर्षाणि पुनरीजे नराधिपः ।
तपत्या सहितः पत्न्या यथा शच्या मरुत्पतिः ॥१-१८९-५४ (८५११)
गन्धर्व उवाच।१-१८९-५५क्ष् (१०८१)
एवमासीन्महाभागा तपती नाम पौर्विकी ।
तव वैवस्वती पार्थ तापत्यस्त्वं यया मतः ॥१-१८९-५५ (८५१२)
तस्यां संजनयामास कुरुं संवरणो नृपः ।
तपत्यां तपतां श्रेष्ठ तापत्यस्त्वं ततोऽर्जुन ॥ ॥१-१८९-५६ (८५१३)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
एकोननवत्यधिकशततमोऽध्यायः ॥१८९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१८९-१० मुकुटं तत्स्थानं ललाटम् ॥
१-१८९-१५ द्वादशमे द्वादशसंख्यया मिते ॥
१-१८९-१६ दिव्येन विधिना योगबलेन ॥
एकोननवत्यधिकशततमोऽध्यायः ॥
१८९ ॥

आदिपर्व - अध्याय १९०
॥श्रीः ॥
१.१९०. अध्यायः १९०

Mahabharata - Adi Parva - Chapter Topics
गन्धर्वेण वसिष्ठमाहात्म्यकथनपूर्वकं पाण्डवानां
पुरोहितसंग्रहणोपदेशः ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९०-० (८५१४)
वैशम्पायन उवाच। १-१९०-०क्ष् (१०८२)
स गन्धर्ववचः श्रुत्वा तत्तदा भरतर्षभ ।
अर्जुनः परया भक्त्या पूर्णचन्द्र इवाबभौ ॥ १-१९०-१ (८५१५)
उवाच च महेष्वासो गन्धर्वं कुरुसत्तमः ।
जातकौतूहलोऽतीव वसिष्ठस्य तपोबलात् ॥ १-१९०-२ (८५१६)
वसिष्ठ इति तस्यैतदृषेर्नाम त्वयेरितम् ।
एतदिच्छाम्यहं श्रोतुं यथावत्तद्वदस्व मे ॥ १-१९०-३ (८५१७)
य एष गन्धर्वपते पूर्वेषां नः पुरोहितः ।
आसीदेतन्ममाचक्ष्व क एष भगवानृषिः ॥ १-१९०-४ (८५१८)
गन्धर्व उवाच। १-१९०-५क्ष् (१०८३)
ब्रह्मणो मानसः पुत्रो वसिष्ठोऽरुन्धतीपतिः ।
तपसा निर्जितौ शश्वदजेयावमरैरपि ॥ १-१९०-५ (८५१९)
कामक्रोधावुभौ यस्य चरणौ समुवाहतुः ।
इन्द्रियाणां वशकरो वशिष्ठ इति चोच्यते ॥ १-१९०-६ (८५२०)
ग्यथा कामश्च क्रोधश्च निर्जितावजितौ नरैः ।
जितारयो जिता लोकाः पन्थानश्च जिता दिशः ॥' १-१९०-७ (८५२१)
यस्तु नोच्छेदनं चक्रे कुशिकानामुदारधीः ।
विश्वामित्रापराधेन धारयन्मन्युमुत्तमम् ॥ १-१९०-८ (८५२२)
पुत्रव्यसनसंतप्तः शक्तिमानप्यशक्तवत् ।
विश्वामित्रविनाशाय न चक्रे कर्म दारुणम् ॥ १-१९०-९ (८५२३)
मृतांश्च पुनराहर्तुं शक्तः पुत्रान्यमक्षयात् ।
कृतान्तं नातिचक्राम वेलामिव महोदधिः ॥ १-१९०-१० (८५२४)
यं प्राप्य विजितात्मानं महात्मानं नराधिपाः ।
इक्ष्वाकवो महीपाला लेभिरे पृथिवीमिमाम् ॥ १-१९०-११ (८५२५)
पुरोहितमिमं प्राप्य वसिष्ठमृषिसत्तमम् ।
ईजिरे क्रतुभिश्चैव नृपास्ते कुरुनन्दन ॥ १-१९०-१२ (८५२६)
स हि तान्याजयामास सर्वान्नृपतिसत्तमान् ।
ब्रह्मर्षिः पाण्डवश्रेष्ठ बृहस्पतिरिवामरान् ॥ १-१९०-१३ (८५२७)
तस्माद्धर्मप्रधानात्मा वेदधर्मविदीप्सितः ।
ब्राह्मणो गुणवान्कश्चित्पुरोधाः प्रतिदृश्यताम् ॥ १-१९०-१४ (८५२८)
क्षत्रियेणाभिजातेन पृथिवीं जेतुमिच्छता ।
पूर्वं पुरोहितः कार्यः पार्थ राज्याभिवृद्धये ॥ १-१९०-१५ (८५२९)
महीं जिगीषता राज्ञा ब्रह्म कार्यं पुरःस्कृतम् ।
तस्मात्पुरोहितः कश्चिद्गुणवान्विजितेन्द्रियः ।

विद्वान्भवतु वो विप्रो धर्मकामार्थतत्त्ववित् ॥ ॥ १-१९०-१६ (८५३०)

इति श्रीमन्महाभारते आदिपर्वमि चैत्ररथपर्वणि
नवत्यधिकशततमोऽध्यायः ॥ १९० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९०-२ तपोबलात् तपोबलं श्रुत्वा ॥
१-१९०-७ जितारयः जिता अस्य इति च्छेदः ॥
१-१९०-८ अपराधेन पुत्रशतवधरूपेण ॥
नवत्यधिकशततमोऽध्यायः ॥
१९० ॥

आदिपर्व - अध्याय १९१
॥ श्रीः ॥
१.१९१. अध्यायः १९१

Mahabharata - Adi Parva - Chapter Topics
वसिष्ठोपाख्याने---विश्वामित्रस्य वसिष्ठाश्रमाभिगमनं ॥ १ ॥
वसिष्ठेन विश्वामित्रस्यातिथ्यकरणं ॥ २ ॥
विश्वामित्रेण वसिष्ठधेनुयाचनं ॥ ३ ॥
वसिष्ठेनादत्ताया धेनोः विश्वामित्रेण बलात्कारेण हरणं ॥ ४ ॥
कुपितया नन्दिन्या सृष्टैः म्लेच्छाद्यैः विश्वामित्रपराजयः ॥ ५ ॥
विश्वामित्रस्य तपसा ब्राह्मण्यप्राप्तिः ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९१-० (८५३१)
अर्जुन उवाच। १-१९१-०क्ष् (१०८४)
किंनिमित्तमभूद्वैरं विश्वामित्रवसिष्ठयोः ।
वसतोराश्रमे दिव्ये शंस नः सर्वमेव तत् ॥ १-१९१-१ (८५३२)
गन्धर्व उवाच। १-१९१-२क्ष् (१०८५)
इदं वासिष्ठमाख्यानं पुराणं परिचक्षते ।
पार्थ सर्वेषु लोकेषु यथावत्तन्निबोध मे ॥ १-१९१-२ (८५३३)
कान्यकुब्जे महानासीत्पार्थिवो भरतर्षभ ।
गाधीति विश्रुतो लोके कुशिकस्यात्मसंभवः ॥ १-१९१-३ (८५३४)
तस्य धर्मात्मनः पुत्रः समृद्धबलवाहनः ।
विश्वामित्र इति ख्यतो बभूव रिपुमर्दनः ॥ १-१९१-४ (८५३५)

स चचार सहामात्यो मृगयां गहने वने ।
मृगान्विध्यन्वराहांश्च रम्येषु मरुधन्वसु ॥ १-१९१-५ (८५३६)
व्यायामकर्शितः सोऽथ मृगलिप्सुः पिपासितः ।
आजगाम नरश्रेष्ठ वसिष्ठस्याश्रमं प्रति ॥ १-१९१-६ (८५३७)
तमागतमभिप्रेक्ष्य वसिष्ठः श्रेष्ठभागृषिः ।
विश्वामित्रं नरश्रेष्ठं प्रतिजग्राह पूजया ॥ १-१९१-७ (८५३८)
पाद्यार्घ्याचमनीचैस्तं स्वागतेन च भारत ।
तथैव परिजग्राह वन्येन हविषा तदा ॥ १-१९१-८ (८५३९)
तस्याथ कामधुग्धेनुर्वसिष्ठस्य महात्मनः ।
उक्ता कामान्प्रयच्छेति सा कामान्दुदुहे ततः ॥ १-१९१-९ (८५४०)
ग्बाष्पाढ्यस्योदनस्यैव राशयः पर्वतोपमाः ।
निष्ठानानि च सूपांश्च दधिकुल्यास्तथैव च ॥ १-१९१-१० (८५४१)
कूपांश्च घृतसंपूर्णान्गौड्यान्नानि सहस्रशः ।
इक्षून्मधूनि लाजांश्च मैरेयांश्च वरासवान् ॥' १-१९१-११ (८५४२)
ग्राम्यारण्याश्चौषधीश्च दुदुहे पय एव च ।
षड्रसं चामृतनिभं रसायनमनुत्तमम् ॥ १-१९१-१२ (८५४३)
भोजनीयानि पेयानि भक्ष्याणि विविधानि च ।
लेह्यान्यमृतकल्पानि चोष्याणि च तथार्जुना ॥ १-१९१-१३ (८५४४)
रत्नानि च महार्हाणि वासांसि विविधानि च ।
तैः कामैः सर्वसंपूर्णैः पूजितश्च महिपतिः ॥ १-१९१-१४ (८५४५)
सामात्यः सबलश्चैव तुतोष स भृशं तदा ।
षडुन्नतां सुपार्श्वोरुं पृथुपञ्चसमावृताम् ॥ १-१९१-१५ (८५४६)
मण्डूकनेत्रां स्वाकारां पीनोधसमनिन्दिताम् ।
सुवालधिं शङ्कुकर्णां चारुशृङ्गां मनोरमाम् ॥ १-१९१-१६ (८५४७)
पुष्टायतशिरोग्रीवां विस्मितः सोऽभिवीक्ष्यताम् ।
अभिनन्द्य स तां राजा नन्दिनीं गाधिनन्दनः ॥ १-१९१-१७ (८५४८)
अब्रवीच्च भृशं तुष्टः स राजा तमृषिं तदा ।
अर्बुदेन गवां ब्रह्मन्मम राज्येन वा पुनः ॥ १-१९१-१८ (८५४९)
नन्दिनीं संप्रयच्छस्व भुङ्क्ष्व राज्यं महामुने। १-१९१-१९ (८५५०)
वसिष्ठ उवाच ।
देवतातिथिपित्रर्थं याज्यार्थं च पयस्विनी ॥ १-१९१-१९क्ष् (१०८६)
अदेया नन्दिनीयं वै राज्येनापि तवानघ। १-१९१-२० (८५५१)
विश्वामित्र उवाच ।
ग्रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः।'
क्षत्रियोऽहं भवान्विप्रस्तपःस्वाध्यायसाधनः ॥ १-१९१-२०क्ष् (१०८७)
ब्राह्मेषु कुतो वीर्यं प्रशान्तेषु धृतात्मसु ।

अर्बुदेन गवां यस्त्वं न ददासि ममेप्सितम् ॥ १-१९१-२१ (८५५२)
स्वधर्मं न प्रहास्यामि नेष्यामि च बलेन गाम्। १-१९१-२२ (८५५३)
वसिष्ठ उवाच ।
बलस्थश्चासि राजा च बाहुवीर्यश्च क्षत्रियः ॥ १-१९१-२२क्ष् (१०८८)
यथेच्छसि तथा क्षिप्रं कुरु मा त्वं विचारय। १-१९१-२३ (८५५४)
गन्धर्व उवाच ।
एवमुक्तस्तथा पार्थ विश्वामित्रो बलादिव ॥ १-१९१-२३क्ष् (१०८९)
हंसचन्द्रप्रतीकाशां नन्दिनीं तां जहार गाम् ।
ग्सा तदा ह्रियमाणा च विश्वामित्रबलैर्बलात्।'
कशादण्डप्रणुदिता काल्यमाना इतस्ततः ॥ १-१९१-२४ (८५५५)
हंभायमाना कल्याणी वसिष्ठस्याथ नन्दिनी ।
आगम्याभिमुखी पार्थ तस्थौ भगवदुन्मुखी ॥ १-१९१-२५ (८५५६)
भृशं च ताड्यमाना वै न जगामाश्रमात्ततः। १-१९१-२६ (८५५७)
वसिष्ठ उवाच ।
शृणोमि ते रवं भद्रे विनदन्त्याः पुनः पुनः ॥ १-१९१-२६क्ष् (१०९०)
ह्रियसे त्वं बलाद्भद्रे विश्वामित्रेण नन्दिनि ।
किं कर्तव्यं मया तत्र क्षमावान्ब्राह्मणो ह्यहम्। १-१९१-२७ (८५५८)
गन्धर्व उवाच। १-१९१-२८क्ष् (१०९१)
सा भयान्नन्दिनी तेषां बलानां भरतर्षभ ।
विश्वामित्रभयोद्विग्ना वसिष्ठं समुपागमत् ॥ १-१९१-२८ (८५५९)
गौरुवाच। १-१९१-२९क्ष् (१०९२)
कशाग्रदण्डाभिहतां क्रोशन्तीं मामनाथवत् ।
विश्वामित्रबलैर्घोरैर्भगवन् किमुपेक्षसे ॥ १-१९१-२९ (८५६०)
गन्धर्व उवाच। १-१९१-३०क्ष् (१०९३)
एवं तस्यां तदा पार्थ धर्षितायां महामुनिः ।
न चुक्षुभे तदा धैर्यान्न चचाल धृतव्रतः ॥ १-१९१-३० (८५६१)
वसिष्ठ उवाच। १-१९१-३१क्ष् (१०९४)
क्षत्रियाणां बलं तेजो ब्राह्मणानां क्षमा बलम् ।
क्षमा मां भजते यस्माद्गम्यतां यदि रोचते ॥ १-१९१-३१ (८५६२)
नन्दिन्युवाच। १-१९१-३२क्ष् (१०९५)
किं नु त्यक्ताऽस्मि भगवन्यदेवं त्वं प्रभाषसे ।
अत्यक्ताऽहं त्वया ब्रह्मन्नेतुं शक्या न वै बलात् ॥ १-१९१-३२ (८५६३)
वसिष्ठ उवाच। १-१९१-३३क्ष् (१०९६)
न त्वां त्यजामि कल्याणि स्थीयतां यदि शक्यते ।
दृढेन दाम्ना बद्धवैष वत्सस्ते हियते बलात् ॥ १-१९१-३३ (८५६४)
गन्धर्व उवाच। १-१९१-३४क्ष् (१०९७)

स्थीयतामिति तच्छ्रुत्वा वसिष्ठस्य पयस्विनी ।
ऊर्ध्वाञ्चितशिरोग्रीवा प्रबभौ रौद्रदर्शना ॥ १-१९१-३४ (८५६५)
क्रोधरक्तेक्षणा सा गौर्हंभारवघनस्वना ।
विश्वामित्रस्य तत्सैन्यं व्यद्रावयत सर्वशः ॥ १-१९१-३५ (८५६६)
कशाग्रदण्डाभिहता काल्यमाना ततस्ततः ।
क्रोधरक्तेक्षणा क्रोधं भूय एव समाददे ॥ १-१९१-३६ (८५६७)
आदित्य इव मध्याह्ने क्रोधदीप्तवपुर्बभौ ।
अङ्गारवर्षं मुञ्चन्ती मुहुर्वालधितो महत् ॥ १-१९१-३७ (८५६८)
असृजत्पह्लवान्पुच्छात्प्रस्रवाद्द्राविडाञ्छकान् ।
योनिदेशाच्च यवनाञ्शकृतः शबरान्बहून् ॥ १-१९१-३८ (८५६९)
मूत्रतश्चासृजत्कांश्चिच्छबरांश्चैव पार्श्वतः ।
पौण्ड्रान्किरातान्यवनान्सिंहलान्बर्बरान्खसान् ॥ १-१९१-३९ (८५७०)
चिबुकांश्च पुलिन्दांश्च चीनान्हूणान्सकेरलान् ।
ससर्ज फेनतः सा गौर्म्लेच्छान्बहुविधानपि ॥ १-१९१-४० (८५७१)
तैर्विसृष्टैर्महासैन्यैर्नानाम्लेच्छगणैस्तदा ।
नानावरणसंछन्नैर्नानायुधधरैस्तथा ॥ १-१९१-४१ (८५७२)
अवाकीर्यत संरब्धैर्विश्वामित्रस्य पश्यतः ।
एकैकश्च तदा योधः पञ्चभिः सप्तभिर्वृतः ॥ १-१९१-४२ (८५७३)
अस्त्रवर्षेण महता वध्यमानं बलं तदा ।
प्रभग्नं सर्वतस्त्रस्तं विश्वामित्रस्य पश्यतः ॥ १-१९१-४३ (८५७४)
ग्तस्य तच्चतुरङ्गं वै बलं परमदुःसहम् ।
प्रभग्नं सर्वतो घोरं पयस्विन्या विनिर्जितम् ॥' १-१९१-४४ (८५७५)
न च प्राणैर्वियुज्यन्ते केचित्तत्रास्य सैनिकाः ।
विश्वामित्रस्य संक्रुद्धैर्वासिष्ठैर्भरतर्षभ ॥ १-१९१-४५ (८५७६)
सा गौस्तत्सकलं सैन्यं कालयामास दूरतः ।
विश्वामित्रस्य तत्सैन्यं काल्यमानं त्रियोजनम् ॥ १-१९१-४६ (८५७७)
क्रोशमानं भयोद्विग्नं त्रातारं नाध्यगच्छत ।
गविश्वामित्रस्ततो दृष्ट्वा क्रोधाविष्टः स रोदसी ॥ १-१९१-४७ (८५७८)
ववर्ष शरवर्षाणि वसिष्ठे मुनिसत्तमे ।
घोररूपांश्च नाराचान्क्षुरान्भल्लान्महामुनिः ॥ १-१९१-४८ (८५७९)
विश्वामित्रप्रयुक्तांस्तान्वैणवेन व्यमोचयत् ।
वसिष्ठस्य तदा दृष्ट्वा कर्मकौशलमाहवे ॥ १-१९१-४९ (८५८०)
विश्वामित्रोऽपि कोपेन भूयः शत्रुनिपातनः ।
दिव्यास्त्रवर्षं तस्मै स प्राहिणोन्मुनये रुषा ॥ १-१९१-५० (८५८१)
आग्नेयं वारुणं चैन्द्रं याम्यं वायव्यमेव च ।
विससर्ज महाभागे वसिष्ठे ब्रह्मणः सुते ॥ १-१९१-५१ (८५८२)

अस्त्राणि सर्वतो ज्वालां विसृजन्ति प्रपेदिरे ।
युगान्तसमये घोराः पतङ्गस्येव रश्मयः ॥ १-१९१-५२ (८५८३)
वसिष्ठोऽपि महातेजा ब्रह्मशक्तिप्रयुक्तया ।
यष्ट्या निवारयामास सर्वाण्यस्त्राणि स स्मयन् ॥ १-१९१-५३ (८५८४)
ततस्ते भस्मसाद्भूताः पतन्ति स्म महीतले ।
अपोह्य दिव्यान्यस्त्राणि वसिष्ठो वाक्यमब्रवीत् ॥ १-१९१-५४ (८५८५)
निर्जितोऽसि महाराज दुरात्मन्गाधिनन्दन ।
यदि तेऽस्ति परं शौर्यं तद्दर्शय मयि स्थिते ॥ १-१९१-५५ (८५८६)
गन्धर्व उवाच। १-१९१-५६क्ष् (१०९८)
विश्वामित्रस्तथा चोक्तो वसिष्ठेन नराधिपः ।
नोवाच किंचिद्व्रीडाढ्यो विद्रावितमहाबलः'॥ १-१९१-५६ (८५८७)
दृष्ट्वा तन्महदाश्चर्यं ब्रह्मतेजोभवं तदा ।
विश्वामित्रः क्षत्रभावान्निर्विण्णो वाक्यमब्रवीत् ।
धिग्बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम् ॥ १-१९१-५७ (८५८८)
बलाबले विनिश्चित्य तप एव परं बलम्। १-१९१-५८ (८५८९)
गन्धर्व उवाच ।
स राज्यं स्फीतमुत्सृज्य तां च दीप्तां नृपश्रियम् ॥ १-१९१-५८क्ष् (१०९९)
भोगांश्च पृष्ठतः कृत्वा तपस्येव मनो दधे ।
स गत्वा तपसा सिद्धिं लोकान्विष्टभ्य तेजसा ॥ १-१९१-५९ (८५९०)
तताप सर्वान्दीप्तौजा ब्राह्मणत्वमवाप्तवान् ।
अपिबच्च ततः सोममिन्द्रेण सह कौशिकः ॥ १-१९१-६० (८५९१)
ग्एवंवीर्यस्तु राजर्षिर्विप्रर्षिः संबभूव ह'॥ ॥ १-१९१-६१ (८५९२)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वमि
एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-१९१-५ मरुधन्वसु मरुसंज्ञकेष्वल्पजलप्रदेशेषु ॥
१-१९१-३८ पह्लवादयो म्लेच्छविशेषाः ॥
एकनवत्यधिकशततमोऽध्यायः ॥
१९१ ॥

आदिपर्व - अध्याय १९२
॥ श्रीः ॥
१.१९२. अध्यायः १९२

Mahabharata - Adi Parva - Chapter Topics

कल्माषपादराजोपाख्याने---वसिष्ठपुत्रेण शक्तिना कल्माषपादं प्रति शापदानं ॥ १ ॥
पुनरन्येन ब्राह्मणेन च कल्माषपादंप्रति शापदानं ॥ २ ॥
राक्षसाविष्टेन कल्माषपादेन वसिष्ठपुत्राणां भक्षणं ॥ ३ ॥
पुत्रशोकाभिसंतप्तेन वसिष्ठेन प्राणत्यागार्थं अनेकधा प्रयतनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९२-० (८५९३)
ग्अर्जुन उवाच। १-१९२-०क्ष् (११००)
ऋष्योस्तु यत्कृते वैरं विश्वामित्रवसिष्ठयोः ।
बभूव गन्धर्वपते शंस तत्सर्वमेव मे ॥ १-१९२-१ (८५९४)
माहात्म्यं च वसिष्ठस्य ब्राह्मण्यं ब्रह्मतेजसः ।
विश्वामित्रस्य च तथा क्षत्रस्य च महात्मनः ॥ १-१९२-२ (८५९५)
न शृण्वानस्त्वहं तृप्तिमुपगच्छामि खेचर ।
आख्याहि गन्धर्वपते शंस तत्सर्वमेव मे ॥ १-१९२-३ (८५९६)
माहात्म्यं च वसिष्ठस्य विश्वामित्रस्य भाषते ॥ १-१९२-४ (८५९७)
गन्धर्व उवाच। १-१९२-५क्ष् (११०१)
इदं वासिष्ठमाख्यानं पुराणं पुण्यमुत्तमम् ।
पार्थ सर्वेषु लोकेषु विश्रुतं तन्निबोध मे ॥' १-१९२-५ (८५९८)
कल्माषपाद इत्येवं लोके राजा बभूव ह ।
इक्ष्वाकुवंशजः पार्थ तेजसाऽसदृशो भुवि ॥ १-१९२-६ (८५९९)
स कदाचिद्वनं राजा मृगयां निर्ययौ पुरात् ।
मृगान्विध्यन्वराहांश्च चचार रिपुमर्दनः ॥ १-१९२-७ (८६००)
तस्मिन्वने महाघोरे खड्गांश्च बहुशोऽहनत् ।
हत्वा च सुचिरं श्रान्तो राजा निववृते ततः ॥ १-१९२-८ (८६०१)
अकामयत्तं याज्यार्थे विश्वामित्रः प्रतापवान् ।
स तु राजा महात्मानं वासिष्ठमृषिसत्तमम् ॥ १-१९२-९ (८६०२)
तृषार्तश्च क्षुधार्तश्च एकायनगतः पथि ।
अपश्यदजितः सङ्ख्ये मुनिं प्रतिमुखागतम् ॥ १-१९२-१० (८६०३)
शक्तिं नाम महाभागं वसिष्ठकुलवर्धनम् ।
ज्येष्ठं पुत्रं पुत्रशताद्वसिष्ठस्य महात्मनः ॥ १-१९२-११ (८६०४)
अपगच्छ पथोऽस्माकमित्येवं पार्थिवोऽब्रवीत् ।
तथा ऋषिरुवाचैनं सान्त्वयञ्श्लक्ष्णया गिरा ॥ १-१९२-१२ (८६०५)
मम पन्था महाराज धर्म एष सनातनः ।
ग्वृद्धभीरुनृपस्नातस्त्रीरोगिवरचक्रिणाम् ॥ १-१९२-१३ (८६०६)

पन्था देयो नृपैस्तेषामन्यैस्तैस्तस्य भूपतेः ।'
राज्ञा सर्वेषा धर्मेषु देयः पन्था द्विजातये ॥ १-१९२-१४ (८६०७)
एवं परस्परं तौ तु पथोऽर्थं वाक्यमूचतुः ।
अपसर्पापसर्पेति वागुत्तरमकुर्वताम् ॥ १-१९२-१५ (८६०८)
ऋषिस्तु नापचक्राम तस्मिन्धर्मपथे स्थितः ।
'अपि राजा मुनेर्मार्गात्क्रोधान्नापजगाम ह ॥' १-१९२-१६ (८६०९)
अमुञ्चन्तं तु पन्थानं तमृषिं नृपसत्तमः ।
जगाम कशया मोहात्तदा राक्षसन्मुनिम् ॥ १-१९२-१७ (८६१०)
कशाप्रहाराभिहतस्ततः स मुनिसत्तमः ।
तं शशाप नृपश्रेष्ठं वासिष्ठः क्रोधमूर्च्छितः ॥ १-१९२-१८ (८६११)
हंसि राक्षसवद्यस्माद्राजापशद तापसम् ।
तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यसि ॥ १-१९२-१९ (८६१२)
मनुष्यपिशिते सक्तश्चरिष्यसि महीमिमाम् ।
गच्छ राजाधमेत्युक्तः शक्तिना वीर्यशक्तिना ॥ १-१९२-२० (८६१३)
ततो याज्यनिमित्तं तु विश्वामित्रवसिष्ठयोः ।
वैरमासीत्तदा तं तु विश्वामित्रोऽन्वपद्यत ॥ १-१९२-२१ (८६१४)
तयोर्विवदतोरेवं समीपमुपचक्रमे ।
ऋषिरुग्रतपाः पार्थ विश्वामित्रः प्रतापवान् ॥ १-१९२-२२ (८६१५)
ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः ।
ऋषेः पुत्रं वसिष्ठस्य वसिष्ठमिव तेजसा ॥ १-१९२-२३ (८६१६)
अन्तर्धाय ततोऽत्मानं विश्वामित्रोऽपि भारत ।
तावुभावतिचक्राम चिकीर्षन्नात्मनः प्रियम् ॥ १-१९२-२४ (८६१७)
स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः ।
जगाम शरणं शक्तिं प्रसादयितुमर्हयन् ॥ १-१९२-२५ (८६१८)
तस्य भावं विदित्वा स नृपतेः कुरुसत्तम ।
विश्वामित्रस्ततो रक्ष आदिदेश नृपं प्रति ॥ १-१९२-२६ (८६१९)
शापात्तस्य तु विप्रर्षेर्विश्वामित्रस्य चाज्ञया ।
राक्षसः किङ्करो नाम विवेश नृपतिं तदा ॥ १-१९२-२७ (८६२०)
रक्षसा तं गृहीतं तु विदित्वा मुनिसत्तमः ।
विश्वामित्रोऽप्यपाक्रामत्तस्माद्देशादरिन्दम ॥ १-१९२-२८ (८६२१)
ततः स नृपतिर्विद्वान्रक्षन्नात्मानमात्मना ।
बलवत्पीड्यमानोऽपि रक्षसान्तर्गतेन ह ॥ १-१९२-२९ (८६२२)
ददर्शाथ द्विजः कश्चिद्राजानं प्रस्थितं वनम् ।
अयाचत क्षुधापन्नः समांसं भोजनं तदा ॥ १-१९२-३० (८६२३)
तमुवाचाथ राजर्षिर्द्विजं मित्रसहस्तदा ।
आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्तं प्रतिपालयन् ॥ १-१९२-३१ (८६२४)

निवृत्तः प्रतिदास्यामि भोजनं ते यथेप्सितम् ।
इत्युक्त्वा प्रययौ राजा तस्थौ च द्विजसत्तमः ॥ १-१९२-३२ (८६२५)
ततो राजा परिक्रम्य यथाकामं यथासुखम् ।
निवृत्तोऽन्तःपुरं पार्थ प्रविवेश महामनाः ॥ १-१९२-३३ (८६२६)
ग्अन्तर्गतस्तदा राजा श्रुत्वा ब्राह्मणभाषितम् ।
सोऽन्तःपुरं प्रविश्याथ न सस्मार नराधिपः ॥' १-१९२-३४ (८६२७)
ततोऽर्धरात्र उत्थाय सूदमानाय्य सत्वरम् ।
उवाच राजा संस्मृत्य ब्राह्मणस्य प्रतिश्रुतम् ॥ १-१९२-३५ (८६२८)
गच्छामुष्मिन्वनोद्देशे ब्राह्मणो मां प्रतीक्षते ।
अन्नार्थी तं त्वमन्नेन समांसेनोपपादय ॥ १-१९२-३६ (८६२९)
गन्धर्व उवाच। १-१९२-३७क्ष् (११०२)
एवमुक्तस्ततः सूदः सोऽनासाद्यामिषं क्वचित् ।
निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः ॥ १-१९२-३७ (८६३०)
राजा तु रक्षसाविष्टः सूदमाह गतव्यथः ।
अप्येनं नरमांसेन भोजयेति पुनः पुनः ॥ १-१९२-३८ (८६३१)
तथेत्युक्त्वा ततः सूदः संस्थानं वध्यघातिनाम् ।
गत्वाऽऽजहार त्वरितो नरमांसमपेतभीः ॥ १-१९२-३९ (८६३२)
एतत्संस्कृत्य विधिवदन्नोपहितमाशु वै ।
तस्मै प्रादाद्ब्राह्मणाय क्षुधिताय तपस्विने ॥ १-१९२-४० (८६३३)
स सिद्धचक्षुषा दृष्ट्वा तदन्नं द्विजसत्तमः ।
अभोज्यमिदमित्याह क्रोधपर्याकुलेक्षणः ॥ १-१९२-४१ (८६३४)
ब्राह्मण उवाच। १-१९२-४२क्ष् (११०३)
यस्मादभोज्यमन्नं मे ददाति स नृपाधमः ॥ १-१९२-४२ (८६३५)
सक्तो मानुषमांसेषु यथोक्तः शक्तिना पुरा ।
उद्वेजनीयो भूतानां चरिष्यति महीमिमाम् ॥ १-१९२-४३ (८६३६)
गन्धर्व उवाच। १-१९२-४४क्ष् (११०४)
द्विरनुव्याहृते राज्ञः स शापो बलवानभूत् ।
रक्षोबलसमाविष्टो विसंज्ञश्चाभवन्नृपः ॥ १-१९२-४४ (८६३७)
ततः स नृपतिश्रेष्ठो रक्षसापहृतेन्द्रियः ।
उवाच शक्तिं तं दृष्ट्वा न चिरादिव भारत ॥ १-१९२-४५ (८६३८)
यस्मादसदृशः शापः प्रयुक्तोऽयं मयि त्वया ।
तस्मात्त्वत्तः प्रवर्तिष्ये खादितुं पुरुषानहम् ॥ १-१९२-४६ (८६३९)
एवमुक्त्वा ततः सद्यस्तं प्राणैर्विप्रयोज्य च ।
शक्तिं तं भक्षयामास व्याघ्रः पशुमिवेप्सितम् ॥ १-१९२-४७ (८६४०)
शक्तिनं तु मृतं दृष्ट्वा विश्वामित्रः पुनःपुनः ।
वसिष्ठस्यैव पुत्रेषु तद्रक्षः संदिदेश ह ॥ १-१९२-४८ (८६४१)

स ताञ्शक्त्यवरान्पुत्रान्वसिष्ठस्य महात्मनः ।
भक्षयामास संक्रुद्धः सिंहः क्षुद्रमृगानिव ॥ १-१९२-४९ (८६४२)
वसिष्ठो घातिताञ्श्रुत्वा विश्वामित्रेण तान्सुतान् ।
धारयामास तं शोकं महाद्रिरिव मेदिनीम् ॥ १-१९२-५० (८६४३)
चक्रे चात्मविनाशाय बुद्धिं स मुनिसत्तमः ।
न त्वेव कौशिकोच्छेदं मेने मतिमतां वरः ॥ १-१९२-५१ (८६४४)
स मेरुकूटादात्मानं मुमोच भगवानृषिः ।
गिरेस्तस्य शिलायां तु तूलराशाविवापतत् ॥ १-१९२-५२ (८६४५)
न ममार च पातेन स यदा तेन पाण्डव ।
तदाग्निमिद्धं भगवान्संविवेश महावने ॥ १-१९२-५३ (८६४६)
तं तदा सुसमिद्धोऽपि न ददाह हुताशनः ।
दीप्यमानोऽप्यमित्रघ्न शीतोऽग्निरभवत्ततः ॥ १-१९२-५४ (८६४७)
स समुद्रमभिप्रेक्ष्य शोकाविष्टो महामुनिः ।
बद्ध्वा कण्ठे शिलां गुर्वीं निपपात तदाम्भसि ॥ १-१९२-५५ (८६४८)
स समुद्रोर्मिवेगेन स्थले न्यस्तो महामुनिः ।
न ममार यदा विप्रः कथंचित्संशितव्रतः ।
जगाम स ततः खिन्नः पुनरेवाश्रमं प्रति ॥ ॥ १-१९२-५६ (८६४९)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९२-९ याज्यार्थे अयं मम याज्यो भवत्वित्येतदर्थम् ॥
१-१९२-१० एकायनगतः अतिसंकुचितमार्गे गतः ॥
१-१९२-५२ मुमोच पातयामास ।आत्मानं देहम् ॥
द्विनवत्यधिकशततमोऽध्यायः ॥
१९२ ॥

आदिपर्व - अध्याय १९३
॥ श्रीः ॥
१.१९३. अध्यायः १९३

Mahabharata - Adi Parva - Chapter Topics
पूर्वोपायैरपि दुस्त्यजप्राणस्य वसिष्ठस्य पुनर्गङ्गापतनादिनापि
प्राणत्यागासंभवे आश्रमं प्रत्यागमनम् ॥ १ ॥
तत्र शक्तिभार्यामदृश्यन्तीनाम्नी गर्भवतीं ज्ञात्वा
आत्मघातान्निवर्तनं ॥ २ ॥

अदृश्यन्त्या सह गच्छन्तं वसिष्ठं भक्षयितुमागतस्य
कल्माषपादस्य वसिष्ठेन शापान्मोक्षणं ॥ ३ ॥
सौदासपत्न्या वसिष्ठाद्गर्भसंभवः ॥ ४ ॥
अश्मकनामकपुत्रोत्पत्तिः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९३-० (८६५०)
गन्धर्व उवाच। १-१९३-०क्ष् (११०५)
ततो दृष्ट्वाश्रमपदं रहितं तैः सुतैर्मुनिः ।
निर्जगाम सुदुःखार्तः पुनरप्याश्रमात्ततः ॥ १-१९३-१ (८६५१)
सोऽपश्यत्सरितं पूर्णां प्रावृट्काले नवाम्भसा ।
वृक्षान्बहुविधान्पार्थ हरन्तीं तीरजान्बहून् ॥ १-१९३-२ (८६५२)
अथ चिन्तां समापेदे पुनः कौरवनन्दन ।
अम्भस्यस्या निमज्जेयमिति दुःखसमन्वितः ॥ १-१९३-३ (८६५३)
ततः पाशैस्तदात्मानं गाढं बद्ध्वा महामुनिः ।
तस्या जले महानद्या निममज्ज सुदुःखितः ॥ १-१९३-४ (८६५४)
अथ च्छित्त्वा नदी पाशांस्तस्यारिबलसूदन ।
स्थलस्थं तमृषिं कृत्वा विपाशं समवासृजत् ॥ १-१९३-५ (८६५५)
उत्ततार ततः पाशैर्विमुक्तः स महानृषिः ।
विपाशेति च नामास्या नद्याश्चक्रे महानृषिः ॥ १-१९३-६ (८६५६)
ग्सा विपाशेति विख्याता नदी लोकेषु भारत ।
ऋषेस्तस्य नरव्याघ्र वचनात्सत्यवादिनः ।
उत्तीर्य च तदा राजन्दुःखितो भगवानृषिः ॥' १-१९३-७ (८६५७)
शोके बुद्धिं तदा चक्रे न चैकत्र व्यतिष्ठत ।
सोऽगच्छत्पर्वतांश्चैव सरितश्च सरांसि च ॥ १-१९३-८ (८६५८)
दृष्ट्वा स पुनरेवर्षिर्नदीं हैमवतीं तदा ।
चण्डग्राहवतीं भीमां तस्याः स्रोतस्यपातयत् ॥ १-१९३-९ (८६५९)
सा तमग्निसं विप्रमनुचिन्त्य सरिद्वरा ।
शतधा विद्रुता तस्माच्छतद्रुरिति विश्रुता ॥ १-१९३-१० (८६६०)
ततः स्थलगतं दृष्ट्वा तत्राप्यात्मानमात्मना ।
मर्तुं न शक्यमित्युक्त्वा पुवरेवाश्रमं ययौ ॥ १-१९३-११ (८६६१)
स गत्वा विविधाञ्शैलान्देशान्बहुविधांस्तथा ।
अदृशन्त्याख्यया वध्वाथाश्रमेनुसृतोऽभवत् ॥ १-१९३-१२ (८६६२)
अथ शुश्राव संगत्या वेदाध्ययननिःस्वनम् ।
पृष्ठतः परिपूर्णार्थं षड्भिरङ्गैरलङ्कृतम् ॥ १-१९३-१३ (८६६३)

अनुव्रजति कोन्वेष मामित्येवाथ सोऽब्रवीत् ।
अदृश्यन्त्येवमुक्ता वै तं स्नुषा प्रत्यभाषत ॥ १-१९३-१४ (८६६४)
शक्तोभार्या महाभाग तपोयुक्ता तपस्विनम् ।
अहमेकाकिनी चापि त्वया गच्छामि नापरः ॥ १-१९३-१५ (८६६५)
वसिष्ठ उवाच। १-१९३-१६क्ष् (११०६)
पुत्रि कस्यैष साङ्गस्य वेदस्याध्ययनस्वनः ।
पुरा साङ्गस्य वेदस्य शक्तेरिव मया श्रुतः ॥ १-१९३-१६ (८६६६)
अदृश्यन्त्युवाच। १-१९३-१७क्ष् (११०७)
अयं कुक्षौ समुत्पन्नः शक्तेर्गर्भः सुतस्य ते ।
समा द्वादश तस्येह वेदानभ्यस्यतो मुने ॥ १-१९३-१७ (८६६७)
गन्धर्व उवाच। १-१९३-१८क्ष् (११०८)
एवमुक्तस्तया हृष्टो वसिष्ठः श्रेष्ठभागृषिः ।
अस्ति सन्तानमित्युक्त्वा मृत्योः पार्थ न्यवर्तत ॥ १-१९३-१८ (८६६८)
ततः प्रतिनिवृत्तः स तया वध्वा सहानघ ।
कल्माषपादमासीनं ददर्श विजने वने ॥ १-१९३-१९ (८६६९)
स तु दृष्ट्वैव तं राजा क्रुद्ध उत्थाय भारत ।
आविष्टो रक्षसोग्रेण इयेषात्तुं तदा मुनिम् ॥ १-१९३-२० (८६७०)
अदृश्यन्ती तु तं दृष्ट्वा क्रूरकर्माणमग्रतः ।
भयसंविग्नया वाचा वसिष्ठमिदमब्रवीत् ॥ १-१९३-२१ (८६७१)
असौ मृत्युरिवोग्रेण दण्डेन भगवन्नितः ।
प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति दारुणः ॥ १-१९३-२२ (८६७२)
तं निवारयितुं शक्तो नान्योऽस्ति भुवि कश्चन ।
त्वदृतेऽद्य महाभाग सर्ववेदविदां वर ॥ १-१९३-२३ (८६७३)
पाहि मां भगवन्पापादस्माद्दारुणदर्शनात् ।
राक्षसोऽयमिहात्तुं वै नूनमावां समीहते ॥ १-१९३-२४ (८६७४)
वसिष्ठ उवाच। १-१९३-२५क्ष् (११०९)
माभैः पुत्रि न भेतव्यं राक्षसात्तु कथंचन ।
नैतद्रक्षो भयं यस्मात्पश्यसि त्वमुपस्थितम् ॥ १-१९३-२५ (८६७५)
राजा कल्माषपादोऽयं वीर्यवान्प्रथितो भुवि ।
स एषोऽस्मिन्वनोद्देशे निवसत्यतिभीषणः ॥ १-१९३-२६ (८६७६)
गन्धर्व उवाच। १-१९३-२७क्ष् (१११०)
तमापतन्तं संप्रेक्ष्य वसिष्ठो भगवानृषिः ।
वारयामास तेजस्वी हुङ्कारेणैव भारत ॥ १-१९३-२७ (८६७७)
मन्त्रपूतेन च पुनः स तमभ्युक्ष्य वारिणा ।
मोक्षयामास वै शापात्तस्माद्योगान्नराधिपम् ॥ १-१९३-२८ (८६७८)
स हि द्वादश वर्षाणि वासिष्ठस्यैव तेजसा ।

ग्रस्त आसीद्ग्रहेणेव पर्वकाले दिवाकरः ॥१-१९३-२९ (८६७९)
रक्षसा विप्रमुक्तोऽथ स नृपस्तद्वनं महत् ।
तेजसा रञ्जयामास न्ध्याभ्रमिव भास्करः ॥१-१९३-३० (८६८०)
प्रतिलभ्य ततः संज्ञामभिवाद्य कृताञ्जलिः ।
उवाच नृपतिः काले वसिष्ठमृषिसत्तमम् ॥१-१९३-३१ (८६८१)
सौदासोऽहं महाभाग याज्यस्ते मुनिसत्तम ।
अस्मिन्काले यदिष्टं ते ब्रूहि किं करवाणि ते ॥१-१९३-३२ (८६८२)
वसिष्ठ उवाच।१-९३-३३क्ष् (११११)
वृत्तमेतद्यथाकालं गच्छ राज्यं प्रशाधि वै ।
ब्राह्मणं तु मनुष्येन्द्र माऽवमंस्थाः कदाचन ॥१-१९३-३३ (८६८३)
राजोवाच।१-१९३-३४क्ष् (१११२)
नावमंस्ये महाभाग कदाचिद्ब्राह्मणर्षभान् ।
त्वन्निदेशे स्थितः सम्यक् पूजयिष्याम्यहं द्विजान् ॥१-१९३-३४ (८६८४)
इक्ष्वाकूणां च येनाहमनृणः स्यां द्विजोत्तम ।
तत्त्वत्तः प्राप्तुमिच्छामि सर्ववेदविदां वर ॥१-१९३-३५ (८६८५)
अपत्यायेप्सिताय त्वं महिषीं गन्तुमर्हसि ।
शीलरूपगुणोपेतामिक्ष्वाकुकुलवृद्धये ॥१-१९३-३६ (८६८६)
गन्धर्व उवाच।१-१९३-३७क्ष् (१११३)
ददानीत्येव तं तत्र राजानं प्रत्युवाच ह ।
वसिष्ठः परमेष्वासं सत्यसन्धो द्विजोत्तमः ॥१-१९३-३७ (८६८७)
ततः प्रतिययौ काले वसिष्ठः सह तेन वै ।
ख्यातां पुरीमिमां लोकेष्वयोध्यां मनुजेश्वर ॥१-१९३-३८ (८६८८)
तं प्रजाः प्रतिमोदन्त्यः सर्वाः प्रत्युद्गतास्तदा ।
विपाप्मानं महात्मानं दिवौकस इवेश्वरम् ॥१-१९३-३९ (८६८९)
सुचिराय मनुष्येन्द्रो नगरीं पुण्यलक्षणाम् ।
विवेश सहितस्तेन वसिष्ठेन महर्षिणा ॥१-१९३-४० (८६९०)
ददृशुस्तं महीपालमयोध्यावासिनो जनाः ।
पुरोहितेन सहितं दिवाकरमिवोदितम् ॥१-१९३-४१ (८६९१)
स च तां पूरयामास लक्ष्म्या लक्ष्मीवतां वरः ।
अयोध्यां व्योम शीतांशुः शरत्काल इवोदितः ॥१-१९३-४२ (८६९२)
संसक्तिमृष्टपन्थानं पताकाध्वजशोभितम् ।
मनः प्रह्लादयामास तस्य तत्पुरमुत्तमम् ॥१-१९३-४३ (८६९३)
तुष्टपुष्टजनाकीर्णा सा पुरी कुरुनन्दन ।
अशोभत तदा तेन शक्रेणेवामरावती ॥१-१९३-४४ (८६९४)
ततः प्रविष्टे राजर्षौ तस्मिंस्तत्पुरमुत्तमम् ।
राज्ञस्तस्याज्ञया देवी वसिष्ठमुपचक्रमे ॥१-१९३-४५ (८६९५)

ऋतावथ महर्षिस्तु संबभूव तया सह ।
देव्या दिव्येन विधिना वसिष्ठः श्रेष्ठभागृषिः ॥ १-१९३-४६ (८६९६)
ततस्तस्यां समुत्पन्ने गर्भे स मुनिसत्तमः ।
राज्ञाभिवादितस्तेन जगाम मुनिराश्रमम् ॥ १-१९३-४७ (८६९७)
दीर्घकालेन सा गर्भं सुषुवे न तु तं यदा ।
तदा देव्यश्मना कुक्षिं निर्बिभेद यशस्विनी ॥ १-१९३-४८ (८६९८)
ततो द्वादशमे वर्षे स जज्ञे पुरुषर्षभः ।
अश्मको नाम राजर्षिः पौदन्यं यो न्यवेशयत् ॥ ॥ १-१९३-४९ (८६९९)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९३-१२ वध्वा स्नुषया ॥
१-१९३-४८ निष्पिपेष मनस्विनीति ङ । पाठः ॥
त्रिनवत्यधिकशततमोऽध्यायः ॥
१९३ ॥

आदिपर्व - अध्याय १९४
॥ श्रीः ॥
१.१९४. अध्यायः १९४

Mahabharata - Adi Parva - Chapter Topics
पराशरोत्पत्तिः ॥ १ ॥
पितरं कल्माषपादभक्षितं ज्ञात्वा क्रुद्धेन पराशरेण लोकविनाशाय यतनम् ॥ २ ॥
कर्तवीर्यार्जुन वंश्यैः क्षत्रियैः धनार्थं भृगुवंश्यानां ब्राह्मणानां हननम् ॥ ३ ॥
क्षत्रियभीत्या कयाचिद्ब्राह्मण्या ऊरौ गर्भं धृतं हन्तुं क्षत्रियाणामुद्यमः ॥ ४ ॥
ऊरुं भित्वा निर्गतस्य बालकस्य तेजसान्धीभूतानां क्षत्रियाणां ब्राह्मणींप्रति शरणगमनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९५-० (८७००)
गन्धर्व उवाच । १-१९५-०क्ष् (१११४)

आश्रमस्था ततः पुत्रमदृश्यन्ती व्यजायत ।
शक्तेः कुलकरं राजन् द्वितीयमिव शक्तिनम् ॥ १-१९४-१ (८७०१)
जातकर्मादिकास्तस्य क्रियाः स मुनिसत्तमः ।
पौत्रस्य भरतश्रेष्ठ चकार भगवान्स्वयम् ॥ १-१९४-२ (८७०२)
परासुः स यतस्तेन वसिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥ १-१९४-३ (८७०३)
अमन्यत स धर्मात्मा वसिष्ठं पितरं मुनिः ।
जन्मप्रभृति तस्मिंस्तु पितरीवान्ववर्तत ॥ १-१९४-४ (८७०४)
स तात इति विप्रर्षिं वसिष्ठं प्रत्यभाषत ।
मातुः समक्षं कौन्तेय अदृश्यन्त्याः परन्तप ॥ १-१९४-५ (८७०५)
तातेति परिपूर्णार्थं तस्य तन्मधुरं वचः ।
अदृश्यन्त्यश्रुपूर्णाक्षी शृण्वती तमुवाच ह ॥ १-१९४-६ (८७०६)
मा तात तातताततेति ब्रूह्येनं पितरं पितुः ।
रक्षसा भक्षितस्तात तव तातो वनान्तरे ॥ १-१९४-७ (८७०७)
मन्यसे यं तु तातेति नैष तातस्तवानघ ।
आर्य एष पिता तस्य पितुस्तव यशस्विनः ॥ १-१९४-८ (८७०८)
स एवमुक्तो दुःखार्तः सत्यवागृषिसत्तमः ।
सर्वलोकविनाशाय मतिं चक्रे महामनाः ॥ १-१९४-९ (८७०९)
तं तथा निश्चितात्मानं स महात्मा महातपाः ।
ऋषिर्ब्रह्मविदां श्रेष्ठो मैत्रावरुणिरन्त्यधीः ॥ १-१९४-१० (८७१०)
वसिष्ठो वारयामास हेतुना येन तच्छृणु। १-१९४-११ (८७११)
वसिष्ठ उवाच ।
कृतवीर्य इति ख्यातो बभूव पृथिवीपतिः ॥ १-१९४-११क्ष् (१११५)
याज्यो वेदविदां लोके भृगूणां पार्थिवर्षभः ।
स तानग्रभुजस्तात धान्येन च धनेन च ॥ १-१९४-१२ (८७१२)
सोमान्ते तर्पयामास विपुलेन विशांपतिः ।
तस्मिन्नृपतिशार्दूले स्वर्यातेऽथ कथंचन ॥ १-१९४-१३ (८७१३)
बभूव तत्कुलेयानां द्रव्यकार्यमुपस्थितम् ।
भृगूणां तु धनं ज्ञात्वा राजानः सर्व एव ते ॥ १-१९४-१४ (८७१४)
याचिष्णवोऽभिजग्मुस्तांस्ततो भार्गवसत्तमान् ।
भूमौ तु निददुः केचिद्भृगवो धनमक्षयम् ॥ १-१९४-१५ (८७१५)
ददुः केचिद्द्विजातिभ्यो ज्ञात्वा क्षत्रियतो भयम् ।
भृहवस्तु ददुः केचित्तेषां वित्तं यथेप्सितम् ॥ १-१९४-१६ (८७१६)
क्षत्रियाणां तदा तात कारणान्तरदर्शनात् ।
ततो महीतलं तात क्षत्रियेण यदृच्छया ॥ १-१९४-१७ (८७१७)
खनताऽधिगतं वित्तं केनच्चिद्भृगुवेश्मनि ।

तद्वित्तं ददृशुः सर्वे समेताः क्षत्रियर्षभाः ॥ १-१९४-१८ (८७१८)
अवमन्य ततः क्रोधाद्भृगूंस्ताञ्छरणगतान् ।
निजघ्नुः परमेष्वासाः सर्वांस्तान्निशितैः शरैः ॥ १-१९४-१९ (८७१९)
आगर्भादवकृन्तन्तश्चेरुः सर्वां वसुन्धराम् ।
तत उच्छिद्यमानेषु भृगुष्वेवं भयात्तदा ॥ १-१९४-२० (८७२०)
भृगुपत्न्यो गिरिं दुर्गं हिमवन्तं प्रपेदिरे ।
तासामन्यतमा गर्भं भयाद्दध्रे महौजसम् ॥ १-१९४-२१ (८७२१)
ऊरुणैकेन वाभोरूर्भर्तुः कुलविवृद्धये ।
तं गर्भमुपलभ्याशु ब्राह्मण्येका भयार्दिता ॥ १-१९४-२२ (८७२२)
गत्वा वै कथयामास क्षत्रियाणामुपह्वरे ।
ततस्ते क्षत्रिया जग्मुस्तं गर्भं हन्तुमुद्यताः ॥ १-१९४-२३ (८७२३)
ददृशुर्ब्राह्मणीं तेऽथ दीप्यमानां स्वतेजसा ।
अथ गर्भः स भित्त्वोरुं ब्राह्मण्या निर्जगाम ह ॥ १-१९४-२४ (८७२४)
मुष्णन्दृष्टीः क्षत्रियाणां मध्याह्न इव भास्करः ।
ततश्चक्षुर्विहीनास्ते गिरिदुर्गेषु बभ्रमुः ॥ १-१९४-२५ (८७२५)
ततस्ते मोघसङ्कल्पा भयार्ताः क्षत्रियाः पुनः ।
ब्राह्मणीं शरमं जग्मुर्दृष्ट्यर्थं तामनिन्दिताम् ॥ १-१९४-२६ (८७२६)
ऊचुश्चैनां महाभागां क्षत्रियास्ते विचेतसः ।
ज्योतिःप्रहीणा दुःखार्ताः शान्तार्चिष इवाग्नयः ॥ १-१९४-२७ (८७२७)
भगवत्याः प्रसादेन गच्छेत्क्षत्रमनामयम् ।
उपारम्य च गच्छेम सहिताः पापकर्मणः ॥ १-१९४-२८ (८७२८)
सपुत्रा त्वं प्रसादं नः कर्तुमर्हसि शोभने ।
पुनर्दृष्टिप्रदानेन राज्ञः संत्रातुमर्हसि ॥ ॥ १-१९४-२९ (८७२९)

इति श्रीमन्महाभारते आदिप्रवणि चैत्ररथपर्वणि
चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९४-१० अन्त्यधीः अन्ते सिद्धान्ते साध्वी अन्त्या धीर्यस्य सोन्त्यधीः ॥
चतुर्नवत्यधिकशततमोऽध्यायः ॥
१९४ ॥

आदिपर्व - अध्याय १९५
॥ श्रीः ॥
१.१९५. अध्यायः १९५

Mahabharata - Adi Parva - Chapter Topics

ब्राह्मणीवाक्येन और्वंप्रति शरणागतानां क्षत्रियाणां चक्षुःप्राप्तिः ॥ १ ॥
लोकविनाशार्थं तपस्यत और्वस्य तत्पितृकृततपोनिवारणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९५-० (८७३०)
ब्राह्मण्युवाच। १-१९५-०क्ष् (१११६)
नाहं गृह्णामि वस्ताता दृष्टीर्नास्मि रुषान्विता ।
अयं तु भार्गवो नूनमूरुजः कुपितोऽद्य वः ॥ १-१९५-१ (८७३१)
तेन चक्षूंषि वस्ताता व्यक्तं कोपान्महात्मना ।
स्मरता निहतान्बन्धूनादत्तानि न संशयः ॥ १-१९५-२ (८७३२)
गर्भानपि यदा यूयं भृगूणां घ्नत पुत्रकाः ।
तदायमूरुणा गर्भो मया वर्षशतं धृतः ॥ १-१९५-३ (८७३३)
षडङ्गश्चाखिलो वेद इमं गर्भस्थमेव ह ।
विवेश भृगुवंशस्य भूयः प्रियचिकीर्षया ॥ १-१९५-४ (८७३४)
सोऽयं पितृवधाद्व्यक्तं क्रोधाद्वो हन्तुमिच्छति ।
तेजसा तस्य दिव्येन चक्षूंषि मुषितानि वः ॥ १-१९५-५ (८७३५)
तमेव यूयं याचध्वमौर्वं मम सुतोत्तमम् ।
अयं वः प्रणिपातेन तुष्टो दृष्टीः प्रदास्यति ॥ १-१९५-६ (८७३६)
वसिष्ठ उवाच। १-१९५-७क्ष् (१११७)
एवमुक्तास्ततः सर्वे राजानस्ते तमूरुजम् ।
ऊचुः प्रसीदेति तदा प्रसादं च चकार सः ॥ १-१९५-७ (८७३७)
अनेनैव च विख्यातो नाम्ना लोकेषु सत्तमः ।
स और्व इति विप्रर्षिरूरुं भित्त्वा व्यजायत ॥ १-१९५-८ (८७३८)
चक्षूंषि प्रतिलभ्याथ प्रतिजग्मुस्ततो नृपाः ।
भार्गवस्तु मुनिर्मेने सर्वलोकपराभवम् ॥ १-१९५-९ (८७३९)
स चक्रे तात लोकानां विनाशाय मतिं तदा ।
सर्वेषामेव कार्त्स्न्येन मनः प्रवणमात्मनः ॥ १-१९५-१० (८७४०)
इच्छन्नपचितिं कर्तुं भृगूणां भृगुनन्दनः ।
सर्वलोकविनाशाय तपसा महतैधितः ॥ १-१९५-११ (८७४१)
तापयामास ताँल्लोकान्सदेवासुरमानुषान् ।
तपसोग्रेण महता नन्दयिष्यन्पितामहान् ॥ १-१९५-१२ (८७४२)
ततस्तं पितरस्तात विज्ञाय कुलनन्दनम् ।
पितृलोकादुपागम्य सर्व ऊचुरिदं वचः ॥ १-१९५-१३ (८७४३)
और्व दृष्टः प्रभावस्ते तपसोग्रस्य पुत्रक ।
प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः ॥ १-१९५-१४ (८७४४)

नानीशैर्हि तदा तात भृगुभिर्भावितात्मभिः ।
वधो ह्युपेक्षितः सर्वैः क्षत्रियाणां विहिंसताम् ॥१-१९५-१५ (८७४५)
आयुषा विप्रकृष्टेन यदा नः खेद आविशत् ।
तदाऽस्माभिर्वधस्तात क्षत्रियैरीप्सितः स्वयम् ॥१-१९५-१६ (८७४६)
निखातं यच्च वै वित्तं केनचिद्भृगुवेश्मनि ।
वैरायैव तदा न्यस्तं क्षत्रियान्कोपयिष्णुभिः ॥१-१९५-१७ (८७४७)
किं हि वित्तेन नः कार्यं स्वर्गेप्सूनां द्विजोत्तम ।
यदस्माकं धनाध्यक्षः प्रभूतं धनमाहरत् ॥१-१९५-१८ (८७४८)
यदा तु मृत्युरादातुं न नः शक्नोति सर्वशः ।
तदाऽस्माभिरयं दृष्ट उपायस्तात संमतः ॥१-१९५-१९ (८७४९)
आत्महा च पुमांस्तात न लोकाँल्लभते शुभान् ।
ततोऽस्माभिः समीक्ष्यैवं नात्मनात्मा निपातितः ॥१-१९५-२० (८७५०)
न चैतन्नः प्रियं तात यदिदं कर्तुमिच्छसि ।
नियच्छेदं मनः पापात्सर्वलोकपराभवात् ॥१-१९५-२१ (८७५१)
मा वधीः क्षत्रियांस्तात न लोकान्सप्त पुत्रक ।
दूषयन्तं तपस्तेजः क्रोधमुत्पतितं जहि ॥ ॥१-१९५-२२ (८७५२)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
पञ्चनवत्यधिकशततमोऽध्यायः ॥१९५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९५-२० आत्महेति एतेन भृगुपतनादिना मरणं ब्राह्मणेतरविषयं
दर्शितम् ॥
१-१९५-२२ मावधीरिति क्षत्रियान् तदनियन्तृत्वेनानपराधिनः
।सप्तलोकान् भूरादींश्च मावधीः किंतु तपःसंभृतं तेजो
दूषयन्तं क्रोधं जहि ॥
पञ्चनवत्यधिकशततमोऽध्यायः ॥
१९५ ॥

आदिपर्व - अध्याय १९६
॥ श्रीः ॥
१.१९६. अध्यायः १९६

Mahabharata - Adi Parva - Chapter Topics
पितॄणां निदेशेन और्वस्य समुद्रे क्रोधत्यागः ॥१ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९६-० (८७५३)
औौर्व उवाच। १-१९६-०क्ष् (१११८)
उक्तवानस्मि यां क्रोधात्प्रतिज्ञां पितरस्तदा ।
सर्वलोकविनाशाय न सा मे वितथा भवेत् ॥ १-१९६-१ (८७५४)
वृथारोषप्रतिज्ञो वै नाहं जीवितुमुत्सहे ।
अनिस्तीर्णो हि मां रोषो दहेदग्निररिवारणिम् ॥ १-१९६-२ (८७५५)
यो हि कारणतः क्रोधं संजातं क्षन्तुमर्हति ।
नालं स मनुजः सम्यक् त्रिवर्गं परिरक्षितुम् ॥ १-१९६-३ (८७५६)
अशिष्टानां नियन्ता हि शिष्टानां परिरक्षिता ।
स्थाने रोषः प्रयुक्तः स्यान्नृपैः सर्वजिगीषुभिः ॥ १-१९६-४ (८७५७)
अश्रौषमहमूरुस्थो गर्भशय्यागतस्तदा ।
आरावं मातृवर्गस्य भृगूणां क्षत्रियैर्वधे ॥ १-१९६-५ (८७५८)
सामरैर्हि यदा लोके भृगूणां क्षत्रियाधमैः ।
आगर्भोत्सादनं क्षान्तं तदा मां मन्युराविशत् ॥ १-१९६-६ (८७५९)
प्रकीर्णकेशाः किल मे मातरः पितरस्तथा ।
भयात्सर्वेषु लोकेषु नाधिजग्मुः परायणम् ॥ १-१९६-७ (८७६०)
तान्भृगूणां यदा दारान्कश्चिन्नाभ्युपपद्यत ।
माता तदा दधारेयमूरुणैकेन मां शुभा ॥ १-१९६-८ (८७६१)
प्रतिषेद्धा हि पापस्य यदा लोकेषु विद्यते ।
तदा सर्वेषु लोकेषु पापकृन्नोपपद्यते ॥ १-१९६-९ (८७६२)
यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् ।
तिष्ठन्ति बहवो लोकास्तदा पापेषु कर्मसु ॥ १-१९६-१० (८७६३)
जानन्नपि च यः पापं शक्तिमान्न नियच्छति ।
ईशः सन्सोऽपि तेनैव कर्मणा संप्रयुज्यते ॥ १-१९६-११ (८७६४)
राजभिश्चेश्वरैश्चैव यदि वै पितरो मम ।
शक्तैर्न शकितास्त्रातुमिष्टं मत्वेह जीवितम् ॥ १-१९६-१२ (८७६५)
अत एषामहं क्रुद्धो लोकानामीश्वरो ह्यहम् ।
भवतां च वचो नालमहं समभिवर्तितुम् ॥ १-१९६-१३ (८७६६)
ममापि चेद्भवेदेवमीश्वरस्य सतो महत् ।
उपेक्षमाणस्य पुनर्लोकानां किल्बिषाद्भयम् ॥ १-१९६-१४ (८७६७)
यश्चायं मन्युजो मेऽग्निर्लोकानादातुमिच्छति ।
दहेदेष च मामेव निगृहीतः स्वतेजसा ॥ १-१९६-१५ (८७६८)
भवतां च विजानामि सर्वलोकहितेप्सुताम् ।
तस्माद्विधद्ध्वं यच्छ्रेयो लोकानां मम चेश्वराः ॥ १-१९६-१६ (८७६९)
पितर ऊचुः। १-१९६-१७क्ष् (१११९)

य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति ।
अप्सु तं मुञ्च भद्रं ते लोका ह्यप्सु प्रतिष्ठिताः ॥ १-१९६-१७ (८७७०)
आपोमयाः सर्वरसाः सर्वमापोमयं जगत् ।
तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥ १-१९६-१८ (८७७१)
अयं तिष्ठतु ते विप्र यदीच्छसि महोदधौ ।
मन्युजोऽग्निर्दहन्नापो लोका ह्यापोमयाः स्मृताः ॥ १-१९६-१९ (८७७२)
एवं प्रतिज्ञा सत्येयं तवानघ भविष्यति ।
न चैवं सामरा लोका गमिष्यन्ति पराभवम् ॥ १-१९६-२० (८७७३)
वसिष्ठ उवाच। १-१९६-२१क्ष् (११२०)
ततस्तं क्रोधजं तात और्वोऽग्निं वरुणालये ।
उत्ससर्ज स चैवाप उपयुङ्क्ते महोदधौ ॥ १-१९६-२१ (८७७४)
महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः ।
तमग्निमुद्दिहरद्वक्त्रात्पिबत्यापो महोदधौ ॥ १-१९६-२२ (८७७५)
तस्मात्त्वमपि भद्रं ते न लोकान्हन्तुमर्हसि ।
पराशरं परॉंल्लोकाञ्जानञ्ज्ञानवतां वर ॥ ॥ १-१९६-२३ (८७७६)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९६-२ अनिस्तीर्णोऽकृतकार्यः ॥
१-१९६-८ तद्गृणां राजा कश्चिन्नाभ्युपपद्यते इति ङ । पाठः ॥
१-१९६-२१ उपयुङ्क्ते भक्षयति ॥
१-१९६-२२ हयशिरः वडवामुखम् ॥
षण्णवत्यधिकशततमोऽध्यायः ॥
१९६ ॥

आदिपर्व - अध्याय १९७
॥ श्रीः ॥
१.१९७. अध्यायः १९७

Mahabharata - Adi Parva - Chapter Topics
वसिष्ठवाक्येन लोकविनाशान्निवृत्तेन पराशरेण राक्षसनाशार्थं
यज्ञारम्भः ॥ १ ॥
पुलस्त्यप्रार्थनया पराशरेण यज्ञसमापनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९७-० (८७७७)
गन्धर्व उवाच। १-१९७-०क्ष् (११२१)
एवमुक्तः स विप्रर्षिर्वसिष्ठेन महात्मना ।
न्ययच्छदात्मनः क्रोधं सर्वलोकपराभवात् ॥ १-१९७-१ (८७७८)
ईजे च स महातेजाः सर्ववेदविदां वरः ।
ऋषी राक्षससत्रेण शाक्तेयोऽथ पराशरः ॥ १-१९७-२ (८७७९)
ततो वृद्धांश्च बालांश्च राक्षसान्स महामुनिः ।
ददाह वितते यज्ञे शक्तेर्वधमनुस्मरन् ॥ १-१९७-३ (८७८०)
न हि तं वारयामास वसिष्ठो रक्षसां वधात् ।
द्वितीयामस्य मां भाङ्क्षं प्रतिज्ञामिति निश्चयात् ॥ १-१९७-४ (८७८१)
त्रयाणां पावकानां च सत्रे तस्मिन्महामुनिः ।
आसीत्पुरस्ताद्दीप्तानां चतुर्थ इव पावकः ॥ १-१९७-५ (८७८२)
तेन यज्ञेन शुभ्रेण हूयमानेन शक्तितः ।
तद्विदीपितमाकाशं सूर्येणेव घनात्यये ॥ १-१९७-६ (८७८३)
तं वसिष्ठादयः सर्वे मुनयस्तत्र मेनिरे ।
तेजसा दीप्यमानं वै द्वितीयमिव भास्करम् ॥ १-१९७-७ (८७८४)
ततः परमदुष्प्रापमन्यैर्ऋषिरुधारधीः ।
समापिपयिषुः सत्रं तमत्रिः समुपागमत् ॥ १-१९७-८ (८७८५)
तथा पुलस्त्यः पुलहः क्रतुश्चैव महाक्रतुः ।
तत्राजग्मुरमित्रघ्न रक्षसां जीवितेप्सया ॥ १-१९७-९ (८७८६)
पुलस्त्यस्तु वधात्तेषां रक्षसां भरतर्षभ ।
उवाचेदं वचः पार्थ पराशरमरिन्दमम् ॥ १-१९७-१० (८७८७)
कच्चित्तातापविघ्नं ते कच्चिन्नन्दसि पुत्रक ।
अजानतामदोषाणां सर्वेषां रक्षसां वधात् ॥ १-१९७-११ (८७८८)
प्रजोच्छेदमिमं मह्यं न हि कर्तुं त्वमर्हसि ।
नैष तात द्विजातीनां धर्मो दृष्टस्तपस्विनाम् ॥ १-१९७-१२ (८७८९)
शम एव परो धर्मस्तमाचर पराशर ।
अधर्मिष्ठं वरिष्ठः सन्कुरुषे त्वं पराशर ॥ १-१९७-१३ (८७९०)
शक्तिं चापि हि धर्मज्ञं नातिक्रान्तुमिहार्हसि ।
प्रजायाश्च ममोच्छेदं न चैवं कर्तुमर्हसि ॥ १-१९७-१४ (८७९१)
शापाद्धि शक्तेर्वासिष्ठ तदा तदुपपादितम् ।
आत्मजेन स दोषेण शक्तिर्नीत इतो दिवम् ॥ १-१९७-१५ (८७९२)
न हि तं राक्षसः कश्चिच्छक्तो भक्षयितुं मुने ।
ग्वासिष्ठो भक्षितश्चासीत्कौशिकोत्सृष्टरक्षसा ।
शापं न कुर्वन्ति तदा न च त्राणपरायणाः ॥ १-१९७-१६ (८७९३)

क्षमावन्तोऽदहन्देहं देहमन्यद्भवत्विति।'
आत्मनैवात्मनस्तेन दृष्टो मृत्युस्तदाऽभवत् ॥ १-१९७-१७ (८७९४)
निमित्तभूतस्तत्रासीद्विश्वामित्रः पराशर ।
राजा कल्माषपादश्च दिवमारुह्य मोदते ॥ १-१९७-१८ (८७९५)
ये च शक्त्यवराः पुत्रा वसिष्ठस्य महामुने ।
ते च सर्वे मुदा युक्ता मोदन्ते सहिताः सुरैः ॥ १-१९७-१९ (८७९६)
सर्वमेतद्वसिष्ठस्य विदितं वै महामुने ।
रक्षसां च समुच्छेद एष तात तपस्विनाम् ॥ १-१९७-२० (८७९७)
निमित्तभूतस्त्वं चात्र क्रतौ वासिष्ठनन्दन ।
तत्सत्रं मुञ्च भद्रं ते समाप्तमिदमस्तु ते ॥ १-१९७-२१ (८७९८)
गन्धर्व उवाच। १-१९७-२२क्ष् (११२२)
एवमुक्तः पुलस्त्येन वसिष्ठेन च धीमता ।
तदा समापयामास सत्रं शाक्तो महामुनिः ॥ १-१९७-२२ (८७९९)
सर्वराक्षससत्राय संभृतं पावकं तदा ।
उत्तरे हिमवत्पार्श्वे उत्ससर्ज महावने ॥ १-१९७-२३ (८८००)
स तत्राद्यापि रक्षांसि वृक्षानश्मन एव च ।
भक्षयन्दृश्यते वह्निः सदा पर्वणि पर्वणि ॥ ॥ १-१९७-२४ (८८०१)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-१९७-४ माभाङ्क्षे न नाशयेयम् ॥
१-१९७-१२ मद्यं मम ॥
सप्तनवत्यधिकशततमोऽध्यायः ॥
१९७ ॥

आदिपर्व - अध्याय १९८
॥ श्रीः ॥
१.१९८. अध्यायः १९८

Mahabharata - Adi Parva - Chapter Topics
सौदासभार्यायां वसिष्ठेन पुत्रोत्पादनकारणं
पृष्टवन्तमर्जुनंप्रति पुनः कल्माषपादकथाकथनम् ॥ १ ॥
मैथुनधर्मस्य ब्राह्मं भक्षितवतः सौदासस्य ब्राह्मण्या शापः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९८-० (८८०२)
ग्गन्धर्व उवाच। १-१९८-०क्ष् (११२३)
पुनश्चैव महातेजा विश्वामित्रजिघांसया ।
अग्निं संभृतवान्घोरं शाक्तेयः सुमहातपाः ॥ १-१९८-१ (८८०३)
वासिष्ठसंभृतश्चाग्निर्विश्वामित्रहितैषिणा ।
तेजसा वह्नितुल्येन ग्रस्तः स्कन्देन धीमता ॥' १-१९८-२ (८८०४)
अर्जुन उवाच। १-१९८-३क्ष् (११२४)
राज्ञा कल्माषपादेन गुरौ ब्रह्मविदां वरे ।
कारणं किं पुरस्कृत्य भार्या वै सन्नियोजिता ॥ १-१९८-३ (८८०५)
जानता वै परं धर्मं वसिष्ठेन महात्मना ।
अगम्यागमनं कस्मात्कृतं तेन महर्षिणा ॥ १-१९८-४ (८८०६)
अधर्मिष्ठं वसिष्ठेन कृतं चापि पुरा सखे ।
एतन्मे संशयं सर्वं छेत्तुमर्हसि पृच्छतः ॥ १-१९८-५ (८८०७)
गन्धर्व उवाच। १-१९८-६क्ष् (११२५)
धनञ्जय निबोधेयं यन्मां त्वं परिपृच्छसि ।
वसिष्ठं प्रति दुर्धर्ष तथा मित्रसहं नृपम् ॥ १-१९८-६ (८८०८)
कथितं ते मया सर्वं यथा शप्तः स पार्थिवः ।
शक्तिना भरतश्रेष्ठ वासिष्ठेन महात्मना ॥ १-१९८-७ (८८०९)
स तु शापवशं प्राप्तः क्रोधपर्याकुलेक्षणः ।
निर्जगाम पुराद्राजा सहदारः परन्तपः ॥ १-१९८-८ (८८१०)
अरण्यं निर्जनं गत्वा सदारः परिचक्रमे ।
नानामृगगणाकीर्णं नानासत्वसमाकुलम् ॥ १-१९८-९ (८८११)
नानागुल्मलताच्छन्नं नानाद्रुमसमावृतम् ।
अरण्यं घोरसन्नादं शापग्रस्तः परिभ्रमन् ॥ १-१९८-१० (८८१२)
स कदाचित्क्षुधाविष्टो मृगयन्भक्ष्यमात्मनः ।
ददर्श सुपरिक्लिष्टः कस्मिंश्चिन्निर्जने वने ॥ १-१९८-११ (८८१३)
ब्राह्मणं ब्राह्मणीं चैव मिथुनायोपसंगतौ ।
तौ तं वीक्ष्य सुवित्रस्तावकृतार्थौ प्रधावितौ ॥ १-१९८-१२ (८८१४)
तयोः प्रद्रवतोर्विप्रं जग्राह नृपतिर्बलात् ।
दृष्ट्वा गृहीतं भर्तारमथ ब्राह्मण्यभाषत ॥ १-१९८-१३ (८८१५)
शृणु राजन्मम वचो यत्त्वां वक्ष्यामि सुव्रत ।
आदित्यवंशप्रभवस्त्वं हि लोके परिश्रुतः ॥ १-१९८-१४ (८८१६)
अप्रमत्तः स्थि धर्मे गुरुशुश्रूषणे रतः ।
शापोपहत दुर्धर्ष न पापं कर्तुमर्हसि ॥ १-१९८-१५ (८८१७)
ऋतुकाले तु संप्राप्ते भर्तृव्यसनकर्शिता ।

अकृतार्था ह्यहं भर्त्रा प्रसवार्थं समागता ॥ १-१९८-१६ (८८१८)
प्रसीद नृपतिश्रेष्ठ भर्ताऽयं मे विसृज्यताम् ।
एवं विक्रोशमानायास्तस्यास्तु न नृशंसवत् ॥ १-१९८-१७ (८८१९)
भर्तारं भक्षयामास व्याघ्रो मृगमिवेप्सितम् ।
तस्याः क्रोधाभिभूताया यान्यश्रूण्यपतन्भुवि ॥ १-१९८-१८ (८८२०)
सोऽग्निः समभवद्दीप्तस्तं च देशं व्यदीपयत् ।
ततः सा शोकसंतप्ता भर्तृव्यसनकर्शिता ॥ १-१९८-१९ (८८२१)
कल्माषपादं राजर्षिमशपद्ब्राह्मणी रुषा ।
यस्मान्ममाकृतार्थायास्त्वया क्षुद्र नृशंसवत् ॥ १-१९८-२० (८८२२)
प्रेक्षन्त्या भक्षितो मेऽद्य प्रियो भर्ता महायशाः ।
तस्मात्त्वमपि दुर्बुद्धे मच्छापपरिविक्षतः ॥ १-१९८-२१ (८८२३)
पत्नीमृतावनुप्राप्य सद्यस्त्यक्ष्यसि जीवितम् ।
ग्तेन प्रसाद्यमाना सा प्रसादमकरोत्तदा।'
यस्य चर्षेर्वसिष्ठस्य त्वया पुत्रा विनाशिताः ॥ १-१९८-२२ (८८२४)
तेन संगम्य ते भार्या तनयं जनयिष्यति ।
सते वंशकरः पुत्रो भविष्यति नृपाधम ॥ १-१९८-२३ (८८२५)
एवं शप्त्वा तु राजानं सा तमाङ्गिरसी शुभा ।
तस्यैव सन्निधौ दीप्तं प्रविवेश हुताशनम् ॥ १-१९८-२४ (८८२६)
वसिष्ठश्च महाभागः सर्वमेतदवैक्षत ।
ज्ञानयोगेन महता तपसा च परन्तप ॥ १-१९८-२५ (८८२७)
मुक्तशापश्च राजर्षिः कालेन महता ततः ।
ऋतुकालेऽभिपतितो मदयन्त्या निवारितः ॥ १-१९८-२६ (८८२८)
न हि सस्मार स नृपस्तं शापं काममोहितः ।
देव्याः सोऽथ वचः श्रुत्वा संभ्रान्तो नृपसत्तमः ॥ १-१९८-२७ (८८२९)
तं शापमनुसंस्मृत्य पर्यतप्यद्भृशं तदा ।
एतस्मात्कारणाद्राजा वसिष्ठं सन्ययोजयत् ।
स्वदारेषु नरश्रेष्ठ शापदोषसमन्वितः ॥ ॥ १-१९८-२८ (८८३०)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

आदिपर्व - अध्याय १९९
॥ श्रीः ॥
१.१९९. अध्यायः १९९

Mahabharata - Adi Parva - Chapter Topics
अर्जुनेन अनुरूपपुरोहितसंपादनं पृष्टेन गन्धर्वेण

धौम्यवरणाक्ष्यनुज्ञा ॥ १ ॥
गन्धर्वाय आग्नेयास्त्रदानम् ॥ २ ॥
उत्को चतीर्थे पाण्डवैः धौम्यस्य पौरोहित्ये वरणम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-१९९-० (८८३१)
अर्जुन उवाच। १-१९९-०क्ष् (११२६)
अस्माकमनुरूपो वै यः स्याद्गन्धर्व वेदवित् ।
पुरोहितस्तमाचक्ष्व सर्वं हि विदितं तव ॥ १-१९९-१ (८८३२)
गन्धर्व उवाच। १-१९९-२क्ष् (११२७)
यवीयान्देवलस्यैष वने भ्राता तपस्यति ।
धौम्य उत्कोचके तीर्थे तं वृणुध्वं यीच्छथ ॥ १-१९९-२ (८८३३)
वैशम्पायन उवाच। १-१९९-३क्ष् (११२८)
ततोऽर्जुनोऽस्त्रमाग्नेयं प्रददौ तद्यथाविधि ।
गन्धर्वाय ग्स च प्रीतो वचनं चेदमब्रवीत् ॥ १-१९९-३ (८८३४)
मयि सन्ति हयश्रेष्ठास्तव दास्यामि वै सखे ।
उपकारकृतं मित्रं प्रतिकारेण योजये ॥ १-१९९-४ (८८३५)
गृह्णीष्व चाक्षुषीं विद्यामिमां भरतसत्तम ।
एवमुक्तोऽर्जुनः' प्रीतो वचनं चेदमब्रवीत् ॥ १-१९९-५ (८८३६)
त्वय्येव तावत्तिष्ठन्तु हया गन्धर्वसत्तम ।
कार्यकाले ग्रहीष्यामः स्वस्ति तेऽस्त्विति चाब्रवीत् ॥ १-१९९-६ (८८३७)
तेऽन्योन्यमभिसंपूज्य गन्धर्वः पाण्डवाश्च ह ।
रम्याद्भागीरथीतीराद्यथाकामं प्रतस्थिरे ॥ १-१९९-७ (८८३८)
तत उत्कोचकं तीर्थं गत्वा धौम्याश्रमं तु ते ।
तं वव्रुः पाण्डवा धौम्यं पौरोहित्याय भारत ॥ १-१९९-८ (८८३९)
तान्धौम्यः प्रतिजग्राह सर्ववेदविदां वरः ।
वन्येन फलमूलेन पौरोहित्येन चैव ह ॥ १-१९९-९ (८८४०)
ते समाशंसिरे लब्धां श्रियं राज्यं च पाण्डवाः ।
ब्राह्मणं तं पुरस्कृत्य पाञ्चालीं च स्वयंवरे ॥ १-१९९-१० (८८४१)
पुरोहितेन तेनाथ गुरुणा संगतास्तदा ।
नाथवन्तमिवात्मानं मेनिरे भरतर्षभाः ॥ १-१९९-११ (८८४२)
स हि वेदार्थतत्त्वज्ञस्तेषां गुरुरुदारधीः ।
वेदविच्चैव वाग्मी च धौम्यः श्रीमान्द्विजोत्तमः ॥ १-१९९-१२ (८८४३)
तेजसा चैव बुद्ध्या च रूपेण यशसा श्रिया ।
मन्त्रैश्च विविधैर्धौम्यस्तुल्य आसीद्बृहस्पतेः ॥ १-१९९-१३ (८८४४)

स चापि विप्रस्तान्मेने स्वभावाभ्यधिकान्भुवि ।
तेन धर्मविदा पार्था योज्या सर्वविदा वृताः ॥१-१९९-१४ (८८४५)
मेनिरे सहिता वीराः प्राप्तं राज्यं च पाण्डवाः ।
बुद्धिवीर्यबलोत्साहैर्युक्ता देवा इवापरे ॥१-१९९-१५ (८८४६)
कृतस्वस्त्ययनास्तेन ततस्ते मनुजाधिपाः ।
मेनिरे सहिता गन्तुं पाञ्चाल्यास्तं स्वयंवरम् ॥ ॥१-१९९-१६ (८८४७)

इति श्रीमन्महाभारते आदिपर्वणि चैत्ररथपर्वणि
एकोनद्विशततमोऽध्यायः ॥१९९ ॥ ॥समाप्तं चैत्ररथपर्व ॥

आदिपर्व - अध्याय २००
॥श्रीः ॥
१.२००. अध्यायः २००

(अथ स्वयंवरपर्व ॥१२ ॥)
Mahabharata - Adi Parva - Chapter Topics
मध्येमार्गं आगतस्य व्यासस्य आज्ञया पाण्डवानां द्रुपदपुरप्रवेशः ॥१ ॥
तेषां कुम्भकारगृहे वासः, भैक्षवृत्तिश्च ॥२ ॥
द्रौपद्याः स्वयंवरनिर्माणकारणकथनं ॥३ ॥
द्रुपदेन कृतां स्वयंवरघोषणां श्रुतवतां क्षत्रियादीनां आगमनं
॥४ ॥
सर्वेषां उचिते स्थाने उपवेशनं पाण्डवानां ब्राह्मणमध्ये उपवेशनं
॥५ ॥
मङ्गलस्नातायाः स्वलङ्कृताया द्रौपद्या रङ्गमध्ये आगमनं ॥६ ॥
धृष्टद्युम्नेन लक्ष्यवेधपणकथनम् ॥७ ॥

Mahabharata - Adi Parva - Chapter Text

१-२००-० (८८४८)
वैशम्पायन उवाच। १-२००-०क्ष् (११२९)
ततस्ते नरशार्दूला भ्रातरः पञ्च पाण्डवाः ।
तं ब्राह्मणं पुरस्कृत्य पाञ्चाल्याश्च स्वयंवरम् ।
प्रययुर्द्रौपदीं द्रष्टुं तं च देशं महोत्सवम् ॥ १-२००-१ (८८४९)
ततस्ते तं महात्मानं शुद्धात्मानमकल्मषम् ।
ददृशुः पाण्डवा वीराः पथि द्वैपायनं तदा ॥१-२००-२ (८८५०)
तस्मै यथावत्सत्कारं कृत्वा तेन च सत्कृताः ।
कथान्ते चाभ्यनुज्ञाताः प्रययुर्द्रुपदक्षयम् ॥१-२००-३ (८८५१)

पश्यन्तो रमणीयानि वनानि च सरांसि च ।
तत्रतत्र वसन्तश्च शनैर्जग्मुर्महराथाः ॥१-२००-४ (८८५२)
स्वाध्यायवन्तः शुचयो मधुराः प्रियवादिनः ।
आनुपूर्व्येण संप्राप्ताः पाञ्चालान्पाण्डुनन्दनाः ॥१-२००-५ (८८५३)
ते तु दृष्ट्वा पुरं तच्च स्कन्धावारं च पाण्डवाः ।
कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥१-२००-६ (८८५४)
तत्र भैक्षं समाजह्रुर्ब्राह्मणीं वृत्तिमाश्रिताः ।
तान्संप्राप्तांस्तथा वीराञ्जज्ञिरे न नराः क्वचित् ॥१-२००-७ (८८५५)
ग्यज्ञसेनस्तु पाञ्चालो भीष्मद्रोमकृतागसम् ।
ज्ञात्वाऽऽत्मानं तदारेभे त्राणायात्मक्रियां क्षमां ॥१-२००-८ (८८५६)
अवाप्य धृष्टद्युम्नं हि न स द्रोणमचिन्तयत् ।
स तु वैरप्रसङ्गाच्च भीष्माद्भयमचिन्तयत् ॥१-२००-९ (८८५७)
कन्यादानात्तु शरणं सोऽमन्यत महीपतिः।'
यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने ॥ १-२००-१० (८८५८)
दास्यामि कृष्मामिति वै न चैनं विवृणोति सः ।
ग्जामातृबलसंयोगं मेने हि बलवत्तरम् ॥' १-२००-११ (८८५९)
सोऽन्वेषमाणः कौन्तेयान्पाञ्चालो जनमेजय ।
दृढं धनुरथानम्यं कारयामास भारत ॥१-२००-१२ (८८६०)
ग्वैयाघ्रपद्यस्योग्रं वै सृञ्जयस्य महीपतिः ।
तद्धनुः किन्धुरं नाम देवदत्तमुपानयत् ॥१-२००-१३ (८८६१)
आयसी तस्य च ज्याऽऽसीत्प्रतिबद्धा महाबला ।
न तु ज्यां प्रसहेदन्यस्तद्धनुःप्रवरं महत् ॥१-२००-१४ (८८६२)
शङ्करेण वरं दत्तं प्रीतेन च महात्मना ।
तन्निष्फलं स्यान्न तु मे इति प्रामाण्यमागतः ॥१-२००-१५ (८८६३)
मया कर्तव्यमधुना दुष्करं लक्ष्यवेधनम् ।
इति निश्चित्य मनसा कारितं लक्ष्यमुत्तमम् ॥' १-२००-१६ (८८६४)
यन्त्रं वैहायसं चापि कारयामास कृत्रिमम् ।
तेन यन्त्रेण सहितं राजँल्लक्ष्यं च काञ्चनम् ॥१-२००-१७ (८८६५)
द्रुपद उवाच। १-२००-१८क्ष् (११३०)
इदं सज्यं धनुः कृत्वा सज्जैरेभिश्च सायकैः ।
अतीत्य लक्ष्य यो वेद्धा स लब्धा मत्सुतामिति ॥१-२००-१८ (८८६६)
वैशम्पायन उवाच। १-२००-१९क्ष् (११३१)
इति स द्रुपदो राजा स्वयंवरमघोषयत् ।
तच्छ्रुत्वा पार्थिवाः सर्वे समीयुस्तत्र भारत ॥१-२००-१९ (८८६७)
ऋषयश्च महात्मानः स्वयंवरदिदृक्षवः ।
दुर्योधनपुरोगाश्च सकर्णाः कुरवो नृप ॥१-२००-२० (८८६८)

ग्यादवा वासुदेवेन सार्धमन्धकवृष्णयः।'
ततोऽर्चिता राजगुणा द्रुपदेन महात्मना ॥ १-२००-२१ (८८६९)
उपोपविष्टा मञ्चेषु द्रष्टुकामाः स्वयंवरम् ।
ग्ब्राह्मणाश्च महाभागा देशेभ्यः समुपागमन् ॥१-२००-२२ (८८७०)
ब्राह्मणैरेव सहिताः पाण्डवाः समुपाविशन् ।
त्रयस्त्रिंशत्सुराः सर्वे विमानैर्व्योम्न्यवस्थिताः ॥१-२००-२३ (८८७१)
ततः पौरजनाः सर्वे सागरोद्धूतनिःस्वनाः ।
शिंशुमारशिरः प्राप्य न्यविशंस्ते स्म पार्थिवाः ॥१-२००-२४ (८८७२)
प्रागुत्तरेण नगराद्भूमिभागे समे शुभे ।
समाजवाटः शुशुभे भवनैः सर्वतो वृतः ॥१-२००-२५ (८८७३)
प्राकारपरिखोपेतो द्वारतोरणमण्डितः ।
वितानेन विचित्रेण सर्वतः समलङ्कृतः ॥१-२००-२६ (८८७४)
तूर्यौघशतसङ्कीर्णः परार्ध्यागुरुधूपितः ।
चन्दनोदकसिक्तश्च माल्यदामोपशोभितः ॥१-२००-२७ (८८७५)
कैलासशिखरप्रख्यैर्नभस्तलविलेखिभिः ।
सर्वतः संवृतः शुभ्रैः प्रासादैः सुकृतोच्छ्रयै ॥१-२००-२८ (८८७६)
सुवर्णजालसंवीतैर्मणिकुट्टिमभूषणैः ।
सुखारोहणसोपानैर्महासनपरिच्छदैः ॥१-२००-२९ (८८७७)
स्रग्दामसमवच्छन्नैरगुरूत्तमवासितैः ।
हंसांशुवर्णैर्बहुभिरायोजनसुगन्धिभिः ॥१-२००-३० (८८७८)
असंबाधशतद्वारैः शयनासनशोभितैः ।
बहुधातुपिनद्धाङ्गैर्हिमवच्छिखरैरिव ॥१-२००-३१ (८८७९)
तत्र नानाप्रकारेषु विमानेषु स्वलङ्कृताः ।
स्पर्धमानास्तदाऽन्योन्यं निषेदुः सर्वपार्थिवाः ॥१-२००-३२ (८८८०)
तत्रोपविष्टान्ददृशुर्महासत्वान्पृथग्जनाः ।
राजसिंहान्महाभागान्कृष्णागुरुविभूषितान् ॥१-२००-३३ (८८८१)
महाप्रसादान्ब्राह्मण्यान्स्वराष्ट्रपरिरक्षिणः ।
प्रियान्सर्वस्य लोकस्य सुकृतैः कर्मभिः शुभैः ॥१-२००-३४ (८८८२)
मञ्चेषु च परार्ध्येषु पौरजानपदा जनाः ।
कृष्णादर्शनसिद्ध्यर्थं सर्वतः समुपाविशन् ॥१-२००-३५ (८८८३)
ब्राह्मणैस्ते च सहिताः पाण्डवाः समुपाविशन् ।
ऋद्धिं पञ्चालराजस्य पश्यन्तस्तामनुत्तमाम् ॥१-२००-३६ (८८८४)
ततः समाजो ववृधे स राजन्दिवसान्बहून् ।
रत्नप्रदानबहुलः शोभितो नटनर्तकैः ॥१-२००-३७ (८८८५)
वर्तमाने समाजे तु रमणीयेऽह्नि षोडशे ।
ग्मैत्रे मुहूर्ते तस्याश्च राजदाराः पुराविदः ।

पुत्रवत्यः सुवसनाः प्रतिकर्मोपचक्रमुः ॥ १-२००-३८ (८८८६)
वैडूर्यमयपीठे तु निविष्टां द्रौपदीं तदा ।
सतूर्यं स्नापयाञ्चक्रुः स्वर्णकुम्भस्थितैर्जलैः ॥१-२००-३९ (८८८७)
तां निवृत्ताभिषेकां च दुकूलद्वयधारिणीम् ।
निन्युर्मणिस्तम्भवतीं वेदिं वै सुपरिष्कृताम् ॥१-२००-४० (८८८८)
निवेश्य प्राङ्मुखीं हृष्टां विस्मिताक्ष्यः प्रसाधिकाः ।
केनालङ्करणेनेमामित्यन्योन्यं व्यलोकयन् ॥१-२००-४१ (८८८९)
धूपोष्मणा च केशानामार्द्रभावं व्यपोहयन् ।
बबन्धुरस्या धम्मिल्लं माल्यैः सुरभिगन्धिभिः ॥१-२००-४२ (८८९०)
दूर्वामधूकरचितं माल्यं तस्या ददुः करे ।
चक्रुश्च कृष्णागरुणा पत्रसङ्गं कुचद्वये ॥१-२००-४३ (८८९१)
रेजे सा चक्रवाकाङ्का स्वर्णदीर्घा सरिद्वरा ।
अलकैः कुटिलैस्तस्या मुखं विकसितं बभौ ॥१-२००-४४ (८८९२)
आसक्तभृङ्गं कुसुमं शशिम्बिम्बं जिगाय तत् ।
कालाञ्जनं नयनयोराचारार्थं समादधुः ॥१-२००-४५ (८८९३)
भूषणं रत्नखचितैरलंचक्रुर्यथोचितम् ।
माता च तस्याः पृषती हरितालमनश्शिलाम् ॥१-२००-४६ (८८९४)
अङ्गुलीभ्यामुपादाय तिलकं विदधे मुखे ।
अलङ्कृतां वधूं दृष्ट्वा योषितो मुदमाययुः ॥१-२००-४७ (८८९५)
माता न मुमुदे तस्याः पतिः कीदृग्भविष्यति ।
सौविदल्लाः समागम्य द्रुपदस्याज्ञया ततः ॥१-२००-४८ (८८९६)
एनामारोपयामासुः करिणीं कुचभूषिताम् ।
ततोऽवाद्यन्त वाद्यानि मङ्गलानि दिवि स्पृशन् ॥१-२००-४९ (८८९७)
विलासिनीजनाश्चापि प्रवरं करिणीशतम् ।
माङ्गल्यगीतं गायन्त्यः पार्स्वयोरुभयोर्ययुः ॥१-२००-५० (८८९८)
जनापसरणे व्यग्राः प्रतिहार्यः पुरा ययुः ।
कोलाहलो महानासीत्तस्मिन्पुरवरे तदा ॥१-२००-५१ (८८९९)
धृष्टद्युम्नो ययावग्रे हयमारुह्य भारत ।
द्रुपदो रङ्गदेशे तु बलेन महता युतः ॥१-२००-५२ (८९००)
तस्थौ व्यूह्य महानीकं पालितं दृढधन्विभिः।'
आप्लुताङ्गीं सुवसनां सर्वाभरणभूषिताम् ॥ १-२००-५३ (८९०१)
मालां च समुपादाय काञ्चनीं समलङ्कृताम् ।
ग्आगतां ददृशुः सर्वे रङ्गभूमिमलङ्कृताम् ॥' १-२००-५४ (८९०२)
अवतीर्णा ततो रङ्गं द्रौपदी भरतर्षभ ।
ग्तस्थौ प्रमुदितान्सर्वान्नृपतीन्रङ्गमण्डले ।
प्रेक्षन्ती व्रीडितापाङ्गी द्रष्टृणां सुमनोहरा ॥' १-२००-५५ (८९०३)

पुरोहितः सोमकानां मन्त्रविद्ब्राह्मणः शुचिः ।
परिस्तीर्य जुहावाग्निमाज्येन विधिवत्तदा ॥ १-२००-५६ (८९०४)
संतर्पयित्वा ज्वलनं ब्राह्मणान्स्वस्ति वाच्य च ।
वारयामास सर्वाणि वादित्राणि समन्ततः ॥ १-२००-५७ (८९०५)
निःशब्दे तु कृते तस्मिन्धृष्टद्युम्नो विशांपते ।
कृष्णामादाय विधिवन्मेघदुन्दुभिनिःस्वनः ॥ १-२००-५८ (८९०६)
रङ्गमध्यं गतस्तत्र मेघगम्भीरया गिरा ।
वाक्यमुच्चैर्जगादेदं श्लक्ष्णमर्थवदुत्तमम् ॥ १-२००-५९ (८९०७)
इदं धनुर्लक्ष्यमिमे च बाणाः
शृण्वन्तु मे भूपतयः समेताः ।
छिद्रेण यन्त्रस्य मसर्पयध्वं
शरैः शितैर्व्योमचरैर्दशार्धैः ॥ १-२००-६० (८९०८)
एतन्महत्कर्म करोति यो वै
कुलेन रूपेण बलेन युक्तः ।
तस्याद्य भार्या भगिनी ममेयं
कृष्णा भवित्री न मृषा ब्रवीमि ॥ १-२००-६१ (८९०९)
तानेवमुक्त्वा द्रुपदस्य पुत्रः
पश्चादिदं तां भगिनीमुवाच ।
नाम्ना च गोत्रेण च कर्मणा च
संकीर्तयन्भूमिपतीन्समेतान् ॥ ॥ १-२००-६२ (८९१०)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि द्विशततमोऽध्यायः
॥ २०० ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२००-७ जज्ञिरे ज्ञातवन्तः ॥
१-२००-१७ वैहायसमन्तरिक्षगतम् ॥
१-२००-२४ शिंशुमारो जलजन्तुस्तदाकारस्तारासमूहात्मको विष्णुस्तस्य शिरःप्रदेशे ऐशान्यां दिशि । अतएव सा अपराजितादिक् तां दिशं प्राप्य न्यविशन् ॥
१-२००-२५ तामेव दिशमात्र प्रागिति ॥
द्विशततमोऽध्यायः ॥
२०० ॥

आदिपर्व - अध्याय २०१
॥ श्रीः ॥
१.२०१. अध्यायः २०१

Mahabharata - Adi Parva - Chapter Topics

रङ्गे आगतानां राज्ञां नामकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०१-० (८९११)
धृष्टद्युम्न उवाच। १-२०१-०क्ष् (११३२)
दुर्योधनो दुर्विषहो दुर्मुखो दुष्प्रधर्षणः ।
विविंशतिर्विकर्णश्च सहो दुःशासनस्तथा ॥ १-२०१-१ (८९१२)
युयुत्सुर्वायुवेगश्च भीमवेगरवस्तथा ।
उग्रायुधो बलाकी च करकायुर्विरोचनः ॥ १-२०१-२ (८९१३)
कुण्डकश्चित्रसेनश्च सुवर्चाः कनकध्वजः ।
नन्दको बाहुशाली च तुहुण्डो विकटस्तथा ॥ १-२०१-३ (८९१४)
एते चान्ये च बहवो धार्तराष्ट्रा महाबलाः ।
कर्णेन सहिता वीरास्त्वदर्थं समुपागताः ॥ १-२०१-४ (८९१५)
असङ्ख्याता महात्मानः पार्थिवाः क्षत्रियर्षभाः ।
शकुनिः सौबलश्चैव वृषकोऽथ बृहद्बलः ॥ १-२०१-५ (८९१६)
एते गान्धारराजस्य सुताः सर्वे समागताः ।
अश्वत्थामा च भोजश्च सर्वशस्त्रभृतां वरौ ॥ १-२०१-६ (८९१७)
समवेतौ महात्मानौ त्वदर्थे समलङ्कृतौ ।
बृहन्तो मणिमांश्चैव दण्डधारश्च पार्थिवः ॥ १-२०१-७ (८९१८)
सहदेवजयत्सेनौ मेघसन्धिश्च पार्थिवः ।
विराटः सह पुत्राभ्यां शङ्खेनैवोत्तरेण च ॥ १-२०१-८ (८९१९)
वार्धक्षेमिः सुशर्मा च सेनाबिन्दुश्च पार्थिवः ।
सुकेतुः सह पुत्रेण सुनाम्ना च सुवर्चसा ॥ १-२०१-९ (८९२०)
सुचित्रः सुकुमारश्च वृकः सत्यधृतिस्तथा ।
सूर्यध्वजो रोचमानो नीलश्चित्रायुधस्तथा ॥ १-२०१-१० (८९२१)
अंशुमांश्चेकितानश्च श्रेणिमांश्च महाबलः ।
समुद्रसेनपुत्रश्च चन्द्रसेनः प्रतापवान् ॥ १-२०१-११ (८९२२)
जलसन्धः पितापुत्रौ विदण्डो दण्ड एव च ।
पौण्ड्रको वासुदेवश्च भगदत्तश्च वीर्यवान् ॥ १-२०१-१२ (८९२३)
कलिङ्गस्ताम्रलिप्तश्च पत्तनाधिपतिस्तथा ।
मद्रराजस्तथा शल्यः सहपुत्रो महारथः ॥ १-२०१-१३ (८९२४)
रुक्माङ्गदेन वीरेण तथा रुक्मरथेन च ।
कौरव्यः सोमदत्तश्च पुत्रश्चास्य महारथः ॥ १-२०१-१४ (८९२५)

समवेतास्त्रयः शूरा भूरिर्भूरिश्रवाः शलः ।
सुदक्षिणश्च काम्भोजो दृढधन्वा च पौरवः ॥ १-२०१-१५ (८९२६)
बृहद्बलः सुषेणश्च शिबिरौशीनरस्तथा ।
पटच्चरनिहन्ता च कारूषाधिपतिस्तथा ॥ १-२०१-१६ (८९२७)
सङ्कर्षणो वासुदेवो रौक्मिणेयश्च वीर्यवान् ।
साम्बश्च चारुदेष्णश्च प्राद्युम्निः सगदस्तथा ॥ १-२०१-१७ (८९२८)
अक्रूरः सात्यकिश्चैव उद्धवश्च महामतिः ।
कृतवर्मा च हार्दिक्यः पृथुर्विपृथुरेव च ॥ १-२०१-१८ (८९२९)
विदूरथश्च कङ्कश्च शङ्कुश्च सगवेषणः ।
आशावहोऽनिरुद्धश्च समीकः सारिमेजयः ॥ १-२०१-१९ (८९३०)
वीरो वातपतिश्चैव झिल्लीपिण्डारकस्तथा ।
उशीनरश्च विक्रान्तो वृष्णयस्ते प्रकीर्तिताः ॥ १-२०१-२० (८९३१)
भगीरथो बृहत्क्षत्रः सैन्धवश्च जयद्रथः ।
बृहद्रथो बाह्लिकश्च श्रउतायुश्च महारथः ॥ १-२०१-२१ (८९३२)
उलूकः कैतवो राजा चित्राङ्गदशुभाङ्गदौ ।
वत्सराजश्च मतिमान्कोसलाधिपतिस्तथा ॥ १-२०१-२२ (८९३३)
शिशुपालश्च विक्रान्तो जरासन्धस्तथैव च ।
एते चान्ये च बहवो नानाजनपदेश्वराः ॥ १-२०१-२३ (८९३४)
त्वदर्थमागता भद्रे क्षत्रियाः प्रथिता भुवि ।
एते भेत्स्यन्ति विक्रान्तास्त्वदर्थे लक्ष्यमुत्तमम् ।
विध्यते य इदं लक्ष्यं वरयेथाः शुभेऽद्य तम् ॥ ॥ १-२०१-२४ (८९३५)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
एकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

आदिपर्व - अध्याय २०२
॥ श्रीः ॥
१.२०२. अध्यायः २०२

Mahabharata - Adi Parva - Chapter Topics
ब्राह्मणमध्यस्थान्पाण्डवान्विज्ञाय श्रीकृष्णेन बलरामाय कथनं ॥ १ ॥
धनुर्दर्शनेनैव केषांचिद्राज्ञां धनुःपूरणे निरशत ॥ २ ॥
शिशुपालादीनां धनुःपूरणे भङ्गः ॥ ३ ॥
अर्जुनस्य धनुःपूरणे एषणा ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०२-० (८९३६)
वैशम्पायन उवाच। १-२०२-०क्ष् (११३३)
तेऽलङ्कृताः कुण्डलिनो युवानः
परस्परं स्पर्धमाना नरेन्द्राः ।
अस्त्रं बलं चात्मनि मन्यमानाः
सर्वे समुत्पेतुरुदायुधास्ते ॥ १-२०२-१ (८९३७)
रूपेण वीर्येण कुले चैव
शीलेन वित्तेन च यौवनेन ।
समिद्धदर्पा मदवेगभिन्ना
मत्ता यथा हैमवता गजेन्द्राः ॥ १-२०२-२ (८९३८)
परस्परं स्पर्धया प्रेक्षमाणाः
सङ्कल्पजेनाभिपरिप्लुताङ्गाः ।
कृष्णा ममैवेत्यभिभाषमाणा
नृपाः समुत्पेतुरथासनेभ्यः ॥ १-२०२-३ (८९३९)
ते क्षत्रिया रङ्गगताः समेता
जिगीषमाणा द्रुपदात्मजां ताम् ।
चकाशिरे पर्वतराजकन्या-
मुमां यथा देवगणाः समेताः ॥ १-२०२-४ (८९४०)
कन्दर्पबाणाभिनिपीडिताङ्गां
कृष्णागतैस्ते हृदयैर्नरेन्द्राः ।
रङ्गावतीर्णा द्रुपदात्मजार्थं
द्वेषं प्रचक्रुः सुहृदोऽपि तत्र ॥ १-२०२-५ (८९४१)
अथाययुर्देवगणा विमानै
रुद्रादित्या वसवोऽथाश्विनौ च ।
साध्याश्च सर्वे मरुतस्तथैव
यमं पुरस्कृत्य धनेश्वरं च ॥ १-२०२-६ (८९४२)
दैत्याः सुपर्णाश्च महोरगाश्च
देवर्षयो गुह्यकाश्चारणाश्च ।
विश्वावसुर्नारदपर्वतौ च
गन्धर्वमुख्याः सहसाऽप्सरोभिः ॥ १-२०२-७ (८९४३)
हलायुधस्तत्र जनार्दनश्च
वृष्ण्यन्धकाश्चैव यताप्रधानम् ।
प्रेक्षां स्म चक्रुर्यदुपुङ्गवास्ते
स्थिताश्च कृष्णस्य मते महान्तः ॥ १-२०२-८ (८९४४)
दृष्ट्वा तु तान्मत्तगजेन्द्ररूपा-
न्पञ्चाभिपद्मानिव वारणेन्द्रान् ।

भस्मावृताङ्गानिव हव्यवाहान्
कृष्णः प्रदध्यौ यदुवीरमुख्यः ॥ १-२०२-९ (८९४५)
शशंस रामाय युधिष्ठिरं स
भीमं सजिष्णुं च यमौ च वीरौ ।
शनैःशनैस्तान्प्रसमीक्ष्य रामो
जनार्दनं प्रीतमना ददर्श ह ॥ १-२०२-१० (८९४६)
अन्ये तु वीरा नृपपुत्रपौत्राः
कृष्णागतैर्नेत्रमनःस्वभावैः ।
व्यायच्छमाना ददृशुर्न तान्वै
सन्दष्टदन्तच्छदताम्रनेत्राः ॥ १-२०२-११ (८९४७)
तथैव पार्थाः पृथुबाहवस्ते
वीरौ यमौ चैव महानुभावौ ।
तां द्रौपदीं प्रेक्ष्य तदा स्म सर्वे
कन्दर्पबाणाभिहता बभूवुः ॥ १-२०२-१२ (८९४८)
देवर्षिगन्धर्वसमाकुलं त-
त्सुपर्णनागासुरसिद्धजुष्टम् ।
दिव्येन गन्धेन समाकुलं च
दिव्यैश्च पुष्पैरवकीर्यमाणम् ॥ १-२०२-१३ (८९४९)
महास्वनैर्दुन्दुभिनादितैश्च
बभूव तत्सङ्कुलमन्तरिक्षम् ।
विमानसंबाधमभूत्समन्ता-
त्सवेणुवीणापणवानुनादम् ॥ १-२०२-१४ (८९५०)
ग्समाजवाटोपरि संस्थितानां
मेघैः समन्तादिव गर्जमानैः।'
ततस्तु ते राजगणाः क्रमेण
कृष्णानिमित्तं कृतविक्रमाश्च ।
सकर्णदुर्योधनशाल्वशल्य-
द्रौणायनिक्राथसुनीथवक्राः ॥ १-२०२-१५ (८९५१)
कलिङ्गवङ्गाधिपपाण्ड्यपौण्ड्रा
विदेहराजो यवनाधिपश्च ।
अन्ये च नानानृपपुत्रपौत्रा
राष्ट्राधिपाः पङ्कजपत्रनेत्राः ॥ १-२०२-१६ (८९५२)
किरीटहाराङ्गदचक्रवालै-
र्विभूषिताङ्गाः पृथुबाहवस्ते ।
अनुक्रमं विक्रमसत्वयुक्ता
बलेन वीर्येण च नर्दमानाः ॥ १-२०२-१७ (८९५३)

तत्कार्मुकं संहननोपपन्नं
सज्यं न शेकुर्मनसाऽपि कर्तुम् ।
ते विक्रमन्तः स्फुरता दृढेन
विक्षिप्यमाणा धनुषा नरेन्द्राः ॥ १-२०२-१८ (८९५४)
विचेष्टमाना धरणीतलस्था
यथाबलं शैक्ष्यगुणक्रमाश्च ।
गतौजसः स्नस्तकिरीटहारा
विनिःश्वसन्तः शमयांबभूवुः ॥ १-२०२-१९ (८९५५)
हहाकृतं तद्धनुषा दृढेन
विस्रस्तहाराङ्गदचक्रवालम् ।
कृष्णानिमित्तं विनिवृत्तकामं
राज्ञां तदा मण्डलमार्तमासीत् ॥ १-२०२-२० (८९५६)
ग्एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः ।
चेदीनामधिपो वीरो बलवानन्तकोपमः ॥१-२०२-२१ (८९५७)
दमघोषात्मजो धीमाञ्शिशुपालो महाद्युतिः ।
धनुषोऽभ्याशमागम्य तस्थौ राज्ञां समक्षतः ॥१-२०२-२२ (८९५८)
तदप्यारोप्यमाणं तु माषमात्रेऽभ्यताडयत् ।
धनुषा पीड्यमानस्तु जानुभ्यामगमन्महीम् ॥१-२०२-२३ (८९५९)
तत उत्थाय राजा स स्वराष्ट्राण्यभिजग्मिवान् ।
ततो राजा जरासन्धो महावीर्यो महाबलः ॥१-२०२-२४ (८९६०)
कम्बुग्रीवः पृथुव्यंसो मत्तवारणविक्रमः ।
मत्तवारणताम्राक्षो मत्तवारणवेगवान् ॥१-२०२-२५ (८९६१)
धनुषोऽभ्याशमागत्य तस्थौ गिरिरिवाचलः ।
धनुरारोप्यमाणं तु सर्षमात्रेऽभ्यताडयत् ॥१-२०२-२६ (८९६२)
ततः शल्यो महावीर्यो मद्रराजो महाबलः ।
धनुरारोप्यमाणं तु मुद्गमात्रेऽभ्यताडयत् ॥१-२०२-२७ (८९६३)
तदैवागात्स्वयं राज्यं पश्चादनवलोकयन् ।
इदं धनुर्वरं कोऽद्य सज्यं कुर्वीत पार्थिवः ॥१-२०२-२८ (८९६४)
इति निश्चित्य मनसा भूय एव स्थितस्तदा ।
ततो दुर्योधनो राजा धार्तराष्ट्रः परन्तपः ॥१-२०२-२९ (८९६५)
मानी दृढास्त्रसंपन्नः सर्वैश्च नृपलक्षणैः ।
उत्थितः सहसा तत्र भ्रातृमध्ये महाबलः ॥१-२०२-३० (८९६६)
विलोक्य द्रौपदीं हृष्टो धनुषोऽभ्याशमागमत् ।
स बभौ धनुरादाय शक्रश्चापधरो यथा ॥१-२०२-३१ (८९६७)
धनुरारोपयामास तिलमात्रेऽभ्यताडयत् ।
आरोप्यमाणं तद्राजा धनुषा बलिना तदा ॥१-२०२-३२ (८९६८)

उत्तानशय्यमपतदङ्गुल्यन्तरताडितः ।
स ययौ ताडितस्तेन व्रीडन्निव नराधिपः ॥ १-२०२-३३ (८९६९)
ततो वैकर्तनः कर्णो वृषा वै सूतनन्दनः ।
धनुरभ्याशमागम्य तोलयामास तद्धनुः ॥ १-२०२-३४ (८९७०)
तं चाप्यारोप्यमाणं तद्रोममात्रेऽभ्यताडयत् ।
त्रैलोक्यविजयी कर्णः सत्वे त्रैलोक्यविश्रुतः ॥ १-२०२-३५ (८९७१)
धनुषा सोऽपि निर्धूत इति सर्वे भयाकुलाः ।
एवं कर्णे विनिर्धूते धनुषा च नृपोत्तमाः ॥ १-२०२-३६ (८९७२)
चक्षुर्भिरपि नापश्यन्विनम्रमुखपङ्कजाः ।
दृष्ट्वा कर्णं विनिर्धूतं लोके वीरा नृपोत्तमाः ॥ १-२०२-३७ (८९७३)
निराशा धनुरुद्धारे द्रौपदीसंगमेऽपि च ॥ १-२०२-३८ (८९७४)
तस्मिंस्तु संभ्रान्तजने समाजे
निक्षिप्तवादेषु जनाधिपेषु ।
कुन्तीसुतो जिष्णुरियेष कर्तुं
सज्यं धनुस्तत्सशरं च वीरः ॥ १-२०२-३९ (८९७५)
ततो वरिष्ठः सुरदानवाना-
मुदरधीर्वृष्णिकुलप्रवीरः ।
जहर्ष रामेण स पीड्य हस्तं
हस्तंगतां पाण्डुसुतस्य मत्वा ॥ १-२०२-४० (८९७६)
न जज्ञिरेऽन्ये नृपविप्रमुख्याः
संछन्नरूपानथ पाण्डुपुत्रान् ।
विना हि लोके च यदुप्रवीरौ
धौम्यं हि धर्मं सह सोदरांश्च ॥ ॥ १-२०२-४१ (८९७७)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२०२-३ संकल्पजेन कामेन ॥
१-२०२-९ अभितः पद्मा लक्ष्मीर्येषां तान्सर्वाङ्गसुन्दरानित्यर्थः ॥
द्व्यधिकद्विशततमोऽध्यायः ॥
२०२ ॥

आदिपर्व - अध्याय २०३
॥ श्रीः ॥
१.२०३. अध्यायः २०३

Mahabharata - Adi Parva - Chapter Topics
धनुरारोपणार्थमुत्थितमर्जुनंप्रति ब्राह्मणानां शुभाशंसनम् ॥ १ ॥
अर्जुनेन धनुरारोपणपूर्वकं लक्ष्यवेधः ॥ २ ॥
द्रौपद्या अर्जुनकण्ठे मालाप्रक्षेपः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०३-० (८९७८)
वैशम्पायन उवाच। १-२०३-०क्ष् (११३४)
यदा निवृत्ता राजानो धनुषः सज्यकर्मणः ।
अथोदतिष्ठद्विप्राणां मध्याज्जिष्णुरुदारधीः ॥ १-२०३-१ (८९७९)
उदक्रोशन्विप्रमुख्या विधुन्वन्तोऽजिनानि च ।
दृष्ट्वा संप्रस्थितं पार्थमिन्द्रकेतुसमप्रभम् ॥ १-२०३-२ (८९८०)
केचिदासन्विमनसः केचिदासन्मुदान्विताः ।
आहुः परस्परं केचिन्निपुणा बुद्धिजीविनः ॥ १-२०३-३ (८९८१)
यत्कर्णशल्यप्रमुखैः क्षत्रियैर्लोकविश्रुतैः ।
नानतं बलवद्भिर्हि धनुर्वेदपरायणैः ॥ १-२०३-४ (८९८२)
तत्कथं त्वकृतास्त्रेण प्राणतो दुर्बलीयसा ।
वटुमात्रेण शक्यं हि सज्यं कर्तुं धनुर्द्विजाः ॥ १-२०३-५ (८९८३)
अवहास्या भविष्यन्ति ब्राह्मणाः सर्वराजसु ।
कर्मण्यस्मिन्नसंसिद्धे चापलादपरीक्षिते ॥ १-२०३-६ (८९८४)
यद्येष दर्पाद्धर्षाद्वाप्यथ ब्राह्मणचापलात् ।
प्रस्थितो धनुरायन्तुं वार्यतां साधु मा गमत् ॥ १-२०३-७ (८९८५)
नावहास्या भविष्यामो न च लाघवमास्थिताः ।
न च विद्विष्टतां लोके गमिष्यामो महीक्षिताम् ॥ १-२०३-८ (८९८६)
केचिदाहुर्युवा श्रीमान्नागराजकरोपमः ।
पीनस्कन्धोरुबाहुश्च धैर्येण हिमवानिव ॥ १-२०३-९ (८९८७)
सिंहखेलगतिः श्रीमान्मत्तनागेन्द्रविक्रमः ।
संभाव्यमस्मिन्कर्मेदमुत्साहाच्चानुमीयते ॥ १-२०३-१० (८९८८)
शक्तिरस्य महोत्साहा न ह्यशक्तः स्वयं व्रजेत् ।
न च तद्विद्यते किंचित्कर्म लोकेषु यद्भवेत् ॥ १-२०३-११ (८९८९)
ब्राह्मणानामसाध्यं च नृषु संस्थानचारिषु ।
अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः ॥ १-२०३-१२ (८९९०)
दुर्बला अपि विप्रा हि बलीयांसः स्वेतजसा ।
ब्राह्मणो नावमन्तव्यः सदसद्वा समाचरन् ॥ १-२०३-१३ (८९९१)
सुखं दुःखं महद्ध्रस्वं कर्म यत्समुपागतम् ।

जामदग्न्येन रामेण निर्जिताः क्षत्रिया युधि ॥१-२०३-१४ (८९९२)
पीतः समुद्रोऽगस्त्येन अगाधो ब्रह्मतेजसा ।
तस्माद्ब्रुवन्तु सर्वेऽत्र वटुरेष धनुर्महान् ॥१-२०३-१५ (८९९३)
आरोपयतु शीघ्रं वै तथेत्यूचुर्द्विजर्षभाः। १-२०३-१६ (८९९४)
वैशम्पायन उवाच ।
एवं तेषां विलपतां विप्राणां विविधा गिरः ॥ १-२०३-१६क्ष् (११३५)
अर्जुनो धनुषोऽभ्याशे तस्थौ गिरिरिवाचलः ।
ग्अर्जुनः पाण्डवश्रेष्ठो धृष्टद्युम्नमथाब्रवीत् ॥१-२०३-१७ (८९९५)
एतद्धनुर्ब्राह्मणानां सज्यं कर्तुमलं तु किम्। १-२०३-१८ (८९९६)
वैशम्पायन उवाच ।
तस्य तद्वचनं श्रुत्वा धृष्टद्युम्नोऽब्रवीद्वचः ॥ १-२०३-१८क्ष् (११३६)
ब्राह्मणो वाथ राजन्यो वैश्यो वा शूद्र एव वा ।
एतेषां यो धनुःश्रेष्ठं सज्यं कुर्याद्द्विजोत्तम ॥१-२०३-१९ (८९९७)
तस्मै प्रदेया भगिनी सत्यमुक्तं मया वचः ॥ १-२०३-२० (८९९८)
वैशम्पायन उवाच।१-२०३-२१क्ष् (११३७)
ततः पश्चान्महातेजाः पाण्डवो रणदुर्जयः।'
स तद्धनुः परिक्रम्य प्रदक्षिणमथाकरोत् ॥ १-२०३-२१ (८९९९)
प्रणम्य शिरसा देवमीनं वरदं प्रभुम् ।
कृष्णं च मनसा कृत्वा जगृहे चार्जुनो धनुः ॥१-२०३-२२ (९०००)
यत्पार्थिवै रुक्मसुनीथवक्रै
राधेयदुर्योधनशल्यसाल्वैः ।
तदा धनुर्वेदपरैर्नृसिंहैः
कृतं न सज्यं महतोऽपि यत्नात् ॥ १-२०३-२३ (९००१)
तदर्जुनो वीर्यवतां सदर्प-
स्तदैन्द्रिरिन्द्रावरजप्रभावः ।
सज्यं च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्दसङ्ख्यान् ॥ १-२०३-२४ (९००२)
विव्याध लक्ष्यं निपपात तच्च
छिद्रेण भूमौ सहसातिविद्धम् ।
ततोऽन्तरिक्षे च बभूव नादः
समाजमध्ये च महान्निनादः ॥ १-२०३-२५ (९००३)
पुष्पाणि दिव्यानि ववर्ष देवः
पार्थस्य मूर्ध्नि द्विषतां निहन्तुः ॥ १-२०३-२६ (९००४)
चेलानि विव्यधुस्तत्र ब्राह्मणाश्च सहस्रशः ।
विलक्षितास्ततश्चक्रुर्हाहाकारांश्च सर्वशः ।
न्यपतंश्चात्र नभसः समन्तात्पुष्पवृष्टयः ॥ १-२०३-२७ (९००५)

शताङ्गानि च तूर्याणि वादकाः समवादयन् ।
सूतमागधसङ्घाश्चाप्यस्तुवंस्तत्र सुस्वराः ॥१-२०३-२८ (९००६)
तं दृष्ट्वा द्रुपदः प्रीतो बभूव रिपुसूदनः ।
सह सैन्यैश्च पार्थस्य साहाय्यार्थमियेष सः ॥१-२०३-२९ (९००७)
तस्मिंस्तु शब्दे महति प्रवृद्धे
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
आवासमेवोपजगाम शीघ्रं
सार्धं यमाभ्यां पुरुषोत्तमाभ्याम् ॥ १-२०३-३० (९००८)
विद्धं तु लक्ष्यं प्रसमीक्ष्य कृष्णा
पार्थं च शक्रप्रतिमं निरीक्ष्य ।
ग्स्वभ्यस्तरूपापि नवेव नित्यं
विनापि हासं हसतीव कन्या ॥ १-२०३-३१ (९००९)
मदादृतेऽपि स्खलतीव भावै-
र्वाचा विना व्याहरतीव दृष्ट्या ।
आदाय शुक्लं वरमाल्यदाम
जगाम कुन्तीसुतमुत्स्मयन्ती ॥ १-२०३-३२ (९०१०)
गत्वा च पश्चात्प्रसमीक्ष्य कृष्णा
पार्थस्य वक्षस्यविशङ्कमाना ।
क्षिप्त्वा स्रजं पार्थिववीरमध्ये
वराय वव्रे द्विजसङ्घमध्ये ॥ १-२०३-३३ (९०११)
शचीव देवेन्द्रमथाग्निदेवं
स्वाहेव लक्ष्मीश्च यथा मुकुन्दम् ।
उषेव सूर्यं मदनं रतीव
महेश्वरं पर्वतराजपुत्री ॥' १-२०३-३४ (९०१२)
स तामुपादाय विजित्य रङ्गे
द्विजातिभिस्तैरभिपूज्यमानः ।
रङ्गान्निरक्रामदचिन्त्यकर्मा
पत्न्या तया चाप्यनुगम्यमानः ॥ ॥ १-२०३-३५ (९०१३)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
त्र्यधिकद्विशततमोऽध्यायः ॥२०३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२०३-२९ साहाय्यार्थं द्रौपद्यलाभात्
क्षुब्धैर्नृपान्तरैर्युद्धप्रसक्तौ सत्याम् ॥
त्र्यधिकद्विशततमोऽध्यायः ॥

आदिपर्व - अध्याय २०४
॥ श्रीः ॥
१.२०४. अध्यायः २०४

Mahabharata - Adi Parva - Chapter Topics
क्रोधाद्राजसु द्रुपदहननार्थमागतेषु राजसंमुखे भीमार्जुनयोः
सज्जीभूय स्थितयोः सतोः कृष्णबलरामयोः संवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०४-० (९०१४)
वैशम्पायन उवाच। १-२०४-०क्ष् (११३८)
तस्मै दित्सति कन्यां तु ब्राह्मणाय तदा नृपे ।
कोप आसीन्महीपानामालोक्यान्योन्यमन्तिकात् ॥ १-२०४-१ (९०१५)
ग्ऊचुः सर्वे समागम्य परस्परहितैषिणः ।
वयं सर्वे समाहूता द्रुपदेन दुरात्मना ।
संहत्य चाभ्यगच्छाम स्वयंवरदिदृक्षया ॥' १-२०४-२ (९०१६)
अस्मानयमतिक्रम्य तृणीकृत्य च संगतान् ।
दातुमिच्छति विप्राय द्रौपदीं योषितां वराम् ॥ १-२०४-३ (९०१७)
अवरोप्येह वृक्षस्तु फलकाले निपात्यते ।
निहन्मैनं दुरात्मानं योयमस्मान्न मन्यते ॥ १-२०४-४ (९०१८)
न ह्यर्हत्येष संमानं नापि वृद्धक्रमं गुणैः ।
हन्मैनं सह पुत्रेण दुराचारं नृपद्विषम् ॥ १-२०४-५ (९०१९)
अयं हि सर्वानाहूय सत्कृत्य च नराधिपान् ।
गुणवद्भोजयित्वान्नं ततः पश्चान्न मन्यते ॥ १-२०४-६ (९०२०)
अस्मिन्राजसमवाये देवानामिव सन्नये ।
किमयं सदृशं कंचिन्नृपतिं नैव दृष्टवान् ॥ १-२०४-७ (९०२१)
न च विप्रेष्वधीकारो विद्यते वरणं प्रति ।
स्वयंवरः क्षत्रियाणामितीयं प्रथिता श्रुतिः ॥ १-२०४-८ (९०२२)
अथवा यदि कन्येयं न च कंचिद्बुभूषति ।
अग्नावेनां परिक्षिप्य याम राष्ट्राणि पार्थिवाः ॥ १-२०४-९ (९०२३)
ब्राह्मणो यदि चापल्याल्लोभाद्वा कृतवानिदम् ।
विप्रियं पार्थिवेन्द्राणां नैष वध्यः कथंचन ॥ १-२०४-१० (९०२४)
ब्राह्मणार्थं हि नो राज्यं जीवितं हि वसूनि च ।
पुत्रपौत्रं च यच्चान्यदस्माकं विद्यते धनम् ॥ १-२०४-११ (९०२५)

अवमानभयाच्चैव स्वधर्मस्य च रक्षणात् ।
स्वयंवराणामन्येषां मा भूदेवंविधा गतिः ॥१-२०४-१२ (९०२६)
इत्युक्त्वा राजशार्दूला रुष्टाः परिघबाहवः ।
द्रुपदं तु जिघांसन्तः सायुधाः समुपाद्रवन् ॥१-२०४-१३ (९०२७)
तान्गृहीतशरावापान्क्रुद्धानापततो बहून् ।
द्रुपदो वीक्ष्य संत्रासाद्ब्राह्मणाञ्छरणं गतः ॥१-२०४-१४ (९०२८)
ग्न भयान्नापि कार्पण्यान्न प्राणपरिरक्षणात् ।
जगाम द्रुपदो विप्राञ्शमार्थी प्रत्यपद्यत ॥' १-२०४-१५ (९०२९)
वेगेनापततस्तांस्तु प्रभिन्नानिव वारणान् ।
पाण्डुपुत्रौ महेष्वासौ प्रतियातावरिन्दमौ ॥१-२०४-१६ (९०३०)
ततः समुत्पेतुरुदायुधास्ते
महीक्षितो बद्धगोधाङ्गुलित्राः ।
जिघांसमानाः कुरुराजपुत्रा-
वमर्षयन्तोऽर्जुनभीमसेनौ ॥ १-२०४-१७ (९०३१)
ततस्तु भीमोऽद्भुतभीमकर्मा
महाबलो वज्रसमानसारः ।
उत्पाट्य दोर्भ्यां द्रुममेकवीरो
निष्पत्रयामास यथा गजेन्द्रः ॥ १-२०४-१८ (९०३२)
तं वृक्षमादाय रिपुप्रमाथी
दण्डीव दण्डं पितृराज उग्रम् ।
तस्थौ समीपे पुरुषर्षभस्य
पार्थस्य पार्थः पृथुदीर्घबाहुः ॥ १-२०४-१९ (९०३३)
तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धि-
र्जिष्णुः स हि भ्रातुरचिन्त्यकर्मा ।
विसिष्मिये चापि भयं विहाय
तस्थौ धनुर्गृह्य महेन्द्रकर्मा ॥ १-२०४-२० (९०३४)
तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धि-
र्जिष्णोः सहभ्रातुरचिन्त्यकर्मा ।
दामोदरो भ्रातरमुग्रवीर्यं
हलायुधं वाक्यमिदं बभाषे ॥ १-२०४-२१ (९०३५)
य एष सिंहर्षभखेलगामी
महद्धनुः कर्षति तालमात्रम् ।
एषोऽर्जुनो नात्र विचार्यमस्ति
यद्यस्मि संकर्षण वासुदेवः ॥ १-२०४-२२ (९०३६)
यस्त्वेष वृक्षं तरसाऽवभज्य
राज्ञां निकारे सहसा प्रवृत्तः ।

वृकोदरान्नान्य इहैतदद्य
कर्तुं समर्थः समरे पृथिव्याम् ॥ १-२०४-२३ (९०३७)
योऽसौ पुरस्तात्कमलायताक्षो
महातनुः सिंहगतिर्विनीतः ।
गौरः प्रलम्बोज्ज्वलचारुघोणो
विनिःसृतः सोऽप्युत धर्मपुत्रः ॥ १-२०४-२४ (९०३८)
यौ तौ कुमाराविव कार्तिकेयौ
द्वावाश्विनेयाविति मे वितर्कः ।
मुक्ता हि तस्माज्जतुवेश्मदाहा-
न्मया श्रुताः पाण्डुसुताः पृथा च ॥ १-२०४-२५ (९०३९)
वैशम्पायन उवाच। १-२०४-२६क्ष् (११३९)
तमब्रवीन्निर्जलतोयदाभो
हलायुधोऽनन्तरजं प्रतीतः ।
प्रीतोऽस्मि दृष्ट्वा हि पितृष्वसारं
पृथां विमुक्तां सह कौरवाग्र्यैः ॥ ॥ १-२०४-२६ (९०४०)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

आदिपर्व - अध्याय २०५
॥ श्रीः ॥
१.२०५. अध्यायः २०५

Mahabharata - Adi Parva - Chapter Topics
अर्जुनेन कर्णपराजयः ॥ १ ॥
भीमेन कर्णपराजयः ॥ २ ॥
युधिष्ठिरादिभिर्दुर्योधनादिपराजयः ॥ ३ ॥
पुनर्युद्धाय कृतनिश्चयानां राज्ञां श्रीकृष्णवाक्येन
युद्धोद्योगाद्विरम्य स्वस्वालयगमनम् ॥ ४ ॥
द्रौपद्या सह भीमार्जुनयोः कुलालगृहप्रवेशः ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०५-० (९०४१)
वैशम्पायन उवाच। १-२०५-०क्ष् (११४०)
अजिनानि विधुन्वन्तः करकांश्च द्विजर्षभाः ।
ऊचुस्ते भीर्न कर्तव्या वयं योत्स्यामहे परान् ॥ १-२०५-१ (९०४२)

तानेवं वदतो विप्रानर्जुनः प्रहसन्निव ।
उवाच प्रेक्षका भूत्वा यूयं तिष्ठत पार्श्वतः ॥ १-२०५-२ (९०४३)
अहमेनानजिह्माग्रैः शतशो विकिरञ्छरैः ।
वारयिष्यामि संक्रुद्धान्मन्त्रैराशीविषानिव ॥ १-२०५-३ (९०४४)
इति तद्धनुरानम्य शुल्कावाप्तं महाबलः ।
भ्रात्रा भीमेन सहितस्तस्थौ गिरिरिवाचलः ॥ १-२०५-४ (९०४५)
ततः कर्णमुखान्दृष्ट्वा क्षत्रियान्युद्धदुर्मदान् ।
संपेततुरभीतौ तौ गजौ प्रतिगजानिव ॥ १-२०५-५ (९०४६)
ऊचुश्च वाचः परुषास्ते राजानो युयुत्सवः ।
आहवे हि द्विजस्यापि वधो दृष्टो युयुत्सतः ॥ १-२०५-६ (९०४७)
इत्येवमुक्त्वा राजानः सहसा दुद्रुवुर्द्विजान् ।
ततः कर्णो महातेजा जिष्णुं प्रति ययौ रणे ॥ १-२०५-७ (९०४८)
युद्धार्थी वासिताहेतोर्गजः प्रतिगजं यथा ।
भीमसेनं ययौ शल्यो मद्राणामीश्वरो बली ॥ १-२०५-८ (९०४९)
दुर्योधनादयः सर्वे ब्राह्मणैः सह संगताः ।
मृदुपूर्वमयत्नेन प्रत्ययुध्यंस्तदाऽऽहवे ॥ १-२०५-९ (९०५०)
ततोऽर्जुनः प्रत्यविध्यदापतन्तं शितैः शरैः ।
कर्णं वैकर्तनं श्रीमान्विकृष्य बलवद्धनुः ॥ १-२०५-१० (९०५१)
तेषां शराणां वेगेन शितानां तिग्मतेजसाम् ।
विमुह्यमानो राधेयो यत्नात्तमनुधावति ॥ १-२०५-११ (९०५२)
तावुभावप्यनिर्देश्यौ लाघवाज्जयतां वरौ ।
अयुध्येतां सुसंरब्धावन्योन्यविजिगीषिणौ ॥ १-२०५-१२ (९०५३)
कृते प्रतिकृतं पश्य पश्य बाहुबलं च मे ।
इति शूरार्थवचनैरभाषेतां परस्परम् ॥ १-२०५-१३ (९०५४)
ततोऽर्जुनस्य भुजयोर्वीर्यमप्रतिमं भुवि ।
ज्ञात्वा वैकर्तनः कर्णः संरब्धः समयोधयत् ॥ १-२०५-१४ (९०५५)
अर्जुनेन प्रयुक्तांस्तान्बाणान्वेगवतस्तदा ।
प्रतिहत्य ननादोच्चैः सैन्यानि तदपूजयन् ॥ १-२०५-१५ (९०५६)
कर्ण उवाच। १-२०५-१६क्ष् (११४१)
तुष्यामि ते विप्रमुख्य भुजवीयर्स्य संयुगे ।
अविषादस्य चैवास्य शस्त्रास्त्रविजयस्य च ॥ १-२०५-१६ (९०५७)
किं त्वं साक्षाद्धनुर्वेदो रामो वा विप्रसत्तम ।
अथ साक्षाद्धरिहयः साक्षाद्वा विष्णुरच्युतः ॥ १-२०५-१७ (९०५८)
आत्मप्रच्छादनार्थं वै बाहुवीर्यमुपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रतियुध्यसे ॥ १-२०५-१८ (९०५९)
न हि मामाहवे क्रुद्धमन्यः साक्षाच्छचीपतेः ।

पुमान्योधयितुं शक्तः पाण्डवाद्वा किरीटिनः ॥१-२०५-१९ (९०६०)
ग्दग्धा जतुगृहे सर्वे पाण्डवाः सार्जुनास्तदा ।
विनार्जुनं वा समरे मां निहन्तुमशक्नुवन् ॥' १-२०५-२० (९०६१)
तमेवंवादिनं तत्र फाल्गुनः प्रत्यभाषत ।
नास्मि कर्ण धनुर्वेदो नास्मि रामः प्रतापवान् ॥१-२०५-२१ (९०६२)
ब्राह्मणोऽस्मि युधां श्रेष्ठः सर्वशस्त्रभृतां वरः ।
ब्राह्मे पौरन्दरे चास्त्रे निष्ठितोगुरुशासनात् ॥१-२०५-२२ (९०६३)
स्थितोऽस्म्यद्य रणे जेतुं त्वां वै वीर स्थिरो भव ।
ग्निर्जितोऽस्मीति वा ब्रूहि ततो व्रज यथासुखम् ॥१-२०५-२३ (९०६४)
वैशम्पायन उवाच।१-२०५-२४क्ष् (११४२)
एवमुक्त्वाऽथ कर्णस्य धनुश्चिच्छेद पाण्डवः ।
ततोऽन्यद्धनुरादाय संयोद्धुं सन्दधे शरम् ॥१-२०५-२४ (९०६५)
दृष्ट्वा तच्चापि कौन्तेयश्छित्वा तद्धनुराशुगैः ।
तथा वैकर्तनं कर्णं बिभेद समरेऽर्जुनः ॥१-२०५-२५ (९०६६)
ततः कर्णस्तु राधेयः छिन्नछन्वा महाबलः ।
शरैरतीव विद्धाङ्गः पलायनमथाकरोत् ॥१-२०५-२६ (९०६७)
पुनरायान्मुहूर्तेन गृहीत्वा सशरं धनुः ।
ववर्ष शरवर्षाणि पार्थं वैकर्तनस्तथा ॥१-२०५-२७ (९०६८)
तानि वै शरजालानि कौन्तेयोऽभ्यहनच्छरैः ।
ज्ञात्वा सर्वाञ्शरान्घोरान्कर्णोऽदावद्द्रुतं बहिः ॥' १-२०५-२८ (९०६९)
ब्राह्मं तेजस्तदाऽजय्यं मन्यमानो महारथः ।
अपरस्मिन्वनोद्देशे वीरौ शल्यवृकोदरौ ॥१-२०५-२९ (९०७०)
बलिनौ युद्धसंपन्नौ विद्यया च बलेन च ।
अन्योन्यमाह्वयन्तौ तु मत्ताविव महागजौ ॥१-२०५-३० (९०७१)
मुष्टिभिर्जानुभिश्चैव निघ्नन्तावितरेतरम् ।
प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः ॥१-२०५-३१ (९०७२)
आचकर्षतुरन्योन्यं मुष्टिभिश्चापि जघ्नतुः ।
ततश्चटचटाशब्दः सुघोरो ह्यभवत्तयोः ॥१-२०५-३२ (९०७३)
पाषाणसंपातनिभैः प्रहारैरभिजघ्नतुः ।
मुहूर्तं तौ तदाऽन्योन्यं समरे पर्यकर्षताम् ॥१-२०५-३३ (९०७४)
ततो भीमः समुत्क्षिप्य बाहुभ्यां शल्यमाहवे ।
अपातयत्कुरुश्रेष्ठो ब्राह्मणा जहसुस्तदा ॥१-२०५-३४ (९०७५)
तत्राश्चर्यं भीमसेनश्चकार पुरुषर्षभः ।
यच्छल्यं पातितं भूमौ नावधीद्बलिनं बली ॥१-२०५-३५ (९०७६)
पातिते भीमसेनेन शल्ये कर्णे च शङ्किते ।
ग्विस्मयः परमो जज्ञे सर्वेषां पश्यतां नृणाम् ॥१-२०५-३६ (९०७७)

ततो राजसमूहस्य पश्यतो वृक्षमारुजत् ।
ततस्तु भीमं संज्ञाभिर्वारयामास धर्मराट् ॥१-२०५-३७ (९०७८)
आकारज्ञस्तथा भ्रातुः पाण्डवोऽपि न्यवर्तत ।
धर्मराजश्च कौरव्य दुर्योधनममर्षणम् ॥१-२०५-३८ (९०७९)
अयोधयत्सभामध्ये पश्यतां वै महीक्षिताम् ।
ततो दुर्योधनस्तं तु ह्यवज्ञाय युधिष्ठिरम् ॥१-२०५-३९ (९०८०)
नायोधयत्तदा तेन बलवान्वै सुयोधनः ।
एतस्मिन्नन्तरेऽविध्यद्बाणेनानतपर्वणा ॥१-२०५-४० (९०८१)
दुर्योधनममित्रघ्नं धर्मराजो युधिष्ठिरः ।
ततो दुर्योधनः क्रुद्धो दण्डाहत इवोरगः ॥१-२०५-४१ (९०८२)
प्रत्ययुध्यत राजानं यत्नं परममास्थितः ।
छित्त्वा राजा धनुः सज्यं धार्तराष्ट्रस्य संयुगे ॥१-२०५-४२ (९०८३)
अभ्यवर्षच्छरौघैस्तं स हित्वा प्राद्रवद्रणम् ।
दुःशासनस्तु संक्रुद्धः सहदेवेन पार्थिव ॥१-२०५-४३ (९०८४)
युद्ध्वा च सुचिरं कालं सहदेवेन निर्जितः ।
उत्सृज्य च धनुः सङ्ख्ये जानुभ्यामवनीं गतः ।
उत्थाय सोऽभिदुद्राव सोसिं जग्राह चर्म च ॥ १-२०५-४४ (९०८५)
विकर्णचित्रसेनाभ्यां निगृहीतश्च कौरवः ।
मा युद्धमिति कौरव्य ब्राह्मणेनाबलेन वै ॥१-२०५-४५ (९०८६)
दुःसहो नकुलश्चोभौ युद्धं कर्तुं समुद्यतै ।
तौ दृष्ट्वा कौरवा युद्धं वाक्यमूचुर्महाबलौ ॥१-२०५-४६ (९०८७)
निवर्तन्तां भवन्तो वै कुतो विप्रेषु क्रूरता ।
दुर्बला ब्राह्मणाश्चेमे भवन्तो वै महाबलाः ॥१-२०५-४७ (९०८८)
द्वावत्र ब्राह्मणौ क्रूरौ वाय्विन्द्रसदृशौ बले ।
ये वा के वा नमस्तेभ्यो गच्छामः स्वपुरं वयम् ॥१-२०५-४८ (९०८९)
एवं संभाषमाणास्ते न्यवर्तन्ताथ कौरवाः ।
जहृषुर्ब्राह्मणास्तत्र समेतास्तत्र सङ्घशः ॥१-२०५-४९ (९०९०)
बहुशस्ते ततस्तत्र क्षत्रिया रणमूर्धनि ।
प्रेक्षमाणास्तथाऽतिष्ठन्ब्राह्मणांश्च समन्ततः ॥१-२०५-५० (९०९१)
ब्राह्मणाश्च जयं प्राप्ताः कन्यामादाय निर्ययुः ।
विजिते भीमसेनेन शल्ये कर्णे च निर्जिते ॥१-२०५-५१ (९०९२)
दुर्योधने चापयाते तथा दुःशासने रणात्।'
शङ्किताः सर्वराजानः परिवव्रुर्वृकोदरम् ॥ १-२०५-५२ (९०९३)
ऊचुश्च सहितास्तत्र साध्विमौ ब्राह्मणर्षभौ ।
विज्ञायेतां क्वजन्मानौ क्वनिवासौ तथैव च ॥१-२०५-५३ (९०९४)
को हि राधासुतं कर्णं शक्तो योधयितुं रणे ।

अन्यत्र रामाद्द्रोणाद्वा पाण्डवाद्वा किरीटिनः ॥१-२०५-५४ (९०९५)
कृष्णाद्वा देवकीपुत्रात्कृपाद्वापि शरद्वतः ।
को वा दुर्योधनं शक्तः प्रतियोथयितुं रणे ॥१-२०५-५५ (९०९६)
तथैव मद्राधिपतिं शल्यं बलवतांवरम् ।
बलदेवादृते वीरात्पाण्डवाद्वा वृकोदरात् ॥१-२०५-५६ (९०९७)
वीराद्दुर्योधनाद्वाऽन्यः शक्तः पातयितुं रणे ।
क्रियतामवहारोऽस्माद्युद्धाद्ब्राह्मणसंवृतात् ॥१-२०५-५७ (९०९८)
ब्राह्मणा हि सदा रक्ष्याः सापराधाऽपिनित्यदा ।
अथैनानुपलभ्येह पुनर्योत्स्याम हृष्टवत् ॥१-२०५-५८ (९०९९)
वैशम्पायन उवाच।१-२०५-५९क्ष् (११४३)
तांस्तथावादिनः सर्वान्प्रसमीक्ष्य क्षितीश्वरान् ।
अथान्यान्पुरुषांश्चापि कृत्वा तत्कर्म संयुगे ॥१-२०५-५९ (९१००)
तत्कर्म भीमस्य समीक्ष्य कृष्णः
कुन्तीसुतौ तौ परिशङ्कमानः ।
निवारयामास महीपतींस्ता-
न्धर्मेण लब्धेत्यनुनीय सर्वान् ॥ १-२०५-६० (९१०१)
एवं ते विनिवृत्तास्तु युद्धाद्युद्धविशारदाः ।
यथावासं ययुः सर्वे विस्मिता राजसत्तमाः ॥१-२०५-६१ (९१०२)
वृत्तो ब्रह्मोत्तरो रङ्गः पाञ्चाली ब्राह्मणैर्वृता ।
इति ब्रुवन्तः प्रययुर्ये तत्रासन्समागताः ॥१-२०५-६२ (९१०३)
ब्राह्मणैस्तु प्रतिच्छन्नौ रौरवाजिनवासिभिः ।
कृच्छ्रेण जग्मतुस्तौ तु भीमसेनधनञ्जयौ ॥१-२०५-६३ (९१०४)
विमुक्तौ जनसंबाधाच्छत्रुभिः परिविक्षतौ ।
कृष्णयानुगतौ तत्र नृवीरौ तौ विरेजतुः ॥१-२०५-६४ (९१०५)
पौर्णमास्यां घनैर्मुक्तौ चन्द्रसूर्याविवोदितौ ।
तेषां माता बहुविधं विनाशं पर्यचिन्तयत् ॥१-२०५-६५ (९१०६)
अनागच्छत्सु पुत्रेषु भैक्षकाले च लिङ्घिते ।
धार्तराष्ट्रैर्हताश्च स्युर्विज्ञाय कुरुपुङ्गवाः ॥१-२०५-६६ (९१०७)
मायान्वितैर्वा रक्षोभिः सुघोरैर्दृढवैरिभिः ।
विपरीतं मतं जातं व्यासस्यापि महात्मनः ॥१-२०५-६७ (९१०८)
इत्येवं चिन्तयामासं सुतस्नेहावृता पृथा ।
ततः सुप्तजनप्राये दुर्दिने मेघसंप्लुते ॥१-२०५-६८ (९१०९)
महत्यथापराह्णे तु घनैः सूर्य इवावृतः ।
ब्राह्मणैः प्राविशत्तत्र जिष्णुर्भार्गववेश्म तत् ॥ ॥१-२०५-६९ (९११०)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि

पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२०५-१२ विजिगीषिणौ विजिगीषावन्तौ ॥
१-२०५-२९ वनोद्देशे रङ्गदृशां निवासस्थाने ॥
१-२०५-३४ समुत्क्षिप्य कूष्माण्डफलवदपातयत् ॥
१-२०५-५७ अवहारो युद्धान्निवर्तनं ॥
१-२०५-५९ संयुगे तत्कर्म कृत्वा तूर्ष्णीभूताविति शेषः ॥
१-२०५-६२ ब्रह्म ब्राह्मणजातिः उत्तरं उत्कृष्टं यस्मिन्स ब्रह्मोत्तरः ॥
१-२०५-६९ भार्गववेश्म कुलालगृहं ॥
पाञ्चाधिकद्विशततमोऽध्यायः ॥
२०५ ॥

आदिपर्व - अध्याय २०६
॥ श्रीः ॥
१.२०६. अध्यायः २०६

Mahabharata - Adi Parva - Chapter Topics
भीमार्जुनाभ्यां द्रौपद्याः भिक्षेत्यावेदने कुन्त्या पञ्चानां सह
भोजनानुज्ञा ॥ १ ॥
पश्चात् द्रौपदीदर्शनेन चिन्तान्वितायां कुन्त्यां युधिष्ठिरार्जुनयोः
संवादः ॥ २ ॥
द्वैपायनवचःस्मरणेन सर्वेषां द्रौपदी भार्येति
युधिष्ठिरनिश्चयः ॥ ३ ॥
जनमेजयेन कृष्णस्य कार्मुकानारोपणे कारणप्रश्ने पाण्डवार्थमिति
वैशम्पायनस्योत्तरम् ॥ ४ ॥
कुलालशालांप्रति श्रीकृष्णस्यागमनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०६-० (९१११)
वैशम्पायन उवाच। १-२०६-०क्ष् (११४४)
गत्वा तु तां भार्गवकर्मशालां
पार्थौ पृथां प्राप्य महानुभावौ ।
तां याज्ञसेनीं परमप्रतीतौ
भिक्षेत्यथावेदयतां नराग्र्यौ ॥ १-२०६-१ (९११२)
कुटीगता सा त्वनवेक्ष्य पुत्रौ

प्रोवाच भुङ्क्तेति समेत्य सर्वे ।
पश्चाच्च कुन्ती प्रसमीक्ष्य कृष्णां
कष्टं मया भाषितमित्युवाच ॥ १-२०६-२ (९११३)
साऽधर्मभीता परिचिन्तयन्ती
तां याज्ञसेनीं परमप्रतीताम् ।
पाणौ गृहीत्वोपजगाम कुन्ती
युधिष्ठिरं वाक्यमुवाच चेदम् ॥ १-२०६-३ (९११४)
कुन्त्युवाच। १-२०६-४क्ष् (११४५)
इयं तु कन्या द्रुपदस्य राज्ञ-
स्तवानुजाभ्यां मयि संनिसृष्टा ।
यथोचितं पुत्र मयाऽपि चोक्तं
समेत्य भुङ्क्तेति नृप प्रमादात् ॥ १-२०६-४ (९११५)
मया कथं नानृतमुक्तमद्य
भवेत्कुरूणामृषभ ब्रवीहि ।
पञ्चालराजस्य सुतामधर्मो
न चोपवर्तेत न विभ्रमेच्च ॥ १-२०६-५ (९११६)
वैशम्पायन उवाच। १-२०६-६क्ष् (११४६)
स एवमुक्तो मतिमान्नृवीरो
मात्रा मुहूर्तं तु विचिन्त्य राजा ।
कुन्तीं समाश्वास्य कुरुप्रवीरो
धनञ्जयं वाक्यमिदं बभाषे ॥ १-२०६-६ (९११७)
त्वया जिता फाल्गुन याज्ञसेनी
त्वयैव शोभिष्यति राजपुत्री ।
प्रज्वाल्यतामग्निरमित्रसाह
गृहाण पाणिं विधिवत्त्वमस्याः ॥ १-२०६-७ (९११८)
अर्जुन उवाच। १-२०६-८क्ष् (११४७)
मा मां नरेन्द्र त्वमधर्मभाजं
कृथा न धर्मोऽयमशिष्टदृष्टः ।
भवान्निवेश्यः प्रथमं ततोऽयं
भीमो महाबाहुरचिन्त्यकर्मा ॥ १-२०६-८ (९११९)
अहं ततो नकुलोऽनन्तरं मे
पश्चादयं सहदेवस्तरस्वी ।
वृकोदरोऽहं च यमौ च राज-
न्नियं च कन्या भवतो नियोज्याः ॥ १-२०६-९ (९१२०)
एवं गते यत्करणीयमत्र
धर्म्यं यशस्यं कुरु तद्विचिन्त्य ।

पाञ्चालराजस्य हितं च यत्स्या-
त्प्रशाधि सर्वे स्म वशे स्थितास्ते ॥ १-२०६-१० (९१२१)
वैशम्पायन उवाच। १-२०६-११क्ष् (११४८)
जिष्णोर्वचनमाज्ञाय भक्तिस्नेहसमन्वितम् ।
दृष्टिं निवेशयामासुः पाञ्चाल्यां पाण्डुनन्दनाः ॥ १-२०६-११ (९१२२)
दृष्ट्वा ते तत्र पश्यन्तीं सर्वे कृष्णां यशस्विनीम् ।
संप्रेक्ष्यान्योन्यमासीना हृदयैस्तामधारयन् ॥ १-२०६-१२ (९१२३)
तेषां तु द्रौपदीं दृष्ट्वा सर्वेषाममितौजसाम् ।
संप्रमथ्येन्द्रियग्रामं प्रादुरासीन्मनोभवः ॥ १-२०६-१३ (९१२४)
काम्यं हि रूपं पाञ्चाल्या विधात्रा विहितं स्वयम् ।
बभूवाधिकमन्याभ्यः सर्वभूतमनोहरम् ॥ १-२०६-१४ (९१२५)
तेषामाकारभावज्ञः कुन्तीपुत्रो युधिष्ठिरः ।
द्वैपायनवचः कृत्स्नं सस्मार मनुजर्षभः ॥ १-२०६-१५ (९१२६)
अब्रवीत्सहितान्भ्रातॄन्मिथो भेदभयान्नृपः ।
सर्वेषां द्रौपदी भार्या भविष्यति हि नः शुभा ॥ १-२०६-१६ (९१२७)
ग्जनमेजय उवाच। १-२०६-१७क्ष् (११४९)
सताऽपि शक्तेन च केशवेन
सज्यं धनुस्तन्न कृतं किमर्थम् ।
विद्धं च लक्ष्यं न च कस्य हेतो-
राचक्ष्व तन्मे द्विपदां वरिष्ठ ॥ १-२०६-१७ (९१२८)
वैशम्पायन उवाच। १-२०६-१८क्ष् (११५०)
शक्तेन कृष्णेन च कार्मुकं त-
न्नारोपितं ज्ञातुकामेन पार्थान् ।
परिश्रवादेव बभूव लोके
जीवन्ति पार्था इति निश्चयोऽस्य ॥ १-२०६-१८ (९१२९)
अन्यानशक्तान्नृपतीन्समीक्ष्य
स्वयंवरे कार्मुकेणोत्तमेन ।
धनञ्जयस्तद्धनुरेकवीरः
सज्यं करोतीत्यभिवीक्ष्य कृष्णः ॥ १-२०६-१९ (९१३०)
इति स्वयं वासुदेवो विचिन्त्य
पार्थान्विवित्सन्विविधैरुपायैः ।
न तद्धनुः सज्यमियेष कर्तुं
बभूवुरस्येष्टतमा हि पार्थाः ॥' १-२०६-२० (९१३१)
भ्रातुर्वचस्तत्प्रसमीक्ष्य सर्वे
ज्येष्ठस्य पाण्डोस्तनयास्तदानीम् ।
तमेवार्थं ध्यायमाना मनोभिः

सर्वे च ते तस्थुरदीनसत्वाः ॥ १-२०६-२१ (९१३२)
वृष्णिप्रवीरस्तु कुरुप्रवीरा-
नाशंसमानः सहरौहिणेयः ।
जगाम तां भार्गवकर्मशालां
यत्रासते ते पुरुषप्रवीराः ॥ १-२०६-२२ (९१३३)
तत्रोपविष्टं पृथुदीर्घबाहुं
ददर्श कृष्णः सहरौहिणेयः ।
अजातशत्रुं परिवार्य तांश्चा-
प्युपोपविष्टाञ्ज्वलनप्रकाशान् ॥ १-२०६-२३ (९१३४)
ततोऽब्रवीद्वासुदेवोऽभिगम्य
कुन्तीसुतं धर्मभृतां वरिष्ठम् ।
कृष्णोऽहमस्मीति निपीड्य पादौ
युधिष्ठिरस्याजमीढस्य राज्ञः ॥ १-२०६-२४ (९१३५)
तथैव तस्याप्यनु रौहिणेय-
स्तौ चापि हृष्टाः कुरवोऽभ्यनन्दन ।
पितृष्वसुश्चापि यदुप्रवीरा-
वगृह्णतां भारतमुख्य पादौ ॥ १-२०६-२५ (९१३६)
अजातशत्रुश्च कुरुप्रवीरः
पप्रच्छ कृष्णं कुशलं विलोक्य ।
कथं वयं वासुदेव त्वयेह
गूढा वसन्तो विदिताश्च सर्वे ॥ १-२०६-२६ (९१३७)
तमब्रवीद्वासुदेवः प्रहस्य
गूढोऽप्यग्निर्ज्ञायत एव राजन् ।
तं विक्रमं पाण्डवेयानतीत्य
कोऽन्यः कर्ता विद्यते मानुषेषु ॥ १-२०६-२७ (९१३८)
दिष्ट्या सर्वे पावकाद्विप्रमुक्ता
यूयं घोरात्पाण्डवाः शत्रुसाहाः ।
दिष्ट्या पापो धृतराष्ट्रस्य पुत्रः
सहामात्यो न सकामोऽभविष्यत् ॥ १-२०६-२८ (९१३९)
भद्रं वोऽस्तु निहितं यद्गुहायां
विवर्धध्वं ज्वलना इवैधमानाः ।
मा वो विद्युः पार्थिवाः केचिदेव
यास्यावहे शिबिरायैव तावत् ।
सोऽनुज्ञातः पाण्डवेनाव्ययश्रीः १-२०६-२९ (९१४०)
१-२०६-२९फ़्”
प्रायाच्छीघ्रं बलदेवेन सार्धम् ॥ ॥

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२०६-१२ दृष्ट्वा ते तत्र तिष्ठन्ती इति ङ । पाठः ॥
१-२०६-२९ यद्भद्रं गुहायां बुद्धौ वो निहितं तद्वोस्तु ॥
षडधिकद्विशततमोऽध्यायः ॥
२०६ ॥

आदिपर्व - अध्याय २०७
॥ श्रीः ॥
१.२०७. अध्यायः २०७

Mahabharata - Adi Parva - Chapter Topics
पाण्डवावासे धृष्टद्युम्नस्य निलीयावस्थानम् ॥ १ ॥
भीमाद्यानीतस्य भैक्षस्य कुन्त्याज्ञया द्रौपद्या परिवेषणम् ॥ २ ॥
सर्वं पाण्डववृत्तान्तं ज्ञात्वा धृष्टद्युम्नस्य प्रतिनिवर्तनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०७-० (९१४१)
वैशम्पायन उवाच। १-२०७-०क्ष् (११५१)
धृष्टद्युमनस्तु पाञ्चाल्यः पृष्ठतः कुरुनन्दनौ ।
अन्वगच्छत्तदा यान्तौ भार्गवस्य निवेशने ॥ १-२०७-१ (९१४२)
सोज्ञायमानः पुरुषानवधाय समन्ततः ।
स्वयमारान्निलीनोऽभूद्भार्गवस्य निवेशने ॥ १-२०७-२ (९१४३)
सायं च भीमस्तु रिपुप्रमाथी
जिष्णुर्यमौ चापि महानुभावौ ।
भैक्षं चरित्वा तु युधिष्ठिराय
निवेदयांचक्रुरदीनसत्वाः ॥ १-२०७-३ (९१४४)
ततस्तु कुन्ती द्रुपदात्मजां ता-
मुवाच काले वचनं वदान्या ।
ततोऽग्रमादाय कुरुष्व भद्रे
बलिं च विप्राय च देहि भिक्षाम् ॥ १-२०७-४ (९१४५)
ये चान्नमिच्छन्ति ददस्व तेभ्यः
परिश्रिता ये परितो मनुष्याः ।

ततश्च शेषं प्रविभज्य शीघ्र-
मर्धं चतुर्णां मम चात्मनश्च ॥ १-२०७-५ (९१४६)
अर्धं तु भीमाय च देहि भद्रे
य एष नागर्षभतुल्यरूपः ।
गौरो युवा संहननोपपन्न
एषो हि वीरो बहुभुक् सदैव ॥ १-२०७-६ (९१४७)
सा हृष्टरूपैव तु राजपुत्री
तस्या वचः साध्वविशङ्कमाना ।
यथावदुक्तं प्रचकार साध्वी
ते चापि सर्वे बुभुजुस्तदन्नम् ॥ १-२०७-७ (९१४८)
कुशैस्तु भूमौ शयनं चकार
माद्रीपुत्रः सहदेवस्तपस्वी ।
अथात्मकीयान्यजिनानि सर्वे
संस्तीर्य वीराः सुषुपुर्धरण्याम् ॥ १-२०७-८ (९१४९)
अगस्त्यकान्तामभितो दिशं तु
शिरांसि तेषां कुरुसत्तमानाम् ।
कुन्ती पुरस्तात्तु बभूव तेषां
पादान्तरे चाथ बभूव कृष्णा ॥ १-२०७-९ (९१५०)
अशेत भूमौ सह पाण्डुपुत्रैः
पादोपधानीव कृता कुशेषु ।
न तत्र दुःखं मनसापि तस्या
न चावमेने कुरुपुङ्गवांस्तान् ॥ १-२०७-१० (९१५१)
ते तत्र शूराः कथयांबभूवुः
कथा विचित्राः पृतनाधिकाराः ।
अस्त्राणि दिव्यानि रथांश्च नागान्
खड्गान्गदाश्चापि परश्वधांश्च ॥ १-२०७-११ (९१५२)
तेषां कथास्ताः परिकीर्त्यमानाः
पाञ्चालराजस्य सुतस्तदानीम् ।
सुश्राव कृष्णां च तदा निषण्णां
ते चापि सर्वे ददृशुर्मनुष्याः ॥ १-२०७-१२ (९१५३)
धृष्टद्युम्नो राजपुत्रस्तु सर्वं
वृत्तं तेषां कथितं चैव रात्रौ ।
सर्वं राज्ञे द्रुपदायाखिलेन
निवेदयिष्यंस्त्वरितो जगाम ॥ १-२०७-१३ (९१५४)
पाञ्चालराजस्तु विषण्णरूप-
स्तान्पाण्डवानप्रतिविन्दमानः ।

धृष्टद्युम्नं पर्यपृच्छन्महात्मा
क्व सा गता केन नीता च कृष्णा ॥ १-२०७-१४ (९१५५)
कच्चिन्न शूद्रेण न हीनजेन
वैश्येन वा करदेनोपपन्ना ।
कच्चित्पदं मूर्ध्नि न पङ्कदिग्धं
कच्चिन्न माला पतिता श्मशाने ॥ १-२०७-१५ (९१५६)
कच्चित्स वर्णप्रवरो मनुष्य
उद्रिक्तवर्णोऽप्युत एव कच्चित् ।
कच्चिन्न वामो मम मूर्ध्नि पादः
कृष्णाभिमर्शेन कृतोऽद्य पुत्र ॥ १-२०७-१६ (९१५७)
कच्चिन्न तप्स्ये परमप्रतीतः
संयुज्य पार्थेन नरर्षभेण ।
वदस्व तत्त्वेन महानुभाव
कोऽसौ विजेता दुहितुर्ममाद्य ॥ १-२०७-१७ (९१५८)
विचित्रवीर्यस्य सुतस्य कच्चि-
त्कुरुप्रवीरस्य ध्रियन्ति पुत्राः ।
कच्चित्तु पार्थेन यवीयसाऽध्य
धनुर्गृहीतं निहतं च लक्ष्यम् ॥ ॥ १-२०७-१८ (९१५९)

इति श्रीमन्महाभारते आदिपर्वणि स्वयंवरपर्वणि
सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ ॥ समाप्तं स्वयंवरपर्व ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२०७-४ अग्रं प्रथममादाय बलिं कुरुष्व भिक्षां च देहि ॥
१-२०७-१८ ध्रेयन्ति जीवन्ति ॥
सप्ताधिकद्विशततमोऽध्यायः ॥
२०७ ॥

आदिपर्व - अध्याय २०८
॥ श्रीः ॥
१.२०८. अध्यायः २०८

(अथ वैवाहिकपर्व ॥ १३ ॥)
Mahabharata - Adi Parva - Chapter Topics
धृष्टद्युम्नवार्तां श्रुतवता द्रुपदेन तत्वविवित्सया पाण्डवान्प्रति
पुरोहितप्रेषणम् ॥ १ ॥

१-२०८-० (९१६०)
वैशम्पायन उवाच। १-२०८-०क्ष् (११५२)
ततस्तथोक्तः परिहृष्टरूपः
पित्रे शशंसाथ स राजपुत्रः ।
धृष्टद्युम्नः सोमकानां प्रबर्हो
वृत्तं यथा येन हृता च कृष्णा ॥ १-२०८-१ (९१६१)
धृष्टद्युम्न उवाच। १-२०८-२क्ष् (११५३)
योऽसौ युवा व्यायतलोहिताक्षः
कृष्णाजिनी देवसमानरूपः ।
यः कार्मुकाग्र्यं कृतवानधिज्यं
लक्षं च यः पातितवान्पृथिव्याम् ॥ १-२०८-२ (९१६२)
असज्जमानश्च ततस्तरस्वी
वृतो द्विजाग्र्यैरभिपूज्यमानः ।
चक्राम वज्रीव दितेः सुतेषु
सर्वैश्च देवैर्ऋषिभिश्च जुष्टः ॥ १-२०८-३ (९१६३)
कृष्मा प्रगृह्याजिनमन्वयात्तं
नागं यथा नागवधूः प्रहृष्टा ।
ग्श्यामो युवा वारणमत्तगामी
कृत्वा महत्कर्म सुदुष्करं तत् ॥ १-२०८-४ (९१६४)
यः सूतपुत्रेण चकार युद्धं
शङ्केऽर्जुनं तं त्रिदशेशवीर्यम्।'
अमृष्यमाणेषु नराधिपेषु
क्रुद्धेषु वै तत्र समापतत्सु ॥ १-२०८-५ (९१६५)
ततोऽपरः पार्थिवसङ्घमध्ये
प्रवृद्धमारुज्य महीप्ररोहम् ।
प्राकालयत्तेन स पार्थिवौघान्
भीमोऽन्तकः प्राणभृतो यथैव ॥ १-२०८-६ (९१६६)
तौ पार्थिवानां मिषतां नरेन्द्र
कृष्णामुपादाय गतौ नराग्र्यौ ।
ग्विक्षोभ्य विद्राव्य च पार्तिवांस्ता-
न्स्वतेजसा दुष्प्रतिवीक्ष्यरूपौ।'
विभ्राजमानाविव चन्द्रसूर्यौ
बाह्यां पुराद्भार्गवकर्मशालाम् ॥ १-२०८-७ (९१६७)
तत्रोपविष्टार्चिरिवानलस्य

तेषां जनित्रीति मम प्रतर्कः ।
तथाविधैरेव नरप्रवीरै-
रुपोपविष्टैस्त्रिबिरग्निकल्पैः ॥ १-२०८-८ (९१६८)
तस्यास्ततस्तावभिवाद्य पादा-
वुक्त्वा च कृष्णामभिवादयेति ।
स्थितौ च तत्रैव निवेद्य कृष्णां
भिक्षाप्रचाराय गता नराग्र्याः ॥ १-२०८-९ (९१६९)
तेषां तु भैक्षं प्रतिगृह्य कृष्णा
दत्वा बलिं ब्राह्मणसाच्च कृत्वा ।
तां चैव वृद्धां परिवेष्य तांश्च
नरप्रवीरान्स्वयमप्यभुङ्क्त ॥ १-२०८-१० (९१७०)
सुप्तास्तु ते पार्थिव सर्व एव
कृष्णा च तेषां चरणोपधाने ।
आसीत्पृथिव्यां शयनं च तेषां
दर्भाजिनाग्रास्तरणोपपन्नम् ॥ १-२०८-११ (९१७१)
ते नर्दमाना इव कालमेघाः
कथा विचित्राः कथयांबभूवुः ।
न वैश्यशूद्रौपयिकीः कथास्ता
न च द्विजानां कथयन्ति वीराः ॥ १-२०८-१२ (९१७२)
निःसंशयं क्षत्रियपुंगवास्ते
यथा हि युद्धं कथयन्ति राजन् ।
आशा हि नो व्यक्तमियं समृद्धा
मुक्तान्हि पार्थाञ्शृणुमोऽग्निदाहात् ॥ १-२०८-१३ (९१७३)
यथा हि लक्ष्यं निहतं धनुश्च
सज्यं कृतं तेन तथा प्रसह्य ।
यथा हि भाषन्ति परस्परं ते
छन्ना ध्रुवं ते प्रचरन्ति पार्थाः ॥१-२०८०१५क्ष् वैशम्पायन उवाच।
१-२०८-१४ (९१७४)
ततः स राजा द्रुपदः प्रहृष्टः
पुरोहितं प्रेषायामास तेषाम् ।
विद्याम युष्मानिति भाषमाणो
महात्मानः पाण्डुसुताः स्थ कच्चित् ॥ १-२०८-१५ (९१७५)
गृहीतवाक्यो नृपतेः पुरोधा
गत्वा प्रशंसामभिधाय तेषाम् ।
वाक्यं समग्रं नृपतेर्यथाव-
दुवाच चानुक्रमविक्रमेण ॥ १-२०८-१६ (९१७६)

विज्ञातुमिच्छत्यवनीश्वरो वः
पाञ्चालराजो वरदो वरार्हाः ।
लक्ष्यस्य वेद्धारमिमं हि दृष्ट्वा
हर्षस्य नान्तं प्रतिपद्यते सः ॥ १-२०८-१७ (९१७७)
आख्यात च ज्ञातिकुलानुपूर्वी
पदं शिरःसु द्विषतां कुरुध्वम् ।
प्रह्लादयध्वं हृदयं ममेदं
पाञ्चालराजस्य च सानुगस्य ॥ १-२०८-१८ (९१७८)
पाण्डुर्हि राजा द्रुपदस्य राज्ञः
प्रियः सखा चात्मसमो बभूव ।
तस्यैष कामो दुहिता ममेयं
स्नुषा यदि स्यादिह कौरवस्य ॥ १-२०८-१९ (९१७९)
अयं हि कामो द्रुपदस्य राज्ञो
हृदि स्थितो नित्यमनिन्दिताङ्गाः ।
यदर्जुनो वै पृथुदीर्घबाहु-
र्धर्मेण विन्देत सुतां ममैताम् ॥ १-२०८-२० (९१८०)
कृतं हि तत्स्यात्सुकृतं ममेदं
यशश्च पुण्यं च हितं तदेतत् ।
अथोक्तवाक्यं हि पुरोहितं स्थितं
ततो विनीतं समुदीक्ष्य राजा ॥ १-२०८-२१ (९१८१)
समीपतो भीममिदं शशास
प्रदीयतां पाद्यमर्घ्यं तथाऽस्मै ।
मान्यः पुरोधा द्रुपदस्य राज्ञ-
स्तस्मै प्रयोज्याऽभ्यधिका हि पूजा ॥ १-२०८-२२ (९१८२)
वैशम्पायन उवाच। १-२०८-२३क्ष् (११५४)
भीमस्ततस्तत्कृतवान्नरेन्द्र
तां चैव पूजां प्रतिगृह्य हर्षात् ।
सुखोपविष्टं तु पुरोहितं तदा
युधिष्ठिरो ब्राह्मणमित्युवाच ॥ १-२०८-२३ (९१८३)
पाञ्चालराजेन सुता निसृष्टा
स्वधर्मदृष्टेन यथा न कामात् ।
प्रदिष्टशुल्का द्रुपदेन राज्ञा
सा तेन वीरेण तथाऽनुवृत्ता ॥ १-२०८-२४ (९१८४)
न तत्र वर्णेषु कृता विवक्षा
न चापि शीले न कुले न गोत्रे ।
कृतेन सज्येन हि कार्मुकेण

विद्धेन लक्ष्येण हि सा विसृष्टा ॥ १-२०८-२५ (९१८५)
सेयं तथाऽनेन महात्मनेह
कृष्णा जिता पार्थिवसङ्घमध्ये ।
नैवं गते सौमकिरद्य राजा
सन्तापमर्हत्यसुखाय कर्तुम् ॥ १-२०८-२६ (९१८६)
कामश्च योऽसौ द्रुपदस्य राज्ञः
स चापि संपत्स्यति पार्थिवस्य ।
संप्राप्यरूपां हि नरेन्द्रकन्या-
मिमामहं ब्राह्मण साधु मन्ये ॥ १-२०८-२७ (९१८७)
न तद्धनुर्मन्दबलेन शक्यं
मौर्व्या समायोजयितुं तथाहि ।
न चाकृतास्त्रेण न हीनजेन
लक्ष्यं तथा पातयितुं हि शक्यम् ॥ १-२०८-२८ (९१८८)
तस्मान्न तापं दुहितुर्निमित्तं
पाञ्चालराजोऽर्हति कर्तुमद्य ।
न चापि तत्पातनमन्यथेह
कर्तुं हि शक्यं भुवि मानवेन ॥ १-२०८-२९ (९१८९)
एवं ब्रुवत्येव युधिष्ठिरे तु
पाञ्चालराजस्य समीपतोऽन्यः ।
तत्राजगामाशु नरो द्वितीयो
निवेदयिष्यन्निह सिद्धमन्नम् ॥ ॥ १-२०८-३० (९१९०)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
अष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२०८-२७ संप्राप्यरूपासस्माकं योग्यरूपम् ॥
अष्टाधिकद्विशततमोऽध्यायः ॥
२०८ ॥

आदिपर्व - अध्याय २०९
॥ श्रीः ॥
१.२०९. अध्यायः २०९

Mahabharata - Adi Parva - Chapter Topics
कुन्त्या सह पाण्डवानां द्रुपदगृहगमनम् ॥ १ ॥
परीक्षणार्थं द्रुपदेन अनेकविधवस्तूपहरणम् ॥ २ ॥

द्रौपद्या सह कुन्त्या अन्तःपुरप्रवेशः ॥ ३ ॥
भोजनानन्तरं पाण्डवानां साङ्ग्रामिकवस्तुपूर्णप्रदेशे प्रवेशः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२०९-० (९१९१)
दूत उवाच। १-२०९-०क्ष् (११५५)
जन्यार्थमन्नं द्रुपदेन राज्ञा
विवाहहेतोरुपसंस्कृतं च ।
तदाप्नुवध्वं कृतसर्वकार्याः
कृष्णा च तत्रैतु चिरं न कार्यम् ॥ १-२०९-१ (९१९२)
इमे रथाः काञ्चनपद्मचित्राः
सदश्वयुक्ता वसुधाधिपार्हाः ।
एतान्समारुह्य परैत सर्वे
पाञ्चालराजस्य निवेशनं तत् ॥ १-२०९-२ (९१९३)
वैशम्पायन उवाच। १-२०९-३क्ष् (११५६)
ततः प्रयाताः कुरुपुंगवास्ते
पुरोहितं तं परियाप्य सर्वे ।
आस्थाय यानानि महान्ति तानि
कुन्ती च कृष्णा च सहैकयाने ॥ १-२०९-३ (९१९४)
ग्स्त्रीभिः सुगन्धाम्बरमाल्यदानै-
र्विभूषिता आभरणैर्विचित्रैः ।
माङ्गल्यगीतध्वनिवाद्यघोषै-
र्मनोहरैः पुण्यकृतां वरिष्ठैः ॥ १-२०९-४ (९१९५)
संगीयमानाः प्रययुः प्रहृष्टा
दीपैर्ज्वलद्भिः सहिताश्च विप्रैः ॥ १-२०९-५ (९१९६)
स वै तथोक्तस्तु युधिष्ठिरेण
पाञ्चालराजस्य पुरोहितोऽग्र्यः ।
सर्वं यथोक्तं कुरुनन्दनेन
निवेदयामास नृपाय गत्वा ॥' १-२०९-६ (९१९७)
श्रुत्वा तु वाक्यानि पुरोहितस्य
यान्युक्तवान्भारत धर्मराजः ।
जिज्ञासयैवाथ कुरूत्तमानां
द्रव्याण्यनेकान्युपसंजहार ॥ १-२०९-७ (९१९८)
फलानि माल्यानि च संस्कृतानि
वर्माणि चर्माणि तथाऽऽसनानि ।

गाश्चैव राजन्नथ चैव रज्जू-
र्बीजानि चान्यानि कृषीनिमित्तम् ॥ १-२०९-८ (९१९९)
अन्येषु शिल्पेषु च यान्यपि स्युः
सर्वाणि कृत्यान्यखिलेन तत्र ।
क्रीडानिमित्तान्यपि यानि तत्र
सर्वाणि तत्रोपजहार राजा ॥ १-२०९-९ (९२००)
वर्माणि चर्माणि च भानुमन्ति
खड्गा महान्तोऽश्वरथाश्च चित्राः ।
धनूंषि चाग्र्याणि शराश्च चित्राः
शक्त्यृष्टयः काञ्चनभूषणाश्च ॥ १-२०९-१० (९२०१)
प्रासा भुशुण्ड्यश्च परश्वधाश्च
सांग्रामिकं चैव तथैव सर्वम् ।
शय्यासनान्युत्तमवस्तुवन्ति
तथैव वासो विविधं च तत्र ॥ १-२०९-११ (९२०२)
कुन्ती तु कृष्णां परिगृह्य साध्वी-
मन्तःपुरं द्रुपदस्याविवेश ।
स्त्रियश्च तां कौरवराजपत्नीं
प्रत्यर्चयामासुरदीनसत्वाः ॥ १-२०९-१२ (९२०३)
तान्सिंहविक्रान्तगतीन्निरीक्ष्य
महर्षभाक्षानजिनोत्तरीयान् ।
गूढोत्तरांसान्भुजगेन्द्रभोग-
प्रलम्बबाहून्पुरुषप्रवीरान् ॥ १-२०९-१३ (९२०४)
राजा च राज्ञः सचिवाश्च सर्वे
पुत्राश्च राज्ञः सुहृदस्तथैव ।
प्रेष्याश्च सर्वे निखिलेन राज-
न्हर्षं समापेतुरतीव तत्र ॥ १-२०९-१४ (९२०५)
ते तत्र वीराः परमासनेषु
सपादपीठेष्वविशङ्कमानाः ।
यथानुपूर्व्याद्विविशुर्नराग्र्या-
स्तथा महार्हेषु न विस्मयन्तः ॥ १-२०९-१५ (९२०६)
उच्चावचं पार्थिवभोजनीयं
पात्रीषु जाम्बूनदराजतीषु ।
दासाश्च दास्यश्च सुमृष्टवेषाः
संभोजकाश्चाप्युपजह्रुरन्नम् ॥ १-२०९-१६ (९२०७)
ते तत्र भुक्त्वा पुरुषप्रवीरा
यथात्मकामं सुभृशं प्रतीताः ।

उत्क्रम्य सर्वाणि वसूनि राज-
न्सांग्रामिकं ते विविशुर्नृवीराः ॥ १-२०९-१७ (९२०८)
तल्लक्षयित्वा द्रुपदस्य पुत्रा
राजा च सर्वैः सह मन्त्रिमुख्यैः ।
समर्थयामासुरुपेत्य हृष्टाः
कुन्तीसुतान्पार्थिवराजपुत्रान् ॥ ॥ १-२०९-१८ (९२०९)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२०९-१ जन्यार्थं वरपक्षीयजतार्थं ॥
१-२०९-३ परियाप्य प्रस्थाप्य ॥
१-२०९-९ कृन्तन्तीति कृत्यानि वास्यादीनि ॥
१-२०९-११ वस्तुवन्ति मतोर्मस्य वत्वमार्षम् ॥
१-२०९-१३ गूढोत्तरांसान्गूढजत्रून् गूढोन्नतांसान् इति ङ । पाठः ॥
नवाधिकद्विशततमोऽध्यायः ॥
२०९ ॥

आदिपर्व - अध्याय २१०
॥ श्रीः ॥
१.२१०. अध्यायः २१०

Mahabharata - Adi Parva - Chapter Topics
द्रुपदप्रश्नानन्तरं युधिष्ठिरेण स्वेषां पाण्डवत्वकथनम् ॥ १ ॥
द्रौपद्याः पञ्चपत्नीत्वे द्रुपदस्य विवादः ॥ २ ॥
व्यासागमनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१०-० (९२१०)
वैशम्पायन उवाच। १-२१०-०क्ष् (११५७)
तत आहूय पाञ्चाल्यो राजपुत्रं युधिष्ठिरम् ।
परिग्रहेण ब्राह्मेण परिगृह्य महाद्युतिः ॥ १-२१०-१ (९२११)
पर्यपृच्छददीनात्मा कुन्तीपुत्रं सुवर्चसम् ।
कथं जानीम भवतः क्षत्रियान्ब्राह्मणानुत ॥ १-२१०-२ (९२१२)
वैश्यान्वा गुणसंपन्नानथ वा शूद्रयोनिजान् ।

मायामास्थाय वा सिद्धांश्चरतः सर्वतोदिशम् ॥ १-२१०-३ (९२१३)
कृष्णाहेतोरनुप्राप्ता देवाः संदर्शनार्थिनः ।
ब्रवीतु नो भवान्सत्यं सन्देहो ह्यत्र नो महान् ॥ १-२१०-४ (९२१४)
अपि नः संशयस्यान्ते मनः संतुष्टिमावहेत् ।
अपि नो भागधेयानि शुभानि स्युः परन्तप ॥ १-२१०-५ (९२१५)
इच्छया ब्रूहि तत्सत्यं सत्यं राजसु शोभते ।
इष्टापूर्तेन च तथा वक्तव्यमनृतं न तु ॥ १-२१०-६ (९२१६)
श्रुत्वा ह्यमरसङ्काश तव वाक्यमरिंदम ।
ध्रुवं विवाहकरणमास्थास्यामि विधानतः ॥ १-२१०-७ (९२१७)
युधिष्ठिर उवाच। १-२१०-८क्ष् (११५८)
मा राजन्विमना भूस्त्वं पाञ्चाल्य प्रीतिरस्तु ते ।
ईप्सितस्ते ध्रुवः कामः संवृत्तोऽयमसंशयम् ॥ १-२१०-८ (९२१८)
वयं हि क्षत्रिया राजन्पाण्डोः पुत्रा महात्मनः ।
ज्येष्ठं मां विद्धि कौन्तेयं भीमसेनार्जुनाविमौ ॥ १-२१०-९ (९२१९)
आभ्यां तव सुता राजन्निर्जिता राजसंसदि ।
यमौ च तत्र कुन्ती च यत्र कृष्मा व्यवस्थिता ॥ १-२१०-१० (९२२०)
व्येतु ते मानसं दुःखं क्षत्रियाः स्मो नरर्षभ ।
पद्मिनीव सुतेयं ते ह्रदादन्यह्रदं गता ॥ १-२१०-११ (९२२१)
इति तथ्यं महाराज सर्वमेतद्ब्रवीमि ते ।
भवान्हि गुरुरस्माकं परमं च परायणम् ॥ १-२१०-१२ (९२२२)
वैशम्पायन उवाच। १-२१०-१३क्ष् (११५९)
ततः स द्रुपदो राजा हर्षव्याकुललोचनः ।
प्रतिवक्तुं मुदा युक्तो नाशकत्तं युधिष्ठिरम् ॥ १-२१०-१३ (९२२३)
यत्नेन तु स तं हर्षं सन्निगृह्य परंतपः ।
अनुरूपं तदा वाचा प्रत्युवाच युधिष्ठिरम् ॥ १-२१०-१४ (९२२४)
पप्रच्छ चैनं धर्मात्मा यथा ते प्रद्रुताः पुरात् ।
स तस्मै सर्वमाचख्यावानुपूर्व्येण पाण्डवः ॥ १-२१०-१५ (९२२५)
तच्छ्रुत्वा द्रुपदो राजा कुन्तीपुत्रस्य भाषितम् ।
विगर्हयामास तदा धृतराष्ट्रं नरेश्वरम् ॥ १-२१०-१६ (९२२६)
आश्वासयामास च तं कुन्तीपुत्रं युधिष्ठिरम् ।
प्रतिजज्ञे च राज्याय द्रुपदो वदतां वरः ॥ १-२१०-१७ (९२२७)
ततः कुन्ती च कृष्णा च भीमसेनार्जुनावपि ।
यमौ च राज्ञा संदिष्टं विविशुर्भवनं महत् ॥ १-२१०-१८ (९२२८)
तत्र ते न्यवसन्राजन्यज्ञसेनेन पूजिताः ।
प्रत्याश्वस्तस्ततो राजा सह पुत्रैरुवाच तम् ॥ १-२१०-१९ (९२२९)
गृह्णातु विधिवत्पाणिमद्यायं कुरुनन्दनः ।

पुण्येऽहनि महाबाहुरर्जुनः कुरुतां क्षणम् ॥ १-२१०-२० (९२३०)
वैशम्पायन उवाच। १-२१०-२१क्ष् (११६०)
तमब्रवीत्ततो राजा धर्मात्मा च युधिष्ठिरः ।
ग्ममापि दारसंबन्धः कार्यस्तावद्विशांपते ॥ १-२१०-२१ (९२३१)
तस्मात्पूर्वं मया कार्यं तद्भवाननुमन्यताम्।' १-२१०-२२ (९२३२)
द्रुपद उवाच ।
भवान्वा विधिवत्पाणिं गृह्णातु दुहितुर्मम ।
यस्य वा मन्यसे वीर तस्य कृष्णामुपादिश ॥ १-२१०-२२क्ष् (११६१)
युधिष्ठिर उवाच। १-२१०-२३क्ष् (११६२)
सर्वेषां महिषी राजन्द्रौपदी नो भविष्यति ।
एवं प्रव्याहृतं पूर्वं मम मात्रा विशांपते ॥ १-२१०-२३ (९२३३)
अहं चाप्यनिविष्टो वै भीमसेनश्च पाण्डवः ।
पार्थेन विजिता चैषा रत्नभूता सुता तव ॥ १-२१०-२४ (९२३४)
एष नः समयो राजँल्लब्धस्य सह भोजनम् ।
न च तं हातुमिच्छामः समयं राजसत्तम ॥ १-२१०-२५ (९२३५)
ग्अक्रमेण निवेशे च धर्मलोपो महान्भवेत्।'
सर्वेषां धर्मतः कृष्णा महिषी नो भविष्यति ।
आनुपूर्व्येण सर्वेषां गृह्णातु ज्वलने करान् ॥ १-२१०-२६ (९२३६)
द्रुपद उवाच। १-२१०-२७क्ष् (११६३)
एकस्य बह्व्यो विहिता महिष्यः कुरुनन्दन ।
नैकस्या बहवः पुंसः श्रूयन्ते पतयः क्वचित् ॥ १-२१०-२७ (९२३७)
ग्सोऽयं न लोके वेदे वा जातु धर्मः प्रशस्ते।'
लोकवेदविरुद्धं त्वं नाधर्मं धर्मविच्छुचिः ।
कर्तुमर्हसि कौन्तेय कस्मात्ते बुद्धिरीदृशी ॥ १-२१०-२८ (९२३८)
युधिष्ठिर उवाच। १-२१०-२९क्ष् (११६४)
सूक्ष्मो धर्मो महाराज नास्य विद्मो वयं गतिम् ।
पूर्वेषामानुपूर्व्येण यातं वर्त्माऽनुयामहे ॥ १-२१०-२९ (९२३९)
न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
एवं चैव वदत्यम्बा मम चैतन्मनोगतम् ॥ १-२१०-३० (९२४०)
ग्आश्रमे रुद्रनिर्दिष्टाद्व्यासादेतन्मया श्रुतम्।'
एष धर्मो ध्रुवो राजंश्चरैनमविचारयन् ।
मा च शङ्का तत्र ते स्यात्कथंचिदपि पार्थिव ॥ १-२१०-३१ (९२४१)
द्रुपद उवाच। १-२१०-३२क्ष् (११६५)
त्वं च कुन्ती च कौन्तय धृष्टद्युम्नश्च मे सुतः ।
कथयन्त्विति कर्तव्यं श्वः काल्ये करवामहे ॥ १-२१०-३२ (९२४२)
वैशम्पायन उवाच। १-२१०-३३क्ष् (११६६)

ते समेत्य ततः सर्वे कथयन्ति स्म भारत ।
अथ द्वैपायनो राजन्नभ्यागच्छद्यदृच्छया ॥ ॥ १-२१०-३३ (९२४३)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१०-१ ब्राह्मेण ब्राह्मणार्थणुचितेनाभ्युत्थानादिना परिग्रहेण आतिथ्येन ॥
१-२१०-६ इष्टापूर्तेन हेतुना । अनृतं न वक्तव्यमिति। अनृतभाषणे
इष्टापूर्ते नश्येतामित्यर्थः ॥
१-२१०-२० क्षणं देवपूजाद्युत्सवम् ॥
१-२१०-२४ अनिविष्टः अकृतविवाहः ॥
१-२१०-२५ समयो नियमः ॥
१-२१०-२६ ज्वलने ज्वलनसमीपे ॥
१-२१०-२७ पुंसः पुमां सः ॥
१-२१०-२९ यूयं च वयं च वयं । पूर्वेषां
प्रचेतःप्रभृतीनाम्। तैर्यातं वर्त्म
बहूनामेकपत्नीत्वमनुयामहे। तच्च आनुपूर्व्येणैव न त्वक्रमेण ॥
दशाधिकद्विशततमोऽध्यायः ॥
२१० ॥

आदिपर्व - अध्याय २११
॥ श्रीः ॥
१.२११. अध्यायः २११

Mahabharata - Adi Parva - Chapter Topics
एकस्याः बहुभार्यात्वे शङ्कमानान्द्रुपदादीन्प्रति व्यासेन
स्वस्वाभिप्रायकथनानुज्ञा ॥ १ ॥
द्रुपदादिभिः स्वस्वमते कथिते व्यासेनास्य विवाहस्य धर्म्यत्वकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२११-० (९२४४)
वैशम्पायन उवाच। १-२११-०क्ष् (११६७)
ततस्ते पाण्डवाः सर्वे पाञ्चाल्यश्च महायशाः ।
प्रत्युथाय महात्मानं कृष्णं सर्वेऽभ्यवादयन् ॥ १-२११-१ (९२४५)
प्रतिनन्द्य स तां पूजां पृष्ट्वा कुशलमन्ततः ।

आसने काञ्चने शुद्धे निषसाद महामनाः ॥ १-२११-२ (९२४६)
अनुज्ञातास्तु ते सर्वे कृष्णेनामिततेजसा ।
आसनेषु महार्हेषु निषेदुर्द्विपदां वराः ॥ १-२११-३ (९२४७)
ततो मुहूर्तान्मधुरां वाणीमुच्चार्य पार्षतः ।
पप्रच्छ तं महात्मानं द्रौपद्यर्थे विशांपते ॥ १-२११-४ (९२४८)
कथमेका बहूनां स्यान्न च स्याद्धर्मसंकरः ।
एतन्मे भगवान्सर्वं प्रब्रवीतु यथातथम् ॥ १-२११-५ (९२४९)
व्यास उवाच। १-२११-६क्ष् (११६८)
अस्मिन्धर्मे विप्रलब्धे लोकवेदविरोधके ।
यस्य यस्य मतं यद्यच्छ्रोतुमिच्छामि तस्य तत् ॥ १-२११-६ (९२५०)
द्रुपद उवाच। १-२११-७क्ष् (११६९)
अधर्मोऽयं मम मतो विरुद्धो लोकवेदयोः ।
न ह्येका विद्यते पत्नी बहूनां द्विजसत्तम ॥ १-२११-७ (९२५१)
न चाप्याचरितः पूर्वैरयं धर्मो महात्मभिः ।
न चाप्यधर्मो विद्वद्भिश्चरितव्यः कथंचन ॥ १-२११-८ (९२५२)
ततोऽहं न करोम्येनं व्यवसायं क्रियां प्रति ।
धर्मः सदैव संदिग्धः प्रतिभाति हि मे त्वयम् ॥ १-२११-९ (९२५३)
धृष्टद्युम्न उवाच। १-२११-१०क्ष् (११७०)
यवीयसः कथं भार्यां ज्येष्ठो भ्राता द्विजर्षभ ।
ब्रह्मन्समभिवर्तेत सद्वृत्तः संस्तपोधन ॥ १-२११-१० (९२५४)
न तु धर्मस्य सूक्ष्मत्वाद्गतिं विद्मः कथंचन ।
अधर्मो धर्म इति वा व्यवसायो न शक्यते ॥ १-२११-११ (९२५५)
कर्तुमस्मद्विधैर्ब्रह्मंस्ततोऽयं न व्यवस्यते ।
पञ्चानां महिषी कृष्णा भवत्विति कथंचन ॥ १-२११-१२ (९२५६)
युधिष्ठिर उवाच। १-२११-१३क्ष् (११७१)
न मे वागनृतं प्राह नाधर्मे धीयते मतिः ।
वर्तते हि मनो मेऽत्र नैषोऽधर्मः कथंचन ॥ १-२११-१३ (९२५७)
श्रूयते हि पुराणेऽपि जटिला नाम गौतमी ।
ऋषीनध्यासितवती सप्त धर्मभृतां वरा ॥ १-२११-१४ (९२५८)
तथैव मुनिजा वार्क्षी तपोभिर्भावितात्मनः ।
संगताभूद्दश भ्रातॄनकेनम्नः प्रचेतसः ॥ १-२११-१५ (९२५९)
गुरोर्हि वचनं प्राहुर्धर्म्यं धर्मज्ञसत्तम ।
गुरूणां चैव सर्वेषां माता परमको गुरुः ॥ १-२११-१६ (९२६०)
सा चाप्युक्तवती वाचं भैक्षवद्भुज्यतामिति ।
तस्मादेतदहं मन्ये परं धर्मं द्विजोत्तम ॥ १-२११-१७ (९२६१)
कुन्त्युवाच। १-२११-१८क्ष् (११७२)

एतमेतद्यथा प्राह धर्मचारी युधिष्ठिरः ।
भुज्यतां भ्रातृभिः सार्धमित्यर्जुनमचोदयम् ।
अनृतान्मे भयं तीव्रं मुच्येऽहमनृतात्कथम् ॥ १-२११-१८ (९२६२)
व्यास उवाच। १-२११-१९क्ष् (११७३)
अनृतान्मोक्ष्यसे भद्रे धर्मश्चैव सनातनः ।
ननु वक्ष्यामि सर्वेषां पाञ्चाल शृणु मे स्वयम् ॥ १-२११-१९ (९२६३)
यथाऽयं विहितो धर्मो यतश्चायं सनातनः ।
यथा च प्राह कौन्तेयस्तथा धर्मो न संशयः ॥ १-२११-२० (९२६४)
वैशम्पायन उवाच। १-२११-२१क्ष् (११७४)
तत उत्थाय भगवान्व्यासो द्वैपायनः प्रभुः ।
करे गृहीत्वा राजानं राजवेश्म समाविशत् ॥ १-२११-२१ (९२६५)
पाण्डवाश्चापि कुन्ती च धृष्टद्युम्नश्च पार्षतः ।
विविशुस्तेऽपि तत्रैव प्रतीक्षन्ते स्म तावुभौ ॥ १-२११-२२ (९२६६)
ततो द्वैपायनस्तस्मै नरेन्द्राय महात्मने ।
आचख्यौ तद्यथा धर्मो बहूनामेकपत्निता ॥ १-२११-२३ (९२६७)
ग्यथा च ते ददुश्चैव राजपुत्र्याः पुरा वरम् ।
धर्माद्यास्तपसा तुष्टाः पञ्चपत्नीत्वमीश्वराः ॥' ॥ १-२११-२४ (९२६८)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
एकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

आदिपर्व - अध्याय २१२
॥ श्रीः ॥
१.२१२. अध्यायः २१२

Mahabharata - Adi Parva - Chapter Topics
इन्द्रसेनापरनाम्न्या नालायन्या उपाख्यानारम्भः-नालायन्या स्थविरस्य पत्युर्मौद्गल्यस्य आराधनम् ॥ १ ॥
तुष्टेन मौद्गल्येन नालायनीप्रार्थनयाऽऽत्मनः पञ्चरूपस्वीकारेण तस्यां रमणम् ॥ २ ॥
तयोः स्वर्गादिलोकेषु नानारूपेण रमणम् ॥ ३ ॥
सैव नालायनी तव दुहिता जातेति द्रुपदं प्रति व्यासस्योक्तिः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१२-० (९२६९)
व्यास उवाच। १-२१२-०क्ष् (११७५)

मा भूद्राजंस्तव तापो मनस्थः
पञ्चानां भार्या दुहिता ममेति ।
मातुरेषा प्रार्थिता स्यात्तदानीं
पञ्चानां भार्या दुहिता ममेति ॥ १-२१२-१ (९२७०)
याजोपयाजौ धर्मरतौ तपोभ्यां
तौ चक्रतुः पञ्चपतित्वमस्याः ।
तत्पञ्चभिः पाण्डुसुतैरवाप्ता
भार्या कृष्णा मोदतां वै कुलं ते ॥ १-२१२-२ (९२७१)
लोके नान्यो विद्यते त्वद्विशिष्टः
सर्वारीणामप्रधृष्योऽसि राजन् ।
भूयस्त्विदं शृणु मे त्वं विशोको
यथाऽऽगतं पञ्चपत्नीत्वमस्याः ॥ १-२१२-३ (९२७२)
एषा नालायनी पूर्वं मौद्गल्यं स्थविरं पतिम् ।
आराधयामास तदा कुष्ठिनं तमनिन्दिता ॥१-२१२-४ (९२७३)
त्वगस्थिभूतं कटुकं लोलमीर्ष्युं सुकोपनम् ।
सुगन्धेतरगन्धाढ्यं वलीपलितमूर्धजम् ॥१-२१२-५ (९२७४)
स्थविरं विकृताकारं शीर्यमाणनखत्वचम् ।
उच्छिष्टमुपभुञ्जाना पर्युपास्ते महामुनिम् ॥१-२१२-६ (९२७५)
ततः कदाचिदङ्गुष्ठो भुञ्जानस्य व्यशीर्यत ।
अन्नादुद्धृत्य तच्चान्नमुपभुङ्क्तेऽविशङ्किता ॥१-२१२-७ (९२७६)
तेन तस्याः प्रसन्नेन कामव्याहारिणा तदा ।
वरं वृणीष्वेत्यसकृदुक्ता वव्रे वरं तदा ॥१-२१२-८ (९२७७)
मौद्गल्य उवाच। १-२१२-९क्ष् (११७६)
नाहं वृद्धो न कटुको नेर्ष्यावान्नैव कोपनः ।
न च दुर्गन्धवदनो न कृशो न च लोलुपः ॥१-२१२-९ (९२७८)
कथं त्वां रमयामीह कथं त्वां वासयाम्यहम् ।
वद कल्याणि भद्रं ते यथा त्वं मनसेच्छसि ॥१-२१२-१० (९२७९)
व्यास उवाच। १-२१२-११क्ष् (११७७)
सा तमक्लिष्टकर्माणं वरदं सर्वकामदम् ।
भर्तारमनवद्याङ्गी प्रसन्नं प्रत्युवाच ह ॥१-२१२-११ (९२८०)
नालायन्युवाच। १-२१२-१२क्ष् (११७८)
पञ्चधा प्रविभक्तात्मा भगवांल्लोकविश्रुतः ।
रमय त्वमचिन्त्यात्मन्पुनश्चैकत्वमागतः ॥१-२१२-१२ (९२८१)
तां तथेत्यब्रवीद्धीमान्महर्षिर्वै महातपाः ।
स पञ्चधा तु भूत्वा तां रमयामास सर्वतः ॥१-२१२-१३ (९२८२)
नालायनीं सुकेशान्तां मौद्गल्यश्चारुहासिनीम् ।

आश्रमेष्वधिकं चापि पूज्यमानो महर्षिभिः ॥ १-२१२-१४ (९२८३)
स चचार यथाकामं कामरूपवपुः पुनः ।
यदा ययौ दिवं चापि तत्र देवर्षिभिः सह ॥ १-२१२-१५ (९२८४)
चचार सोऽमृताहारः सुरलोके चचार ह ।
पूज्यमानस्तथा शच्या शक्रस्य भवनेष्वपि ॥ १-२१२-१६ (९२८५)
महेन्द्रसेनया सार्धं पर्यधावद्रिरंसया ।
सूर्यस्य च रथं दिव्यमारुह्य भगवान्प्रभुः ॥ १-२१२-१७ (९२८६)
पर्युपेत्य पुनर्मेरु मेरौ वासमरोचयत् ।
आकाशगङ्गामाप्लुत्य तया सह तपोधनः ॥ १-२१२-१८ (९२८७)
रश्मिजालेषु चन्द्रस्य उवाच च यथाऽनिलः ।
गिरिरूपधरो योगी स महर्षिस्तदा पुनः ॥ १-२१२-१९ (९२८८)
तत्प्रभावेन सा तस्य मध्ये जज्ञे महानदी ।
यदा पुष्पाकुलः सालः संजज्ञे भगवानृषिः ॥ १-२१२-२० (९२८९)
लतात्वमनुसंपेदे तमेवाभ्यनुवेष्टती ।
पुपोष च वपुर्यस्य तस्य तस्यानुगं पुनः ॥ १-२१२-२१ (९२९०)
सा पुपोष समं भर्त्रा स्कन्धेनापि चचार ह ।
ततस्तस्य च तस्याश्च तुल्या प्रीतिरवर्धत ॥ १-२१२-२२ (९२९१)
तथा सा भगवांस्तस्याः प्रसादादृषिसत्तमः ।
विरराम च सा चैव दैवयोगेन भामिनी ॥ १-२१२-२३ (९२९२)
स च तां तपसा देवीं रमयामास योगतः ।
एकपत्नी तथा भूत्वा सदैवाग्रे यशस्विनी ॥ १-२१२-२४ (९२९३)
अरुन्धतीव सीतेव बभूवातिपतिव्रता ।
दमयन्त्याश्च मातुः स विशेषमधिकं ययौ ॥ १-२१२-२५ (९२९४)
एतत्तथ्यं महाराज मा ते भूद्बुद्धिरन्यथा ।
सा वै नालायनी जज्ञे दैवयोगेन केनचित् ॥ १-२१२-२६ (९२९५)
राजंस्तवात्मजा कृष्णा वेद्यां तेजस्विनी शुभा ।
तस्मिंस्तस्या मनः सक्तं न चचाल कदाचन ॥ १-२१२-२७ (९२९६)
तथा प्रणिहितो ह्यात्मा तस्यास्तस्मिन्द्विजोत्तमे ॥ ॥ १-२१२-२८ (९२९७)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२१२-१ मातुः मात्रा । स्यात् अभूत् ॥
१-२१२-१० कथं केन प्रकारेण ॥
१-२१२-२२ स्कन्धेन मानुषादिदेहेन ॥

द्वादशाधिकद्विशततमोऽध्यायः ॥
२१२ ॥

आदिपर्व - अध्याय २१३
॥ श्रीः ॥
१.२१३. अध्यायः २१३

Mahabharata - Adi Parva - Chapter Topics
कथं नालायनी मत्पुत्री जातेति व्यासं प्रति द्रुपदस्य प्रश्नः ॥ १ ॥
पुनर्नालायनीकथाकथनं ॥ २ ॥
कामोपभोगविरक्तेन मौद्गल्येन कामातृप्तायाः नालादन्याः पञ्चपतित्वशापः ॥ ३ ॥
नालायन्या रुद्रमुद्दिश्य तपःकरणम् ॥ ४ ॥
नालयन्या पतिं देहीति पञ्चकृत्वः प्रार्थितेन रुद्रेण अन्यजन्मनि पञ्च ते पतयो भविष्यन्तीति वरदानम् ॥ ५ ॥
पुनः रुद्रात नि कौत्पवरप्राप्तिः ॥ ६ ॥
त्वयि गङ्गाजलस्थायां तत्रागमिष्यन्तमिन्द्रमानयेति नालायनींप्रति रुद्रस्याज्ञापनम् ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१३-० (९२९८)
द्रुपद उवाच। १-२१३-०क्ष् (११७९)
ब्रूहि तत्कारणं येन ब्रह्मन्नालायनी शुभा ।
जाता ममाध्वरे कृष्मा सर्ववेदविदां वर ॥ १-२१३-१ (९२९९)
व्यास उवाच। १-२१३-२क्ष् (११८०)
शृणु राजन्यथा ह्यस्या दत्तो रुद्रेण वै वरः ।
यदर्थं चैव संभूता तव गेहे यशस्विनी ॥ १-२१३-२ (९३००)
हन्त त कथयिष्यामि कृष्मायाः पौर्वदेहिकम् ।
इन्द्रसेनेति विख्याता पुरा नालायनी शुभा ॥ १-२१३-३ (९३०१)
मौद्गल्यस्य पतिमासाद्य चचार विगतज्वरा ।
मौद्गल्यस्य महर्षेश्च रममाणस्य वै तया ॥ १-२१३-४ (९३०२)
संवत्सरगणा राजन्व्यतीयुः क्षणवत्तदा ।
ततः कदाचिद्धर्मात्मा तृप्तः कामैर्व्यरज्यत ॥ १-२१३-५ (९३०३)
अन्विच्छन्परमं धर्मं ब्रह्मयोगपरोऽभवत् ।
उत्ससर्ज स तां विप्रः सा तदा चापतद्भुवि ।
मौद्गल्यो राजशार्दूल तपोभिर्भावितः सदा ॥ १-२१३-६ (९३०४)

नालायन्युवाच। १-२१३-७क्ष् (११८१)
प्रसीद भगवन्मह्यं न मामुत्स्रष्टुमर्हसि ।
अवितृप्तास्मि ब्रह्मर्षे कामानां कामसेवनात् ॥ १-२१३-७ (९३०५)
मौद्गल्य उवाच। १-२१३-८क्ष् (११८२)
यस्मात्त्वं मामनिःशङ्का ह्यवक्तव्यं भाषसे ।
आचरन्ती तपोविघ्नं तस्माच्छृणु वचो मम ॥ १-२१३-८ (९३०६)
भविष्यसि नृलोके त्वं राजपुत्री यशस्वि ।
पाञ्चालराजस्य सुता द्रुपदस्य महात्मनः ॥ १-२१३-९ (९३०७)
भवितारस्तत्र तव पतयः पञ्च विप्लुताः ।
तैः सार्धं मधुराकारैश्चिरं रतिमवाप्स्यसि ॥ १-२१३-१० (९३०८)
वैशम्पायन उवाच। १-२१३-११क्ष् (११८३)
सैवं शप्ता तु विमना वनं प्रागाद्यशस्विनी ।
भोगैरतृप्ता देवेशं तपसाऽऽराधयत्तदा ॥ १-२१३-११ (९३०९)
निराशीर्मारुताहारा निराहारा तथैव च ।
अनुवर्तमाना त्वादित्यं तथा पञ्चतपाभवत् ॥ १-२१३-१२ (९३१०)
तीव्रेण तपसा तस्यास्तुष्टः पशुपतिः स्वयम् ।
वचं प्रादात्तदा रुद्रः सर्वलोकेश्वरः प्रभुः ॥ १-२१३-१३ (९३११)
भविष्यति परं जन्म भविष्यति वराङ्गना ।
भविष्यन्ति परं भद्रे पतयः पञ्च विश्रुताः ॥ १-२१३-१४ (९३१२)
महेन्द्रवपुषः सर्वे महेन्द्रसमविक्रमाः ।
तत्रस्था च महत्कर्म सुराणां त्वं करिष्यसि ॥ १-२१३-१५ (९३१३)
स्त्र्युवाच। १-२१३-१६क्ष् (११८४)
एकः खलु मया भर्ता वृतः पञ्च त्विमे कथम् ।
एको भवति नैकस्या बहवस्तद्ब्रवीहि मे ॥ १-२१३-१६ (९३१४)
महेश्वर उवाच। १-२१३-१७क्ष् (११८५)
पञ्चकृत्वस्त्वया चोक्तः पतिं देहीत्यहं पुनः ।
पञ्चते पतयो भद्रे भविष्यन्ति सुखावहाः ॥ १-२१३-१७ (९३१५)
स्त्र्युवाच। १-२१३-१८क्ष् (११८६)
धर्म एकः पतिः स्त्रीणां पूर्वमे प्रकल्पितः ।
बहुपत्नीकता पुंसो धर्मश्च बहुभिः कृतः ॥ १-२१३-१८ (९३१६)
स्त्रीधर्मः पूर्वमेवायं निर्मितो मुनिभिः सदा ।
सहधर्मचरी भर्तुरेका एकस्य चोच्यते ॥ १-२१३-१९ (९३१७)
एको हि भर्ता नारीणां कौमार इति लौकिकः ।
आपत्सु च नियोगेन भर्तुर्नार्याः परः स्मृतः ॥ १-२१३-२० (९३१८)
गच्छेत न तृतीयं तु तस्या निष्कृतिरुच्यते ।
चतुर्थे पतिता नारी पञ्चमे वर्धकी भवेत् ॥ १-२१३-२१ (९३१९)

एवं गते धर्मपथे न वृणे बहुपुंस्कताम् ।
अलोकाचरितात्तस्मात्कथं मुच्येय सङ्करात् ॥ १-२१३-२२ (९३२०)
महेश्वर उवाच। १-२१३-२३क्ष् (११८७)
अनावृताः पुरा नार्यो ह्यासञ्शुध्यन्ति चार्तवे ।
सकृदुक्तं त्वया नैतन्नाधर्मस्ते भविष्यति ॥ १-२१३-२३ (९३२१)
स्त्र्युवाच। १-२१३-२४क्ष् (११८८)
यदि मे पतयः पञ्च रतिमिच्छामि तैर्मिथः ।
कौमारं च भवेत्सर्वैः संगमे संगमे च मे ॥ १-२१३-२४ (९३२२)
पतिशुश्रूषया चैव सिद्धिः प्राप्ता मया पुरा ।
भोगेच्छा च मया प्राप्ता स च भोगश्च मे भवेत् ॥ १-२१३-२५ (९३२३)
रुद्र उवाच। १-२१३-२६क्ष् (११८९)
रतिश्च भद्रे सिद्धिश्च न भजेते परस्परम् ।
भोगानाप्स्यसि सिद्धिं च योगेन च महत्त्वताम् ॥ १-२१३-२६ (९३२४)
अन्यदेहान्तरे चैव रूपभाग्यगुणान्विता ।
पञ्चभिः प्राप्य कौमारं महाभागा भविष्यसि ॥ १-२१३-२७ (९३२५)
गच्छ गङ्गाजलस्था च नरं पश्यसि यं शुभे ।
तमानय ममाभ्याशं सुरराजं शुचिस्मिते ॥ १-२१३-२८ (९३२६)
इत्युक्ता विश्वरूपेण रुद्रं कृत्वा प्रदक्षिणम् ।
जगाम गङ्गामुद्दिश्य पुण्यां त्रिपथगां नदीम् ॥ ॥ १-२१३-२९ (९३२७)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१३-२३ अनावृताः निरोधरहिताः ॥
त्रयोदशाधिकद्विशततमोऽध्यायः ॥
२१३ ॥

आदिपर्व - अध्याय २१४
॥ श्रीः ॥
१.२१४. अध्यायः २१४

Mahabharata - Adi Parva - Chapter Topics
पञ्चे उपाख्यानप्रारम्भः ॥ १ ॥
नैमिशारण्ये देवैरारब्धे सत्रे यमस्य शामित्रकर्मणि व्यापृतत्वात्
लोके प्रजाबाहुल्यं दृष्ट्वा तत्परिजिहीर्षया देवैर्ब्रह्मसमीपगमनम्
॥ २ ॥

ब्रह्माज्ञया पुनर्नैमिशारण्यं गतस्य गङ्गायां पुण्डरीकं दृष्ट्वा तज्जिहीर्षया गतस्य इन्द्रस्य तत्र रुदन्त्याः स्त्रियाः दर्शनम् ॥ ३ ॥
तामनुगच्छतेन्द्रेण पर्वतविवरे पूर्वेषां चतुर्णां इन्द्राणां दर्शनम् ॥ ४ ॥
बलरामकेशवद्रौपद्यादीनामुत्पत्तिकथा ॥ ५ ॥
व्यासदत्तदिव्यदृष्टेर्द्रुपदस्य पाण्डवद्रौपदीपूर्वरूपदर्शनं ॥ ६ ॥
द्रौपद्या अव्यवहितपूर्वजन्मवृत्तान्तकथनम् ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१४-० (९३२८)
व्यास उवाच। १-२१४-०क्ष् (११९०)
पुरा वै नैमिशारण्ये देवाः सत्रमुपासते ।
तत्र वैवस्वतो राजञ्शामित्रमकरोत्तदा ॥ १-२१४-१ (९३२९)
ततो यमो दीक्षितस्तत्र राज-
न्नामारयत्कंचिदपि प्रजानाम् ।
ततः प्रजास्ता बहुला बभूवुः
कालातिपातान्मरणप्रहीणाः ॥ १-२१४-२ (९३३०)
सोमश्च शक्रो वरुणः कुबेरः
साध्या रुद्रा वसवोऽथाश्विनौ च ।
प्रजापतिर्भुवनस्य प्रणेता
समाजग्मुस्तत्र देवास्तथाऽन्ये ॥ १-२१४-३ (९३३१)
ततोऽब्रुवँल्लोकगुरुं समेता
भयात्तीव्रान्मानुषाणां विवृद्ध्या ।
तस्माद्भयादुद्विजन्तः सुखेप्सवः
प्रयाम सर्वे शरणं भवन्तम् ॥ १-२१४-४ (९३३२)
पितामह उवाच। १-२१४-५क्ष् (११९१)
किं वो भयं मानुषेभ्यो यूयं सर्वे यदाऽमराः ।
मा वो मर्त्यसकाशाद्धि भयं भवितुमर्हति ॥ १-२१४-५ (९३३३)
देवा ऊचुः। १-२१४-६क्ष् (११९२)
मर्त्या अमर्त्याः संवृत्ता न विशेषोऽस्ति कश्चन ।
अविशेषादुद्विजन्तो विशेषार्थमिहागताः ॥ १-२१४-६ (९३३४)
श्रीभगवानुवाच। १-२१४-७क्ष् (११९३)
वैवस्वतो व्यापृतः सत्रहेतो-
स्तेन त्विमे न म्रियन्ते मनुष्याः ।
तस्मिन्नेकाग्रे कृतसर्वकार्ये

तत एषां भवितैवान्तकालः ॥ १-२१४-७ (९३३५)
वैवस्वतस्यैव तनुर्विभक्ता
वीर्येण युष्माकमुत प्रवृद्धा ।
सैषामन्तो भविता ह्यन्तकाले
न तत्र वीर्यं भविता नरेषु ॥ १-२१४-८ (९३३६)
व्यास उवाच। १-२१४-९क्ष् (११९४)
ततस्तु ते पूर्वजदेववाक्यं
श्रुत्वा जग्मुर्यत्र देवा यजन्ते ।
समासीनास्ते समेता महाबला
भागीरथ्यां ददृशुः पुण्डरीकम् ॥ १-२१४-९ (९३३७)
दृष्ट्वा च तद्विस्मितास्ते बभूवु-
स्तेषामिन्द्रस्तत्र शूरो जगाम ।
सोऽपश्यद्योषामथ पावकप्रभां
यत्र देवी गङ्गा सततं प्रसूता ॥ १-२१४-१० (९३३८)
सा तत्र योषा रुदती जलार्थिनी
गङ्गां देवीं व्यवगाह्य व्यतिष्ठत् ।
तस्याश्रुबिन्दुः पतितो जले य-
स्तत्पद्ममासीदथ तत्र काञ्चनम् ॥ १-२१४-११ (९३३९)
तदद्भुतं प्रेक्ष्य वज्री तदानी-
मपृच्छत्तां योषितमन्तिकाद्वै ।
का त्वं भद्रे रोदिषि कस्य हेतो-
र्वाक्यं तथ्यं कामयेऽहं ब्रवीहि ॥ १-२१४-१२ (९३४०)
स्त्र्युवाच। १-२१४-१३क्ष् (११९५)
त्वं वेत्स्यसे मामिह याऽस्मि शक्र
यदर्थं चाहं रोदिमि मन्दभाग्या ।
आगच्छ राजन्पुरतो गमिष्ये
द्रष्टाऽसि तद्रोदिमि यत्कृतेऽहम् ॥ १-२१४-१३ (९३४१)
व्यास उवाच। १-२१४-१४क्ष् (११९६)
तां गच्छन्तीमन्वगच्छत्तदानीं
सोऽपश्यदारात्तरुणं दर्शनीयम् ।
सिद्धासनस्थं युवतीसहायं
क्रीडन्तमक्षैर्गिरिराजमूर्ध्नि ॥ १-२१४-१४ (९३४२)
तमब्रवीद्देवराजो ममेदं
त्वं विद्धि विद्वन्भुवनं वशे स्थितम् ।
ईशोऽहस्मीति समन्युरब्रवी-
द्दृष्ट्वा तमक्षैः सुभृशं प्रमत्तम् ॥ १-२१४-१५ (९३४३)

क्रुद्धं च शक्रं प्रसमीक्ष्य देवो
जहाय शक्रं च शैरुदैक्षत ।
संस्तम्भितोऽभूदथ देवराज-
स्तेनेक्षितः स्थाणुरिवावतस्थे ॥ १-२१४-१६ (९३४४)
यदा तु पर्याप्तमिहास्य क्रीडया
तदा देवीं रुदतीं तामुवाच ।
आनीयतामेष यतोऽहमारा-
न्नैनं दर्पः पुनरप्याविशेत ॥ १-२१४-१७ (९३४५)
ततः शक्रः स्पृष्टमात्रस्तया तु
स्रस्तैरङ्गैः पतितोऽभूद्धरण्याम् ।
तमब्रवीद्भगवानुग्रतेजा
मैवं पुनः शक्र कृथाः कथंचित् ॥ १-२१४-१८ (९३४६)
निवर्तयैनं च महाद्रिराजं
बलं च वीर्यं च तवाप्रमेयम् ।
छिद्रस्य चैवाविश मध्यमस्य
यत्रासते त्वद्विधाः सूर्यभासः ॥ १-२१४-१९ (९३४७)
स तद्विवृत्य विवरं महागिरे-
स्तुल्यद्युतींश्चतुरोऽन्यान्ददर्श ।
स तानभिप्रेक्ष्य बभूव दुःखितः
कच्चिन्नाहं भविता वै यथेमे ॥ १-२१४-२० (९३४८)
ततो देवो गिरिशो वज्रपाणिं
विवृत्य नेत्रे कुपितोऽभ्युवाच ।
दरीमेतां प्रविश त्वं शतक्रतो
यन्मां बाल्यादवमंस्थाः पुरस्तात् ॥ १-२१४-२१ (९३४९)
उक्तस्त्वेवं विभुना देवराजः
प्रावेपताऽऽर्तो भृशमेवाभिषङ्गात् ।
स्रस्तैरङ्गैरनिलेनेव नुन्न-
मश्वत्थपत्रं गिरिराजमूर्ध्नि ॥ १-२१४-२२ (९३५०)
स प्राञ्जलिर्वै वृषवाहनेन
प्रवेपमानः सहसैवमुक्तः ।
उवाच देवं बहुरूपमुग्र-
मद्याशेषस्य भुवनस्य त्वं भवाद्यः ॥ १-२१४-२३ (९३५१)
तमब्रवीदुग्रवर्चाः प्रहस्य
नैवंशीलाः शेषमिहाप्नुवन्ति ।
एतेऽप्येवं भवितारः पुरस्ता-
त्तस्मादेतां दरीमाविश्य शेष्य ॥ १-२१४-२४ (९३५२)

एषा भार्या भविता वो न संशयो
योनिं सर्वे मानुषीमाविशध्वम् ।
तत्र यूयं कर्म कृत्वाऽविषह्यं
बहूनन्यान्निधनं प्रापयित्वा ॥ १-२१४-२५ (९३५३)
ग्अस्त्रैर्दिव्यैर्मानुषान्योधयित्वा
शूरान्सर्वानाहवे संविजित्य।'
आगन्तारः पुनरेवेन्द्रवलोकं
स्वकर्मणा पूर्वचितं महार्हम् ।
सर्वं मया भाषितमेतदेवं
कर्तव्यमन्यद्विविधार्थयुक्तम् ॥ १-२१४-२६ (९३५४)
पूर्वेन्द्रा ऊचुः।१-२१४-२७क्ष् (११९७)
गमिष्यामो मानुषं देवलोका-
द्दुराधरो विहितो यत्र मोक्षः ।
देवास्त्वस्मानादधीरञ्जनन्यां
धर्मो वायुर्मघवानश्विनौ च ॥ १-२१४-२७ (९३५५)
व्यास उवाच।१-२१४-२८क्ष् (११९८)
एतच्छ्रुत्वा वज्रपाणिर्वचस्तु
देवश्रेष्ठं पुनरेवेदमाह ।
वीर्येणाहं पुरुषं कार्यहेतो-
र्दद्यामेषां पञ्चमं मत्प्रसूतम् ॥ १-२१४-२८ (९३५६)
विश्वभुग्भूतधामा च शिबिरिन्द्रः प्रतापवान् ।
शान्तिश्चतुर्थस्तेषां वै तेजस्वी पञ्चमः स्मृतः ॥१-२१४-२९ (९३५७)
तेषां कामं भगवानुग्रधन्वा
प्रादादिष्टं सन्निसर्गाद्यथोक्तम् ।
तां चाप्येषां योषितं लोककान्तां
श्रियं भार्यां व्यदधान्मानुषेषु ॥ १-२१४-३० (९३५८)
तैरेव सार्धं तु ततः स देवो
जगाम नारायणमप्रमेयम् ।
अनन्तमव्यक्तमजं पुराणं
सनातनं विश्वमनन्तरूपम् ॥ १-२१४-३१ (९३५९)
स चापि तद्व्यदधात्सर्वमेव
ततः सर्वे संबभूवुर्धरण्यमाम् ।
ग्नरं तु देवं विबुधप्रधान-
मिन्द्राज्जिष्णुं पञ्चमं कल्पयित्वा।'
स चापि केशौ हरिरुद्बबर्ह
शुक्लमेकमपरं चापि कृष्णम् ॥ १-२१४-३२ (९३६०)

तौ चापि केशौ विशतां यदूनां
कुले स्त्रियौ देवकीं रोहिणीं च ।
तयोरेको बलदेवो बभूव
योऽसौ श्वेतस्य देवस्य केशः ।
कृष्णो द्वितीयः केशवः संबभूव
केशो योऽसौ वर्णतः कृष्ण उक्तः ॥ १-२१४-३३ (९३६१)
ये ते पूर्वं शक्ररूपा निबद्धा-
स्तस्यां दर्यां पर्वतस्योत्तरस्य ।
इहैव ते पाण्डवा वीर्यवन्तः
शक्रस्यांशः पाण्डवः सव्यसाची ॥ १-२१४-३४ (९३६२)
एवमेते पाण्डवाः संबभूवु-
र्ये ते राजन्पूर्वमिन्द्रा बभूवुः ।
लक्ष्मीश्चैषां पूर्वमेवोपदिष्टा
भार्या यैषा द्रौपदी दिव्यरूपा ॥ १-२१४-३५ (९३६३)
कथं हि स्त्री कर्मणा ते महीतला-
त्समुत्तिष्ठेदन्यतो दैवयोगात् ।
यस्या रूपं सोमसूर्यप्रकाशं
गन्धश्चास्याः कोशमात्रात्प्रवाति ॥ १-२१४-३६ (९३६४)
इदं चान्यत्प्रीतिपूर्वं नरेन्द्र
ददानि ते वरमत्यद्भुतं च ।
दिव्यं चक्षुः पश्य कुन्तीसुतांस्त्वं
पुण्यैर्दिव्यैः पूर्वदेहैरुपेतान् ॥ १-२१४-३७ (९३६५)
वैशम्पायन उवाच।१-२१४-३८क्ष् (११९९)
ततो व्यासः परमोदारकर्मा
शुचिर्विप्रस्तपसा तस्य राज्ञः ।
चक्षुर्दिव्यं प्रददौ तांश्च सर्वान्
राजाऽपश्यत्पूर्वदेहैर्यथावत् ॥ १-२१४-३८ (९३६६)
ततो दिव्यान्हेमकिरीटमालिनः
शक्रप्रख्यान्पावकादित्यवर्णान् ।
बद्धापीडांश्चारुरूपांश्च यूनो
व्यूढोरस्कांस्तालमात्रान्ददर्श ॥ १-२१४-३९ (९३६७)
दिव्यैर्वस्त्रैरजोभिः सुगन्धै-
र्माल्यैश्चाग्र्यैः शोभमानानतीव ।
साक्षात्त्र्यक्षान्वा वसूंश्चापि रुद्रा-
नादित्यान्वा सर्वगुणोपपन्नान् ॥ १-२१४-४० (९३६८)
तान्पूर्वेन्द्रानभिवीक्ष्याभिरूपा-

ञ्शक्रात्मजं चेन्द्ररूपं निशम्य ।
प्रीतो राजा द्रुपदो विस्मितश्च
दिव्यां मायां तामवेक्ष्याप्रमेयाम् ॥ १-२१४-४१ (९३६९)
तां चैवाग्र्यां स्त्रियमतिरूपयुक्तां
दिव्यां साक्षात्सोमवह्निप्रकाशाम् ।
योग्यां तेषां रूपतेजोयशोभिः
पत्नी मत्वा हृष्टवान्पार्थिवेन्द्रः ॥ १-२१४-४२ (९३७०)
स तद्दृष्ट्वा महदाश्चर्यरूपं
जग्राह पादौ सत्यवत्याः सुतस्य ।
नैतच्चित्रं परमर्षे त्वयीति
प्रसन्नचेताः स उवाच चैनम् ॥ १-२१४-४३ (९३७१)
ग्व्यास उवाच। १-२१४-४४क्ष् (१२००)
इदं चापि पुरावृत्तं तन्निबोध च भूमिम ।
कीर्त्यमानं नृपर्षीणां पूर्वेषां दारकर्मणि ॥ १-२१४-४४ (९३७२)
नितन्तुर्नाम राजर्षिर्बभूव भुवि विश्रुतः ।
तस्य पुत्रा महेष्वासा बभूवुः पञ्च भूमिताः ॥ १-२१४-४५ (९३७३)
साल्वेयः शूरसेनश्च श्रुतसेनश्च वीर्यवान् ।
तिन्दुसारोऽतिसारश्च क्षत्रियाः क्रतुयाजिनः ॥ १-२१४-४६ (९३७४)
नातिचक्रमुरन्योन्यमन्योन्यस्य प्रियंवदाः ।
अनीर्ष्यवो धर्मविदः सौम्याश्चैव प्रियकराः ॥ १-२१४-४७ (९३७५)
एतान्नैतन्तवान्पञ्च शिबिपुत्री स्वयंवरे ।
अवाप स्वपतीन्वीरान्भौमाश्वी मनुजाधिपान् ॥ १-२१४-४८ (९३७६)
वीणेव मधुरारावा गान्धर्वस्वरमूर्च्छिता ।
उत्तमा सर्वनारीणां भौमाश्वी ह्यभवत्तदा ॥ १-२१४-४९ (९३७७)
यस्या नैतन्तवाः पञ्च पतयः क्षत्रियर्षभाः ।
बभूवुः पृथिवीपालाः सर्वैः समुदिता गुणैः ॥ १-२१४-५० (९३७८)
तेषामेकाभवद्भार्या राज्ञामौशीनरी शुभा ।
भौमाश्वी नाम भद्रं ते तथारूपगुणान्विता ॥ १-२१४-५१ (९३७९)
पञ्चभ्यः पञ्चधा पञ्च दायादान्सा व्यजायत ।
तेभ्यो नैतन्तवेभ्यस्तु राजशार्दूल वै तदा ॥ १-२१४-५२ (९३८०)
पृथगाख्याऽभवत्तेषां भ्रातॄणां पञ्चधा भुवि ।
यथावत्कीर्त्यमानांस्ताञ्छृणु मे राजसत्तम ॥ १-२१४-५३ (९३८१)
साल्वेयाः शूरसेनाश्च श्रुतसेनाश्च पार्थिवाः ।
तिन्दुसारातिसाराश्च वंशा एषां नृपोत्तम ॥ १-२१४-५४ (९३८२)
एवमेकाऽभवद्भार्या भौमाश्वी भुवि विश्रुता ।
तथैव द्रुपदैषा ते सुता वै देवरूपिणी ।

पञ्चानां विहिता पत्नी कृष्णा पार्षत्यनिन्दिता'॥ १-२१४-५५ (९३८३)
व्यास उवाच। १-२१४-५६क्ष् (१२०१)
आसीत्तपोवने काचिदृषेः कन्या महात्मनः ।
नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती ॥ १-२१४-५६ (९३८४)
तोषयामास तपसा सा किलोग्रेण शङ्करम् ।
तामुवाचेश्वरः प्रीतो वृणु काममिति स्वयम् ॥ १-२१४-५७ (९३८५)
सैवमुक्ताऽब्रवीत्कन्या देवं वरदमीश्वरम् ।
पतिं सर्वगुणोपेतमिच्छामीति पुनःपुनः ॥ १-२१४-५८ (९३८६)
ददौ तस्यै स देवेशस्तं वरं प्रीतमानसः ।
पञ्च ते पतयो भद्रे भविष्यन्तीति शङ्करः ॥ १-२१४-५९ (९३८७)
सा प्रसादयती देवमिदं भूयोऽभ्यभाषत ।
एकं पतिं गुणोपेतं त्वत्तोऽर्हामीति शङ्कर ॥ १-२१४-६० (९३८८)
तां देवदेवः प्रीतात्मा पुनः प्राह शुभं वचः ।
पञ्चकृत्वस्त्वयोक्तोऽहं पतिं देहीति वै पुनः ॥ १-२१४-६१ (९३८९)
तत्तथा भविता भद्रे वचस्तद्भद्रमस्तु ते ।
देहमन्यं गतायास्ते सर्वमेतद्भविष्यति ॥ १-२१४-६२ (९३९०)
द्रुपदैषा हि सा जज्ञे सुता वै देवरूपिणी ।
पञ्चानां विहिता पत्नी कृष्णा पार्षत्यनिन्दिता ॥ १-२१४-६३ (९३९१)
ग्सैव नालायनी भूत्वा रूपेणाप्रतिमा भुवि ।
मौद्गल्यं पतिमास्थाय शिवाद्वरमभीप्सती ॥ १-२१४-६४ (९३९२)
एतद्देवरहस्यं ते श्रावितं राजसत्तम ।
नाख्यातव्यं कस्यचिद्वै देवगुह्यमिदं यतः ॥' १-२१४-६५ (९३९३)
स्वर्गश्रीः पाण्डवार्थं तु समुत्पन्ना महामखे ।
सेह तप्त्वा तपो घोरं दुहितृत्वं तवागता ॥ १-२१४-६६ (९३९४)
सैषा देवी रुचिरा देवजुष्टा
पञ्चानामेका स्वकृतेनेह कर्मणा ।
सृष्टा स्वयं देवपत्नी स्वयंभुवा
श्रुत्वा राजन्द्रुपदेष्टं कुरुष्व ॥ ॥ १-२१४-६७ (९३९५)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२१४-१ शमिता यज्ञे पशुवधकर्ता तस्य भावः शामित्रम् ॥
१-२१४-३ यत्र प्रजापतिस्तत्र सोमादयः समाजग्मुः ॥
१-२१४-११ तस्याः अश्रुबिन्दुः । सन्धिरार्षः ॥

१-२१४-२१ ततः शीघ्रमप्रवेशाद्धेतोः ॥
१-२१४-२३ हे भव अद्य त्वमशेषस्य भुवनस्य आद्यः पतिरसि
। अद्येत्यनेन मां जित्वैव नत्वन्यथेति सूचितम् ॥
१-२१४-२४ शेषं प्रसादम् ॥
१-२१४-२७ दुराधरो दुष्प्रापः ॥
१-२१४-२८ वीर्येण शुक्रद्वारा पुरुषमंशभूतं दद्याम् ॥
१-२१४-२९ तेजस्वी इन्द्रांशः ॥
१-२१४-३१ तैर्विश्वभुगादिभिः । स देवो महादेवः ॥
१-२१४-३२ व्यदधाद्विहितवान् आज्ञप्तवानित्यर्थः । उद्ववर्ह उद्धृतवान् ॥
१-२१४-३८ तस्य राज्ञः । तस्मै राज्ञे ॥
चतुर्दशाधिकद्विशततमोऽध्यायः ॥
२१४ ॥

आदिपर्व - अध्याय २१५
॥ श्रीः ॥
१.२१५. अध्यायः २१५

Mahabharata - Adi Parva - Chapter Topics
युधिष्ठिरादीनां क्रमेण द्रौपद्याः पाणिग्रहणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१५-० (९३९६)
द्रुपद उवाच। १-२१५-०क्ष् (१२०२)
अश्रुत्वैवं वचनं ते महर्षे
मया पूर्वं यतितं संविधातुम् ।
न वै शक्यं विहितस्यापयानं
तदेवेदमुपपन्नं विधानम् ॥ १-२१५-१ (९३९७)
दिष्टस्य ग्रन्थिरनिवर्तनीयः
स्वकर्मणा विहितं तेन किंचित् ।
कृतं निमित्तमिह नैकहेतो-
स्तदेवेदमुपन्नं विधानम् ॥ १-२१५-२ (९३९८)
यथैव कृष्णोक्तवती पुरस्ता-
न्नैकान्पतीन्मे भगवान्ददातु ।
स चाप्येवं वरमित्यब्रवीत्तां
देवो हि वेत्ता परमं यदत्र ॥ १-२१५-३ (९३९९)
यदि चैवं विहितः शङ्करेण

धर्मोऽधर्मो वा नात्र ममापराधः ।
गृह्णन्त्विमे विधितत्पाणिमस्या
यथोपजोषं विहितैषां हि कृष्णा ॥ १-२१५-४ (९४००)
व्यास उवाच। १-२१५-५क्ष् (१२०३)
नायं विधिर्मानुषाणां विवाहे
देवा ह्येते द्रौपदी चापि लक्ष्मीः ।
प्राक्कर्मणः सुकृतात्पाण्डवानां
पञ्चानां भार्या देवदेवप्रसादात् ॥ १-२१५-५ (९४०१)
तेषामेवायं विहितः स्याद्विवाहो
यथा ह्येष द्रौपदीपाण्डवानाम् ।
अन्येषां नृणां योषितां च
न धर्मः स्यान्मानवोक्तो नरेन्द्र ॥ १-२१५-६ (९४०२)
वैशम्पायन उवाच। १-२१५-७क्ष् (१२०४)
तत आजग्मतुस्तत्र तौ व्यासद्रुपदावुभौ ।
कुन्ती सपुत्रा यत्रास्ते धृष्टद्युम्नश्च पार्षतः ।
ततो द्वैपायनः कृष्णो युधिष्ठिरमथागमत् ॥' १-२१५-७ (९४०३)
ततोऽब्रवीद्भगवान्धर्मराज-
मद्यैव पुण्येऽहनि पाण्डवेय ।
पुण्ये पुष्ये योगमुपैति चन्द्रमाः
पाणिं कृष्णायास्त्वं गृहाणाद्य पूर्वं ॥ १-२१५-८ (९४०४)
Ꞌएवमुक्त्वा धर्मराजं भीमादीनप्यभाषत ॥ १-२१५-९ (९४०५)
क्रमेण पुरुषव्याघ्राः पाणिं गृह्णन्तु पाणिभिः ।
एवमेव मया सर्वं दृष्टमेतत्पुराऽनघाः ॥ १-२१५-१० (९४०६)
वैशम्पायन उवाच। १-२१५-११क्ष् (१२०५)
ततो राजा यज्ञसेनः सपुत्रो
जन्यार्थणुक्तं बहु तत्तदग्र्यम् ।
Ꞌसमर्थयामास महानुभावो
हृष्टः सपुत्रः सहबन्धुवर्गः।'
समानयामास सुतां च कृष्णा-
माप्लाव्य रत्नैर्बहुभिर्विभूष्य ॥ १-२१५-११ (९४०७)
ततस्तु सर्वे सुहृदो नृपस्य
समाजग्मुः सहिता मन्त्रिणश्च ।
द्रष्टुं विवाहं परमप्रतीता
द्विजाश्च पौराश्च यथाप्रधानाः ॥ १-२१५-१२ (९४०८)
ततोऽस्य वेश्माग्र्यजनोपशोभितं
विस्तीर्णपद्मोत्पलभूषिताजिरम् ।

बलौघरत्नौघविचित्रमाबभौ
नभो यथा निर्मलतारकान्वितम् ॥ १-२१५-१३ (९४०९)
ततस्तु ते कौरवराजपुत्रा
विभूषिताः कुण्डलिनो युवानः ।
महार्हवस्त्राम्बरचन्दनोक्षिताः
कृताभिषेकाः कृतमङ्गलक्रियाः ॥ १-२१५-१४ (९४१०)
पुरोहितेनाग्निसमानवर्चसा
सहैव धौम्येन यताविधि प्रभो ।
क्रमेण सर्वे विविशुस्ततः सदो
महर्षभा गोष्ठमिवाभिनन्दिनः ॥ १-२१५-१५ (९४११)
ततः समाधाय स वेदपरागो
जुहाव मन्त्रैर्ज्वलितं हुताशनम् ।
युधिष्ठिरं चाप्युपनीय मन्त्रवि-
न्नियोजयामास सहैव कृष्णया ॥ १-२१५-१६ (९४१२)
प्रदक्षिणं तौ प्रगृहीतपाणी
समानयामास स वेदपरागः ।
गविप्रांश्च संतर्प्य युधिष्ठिरो धनै-
र्गोभिश्च रत्नैर्विविधैश्च पूर्वम् ॥ १-२१५-१७ (९४१३)
तदा स राजा द्रुपदस्य पुत्रिका-
पाणिं प्रजग्राह हुताशनाग्रतः ।
धौम्येन मन्त्रैर्विधिवद्धुतेऽग्नौ
सहाग्निकल्पैर्ऋषिभिः समेत्य ॥ १-२१५-१८ (९४१४)
ततोऽन्तरिक्षात्कुसुमानि पेतु-
र्ववौ च वायुः सुमनोज्ञगन्धः ।
ततोऽभ्यनुज्ञाप्य समाजशोभितं
युधिष्ठिरं राजपुरोहितस्तदा ॥ १-२१५-१९ (९४१५)
विप्रांश्च सर्वान्सुहृदश्च राज्ञः
समेत्य राजानमदीनसत्वम् ।
जगाद भूयोऽपि महानुभावो
वचोऽर्थयुक्तं मनुजेश्वरं तम् ॥ १-२१५-२० (९४१६)
गृह्णन्त्वथान्ये नरदेवकन्या-
पाणिं यथावन्नरदेवपुत्राः ।
तमभ्यनन्दद्द्रुपदस्तथा द्विजं
तथा कुरुष्वेति तमादिदेश ॥ १-२१५-२१ (९४१७)
पुरोहितस्यानुमतेन राज्ञ-
स्ते राजपुत्रा मुदिता बभूवुः ।

क्रमेण चान्ये च नराधिपात्मजा
वरस्त्रियास्ते जगृहुः करं तदा ॥' १-२१५-२२ (९४१८)
अहन्यहन्युत्तमरूपधारिणो
महारथाः कौरववंशवर्धनाः ॥ १-२१५-२३ (९४१९)
इदं च तत्राद्भुतरूपमुत्तमं
जगाद देवर्षिरतीतमानुषम् ।
महानुभावा किल सा सुमध्यमा
बभूव कन्यैव गते गतेऽहनि ॥ १-२१५-२४ (९४२०)
ग्पतिश्वशुरता ज्येष्ठे पतिदेवरताऽनुजे ।
मध्यमेषु च पाञ्चाल्यास्त्रितयं त्रितयं त्रिषु ॥' १-२१५-२५ (९४२१)
कृते विवाहे द्रुपदो धनं ददौ
महारथेभ्यो बहुरूपमुत्तमम् ।
शतं रथानां वरहेममालिनां
चतुर्युजां हेमखलीनमालिनाम् ॥ १-२१५-२६ (९४२२)
शतं गजानामपि पद्मिनां तथा
शतं गिरिणामिव हेमशृङ्गिणाम् ।
तथैव दासीशतमग्र्ययौवनं
महार्हवेषाभरणाम्बरस्रजम् ॥ १-२१५-२७ (९४२३)
पृथक्पृथग्दिव्यदृशां पुनर्ददौ
तदा धनं सौमकिरग्निसाक्षिकम् ।
तथैव वस्त्राणि विभूषणानि
प्रभावयुक्तानि महानुभावः ॥ १-२१५-२८ (९४२४)
कृते विवाहे च ततस्तु पाण्डवाः
प्रभूतरत्नामुपलभ्य तां श्रियम् ।
विजह्रुरिन्द्रप्रतिमा महाबलाः
पुरे तु पाञ्चालनृपस्य तस्य ह ॥ ॥ १-२१५-२९ (९४२५)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१५-२६ चतुर्युजामश्वचतुष्टययुजाम् ॥
पञ्चदशाधिकद्विशततमोऽध्यायः ॥
२१५ ॥

आदिपर्व - अध्याय २१६
॥ श्रीः ॥

१.२१६. अध्यायः २१६

Mahabharata - Adi Parva - Chapter Topics
द्रौपदींप्रति कुन्त्या आशीर्वादः ॥ १ ॥
श्रीकृष्णप्रेषितालंकारादीनां पाण्डवैः स्वीकारः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१६-० (९४२६)
वैशम्पायन उवाच। १-२१६-०क्ष् (१२०६)
पाण्डवैः सह संयोगं गतस्य द्रुपदस्य ह ।
न बभूव भयं किंचिद्देवेभ्योऽपि कथंचन ॥ १-२१६-१ (९४२७)
कुन्तीमासाद्य ता नार्यो द्रुपदस्य महात्मनः ।
नाम संकीर्तयन्त्योऽस्या जग्मुः पादौ स्वमूर्धभिः ॥ १-२१६-२ (९४२८)
कृष्णा च क्षौमसंवीता कृतकौतुकमङ्गला ।
कृताभिवादना श्वश्र्वास्तस्थौ प्रह्वा कृताञ्जलिः ॥ १-२१६-३ (९४२९)
रूपलक्षणसंपन्नां शीलाचारसमन्विताम् ।
द्रौपदीमवदत्प्रेम्णा पृथाशीर्वचनं स्नुषाम् ॥ १-२१६-४ (९४३०)
यथेन्द्राणी हरिहये स्वाहा चैव विभावसौ ।
रोहिणी च यथा सोमे दमयन्ती यथा नले ॥ १-२१६-५ (९४३१)
यथा वैश्रवणे भद्रा वसिष्ठे चाप्यरुन्धती ।
यथा नारायणे लक्ष्मीस्तथा त्वं भव भर्तृषु ॥ १-२१६-६ (९४३२)
जीवसूर्वीरसूर्भद्रे बहुसौख्यसमन्विता ।
सुभगा भोगसंपन्ना यज्ञपत्नी पतिव्रता ॥ १-२१६-७ (९४३३)
अतिथीनागतान्साधून्वृद्धान्बालांस्तथा गुरून् ।
पूजयन्त्या यथान्यायं शश्वद्गच्छन्तु ते समाः ॥ १-२१६-८ (९४३४)
कुरुजाङ्गलमुख्येषु राष्ट्रेषु नगरेषु च ।
अनु त्वमभिषिच्यस्व नृपतिं धर्मवत्सला ॥ १-२१६-९ (९४३५)
पतिभिर्निर्जितामुर्वीं विक्रमेण महाबलैः ।
कुरु ब्राह्मणसात्सर्वामश्वमेधे महाक्रतौ ॥ १-२१६-१० (९४३६)
पृथिव्यां यानि रत्नानि गुणवन्ति गुणान्विते ।
तान्याप्नुहि त्वं कल्याणि सुखिनी शरदां शतं ॥ १-२१६-११ (९४३७)
यथा च त्वाऽभिनन्दामि वध्वद्य क्षौमसंवृताम् ।
तथा भूयोऽभिनन्दिष्ये जातपुत्रां गुणान्वितां ॥ १-२१६-१२ (९४३८)
वैशम्पायन उवाच। १-२१६-१३क्ष् (१२०७)
ततस्तु कृतदारेभ्यः पाण्डुभ्यः प्राहिणोद्धरिः ।

वैदूर्यमणिचित्राणि हैमान्याभरणानि च ॥ १-२१६-१३ (९४३९)
वासांसि च महार्हाणि नानादेश्यानि माधवः ।
कम्बलाजिनरत्नानि स्पर्शवन्ति शुभानि च ॥ १-२१६-१४ (९४४०)
शयनासनयानानि विविधानि महान्ति च ।
वैदूर्यवज्रचित्राणि शतशो भाजनानि च ॥ १-२१६-१५ (९४४१)
रूपयौवनदाक्षिण्यैरुपेताश्च स्वलङ्कृताः ।
प्रेष्याः संप्रददौ कृष्णो नानादेश्याः स्वलङ्कृताः ॥ १-२१६-१६ (९४४२)
गजान्विनीतान्भद्रांश्च सदश्वांश्च स्वलङ्कृतान् ।
रथांश्च दान्तान्सौवर्णैः शुभ्रैः पट्टैरलङ्कृतान् ॥ १-२१६-१७ (९४४३)
कोटिशश्च सुवर्णं च तेषामकृतकं तथा ।
वीथीकृतममेयात्मा प्राहिणोन्मधुसूदनः ॥ १-२१६-१८ (९४४४)
तत्सर्वं प्रतिजग्राह धर्मराजो युधिष्ठिरः ।
मुदा परमया युक्तो गोविन्दप्रियकाम्यया ॥ ॥ १-२१६-१९ (९४४५)

इति श्रीमन्महाभारते आदिपर्वणि वैवाहिकपर्वणि
षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ ॥ समाप्तं वैवाहिकपर्व ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१६-१२ हे वधु अद्य ॥
षोडशाधिकद्विशततमोऽध्यायः ॥
२१६ ॥

आदिपर्व - अध्याय २१७
॥ श्रीः ॥
१.२१७. अध्यायः २१७

(अथ विदुरागमनराज्यलाभपर्व ॥ १४ ॥)
Mahabharata - Adi Parva - Chapter Topics
चारद्वारा पाण्डवविवाहादिवृत्तान्तश्रवणेन अन्यैः राजभिः
भीष्मधृतराष्ट्रादीनां धिक्कारः ॥ १ ॥
धार्तराष्ट्रैः पाण्डवान्प्रति मन्त्रालोचनं ॥ २ ॥
पाण्डवा हन्तव्या इति शकुनेरुक्तिः ॥ ३ ॥
पाण्डवानां हन्तुमशक्यत्वात्तैः सह सन्धिः कर्तव्य इति
सौमदत्तेरुक्तिः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१७-० (९४४६)
वैशम्पायन उवाच। १-२१७-०क्ष् (१२०८)
ततो राज्ञां चैरराप्तैः प्रवृत्तिरुपनीयत ।
पाण्डवैरुपसंपन्ना द्रौपदी पतिभिः शुभा ॥ १-२१७-१ (९४४७)
येन तद्धनुरादाय लक्ष्यं विद्धं महात्मना ।
सोऽर्जुनो जयतां श्रेष्ठो महाबाणधनुर्धरः ॥ १-२१७-२ (९४४८)
यः शल्यं मद्रराजं वै प्रोत्क्षिप्यापातयद्बली ।
त्रासयामास संक्रुद्धो वृक्षेण पुरुषान्रणे ॥ १-२१७-३ (९४४९)
न चास्य संभ्रमः कश्चिदासीत्तत्र महात्मनः ।
स भीमो भीमसंस्पर्शः शत्रुसेनाङ्गपातनः ॥ १-२१७-४ (९४५०)
ग्योऽसावत्यक्रमीद्युध्यन्युद्धे दुर्योधनं तथा ।
स राजा पाण्डवश्रेष्ठः पुण्यभाग्बुद्धिवर्धनः ॥ १-२१७-५ (९४५१)
दुर्योधनस्यावरजैर्यौ युध्येतां प्रतीपवत् ।
तौ यमौ वृत्तसंपन्नौ संपन्नबलविक्रमौ ॥' १-२१७-६ (९४५२)
ब्रह्मरूपधराञ्श्रुत्वा प्रशान्तान्पाण्डुनन्दनान् ।
कौन्तेयान्मनुजेन्द्राणां विस्मयः समजायत ॥ १-२१७-७ (९४५३)
ग्पौरा हि सर्वे राजन्याः समपद्यन्त विस्मिताः।'
सपुत्रा हि पुरा कुन्ती दग्धा जतुगृहे श्रुता ॥ १-२१७-८ (९४५४)
ग्सर्वभूमिपतीनां च राष्ट्राणां च यशस्विनी।'
पुनर्जातानिव च तांस्तेऽमन्यन्त नराधिपाः ॥ १-२१७-९ (९४५५)
धिगकुर्वंस्तदा भीष्मं धृतराष्ट्रं च कौरवम् ।
कर्मणाऽतिनृशंसेन पुरोचनकृतेन वै ॥ १-२१७-१० (९४५६)
धार्मिकान्वृत्तसंपन्नान्मातुः प्रियहिते रतान् ।
यदा तानीदृशान्पार्थानुत्सादयितुमिच्छति ॥ १-२१७-११ (९४५७)
ततः स्वयंवरे वृत्ते धार्तराष्ट्राश्च भारत ।
मन्त्रयन्ति ततः सर्वे कर्णसौबलदूषिताः ॥ १-२१७-१२ (९४५८)
शकुनिरुवाच। १-२१७-१३क्ष् (१२०९)
कश्चिच्छत्रुः कर्शनीयः पीडनीयस्तथाऽपरः ।
उत्सादनीयाः कौन्तेयाः सर्वक्षत्रस्य मे मताः ॥ १-२१७-१३ (९४५९)
एवं पराजिताः सर्वे यदि यूयं गमिष्यथ ।
अकृत्वा संविदं कांचिन्मनस्तप्स्यत्यसंशयम् ॥ १-२१७-१४ (९४६०)
अयं देशश्च कालश्च पाण्डवाहरणाय नः ।
न चेदेवं करिष्यध्वं लोके हास्या भविष्यथ ॥ १-२१७-१५ (९४६१)
यमेते संश्रिता वस्तुं कामयन्ते च भूमिपम् ।
सोऽल्पवीर्यबलो राजा द्रुपदो वै मतो मम ॥ १-२१७-१६ (९४६२)
यावदेतान्न जानन्ति जीवतो वृष्णिपुङ्गवाः ।

चैद्यश्च पुरुषव्याघ्रः शिशुपालः प्रतापवान् ॥१-२१७-१७ (९४६३)
एकीभावं गतो राज्ञा द्रुपदेन महात्मना ।
दुराधर्षतरा राजन्भविष्यन्ति न संशयः ॥१-२१७-१८ (९४६४)
यावच्चञ्चलतां सर्वे प्राप्नुवन्ति नराधिपाः ।
तावदेव व्यवस्यामः पाण्डवानां वधं प्रति ॥१-२१७-१९ (९४६५)
मुक्ता जतुगृहाद्भीमादाशीविषमुखादिव ।
पुनस्ते यदि मुच्यन्ते महन्नो भयमागतम् ॥१-२१७-२० (९४६६)
तेषामिहोपयातानामेषां तु चिरवासिनाम् ।
अन्तरे दुष्करं स्थातुं गजयोर्महतोरिव ॥१-२१७-२१ (९४६७)
हनध्वं प्रगृहीतानि बलानि बलिनां वराः ।
यावन्नः कुरुसेनायां पतन्ति पतगा इव ॥१-२१७-२२ (९४६८)
तावत्सर्वाभिसारेण पुरमेतद्विहन्यताम् ।
एतन्मम मतं चैव प्राप्तकालं नरर्षभ ॥१-२१७-२३ (९४६९)
वैशम्पायन उवाच।१-२१७-२४क्ष् (१२१०)
शकुनेर्वचनं श्रुत्वा भाषमाणस्य दुर्मतेः ।
सोमदत्तिरिदं वाक्यं जगाद परमं ततः ॥१-२१७-२४ (९४७०)
प्रकृतीः सप्त वै ज्ञात्वा आत्मनश्च परस्य च ।
तथा देशं च कालं च षड्विधान्स नयोद्गुणान् ॥१-२१७-२५ (९४७१)
स्थानं वृद्धिं क्षयं चैव भूमिं मित्राणि विक्रमम् ।
प्रसमीक्ष्याभियुञ्जीत परं व्यसनपीडितम् ॥१-२१७-२६ (९४७२)
ततोऽहं पाण्डवान्मन्ये मित्रकोशसमन्वितान् ।
बलस्थान्विक्रमस्थांश्च स्वकृतैः प्रकृतिप्रियान् ॥१-२१७-२७ (९४७३)
वपुषा हि तु भूतानां नेत्राणि हृदयानि च ।
श्रोत्रं मधुरया वाचा रमयत्यर्जुनो नृणाम् ॥१-२१७-२८ (९४७४)
न तु केवलदैवेन प्रजा भावेन भेजिरे ।
यद्बभूव मनःकान्तं कर्मणा स चकार तत् ॥१-२१७-२९ (९४७५)
न ह्ययुक्तं न चासक्तं नानृतं न च विप्रियम् ।
भाषितं चारुभाषस्य जज्ञे पार्थस्य भारती ॥१-२१७-३० (९४७६)
तानेवंगुणसंपन्नान्संपन्नान्राजलक्षणैः ।
न तान्पश्यामि ये शक्ताः समुच्छेत्तुं यथा बलात् ॥१-२१७-३१ (९४७७)
प्रभावशक्तिर्विपुला मन्त्रशक्तिश्च पुष्कला ।
तथैवोत्साहशक्तिश्च पार्थेष्वप्यधितिष्ठति ॥१-२१७-३२ (९४७८)
मौलमित्रबलानां च कालज्ञो वै युधिष्ठिरः ।
साम्ना दानेन भेदेन दण्डेनेति युधिष्ठिरः ॥१-२१७-३३ (९४७९)
अमित्रांश्च ततो जेतुनं न रोषेणेति मे मतिः ।
परिक्रीय धनैः शत्रुं मित्राणि च बलानि च ॥१-२१७-३४ (९४८०)

मूलं च सुकृतं कृत्वा भुङ्क्ते भूमिं च पाण्डवः ।
अशक्यान्पाण्डवान्मन्ये देवैरपि सवासवैः ॥ १-२१७-३५ (९४८१)
येषामर्थे सदा युक्तौ कृष्णसंकर्षणावुभौ ।
श्रेयश्च यदि मन्यद्वं मन्मतं यदि वा मतम् ॥ १-२१७-३६ (९४८२)
संविदं पाण्डवैः सर्वैः कृत्वा याम यथागतम् ।
गोपुराट्टालकैरुच्चैरुपतल्पशतैरपि ॥ १-२१७-३७ (९४८३)
गुप्तं पुरवरश्रेष्ठमेतदद्भिश्च संवृतम् ।
तृणधान्येन्धरसैस्तथा यन्त्रायुधौषधैः ॥ १-२१७-३८ (९४८४)
युक्तं बहुकवाटैश्च द्रव्यागारसुवेदिकैः ।
भीमोच्छ्रितमहाचक्रं बृहदट्टालसंवृतम् ॥ १-२१७-३९ (९४८५)
दृढप्राकारनिर्यूहं शतघ्नीशतसंकुलम् ।
ऐष्टको दारवो वप्रो मानुषश्चेति यः स्मृतः ॥ १-२१७-४० (९४८६)
प्राकारकर्तृभिर्वीरैर्नृगर्भस्तत्र पूजितः ।
तदेतन्नरगर्भेण पाण्डरेण विराजते ॥ १-२१७-४१ (९४८७)
सालेनानेकतालेन सर्वतः संवृतं पुरम् ।
अनुरक्ताः प्रकृतयो द्रुपदस्य महात्मनः ॥ १-२१७-४२ (९४८८)
दानमानार्जिताः सर्वे बाह्याभ्यन्तरगाश्च ये ।
प्रतिरुद्धानिमाञ्ज्ञात्वा राजभिर्भीमविक्रमैः ॥ १-२१७-४३ (९४८९)
उपयास्यन्ति दाशार्हाः समुदग्रोच्छ्रितायुधाः ।
तस्मात्संन्धिं वयं कृत्वा धार्तराष्ट्रस्य पाण्डवैः ॥ १-२१७-४४ (९४९०)
स्वराष्ट्रमेव गच्छामो यद्याप्तं वचनं मम ।
एतन्मम मतं सर्वैः क्रियतां यदि रोचते ।
एतद्धि सुकृतं मन्ये क्षेमं चापि महीभिताम् ॥ ॥ १-२१७-४५ (९४९१)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१७-२९ भेजिर अर्जुनमिति शेषः ॥
सप्तदशाधिकद्विशततमोऽध्यायः ॥
२१७ ॥

आदिपर्व - अध्याय २१८
॥ श्रीः ॥
१.२१८. अध्यायः २१८

Mahabharata - Adi Parva - Chapter Topics

पाण्डवा हन्तव्या एवेति कर्णस्योक्तिः ॥ १ ॥
पाञ्चालनगरंप्रति युद्धार्थं दुर्योधनादीनां गमनम् ॥ २ ॥
तैः सह योद्धुं सपाण्डवस्य द्रुपदस्यागमनम् ॥ ३ ॥
कर्णजयद्रथाभ्यां सुमित्रप्रियदर्शनयोर्वधः ॥ ४ ॥
अर्जुनेन कर्णजयद्रथपुत्रयोर्वधः ॥ ५ ॥
कर्णदुर्योधनादीनां पराजयः ॥ ६ ॥
पराजितानां तेषां हास्तिनपुरगमनम् ॥ ७ ॥
कृष्णबलरामयोः पाञ्चालपुरे वासः ॥ ८ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१८-० (९४९२)
वैशम्पायन उवाच। १-२१८-०क्ष् (१२११)
सौमदत्तेर्वचः श्रुत्वा कर्णो वैकर्तनो वृषा ।
उवाच वचनं काले कालज्ञः सर्वकर्मणाम् ॥ १-२१८-१ (९४९३)
नीतिपूर्वमिदं सर्वमुक्तं वचनमर्थवत् ।
वचनं नाभ्यसूयामि श्रूयतां यद्वचस्त्विति ॥ १-२१८-२ (९४९४)
द्वैधीभावो न गन्तव्यः सर्वकर्मसु मानवैः ।
द्विधाभूतेन मनसा अन्यत्कर्म न सिध्यति ॥ १-२१८-३ (९४९५)
संप्रयाणासनाभ्यां तु कर्शनेन तथैव च ।
नैतच्छक्यं पुरं हर्तुमाक्रन्दश्चाप्यशोभनः ॥ १-२१८-४ (९४९६)
अवमर्दनकालोऽत्र मतश्चिन्तयतो मम ।
यावन्नो वृष्णयः पार्ष्णिं न गृह्णन्तिरणप्रियाः ॥ १-२१८-५ (९४९७)
भवन्तश्च तथा हृष्टाः स्वबाहुबलशालिनः ।
प्राकारमवमृद्नन्तु परिघाः पूरयन्त्वपि ॥ १-२१८-६ (९४९८)
प्रस्नावयन्तु सलिलं क्रियतां विषमं समम् ।
तृणकाष्ठेन महता खातमस्य प्रपूर्यताम् ॥ १-२१८-७ (९४९९)
घुष्यतां राजमार्गेषु परेषां यो हनिष्यति ।
नागमश्वं पदातिं वा दानमानं स लप्स्यति ॥ १-२१८-८ (९५००)
नागे दशसहस्राणि पञ्च चाश्वपदातिषु ।
रथे वै द्विगुणं नागाद्वसु दास्यन्ति पार्थिवाः ॥ १-२१८-९ (९५०१)
यश्च कामसुखे सक्तो बालश्च स्थविरश्च यः ।
अयुद्धमनसो ये च ते तु तिष्ठन्तु भीरवः ॥ १-२१८-१० (९५०२)
प्रदरश्च न दातव्यो न गन्तव्यमचोदितैः ।
यशो रक्षत भद्रं वो जेष्यामो वै रिपून्वयम् ॥ १-२१८-११ (९५०३)
अनुलोमाश्च नो वाताः सततं मृगपक्षिणः ।

अग्नयश्च विराजन्ते शस्त्राणि कवचानि च ॥ १-२१८-१२ (९५०४)
वैशम्पायन उवाच। १-२१८-१३क्ष् (१२१२)
ततः कर्णवचः श्रुत्वा धार्तराष्ट्रप्रियैषिणः ।
निर्ययुः पृथिवीपालाश्चालयन्तः परान्रणे ॥ १-२१८-१३ (९५०५)
न हि तेषां मनःसक्तिरिन्द्रियार्थेषु सर्वशः ।
यथा परिरपुघ्नानां प्रसभं युद्ध एव च ॥ १-२१८-१४ (९५०६)
वैकर्तनपुरोव्रातः सैन्धवोर्मिमहास्वनः ।
दुःशासनमहामत्स्यो दुर्योधनमहाग्रहः ॥ १-२१८-१५ (९५०७)
स राजसागरो भीमो भीमघोषप्रदर्शनः ।
अभिदुद्राव वेगेन पुरं तदपसव्यतः ॥ १-२१८-१६ (९५०८)
तदनीकमनाधृष्यं शस्त्राग्निव्यालदीपितम् ।
समुत्कम्पितमाज्ञाय चुक्रुशुर्द्रुपदात्मजाः ॥ १-२१८-१७ (९५०९)
ते मेघसमनिर्घोषैर्बलिनः स्यन्दनोत्तमैः ।
निर्ययुर्नगरद्वारात्त्रासयन्तः परान्र १-२१८-१८ (९५१०)
धृष्टद्युम्नः शिखण्डी च सुमित्रः प्रियदर्शनः ।
चित्रकेतुः सुकेतुश्च ध्वजकेतुश्च वीर्यवान् ॥ १-२१८-१९ (९५११)
पुत्रा द्रुपदराजस्य बलवन्तो जयैषिणः ।
द्रुपदस्य महावीर्यः पाण्डरोष्णीषकेतनः ॥ १-२१८-२० (९५१२)
पाण्डरव्यजनच्छत्रः पाण्डरध्वजवाहनः ।
स पुत्रगणमध्यस्थः शुशुभे राजसत्तमः ॥ १-२१८-२१ (९५१३)
चन्द्रमा ज्योतिषां मध्ये पौर्णमास्यामिवोदितः ।
अथोद्धूतपताकाग्रमजिह्मगतिमव्ययम् ॥ १-२१८-२२ (९५१४)
द्रुपदानीकमायान्तं कुरुसैन्यमभिद्रवत् ।
तयोरुभयतो जज्ञे तेषां तु तुमुलः स्वनः ॥ १-२१८-२३ (९५१५)
बलयोः संप्रसरतोः सरितां स्रोतसोरिव ।
प्रकीर्णरथनागाश्वैस्तान्यनीकानि सर्वशः ॥ १-२१८-२४ (९५१६)
ज्योतींषईव प्रकीर्णानि सर्वतः प्रचकाशिरे ।
उत्कृष्टभेरीनिनदे संप्रवृत्ते महारवे ॥ १-२१८-२५ (९५१७)
अमर्षिता महात्मानः पाण्डवा निर्ययुस्ततः ।
रथांश्च मेघनिर्घोषान्युक्तान्परमवाजिभिः ॥ १-२१८-२६ (९५१८)
धून्वन्तो ध्वजिनः शुभ्रानास्थाय भरतर्षभाः ।
ततः पाण्डुसुतान्दृष्ट्वा रथस्थानात्तकार्मुकान् ॥ १-२१८-२७ (९५१९)
नृपाणामभवत्कम्पो वेपथुर्हृदयेषु च ।
निर्यातेष्वथ पार्थेषु द्रौपदं तद्बलं रणे ॥ १-२१८-२८ (९५२०)
आविशत्परमो हर्षः प्रमोदश्च जयं प्रति ।
सुमुहूर्तं व्यतिकरः सैन्यानामभवद्भृशम् ॥ १-२१८-२९ (९५२१)

ततो द्वन्द्वमयुध्यन्त मृत्युं कृत्वा पुरस्कृतम् ।
जघ्नतुः समरे तस्मिन्सुमित्रप्रियदर्शनौ ॥ १-२१८-३० (९५२२)
जयद्रथश्च कर्णश्च पश्यतः सव्यसाचिनः ।
अर्जुनः प्रेक्ष्य निहतौ सौमित्रप्रियदर्शनौ ॥ १-२१८-३१ (९५२३)
जयद्रथसुतं तत्र जघान पितुरन्तिके ।
वृषसेनादवरजं सुदामानं धनंजयः ॥ १-२१८-३२ (९५२४)
कर्णपुत्रं महेष्वासं रथनीडादपातयत् ।
तौ सुतौ निहतौ दृष्ट्वा राजसिंहौ तरस्विनौ ॥ १-२१८-३३ (९५२५)
नामृष्येतां महाबाहू प्रहारमिव सद्गजौ ।
तौ जग्मतुरसंभ्रान्तौ फल्गुनस्य रथंप्रति ॥ १-२१८-३४ (९५२६)
प्रतिमुक्ततलत्राणौ शपमानौ परस्परम् ।
सन्निपातस्तयोरासीदतिघोरो महामृधे ॥ १-२१८-३५ (९५२७)
वृत्रशम्बरयोः सङ्ख्ये वज्रिणेव महारणे ।
त्रीनश्वाञ्जघ्नतुस्तस्य फल्गुनस्य नर्षभौ ॥ १-२१८-३६ (९५२८)
ततः किलिकिलाशब्दः कुरूणामभवत्तदा ।
तान्हयान्निहतान्दृष्ट्वा भीमसेनः प्रतापवान् ॥ १-२१८-३७ (९५२९)
निमेषान्तरमात्रेण रथमश्वैरयोजयत् ।
उपयातं रथं दृष्ट्वा दुर्योधनपुरःसरौ ॥ १-२१८-३८ (९५३०)
सौबलः सौमदत्तिश्च समेयातां परन्तपौ ।
तैः पञ्चभिरदीनात्मा भीमसेनो महाबलः ॥ १-२१८-३९ (९५३१)
अयुध्यत तदा वीरैरिन्द्रियार्थैरिवेश्वरः ।
तैर्निरुद्धो न संत्रासं जगाम समितिंजयः ॥ १-२१८-४० (९५३२)
पञ्चभिर्द्विरदैर्मत्तैर्निरुद्ध इव केसरी ।
तस्यैते युगपत्पञ्च पञ्चभिर्निशितैः शरैः ॥ १-२१८-४१ (९५३३)
सारथिं वाजिनश्चैव निन्युर्वैवस्वतक्षयम् ।
हताश्वात्स्यन्दनश्रेष्ठादवरुह्य महारथः ॥ १-२१८-४२ (९५३४)
चचार विविधान्मार्गानसिमुद्यम्य पाण्डवः ।
अश्वस्कन्धेषु चक्रेषु युगेष्वीषासु चैव हि ॥ १-२१८-४३ (९५३५)
व्यचरत्पातयञ्शत्रून्सुपर्ण इव भोगिनः ।
विधनुष्कं विकवचं विरथं च समीक्ष्य तम् ॥ १-२१८-४४ (९५३६)
अभिपेतुर्नव्याघ्रा अर्जुनप्रमुखा रथाः ।
धृष्टद्युम्नः शिखण्डी च यमौ च युधि दुर्जयौ ॥ १-२१८-४५ (९५३७)
तस्मिन्महारथे युद्धे प्रवृत्ते शरवृष्टिभिः ।
रथध्वजपताकाश्च सवर्मन्तरधीयत ॥ १-२१८-४६ (९५३८)
तत्प्रवृत्तं चिरं कालं युद्धं सममिवाभवत् ।
रथेन तान्महाबाहुरर्जुनो व्यधमत्पुनः ॥ १-२१८-४७ (९५३९)

तमापतन्तं दृष्ट्वेव महाबाहुर्धनुर्धरः ।
कर्णोऽस्त्रविदुषां श्रेष्ठो वारयामास सायकैः ॥ १-२१८-४८ (९५४०)
स तेनाभिहतः पार्थो वासविर्वज्रसन्निभान् ।
त्रीञ्शरान्संदधे क्रुद्धो वधात्क्रुद्धस्य पाण्डवः ॥ १-२१८-४९ (९५४१)
तैः शरैराहतं कर्णं ध्वजयष्टिमुपाश्रितम् ।
अपोवाह रथाच्चाशु सूतः परपुरंजयम् ॥ १-२१८-५० (९५४२)
ततः पराजिते कर्णे धार्तराष्ट्रान्महाभयम् ।
विवेश समुदग्रांश्च पाण्डवान्प्रसमीक्ष्य तु ॥ १-२१८-५१ (९५४३)
तत्प्रकम्पितमत्यर्थं तद्दृष्ट्वा सौबलो बलम् ।
गिरा मधुरया चापि समाश्वासयतासकृत् ॥ १-२१८-५२ (९५४४)
धार्तराष्ट्रैस्ततः सर्वैर्दुर्योधनपुरःसरैः ।
धृतं तत्पुनरेवासीद्बलं पार्थप्रपीडितम् ॥ १-२१८-५३ (९५४५)
ततो दुर्योधनं दृष्ट्वा भीमो भीमपराक्रमः ।
अक्रुध्यत्स महाबाहुरगारं जातुषं स्मरन् ॥ १-२१८-५४ (९५४६)
ततः संग्रामशिरसि ददर्श विपुलद्रुमम् ।
आयामभूतं तिष्ठन्तं स्कन्धपञ्चाशदुन्नतम् ॥ १-२१८-५५ (९५४७)
महास्कन्धं महोत्सेधं शक्रध्वजमिवोच्छ्रितम् ।
तमुत्पाट्य च पाणिभ्यामुद्यम्य चरणावपि ॥ १-२१८-५६ (९५४८)
अभिपेदे परान्सङ्ख्ये वज्रपाणिरिवासुरान् ।
भीमसेनभयार्तानि फल्गुनाभिहतानि च ॥ १-२१८-५७ (९५४९)
न शेकुस्तान्यनीकानि धार्तराष्ट्राण्युदीक्षितुम् ।
तानि संभ्रान्तयोधानि श्रान्तवाजिगजानि च ॥ १-२१८-५८ (९५५०)
दिशः प्राकालयद्भीमो दिवीवाभ्राणि मारुतः ।
तान्निवृत्तान्निरानन्दान्नरवारणवाजिनः ॥ १-२१८-५९ (९५५१)
नानुसस्रुर्न चाजघ्नुर्नोचुः किंचिच्च दारुणम् ।
स्वमेव शिबिरं जग्मुः क्षत्रियाः शरविक्षताः ॥ १-२१८-६० (९५५२)
परेऽप्यभिययुर्हृष्टाः पुरं पौरसुखावहाः ।
मुहूर्तमभवद्युद्धं तेषां वै पाण्डवैः सह ॥ १-२१८-६१ (९५५३)
यावत्तद्युद्धमभवन्महद्देवासुरोपमम् ।
तावदेवाभवच्छान्तं निवृत्ता वै महारथाः ॥ १-२१८-६२ (९५५४)
सुव्रतं चक्रिरे सर्वे सुवृतामब्रुवन्वधूम् ।
कृतार्थं द्रुपदं चोचुर्धृष्टद्युम्नं च पार्षतम् ॥ १-२१८-६३ (९५५५)
शकुनिः सिन्धुराजश्च कर्णदुर्योधनावपि ।
तेषां तदाभवद्दुःखं हृदि वाचा तु नाब्रुवन् ॥ १-२१८-६४ (९५५६)
ततः प्रयाता राजानः सर्व एव यथागतम् ।
धार्तराष्ट्रा हि ते सर्वे गता नागपुरं तदा ॥ १-२१८-६५ (९५५७)

प्रागेव पूर्निरोधात्तु पाण्डवैरश्वसादिनः ।
प्रेषिता गच्छतारिष्टानस्मानाख्यात शौरये ॥ १-२१८-६६ (९५५८)
तेऽचिरेणैव कालेन संप्राप्ता यादवीं पुरीम् ।
ऊचुः संकर्षणोपेन्द्रौ वचनं वचनक्षमौ ॥ १-२१८-६७ (९५५९)
कुशलं पाण्डवाः सर्वानाहुः स्मान्धकवृष्णयः ।
आत्मनश्चाहतानाहुर्विमुक्ताञ्जातुषाद्गृहात् ॥ १-२१८-६८ (९५६०)
समाजे द्रौपदीं लब्धामाहू राजीवलोचनाम् ।
आत्मनः सदृशीं सर्वैः शीलवृत्तसमाधिभिः ॥ १-२१८-६९ (९५६१)
तच्छ्रुत्वा वचनं कृष्णस्तानुवाचोत्तरं वचः ।
सर्वमेतदहं जाने वधात्तस्य तु रक्षसः ॥ १-२१८-७० (९५६२)
तत उद्योजयामास माधवश्चतुरङ्गिणीम् ।
सेनामुपानयत्तूर्णं पाञ्चालनगरीं प्रति ॥ १-२१८-७१ (९५६३)
ततः संकर्षणश्चैव केशवश्च महाबलः ।
यादवैः सह सर्वैश्च पाण्डवानभिजग्मतुः ॥ १-२१८-७२ (९५६४)
पितृष्वसारं संपूज्य नत्वा चैव तु यादवीम् ।
द्रौपदीं भूषणैः शुभ्रैर्भूषयित्वा यथाविधि ॥ १-२१८-७३ (९५६५)
पाण्डवान्हर्षयित्वा तु पूजयामासतुश्च तान् ।
न्यायतः पूजितौ राज्ञा द्रुपदेन महात्मना ॥ १-२१८-७४ (९५६६)
यादवाः पूजिताः सर्वे पाण्डवैश्च महात्मभिः ।
रेमिरे पाण्डवैः सार्धं ते पाञ्चालपुरे तदा ॥ ॥ १-२१८-७५ (९५६७)

इति श्रीमन्माहाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
अष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

आदिपर्व - अध्याय २१९
॥ श्रीः ॥
१.२१९. अध्यायः २१९

Mahabharata - Adi Parva - Chapter Topics
विदुरात् ज्ञातपाण्डववृत्तान्तेन धृतराष्ट्रेण
द्रौपद्यानयनार्थमाज्ञापनम् ॥ १ ॥
धृतराष्ट्रसमीपे कर्णदुर्योधनयोर्भाषणम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२१९-० (९५६८)
वैशम्पायन उवाच। १-२१९-०क्ष् (१२१३)

वृत्ते स्वयंवरे चैव राजानः सर्व एव ते ।
यथागतं विप्रजग्मुर्विदित्वा पाण्डवान्वृतान् ॥ १-२१९-१ (९५६९)
अथ दुर्योधनो राजा विमना भ्रातृभिः सह ।
अश्वत्थाम्ना मातुलेन कर्णेन च कृपेण च ॥ १-२१९-२ (९५७०)
विनिवृत्तो वृतं दृष्ट्वा द्रौपद्या श्वेतवाहनम् ।
तं तु दुःशासनोऽव्रीडो मन्दंमन्दमिवाब्रवीत् ॥ १-२१९-३ (९५७१)
यद्यसौ ब्राह्मणो न स्याद्विन्देत द्रौपदीं न सः ।
न हि तं तत्त्वतो राजन्वेद कश्चिद्धनंजयम् ॥ १-२१९-४ (९५७२)
दैवं च परमं मन्ये पौरुषं चाप्यनर्थकम् ।
धिगस्तु पौरुषं मन्त्रं यद्धरन्तीह पाण्डवाः ॥ १-२१९-५ (९५७३)
ग्बध्वा चक्षूंषि नः पार्था राज्ञां च द्रुपदात्मजाम् ।
उद्वाह्य राज्ञां तैर्न्यस्तो वामः पादः पृथासुतैः ॥ १-२१९-६ (९५७४)
विमुक्ताः कथमेतेन जतुवेश्मविभुजः ।
अस्माकं पौरुषं सत्वं बुद्धिश्चापि गता ततः ॥ १-२१९-७ (९५७५)
वयं हता मातुलाद्य विश्वस्य च पुरोचनम् ।
अदग्ध्वा पाण्डवानेतान्स्वयं दग्धो हुताशने ॥ १-२१९-८ (९५७६)
मत्तो मातुल मन्येऽहं पाण्डवा बुद्धिमत्तराः ।
तेषां नास्ति भयं मृत्योर्मुक्तानां जतुवेश्मनः ॥ १-२१९-९ (९५७७)
वैशंपावयन उवाच। १-२१९-१०क्ष् (१२१४)
एवं संभाषमाणास्ते निन्दन्तश्च पुरोचनम् ।
पञ्चपुत्रां किरातीं च विदुरं च महामतिम् ॥' १-२१९-१० (९५७८)
विविशुर्हास्तिनपुरं दीना विगतचेतसः ॥ १-२१९-११ (९५७९)
त्रस्ता विगतसंकल्पा दृष्ट्वा पार्थान्महौजसः ।
मुक्तान्हव्यभुजश्चैव संयुक्तान्द्रुपदेन च ॥ १-२१९-१२ (९५८०)
धृष्टद्युम्नं तु संचिन्त्य तथैव च शिखण्डिनम् ।
द्रुपदस्यात्मजांश्चान्यान्सर्वयुद्धविशारदान् ॥ १-२१९-१३ (९५८१)
विदुरस्त्वथ ताञ्श्रुत्वा द्रौपद्या पाण्डवान्वृतान् ।
व्रीडितान्धार्तराष्ट्रांश्च भग्नदर्पानुपागतान् ॥ १-२१९-१४ (९५८२)
ततः प्रीतमनाः क्षत्ता धृतराष्ट्रं विशांपते ।
उवाच दिष्ट्या कुरवो वर्धन्त इति विस्मितः ॥ १-२१९-१५ (९५८३)
वैचित्रवीर्यस्तु नृपो निशम्य विदुरस्य तत् ।
अब्रवीत्परमप्रीतो दिष्ट्या दिष्ट्येति भारत ॥ १-२१९-१६ (९५८४)
मन्यते स वृतं पुत्रं ज्येष्ठं द्रुपदकन्यया ।
दुर्योधनमविज्ञानात्प्रज्ञाचक्षुर्नरेश्वरः ॥ १-२१९-१७ (९५८५)
अथ त्वाज्ञापयामास द्रौपद्या भूषणं बहु ।
आनीयतां वै कृष्णेति पुत्रं दुर्योधनं तदा ॥ १-२१९-१८ (९५८६)

ग्अथ स्म पश्चाद्विदुर आचख्यावम्बिकात्मजम् ।
कौरव्या इति सामान्यान्न मन्येथास्तवात्मजान् ॥ १-२११-१९ (९५८७)
वर्धन्त इति मद्वाक्याद्वर्धिताः पाण्डुनन्दनाः ।
कृष्णया संवृताः पार्था विमुक्ता राजसङ्गरात् ॥ १-२११-२० (९५८८)
दिष्ट्या कुशलिनो राजन्पूजिता द्रुपदेन च ॥ १-२११-२१ (९५८९)
वैशम्पायन उवाच। १-२११-२२क्ष् (१२१५)
एतच्छ्रुत्वा तु वचनं विदुरस्य नराधिपः ।
आकारच्छादनार्थाय दिष्ट्यादिष्ट्येति चाब्रवीत् ॥ १-२११-२२ (९५९०)
धृतराष्ट्र उवाच। १-२११-२३क्ष् (१२१६)
एवं विदुर भद्रं ते यदि जीवन्ति पाण्डवाः ।
न ममौ मे तनौ प्रीतिस्त्वद्वाक्यामृतसंभवा ॥ १-२११-२३ (९५९१)
साध्वाचारतया तेषां संबन्धो द्रुपदेन च ।
बभूव परमश्लाघ्यो दिष्ट्यादिष्ट्येति चाब्रवीत् ॥ १-२११-२४ (९५९२)
अन्ववाये वसोर्जातः प्रवरे मात्स्यके कुले ।
वृत्तविद्यातपोवृद्धः पार्थिवानां च संमतः ॥ १-२११-२५ (९५९३)
पुत्राश्चास्य तथा पौत्राः सर्वे सुचरितव्रताः ।
तेषां संबन्धिनश्चान्ये बहवः सुमहाबलाः ॥ १-२११-२६ (९५९४)
यथैव पाण्डोः पुत्रास्ते ततोऽप्यभ्यधिका मम ।
सेयमभ्यधिकान्येभ्यो वृत्तिर्विदुर मे मता ॥ १-२११-२७ (९५९५)
या प्रीतिः पाण्डुपुत्रेषु न साऽन्यत्र ममाभिभो ।
नित्योऽयं चिन्तितः क्षत्तः सत्यं सत्येन शपे ॥ १-२११-२८ (९५९६)
यत्ते कुशलिनो वीराः पाण्डुपुत्रा महारथाः ।
मित्रवन्तोऽभवन्पुत्रा दुर्योधनमुखास्तथा ॥ १-२११-२९ (९५९७)
मया श्रुतं यदा वह्नेर्दग्धाः पाण्डुसुता इति ।
तदाऽदह्यं दिवारात्रं न भोक्ष्ये न स्वपामि च ॥ १-२११-३० (९५९८)
असहायाश्चं मे पुत्रा लूनपक्षा इव द्विजाः ।
तत्त्वतः शृणु मे क्षत्तः सुसहायाः सुता मम ।
अद्य वै स्थिरसाम्राज्यमाचन्द्रार्कं ममाभवत् ॥' १-२११-३१ (९५९९)
को हि द्रुपदमासाद्य मित्रं क्षत्तः सबान्धवम् ।
न बुभूषेद्भवेनार्थी गतश्रीरपि पार्थिवः ॥ १-२११-३२ (९६००)
वैशम्पायन उवाच। १-२११-३३क्ष् (१२१७)
तं तथा भाषमाणं तु विदुरः प्रत्यभाषत ।
नित्यं भवतु ते बुद्धिरेषा राजञ्छतं समाः ।
इत्युक्त्वा प्रययौ राजन्विदुरः स्वं निवेशनम् ॥ १-२११-३३ (९६०१)
ततो दुर्योधनश्चापि राधेयश्च विशांपते ।
धृतराष्ट्रमुपागम्य वचोऽब्रूतामिदं तदा ॥ १-२११-३४ (९६०२)

सन्निधौ विदुरस्य त्वां दोषं वक्तुं न शक्नुवः ।
विविक्तमिति वक्ष्यावः किं तवेदं चिकीर्षितम् ॥ १-२१९-३५ (९६०३)
सपत्नवृद्धिं यत्तात मन्यसे वृद्धिमात्मनः ।
अभिष्टौषि च यत्क्षत्तुः समीपे द्विपदांवर ॥ १-२१९-३६ (९६०४)
अन्यस्मिन्नृप कर्तव्ये त्वमन्यत्कुरुषेऽनघ ।
तेषां बलविघातो हि कर्तव्यस्तात नित्यशः ॥ १-२१९-३७ (९६०५)
ते वयं प्राप्तकालस्य चिकीर्षां मन्त्रयामहे ।
यथा नो न ग्रसेयुस्ते सपुत्रबलबान्धवान् ॥ ॥ १-२१९-३८ (९६०६)

इति श्रीमन्महाभारते आदिपर्वमि विदुरागमनराज्यलाभपर्वणि
एकोनविंशत्यधिकद्विशततमोऽध्यायः ॥ २१९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२१९-३२ गतश्रीर्नष्टश्रीः को भवेन ऐश्वर्येणार्थी न
बुभूषेद्भवितुमिच्छेदपि तु सर्वोपीच्छेत् ॥
एकोनविंशत्यधिकद्विशततमोऽध्यायः ॥
२१९ ॥

आदिपर्व - अध्याय २२०
॥ श्रीः ॥
१.२२०. अध्यायः २२०

Mahabharata - Adi Parva - Chapter Topics
धृतराष्ट्रदुर्योधनसंवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२०-० (९६०७)
ग्वैशम्पायन उवाच। १-२२०-०क्ष् (१२१८)
दुर्योधनेनैवमुक्तः कर्णेन च विशांपते ।
पुत्रं च सूतपुत्रं च धृतराष्ट्रोऽब्रवीदिदम् ॥ ' १-२२०-१ (९६०८)
धृतराष्ट्र उवाच। १-२२०-२क्ष् (१२१९)
अहमप्येवमेवैतच्चिकीर्षामि यथा युवाम् ।
विवेक्तुं नाहमिच्छामि त्वाकारं विदुरं प्रति ॥ १-२२०-२ (९६०९)
ततस्तेषां गुणानेव कीर्तयामि विशेषतः ।
नावबुध्येत विदुरो ममाभिप्रायमिङ्गितैः ॥ १-२२०-३ (९६१०)
यच्च त्वं मन्यसे प्राप्तं तद्ब्रवीहि सुयोधन ।

राधेय मन्यसे यच्च प्राप्तकालं वदाशु मे ॥ १-२२०-४ (९६११)
दुर्योधन उवाच। १-२२०-५क्ष् (१२२०)
अद्य तान्कुशलैर्विप्रैः सुगुप्तैराप्तकारिभिः ।
कुन्तीपुत्रान्भेदयामो माद्रीपुत्रौ च पाण्डवौ ॥ १-२२०-५ (९६१२)
अथवा द्रुपदो राजा महद्भिर्वित्तसंचयैः ।
पुत्राश्चास्य प्रलोभ्यन्ताममात्याश्चैव सर्वशः ॥ १-२२०-६ (९६१३)
परित्यजेद्यथा राजा कुन्तीपुत्रं युधिष्ठिरम् ।
अथ तत्रैव वा तेषां निवासं रोचयन्तु ते ॥ १-२२०-७ (९६१४)
इहैषां दोषवद्वासं वर्णयन्तु पृथक्पृथक् ।
ते भिद्यमानास्तत्रैव मनः कुर्वन्तु पाण्डवाः ॥ १-२२०-८ (९६१५)
अथवा कुशळाः केचिदुपायनिपुणा नराः ।
इतरेतरतः पार्थान्भेदयन्त्वनुरागतः ॥ १-२२०-९ (९६१६)
व्युत्थापयन्तु वा कृष्णां बहुत्वात्सुकरं हि तत् ।
अथवा पाण्डवांस्तस्यां भेदयन्तु ततश्च ताम् ॥ १-२२०-१० (९६१७)
भीमसेनस्य वा राजन्नुपायकुशलैर्नरैः ।
मृत्युर्विधीयतां छन्नैः स हि तेषां बलाधिकः ॥ १-२२०-११ (९६१८)
तमाश्रित्य हि कौन्तेयः पुरा चास्मान्न मन्यते ।
सहि तीक्ष्णश्च शूरश्च तेषां चैव परायणम् ॥ १-२२०-१२ (९६१९)
तस्मिंस्त्वभिहते राजन्हतोत्साहा हतौजसः ।
यतिष्यन्ते न राज्याय स हि तेषां व्यपाश्रयः ॥ १-२२०-१३ (९६२०)
अजेयो ह्यर्जुनः सङ्ख्ये पृष्ठगोपे वृकोदरे ।
तमृते फाल्गुनो युद्धे राधेयस्य न पादभाक् ॥ १-२२०-१४ (९६२१)
ते जानानास्तु दौर्बल्यं भीमसेनमृते महत् ।
अस्मान्बलवतो ज्ञात्वा न यतिष्यन्ति दुर्बलाः ॥ १-२२०-१५ (९६२२)
इहागतेषु वा तेषु निदेशवशवर्तिषु ।
प्रवर्तिष्यामहे राजन्यथाशास्त्रं निबर्हणम् ॥ १-२२०-१६ (९६२३)
ग्दर्पं वा वदतां तेषां केचिदत्र मनस्विनः ।
द्रुपदस्यात्मजा राजन्प्रभिद्यन्ते ततः परैः ॥' १-२२०-१७ (९६२४)
अथवा दर्शनीयाभिः प्रमदाभिर्विलोभ्यताम् ।
एकैकस्तत्र कौन्तेयस्ततः कृष्णा विरज्यताम् ॥ १-२२०-१८ (९६२५)
प्रेष्यतां चैव राधेयस्तेषामागमनाय वै ।
तैस्तैः प्रकारैः सन्नीय पात्यन्तामाप्तकारिभिः ॥ १-२२०-१९ (९६२६)
एतेषामप्युपायानां यस्ते निर्दोषवान्मतः ।
तस्य यप्रोगमातिष्ठ पुरा कालोऽतिवर्तते ॥ १-२२०-२० (९६२७)
यावद्ध्यकृतविश्वासा द्रुपदे पार्थिवर्षभे ।
तावदेव हि ते शक्या न शक्यास्तु ततः परम् ॥ १-२२०-२१ (९६२८)

एषा मम मतिस्तात निग्रहाय प्रवर्तते ।
साध्वी वा यदि वाऽसाध्वी किं वा राधेय मन्यसे ॥ ॥१-२२०-२२ (९६२९)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२२०-३ इङ्गितैश्चेष्टितैः ॥
विंशत्यधिकद्विशततमोऽध्यायः ॥
२२० ॥

आदिपर्व - अध्याय २२१
॥ श्रीः ॥
१.२२१. अध्यायः २२१

Mahabharata - Adi Parva - Chapter Topics
दुर्योधनं प्रति कर्णोनोक्तं श्रुतवतो धृतराष्ट्रस्य भीष्मादिभिः
सह मन्त्रणम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२१-० (९६३०)
कर्ण उवाच। १-२२१-०क्ष् (१२२१)
दुर्योधन तव प्रज्ञा न सम्यगिति मे मतिः ।
न ह्युपायेन ते शक्याः पाण्डवाः कुरुवर्धन ॥ १-२२१-१ (९६३१)
पूर्वमेव हि ते सूक्ष्मैरुपायैर्यतितास्त्वया ।
निग्रहीतुं तदा वीर न चैव शकितास्त्वया ॥ १-२२१-२ (९६३२)
इहैव वर्तमानास्ते समीपे तव पार्थिव ।
अजातपक्षाः शिशवः शकिता नैव बाधितुम् ॥ १-२२१-३ (९६३३)
जातपक्षा विदेशस्था विवृद्धाः सर्वशोऽद्य ते ।
नोपायसाध्याः कौन्तेया ममैषा मतिरच्युता ॥ १-२२१-४ (९६३४)
न च ते व्यसनैर्योक्तुं शक्या दिष्टकृतेन च ।
शकिताश्चेप्सवश्चैव पितृपैतामहं पदम् ॥ १-२२१-५ (९६३५)
परस्परेण भेदश्च नाधातुं तेषु शक्यते ।
एकस्यां ये रताः पत्न्यां न भिद्यन्ते परस्परम् ॥ १-२२१-६ (९६३६)
न चापि कृष्णा शक्येत तेभ्यो भेदयितुं परैः ।
परिद्यूनान्वृतवती किमुताद्य मृजावतः ॥ १-२२१-७ (९६३७)

ईप्सितश्च गुणः स्त्रीणामेकस्या बहुभर्तृता ।
तं च प्राप्तवती कृष्णा न सा भेदयितुं क्षमा ॥ १-२२१-८ (९६३८)
आर्यव्रतश्च पाञ्चाल्यो न स राजा धनप्रियः ।
न संत्यक्ष्यति कौन्तेयान्राज्यदानैरपि ध्रुवम् ॥ १-२२१-९ (९६३९)
तथाऽस्म पुत्रो गुणवाननुरक्तश्च पाण्डवान् ।
तस्मान्नोपायसाध्यांस्तानहं मन्ये कथंचन ॥ १-२२१-१० (९६४०)
इदं त्वद्य क्षमं कर्तुमस्माकं पुरुषर्षभ ।
यावन्न कृतमूलास्ते पाण्डवेया विशांपते ॥ १-२२१-११ (९६४१)
तावत्प्रहरणीयास्ते तत्तुभ्यं तात रोचताम् ।
अस्मत्पक्षो महान्यावद्यावत्पाञ्चालको लघुः ।
तावत्प्रहरणं तेषां क्रियतां मा विचारय ॥ १-२२१-१२ (९६४२)
वाहनानि प्रभूतानि मित्राणि च कुलानि च ।
यावन्न तेषां गान्धारे तावद्विक्रम पार्थिव ॥ १-२२१-१३ (९६४३)
यावच्च राजा पाञ्चाल्यो नोद्यमे कुरुते मनः ।
सह पुत्रैर्महावीर्यैस्तावद्विक्रम पार्थिव ॥ १-२२१-१४ (९६४४)
यावन्नायाति वार्ष्णेयः कर्षन्यादववाहिनीम् ।
राज्यार्थे पाण्डवेयानां पाञ्चाल्यसदनं प्रति ॥ १-२२१-१५ (९६४५)
वसूनि विविधान्भोगान्राज्यमेव च केवलम् ।
नात्याज्यमस्ति कृष्णस्य पाण्डवार्थे कथंचन ॥ १-२२१-१६ (९६४६)
विक्रमेण मही प्राप्ता भरतेन महात्मना ।
विक्रमेण च लोकांस्त्रीञ्जितवान्पाकशासनः ॥ १-२२१-१७ (९६४७)
विक्रमं च प्रशंसन्ति क्षत्रियस्य विशांपते ।
स्वको हि धर्मः शूराणां विक्रमः पार्थिवर्षभ ॥ १-२२१-१८ (९६४८)
ते बलेन वयं राजन्महता चतुरङ्गिणा ।
प्रमथ्य द्रुपदं शीघ्रमानयामेह पाण्डवान् ॥ १-२२१-१९ (९६४९)
न हि साम्ना न दानेन न भदेन च पाण्डवाः ।
शक्याः साधयितुं तस्माद्विक्रमेणैव ताञ्जहि ॥ १-२२१-२० (९६५०)
तान्विक्रमेण जित्वेमामखिलां भुङ्क्ष्व मेदिनीम् ।
अतो नान्यं प्रपश्यामि कार्योपायं जनाधिप ॥ १-२२१-२१ (९६५१)
वैशम्पायन उवाच। १-२२१-२२क्ष् (१२२२)
श्रुत्वा तु राधेयवचो धृतराष्ट्रः प्रतापवान् ।
अभिपूज्य ततः पश्चादिदं वचनमब्रवीत् ॥ १-२२१-२२ (९६५२)
उपपन्नं महाप्राज्ञे कृतास्त्रे सूतनन्दने ।
त्वयि विक्रमसंपन्नमिदं वचनमीदृशम् ॥ १-२२१-२३ (९६५३)
भूय एव तु भीष्मश्च द्रोणो विदुर एव च ।
युवां च कुरुतं बुद्धिं भवेद्या नः सुखोदया ॥ १-२२१-२४ (९६५४)

तत आनाय्य तान्सर्वान्मन्त्रिणः सुमहायशाः ।
धृतराष्ट्रो महाराज मन्त्रयामास वै तदा ॥ ॥१-२२१-२५ (९६५५)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
एकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२२१-७ परिद्यूनान् शोच्यान् । मृजावतः सुवेषान् ॥
एकविंशत्यधिकद्विशततमोऽध्यायः ॥
२२१ ॥

आदिपर्व - अध्याय २२२
॥ श्रीः ॥
१.२२२. अध्यायः २२२

Mahabharata - Adi Parva - Chapter Topics
भीष्मेण दुर्योधनादिसमीपे पाण्डवेक्ष्योऽर्धराज्यं दातव्यमिति
स्वाबिप्रायकथनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२२-० (९६५६)
भीष्म उवाच। १-२२२-०क्ष् (१२२३)
न रोचते विग्रहो मे पाण्डुपुत्रैः कथंचन ।
यथैव धृतराष्ट्रो मे तथा पाण्डुरसंशयम् ॥ १-२२२-१ (९६५७)
गान्धार्याश्च यथा पुत्रास्तथा कुन्तीसुता मम ।
यथा च मम ते रक्ष्या धृतराष्ट्र तथा तव ॥ १-२२२-२ (९६५८)
यथा च मम राज्ञश्च तथा दुर्योधनस्य ते ।
तथा कुरूणां सर्वेषामन्येषामपि पार्थिव ॥ १-२२२-३ (९६५९)
एवं गते विग्रहं तैर्न रोचे
सन्धाय वीरैर्दीयतामर्धभूमिः ।
तेषामपीदं प्रपितामहानां
राज्यं पितुश्चैव कुरूत्तमानाम् ॥ १-२२२-४ (९६६०)
दुर्योधन यथा र्जायं त्वमिदं तात पश्यसि ।
मम पैतृकमित्येवं तेऽपि पश्यन्ति पाण्डवाः ॥ १-२२२-५ (९६६१)
यदि राज्यं न ते प्राप्ताः पाण्डवेया यशस्विनः ।
कुत एव तवापीदं भारतस्यापि कस्यचित् ॥ १-२२२-६ (९६६२)

अधर्मेण च राज्यं त्वं प्राप्तवान्भरतर्षभ ।
तेऽपि राज्यमनुप्राप्ताः पूर्वमेवेति मे मतिः ॥ १-२२२-७ (९६६३)
मधुरेणैव राज्यस्य तेषामर्धं प्रदीयताम् ।
एतद्धि पुरुषव्याघ्र हितं सर्वजनस्य च ॥ १-२२२-८ (९६६४)
अतोऽन्यथा चेत्क्रियते न हितं नो भविष्यति ।
तवाप्यकीर्तिः सकला भविष्यति न संशयः ॥ १-२२२-९ (९६६५)
कीर्तिरक्षणमातिष्ठ कीर्तिर्हि परमं बलम् ।
नष्टकीर्तेर्मनुष्यस्य जीवितं ह्यफळं स्मृतम् ॥ १-२२२-१० (९६६६)
यावत्कीर्तिर्मनुष्यस्य न प्रणश्यति कौरव ।
तावज्जीवति गान्धरे नष्टकीर्तिस्तु नश्यति ॥ १-२२२-११ (९६६७)
तमिमं समुपातिष्ठ धर्मं कुरुकुलोचितम् ।
अनुरूपं महाबाहो पूर्वेषामात्मनः कुरु ॥ १-२२२-१२ (९६६८)
दिष्ट्या ध्रियन्ते पार्था हि दिष्ट्या जीवति सा पृथा ।
दिष्ट्या पुरोचनः पापो न सकामोऽत्ययं गतः ॥ १-२२२-१३ (९६६९)
यदाप्रभृति दग्धास्ते कुन्तिभोजसुतासुताः ।
तदाप्रभृति गान्धारे न शक्नोम्यभिवीक्षितुम् ॥ १-२२२-१४ (९६७०)
लोके प्राणभृतां किंचिच्छ्रुत्वा कुन्तीं तथागताम् ।
न चापि दोषेण तथा लोको मन्येत्पुरोचनम् ।
यथा त्वां पुरुषव्याघ्र लोको दोषेण गच्छति ॥ १-२२२-१५ (९६७१)
तदिदं जीवितं तेषां तव किल्बिषनाशनम् ।
संमन्तव्यं महाराज पाण्डवानां च दर्शनम् ॥ १-२२२-१६ (९६७२)
न चापि तेषां वीराणां जीवतां कुरुनन्दन ।
पित्र्योंशः शक्य आदातुमपि वज्रभृता स्वयं ॥ १-२२२-१७ (९६७३)
ते सर्वेऽवस्थिता धर्मे सर्वे चैवैकचेतसः ।
अधर्मेण निरस्ताश्च तुल्ये राज्ये विशेषतः ॥ १-२२२-१८ (९६७४)
यदि धर्मस्त्वया कार्यो यदि कार्यं प्रियं च मे ।
क्षेमं च यदि कर्तव्यं तेषामर्धं प्रदीयताम् ॥ ॥ १-२२२-१९ (९६७५)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२२२-८ मधुरेण प्रीत्या ॥
१-२२२-१३ ध्रियन्ते जीवन्ति ॥
१-२२२-१५ गच्छति अवगच्छति ॥
द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥

आदिपर्व - अध्याय २२३
॥ श्रीः ॥
१.२२३. अध्यायः २२३

Mahabharata - Adi Parva - Chapter Topics
पाण्डवाः संविभाज्या इति द्रोणवचनम् ॥ १ ॥
तद्विरोधितया कर्णेन अम्बुवीचवृत्तान्तकथनम् ॥ २ ॥
मदुक्तं न क्रियते चेत्कुरवो विनङ्क्ष्यन्तीति द्रोणेनोक्तिः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२३-० (९६७६)
द्रोण उवाच। १-२२३-०क्ष् (१२२४)
मन्त्राय समुपानीतैर्धृतराष्ट्र हितैर्नृप ।
धर्म्यमर्थ्यं यशस्यं च वाच्यमित्यनुशुश्रुम ॥ १-२२३-१ (९६७७)
ममाप्येषा मतिस्तात या भीष्मस्य महात्मनः ।
संविभज्यास्तु कौन्तेया धर्म एष सनातनः ॥ १-२२३-२ (९६७८)
प्रेष्यतां द्रुपदायाशु नरः कश्चित्प्रियंवदः ।
बहुलं रत्नमादाय तेषामर्थाय भारत ॥ १-२२३-३ (९६७९)
मिथः कृत्यं च तस्मै स आदाय वसु गच्छतु ।
वृद्धिं च परमां ब्रूयात्तत्संयोगोद्भवां तथा ॥ १-२२३-४ (९६८०)
संप्रीयमाणं त्वां ब्रूयाद्राजन्दुर्योधनं तथा ।
असकृद्द्रुपदे चैव धृष्टद्युम्ने च भारत ॥ १-२२३-५ (९६८१)
उचितत्वं प्रियत्वं च योगस्यापि च वर्णयेत् ।
पुनःपुनश्च कौन्त्येयान्माद्रीपुत्रौ च सान्त्वयन् ॥ १-२२३-६ (९६८२)
हिरण्मयानि शुभ्राणि बहून्याभरणानि च ।
वचनात्तव राजेन्द्र द्रौपद्याः संप्रयच्छतु ॥ १-२२३-७ (९६८३)
तथा द्रुपदपुत्राणां सर्वेषां भरतर्षभ ।
पाण्डवानां च सर्वेषां कुन्त्या युक्तानि यानि च ॥ १-२२३-८ (९६८४)
ग्दत्त्वा तानि महार्हाणि पाण्डवान्संप्रहर्षय।'
एवं सान्त्वसमायुक्तं द्रुपदं पाण्डवैः सह ।
उक्त्वा सोऽनन्तरं ब्रूयात्तेषामागमनं प्रति ॥ १-२२३-९ (९६८५)
अनुज्ञातेषु वीरेषु बलं गच्छतु शोभनम् ।
दुःशासनो विकर्णश्चाप्यानेतुं पाण्डवानिह ॥ १-२२३-१० (९६८६)
ततस्ते पाण्डवाः श्रेष्ठाः पूज्यमानाः सदा त्वया ।

प्रकृतीनामनुमते पदे स्थास्यन्ति पैतृके ॥ १-२२३-११ (९६८७)
एतत्तव महाराज तेषु पुत्रेषु चैव हि ।
वृत्तमौपयिकं मन्ये भीष्मेण सह भारत ॥ १-२२३-१२ (९६८८)
कर्ण उवाच। १-२२३-१३क्ष् (१२२५)
योजितावर्थमानाभ्यां सर्वकार्येष्वनन्तरौ ।
न मन्त्रयेतां त्वच्छ्रेयः किमद्भुततरं ततः ॥ १-२२३-१३ (९६८९)
दुष्टेन मनसा यो वै प्रच्छन्नेनान्तरात्मना ।
ब्रूयान्नि)श्रेयसं नाम कथं कुर्यात्सतां मतम् ॥ १-२२३-१४ (९६९०)
न मित्राण्यर्थकृच्छ्रेषु श्रेयसे चेतराय वा ।
विधिपूर्वं हि सर्वस्य दुःखं वा यदि वा सुखम् ॥ १-२२३-१५ (९६९१)
कृतप्रज्ञोऽकृतप्रज्ञो बालो वृद्धश्च मानवः ।
ससहायोऽसहायश्च सर्वं सर्वत्र विन्दति ॥ १-२२३-१६ (९६९२)
श्रूयते हि पुरा कश्चिदम्बुवीच इतीश्वरः ।
आसीद्राजगृहे राजा मागधानां महीक्षिताम् ॥ १-२२३-१७ (९६९३)
स हीनः करणैः सर्वैरुच्छ्वासपरमो नृपः ।
अमात्यसंस्थः सर्वेषु कार्येष्वेवाभवत्तदा ॥ १-२२३-१८ (९६९४)
तस्यामात्यो महाकर्णिर्बभूवैकेश्वरस्तदा ।
स लब्धबलमात्मानं मन्यमानोऽवमन्यते ॥ १-२२३-१९ (९६९५)
स राज्ञ उपभोग्यानि स्त्रियो रत्नधनानि च ।
आददे सर्वशो मूढ ऐश्वर्यं च स्वयं तदा ॥ १-२२३-२० (९६९६)
तदादाय च लुब्धस्य लोभाल्लोभोऽभ्यवर्धत ।
तथाहि सर्वमादाय राज्यमस्य जिहीर्षति ॥ १-२२३-२१ (९६९७)
हीनस्य करणैः सर्वैरच्छ्वासपरमस्य च ।
यतमानोऽपि तद्राज्यं न शशाकेति नः श्रुतं ॥ १-२२३-२२ (९६९८)
किमन्यद्विहिता नूनं तस्य सा पुरुषेन्द्रता ।
यदि ते विहितं राज्यं भविष्यति विशांपते ॥ १-२२३-२३ (९६९९)
मिषतः सर्वलोकस्य स्थास्यते त्वयि तद्ध्रुवम् ।
अतोऽन्यथा चेद्विहितं यतमानो न लप्स्यसे ॥ १-२२३-२४ (९७००)
एवं विद्वन्नुपादत्स्व मन्त्रिणां साध्वसाधुताम् ।
दुष्टानां चैव बोद्धव्यमदुष्टानां च भाषितम् ॥ १-२२३-२५ (९७०१)
द्रोण उवाच। १-२२३-२६क्ष् (१२२६)
विद्म ते भावदोषेण यदर्थमिदमुच्यते ।
दुष्ट पाण्डवहेतोस्त्वं दोषमाख्यापयस्युत ॥ १-२२३-२६ (९७०२)
हितं तु परमं कर्ण ब्रवीमि कुलवर्धनम् ।
अथ त्वं मन्यसे दुष्टं ब्रूहि यत्परमं हितम् ॥ १-२२३-२७ (९७०३)
अतोऽन्यथा चेत्क्रियते यद्ब्रवीमि परं हितम् ।

कुरवो वै विनङ्क्ष्यन्ति नचिरेणैव मे मतिः ॥ ॥१-२२३-२८ (९७०४)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२२३-४ मिथः कृत्यं सांबन्धिकं वरपक्षीयैर्वध्वलंकारादिकन्यापक्षीयैर्वरालंकारादि ॥
१-२२३-१५ विधिपूर्वं अधृष्टकारणकम् ॥
१-२२३-१७ अम्बुवीर इति श्रुतः इति घ । पाठः । विनिन्द इति वितश्रुः इति ङ पाठः । ईश्वरः समर्थः । राजगृहे तन्नामके नगरे ॥
त्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥
२२३ ॥

आदिपर्व - अध्याय २२४
॥ श्रीः ॥
१.२२४. अध्यायः २२४

Mahabharata - Adi Parva - Chapter Topics

भीष्मद्रोणाभ्यामुक्तमेवावश्यं करणीयं पाण्डवा जेतुं न शक्याः दुर्योधनादीनां वचनं मा कुरु इति धृतराष्ट्रंप्रति विदुरस्योक्तिः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२४-० (९७०५)
विदुर उवाच । १-२२४-०क्ष् (१२२७)
राजन्निःसंशयं श्रेयो वाच्यस्त्वमसि बान्धवैः ।
न त्वशुश्रूषमाणे वै वाक्यं संप्रति तिष्ठति ॥ १-२२४-१ (९७०६)
प्रियं हितं च तद्वाक्यमुक्तवान्कुरुसत्तमः ।
भीष्मः शान्तनवो राजन्प्रतिगृह्णासि तन्न च ॥ १-२२४-२ (९७०७)
तथा द्रोणेन बहुधा भाषितं हितमुत्तमम् ।
तच्च राधासुतः कर्णो मन्यते न हितं तव ॥ १-२२४-३ (९७०८)
चिन्तयंश्च न पश्यामि राजंस्तव सुहृत्तमम् ।
आभ्यां पुरुषसिंहाभ्यां यो वा स्यात्प्रज्ञयाधिकः ॥ १-२२४-४ (९७०९)
इमौ हि वृद्धौ वयसा प्रज्ञया च श्रुतेन च ।
समौ च त्वयि राजेन्द्र तथा पाण्डुसुतेषु च ॥ १-२२४-५ (९७१०)

धर्मे चानवरौ राजन्सत्यतायां च भारत ।
रामाद्दाशरथेश्चैव गयाच्चैव न संशयः ॥१-२२४-६ (९७११)
न चोक्तवन्तावश्रेयः पुरस्तादपि किंचन ।
न चाप्यपकृतं किंचिदनयोर्लक्ष्यते त्वयि ॥१-२२४-७ (९७१२)
तावुभौ पुरुषव्याघ्रावनागसि नृपे त्वयि ।
न मन्त्रयेतां त्वच्छ्रेयः कथं सत्यपराक्रमौ ॥१-२२४-८ (९७१३)
प्रज्ञावन्तौ नरश्रेष्ठावस्मिँल्लोके नराधिप ।
त्वन्निमित्तमतो नेमौ किंचिज्जिह्मं वदिष्यतः ॥१-२२४-९ (९७१४)
इति मे नैष्ठिकी बुद्धिर्वर्तते कुरुनन्दन ।
न चार्थहेतोर्धर्मज्ञौ वक्ष्यतः पक्षसंश्रितम् ॥१-२२४-१० (९७१५)
एतद्धि परमं श्रेयो मन्येऽहं तव भारत ।
दुर्योधनप्रभृतयः पुत्रा राजन्यथा तव ॥१-२२४-११ (९७१६)
तथैव पाण्डवेयास्ते पुत्रा राजन्न संशयः ।
तेषु चेदहितं किंचिन्मन्त्रयेयुरतद्विदः ॥१-२२४-१२ (९७१७)
मन्त्रिणस्ते न च श्रेयः प्रपश्यन्ति विशेषतः ।
अथ ते हृदये राजन्विशेषः स्वेषु वर्तते ।
अन्तरस्थं विवृण्वानाः श्रेयः कुर्युर्न ते ध्रुवम् ॥ १-२२४-१३ (९७१८)
एतदर्थमिमौ राजन्महात्मानौ महाद्युती ।
नोचतुर्विवृतं किंचिन्न ह्येष तव निश्चयः ॥१-२२४-१४ (९७१९)
यच्चाप्यशक्यतां तेषामाहतुः पुरुषर्षभौ ।
तत्तथा पुरुषव्याघ्र तव तद्भद्रमस्तु ते ॥१-२२४-१५ (९७२०)
कथं हि पाण्डवः श्रीमान्सव्यसाची धनञ्जयः ।
शक्यो विजेतुं संग्रामे राजन्मघवतापि हि ॥१-२२४-१६ (९७२१)
ग्भीमसेनो महाबाहुर्नागायुतबलो महान् ।
राक्षसानां भयकरो बाहुशाली महाबलः ॥१-२२४-१७ (९७२२)
हिडिम्बो निहतो येन बाहुयुद्धेन भारत ।
यो रावणसमो युद्धे तथा च बकराक्षसः ॥१-२२४-१८ (९७२३)
स युध्यमानो राजेन्द्र भीमो भीमपराक्रमः।'
कथं स्म युधि शक्येत विजेतुममरैरपि ॥ १-२२४-१९ (९७२४)
तथैव कृतिनौ युद्धे यमौ यमसुताविव ।
कथं विजेतुं शक्यौ तौ रणे जीवितुमिच्छता ॥१-२२४-२० (९७२५)
यस्मिन्धृतिरनुक्रोशः क्षमा सत्यं पराक्रमः ।
नित्यानि पाण्डवे ज्येष्ठे स जीयेत रणे कथम् ॥१-२२४-२१ (९७२६)
येषां पक्षधरो रामो येषां मन्त्री जनार्दनः ।
किं नु तैरजितं सङ्ख्ये येषां पक्षे च सात्यकिः ॥१-२२४-२२ (९७२७)
द्रुपदः श्वशुरो येषां येषां स्यालाश्च पार्षताः ।

धृष्टद्युम्नमुखा वीरा भ्रातरो द्रुपदात्मजाः ॥ १-२२४-२३ (९७२८)
ग्चैद्यश्च येषां भ्राता च शिशुपालो महारथः।'
सोऽशक्यतां च विज्ञाय तेषामग्रे च भारत ।
दायाद्यतां च धर्मेण सम्यक्तेषु समाचर ॥ १-२२४-२४ (९७२९)
इदं निर्दिष्टमयशः पुरोचनकृतं महत् ।
तेषामनुग्रहेणाद्य राजन्प्रक्षालयात्मनः ॥ १-२२४-२५ (९७३०)
तेषामनुग्रहश्चायं सर्वेषां चैव नः कुले ।
जीवितं च परं श्रेयः क्षत्रस्य च विवर्धनम् ॥ १-२२४-२६ (९७३१)
द्रुपदोऽपि महान्राजा कृतवैरश्च नः पुरा ।
तस्य संग्रहणं राजन्स्वपक्षस्य विवर्धनम् ॥ १-२२४-२७ (९७३२)
बलवन्तश्च दाशार्हा बहवश्च विशांपते ।
यतः कृष्णस्ततः सर्वे यतः कृष्णस्ततो जयः ॥ १-२२४-२८ (९७३३)
यच्च साम्नैव शक्येत कार्यं साधयितुं नृप ।
को दैवशप्तस्तत्कार्यं विग्रहेण समाचरेत् ॥ १-२२४-२९ (९७३४)
श्रुत्वा च जीवतः पार्थान्पौरजानपदा जनाः ।
बलवद्दर्शने हृष्टास्तेषां राजन्प्रियं कुरु ॥ १-२२४-३० (९७३५)
दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
अधर्मयुक्ता दुष्प्रज्ञा बाला मैषां वचः कृथाः ॥ १-२२४-३१ (९७३६)
उक्तमेतत्पुरा राजन्मया गुणवतस्तव ।
दुर्योधनापराधेन प्रजेयं वै विनङ्क्ष्यति ॥ ॥ १-२२४-३२ (९७३७)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२२४-६ अनवरौ श्रेष्ठौ ॥
१-२२४-७ अनयोः आभ्याम् ॥
१-२२४-२४ दायाद्यतां पितृधनभोजनार्हताम् ॥
चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥
२२४ ॥

आदिपर्व - अध्याय २२५
॥ श्रीः ॥
१.२२५. अध्यायः २२५

Mahabharata - Adi Parva - Chapter Topics
धृतराष्ट्राज्ञया विदुरस्य द्रुपदनगरगमनम् ॥ १ ॥

तत्र श्रीकृष्णादीनां समीपे धृतराष्ट्रसन्देशकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२५-० (९७३८)
धृतराष्ट्र उवाच। १-२२५-०क्ष् (१२२८)
भीष्मः शान्तनवो विद्वान्द्रोणश्च भगवानृषिः ।
गहितं च परमं सत्यमब्रूतां वाक्यमुत्तमम्।'
हितं च परमं वाक्यं त्वं च सत्यं ब्रवीषि माम् ॥ १-२२५-१ (९७३९)
यथैव पाण्डोस्ते वीराः कुन्तीपुत्रा महारथाः ।
तथैव धर्मतः सर्वे मम पुत्रा न संशयः ॥ १-२२५-२ (९७४०)
यथैव मम पुत्राणामिदं राज्यं विधीयते ।
तथैव पाण्डुपुत्राणामिदं राज्यं न संशयः ॥ १-२२५-३ (९७४१)
क्षत्तरानय गच्छैतान्सह मात्रा सुसत्कृतान् ।
तया च देवरूपिण्या कृष्णया सह भारत ॥ १-२२५-४ (९७४२)
दिष्ट्या जीवन्ति ते पार्था दिष्ट्या जीवति सा पृथा ।
दिष्ट्या द्रुपदकन्यां च लब्धवन्तो महारथाः ॥ १-२२५-५ (९७४३)
दिष्ट्या वर्धामहे सर्वे दिष्ट्या शान्तः पुरोचनः ।
दिष्ट्या मम परं दुःखमपनीतं महाद्युते ॥ १-२२५-६ (९७४४)
ग्त्वमेव गत्वा विदुर तानिहानय मा चिरम्। १-२२५-७ (९७४५)
वैशम्पायन उवाच ।
एवमुक्तस्ततः क्षत्ता रथमारुह्य शीघ्रगम् ।
आगात्कतिपयाहोभिः पाञ्चालान्राजधर्मवित्'॥ १-२२५-७क्ष् (१२२९)
ततो जगाम विदुरो धृतराष्ट्रस्य शासनात् ।
सकाशं यज्ञसेनस्य पाण्डवानां च भारत ॥ १-२२५-८ (९७४६)
समुपादाय रत्नानि वसूनि विविधानि च ।
द्रौपद्याः पाण्डवानां च यज्ञसेनस्य चैव ह ॥ १-२२५-९ (९७४७)
तत्र गत्वा स धर्मज्ञः सर्वशास्त्रविशारदः ।
द्रुपदं न्यायतो राजन्संयुक्तमुपतस्थिवान् ॥ १-२२५-१० (९७४८)
स चापि प्रतिजग्राह धर्मेण विदुरं ततः ।
चक्रतुश्च यथान्यायं कुशलप्रश्नसंविदम् ॥ १-२२५-११ (९७४९)
ददर्श पाण्डवांस्तत्र वासुदेवं च भारत ।
स्नेहात्परिष्वज्य स तान्पप्रच्छानामयं ततः ॥ १-२२५-१२ (९७५०)
तैश्चाप्यमितबुद्धिः स पूजितो हि यथाक्रमम् ।
वचनाद्धृतराष्ट्रस्य स्नेहयुक्तं पुनःपुनः ॥ १-२२५-१३ (९७५१)
पप्रच्छानामयं राजंस्ततस्तान्पाण्डुनन्दनान् ।

प्रददौ चापि रत्नानि विविधानि वसूनि च ॥ १-२२५-१४ (९७५२)
पाण्डवानां च कुन्त्याश्च द्रौपद्याश्च विशांपते ।
द्रुपदस्य च पुत्राणां यथा दत्तानि कौरवैः ॥ १-२२५-१५ (९७५३)
प्रोवाच चामितमतिः प्रश्रितं विनयान्वितः ।
द्रुपदं पाण्डुपुत्राणां सन्निधौ केशवस्य च ॥ १-२२५-१६ (९७५४)
विदुर उवाच। १-२२५-१७क्ष् (१२३०)
राजञ्छृणु सहामात्यः सपुत्रश्च वचो मम ।
धृतराष्ट्रः सपुत्रस्त्वां सहामात्यः सबान्धवः ॥ १-२२५-१७ (९७५५)
अब्रवीत्कुशलं राजन्प्रीयमाणः पुनःपुनः ।
प्रीतिमांस्ते दृढं चापि संबन्धेन नराधिप ॥ १-२२५-१८ (९७५६)
तथा भीष्मः शान्तनवः कौरवैः सह सर्वशः ।
कुशलं त्वां महाप्राज्ञः सर्वतः परिपृच्छति ॥ १-२२५-१९ (९७५७)
भारद्वाजो महाप्राज्ञो द्रोणः प्रियसखस्तव ।
समाश्लेषमुपेत्य त्वां कुशलं परिपृच्छति ॥ १-२२५-२० (९७५८)
धृतराष्ट्रश्च पाञ्चाल्य त्वया संबन्धमेयिवान् ।
कृतार्थं मन्यतेत्मानं तथा सर्वेऽपि कौरवाः ॥ १-२२५-२१ (९७५९)
न तथा राज्यसंप्राप्तिस्तेषां प्रीतिकरी मता ।
यथा संबन्धकं प्राप्य यज्ञसेन त्वया सह ॥ १-२२५-२२ (९७६०)
एतद्विदित्वा तु भवान्प्रस्थापयतु पाण्डवान् ।
द्रष्टुं हि पाण्डुपुत्रांश्च त्वरन्ति कुरवो भृशम् ॥ १-२२५-२३ (९७६१)
विप्रोषिता दीर्घकालमेते चापि नरर्षभाः ।
उत्सुका नगरं द्रष्टुं भविष्यन्ति तथा पृथा ॥ १-२२५-२४ (९७६२)
कृष्णामपि च पाञ्चालीं सर्वाः कुरुवरस्त्रियः ।
द्रष्टुकामाः प्रतीक्षन्ते पुरं च विषयाश्च नः ॥ १-२२५-२५ (९७६३)
स भवान्पाण्डुपुत्राणामाज्ञापयतु मा चिरम् ।
गमनं सहदाराणामेतदत्र मतं मम ॥ १-२२५-२६ (९७६४)
निसृष्टेषु त्वया राजन्पाण्डवेषु महात्मसु ।
ततोऽहं प्रेषयिष्यामि धृतराष्ट्रस्य शीघ्रगान् ।
आगमिष्यन्ति कौन्तेयाः कुन्ती च सह कृष्णया ॥ ॥ १-२२५-२७ (९७६५)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥

आदिपर्व - अध्याय २२६
॥ श्रीः ॥
१.२२६. अध्यायः २२६

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानां हास्तिनपुरगमनंप्रति श्रीकृष्णद्रुपदयोरश्यनुज्ञा ॥ १ ॥
पृथाविदुरसंवादः ॥ २ ॥
प्रस्थितानां पाण्डवानां द्रुपदेन पारिबर्हदानम् ॥ ३ ॥
प्रत्युद्गमनायागतैः कौरवैः सह पाण्डवानां भीष्मादिवन्दनपुरःसरं गृहप्रवेशः ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२६-० (९७६६)
द्रुपद उवाच। १-२२६-०क्ष् (१२३१)
एवमेतन्महाप्राज्ञ यथात्थ विदुराद्य माम् ।
ममापि परमो हर्षः संबन्धेऽस्मिन्कृते प्रभो ॥ १-२२६-१ (९७६७)
गमनं चापि युक्तं स्याद्दृढमेषां महात्मनाम् ।
न तु तावन्मया युक्तमेतद्वक्तुं स्वयं गिरा ॥ १-२२६-२ (९७६८)
यदा तु मन्यते वीरः कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनार्जुनौ चैव यमौ च पुरुषर्षभौ ॥ १-२२६-३ (९७६९)
रामकृष्णौ च धर्मज्ञौ तदा गच्छन्तु पाण्डवाः ।
एतौ हि पुरुषव्याघ्रावेषां प्रियहिते रतौ ॥ १-२२६-४ (९७७०)
युधिष्ठिर उवाच। १-२२६-५क्ष् (१२३२)
परवन्तो वयं राजंस्त्वयि सर्वे सहानुगाः ।
यथा वक्ष्यसि नः प्रीत्या तत्करिष्यामहे वयम् ॥ १-२२६-५ (९७७१)
वैशम्पायन उवाच। १-२२६-६क्ष् (१२३३)
ततोऽब्रवीद्वासुदेवो गमनं रोचते मम ।
यथा वा मन्यते राजा द्रुपदः सर्वधर्मवित् ॥ १-२२६-६ (९७७२)
द्रुपद उवाच। १-२२६-७क्ष् (१२३४)
यथैव मन्यते वीरो दाशार्हः पुरुषोत्तमः ।
प्राप्तकालं महाबाहुः सा बुद्धिर्निश्चिता मम ॥ १-२२६-७ (९७७३)
यथैव हि महाभागाः कौन्तेया मम सांप्रतम् ।
तथैव वासुदेवस्य पाण्डुपुत्रा न संशयः ॥ १-२२६-८ (९७७४)
न तद्ध्यायति कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः ।
यथैषां पुरुषव्याघ्रः श्रेयो ध्यायति केशवः ॥ १-२२६-९ (९७७५)
वैशम्पायन उवाच। १-२२६-१०क्ष् (१२३५)
ग्पृथायास्तु ततो वेश्म प्रविवेश महामतिः ।
पादौ स्पृष्ट्वा पृथायास्तु शिरसा च महीं गतः ॥ १-२२६-१० (९७७६)
दृष्ट्वा तु देवरं कुन्ती शुशोच च मुहुर्मुहुः। १-२२६-११ (९७७७)

कुन्त्युवाच ।
वैचित्रवीर्य ते पुत्राः कथंचिज्जीवितास्त्वया ॥ १-२२६-११क्ष् (१२३६)
त्वत्प्रसादाज्जतुगृहे मृताः प्रत्यागतास्तथा ।
कूर्मी चिन्तयते पुत्रान्यत्र वा तत्र संमता ॥१-२२६-१२ (९७७८)
चिन्तया वर्धिताः पुत्रा यथा कुशलिनस्तथा ।
तव पुत्रास्तु जीवन्ति त्वद्भक्त्या भरतर्षभ ॥१-२२६-१३ (९७७९)
यथा परभृतः पुत्रानरिष्टा वर्धयेत्सदा ।
तथैव पुत्रास्तु मम त्वया तात सुरक्षिताः ॥१-२२६-१४ (९७८०)
क्लेशास्तु बहवः प्राप्तास्तथा प्राणान्तिका मया ।
अतः परं न जानामि कर्तव्यं ज्ञातुमर्हसि ॥१-२२६-१५ (९७८१)
विदुर उवाच।१-२२६-१६क्ष् (१२३७)
न विनश्यन्ति लोकेषु तव पुत्रा महाबलाः ।
अचिरेणैव कालेन स्वराज्यस्था भवन्ति ते ॥१-२२६-१६ (९७८२)
बान्धवैः सहिताः सर्वे न शोकं कुरु माधवि। १-२२६-१७ (९७८३)
वैशम्पायन उवाच।'
ततस्ते समनुज्ञाता द्रुपदेन महात्मना ॥ १-२२६-१७क्ष् (१२३८)
पाण्डवाश्चैव कृष्णश्च विदुरश्च महामतिः ।
आदाय द्रौपदीं कृष्णां कुन्तीं चैव यशस्विनीम् ॥१-२२६-१८ (९७८४)
सविहारं सुखं जग्मुर्नगरं नागसाह्वयम् ।
ग्सुवर्णकक्ष्याग्रैवेयान्सुवर्णाङ्कुशभूषितान् ॥१-२२६-१९ (९७८५)
जाम्बूनदपरिष्कारान्प्रभिन्नकरटामुखान् ।
अधिष्ठितान्महामात्रैः सर्वशस्त्रसमन्वितान् ॥१-२२६-२० (९७८६)
सहस्रं प्रददौ राजा गजानां वरवर्मिणाम् ।
रथानां च सहस्रं वै सुवर्णमणिचित्रितम् ॥१-२२६-२१ (९७८७)
चतुर्युजां भानुमच्च पञ्चानां प्रददौ तदा ।
सुवर्णपरिबर्हाणां वरचामरमालिनाम् ॥१-२२६-२२ (९७८८)
जात्यश्वानां च पञ्चाशत्सहस्रं प्रददौ नृपः ।
दासीनामयुतं राजा प्रददौ वरभूषणम् ।
ततः सहस्रं दासानां प्रददौ वरधन्वनाम् ॥ १-२२६-२३ (९७८९)
हैमानि शय्यासनबाजनानि
द्रव्याणि चान्यानि च गोधनानि ।
पृथक्पृथक्चैव ददौ स कोटिं
पाञ्चालराजः परमप्रहृष्टः ॥ १-२२६-२४ (९७९०)
शिबिकानां शतं पूर्णं वाहान्पञ्चशतं नरान् ॥ १-२२६-२५ (९७९१)
एवमेतानि पाञ्चालो जन्यार्थे प्रददौ धनम् ।
हरणं चापि पाञ्चाल्या ज्ञातिदेयं च सोमकः ॥१-२२६-२६ (९७९२)

धृष्टद्युम्नो ययौ तत्र भगिनीं गृह्य भारत ।
नानद्यमानो बहुशस्तूर्यघोषैः सहस्रशः ॥' १-२२६-२७ (९७९३)
श्रुत्वा चोपस्थितान्वीरान्धृतराष्ट्रोऽम्बिकासुतः ।
प्रतिग्रहाय पाण्डूनां प्रेषयामास कौरवान् ॥ १-२२६-२८ (९७९४)
विकर्णं च महेष्वासं चित्रसेनं च भारत ।
द्रोणं च परमेष्वासं गौतमं कृपमेव च ॥ १-२२६-२९ (९७९५)
तैस्तैः परिवृताः शूरैः शोभमाना महारथाः ।
नगरं हास्तिनपुरं शनैः प्रविविशुस्तदा ॥ १-२२६-३० (९७९६)
'पाण्डवानागताञ्छ्रुत्वा नागरास्तु कुतूहलात् ।
मण्डयाञ्चक्रिरे तत्र नगरं नागसाह्वयम् ॥ १-२२६-३१ (९७९७)
मुक्तपुष्पावकीर्णं तु जलसिक्तं तु सर्वतः ।
धूपितं दिव्यधूपेन मङ्गलैश्चाभिसंवृतम् ॥ १-२२६-३२ (९७९८)
पताकोच्छ्रितमाल्यं च पुरमप्रतिमं बभौ ।
शङ्खभेरीनिनादैश्च नानावादित्रनिस्वनैः ॥' १-२२६-३३ (९७९९)
कौतूहलेन नगरं पूर्यमाणमिवाभवत् ।
यत्र ते पुरुषव्याघ्राः शोकदुःखसमन्विताः ॥ १-२२६-३४ (९८००)
'निर्गताश्च पुरात्पूर्वं धृतराष्ट्रप्रबाधिताः ।
पुनर्निवृत्ता दिष्ट्या वै सह मात्रा परन्तपाः ॥ १-२२६-३५ (९८०१)
इत्येवमीरिता वाचो जनैः प्रियचिकीर्षुभिः।'
तत उच्चावचा वाचः प्रियाः सर्वत्र भारत ॥ १-२२६-३६ (९८०२)
उदीरितास्तदाऽशृण्वन्पाण्डवा हृदयंगमाः। १-२२६-३७ (९८०३)
पौरा ऊचुः
अयं स पुरुषव्याघ्रः पुनरायाति धर्मवित् ॥ १-२२६-३७क्ष् (१२३९)
यो नः स्वानिव दायादान्धर्मेण परिरक्षति ।
अद्य पाण्डुर्महाराजो वनादिव मनःप्रियम् ॥ १-२२६-३८ (९८०४)
आगतश्चैवमस्माकं चिकीर्षन्नात्र संशयः ।
किं न्वद्य सुकृतं कर्म सर्वेषां नः प्रियं परम् ॥ १-२२६-३९ (९८०५)
यन्नः कुन्तीसुता वीरा भर्तारः पुनरागताः ।
यदि दत्तं यदि हुतं यदि वाप्यस्ति नस्तपः ।
तेन तिष्ठन्तु नगरे पाण्डवाः शरदां शतम् ॥ १-२२६-४० (९८०६)
ततस्ते धृतराष्ट्रस्य भीष्मस्य च महात्मनः ।
अन्येषां च तदर्हाणां चक्रुः पादाभिवन्दनम् ॥ १-२२६-४१ (९८०७)
पृष्टास्तु कुशलप्रश्नं सर्वेण नगरेण ते ।
समाविशन्त वेश्मानि धृतराष्ट्रस्य शासनात् ॥ ॥ १-२२६-४२ (९८०८)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि

षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥

आदिपर्व - अध्याय २२७
॥ श्रीः ॥
१.२२७. अध्यायः २२७

Mahabharata - Adi Parva - Chapter Topics
द्रौपद्या नमस्कृतया गान्धार्या तद्रूपदर्शनेन तस्याः
स्वपुत्रमृत्युत्ववितर्कः ॥ १ ॥
धृतराष्ट्रेण युधिष्ठिरस्य धर्मराज्येऽभिषेकः ॥ २ ॥
पाण्डवानां खाण्डवप्रस्थगमनम् ॥ ३ ॥
श्रीकृष्णचिन्तितेनेन्द्रेण विश्वकर्मणः प्रेषणम् ॥ ४ ॥
विश्वकर्मणा इन्द्रप्रस्थपुरनिर्माणम् ॥ ५ ॥
तत्रागतानां सर्वेषां विसर्जनम् ॥ ६ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२७-० (९८०९)
ग्वैशम्पायन उवाच। १-२२७-०क्ष् (१२४०)
दुर्योधनस्य महिषी काशिराजसुता तदा ।
धृतराष्ट्रस्य पुत्राणां वधूभिः सहिता तदा ॥ १-२२७-१ (९८१०)
पाञ्चालीं प्रतिजग्राह साध्वीं श्रियमिवापराम् ।
पूजयामास पूजार्हां शचीदेवीमिवागताम् ॥ १-२२७-२ (९८११)
ववन्दे तत्र गान्धारीं कृष्णया सह माधवी ।
आशिषश्च प्रयुक्त्वा तु पाञ्चालीं परिषस्वजे ॥ १-२२७-३ (९८१२)
परिष्वज्यैव गान्धारी कृष्णां कमललोचनाम् ।
पुत्राणां मम पाञ्चाली मृत्युरेवेत्यमन्यत ॥ १-२२७-४ (९८१३)
संचिन्त्य विदुरं प्राह युक्तितः सुबलात्मजा ।
कुन्तीं राजसुतां क्षत्तः सवधूं सपरिच्छदाम् ॥ १-२२७-५ (९८१४)
पाण्डोर्निवेशनं शीघ्रं नीयतां यदि रोचते ।
करणेन मुहूर्तेन नक्षत्रेण शुभे तिथौ ॥ १-२२७-६ (९८१५)
यथा सुखं तथा कुन्ती रंस्यते स्वगृहे सुतैः ।
तथेत्येव तदा क्षत्ता कारयामास तत्तथा ॥ १-२२७-७ (९८१६)
पूजयामासुरत्यर्थं बान्धवाः पाण्डवांस्तदा ।
नागराः श्रेणिमुख्याश्च पूजयन्ति स्म पाण्डवान् ॥ १-२२७-८ (९८१७)
भीष्मो द्रोणः कृपः कर्णो बाह्लीकः ससुतस्तदा ।

शासनाद्धृतराष्ट्रस्य अकुर्वन्नतिथिक्रियाम् ॥ १-२२७-९ (९८१८)
एवं विहरतां तेषां पाण्डवानां महात्मनाम् ।
नेता सर्वस्य कार्यस्य विदुरो राजशासनात् ॥' १-२२७-१० (९८१९)
विश्रान्तास्ते महात्मानः कंचित्कालं सकेशवाः ।
आहूता धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥ १-२२७-११ (९८२०)
धृतराष्ट्र उवाच। १-२२७-१२क्ष् (१२४१)
भ्रातृभिः सह कौन्तेय निबोधेदं वचो मम ।
ग्पाण्डुना वर्धितं राज्यं पाण्डुना पालितं जगत् ॥ १-२२७-१२ (९८२१)
शासनान्मम कौन्तेय मम भ्राता महाबलः ।
कृतवान्दुष्करं कर्म नित्यमेव विशांपते ॥ १-२२७-१३ (९८२२)
तस्मात्त्वमपि कौन्तेय शासनं कुरु मा चिरम् ।
मम पुत्रा दुरात्मानः सर्वेऽहंकारसंयुताः ॥ १-२२७-१४ (९८२३)
शासनं न करिष्यन्ति मम नित्यं युधिष्ठिर ।
स्वकार्यनिरतैर्नित्यमवलिप्तैर्दुरात्मभिः ॥' १-२२७-१५ (९८२४)
पुनर्वै विग्रहो मा भूत्खाण्डवप्रस्थमाविश ।
न हि वो वसतस्तत्र कश्चिच्छक्तः प्रबाधितुम् ॥ १-२२७-१६ (९८२५)
संरक्ष्यमाणान्पार्थेन त्रिदशानिव वज्रिणा ।
अर्धराज्यं तु संप्राप्य खाण्डवप्रस्थणाविश ॥ १-२२७-१७ (९८२६)
ग्केशवो यदि मन्यते तत्कर्तव्यमसंशयम् ॥' १-२२७-१८ (९८२७)
वैशम्पायन उवाच। १-२२७-१९क्ष् (१२४२)
प्रतिगृह्य तु तद्वाक्यं नृपं सर्वे प्रणम्य च ।
ग्वासुदेवेन संमन्त्र्य पाण्डवाः समुपाविशन् ॥ १-२२७-१९ (९८२८)
धृतराष्ट्र उवाच। १-२२७-२०क्ष् (१२४३)
अभिषेकस्य संभारान्क्षत्तरानय मा चिरम् ।
अभिषिक्तं करिष्यामि ह्यद्य वै कुरुनन्दनम् ॥ १-२२७-२० (९८२९)
ब्राह्मणा नैगमश्रेष्ठाः श्रेणीमुख्याश्च सर्वतः ।
आहूयन्तां प्रकृतयो बान्धवाश्च विशेषतः ॥ १-२२७-२१ (९८३०)
पुण्याहं वाच्यतां तात गोसहस्रं प्रदीयताम् ।
ग्राममुख्याश्च विप्रेभ्यो दीयन्तां बहुदक्षिणाः ॥ १-२२७-२२ (९८३१)
अङ्गदे मकुटं क्षत्तर्हस्ताभरणमानय ।
मुक्तावलीश्च हारं च निष्काणि कटकानि च ॥ १-२२७-२३ (९८३२)
कटिबन्धश्च सूत्रं च तथोदरनिबन्धनम् ।
अष्टोत्तरसहस्रं तु ब्राह्मणाधिष्ठिता गजाः ॥ १-२२७-२४ (९८३३)
जाह्नवीसलिलं शीघ्रमानीयन्तां पुरोहितैः ।
अभिषेकोदकक्लिन्नं सर्वाभरणभूषितम् ॥ १-२२७-२५ (९८३४)
औपवाह्योपरिगतं दिव्यचारमरवीजितम् ।

सुवर्णमणिचित्रेण श्वेतच्छत्रेण शोभितम् ॥ १-२२७-२६ (९८३५)
जयेति द्विजवाक्येनु स्तूयमानं नृपैस्तथा ।
दृष्ट्वा कुन्तीसुतं ज्येष्ठमाजमीढं युधिष्ठिरम् ॥ १-२२७-२७ (९८३६)
प्रीताः प्रीतेन मनसा प्रशंसन्तु परे जनाः ।
पाण्डोः कृतोपकारस्य राज्यं दत्वा ममैव च ॥ १-२२७-२८ (९८३७)
प्रतिक्रिया कृतमिदं भविष्यति न संशयः ।
भीष्मो द्रोणः कृपः क्षत्ता साधुसाध्वित्यथाब्रुवन् ॥ १-२२७-२९ (९८३८)
श्रीवासुदेव उवाच। १-२२७-३०क्ष् (१२४४)
युक्तमेतन्महाभाग कौरवाणां यशस्करम् ।
शीघ्रमद्यैव राजेन्द्र त्वयोक्तं कर्तुमर्हसि ॥ १-२२७-३० (९८३९)
इत्येवमुक्तो वार्ष्णेयस्त्वरयामास तत्तदा ।
तथोक्तं धृतराष्ट्रेण कारयामास केशवः ॥ १-२२७-३१ (९८४०)
तस्मिन्क्षणे महाराज कृष्णद्वैपायनस्तदा ।
आगत्य कुरुभिः सर्वैः पूजितः ससुहृद्गणैः ॥ १-२२७-३२ (९८४१)
मूर्धाभिषिक्तैः सहितो ब्राह्मणैर्वेदपारगैः ।
कारयामास विधिवत्केशवानुमते तदा ॥ १-२२७-३३ (९८४२)
कृपो द्रोणश्च भीष्मश्च धौम्यश्च व्यासकेशवौ ।
बाह्लीकः सोमदत्तश्च चातुर्वेद्यपुरस्कृताः ॥ १-२२७-३४ (९८४३)
अभिषेकं तदा चक्रुर्भद्रपीठे सुसंस्कृतम् ॥ १-२२७-३५ (९८४४)
व्यास उवाच। १-२२७-३६क्ष् (१२४५)
जित्वा तु पृथिवीं कृत्स्नां वशे कृत्वा नृपान्भवान् ।
राजसूयादिभिर्यज्ञैः क्रतुभिर्वरदक्षिणैः ॥ १-२२७-३६ (९८४५)
स्नात्वा ह्यवभृथस्नानं मोदतां बान्धवैः सह ।
एवमुक्त्वा तु ते सर्वे आशीर्भिरभिपूजयन् ॥ १-२२७-३७ (९८४६)
मूर्धाभिषिक्तः कौरव्यः सर्वाभरणभूषितः ।
जयेति संस्तुतो राजा प्रददौ धनमक्षयम् ॥ १-२२७-३८ (९८४७)
सर्वमूर्धाभिषिक्तैश्च पूजितः कुरनन्दनः ।
औपवाह्यमथारुह्य श्वेतच्छत्रेण शोभितः ॥ १-२२७-३९ (९८४८)
रराज राजाभिमतो महेन्द्र इव दैवतैः ।
ततः प्रदक्षिणीकृत्य नगरं नागसाह्वयम् ॥ १-२२७-४० (९८४९)
प्रविवेश तदा राजा नागरैः पूजितो गृहम् ।
मूर्धाभिषिक्तं कौन्तेयमभ्यगच्छन्त कौरवाः ॥ १-२२७-४१ (९८५०)
गान्धारिपुत्राः शोचन्तः सर्वे ते सह बान्धवैः ।
ज्ञात्वा शोकं च पुत्राणां धृतराष्ट्रोऽब्रवीदिदं ॥ १-२२७-४२ (९८५१)
समक्षं वासुदेवस्य कुरूणां च समक्षतः ।
अभिषेकस्त्वया प्राप्तो दुष्प्रापो ह्यकृतात्मभिः ॥ १-२२७-४३ (९८५२)

गच्छ त्वमद्यैव नृप कृतकृत्योऽसि कौरव ।
आयुः पुरूरवा राजन्नहुषेण ययातिना ॥ १-२२७-४४ (९८५३)
तत्रैव निवसन्ति स्म खाण्डवे तु नृपोत्तम ।
राजधानी तु सर्वेषां पौरवाणां महाभुज ॥ १-२२७-४५ (९८५४)
विनाशितं मुनिगणैर्लोभाद्बुधसुतस्य वै ।
तस्मात्त्वं खाण्डवप्रस्थं पुरं राष्ट्रं च वर्धय ॥ १-२२७-४६ (९८५५)
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च कृतलक्षणाः ।
त्वद्भक्त्या जन्तवश्चान्ये भजन्त्येव पुरं शुभम् ॥ १-२२७-४७ (९८५६)
पुरं राष्ट्रं समृद्धं वै धनधान्यसमाकुलम् ।
तस्माद्गच्छस्व कौन्तेय भ्रातृभिः सहितोऽनघ ॥ १-२२७-४८ (९८५७)
वैशम्पायन उवाच। १-२२७-४९क्ष् (१२४६)
प्रतिगृह्य तु तद्वाक्यं तस्मै सर्वे प्रणम्य च ।
रथैर्नागैर्हयैश्चापि सहितास्तु पदातिभिः ॥ १-२२७-४९ (९८५८)
प्रतस्थिरे ततो घोषसंयुक्तैः स्यन्दनैर्वरैः ।
तान्दृष्ट्वा नागराः सर्वे भक्त्या चैव प्रतस्थिरे ॥ १-२२७-५० (९८५९)
गच्छतः पाण्डवैः सार्धं दृष्ट्वा नागपुरालयात् ।
पाण्डवैः सहिता गन्तुं नार्हतेति च नागरान् ॥ १-२२७-५१ (९८६०)
घोषयामास नगरे धार्तराष्ट्रः ससौबलः।'
ततस्ते पाण्डवास्तत्र गत्वा कृष्णपुरोगमाः ॥ १-२२७-५२ (९८६१)
मण्डयाञ्चक्रिरे तद्वै पुरं स्वर्गादिव च्युतम् ।
'वासुदेवो जगन्नाथश्चिन्तयामास वासवम् ॥ १-२२७-५३ (९८६२)
महेन्द्रश्चिन्तितो राजन्विश्वकर्माणमादिशत् ।
विश्वकर्मन्महाप्राज्ञ अद्यप्रभृति तत्पुरम् ॥ १-२२७-५४ (९८६३)
इन्द्रप्रस्थमिति ख्यातं दिव्यं भूम्यां भविष्यति ।
महेन्द्रशासनाद्गत्वा विश्वकर्मा तु केशवम् ॥ १-२२७-५५ (९८६४)
प्रणम्य प्रणिपातार्हं किं करोमीत्यभाषत ।
वासुदेवस्तु तच्छ्रुत्वा विश्वकर्माणमूचिवान् ॥ १-२२७-५६ (९८६५)
कुरुष्व कुरुराजस्य महेन्द्रपुरसन्निभम् ।
इन्द्रेण कृतनामानमिन्द्रप्रस्थं महापुरम् ॥ १-२२७-५७ (९८६६)
वैशम्पायन उवाच।' १-२२७-५८क्ष् (१२४७)
ततः पुण्ये शिवे देशे शान्तिं कृत्वा महारथाः ।
स्वस्तिवाच्य यथान्यायमिन्द्रप्रस्थं भवत्विति ॥ १-२२७-५८ (९८६७)
तत्पुरं मापयामासुर्द्वैपायनपुरोगमाः ।
'ततः स विश्वकर्मा तु चकार पुरमुत्तमम् ॥' १-२२७-५९ (९८६८)
सागरप्रतिरूपाभिः परिखाभिरलङ्कृतम् ।
प्राकारेण च संपन्नं दिवमावृत्य तिष्ठता ॥ १-२२७-६० (९८६९)

पाण्डुराभ्रप्रकाशेन हिमरश्मिनिभेन च ।
शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवती यथा ॥ १-२२७-६१ (९८७०)
द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्च शोभितम् ।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः ॥ १-२२७-६२ (९८७१)
विविधैरपि निर्विद्धैः शस्त्रोपेतैः सुसंवृतैः ।
शक्तिभिश्चावृतं तद्धि द्विजिह्वैरिव पन्नगैः ॥ १-२२७-६३ (९८७२)
तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितम् ।
थीक्ष्णाङ्कुशशतघ्नीभिर्यन्त्रजालैश्च शोभितम् ॥ १-२२७-६४ (९८७३)
आयसैश्च महाचक्रैः शुशुभे तत्पुरोत्तमम् ।
सुविभक्तमहारथ्यं देवताबाधवर्जितम् ॥ १-२२७-६५ (९८७४)
विरोचमानं विविधैः पाण्डुरैर्भवनोत्तमैः ।
तत्त्रिविष्टपसंकाशमिन्द्रप्रस्थं व्यरोचत ॥ १-२२७-६६ (९८७५)
मेघवृन्दमिवाकाशे विद्धं विद्युत्समावृतम् ।
तत्र रम्ये शिवे देशे कौरव्यस्य निवेशनम् ॥ १-२२७-६७ (९८७६)
शुशुभे धनसंपूर्णं धनाध्यक्षक्षयोपमम् ।
तत्रागच्छन्द्विजा राजन्सर्ववेदविदां वराः ॥ १-२२७-६८ (९८७७)
निवासं रोचयन्ति स्म सर्वभाषाविदस्तथा ।
वणिजश्चाययुस्तत्र नानादिग्भ्यो धनार्थिनः ॥ १-२२७-६९ (९८७८)
सर्वशिल्पविदस्तत्र वासायाभ्यागमंस्तदा ।
उद्यानानि च रम्याणि नगरस्य समन्ततः ॥ १-२२७-७० (९८७९)
आम्रैराम्रातकैर्नीपैरशोकैश्चम्पकैस्तथा ।
पुन्नागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा ॥ १-२२७-७१ (९८८०)
शालतालतमालैश्च बकुलैश्च सकेतकैः ।
मनोहरैः सुपुष्पैश्च फलभारावनामितैः ॥ १-२२७-७२ (९८८१)
प्राचीनामलकैर्लोध्रैरङ्कोलैश्च सुपिष्पितैः ।
जम्बूभिः पाटलाभिश्च कुब्जकैरतिमुक्तकैः ॥ १-२२७-७३ (९८८२)
करवीरैः पारिजातैरन्यैश्च विविधैर्द्रुमैः ।
नित्यपुष्पफलोपेतैर्नानाद्विजगणायुतैः ॥ १-२२७-७४ (९८८३)
मत्तबर्हिणसंघुष्टकोकिलैश्च सदामदैः ।
गृहैरादर्शविमलैर्विविधैश्च लतागृहैः ॥ १-२२७-७५ (९८८४)
मनोहरैश्चित्रगृहैस्तथाऽजगतिप्रवतैः ।
वापीभिर्विविधाभिश्च पूर्णाभिः परमाम्भसा ॥ १-२२७-७६ (९८८५)
सरोभिरतिरम्यैश्च पद्मोत्पलसुगन्धिभिः ।
हंसकारण्डवयुतैश्चक्रवाकोपशोभितैः ॥ १-२२७-७७ (९८८६)
रम्याश्च विविधास्तत्र पुष्करिण्यो वनावृताः ।
तडागानि च रम्याणि बृहन्ति सुबहूनि च ॥ १-२२७-७८ (९८८७)

ग्नदी च नन्दिनी नाम सा पुरीमुपगूहति ।
चातुर्वर्ण्यसमाकीर्णमन्यैः शिल्पिभिरावृतम् ॥ १-२२७-७९ (९८८८)
सर्वदाभिसृतं सद्भिः कारितं विश्वकर्मणा ।
उपभोगसमृद्धैश्च सर्वद्रव्यसमावृतम् ॥ १-२२७-८० (९८८९)
नित्यमार्यजनोपेतं नरनारीगणैर्युतम् ।
वाजिवारणसंपूर्णं गोभिरुष्ट्रैः खरैरजैः ॥ १-२२७-८१ (९८९०)
तत्त्रिविष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत ।
पुरीं सर्वगुणोपेतां निर्मितां विश्वकर्मणा ॥ १-२२७-८२ (९८९१)
पौरवाणामधिपतिः कुन्तीपुत्रो युधिष्ठिरः ।
कृतमङ्गलसत्कारैर्ब्राह्मणैर्वेदपारगैः ॥ १-२२७-८३ (९८९२)
द्वैपायनं पुरस्कृत्य धौम्यस्याभिमते स्थितः ।
भ्रातृभिः सहितो राजा राजमार्गमतीत्य च ॥ १-२२७-८४ (९८९३)
औपवाह्यगतो राजा केशवेन सहाभिभूः ।
तोरणद्वारसुमुखं द्वात्रिंशद्द्वारसंयुतम् ॥ १-२२७-८५ (९८९४)
वर्धमानपुरद्वारात्प्रविवेश महाद्युतिः ।
शङ्खदुन्दुभिनिर्घोषाः श्रूयन्ते बहवो भृशम् ॥ १-२२७-८६ (९८९५)
जयेति ब्राह्मणगिरः श्रूयन्ते च सहस्रशः ।
संस्तूयमानो मुनिभिः सूतमागधबन्दिभिः ॥ १-२२७-८७ (९८९६)
औपवाह्यगतो राजा राजमार्गमतीत्य च ।
कृतमङ्गलसत्कारं प्रविवेश गृहोत्तमम् ॥ १-२२७-८८ (९८९७)
प्रविश्य भवनं राजा नागरैरभिसंवृतः ।
प्रहृष्टमुदितैरासीत्सत्कारैरभिपूजितः ॥ १-२२७-८९ (९८९८)
पूजयामास विप्रेन्द्रान्केशेन महात्मना ।
ततस्तु राष्ट्रं नगरं नरनारीगणायुतम् ॥ १-२२७-९० (९८९९)
गोधनैश्च समाकीर्णं सस्यैर्वृद्धिं तदागमत् ॥' १-२२७-९१ (९९००)
तेषां पुण्यजनोपेतं राष्ट्रमाविशतां महत् ।
पाण्डवानां महाराज शश्वत्प्रीतिरवर्धत ॥ १-२२७-९२ (९९०१)
ग्सौबलेन च कर्णेन धार्तराष्ट्रैः कृपेण च ।'
तथा भीष्मेण राज्ञा च धर्मप्रणयिना सदा ॥ १-२२७-९३ (९९०२)
पाण्डवाः समपद्यन्त खाण्डवप्रस्थवासिनः ।
पञ्चभिस्तैर्महेष्वासैरिन्द्रकल्पैः समावृतम् ॥ १-२२७-९४ (९९०३)
शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवती यथा ।
ग्ततस्तु विश्वकर्माणं पूजयित्वा विसृज्य च ॥ १-२२७-९५ (९९०४)
द्वैपायनं च संपूज्य विसृज्य च नराधिपः ।
वार्ष्णेयमब्रवीद्राजा गन्तुकामं कृतक्षणम् ॥ १-२२७-९६ (९९०५)
तव प्रसादाद्वार्ष्णेय राज्यं प्राप्तं मयाऽनघ ।

प्रसादादेव ते वीर शून्यं राष्ट्रं सुदुर्गमम् ॥१-२२७-९७ (९९०६)
तवैव तु प्रसादेन राज्यस्थाश्च भवामहे ।
गतिस्त्वमापत्कालेऽपि पाण्डवानां च माधव ॥१-२२७-९८ (९९०७)
ज्ञात्वा तु कृत्यं कर्तव्यं कारयस्व भवान्हि नः ।
यदिष्टमनुमन्तव्यं पाण्डवानां त्वयाऽनघ ॥१-२२७-९९ (९९०८)
श्रीवासुदेव उवाच।१-२२७-१००क्ष् (१२४८)
त्वत्प्रभावान्महाराज्यं संप्राप्तं हि स्वधर्मतः ।
पितृपैतामहं राज्यं कथं न स्यात्तव प्रभो ॥१-२२७-१०० (९९०९)
धार्तराष्ट्रा दुराचाराः किं करिष्यन्ति पाण्डवान् ।
यथेष्टं पालय जगच्छश्वद्धर्मधुरं वह ॥१-२२७-१०१ (९९१०)
पुनः पुनश्च संहर्षाद्ब्राह्मणान्भर पौरव ।
अद्यैव नारदः श्रीमानागमिष्यति सत्वरः ॥१-२२७-१०२ (९९११)
आदत्स्व तस्य वाक्यानि शासनं कुरु तस्य वै ।
एवमुक्त्वा ततः कुन्तीमभिवाद्य जनार्दनः ॥१-२२७-१०३ (९९१२)
उवाच श्लक्ष्णया वाचा गमिष्यामि नमोस्तु ते। १-२२७-१०४ (९९१३)
कुन्त्युवाच ।
जातुषं गृहमासाद्य मया प्राप्तं यदानघ ॥ १-२२७-१०४क्ष् (१२४९)
आर्येण समभिज्ञातं त्वया वै यदुपुङ्गव ।
त्वया नाथेन गोविन्द दुःखं तीर्णं महत्तरम् ॥१-२२७-१०५ (९९१४)
त्वं हि नाथस्त्वनाथानां दरिद्राणां विशेषतः ।
सर्वदुःखानि शाम्यन्ति तव संदर्शनान्मम ॥१-२२७-१०६ (९९१५)
स्मरस्वैनान्महाप्राज्ञ तेन जीवन्ति पाण्डवाः ॥ १-२२७-१०७ (९९१६)
वैशम्पायन उवाच।१-२२७-१०८क्ष् (१२५०)
करिष्यामीति चामन्त्र्य अभिवाद्य पितृष्वसाम् ।
गमनाय मतिं चक्रे वासुदेवः सहानुगः ॥' १-२२७-१०८ (९९१७)
तान्निवेश्य ततो वीरः सह रामेण कौरवान् ।
ययौ द्वारवतीं राजन्पाण्डवानुमते तदा ॥ ॥१-२२७-१०९ (९९१८)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥२२७ ॥

आदिपर्व - अध्याय २२८
॥ श्रीः ॥
१.२२८. अध्यायः २२८

Mahabharata - Adi Parva - Chapter Topics
पाण्डवानां समीपे नारदागमनम् ॥१ ॥

१-२२८-० (९९१९)
जनमेजय उवाच। १-२२८-०क्ष् (१२५१)
एवं संप्राप्य राज्यं तदिन्द्रप्रस्थे तपोधन ।
अत ऊर्ध्वं नरव्याघ्राः किमकुर्वत पाण्डवाः ॥ १-२२८-१ (९९२०)
सर्व एव महात्मानः सर्वे मम पितामहाः ।
द्रौपदी धर्मपत्नी च कथं तानन्ववर्तत ॥ १-२२८-२ (९९२१)
कथमासुश्च कृष्णायामेकस्यां ते नरर्षभाः ।
वर्तमाना महाभागा नाभिद्यन्त परस्परम् ॥ १-२२८-३ (९९२२)
श्रोतुमिच्छाम्यहं तत्र विस्तरेण यथातथम् ।
तेषां चेष्टितमन्योन्यं युक्तानां कृष्णया सह ॥ १-२२८-४ (९९२३)
वैशम्पायन उवाच। १-२२८-५क्ष् (१२५२)
धृतराष्ट्राभ्यनुज्ञाता इन्द्रप्रस्थं प्रविश्य तत् ।
रेमिरे पुरुषव्याघ्राः कृष्णया सह पाण्डवाः ॥ १-२२८-५ (९९२४)
प्राप्य राज्यं महातेजाः सत्यसन्धो युधिष्ठिरः ।
पालयामास धर्मेण पृथिवीं भ्रातृभिः सह ॥ १-२२८-६ (९९२५)
जितारयो महात्मानः सत्यधर्मपरायणाः ।
एवं पुरमिदं प्राप्य तत्रोषुः पाण्डुनन्दनाः ॥ १-२२८-७ (९९२६)
कुर्वाणाः पौरकार्याणि सर्वाणि भरतर्षभाः ।
आसांचक्रुर्महार्हेषु पार्थिवेष्वासनेषु च ॥ १-२२८-८ (९९२७)
तेषु तत्रोपविष्टेषु पाण्डवेषु महात्मसु ।
आययौ धर्मराजं तु द्रष्टुकामोऽथ नारदः ॥ १-२२८-९ (९९२८)
ग्पथा नक्षत्रजुष्टेन सुपर्णाचरितेन च ।
चन्द्रसूर्यप्रकाशेन सेवितेन महर्षिभिः ॥ १-२२८-१० (९९२९)
नभस्स्थलेन दिव्येन दुर्लभेनातपस्विनाम् ।
भूतार्चितो भूतधरां राष्ट्रमन्दिरभूषिताम् ॥ १-२२८-११ (९९३०)
अवेक्षमाणो द्युतिमानाजगाम महातपाः ।
सर्ववेदान्तगो विप्रः सर्ववेदाङ्गपारगः ॥ १-२२८-१२ (९९३१)
परेण तपसा युक्तो ब्राह्मेण तपसा वृतः ।
नये नीतौ च निस्तो विश्रुतश्च महामुनिः ॥ १-२२८-१३ (९९३२)
परात्परतरं प्राप्तो धर्मान्समभिजग्मिवान् ।
भावितात्मा गतरजाः शान्तो मृदुर्ऋजुर्दिवजः ॥ १-२२८-१४ (९९३३)
धर्मेणाधिगतः सर्वैर्देवदानवमानुषैः ।
क्षीणकर्मसु पापेषु भूतेषु विविधेषु च ॥ १-२२८-१५ (९९३४)

सर्वथा कृतमर्यादो वेदेषु विविधेषु च ।
शतशः सोमपा यज्ञे पुण्ये पुण्यकृदग्निचित् ॥ १-२२८-१६ (९९३५)
ऋक्सामयजुषां वेत्ता न्यायदृग्धर्मकोविदः ।
ऋजुरारोहबान्वृद्धो भूयिष्ठपथिकोऽनघः ॥ १-२२८-१७ (९९३६)
श्लक्ष्णया शिखयोपेतः संपन्नः परमत्विषा ।
अवदाते च सूक्ष्मे च दिव्ये च रचिते शुभे ॥ १-२२८-१८ (९९३७)
महेन्द्रदत्ते महती बिभ्रत्परमवाससी ।
जाम्बूनदमये दिव्ये गण्डूपदमुखे नवे ॥ १-२२८-१९ (९९३८)
अग्न्यर्कसदृशे दिव्ये धारयन्कुण्डले शुभे ।
राजतच्छत्रमुच्छ्रित्य चित्रं परमवर्चसम् ॥ १-२२८-२० (९९३९)
प्राप्य दुष्प्रापमन्येन ब्रह्मवर्चसमुत्तमम् ।
भवने भूमिपालस्य बृहस्पतिरिवाप्लुतः ॥ १-२२८-२१ (९९४०)
संहितायां च सर्वेषां स्थितस्योपस्थितस्य च ।
द्विपदस्य च धर्मस्य क्रमधर्मस्य पारगः ॥ १-२२८-२२ (९९४१)
गाधा सामानुसामज्ञः साम्नां परमवल्गुनाम् ।
आत्मनः सर्वमोक्षिभ्यः कृतिमान्कृत्यवित्सदा ॥ १-२२८-२३ (९९४२)
यजुर्धर्मैर्बहुविधैर्मतो मतिमतां वरः ।
विदितार्थः समश्चैव च्छेत्ता निगमसंशयान् ॥ १-२२८-२४ (९९४३)
अर्थनिर्वचने नित्यं संशयच्छिदसंशयः ।
प्रकृत्या धर्मकुशलो दाता धर्मविशारदः ॥ १-२२८-२५ (९९४४)
लोपेनागमधर्मेण संक्रमेण च वृत्तिषु ।
एकशब्दांश्च नानार्थानेकार्थांश्च पृथक्कृतान् ॥ १-२२८-२६ (९९४५)
पृथगर्थाभिधानांश्च प्रयोगानन्ववेक्षिता ।
प्रमाणभूतो लोकेषु सर्वाधिकरणेषु च ॥ १-२२८-२७ (९९४६)
सर्ववर्णविकारेषु नित्यं कुशलपूजितः ।
स्वरेऽस्वरे च विविधे वृत्तेषु विविधेषु च ॥ १-२२८-२८ (९९४७)
समस्थानेषु सर्वेषु समाम्नायेषु धातुषु ।
उद्देश्यानां समाख्याता सर्वमाख्यातमुद्दिशन् ॥ १-२२८-२९ (९९४८)
अभिसन्धिषु तत्त्वज्ञः पदान्यङ्गान्यनुस्मरन् ।
कालधर्मेण निर्दिष्टं यथार्थं च विचारयन् ॥ १-२२८-३० (९९४९)
चिकीर्षितं च यो वेत्ता यथा लोकेन संवृतम् ।
विभाषितं च समयं भाषितं हृदयंगमम् ॥ १-२२८-३१ (९९५०)
आत्मने च परस्मै च स्वरसंस्कारयोगवित् ।
एषां स्वराणां ज्ञाता च बोद्धा प्रवचनः स्वराट् ॥ १-२२८-३२ (९९५१)
विज्ञाता चोक्तवाक्यानामेकतां बहुतां तथा ।
बोद्धा हि परमार्थांश्च विविधांश्च व्यतिक्रमान् ॥ १-२२८-३३ (९९५२)

अभेदतश्च बहुशो बहुशश्चापि भेदतः ।
वक्ता विविधवाक्यानां नानादेशसमीक्षिता ॥१-२२८-३४ (९९५३)
पञ्चागमांश्च विविधानादेशांश्च समीक्षिता ।
नानार्थकुशलस्तत्र तद्धितेषु च कृत्स्नशः ॥१-२२८-३५ (९९५४)
परिभूषयिता वाचां वर्णतः स्वरतोऽर्थतः ।
प्रत्ययं च समाख्याता नियतं प्रतिधातुकम् ॥१-२२८-३६ (९९५५)
पञ्च चाक्षरजातानि स्वरसंज्ञानि यानि च ।
तमागतमृषिं दृष्ट्वा प्रत्युद्गम्याभिवाद्य च ॥' १-२२८-३७ (९९५६)
आसनं रुचिरं तस्मै प्रददौ स युधिष्ठिरः ।
'कृष्णाजिनोत्तरे तस्मिन्नुपविष्टो महानृषिः ॥' १-२२८-३८ (९९५७)
देवर्षेरुपविष्टस्य स्वयमर्घ्यं यथाविधि ।
प्रादाद्युधिष्ठिरो धीमान्राज्यं तस्मै न्यवेदयत् ।
प्रतिगृह्य तु तां पूजामृषिः प्रीतमनास्तदा ॥ १-२२८-३९ (९९५८)
आशीर्भिर्वर्धयित्वा च तमुवाचास्यतामिति ।
निषसादाभ्यनुज्ञातस्ततो राजा युधिष्ठिरः ॥१-२२८-४० (९९५९)
प्रेषयामास कृष्णायै भगवन्तमुपस्थितम् ।
श्रुत्वैतद्द्रौपदी चापि शुचिर्भूत्वा समाहिता ॥१-२२८-४१ (९९६०)
जगाम तत्र यत्रास्ते नारदः पाण्डवैः सह ।
तस्याभिवाद्य चरणौ देवर्षेर्धर्मचारिणी ॥१-२२८-४२ (९९६१)
कृताञ्जलिः सुसंवीता स्थिताऽथ द्रुपदात्मजा ।
तस्याश्चापि स धर्मात्मा सत्यवागृषिसत्तमः ॥१-२२८-४३ (९९६२)
आशिषो विविधाः प्रोच्य राजपुत्र्यास्तु नारदः ।
गम्यतामिति होवाच भगवांस्तामनिन्दिताम् ॥१-२२८-४४ (९९६३)
गतायामथ कृष्णायां युधिष्ठिरपुरोगमान् ।
विविक्ते पाण्डवान्सर्वानुवाच भगवानृषिः ॥१-२२८-४५ (९९६४)
पाञ्चाली भवतामेका धर्मपत्नी यशस्विनी ।
यथा वो नात्र भेदः स्यात्तथा नीतिर्विधीयतां ॥१-२२८-४६ (९९६५)
सुन्दोपसुन्दौ हि पुरा भ्रातरौ सहितावुभौ ।
आस्तामवध्यावन्येषां त्रिषु लोकेषु विश्रुतौ ॥१-२२८-४७ (९९६६)
एकराज्यावेकगृहावेकशय्यासनाशनौ ।
तिलोत्तमायास्तौ हेतोरन्योन्यमभिजघ्नतुः ॥१-२२८-४८ (९९६७)
रक्ष्यतां सौहृदं तस्मादन्योन्यप्रीतिभावकम् ।
यथा वो नात्र भेदः स्यात्तत्कुरुष्व युधिष्ठिर ॥१-२२८-४९ (९९६८)
युधिष्ठिर उवाच। १-२२८-५०क्ष् (१२५३)
सुन्दोपसुन्दावसुरौ कस्य पुत्रौ महामुने ।
उत्पन्नश्च कथं भेदः कथं चान्योन्यमघ्नताम् ॥१-२२८-५० (९९६९)

अप्सरा देवकन्या वै कस्य चैषा तिलोत्तमा ।
यस्याः कामेन संमत्तौ जघ्नतुस्तौ परस्परम् ॥१-२२८-५१ (९९७०)
एतत्सर्वं यथा वृत्तं विस्तरेण तपोधन ।
श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि मे ॥ ॥१-२२८-५२ (९९७१)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
अष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥

आदिपर्व - अध्याय २२९
॥ श्रीः ॥
१.२२९. अध्यायः २२९

Mahabharata - Adi Parva - Chapter Topics
सुन्दोपसुन्दकथा--सुन्दोपसुन्दयोर्ब्रह्मणो वरलाभः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२२९-० (९९७२)
नारद उवाच। १-२२९-०क्ष् (१२५४)
शणु मे विस्तरेणेममितिहासं पुरातनम् ।
भ्रातृभिः सहितः पार्थ यथा वृत्तं युधिष्ठिर ॥१-२२९-१ (९९७३)
महासुरस्यान्ववाये हिरण्यकशिपोः पुरा ।
निकुम्भो नाम दैत्येन्द्रस्तेजस्वी बलवानभूत् ॥१-२२९-२ (९९७४)
तस्य पुत्रौ महावीर्यौ जातौ भीमपराक्रमौ ।
सुन्दोपसुन्दौ दैत्येन्द्रौ दारुणौ क्रूरमानसौ ॥१-२२९-३ (९९७५)
तावेकनिश्चयौ दैत्यावेककार्यार्थसंमतौ ।
निरन्तरमवर्तेतां समदुःखसुखावुभौ ॥१-२२९-४ (९९७६)
विनाऽन्योन्यं न भुञ्जाते विनाऽन्योन्यं न जल्पतः ।
अन्योन्यस्य प्रियकरावन्योन्यस्य प्रियंवदौ ॥१-२२९-५ (९९७७)
एकशीलसमाचारौ द्विधैवैकोऽभवत्कृतः ।
तौ विवृद्धौ महावीर्यौ कार्येष्वप्येकनिश्चयौ ॥१-२२९-६ (९९७८)
त्रैलोक्यविजयार्थाय समाधायैकनिश्चयम् ।
दीक्षां कृत्वा गतौ विन्ध्यं तावुग्रं तेपतुस्तपः ॥१-२२९-७ (९९७९)
तौ तु दीर्घेण कालेन तपोयुक्तौ बभूवतुः ।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ ॥१-२२९-८ (९९८०)
मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः ।

आत्ममांसानि जुह्वान्तौ पादाङ्गुष्ठाग्रधिष्ठितौ ।
ऊर्ध्वबाहू चानिमिषौ दीर्घकालं धृतव्रतौ ॥ १-२२९-९ (९९८१)
तयोस्तपःप्रभावेण दीर्घकालं प्रतापितः ।
धूमं प्रमुमुचे विन्ध्यस्तद्भुतमिवाभवत् ॥१-२२९-१० (९९८२)
ततो देवा भयं जग्मुरुग्रं दृष्ट्वा तयोस्तपः ।
तपोविघातार्थमथो देवा विघ्नानि चक्रिरे ॥१-२२९-११ (९९८३)
रत्नैः प्रलोभयामासुः स्त्रीभिश्चोभौ पुनःपुनः ।
न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ ॥१-२२९-१२ (९९८४)
अथ मायां पुनर्देवास्तयोश्चक्रुर्महात्मनोः ।
भगिन्यो मातरो भार्यास्तयोश्चात्मजनस्तथा ॥१-२२९-१३ (९९८५)
प्रपात्यमाना विस्रस्ताः शूलहस्तेन रक्षसा ।
भ्रष्टाभरणकेशान्ता भ्रष्टाभरणवाससः ॥१-२२९-१४ (९९८६)
अभिभाष्य ततः सर्वास्तौ त्राहीति विचुक्रुशुः ।
न च तौ चक्रतुर्भङ्गं व्रतस्य सुमहाव्रतौ ॥१-२२९-१५ (९९८७)
यदा क्षोभं नोपयाति नार्तिमन्यतरस्तयोः ।
ततः स्त्रियस्ता भूतं च सर्वमन्तरधीयत ॥१-२२९-१६ (९९८८)
ततः पितामहः साक्षादभिगम्य महासुरौ ।
वरेण च्छन्दयामास क्वलोकहितः प्रभुः ॥१-२२९-१७ (९९८९)
ततः सुन्दोपसुन्दौ तौ भ्रातरौ दृढविक्रमौ ।
दृष्ट्वा पितामहं देवं तस्थतुः प्राञ्जली तदा ॥१-२२९-१८ (९९९०)
ऊचतुश्च प्रभुं देवं ततस्तौ सहितौ तदा ।
आवयोस्तपसाऽनेन यदि प्रीतः पितामहः ॥१-२२९-१९ (९९९१)
मायाविदावस्त्रविदौ बलिनौ कामरूपिणौ ।
उभावप्यमरौ स्यावः प्रसन्नो यदि नौ प्रभुः ॥१-२२९-२० (९९९२)
ब्रह्मोवाच।१-२२९-२१क्ष् (१२५५)
ऋतेऽमरत्वं युवयोः सर्वमुक्तं भविष्यति ।
अन्यद्वृणीतं मृत्योश्च विधानममरैः सम् ॥१-२२९-२१ (९९९३)
प्रभविष्याव इति यन्महदभ्युद्यतं तपः ।
युवयोर्हेतुनानेन नामरत्वं विधीयते ॥१-२२९-२२ (९९९४)
त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः ।
हेतुनाऽनेन दैत्येन्द्रौ न वां कामं करोम्यहम् ॥१-२२९-२३ (९९९५)
सुन्दोपसुन्दावूचतुः ।
त्रिषु लोकेषु यद्भूतं किंचित्स्थावरजङ्गमम् ।
सर्वस्मान्नौ भयं न स्यादृतेऽन्योन्यं पितामह ॥ १-२२९-२४ (९९९६)
पितामह उवाच।१-२२९-२५क्ष् (१२५६)
यत्प्रार्थितं यथोक्तं च काममेतद्ददानि वाम् ।

मृत्योर्विधानमेतच्च यथावद्वा भविष्यति ॥१-२२९-२५ (९९९७)
नारद उवाच।१-२२९-२६क्ष् (१२५७)
ततः पितामहो दत्त्वा वरमेतत्तदा तयोः ।
निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह ॥१-२२९-२६ (९९९८)
लब्ध्वा वराणि दैत्येन्द्रावथ तौ भ्रातरावुभौ ।
अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ ॥१-२२९-२७ (९९९९)
तौ तु लब्धवरौ दृष्ट्वा कृतकामौ मनस्विनौ ।
सर्वः सुहृज्जनस्ताभ्यां प्रहर्षमुपजग्मिवान् ॥१-२२९-२८ (१००००)
ततस्तौ तु जटा भित्त्वा मौलिनौ संबभूवतुः ।
महार्हाभरणोपेतौ विरजोम्बरधारिणौ ॥१-२२९-२९ (१०००१)
अकालकौमुदीं चैव चक्रतुः सार्वकालिकीम् ।
नित्यः प्रमुदितः सर्वस्तयोश्चैव सुहृज्जनः ॥१-२२९-३० (१०००२)
भक्ष्यतां भुज्यतां नित्यं दीयतां रम्यतामिति ।
गीयेतां पीयतां चेति शब्दश्चासीद्गृहे गृहे ॥१-२२९-३१ (१०००३)
तत्रतत्र महानादैरुत्कृष्टतलनादितैः ।
हृष्टं प्रमुदितं सर्वं दैत्यानामभवत्पुरम् ॥१-२२९-३२ (१०००४)
तैस्तैर्विहारैर्बहुभिर्दैत्यानां कामरूपिणाम् ।
समाः संक्रीडतां तेषामहरेकमिवाभवत् ॥ ॥१-२२९-३३ (१०००५)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
एकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥

आदिपर्व - अध्याय २३०
॥ श्रीः ॥
१.२३०. अध्यायः २३०

Mahabharata - Adi Parva - Chapter Topics
सुन्दोपसुन्दयोः दिग्विजयः कुरुक्षेत्रे निवासश्च ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३०-० (१०००६)
नारद उवाच।१-२३०-०क्ष् (१२५८)
उत्सवे वृत्तमात्रे तु त्रैलोक्याकाङ्क्षिणावुभौ ।
मन्त्रयित्वा ततः सेनां तावज्ञापयतां तदा ॥१-२३०-१ (१०००७)
सुहृद्भिरप्यनुज्ञातौ दैत्यैर्वृद्धैश्च मन्त्रिभिः ।
कृत्वा प्रास्थानिकं रात्रौ मघासु ययतुस्तदा ॥१-२३०-२ (१०००८)

गदापिट्टशधारिण्या शूलमुद्गरहस्तया ।
प्रस्थितौ सह वर्मिण्या महत्या दैत्यसेनया ॥ १-२३०-३ (१०००९)
मङ्गलैः स्तुतिभिश्चापि विजयप्रतिसंहितैः ।
चारणैः स्तूयमानौ तौ जग्मतुः परया मुदा ॥ १-२३०-४ (१००१०)
तावन्तरिक्षमुत्प्लुत्य दैत्यौ कामगमावुभौ ।
देवानामेव भवनं जग्मतुर्युद्धुर्मदौ ॥ १-२३०-५ (१००११)
तयोरागमनं ज्ञात्वा वरदानं च तत्प्रभोः ।
हित्वा त्रिविष्टपं जग्मुर्ब्रह्मलोकं ततः सुराः ॥ १-२३०-६ (१००१२)
ताविन्द्रलोकं निर्जित्य यक्षरक्षोगणांस्तदा ।
खेचराण्यपि भूतानि जघ्नतुस्तीव्रविक्रमौ ॥ १-२३०-७ (१००१३)
अन्तर्भूमिगतान्नागाञ्जित्वा तौ च महारथौ ।
समुद्रवासिनीः सर्वा म्लेच्छजातीर्विजिग्यतुः ॥ १-२३०-८ (१००१४)
ततः सर्वां महीं जेतुमारब्धावुग्रशासनौ ।
सैनिकांश्च समाहूय सुतीक्ष्णं वाक्यमूचतुः ॥ १-२३०-९ (१००१५)
राजर्षयो महायज्ञैर्हव्यकव्यैर्द्विजातयः ।
तेजो बलं च देवानां वर्धन्ति श्रियं तथा ॥ १-२३०-१० (१००१६)
तेषामेवं प्रवृत्तानां सर्वेषामसुरद्विषाम् ।
संभूय सर्वैरस्माभिः कार्यः सर्वात्मना वधः ॥ १-२३०-११ (१००१७)
एवं सर्वान्समादिश्य पूर्वतीरे महोदधेः ।
क्रूरां मतिं समास्थाय जग्मतुः सर्वतोमुखौ ॥ १-२३०-१२ (१००१८)
यज्ञैर्यजन्ति ये केचिद्याजयन्ति च ये द्विजाः ।
तान्सर्वान्प्रसभं हत्वा बलिनौ जग्मतुस्ततः ॥ १-२३०-१३ (१००१९)
आश्रमेष्वग्निहोत्राणि मुनीनां भावितात्मनाम् ।
गृहीत्वा प्रक्षिपन्त्यप्सु विश्रब्धं सैनिकास्तयोः ॥ १-२३०-१४ (१००२०)
तपोधनैश्च ये क्रुद्धैः शापा उक्ता महात्मभिः ।
नाक्रामन्त तयोस्तेऽपि वरदाननिराकृताः ॥ १-२३०-१५ (१००२१)
नाक्रामन्त यदा शापा बाणा मुक्ताः शिलास्विव ।
नियमान्संपरित्यज्य व्यद्रवन्त द्विजातयः ॥ १-२३०-१६ (१००२२)
पृथिव्यां ये तपःसिद्धा दान्ताः शमपरायणाः ।
तयोर्भयाद्दुद्रुवुस्ते वैनतेयादिवोरगाः ॥ १-२३०-१७ (१००२३)
मथितैराश्रमैर्भग्नैर्विकीर्णकलशस्रुवैः ।
शून्यमासीज्जगत्सर्वं कालेनेव हतं तदा ॥ १-२३०-१८ (१००२४)
ततो राजन्नदृश्यद्भिर्ऋषिभिश्च महासुरौ ।
उभौ विनिश्चयं कृत्वा विकुर्वाते वधैषिणौ ॥ १-२३०-१९ (१००२५)
प्रभिन्नकरटौ मत्तौ भूत्वा कुञ्जररूपिणौ ।
संलीनमपि दुर्गेषु निन्यतुर्यमसादनम् ॥ १-२३०-२० (१००२६)

सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ ।
तैस्तैरुपायैस्तौ क्रूरावृषीन्दृष्ट्वा निजघ्नतुः ॥ १-२३०-२१ (१००२७)
निवृत्तयज्ञस्वाध्याया प्रनष्टनृपतिद्विजा ।
उत्सन्नोत्सवयज्ञा च बभूव वसुधा तदा ॥ १-२३०-२२ (१००२८)
हाहाभूता भयार्ता च निवृत्तविपणापणा ।
निवृत्तदेवकार्या च पुण्योद्वाहविवर्जिता ॥ १-२३०-२३ (१००२९)
निवृत्तकृषिगोरक्षा विध्वस्तनगराश्रमा ।
अस्थिकङ्कालसंकीर्णा भूर्बभूवोग्रदर्शना ॥ १-२३०-२४ (१००३०)
निवृत्तपितृकार्यं च निर्वषट्कारमङ्गलम् ।
जगत्प्रतिभयाकारं दुष्प्रेक्ष्यमभवत्तदा ॥ १-२३०-२५ (१००३१)
चन्द्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः ।
जग्मुर्विषादं तत्कर्म दृष्ट्वा सुन्दोपसुन्दयोः ॥ १-२३०-२६ (१००३२)
एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्मणा ।
निःसपत्नौ कुरुक्षेत्रे निवेशमभिचक्रतुः ॥ ॥ १-२३०-२७ (१००३३)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३०-३ प्रस्थितौ सहधर्मिण्या इति ख पाठः
। जयमरणरूपतुल्यधर्म पत्येत्यर्थः। रत्नो ॥
१-२३०-१९ अदृश्यद्भिः अदृश्यैः तृतीयाचेयं सप्तम्यर्थे
ऋषिष्वदृश्येषु सत्स्वित्यर्थः ॥
त्रिंशदधिकद्विशततमोऽध्यायः ॥
२३० ॥

आदिपर्व - अध्याय २३१
॥ श्रीः ॥
१.२३१. अध्यायः २३१

Mahabharata - Adi Parva - Chapter Topics
सुन्दोपसुन्दकृतोपद्रवं निवेद्य देवादिभिः प्रार्थितेन ब्रह्मणा
आज्ञप्तेन विश्वकर्मणा तिलोत्तमासृष्टिः ॥ १ ॥
तिलोत्तमया ब्रह्माज्ञास्वीकारः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३१-० (१००३४)
नारद उवाच। १-२३१-०क्ष् (१२५९)
ततो देवर्षयः सर्वे सिद्धाश्च परमर्षयः ।
जग्मुस्तदा परमार्तिं दृष्ट्वा तत्कदनं महत् ॥ १-२३१-१ (१००३५)
तेऽभिजग्मुर्जितक्रोधा जितात्मानो जितेन्द्रियाः ।
पितामहस्य भनं जगतः कृपया तदा ॥ १-२३१-२ (१००३६)
ततो ददृशुरासीनं सह देवैः पितामहम् ।
सिद्धैर्ब्रह्मर्षिभिश्चैव समन्तात्परिवारितम् ॥ १-२३१-३ (१००३७)
तत्र देवो महादेवस्तत्राग्निर्वायुना सह ।
चन्द्रादित्यौ च शक्रश्च पारमेष्ठ्यास्तथर्षयः ॥ १-२३१-४ (१००३८)
वैखानसा वालखिल्या वानप्रस्था मरीचिपाः ।
अजाश्चैवाविमूढाश्च तेजोगर्भास्तपस्विनः ॥ १-२३१-५ (१००३९)
ऋषयः सर्व एवैते पितामहमुपागमन् ।
ततोऽभिगम्य ते दीनाः सर्व एव महर्षयः ॥ १-२३१-६ (१००४०)
सुन्दोपसुन्दयौः कर्म सर्वमेव शशंसिरे ।
यथा हृतं यथा चैव कृतं येन क्रमेण च ॥ १-२३१-७ (१००४१)
न्यवेदयंस्ततः सर्वमखिलेन पितामहे ।
ततो देवगणाः सर्वे ते चैव परमर्षयः ॥ १-२३१-८ (१००४२)
तमेवार्थं पुरस्कृत्य पितामहमचोदयन् ।
ततः पितामहः श्रुत्वा सर्वेषां तद्वचस्तदा ॥ १-२३१-९ (१००४३)
मुहूर्तमिव संचिन्त्य कर्तव्यस्य च निश्चयम् ।
तयोर्वधं समुद्दिश्य विश्वकर्माणमाह्वयत् ॥ १-२३१-१० (१००४४)
दृष्ट्वा च विश्वकर्माणं व्यादिदेश पितामहः ।
सृज्यतां प्रार्थनीयैका प्रमदेति महातपाः ॥ १-२३१-११ (१००४५)
पितामहं नमस्कृत्य तद्वाक्यमभिनन्द्य च ।
निर्ममे योषितं दिव्यां चिन्तयित्वा पुनःपुनः ॥ १-२३१-१२ (१००४६)
त्रिषु लोकेषु यत्किंचिद्भूतं स्थावरजङ्गमम् ।
समानयद्दर्शनीयं तत्तदत्र स विश्ववित् ॥ १-२३१-१३ (१००४७)
कोटिशश्चैव रत्नानि तस्या गात्रे न्यवेशत् ।
तां रत्नसङ्घातमयीमसृजद्देवरूपिणीम् ॥ १-२३१-१४ (१००४८)
सा प्रयत्नेन महता निर्मिता विश्वकर्मणा ।
त्रिषु लोकेषु नारीणां रूपेणाप्रतिमाभवत् ॥ १-२३१-१५ (१००४९)
न तस्याः सूक्ष्ममप्यस्ति यद्गात्रे रूपसंपदा ।
नियुक्ता यत्र वा दृष्टिर्न सज्जति निरीक्षताम् ॥ १-२३१-१६ (१००५०)
सा विग्रहवतीव श्रीः कामरूपा वपुष्मती ।
गपितामहमुपातिष्ठत्किं करोमीति चाब्रवीत् ॥ १-२३१-१७ (१००५१)

प्रीतो भूत्वा स दृष्ट्वैव प्रीत्या चास्यै वरं ददौ ।
कान्तत्वं सर्वभूतानां साश्रियानुत्तमं वपुः ॥ १-२३१-१८ (१००५२)
सा तेन वरदानेन कर्तुश्च क्रियया तदा।'
जहार सर्वभूतानां चक्षूंषि च मनांसि च ॥ १-२३१-१९ (१००५३)
तिलंतिलं समानीय रत्नानां यद्विनिर्मिता ।
तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः ॥ १-२३१-२० (१००५४)
ब्रह्माणं सा नमस्कृत्य प्राञ्जलिर्वाक्यमब्रवीत् ।
किं कार्यं मयि भूतेश येनास्म्यद्येह निर्मिता ॥ १-२३१-२१ (१००५५)
पितामह उवाच। १-२३१-२२क्ष् (१२६०)
गच्छ सुन्दोपसुन्दाभ्यामसुराभ्यां तिलोत्तमे ।
प्रार्थनीयेन रूपेण कुरु भद्रे प्रलोभनम् ॥ १-२३१-२२ (१००५६)
त्वत्कृते दर्शादेव रूपसंपत्कृतेन वै ।
विरोधः स्याद्यथा ताभ्यामन्योन्येन तथा कुरु ॥ १-२३१-२३ (१००५७)
नारद उवाच। १-२३१-२४क्ष् (१२६१)
सा तथेति प्रतिज्ञाय नमस्कृत्य पितामहम् ।
चकार मण्डलं तत्र विबुधानां प्रदक्षिणम् ॥ १-२३१-२४ (१००५८)
प्राङ्मुखो भगवानास्ते दक्षिणेन महेश्वरः ।
देवाश्चैवोत्तरेणासन्सर्वतस्त्वृषयोऽभवन् ॥ १-२३१-२५ (१००५९)
कुर्वन्त्यां तु तदा तत्र मण्डलं तत्प्रदक्षिणम् ।
इन्द्रः स्थाणुश्च भगवान्धैर्येण तु परिच्युतौ ॥ १-२३१-२६ (१००६०)
द्रष्टुकामस्य चात्यर्थं गतायां पार्श्वतस्तथा ।
अन्यदञ्चितपद्माक्षं दक्षिणं निःसृतं मुखम् ॥ १-२३१-२७ (१००६१)
पृष्ठतः परिवर्तन्त्यां पश्चिमं निःसृतं मुखम् ।
गतायां चोत्तरं पार्श्वमुत्तरं निःसृतं मुखम् ॥ १-२३१-२८ (१००६२)
महेन्द्रस्यापि नेत्राणां पृष्ठतः पार्श्वतोग्रतः ।
रक्तान्तानां विशालानां सहस्रं सर्वतोऽभवत् ॥ १-२३१-२९ (१००६३)
एवं चतुर्मुखः स्थाणुर्महादेवोऽभवत्पुरा ।
तथा सहस्रनेत्रश्च बभूव बलसूदनः ॥ १-२३१-३० (१००६४)
तथा देवनिकायानां महर्षीणां च सर्वशः ।
मुखानि चाभ्यवर्तन्त येन याति तिलोत्तमा ॥ १-२३१-३१ (१००६५)
तस्या गात्रे निपतिता दृष्टिस्तेषां महात्मनाम् ।
सर्वेषामेव भूयिष्ठमृते देवं पितामहम् ॥ १-२३१-३२ (१००६६)
गच्छन्त्यां तु तया सर्वे देवाश्च परमर्षयः ।
कृतमित्येव तत्कार्यं मेनिरे रूपसंपदा ॥ १-२३१-३३ (१००६७)
तिलोत्तमायां तस्यां तु गतायां लोकभावनः ।
'कृतं कार्यमिति श्रीमानब्रवीच्च पितामहः।'

सर्वान्विसर्जयामास देवानृषिगणांश्च तान् ॥ ॥ १-२३१-३४ (१००६८)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि
एकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३१-२३ ताभ्यां तयोः ॥
१-२३१-३१ देवनिकायानां देवसङ्घानां येन देशेन मार्गेण सा याति
तथा मुखान्यभ्यवर्तन्त ॥
एकत्रिंशदधिकद्विशततमोऽध्यायः ॥
२३१ ॥

आदिपर्व - अध्याय २३२
॥ श्रीः ॥
१.२३२. अध्यायः २३२

Mahabharata - Adi Parva - Chapter Topics
सुन्दोपसुन्दलमीपे तिलोत्तमाया आगमनम् ॥ १ ॥
तस्यां सकामयोस्तयोः परस्परं गदाप्रहारेण मरणम् ॥ २ ॥
तिलोत्तमाया ब्रह्मणा वरदानम् ॥ ३ ॥
नारदोक्तामिमां कथां श्रुतवद्भिः पाण्डवैः तत्समक्षं द्रौपदीविषये
समयकरणम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३२-० (१००६९)
नारद उवाच। १-२३२-०क्ष् (१२६२)
जित्वा तु पृथिवीं दैत्यौ निःसपत्नौ गतव्यथौ ।
कृत्वा त्रैलोक्यमव्यग्रं कृतकृत्यौ बभूवतुः ॥ १-२३२-१ (१००७०)
देवगन्धर्वयक्षाणां नागपार्थिवरक्षसाम् ।
आदाय सर्वरत्नानि परां तुष्टिमुपागतौ ॥ १-२३२-२ (१००७१)
यदा न प्रतिषेद्धारस्तयोः सन्तीह केचन ॥
निरुद्योगौ तदा भूत्वा विजह्रातेऽमराविव ॥ १-२३२-३ (१००७२)
स्त्रीभिर्माल्यैश्च गन्धैश्च भक्ष्यभोज्यैः सुपुष्कलैः ।
पानैश्च विविधैर्हृद्यैः परां प्रीतिमवापतुः ॥ १-२३२-४ (१००७३)
अन्तःपुरवनोद्याने पर्वतेषु वनेषु च ।
यथेप्सितेषु देशेषु विजह्रातेऽमराविव ॥ १-२३२-५ (१००७४)

ततः कदाचिद्विन्ध्यस्य प्रस्थे समशिलातले ।
पुष्पिताग्रेषु सालेषु विहारमभिजग्मतुः ॥१-२३२-६ (१००७५)
दिव्येषु सर्वकामेषु समानीतेषु तावुभौ ।
वरासनेषु संहृष्टौ सह स्त्रीभिर्निषीदतुः ॥१-२३२-७ (१००७६)
ततो वादित्रनृत्ताभ्यामुपातिष्ठन्त तौ स्त्रियः ।
गीतैश्च स्तुतिसंयुक्तैः प्रीत्या समुपजग्मिरे ॥१-२३२-८ (१००७७)
ततस्तिलोत्तमा तत्र वने पुष्पाणि चिन्वती ।
वेषं सा क्षिप्तमाधाय रक्तेनैकेन वाससा ॥१-२३२-९ (१००७८)
नदीतीरेषु जातान्सा कर्णिकारान्प्रचिन्वती ।
शनैर्जगाम तं देशं यत्रास्तां तौ महासुरौ ॥१-२३२-१० (१००७९)
तौ तु पीत्वा वरं पानं मदरक्तान्तलोचनौ ।
दृष्ट्वैव तां वरारोहां व्यथितौ संबभूवतुः ॥१-२३२-११ (१००८०)
तावुत्थायासनं हित्वा जग्मतुर्यत्र सा स्थिता ।
उभौ च कामसंमत्तावुभौ प्रार्थयतश्च ताम् ॥१-२३२-१२ (१००८१)
दक्षिणे तां करे सुभ्रूं सुन्दो जग्राह पाणिना ।
उपसुन्दोपि जग्राह वामे पाणौ तिलोत्तमाम् ॥१-२३२-१३ (१००८२)
वरप्रदानमत्तौ तावौरसेन बलेन च ।
धनरत्नमदाभ्यां च सुरापानमदेन च ॥१-२३२-१४ (१००८३)
सर्वैरेतैर्मदैर्मत्तावन्योन्यं भ्रुकुटीकृतौ ।
मदकामसमाविष्टौ परस्परमथोचतुः ॥१-२३२-१५ (१००८४)
मम भार्या तव गुरुरिति सुन्दोऽभ्यभाषत ।
मम भार्या तव वधूरुपसुन्दोऽभ्यभाषत ॥१-२३२-१६ (१००८५)
नैषा तव ममैषेति ततस्तौ मन्युराविशत् ।
तस्या रूपेण संमत्तौ विगतस्नेहसौहृदौ ॥१-२३२-१७ (१००८६)
तस्या हेतोर्गदे भीमे संगृह्णीतामुभौ तदा ।
प्रगृह्य च गदे भीमे तस्यां तौ काममोहितौ ॥१-२३२-१८ (१००८७)
अहंपूर्वमहंपूर्वमित्यन्योन्यं निजघ्नतुः ।
तौ गदाभिहतौ भीमौ पेततुर्धरणीतले ॥१-२३२-१९ (१००८८)
रुधिरेणावसिक्ताङ्गौ द्वाविवार्कौ नभश्च्युतौ ।
ततस्ता विद्रुता नार्यः स च दैत्यगणस्तथा ॥१-२३२-२० (१००८९)
पातालमगमत्सर्वो विषादभयकम्पितः ।
ततः पितामहस्तत्र सहदेवैर्महर्षिभिः ॥१-२३२-२१ (१००९०)
आजगाम विशुद्धात्मा पूजयंश्च तिलोत्तमाम् ।
वरेण च्छन्दयामास भगवान्प्रपितामहः ॥१-२३२-२२ (१००९१)
वरं दित्सुः स तत्रैनां प्रीतः प्राह पितामहः ।
आदित्यचरिताँल्लोकान्विचरिष्यसि भामिनि ॥१-२३२-२३ (१००९२)

तेजसा च सुदृष्टां त्वां न करिष्यति कश्चन ।
एवं तस्यै वरं दत्वा सर्वलोकपितामहः ॥१-२३२-२४ (१००९३)
इन्द्रे त्रैलोक्यमाधाय ब्रह्मलोकं गतः प्रभुः ।
एवं तौ सहितौ भऊत्वा सर्वार्थेष्वेकनिश्चयौ ॥१-२३२-२५ (१००९४)
तिलोत्तमार्थं संक्रुद्धावन्योन्यमभिजघ्नतुः ।
तस्माद्ब्रवीमि वः स्नेहात्सर्वाभरतसत्तमाः ॥१-२३२-२६ (१००९५)
यथा वो नात्र भेदः स्यात्सर्वेषां द्रौपदीकृते ।
तथा कुरुत भद्रं वो मम चेत्प्रियमिच्छथ ॥१-२३२-२७ (१००९६)
वैशम्पायन उवाच। १-२३२-२८क्ष् (१२६३)
एवमुक्ता महात्मानो नारदेन महर्षिणा ।
समयं चक्रिरे राजंस्तेऽन्योन्यवशमागताः ।
समक्षं तस्य देवर्षेर्नारदस्यामितौजसः ॥ १-२३२-२८ (१००९७)
ग्एकैकस्य गृहे कृष्णा वसेद्वर्षमकल्मषा'
द्रौपद्या नः सहासीनानन्योन्यं योऽभिदर्शयेत् ।
स नो द्वादश मासानि ब्रह्मचारी वने वसेत् ॥ १-२३२-२९ (१००९८)
कृते तु समये तस्मिन्पाण्डवैर्धर्मचारिभिः ।
नारदोऽप्यगमत्प्रीत इष्टं देशं महामुनिः ॥१-२३२-३० (१००९९)
एवं तैः समयः पूर्वं कृतो नारदचोदितैः ।
न चाभिद्यन्त ते सर्वे तदान्योन्येन भारत ॥१-२३२-३१ (१०१००)
ग्अभ्यनन्दन्त ते सर्वे तदान्योन्यं च पाण्डवाः ।
एतद्विस्तरशः सर्वमाख्यातं ते नराधिप ॥१-२३२-३२ (१०१०१)
काले च तस्मिन्संपन्ने यथावज्जनमेजय ॥' ॥ १-२३२-३३ (१०१०२)

इति श्रीमन्महाभारते आदिपर्वणि विदुरागमनराज्यलाभपर्वणि द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३२ ॥ ॥ समाप्तं च विदुरागमनराज्यलाभपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२३२-२४ तेजसाऽर्कवत्परदृष्ट्यभिभावकत्वात्सुदृष्टां सम्यग्दृष्टां न करिष्यति कश्चित् ॥
द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥
२३२ ॥

आदिपर्व - अध्याय २३३
॥ श्रीः ॥
१.२३३. अध्यायः २३३

(अर्थार्जुनवनवासपर्व ॥ १५ ॥)

Mahabharata - Adi Parva - Chapter Topics

तस्करैः कस्यचिद्ब्राह्मणस्य गोहरणम् ॥ १ ॥
चोरितानां गवां प्रत्याजिहीर्षया धनुर्ग्रहणार्थं
द्रौपदीयुधिष्ठिराधिष्ठिते आयुधागारे अर्जुनस्य प्रवेशः ॥ २ ॥
चोरेभ्यः प्रत्याहृता गाः ब्राह्मणाय दत्त्वा यथासमयं अर्जुनस्य
तीर्थयात्रा ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३३-० (१०१०३)
वैशम्पायन उवाच। १-२३३-०क्ष् (१२६४)
एवं ते समयं कृत्वा न्यवसंस्तत्र पाण्डवाः ।
वशे शस्त्रप्रतापेन कुर्वन्तोऽन्यान्महीक्षितः ॥ १-२३३-१ (१०१०४)
तेषां मनुजसिंहानां पञ्चानाममितौजसाम् ।
बभूव कृष्णा सर्वेषां पार्थानां वशवर्तिनी ॥ १-२३३-२ (१०१०५)
ते तया तैश्च सा वीरैः पतिभिः सह पञ्चभिः ।
बभूव परमप्रीता नागैरिव सरस्वती ॥ १-२३३-३ (१०१०६)
वर्तमानेषु धर्मेण पाण्डवेषु महात्मसु ।
व्यवर्धन्कुरवः सर्वे हीनदोषाः सुखान्विताः ॥ १-२३३-४ (१०१०७)
अथ दीर्घेण कालेन ब्राह्मणस्य विशांपते ।
कस्यचित्तस्करा जह्रुः केचिद्गा नृपसत्तम ॥ १-२३३-५ (१०१०८)
ह्रियमाणे धने तस्मिन्ब्राह्मणः क्रोधमूर्च्छितः ।
आगम्य खाण्डवप्रस्थमुदक्रोशत्स पाण्डवान् ॥ १-२३३-६ (१०१०९)
ह्रियते गोधनं क्षुद्रैर्नृशंसैरकृतात्मभिः ।
प्रसह्य चास्मद्विषयादभ्यधावत पाण्डवाः ॥ १-२३३-७ (१०११०)
ब्राह्मणस्य प्रशान्तस्य हविर्ध्वाङ्क्षैः प्रलुप्यते ।
शार्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्दति ॥ १-२३३-८ (१०१११)
अरक्षितारं राजानं बलिषड्भागहारिणम् ।
तमाहुः सर्वलोकस्य समग्रं पापचारिणम् ॥ १-२३३-९ (१०११२)
ब्राह्मणस्वे हृते चोरैर्धर्मार्थे च विलोपिते ।
रोरूयमाणे च मयि क्रियतां हस्तधारणा ॥ १-२३३-१० (१०११३)
वैशम्पायन उवाच। १-२३३-११क्ष् (१२६५)
रोरूयमाणस्याभ्याशे भृशं विप्रस्य पाण्डवः ।
तानि वाक्यानि शुश्राव कुन्तीपुत्रो धनञ्जयः ॥ १-२३३-११ (१०११४)
श्रुत्वैव च महाबाहुर्मा भैरित्याह तं द्विजम् ।

आयुधानि च यत्रासन्पाण्डवानां महात्मनां ॥ १-२३३-१२ (१०११५)
कृष्णया सह तत्रास्ते धर्मराजो युधिष्ठिरः ।
संप्रवेशाय चाशक्तो गमनाय च पाण्डवः ॥ १-२३३-१३ (१०११६)
तस्य चार्तस्य तैर्वाक्यैश्चोद्यमानः पुनःपुनः ।
आक्रन्दे तत्र कौन्तेयश्चिन्तयामास दुःखितः ॥ १-२३३-१४ (१०११७)
ह्रियमाणे धने तस्मिन्ब्राह्मणस्य तपस्विनः ।
अश्रुप्रमार्जनं तस्य कर्तव्यमिति निश्चयः ॥ १-२३३-१५ (१०११८)
उपर्रेक्षणजोऽधर्मः सुमहान्स्यान्महीपतेः ।
यद्यस्य रुदतो द्वारि न करोम्यद्य रक्षणम् ॥ १-२३३-१६ (१०११९)
अनास्तिक्यं च सर्वेषामस्माकमपि रक्षणे ।
प्रतितिष्ठेत लोकेऽस्मिन्नधर्मश्चैव नो भवेत् ॥ १-२३३-१७ (१०१२०)
अनापृच्छ्य तु राजानं गते मयि न संशयः ।
अजातशत्रोर्नृपतेर्मयि चैवानृतं भवेत् ॥ १-२३३-१८ (१०१२१)
अनुप्रवेशे राज्ञस्तु वनवासो भवेन्मम ।
सर्वमन्यत्परिहृतं धर्षणात्तु महीपतेः ॥ १-२३३-१९ (१०१२२)
अधर्मो वै महानस्तु वने वा मरणं मम ।
शरीरस्य विनाशेन धर्म एव विशिष्यते ॥ १-२३३-२० (१०१२३)
एवं विनिश्चित्य ततः कुन्तीपुत्रो धनञ्जयः ।
अनुप्रविश्य राजानमापृच्छ्य च विशांपते ॥ १-२३३-२१ (१०१२४)
ग्मुखमाच्छाद्य निबिडमुत्तरीयेण वाससा ।
अग्रजं चार्जुनो गेहादभिवाद्याशु निःसृतः ॥' १-२३३-२२ (१०१२५)
धनुरादाय संहृष्टो ब्राह्मणं प्रत्यभाषत ।
ब्राह्मणा गम्यतां शीघ्रं यावत्परधनैर्षिणः ॥ १-२३३-२३ (१०१२६)
न दूरे ते गताः क्षुद्रास्तावद्गच्छावहे सह ।
यावन्निवर्तयाम्यद्य चोरहस्ताद्धनं तव ॥ १-२३३-२४ (१०१२७)
सोऽनुसृत्य महाबाहुर्धन्वी वर्मी रथी ध्वजी ।
शरैर्विध्वस्य तांश्चोरानवजित्य च तद्धनम् ॥ १-२३३-२५ (१०१२८)
ब्राह्मणं समुपाकृत्य यशः प्राप्य च पाण्डवः ।
ततस्तद्गोधनं पार्थो दत्त्वा तस्मै द्विजातये ॥ १-२३३-२६ (१०१२९)
आजगाम पुरं वीरः सव्यसाची धनञ्जयः ।
सोऽभिवाद्य गुरून्सर्वान्सर्वैश्चाप्यभिनन्दितः ॥ १-२३३-२७ (१०१३०)
धर्मराजमुवाचेदं व्रतमादिश मे प्रभो ।
समयः समतिक्रान्तो भवत्संदर्शने मया ॥ १-२३३-२८ (१०१३१)
वनवासं गमिष्यामि समयो ह्येष नः कृतः ।
इत्युक्तो धर्मरास्तु सहसा वाक्यमप्रियम् ॥ १-२३३-२९ (१०१३२)
कथमित्यब्रवीद्वाचा शोकार्तः सज्जमानया ।

युधिष्ठिरो गुडाकेशं भ्राता भ्रातरमच्युतम् ॥ १-२३३-३० (१०१३३)
उवाच दीनो राजा च धनञ्जयमिदं वचः ।
प्रमाणमस्मि यदि ते मत्तः शृणु वचोऽनघ ॥ १-२३३-३१ (१०१३४)
अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम् ।
सर्वं तदनुजानामि व्यलीकं न च मे हृदि ॥ १-२३३-३२ (१०१३५)
गुरोरनुप्रवेशो हि नोपघातो यवीयसः ।
यवीयसोऽनुप्रवेशो ज्येष्ठस्य विधिलोपकः ॥ १-२३३-३३ (१०१३६)
निवर्तस्व महाबाहो कुरुष्व वचनं मम ।
न हि ते धर्मलोपोऽस्ति न च ते धर्षणा कृता ॥ १-२३३-३४ (१०१३७)
अर्जुन उवाच। १-२३३-३५क्ष् (१२६६)
न व्याजेन चरेद्धर्ममिति मे भवतः श्रुतम् ।
न सत्याद्विचलिष्यामि सत्येनायुधमालभे ॥ १-२३३-३५ (१०१३८)
वैशम्पायन उवाच। १-२३३-३६क्ष् (१२६७)
सोऽभ्यनुज्ञाय राजानं वनचर्याय दीक्षितः ।
वने द्वादश मासांस्तु वासायानुजगाम ह ॥ ॥ १-२३३-३६ (१०१३९)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३३-३ नागैर्गजवधूरिव इति ङ । पाठः ॥
१-२३३-१६ उपप्रेक्षणज उपेक्षाजन्यः ॥
१-२३३-१७ अनास्तिक्यमास्तिक्याभावः ॥
१-२३३-३० सज्जमानया स्खलन्त्या ॥
१-२३३-३६ मासांस्तु ब्रह्मचर्याय दीक्षितः इति ङ । पाठः ॥
त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥
२३३ ॥

आदिपर्व - अध्याय २३४
॥ श्रीः ॥
१.२३४. अध्यायः २३४

Mahabharata - Adi Parva - Chapter Topics
ब्राह्मणैः सह तीर्थान्यटतोऽर्जुनस्य स्नानार्थं गङ्गायामवतरणम् ॥ १ ॥
तत्र उलूप्या नागकन्यया गृहीतस्यार्जुनस्य नागलोकगमनम् ॥ २ ॥
संवादपूर्वकमुलूप्याः परिग्रहः ॥ ३ ॥
इरावत उत्पत्तिः ॥ ४ ॥

अर्जुनं पुनर्गङ्गाद्वारमुपनीय उलूप्या स्वलोकगमनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३४-० (१०१४०)
वैशम्पायन उवाच। १-२३४-०क्ष् (१२६८)
तं प्रयान्तं महाबाहुं कौरवाणां यशस्करम् ।
अनुजग्मुर्महात्मानो ब्राह्मणा वेदपारगाः ॥ १-२३४-१ (१०१४१)
वेदवेदाङ्गविद्वासस्तथैवाध्यात्मचिन्तकाः ।
भैक्षाश्च भगवद्भक्ताः सूताः पौराणिकाश्च ये ॥ १-२३४-२ (१०१४२)
कथकाश्चापरे राजञ्श्रमणाश्च वनौकसः ।
दिव्याख्यानानि ये चापि पठन्ति मधुरं द्विजाः ॥ १-२३४-३ (१०१४३)
एतैश्चान्यैश्च बहुभिः सहायैः पाण्डुनन्दनः ।
वृतः श्लक्ष्णकथैः प्रायान्मरुद्भिरिव वासवः ॥ १-२३४-४ (१०१४४)
रमणीयानि चित्राणि वनानि च सरांसि च ।
सरितः सागरांश्चैव देशानपि च भारत ॥ १-२३४-५ (१०१४५)
पुण्यान्यपि च तीर्थानि ददर्श भरतर्षभः ।
स गङ्गाद्वारमाश्रित्य निवेशमकरोत्प्रभुः ॥ १-२३४-६ (१०१४६)
तत्र तस्याद्भुतं कर्म शृणु त्वं जनमेजय ।
कृतवान्यद्विशुद्धात्मा पाण्डूनां प्रवरो हि सः ॥ १-२३४-७ (१०१४७)
निविष्टे तत्र कौन्तेये ब्राह्मणेषु च भारत ।
अग्निहोत्राणि विप्रास्ते प्रादुश्चक्रुरनेकशः ॥ १-२३४-८ (१०१४८)
तेषु प्रबोध्यमानेषु ज्वलितेषु हुतेषु च ।
कृतपुष्पोपहारेषु तीरान्तरगतेषु च ॥ १-२३४-९ (१०१४९)
कृताभिषेकैर्विद्वद्भिर्नियतैः सत्पथे स्थितैः ।
शुशुभेऽतीव तद्राजन्गङ्गाद्वारं महात्मभिः ॥ १-२३४-१० (१०१५०)
तथा पर्याकुले तस्मिन्निवेशे पाण्डवर्षभः ।
अभिषेकाय कौन्तेयो गङ्गामवततार ह ॥ १-२३४-११ (१०१५१)
तत्राभिषेकं कृत्वा स तर्पयित्वा पितामहान् ।
उत्तितीर्षुर्जलाद्राजन्नग्निकार्यचिकीर्षया ॥ १-२३४-१२ (१०१५२)
अपकृष्टो महाबाहुर्नागराजस्य कन्यया ।
अन्तर्जले महाराज उलूप्या कामयानया ॥ १-२३४-१३ (१०१५३)
ददर्श पाण्डवस्तत्र पावकं सुसमाहितः ।
कौरव्यस्याथ नागस्य भवने परमार्चिते ॥ १-२३४-१४ (१०१५४)
तत्राग्निकार्यं कृतवान्कुन्तीपुत्रो धनञ्जयः ।
अशङ्कमानेन हुतस्तेनातुष्यद्धुताशनः ॥ १-२३४-१५ (१०१५५)

अग्निकार्यं स कृत्वा तु नागराजसुतां तदा ।
प्रसहन्निव कौन्तेय इदं वचनमब्रवीत् ॥ १-२३४-१६ (१०१५६)
किमिदं साहसं भीरु कृतवत्यसि भामिनि ।
कश्चायं सुभगे देशः का च त्वं कस्य वात्मजा ॥ १-२३४-१७ (१०१५७)
उलूप्युवाच। १-२३४-१८क्ष् (१२६९)
ऐरावतकुले जातः कौरव्यो नाम पन्नगः ।
तस्यास्मि दुहिता राजन्नुलूपी नाम पन्नगी ॥ १-२३४-१८ (१०१५८)
साऽहं त्वामभिषेकार्थमवतीर्णं समुद्रगाम् ।
दृष्ट्वैव पुरुषव्याघ्र कन्दर्पेणाभिमूर्च्छिता ॥ १-२३४-१९ (१०१५९)
तां मामनङ्गग्लपितां त्वत्कृते कुरुनन्दन ।
अनन्यां नन्दयस्वाद्य प्रदानेनात्मनोऽनघ ॥ १-२३४-२० (१०१६०)
अर्जुन उवाच। १-२३४-२१क्ष् (१२७०)
ब्रह्मचर्यमिदं भद्रे मम द्वादशमासिकम् ।
धर्मराजेन चादिष्टं नाहमस्मि स्वयं वशः ॥ १-२३४-२१ (१०१६१)
तव चापि प्रियं कर्तुमिच्छामि जलचारिणि ।
अनृतं नोक्तपूर्वं च मया किंचन कर्हिचित् ॥ १-२३४-२२ (१०१६२)
कथं च नानृतं मे स्यात्तव चापि प्रियं भवेत् ।
न च पीड्येत मे धर्मस्तथा कुर्या भुजङ्गमे ॥ १-२३४-२३ (१०१६३)
उलूप्युवाच। १-२३४-२४क्ष् (१२७१)
जानाम्यहं पाण्डवेय यथा चरसि मेदिनीम् ।
यथा च ते ब्रह्मचर्यमिदमादिष्टवान्गुरुः ॥ १-२३४-२४ (१०१६४)
परस्परं वर्तमानान्द्रुपदस्यात्मजां प्रति ।
यो नोऽनुप्रविशेन्मोहात्स वै द्वादशमासिकम् ॥ १-२३४-२५ (१०१६५)
वने चरेद्ब्रह्मचर्यमिति वः समयः कृतः ।
तदिदं द्रौपदीहेतोरन्योन्यस्य प्रवासनम् ॥ १-२३४-२६ (१०१६६)
कृतवांस्तत्र धर्मार्थमत्र धर्मो न दुष्यति ।
परित्राणं च कर्तव्यमार्तानां पृथुलोचन ॥ १-२३४-२७ (१०१६७)
कृत्वा मम परित्राणं तव धर्मो न लुप्यते ।
यदि वाप्यस्य धर्मस्य सूक्ष्मोऽपि स्याद्व्यतिक्रमः ॥ १-२३४-२८ (१०१६८)
स च ते धर्म एव स्याद्दत्वा प्राणान्ममार्जुन ।
भक्तां च भज मां पार्थ सतामेतन्मतं प्रभो ॥ १-२३४-२९ (१०१६९)
न करिष्यसि चेदेवं मृतां मामुपधारय ।
प्राणदानान्महाबाहो चर धर्ममनुत्तमम् ॥ १-२३४-३० (१०१७०)
शरणं च प्रपन्नास्मि त्वामद्य पुरुषोत्तम ।
दीनाननाथान्कौन्तेय परिरक्षसि नित्यशः ॥ १-२३४-३१ (१०१७१)
साऽहं शरणमभ्येमि रोरवीमि च दुःखिता ।

याचे त्वां चाभिकामाहं तस्मात्कुरु मम प्रियम् ।
स त्वमात्मप्रदानेन सकामां कर्तुमर्हसि ॥ १-२३४-३२ (१०१७२)
वैशम्पायन उवाच। १-२३४-३३क्ष् (१२७२)
एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया ।
कृतवांस्तत्तथा सर्वं धर्ममुद्दिश्य कारणम् ॥ १-२३४-३३ (१०१७३)
स नागभवने रात्रिं तामुषित्वा प्रतापवान् ।
ग्पुत्रमुत्पादयामास स तस्यां सुमनोहरम् ॥ १-२३४-३४ (१०१७४)
इरावन्तं महाभागं महाबलपराक्रमम्।'
उदितेऽभ्युत्थितः सूर्ये कौरव्यस्य निवेशनात् ॥ १-२३४-३५ (१०१७५)
आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह ।
परित्यज्य गता साध्वी उलूपी निजमन्दिरं ॥ १-२३४-३६ (१०१७६)
दत्त्वा वरमजेयत्वं जले सर्वत्र भारत ।
साध्या जलचराः सर्वे भविष्यन्ति न संशयः ॥ ॥ १-२३४-३७ (१०१७७)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३४-३६ परिष्वज्येति ख ।पाठः ॥
चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥
२३४ ॥

आदिपर्व - अध्याय २३५
॥ श्रीः ॥
१.२३५. अध्यायः २३५

Mahabharata - Adi Parva - Chapter Topics
अर्जुनस्य मणलूरग्रामगमनम् ॥ १ ॥
पुत्रिकापुत्रकधर्मेण चित्राङ्गदापरिग्रहः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३५-० (१०१७८)
वैशम्पायन उवाच। १-२३५-०क्ष् (१२७३)
कथयित्वा च तत्सर्वं ब्राह्मणेभ्यः स भारत ।
प्रययौ हिमवत्पार्श्वं ततो वज्रधरात्मजः ॥ १-२३५-१ (१०१७९)
अगस्त्यवटमासाद्य वसिष्ठस्य च पर्वतम् ।

भृगुतुङ्गे च कौन्तेयः कृतवाञ्शौचमात्मनः ॥ १-२३५-२ (१०१८०)
प्रददौ गोसहस्राणि सुबहूनि च भारत ।
निवेशांश्च द्विजातिभ्यः सोऽददत्कुरुसत्तमः ॥ १-२३५-३ (१०१८१)
हिरण्यबिन्दोस्तीर्थे च स्नात्वा पुरुषसत्तमः ।
दृष्टवान्पाण्डवश्रेष्ठः पुण्यान्यायतनानि च ॥ १-२३५-४ (१०१८२)
अवतीर्य नरश्रेष्ठो ब्राह्मणैः सह भारत ।
प्राचीं दिशमभिप्रेप्सुर्जगाम भरतर्षभः ॥ १-२३५-५ (१०१८३)
आनुपूर्व्येण तीर्थानि दृष्टवान्कुरुसत्तमः ।
नदीं चोत्पलिनीं रम्यामरण्यं नैमिषं प्रति ॥ १-२३५-६ (१०१८४)
नन्दामपरनन्दां च कौशिकीं च यशस्विनीम् ।
महानदीं गयां चैव गङ्गामपि च भारत ॥ १-२३५-७ (१०१८५)
एवं तीर्थानि सर्वाणि पश्यमानस्तथाश्रमान् ।
आत्मनः पावनं कुर्वन्ब्राह्मणेभ्यो ददौ च गाः ॥ १-२३५-८ (१०१८६)
अङ्गवङ्गकलिङ्गेषु यानि तीर्थानि कानिचित् ।
जगाम तानि सर्वाणि पुण्यान्यायतनानि च ॥ १-२३५-९ (१०१८७)
दृष्ट्वा च विधिवत्तानि धनं चापि ददौ ततः ।
कलिङ्गराष्ट्रद्वारेषु ब्राह्मणाः पाण्डवानुगाः ।
अभ्यनुज्ञाय कौन्तेयमुपावर्तन्त भारत ॥ १-२३५-१० (१०१८८)
स तु तैरभ्यनुज्ञातः कुन्तीपुत्रो धनञ्जयः ।
सहायैरल्पकैः शूरः प्रययौ यत्र सागरः ॥ १-२३५-११ (१०१८९)
स कलिङ्गानतिक्रम्य देशानायतनानि च ।
हर्म्याणि रमणीयानि प्रेक्षणाणो ययौ प्रभुः ॥ १-२३५-१२ (१०१९०)
महेन्द्रपर्वतं दृष्ट्वा तापसैरुपशोभितम् ।
ग्गोदावर्यां ततः स्नात्वा तामतीत्य महाबलः ॥ १-२३५-१३ (१०१९१)
कावेरीं तां समासाद्य सङ्गमे सागरस्य च ।
स्नात्वा संपूज्य देवांश्च पितॄंश्च मुनिभिः सह'॥ १-२३५-१४ (१०१९२)
समुद्रतीरेण शनैर्मणलूरं जगाम ह ॥ १-२३५-१५ (१०१९३)
तत्र सर्वाणि तीर्थानि पुण्यान्यायतनानि च ।
अभिगम्य महाबाहुरभ्यगच्छन्महीपतिम् ॥ १-२३५-१६ (१०१९४)
मणलूरेश्वरं राजन्धर्मज्ञं चित्रवाहनम् ।
तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना ॥ १-२३५-१७ (१०१९५)
तां ददर्श पुरे तस्मिन्विचरन्तीं यदृच्छया ।
दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहनीम् ॥ १-२३५-१८ (१०१९६)
अभिगम्य च राजानमवदत्स्वं प्रयोजनम् ।
देहि मे खल्विमां राजन्क्षत्रियाय महात्मने ॥ १-२३५-१९ (१०१९७)
तच्छ्रुत्वा त्वब्रवीद्राजा कस्य पुत्रोऽसि नाम किम् ।

उवाच तं पाण्डवोऽहं कुन्तीपुत्रो धनञ्जयः ॥ १-२३५-२० (१०१९८)
तमुवाचाथ राजा स सान्त्वपूर्वमिदं वचः ।
राजा प्रभञ्जनो नाम कुलेऽस्मिन्संबभूव ह ॥ १-२३५-२१ (१०१९९)
अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्तमम् ।
उग्रेण तपसा तेन देवदेवः पिनाकधृक् ॥ १-२३५-२२ (१०२००)
ईश्वरस्तोषितः पार्थ देवदेवः उमापतिः ।
स तस्मै भघवान्प्रादादेकैकं प्रसवं कुले ॥ १-२३५-२३ (१०२०१)
एकैकः प्रसवस्तस्माद्भवत्यस्मिन्कुले सदा ।
तेषां कुमाराः सर्वेषां पूर्वेषां मम जज्ञिरे ॥ १-२३५-२४ (१०२०२)
एका च मम कन्येयं कुलस्योत्पादनी भृशम् ।
पुत्रो ममायमिति मे भावना पुरुषर्षभ ॥ १-२३५-२५ (१०२०३)
पुत्रिकाहेतुविधिना संज्ञिता भरतर्षभ ।
तस्मादेकः सुतो योऽस्यां जायते भारत त्वया ॥ १-२३५-२६ (१०२०४)
एतच्छुल्कं भवत्वस्याः कुलकृज्जायतामिह ।
एतेन समयेनेमां प्रतिगृह्णीष्व पाण्डव ॥ १-२३५-२७ (१०२०५)
स तथेति प्रतिज्ञाय तां कन्यां प्रतिगृह्य च ।
ग्मासे त्रयोदशे पार्थः कृत्वा वैवाहिकीं क्रियाम्।'
उवास नगरे तस्मिन्मासांस्त्रीन्स तया सह ॥ ॥ १-२३५-२८ (१०२०६)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

आदिपर्व - अध्याय २३६
॥ श्रीः ॥
१.२३६. अध्यायः २३६

Mahabharata - Adi Parva - Chapter Topics
सौभद्रतीर्थे स्नानार्थमवतीर्णस्यार्जुनस्य ग्राहेण ग्रहणम् ॥ १ ॥
जलादुद्धरणेन ग्राहरूपं परित्यज्य नारीरूपं प्राप्तया वर्गानाम्नया
स्वप्रभृतीनां ब्राह्मणेन शापदानकथनम् ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३६-० (१०२०७)
वैशम्पायन उवाच। १-२३६-०क्ष् (१२७४)
ततः समुद्रे तीर्थानि दक्षिमे भरतर्षभः ।
अभ्यगच्छत्सुपुण्यानि सोभितानि तपस्विभिः ॥ १-२३६-१ (१०२०८)

वर्जयन्ति स्म तीर्तानि तत्र पञ्च सम तापसाः ।
अवकीर्णानि यान्यासन्पुरस्तात्तु तपस्विभिः ॥ १-२३६-२ (१०२०९)
अगस्त्यतीर्थं सौभद्रं पौलोमं च सुपावनम् ।
कारन्धमं प्रसन्नं च महमेधफलं च तत् ॥ १-२३६-३ (१०२१०)
भारद्वाजस्य तीर्थं तु पापप्रशमनं महत् ।
एतानि पञ्च तीर्थानि ददर्श कुरुसत्तमः ॥ १-२३६-४ (१०२११)
विविक्तान्युपलक्ष्याथ तानि तीर्थानि पाण्डवः ।
दृष्ट्वा च वर्ज्यमानानि मुनिभिर्धर्मबुद्धिभिः ॥ १-२३६-५ (१०२१२)
तपस्विनस्ततोऽपृच्छत्प्राञ्जलिः कुरुनन्दनः ।
तीर्थानीमानि वर्ज्यन्ते किमर्थं ब्रह्मवादिभिः ॥ १-२३६-६ (१०२१३)
तापसा ऊचुः। १-२३६-७क्ष् (१२७५)
ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान् ।
तत एतानि वर्ज्यन्ते तीर्थानि कुरुनन्दन ॥ १-२३६-७ (१०२१४)
वैशम्पायन उवाच। १-२३६-८क्ष् (१२७६)
तेषां श्रुत्वा महाबाहुर्वार्यमाणस्तपोधनैः ।
जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः ॥ १-२३६-८ (१०२१५)
ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् ।
विगाह्य सहसा शूरः स्नानं चक्रे परन्तपः ॥ १-२३६-९ (१०२१६)
अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान् ।
जग्राह चरणे ग्राहः कुन्तीपुत्रं धनञ्जयम् ॥ १-२३६-१० (१०२१७)
स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम् ।
उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः ॥ १-२३६-११ (१०२१८)
उत्कृष्ट एव ग्राहस्तु सोऽर्जुनेन यशस्विना ।
बभूव नारी कल्याणी सर्वाभरणभूषइता ॥ १-२३६-१२ (१०२१९)
दीप्यमाना श्रिया राजन्दिव्यरूपा मनोरमा ।
तदद्भुतं महद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ॥ १-२३६-१३ (१०२२०)
तां स्त्रियं परमप्रीत इदं वचनमब्रवीत् ।
का वै त्वमसि कल्याणिकुतो वाऽसि जलेचरी ॥ १-२३६-१४ (१०२२१)
किमर्थं च महत्पापमिदं कृतवती पुरा। १-२३६-१५ (१०२२२)
वर्गोवाच ।
अप्सराऽस्मि महाबाहो देवारण्यविहारिणी ॥ १-२३६-१५क्ष् (१२७७)
इष्टा धनपतेर्नित्यं वर्गा नाम महाबल ।
मम सख्यश्चतस्रोऽन्याः सर्वाः कामगमाः शुभाः ॥ १-२३६-१६ (१०२२३)
ताभिः सार्धं प्रयाताऽस्मि लोकपालनिवेशनम् ।
ततः पश्यामहे सर्वा ब्राह्मणं संशितव्रतम् ॥ १-२३६-१७ (१०२२४)
रूपवन्तमधीयानमेकमेकान्तचारिणम् ।

तस्यैव तपसा राजंस्तद्वयं तेजसा वृतम् ॥ १-२३६-१८ (१०२२५)
आदित्य इव तं देशं इत्वं सर्वं व्यकाशयत् ।
तस्य दृष्ट्वा तपस्तादृग्रूपचाद्भुतमुत्तमम् ॥ १-२३६-१९ (१०२२६)
अवतीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया ।
अहं च सौरभेयी च समीची बुद्बुदा लता ॥ १-२३६-२० (१०२२७)
यौगपद्येन तं विप्रमभ्यगच्छाम भारत ।
गायन्त्योऽथहसन्त्यश्च लोभयित्वा च तं द्विजं ॥ १-२३६-२१ (१०२२८)
स च नास्मासु कृतवान्मनो वीर कथंचन ।
नाकम्पत महातेजाः स्थितस्तपसि निर्मले ॥ १-२३६-२२ (१०२२९)
सोऽशपत्कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ ।
ग्राहभूता जले यूयं चरिष्यथ शतं समाः ॥ ॥ १-२३६-२३ (१०२३०)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
षट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३६-५ धर्मबुद्धिभिर्दुर्मरणज दोषं तीर्थेनाप्यविनाश्यं पश्यद्भिः ॥
१-२३६-१५ चर्चोवाच इति घ पाठः ॥
षट्त्रिंशदधिकद्विशततमोऽध्यायः ॥
२३६ ॥

आदिपर्व - अध्याय २३७
॥ श्रीः ॥
१.२३७. अध्यायः २३७

Mahabharata - Adi Parva - Chapter Topics
प्रसादितेन ब्राह्मणेन कृतस्य शापमोचनप्रकारस्य,
नारदनिदेशेनैतत्तीर्थागमनस्य च अर्जुनंप्रति वर्गया कथनम्
॥ १ ॥
एतत्कथां श्रुतवता अर्जुनेन ग्राहरूपाणाभवशिष्टानां
चतसृणामप्यप्सरसां तत्तत्तीर्थेभ्य उद्धरणेन तासां
स्वस्वरूपप्राप्तिः ॥ २ ॥
पुनर्मणलूरमागत्य तत्र चित्राङ्गदायां जातं बभ्रुवाहननामानं
स्वपुत्रं च स्वश्वशुरे समर्प्य अर्जुनस्य गोकर्णक्षेत्रगमनम्
॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३७-० (१०२३१)
वर्गोवाच। १-२३७-०क्ष् (१२७८)
ततो वयं प्रव्यथिताः सर्वा भारतसत्तम ।
अयाम शरणं विप्रं तं तपोधनमच्युतम् ॥ १-२३७-१ (१०२३२)
रूपेण वयसा चैव कन्दर्पेण च दर्पिताः ।
अयुक्तं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज ॥ १-२३७-२ (१०२३३)
एष एव वधोऽस्माकं स्वयं प्राप्तस्तपोधन ।
यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः ॥ १-२३७-३ (१०२३४)
अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्मचारिणः ।
तस्माद्धर्मेण वर्ध त्वं नास्मन्हिंसितुमर्हसि ॥ १-२३७-४ (१०२३५)
सर्वभूतेषु धर्मज्ञ मैत्रो ब्राह्मण उच्यते ।
सत्यो भवतु कल्याण एष वादो मनीषिणाम् ॥ १-२३७-५ (१०२३६)
शरणं च प्रपन्नानां शिष्टाः कुर्वन्ति पालनम् ।
शरणं त्वां प्रपन्नाः स्म तस्मात्त्वं क्षन्तुमर्हसि ॥ १-२३७-६ (१०२३७)
वैशम्पायन उवाच। १-२३७-७क्ष् (१२७९)
एवमुक्तः स धर्मात्मा ब्राह्मणः शुभकर्मकृत् ।
प्रसादं कृतवान्वीर रविसोमसमप्रभः ॥ १-२३७-७ (१०२३८)
ब्राह्मण उवाच। १-२३७-८क्ष् (१२८०)
शतं शतसहस्रं तु सर्वमक्षय्यवाचकम् ।
परिमाणं शतं त्वेतन्नेदमक्षय्यवाचकम् ॥ १-२३७-८ (१०२३९)
यदा च वो ग्राहभूता गृह्णन्तीः पुरुषाञ्जले ।
उत्कर्षति जलात्तस्मात्स्थलं पुरुषसत्तमः ॥ १-२३७-९ (१०२४०)
तदा यूयं पुनः सर्वाः स्वं रूपं प्रतिपत्स्यथ ।
अनृतं नोक्तपूर्वं मे हसतापि कदाचन ॥ १-२३७-१० (१०२४१)
तानि सर्वाणि तीर्थानि ततः प्रभृति चैव ह ।
नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्वशः ।
पुण्यानि च भविष्यन्ति पावनानि मनीषिणां ॥ १-२३७-११ (१०२४२)
वर्गोवाच। १-२३७-१२क्ष् (१२८१)
ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम् ।
अचिन्तयामोऽपसृत्य तस्माद्देशात्सुदुःखिताः ॥ १-२३७-१२ (१०२४३)
क्व नु नाम वयं सर्वाः कालेनाल्पेन तं नरम् ।
समागच्छेम यो नस्तद्रूपमापादयेत्पुनः ॥ १-२३७-१३ (१०२४४)
ता वयं चिन्तयित्वैव मुहूर्तादिव भारत ।
दृष्टवत्यो महाभागं देवर्षिमुत नारदम् ॥ १-२३७-१४ (१०२४५)
संप्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम् ।

अभिवाद्य च तं पार्थ स्थिताः स्म व्रीडिताननाः ॥ १-२३७-१५ (१०२४६)
स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयं च तम् ।
श्रउत्वा तत्र यथावृत्तमिदं वचनमब्रवीत् ॥ १-२३७-१६ (१०२४७)
दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै ।
पुण्यानि रमणीयानि तानि गच्छत मा चिरं ॥ १-२३७-१७ (१०२४८)
तत्राशु पुरुषव्याघ्रः पाण्डवेयो धनञ्जयः ।
मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः ॥ १-२३७-१८ (१०२४९)
ग्इत्युक्त्वा नारदः सर्वास्तत्रैवान्तरधीयत।'
तस्य सर्वा वयं वीर श्रुत्वा वाक्यमितो गताः ।
तदिदं सत्यमेवाद्य मोक्षिताहं त्वयाऽनघ ॥ १-२३७-१९ (१०२५०)
एतास्तु मम ताः सख्यश्चतस्रोऽन्या जले श्रिताः ।
कुरु कर्म शुभं वीर एताः सर्वा विमोक्षय ॥ १-२३७-२० (१०२५१)
वैशम्पायन उवाच। १-२३७-२१क्ष् (१२८२)
ततस्ताः पाण्डवश्रेष्ठः सर्वा एव विशांपते ।
ग्अवगाह्य च तत्तीर्थं गृहीतो ग्राहिभिस्तदा ॥ १-२३७-२१ (१०२५२)
ग्राहीभिश्चोत्ततराशु तरयामास तत्क्षणात् ।
सा चाप्सरा बभूवाशु सर्वाभरणभूषिता ॥ १-२३७-२२ (१०२५३)
एवं क्रमेण ताः सर्वा मोक्षयामास वीर्यवान् ॥' १-२३७-२३ (१०२५४)
उत्थाय च जलात्तस्मात्प्रतिलभ्य वपुः स्वकम् ।
तास्तदाऽप्सरसो राजन्नदृश्यन्त यथा पुरा ॥ १-२३७-२४ (१०२५५)
तीर्थानि शोधयित्वा तु तथानुज्ञाय ताः प्रभुः ।
चित्राङ्गदां पुनर्द्रष्टुं मणलूरं पुनर्ययौ ॥ १-२३७-२५ (१०२५६)
तस्यामजनयत्पुत्रं राजानं बभ्रुवाहनम् ।
तं दृष्ट्वा पाण्डवो राजंश्चित्रवाहनमब्रवीत् ॥ १-२३७-२६ (१०२५७)
चित्राङ्गदायाः शुल्कं त्वं गृहाण बभ्रुवाहनम् ।
अनेन च भविष्यामि ऋणान्मुक्तो नराधिप ॥ १-२३७-२७ (१०२५८)
चित्राङ्गदां पुनर्वाक्यमब्रवीत्पाण्डुनन्दनः ।
इहैव भव भद्रं ते वर्धेथा बभ्रुवाहनम् ॥ १-२३७-२८ (१०२५९)
इन्द्रपस्थनिवासं मे त्वं तत्रागत्य रंस्यसि ।
कुन्ती युधिष्ठिरं भीमं भ्रातरौ मे कनीयसौ ॥ १-२३७-२९ (१०२६०)
आगत्य तत्र पश्येथा अन्यानपि च बान्धवान् ।
बान्धवैः सहिताः सर्वैर्नन्दसे त्वमनिन्दिते ॥ १-२३७-३० (१०२६१)
धर्मे स्थितः सत्यधृतिः कौन्तेयोऽथ युधिष्ठिरः ।
जित्वा तु पृथिवीं सर्वां राजसूयं करिष्यति ॥ १-२३७-३१ (१०२६२)
तत्रागच्छन्ति राजानः पृथिव्यां नृपसंज्ञिताः ।
बहूनि रत्नान्यादाय आगमिष्यति ते पिता ॥ १-२३७-३२ (१०२६३)

एकसार्थं प्रयातासि चित्रवाहनसेवया ।
द्रक्ष्यामि राजसूये त्वां पुत्रं पालय मा शुचः ॥ १-२३७-३३ (१०२६४)
बभ्रुवाहननाम्ना तु मम प्राणो बहिश्चरः ।
तस्माद्भरस्व पुत्रं वै पुरुषं वंशवर्धनम् ॥ १-२३७-३४ (१०२६५)
चित्रावाहनदायादं धर्मात्पौरवनन्दनम् ।
पाण्डवानां प्रियं पुत्रं तस्मात्पालय सर्वदा ॥ १-२३७-३५ (१०२६६)
विप्रयोगेण संतापं मा कृथास्त्वमनिन्दिते ।
चित्राङ्गदामेवमुक्त्वा ग्सागरानूपमाश्रितः ॥ १-२३७-३६ (१०२६७)
स्थानं दूरं समाप्लुत्य दत्त्वा बहुधनं तदा ।
केरलान्समतिक्रम्य' गोकर्णमभितोऽगमत् ॥ १-२३७-३७ (१०२६८)
आद्यं पशुपतेः स्थानं दर्शनादेव मुक्तिदम् ।
यत्र पापोऽपि मनुजः प्राप्नोत्यभयदं पदम् ॥ ॥ १-२३७-३८ (१०२६९)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३६-४ वर्ध वर्धस्व ॥
सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥
२३७ ॥

आदिपर्व - अध्याय २३८
॥ श्रीः ॥
१.२३८. अध्यायः २३८

Mahabharata - Adi Parva - Chapter Topics
अर्जुनस्य प्रभासतीर्थगमनम् ॥ १ ॥
तत्र स्मृतिपथागतसुभद्रारूपलावण्यादिकं चिन्तयतोऽर्जुनस्य
परिव्राजकवेषस्वीकारेण तस्या हरणे निश्चयः ॥ २ ॥
अर्जुनस्य चिन्तितज्ञानेन हसता श्रीकृष्णेन सह शायिन्या
सत्यभामया हासकारणे पृष्टे तां प्रति अर्जुनवृत्तान्तकथनम्
॥ ३ ॥
सत्यभामां शयने विहाय एकाकिना श्रीकृष्णेन प्रभासतीर्थंप्रति
प्रस्थानम् ॥ ४ ॥
चारमुखेन अर्जुनस्य तत्रागमनं श्रुत्वा कृष्णस्य तत्रागमनम् ॥ ५ ॥
अर्जुनेन संभाष्य कृष्णस्य द्वारकांप्रति पुनरागमनम् ॥ ६ ॥

१-२३८-० (१०२७०)
वैशम्पायन उवाच। १-२३८-०क्ष् (१२८३)
सोऽपरान्तेषु तीर्थानि पुण्यान्यायतनानि च ।
सर्वाण्येवानुपूर्व्येण जगामामितविक्रमः ॥ १-२३८-१ (१०२७१)
समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च ।
तानि सर्वाणि गत्वा स प्रभासमुपजग्मिवान् ॥ १-२३८-२ (१०२७२)
गचिन्तयामास रात्रौ तु गदेन कथितं पुरा ।
सुभद्रायाश्च माधुर्यरूपसंपद्गुणानि च ॥ १-२३८-३ (१०२७३)
प्राप्तुमं तां चिन्तयामास कोऽत्रोपायो भवेदिति ।
वेषवैकृत्यमापन्नः परिव्राजकरूपधृत् ॥ १-२३८-४ (१०२७४)
कुकुरान्धकवृष्णीनामज्ञातो वेषधारणात् ।
भ्रममाणश्चरन्भैक्षं परिव्राजकवेषवान् ॥ १-२३८-५ (१०२७५)
येनकेनाप्युपायेन प्रविश्य च गृहं महत् ।
दृष्ट्वा सुभद्रां कृष्णस्य भगिनीमेकसुन्दरीम् ॥ १-२३८-६ (१०२७६)
वासुदेवमतं ज्ञात्वा करिष्यामि हितं शुभम् ।
एवं विनिश्चयं कृत्वा दीक्षितो वै तदाऽभवत् ॥ १-२३८-७ (१०२७७)
त्रिदण्डी मुण्डितः कुण्डी अक्षमालाङ्गुलीयकः ।
योगभारं वहन्पार्थो वटवृक्षस्य कोटरम् ॥ १-२३८-८ (१०२७८)
प्रविशंश्चैव बीभत्सुर्वृष्टिं वर्षति वासवे ।
चिन्तयामास देवेशं केशवं क्लेशनाशनम् ॥ १-२३८-९ (१०२७९)
केशवश्चिन्तितं ज्ञात्वा दिव्यज्ञानेन दृष्टवान् ।
शयानः शयने दिव्ये सत्यभामासहायवान् ॥ १-२३८-१० (१०२८०)
केशवः सहसा राजञ्जहाय च ननन्द च ।
पुनः पुनः सत्यभामा चाब्रवीत्पुरुषोत्तमम् ॥ १-२३८-११ (१०२८१)
भगवंश्चिन्तयाविष्टः शयने शयितः सुखम् ।
भवान्बहुप्रकारेण जहास च पुनः पुनः ॥ १-२३८-१२ (१०२८२)
श्रोतव्यं यदि वा कृष्ण प्रसादो यदि ते मयि ।
वक्तुमर्हसि देवेश तच्छ्रोतुं कामयाम्यहम् ॥ १-२३८-१३ (१०२८३)
श्रीभगवानुवाच। १-२३८-१४क्ष् (१२८४)
पितृष्वसुर्यः पुत्रो मे भीमसेनानुजोऽर्जुनः ।
तीर्थयात्रां गतः पार्थः कारणात्समयात्तदा ॥ १-२३८-१४ (१०२८४)
तीर्थयात्रासमाप्तौ तु निवृत्तो निशि भारतः ।
सुभध्रां चिन्तयामास रूपेणाप्रतिमां भुवि ॥ १-२३८-१५ (१०२८५)
चिन्तयेन्नेव तां भद्रां यतिरूपधरोऽर्जुनः ।

यतिरूपप्रतिच्छन्नो द्वारकां प्राप्य माधवीम् ॥ १-२३८-१६ (१०२८६)
येनकेनाप्युपायेन दृष्ट्वा तु वरवर्णिनीम् ।
वासुदेवमतं ज्ञात्वा प्रयतिष्ये मनोरथम् ॥ १-२३८-१७ (१०२८७)
एवं व्यवसितः पार्थो यतिलिङ्गेन पाण्डवः ।
छायायां वटवृक्षस्य वृष्टिं वर्षति वासवे ॥ १-२३८-१८ (१०२८८)
योगभारं वहन्नेव मानसं दुःखमाप्तवान् ।
एतदर्थं विजानीहि हसन्तं मां मुदा प्रिये ॥ १-२३८-१९ (१०२८९)
भ्रातरं तव पश्येति सत्यभामां व्यसर्जयत् ।
तत उत्थाय शयनात्प्रस्थितो मधुसूदनः ॥' १-२३८-२० (१०२९०)
प्रभासदेशं संप्राप्तं बीभत्सुमपराजितम् ।
तीर्थान्यनुचरन्तं तं शुश्राव मधुसूदनः ॥ १-२३८-२१ (१०२९१)
चाराणां चैव वचनादेकाकी स जनार्दनः ।
तत्राभ्यगच्छत्कौन्तेयं महात्मातं स माधवः ॥ १-२३८-२२ (१०२९२)
ददृशाते तदान्योन्यं प्रभासे कृष्णपाण्डवौ ॥ १-२३८-२३ (१०२९३)
तावन्योन्यं समाश्लिष्य पृष्ट्वा च कुशलं वने ।
आस्तां प्रियसखायौ तौ नरनारायणावृषी ॥ १-२३८-२४ (१०२९४)
ततोऽर्जुनं वासुदेवस्तां चर्यां पर्यपृच्छत ।
किमर्थं पाण्डवैतानि तीर्थान्यनुचरस्युत ॥ १-२३८-२५ (१०२९५)
ततोऽर्जनो यथावृत्तं सर्वमाख्यातवांस्तदा ।
श्रुत्वोवाच च वार्ष्णेय एवमेतदिति प्रभुः ॥ १-२३८-२६ (१०२९६)
तौ विहृत्य यथाकामं प्रभासे कृष्णपाण्डवौ ।
महीधरं रैवतकं वासायैवाभिजग्मतुः ॥ १-२३८-२७ (१०२९७)
पूर्वमेव तु कृष्णस्य वचनात्तं महीधरम् ।
पुरुषा मण्डयाञ्चक्रुरुपजह्रुश्च भोजनम् ॥ १-२३८-२८ (१०२९८)
प्रतिगृह्यार्जुनः सर्वमुपभुज्य च पाण्डवः ।
सहैव वासुदेवेन दृष्टवान्नटनर्तकान् ॥ १-२३८-२९ (१०२९९)
अभ्यनुज्ञाय तान्सर्वानर्चयित्वा च पाण्डवः ।
सत्कृतं शनं दिव्यमभ्यगच्छन्महामतिः ॥ १-२३८-३० (१०३००)
ततस्तत्र महाबाहुः शयानः शयने शुभे ।
तीर्थानां पल्वलानां च पर्वतानां च दर्शनम् ।
आपगानां वनानां च कथयामास सात्वते ॥ १-२३८-३१ (१०३०१)
एवं स कथयन्नेव निद्रया जनमेजय ।
कौन्तेयोऽपि हृतस्तस्मिञ्शयने स्वर्गसन्निभे ॥ १-२३८-३२ (१०३०२)
मधुरेणैव गीतेन वीणाशब्देन चैव ह ।
प्रबोध्यमानो बुबुधे स्तुतिभिर्मङ्गलैस्तता ॥ १-२३८-३३ (१०३०३)
स कृत्वाऽवश्यकार्याणि वार्ष्णेयेनाभिनन्दितः ।

ग्वार्ष्णेयं समनुज्ञाप्य तत्र वासमरोचयत् ॥१-२३८-३४ (१०३०४)
तथेत्युक्त्वा वासुदेवो भोजनं वै शशास ह ।
यतिरूपधरं पार्थं विसृज्य सहसा हरिः।'
रथेन काञ्चनाङ्गेन द्वारकामभिजग्मिवान् ॥ १-२३८-३५ (१०३०५)
अलङ्कृता द्वारका तु बभूव जनमेजय ॥ १-२३८-३६ (१०३०६)
दिदृक्षन्तश्च गोविन्दं द्वारकावासिनो जनाः ।
नरेन्द्रमार्गमाजग्मुस्तूर्णं शतसहस्रशः ॥१-२३८-३७ (१०३०७)
ग्क्षणार्धमपि वार्ष्णेया गोविन्दविरहाक्षमाः ।
कौतूहलसमाविष्टा भृशमुत्प्रेक्ष्य संस्थिताः ॥' १-२३८-३८ (१०३०८)
अवलोकेषु नारीणां सहस्राणि शतानि च ।
भोजवृष्ण्यन्धकानां च समवायो महानभूत् ॥१-२३८-३९ (१०३०९)
स तथा सत्कृतः सर्वैर्भोजवृष्ण्यन्धकात्मजैः ।
अभिवाद्याभिवाद्यांश्च सर्वैश्च प्रतिनन्दितः ॥१-२३८-४० (१०३१०)
कुमारैः सर्वशो वीरः सत्कारेणाभिचोदितः ।
समानवयसः सर्वानाश्लिष्य स पुनःपुनः ॥१-२३८-४१ (१०३११)
कृष्णः स्वभवनं रम्यं प्रविवेश महाबलः ।
प्रभासादागतं देव्यः सर्वाः कृष्णमपूजयन् ॥ ॥१-२३८-४२ (१०३१२)

इति श्रीमन्महाभारते आदिपर्वणि अर्जुनवनवासपर्वणि
अष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥ ॥ समाप्तं
चार्जुनवनवासपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२३८-१ अपरान्तेषु पश्चिमसमुद्रतीरेषु ॥
१-२३८-३६ अलंकृता द्वारका तु बभूव जनमेजय । कुन्तीपुत्रस्य
पूजार्थमपि निष्कुटकेष्वपि ॥
इति च, ज, झ, ञ, ड, पाठः ॥
१-२३८-३७ दिदृक्षन्तश्च कौन्तेयं इति च, ज, झ, ञ, ज, पाठः ॥
१-२३८-४२ कृष्णस्य भवने रम्ये रत्नभोज्यसमावृते । उवास सह
कृष्णेन बहुलास्तत्र शर्वरीः ॥
इति च, ज, झ, ञ, ड, पाठः ॥
अष्टत्रिंशदधिकद्विशततमोऽध्यायः ॥
२३८ ॥

आदिपर्व - अध्याय २३९
॥ श्रीः ॥
१.२३९. अध्यायः २३९

(अथ सुभद्राहरणपर्व ॥ १६ ॥)
Mahabharata - Adi Parva - Chapter Topics
रवैतकपर्वतंप्रति उत्सवार्थं कृष्णादीनां गमनम् ॥ १ ॥
तत्र कृष्णस्य परिव्राजकरूपार्जुनदर्शनम् ॥ २ ॥
सुभद्रादर्शनेन तस्यां संजातहृच्छयस्यार्जुनस्य यतिरूपेण
सुभद्राहरणे कुष्णानुज्ञालाभः ॥ ३ ॥
दूतेनिवेदितैतद्वृत्तान्तेन सपरिवारेण युधिष्ठिरेणाभ्यनुज्ञानम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२३९-० (१०३१३)
वैशम्पायन उवाच। १-२३९-०क्ष् (१२८५)
ततः कतिपयाहस्य तस्मिन्नैवतके गिरौ ।
वृष्ण्यन्धकानामभवदुत्सवो नृपसत्तम ॥ १-२३९-१ (१०३१४)
तत्र दानं ददुर्वीरा ब्राह्मणेभ्यः सहस्रशः ।
भोजवृष्ण्यन्धकाश्चैव महे तस्य गिरेस्तदा ॥ १-२३९-२ (१०३१५)
प्रसादै रत्नचित्रैश्च गिरेस्तस्य समन्ततः ।
स देशः शोभितो राजन्कल्पवृक्षैश्च सर्वशः ॥ १-२३९-३ (१०३१६)
वादित्राणि च तत्रान्ये वादकाः समवादयन् ।
ननृतुर्नर्तकाश्चैव जगुर्गेयानि गायनाः ॥ १-२३९-४ (१०३१७)
अलङ्कृताः कुमाराश्च वृष्णीनां सुमहौजसाम् ।
यानैर्हाटकचित्रैश्च चञ्चूर्यन्ते स्म सर्वशः ॥ १-२३९-५ (१०३१८)
पौराश्च पादचारेण यानैरुच्चावचैस्तथा ।
सदाराः सानुयात्राश्च शतशोऽथ सहस्रशः ॥ १-२३९-६ (१०३१९)
ततो हलधरः क्षीबो रेवतीसहितः प्रभुः ।
अनुगम्यमानो गन्धर्वैरचरत्तत्र भारत ॥ १-२३९-७ (१०३२०)
तथैव राजा वृष्णीनामुग्रसेनः प्रतापवान् ।
अनुगीयमानो गन्धर्वैः स्त्रीसहस्रसहायवान् ॥ १-२३९-८ (१०३२१)
रौक्मिणेयश्च साम्बश्च क्षीबौ समरदुर्मदौ ।
दिव्यमाल्याम्बरधरौ विजह्वातेऽमराविव ॥ १-२३९-९ (१०३२२)
अक्रूरः सारणश्चैव गदो बभ्रुर्विदूरथः ।
निशठश्चारुदेष्णश्च पृथुर्विपृथुरेव च ॥ १-२३९-१० (१०३२३)
सत्यकः सात्यकिश्चैव भङ्गकारमहारवौ ।
हार्दिक्य उद्धवश्चैव ये चान्ये नानुकीर्तिताः ॥ १-२३९-११ (१०३२४)
एते परिवृताः स्त्रीभिर्गन्धर्वैश्च पृथक्पृथक् ।

तमुत्सवं रैवतके शोभयाञ्चक्रिरे तदा ॥ १-२३९-१२ (१०३२५)
ग्वासदेवो ययौ तत्र सह स्त्रीभिर्मुदान्वितः ।
दत्त्वा दानं द्विजातिभ्यः परिव्राजमपश्यत ॥' १-२३९-१३ (१०३२६)
चित्रकौतूहले तस्मिन्वर्तमाने महाद्भुते ।
वासुदेवश्च पार्थश्च सहितौ परिजग्मतुः ॥ १-२३९-१४ (१०३२७)
तत्र चङ्क्रममाणौ तौ वसुदेवसुतां शुभाम् ।
अलङ्कृतां सखीमध्ये भद्रां ददृशतुस्तदा ॥ १-२३९-१५ (१०३२८)
दृष्ट्वैव तामर्जुनस्य कन्दर्पः समजायत ।
तं तदैकाग्रमनसं कृष्णः पार्थमलक्षयत् ॥ १-२३९-१६ (१०३२९)
अब्रवीत्पुरुषव्याघ्रः प्रसहन्निव भारत ।
वनेचरस्य किमिदं कामेनालोड्यते मनः ॥ १-२३९-१७ (१०३३०)
ममैषा भगिनी पार्थ सारणस्य सहोदरी ।
सुभद्रा नाम भद्रं ते पितुर्मे दयिता सुता ।
यदि ते वर्तते बुद्धिर्वक्ष्यामि पितरं स्वयम् ॥ १-२३९-१८ (१०३३१)
अर्जुन उवाच। १-२३९-१९क्ष् (१२८६)
दुहिता वसुदेवस्य वासुदेवस्य च स्वसा ।
रूपेण चैषा संपन्ना कमिवैषा न मोहयेत् ॥ १-२३९-१९ (१०३३२)
कृतमेव तु कल्याणं सर्वं मम भवेद्ध्रुवम् ।
यदि स्यान्मम वार्ष्णेयी महिषीयं स्वसा तव ॥ १-२३९-२० (१०३३३)
प्राप्तौ तु क उपायः स्यात्तं ब्रवीहि जनार्दन ।
आस्थास्यामि तदा सर्वं यदि शक्यं नरेण तत् ॥ १-२३९-२१ (१०३३४)
वासुदेव उवाच। १-२३९-२२क्ष् (१२८७)
स्वयं वरः क्षत्रियाणां विवाहः पुरुषर्षभ ।
स च संशयितः पार्थ स्वभावस्यानिमित्ततः ॥ १-२३९-२२ (१०३३५)
प्रसह्य हरणं चापि क्षत्रियाणां प्रशस्यते ।
विवाहहेतुः शूराणामिति धर्मविदो विदुः ॥ १-२३९-२३ (१०३३६)
स त्वमर्जुन कल्याणीं प्रसह्य भगिनीं मम ।
ग्यतिरूपधरस्तं तु यथा कालविपाकता।'
हर स्वयंवरे ह्यस्याः को वै वेद चिकीर्षितम् ॥ १-२३९-२४ (१०३३७)
वैशम्पायन उवाच। १-२३९-२५क्ष् (१२८८)
ततोऽर्जुनश्च कृष्णश्च विनिश्चित्येतिकृत्यताम् ।
शीघ्रगान्पुरुषानन्प्रेषयामासतुस्तदा ॥ १-२३९-२५ (१०३३८)
धर्मराजाय तत्सर्वमिन्द्रप्रस्थगताय वै ।
श्रुत्वैव च महाबाहुरनुजज्ञे समातृकः ॥ १-२३९-२६ (१०३३९)
ग्भीमसेनस्तु तच्छ्रुत्वा कृतकृत्यं स्म मन्यते ।
इत्येवं मनुजैरुक्तं कृष्णः श्रुत्वा महामतिः ॥ १-२३९-२७ (१०३४०)

अनुज्ञाप्य तदा पार्थं हृदि स्थाप्य चिकीर्षितम् ।
इत्येवं मनुजैः सार्धं द्वारकां समुपेयिवान् ॥ ॥ १-२३९-२८ (१०३४१)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
ऊनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२३९-५ चञ्चूर्यन्ते देदीप्यन्ते ॥
१-२३९-७ क्षीबो मधुमत्तः ॥
१-२३९-२२ स्वभावस्यानिमित्ततः स्त्रीचित्तस्य
शौर्यपाण्डित्याद्यनपेक्षत्वात् । स्त्रियो ह्यपरीक्षितेपि पुंसि आपाततो
रमणीये सद्यः सकामा भवन्तीति भावः ॥
ऊनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥
२३९ ॥

आदिपर्व - अध्याय २४०
॥ श्रीः ॥
१.२४०. अध्यायः २४०

Mahabharata - Adi Parva - Chapter Topics
द्वारकाया उपवने वसतः यतिरूपस्यार्जुतस्य
रैवतकपर्वतात्प्रतिनिवृत्तैर्यादवैर्दर्शनम् ॥ १ ॥
यतिनिवासविषये यादवै पृष्टे सुभद्रागृहे वसत्विति रामोक्तिः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४०-० (१०३४२)
वैशम्पायन उवाच। १-२४०-०क्ष् (१२८९)
चैराः संचारिते तस्मिन्ननुज्ञाते युधिष्ठिरे ।
वासुदेवाभ्यनुज्ञातः कथयित्वेतिकृत्यताम् ॥ १-२४०-१ (१०३४३)
कृष्णस्य मतमास्थाय प्रययौ भरतर्षभः ।
द्वारकाया उपवने तस्थौ वै कार्यसाधनः ॥ १-२४०-२ (१०३४४)
निवृत्ते ह्युत्सवे तस्मिन्गिरौ रैवतके तदा ।
वृष्णयोऽप्यगमन्सर्वे पुरीं द्वारवतीमनु ॥ १-२४०-३ (१०३४५)
चिन्तयानस्ततो भद्रामुपविष्टः शिलातले ।
रमणीये वनोद्देशे बहुपादपसंवृते ॥ १-२४०-४ (१०३४६)
सालतालाश्वकर्णैश्च बकुलैरर्जुनैस्तथा ।

चम्पकाशोकपुन्नागैः केतकैः पाटलैस्तथा ॥१-२४०-५ (१०३४७)
कर्णिकारैरशोकैश्च अङ्कोलैरतिमुक्तकैः ।
एवमादिभिरन्यैश्च संवृते स शिलातले ॥१-२४०-६ (१०३४८)
पुनःपुनश्चिन्तयानः सुभद्रां भद्रभाषिणीम् ।
यदृच्छया चोपपन्नान्वृष्णिवीरान्ददर्श सः ॥१-२४०-७ (१०३४९)
बलदेवं च हार्दिक्यं साम्बं सारणमेव च ।
प्रद्युम्नं च गदं चैव चारुदेष्णं विदूरथम् ॥१-२४०-८ (१०३५०)
भानुं च हरितं चैव विपृथुं पृथुमेव च ।
तथान्यांश्च बहून्पश्यन्हृदि शोकमधारयत् ॥१-२४०-९ (१०३५१)
ततस्ते सहिताः सर्वे यतिं दृष्ट्वा समुत्सुकाः ।
वृष्णयो विनयोपेताः परिवार्योपतस्थिरे ॥१-२४०-१० (१०३५२)
ततोऽर्जुनः प्रीतमनाः स्वागतं व्याजहार सः ।
आस्यतामास्यतां सर्वै रमणीये शिलातले ॥१-२४०-११ (१०३५३)
इत्येवमुक्ता यतिना प्रीतास्ते यादवर्षभाः ।
उपोपविविशुः सर्वे ते स्वागतमिति ब्रुवन् ॥१-२४०-१२ (१०३५४)
परितः सन्निविष्टेषु वृष्णिवीरेषु पाण्डवः ।
आकारं गूहमानस्तु कुशलप्रश्नमब्रवीत् ॥१-२४०-१३ (१०३५५)
सर्वत्र कुशलं चोक्त्वा बलदेवोऽब्रवीदिदम् ।
प्रसादं कुरु मे विप्र कुतस्त्वं चागतो ह्यसि ॥१-२४०-१४ (१०३५६)
त्वया दृष्टानि पुण्यानि वद त्वं वदतांवर ।
पर्वतांश्चैव तीर्थानि वनान्यायतनानि च ॥१-२४०-१५ (१०३५७)
वैशम्पायन उवाच।१-२४०-१६क्ष् (१२९०)
तीर्थानां दर्शनं चैव पर्वतानां च भारत ।
आपगानां वनानां च कथयामास ताः कथाः ॥१-२४०-१६ (१०३५८)
श्रुत्वा धर्मकथाः पुण्या वृष्णिवीरा मुदान्विताः ।
अपूजयंस्तदा भिक्षुं कथान्ते जनमेजय ॥१-२४०-१७ (१०३५९)
ततस्तु यादवाः सर्वे मन्त्रयन्ति स्म भारत ।
अयं देशातिथिः श्रीमान्यतिलिङ्गधरो द्विजः ॥१-२४०-१८ (१०३६०)
आवासं कमुपाश्रित्य वसेत निरुपद्रवः ।
इत्येवं प्रब्रुवन्तस्तु रौहिणेयं च यादवाः ॥१-२४०-१९ (१०३६१)
ददृशुः कृष्णमायान्तं सर्वे यादवनन्दनम् ।
एहि केशव ताततेति रौहिणेयो वचोऽब्रवीत् ॥१-२४०-२० (१०३६२)
यतिलिङ्गधरो विद्वान्देशातिथिरयं द्विजः ।
वर्षमासनिवासार्थमागतो नः पुरं प्रति ।
स्थाने यस्मिन्निवसतु तन्मे ब्रूहि जनार्दन ॥ १-२४०-२१ (१०३६३)
श्रीकृष्ण उवाच।१-२४०-२२क्ष् (१२९१)

त्वयि स्थिते महाभाग परवानस्मि धर्मतः ।
स्वयं तु रुचिरे स्थाने वासयेर्यदुनन्दन ॥ १-२४०-२२ (१०३६४)
प्रीतः स तेन वाक्येन परिष्वज्य जनार्दनम् ।
बलदेवोऽब्रवीद्वाक्यं चिन्तयित्वा महाबलः ॥ १-२४०-२३ (१०३६५)
आरामे तु वसेद्धीमांश्चतुरो वर्षमासकान् ।
कन्यागृहे सुभद्राया भुक्त्वा भोजनमिच्छया ॥ १-२४०-२४ (१०३६६)
लतागृहेषु वसतामिति मे धीयते मतिः ।
लब्धानुज्ञास्त्वया तात मन्यन्ते सर्वयादवाः ॥ १-२४०-२५ (१०३६७)
श्रीकृष्ण उवाच। १-२४०-२६क्ष् (१२९२)
बलवान्दर्शनीयश्च वाग्मी श्रीमान्बहुश्रुतः ।
कन्यापुरसमीपे तु न युक्तमिति मे मतिः ॥ १-२४०-२६ (१०३६८)
गुरुः शास्ता च नेता च शास्त्रज्ञो धर्मवित्तमः ।
त्वयोक्तं न विरुध्येहं करिष्यामि वचस्तव ॥ १-२४०-२७ (१०३६९)
शुभाशुभस्य विज्ञाता नान्योऽस्मि भुवि कश्चन ॥ १-२४०-२८ (१०३७०)
बलदेव उवाच। १-२४०-२९क्ष् (१२९३)
अयं देशातिथिः श्रीमान्सर्वधर्मभृतां वरः ।
धृतिमान्विनयोपेतः सत्यबादी जितेन्द्रियः ॥ १-२४०-२९ (१०३७१)
यतिलिङ्गधरो ह्येष को विजानाति मानसम् ।
त्वमिमं पुण्डरीकाक्ष नीत्वा कन्यापुरं शुभम् ॥ १-२४०-३० (१०३७२)
निवेदय सुभद्रायै मद्वाक्यपरिचोदितः ।
भक्ष्यैर्भोज्यैश्च पानैश्च अन्नैरिष्टैश्च पूजय
॥ ॥ १-२४०-३१ (१०३७३)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

आदिपर्व - अध्याय २४१
॥ श्रीः ॥
१.२४१. अध्यायः २४१

Mahabharata - Adi Parva - Chapter Topics
यतेः सुभद्रागृहे कृष्णेन स्थापनम् ॥ १ ॥
श्रुतपूर्वपार्थलक्षणदर्शनेन इमं यतिं अर्जुनं शङ्कमानायाः
सुभद्रायाः यतिंप्रति अर्जुनादिकुशलप्रश्नः ॥ २ ॥
अर्जुनेन तत्वे कथिते मोहितायां सुभद्रायां रुक्मिण्या श्वश्रूसमीपे
तद्वृत्तकथनम् ॥ ३ ॥
वासुदेवानुमत्या देवक्या सुभद्राश्वासनम् ॥ ४ ॥

गूढं सुभद्राया विवाहचिकीर्षया कृष्णेन महादेवपूजाव्याजेन सर्वयादवैः सह अन्तर्द्वीपगमनम् ॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४१-० (१०३७४)
वैशम्पायन उवाच। १-२४१-०क्ष् (१२९४)
स तथेति प्रतिज्ञाय सहितो यतिना हरिः ।
कृत्वा तु संविदं तेन प्रहृष्टः केशवोऽभवत् ॥ १-२४१-१ (१०३७५)
पर्वते तौ विहृत्यैव यथेष्टं कृष्णपाण्डवौ ।
तां पुरीं प्रविवेशाथ गृह्य हस्तेन पाण्डवम् ।
प्रविश्य च गृहं रम्यं सर्वभोगसमन्वितम् ॥ १-२४१-२ (१०३७६)
पार्थमावेदयामास रुक्मिणीसत्यभामयोः ।
हृषीकेशवचः श्रुत्वा ते उभे चोचतुर्भृशम् ॥ १-२४१-३ (१०३७७)
मनोरथो महानेष हृदि नौ परिवर्तते ।
कदा द्रक्षाव बीभत्सुं पाण्डवं पुरमागतम् ॥ १-२४१-४ (१०३७८)
इत्येवं हर्षमाणे ते वदन्त्यौ सुभृशं प्रियम् ।
रुग्मिणीसत्यभामे वै दृष्ट्वा प्रीतोऽभवद्यतिः ॥ १-२४१-५ (१०३७९)
सर्वेषां हर्षमाणानां पार्थो हर्षमुपागमत् ।
प्राप्तमज्ञातरूपेण चागतं चार्जुनं हरिः ॥ १-२४१-६ (१०३८०)
सत्कृत्य पूज्यमानं तु प्रीत्या चैव ह्यपूजयत् ।
स तं प्रियातिथिं श्रेष्ठं समीक्ष्य यतिमागतम् ॥ १-२४१-७ (१०३८१)
सोदर्यां भगिनीं कृष्णः सुभद्रामिदमब्रवीत् ।
अयं देशातिथिर्भद्रे संशितव्रतवानृषिः ॥ १-२४१-८ (१०३८२)
प्राप्नोतु सततं पूजां तव कन्यापुरे वसन् ।
आर्येण च परिज्ञातः पूजनीयो यतिस्त्वया ॥ १-२४१-९ (१०३८३)
रागाङ्गरस्व वार्ष्णेयि भक्ष्यैर्भोज्यैर्यतिं सदा ।
एष यद्यदृषिर्ब्रूयात्कार्यमेव न संशयः ॥ १-२४१-१० (१०३८४)
सखीभिः सहिता भद्रे भवास्य वशवर्तिनी ।
पुरा हि यतयो भद्रे ये भैक्षार्थमनुव्रताः ॥ १-२४१-११ (१०३८५)
ते बभूवुर्दशार्हाणां कन्यापुरनिवासिनः ।
तेभ्यो भोज्यानि भक्ष्याणि यथाकालमतन्द्रिताः ।
कन्यापुरगताः कन्याः प्रयच्छन्ति यशस्विनि ॥ १-२४१-१२ (१०३८६)
वैशम्पायन उवाच। १-२४१-१३क्ष् (१२९५)
सा तथेत्यब्रवीत्कृष्णं करिष्यामि यथाऽऽथ माम् ।
तोषयिष्यामि वृत्तेन कर्मणा च द्विजर्षभम् ॥ १-२४१-१३ (१०३८७)

एवमेतेन रूपेण कंचित्कालं धनञ्जयः ।
उवास भक्ष्यैर्भोज्यैश्च भद्रया परमार्चितः ॥ १-२४१-१४ (१०३८८)
तस्य सर्वगुणोपेतां वासुदेवसहोदरीम् ।
पश्यतः सततं भद्रां प्रादुरासीन्मनोभवः ॥ १-२४१-१५ (१०३८९)
गूहयन्निव चाकारमालोक्य वरवर्णिनीम् ।
दीर्घमुष्णं विनिश्वस्य पार्थः कामवशं गतः ॥ १-२४१-१६ (१०३९०)
स कृष्णां द्रौपदीं मेने न रूपे भद्रया समाम् ।
प्राप्तां भूमान्विन्द्रसेनां साक्षाद्वा वरुणात्मजाम् ॥ १-२४१-१७ (१०३९१)
अतीतकाले संप्राप्ते सर्वास्तापि सुरस्त्रियः ।
न समा भद्रया लोके इत्येवं मन्यतेऽर्जुनः ॥ १-२४१-१८ (१०३९२)
अतीतसमये काले सोदर्याणां धनञ्जयः ।
न सस्मार सुभद्रायां कामाङ्कुशनिवारितः ॥ १-२४१-१९ (१०३९३)
क्रीडारतिपरां भद्रां सखीगणसमावृताम् ।
प्रीयते स्मार्जुनः पश्यन्स्वाहामिव विभावसुः ॥ १-२४१-२० (१०३९४)
पाण्डवस्य सुभद्रायाः सकाशे तु यशस्विनः ।
समुत्पत्तिः प्रभावश्च गदेन कथितः पुरा ॥ १-२४१-२१ (१०३९५)
श्रुत्वा चाशनिनिर्घोषं केशवेनापि धीमता ।
उपमामर्जुनं कृत्वा विस्तरः कथितः पुरा ॥ १-२४१-२२ (१०३९६)
क्रुद्धमानप्रलापश्च वृष्णीनामर्जुनं प्रति ।
पौरुषं चोपमां कृत्वा प्रावर्तत धनुष्मताम् ॥ १-२४१-२३ (१०३९७)
अन्योन्यकलहे चापि विवादे चापि वृष्णयः ।
अर्जुनोपि न मे तुल्यः कुतस्त्वमिति चाब्रुवन् ॥ १-२४१-२४ (१०३९८)
जातांश्च पुत्रान्गृह्णन्त आशिषो वृष्णयोऽब्रवन् ।
अर्जुनस्य समो वीर्ये भव तात धनुर्धरः ॥ १-२४१-२५ (१०३९९)
तस्मात्सुभद्रा चकमे पौरुषाद्भरतर्षभम् ।
सत्यसन्धस्य रूपेण चातुर्येण च मोहिता ॥ १-२४१-२६ (१०४००)
चारणातिथिसंघानां गदस्य च निशम्य सा ।
अदृष्टे कृतभावाभूत्सुभद्रा भरतर्षभे ॥ १-२४१-२७ (१०४०१)
कीर्तयन्ददृशे यो यः कथंचित्कुरुजाङ्गलम् ।
तं तमेव तदा भद्रा बीभत्सुं स्म हि पृच्छति ॥ १-२४१-२८ (१०४०२)
अभीक्ष्णश्रवणादेवमभीक्ष्णपरिपृच्छनात् ।
प्रत्यक्ष इव भद्रायाः पाण्डवः प्रत्यपद्यत ॥ १-२४१-२९ (१०४०३)
भुजौ भुजगसङ्काशौ ज्याघातेन किणीकृतौ ।
पार्थोऽयमिति पश्यन्त्या निःशंसयमजायत ॥ १-२४१-३० (१०४०४)
यथारूपं हि शुश्राव सुभद्रा भरतर्षभम् ।
तथारूपमवेक्ष्यैनं परां प्रीतिमवाप सा ॥ १-२४१-३१ (१०४०५)

सा कदाचिदुपासीनं पप्रच्छ कुरुनन्दनम् ।
कथं देशाश्च चरिता नानाजनपदाः कथम् ॥ १-२४१-३२ (१०४०६)
सरांसि सरितश्चैव वनानि च कथं यते ।
दिशः काश्च कथं प्राप्ताश्चरता भवता सदा ॥ १-२४१-३३ (१०४०७)
स तथोक्तस्तदा भद्रां बहुनर्मामृतं ब्रुवन् ।
उवाच परमप्रीतस्तथा बहुविधाः कथाः ॥ १-२४१-३४ (१०४०८)
निशण्य विविधं तस्य लोके चरितमात्मनः ।
तथा परिगतो भावः कन्यायाः समपद्यत ॥ १-२४१-३५ (१०४०९)
पर्वसन्धौ तु कस्मिंश्चित्सुभद्रा भरतर्षभम् ।
रहस्येकान्तमासाद्य हर्षमाणाऽभ्यभाषत ॥ १-२४१-३६ (१०४१०)
यतिना रचता देशान्खाण्डवप्रस्थवासिनी ।
कश्चिद्भगवता दृष्टा पृथाऽस्माकं पितृष्वसा ॥ १-२४१-३७ (१०४११)
भ्रातृभिः प्रीयते सर्वैर्दृष्टः कच्चिद्युधिष्ठिरः ।
कच्चिद्धर्मपरो भीमो धर्मराजस्य धीमतः ॥ १-२४१-३८ (१०४१२)
निवृत्तसमयः कच्चिदपराधाद्धनञ्जयः ।
नियमे कामभोगानां वर्तमानः प्रिये रतः ॥ १-२४१-३९ (१०४१३)
क्व नु पार्थश्चरत्यद्य बहिः स वसतीर्वसन् ।
सुखोचितो ह्यदुःखार्हो दीर्घबाहुररिन्दमः ॥ १-२४१-४० (१०४१४)
कच्चिच्छ्रुतो वा दृष्टो वा पार्थो भगवताऽर्जुनः ।
निशम्य वचनं तस्यास्तामुवाच हसन्निव ॥ १-२४१-४१ (१०४१५)
आर्या कुशलिनी कुन्ती सहपुत्रा सहस्नुषा ।
प्रीयते पश्यती पुत्रान्खाण्डवप्रस्थ आसते ॥ १-२४१-४२ (१०४१६)
अनुज्ञातश्च मात्रा च सोदरैश्च धनञ्जयः ।
द्वारकामावसत्येको यतिलिङ्गेन पाण्डवः ॥ १-२४१-४३ (१०४१७)
पश्यन्ती सततं कस्मान्नाभिजानासि माधवि ।
निशण्य वचनं तस्य वासुदेवसहोदरी ॥ १-२४१-४४ (१०४१८)
निश्वासबहुला तस्थौ क्षितिं विलिखती तदा ।
ततः परमसंहृष्टः सर्वशस्त्रभृतां वरः ॥ १-२४१-४५ (१०४१९)
अर्जुनोऽहमिति प्रीतस्तामुवाच धनञ्जयः ।
यथा तव गतो भावः श्रवणान्मयि भामिनि ॥ १-२४१-४६ (१०४२०)
त्वद्गतः सततं भावस्तथा तव गुणैर्मम ।
प्रशस्तेऽहनि धर्मेण भद्रे स्वयमहं वृतः ॥ १-२४१-४७ (१०४२१)
सत्यवानिव सावित्र्या भविष्यामि पतिस्तव ॥ १-२४१-४८ (१०४२२)
वैशम्पायन उवाच। १-२४१-४९क्ष् (१२९६)
एवमुक्त्वा ततः पार्थः प्रविवेश लतागृहम् ।
ततः सुभद्रा ललिता लज्जाभावसमन्विता ॥ १-२४१-४९ (१०४२३)

मुमोह शयने दिव्ये शयाना न तथोचिता ।
नाकरोद्यतिपूजां सा लज्जाभावमुपेयुषी ॥ १-२४१-५० (१०४२४)
कन्यापुरे तु यद्वृत्तं ज्ञात्वा दिव्येन चक्षुषा ।
शशास रुक्मिणीं कृष्णो भोजनादि तदार्जुने ॥ १-२४१-५१ (१०४२५)
तदाप्रभृति तां भद्रां चिन्तयन्वै धनञ्जयः ।
आस्ते स्म स तदाऽऽरामे कामेन भृशपीडितः ॥ १-२४१-५२ (१०४२६)
सुभद्रा चापि न स्वस्था पार्थं प्रति बभूव सा ।
कृशा विवर्णवदना चिन्ताशोकपरायणा ॥ १-२४१-५३ (१०४२७)
निश्वासपरमा भद्रा मानसेन मनस्विनी ।
न शय्यासनभोगेषु रतिं विन्दति केनचित् ॥ १-२४१-५४ (१०४२८)
न नक्तं न दिवा शेते बभूवोन्मत्तदर्शना ।
एवं शोकपरां भद्रां देवी वाक्यमथाब्रवीत् ।
मा शोकं कुरु वार्ष्णेयि धृतिमालम्ब्य शोभने ॥ १-२४१-५५ (१०४२९)
रुक्मिण्येवं सुभद्रां तां कृष्णस्यानुमते तदा ।
रहोगत्य तदा श्वश्रूं देवकीं वाक्यमब्रवीत् ॥ १-२४१-५६ (१०४३०)
अर्जुनो यतिरूपेण ह्यागतः सुसमाहितः ।
कन्यापुरमथाविश्य पूजितो भद्रया मुदा ॥ १-२४१-५७ (१०४३१)
तं विदित्वा सुभद्रापि लज्जया परिमोहिता ।
दिवानिशं शयाना सा नाकरोद्भोजनादिकम् ॥ १-२४१-५८ (१०४३२)
एवमुक्ता तया देवी भद्रां शोकपरायणाम् ।
तत्समीपं समागत्य श्लक्ष्णं वाक्यमथाब्रवीत् ॥ १-२४१-५९ (१०४३३)
मा शोकं कुरु वार्ष्णेयि धृतिमालम्ब्य शोभने ।
राज्ञे निवेदयित्वापि वसुदेवाय धीमते ॥ १-२४१-६० (१०४३४)
कृष्णायापि तथा भद्रे प्रहर्षं कारयामि ते ।
पश्चाज्जानामि ते वार्तां मा शोकं कुरु भामिनि ॥ १-२४१-६१ (१०४३५)
एवमुक्त्वा तु सा माता भद्रायाः प्रियकारिणी ।
निवेदयामास तदा भद्रामानकदुन्दुभेः ॥ १-२४१-६२ (१०४३६)
रहस्येकासना तत्र भद्राऽस्वस्थेति चाब्रवीत् ।
आरामे तु यतिः श्रीमानर्जुनश्चेति नः श्रुतम् ॥ १-२४१-६३ (१०४३७)
अक्रूराय च कृष्माय आहुकाय च सात्यकेः ।
निवेद्यतां महाप्राज्ञ श्रोतव्यं यदि बान्धवैः ॥ १-२४१-६४ (१०४३८)
वैशम्पायन उवाच। १-२४१-६५क्ष् (१२९७)
वसुदेवस्तु तच्छ्रुत्वा अक्रूराहुकयोस्तथा ।
निवेदयित्वा कृष्णेन मन्त्रयामास तैस्तदा ॥ १-२४१-६५ (१०४३९)
इदं कार्यमिदं कृत्यमिदमेवेति निश्चितः ।
अक्रूरश्चोग्रसेनश्च सात्यकिश्च गदस्तथा ॥ १-२४१-६६ (१०४४०)

पृथुश्रवाश्च कृष्णश्च सहिताः शिनिना मुहुः ।
रुक्मिणी सत्यभामा च देवकी रोहिणी तथा ॥ १-२४१-६७ (१०४४१)
वसुदेवेन सहिताः पुरोहितमते स्थिताः ।
विवाहं मन्त्रयामासुर्द्वादशेऽहनि भारत ॥ १-२४१-६८ (१०४४२)
अज्ञातं रौहिणेयस्य उद्धवस्य च भारत ।
विवाहं तु सुभद्रायाः कर्तुकामो गदाग्रजः ॥ १-२४१-६९ (१०४४३)
महादेवस्य पूजार्थं महोत्सव इति ब्रुवन् ।
चतुस्त्रिंशदहोरात्रं सुभद्रार्तिप्रशान्तये ॥ १-२४१-७० (१०४४४)
नगरे घोषयास हितार्थं सव्यसाचिनः ।
इतश्चतुर्थे त्वहनि अन्तर्द्वीपं तु गम्यताम् ॥ १-२४१-७१ (१०४४५)
सदारैः सानुयात्रैश्च सपुत्रैः सहबाधवैः ।
गन्तव्यं सर्ववर्मैश्च गन्तव्यं सर्वयादवैः ॥ १-२४१-७२ (१०४४६)
एवमुक्तास्तु ते सर्वे तथा चक्रुश्च सर्वशः ।
ततः सर्वदशार्हाणामन्तर्द्वीपे च भारत ॥ १-२४१-७३ (१०४४७)
चतुस्त्रिंशदहोरात्रं बभूव परमोत्सवः ।
कृष्णरामाहुकाक्रूरप्रद्युम्नशिनिसत्यकाः ॥ १-२४१-७४ (१०४४८)
समुद्रं प्रययुर्हृष्टाः कुकुरान्धकवृष्णयः ।
युक्तयन्त्रपताकाभिर्वृष्णयो ब्राह्मणैः सह ॥ १-२४१-७५ (१०४४९)
समुद्रं प्रययुर्नौभिः सर्वे पुरनिवासिनः ।
ततस्त्वरितमागत्य दाशार्हगणपूजितम् ॥ १-२४१-७६ (१०४५०)
सुभद्रा पुण्डरीकाक्षमब्रवीद्यतिशासनात् ।
कृत्यवान्द्वादशाहानि स्थाता स भगवानिह ॥ १-२४१-७७ (१०४५१)
तिष्ठतस्तस्य कः कुर्यादुपस्थानविधिं सदा ।
तमुवाच हृषीकेशः कस्त्वदन्यो विशेषतः ॥ १-२४१-७८ (१०४५२)
तमृषिं प्रत्युपस्थातुमितो नार्हति माधवि ।
त्वमेवास्मन्मतेनाद्य महर्षेर्वशवर्तिनी ॥ १-२४१-७९ (१०४५३)
कुरु सर्वाणि कार्याणि कीर्तिं धर्ममवेक्ष्य च ।
तस्य चातिथिमुख्यस्य सर्वेषां च तपस्विनाम् ॥ १-२४१-८० (१०४५४)
संविधानपरा भद्रे भव त्वं वशवर्तिनी ॥ १-२४१-८१ (१०४५५)
वैशम्पायन उवाच। १-२४१-८२क्ष् (१२९८)
एवमादिश्य भिक्षां च भद्रां च मधुसूदनः ।
ययौ शङ्खप्रणादेन भेरीणां निस्वनेन च ॥ १-२४१-८२ (१०४५६)
ततस्तु द्वीपमासाद्य दानधर्मपरायणाः ।
उग्रसेनमुखाश्चान्ये विजहुः कुकुरान्धकाः ॥ १-२४१-८३ (१०४५७)
पटहानां प्रणादैश्च भेरीणां निस्वनेन च ।
सप्तयोजनविस्तार आयतो दशयोजनम् ॥ १-२४१-८४ (१०४५८)

बभूव स महाद्वीपः सपर्वतमहावनः ।
सेतुपुष्करिणीजालैराक्रीडः सर्वसात्वताम् ॥ १-२४१-८५ (१०४५९)
वापीपल्वलसङ्घैश्च काननैश्च मनोरमैः ।
वासुदेवस्य क्रीडार्थं योग्यः सर्वप्रहर्षतः ॥ १-२४१-८६ (१०४६०)
कुकुरान्धकवृष्णीनां तथा प्रियकरस्तदा ।
बभूव परमोपेतस्त्रिविष्टप इवापरः ॥ १-२४१-८७ (१०४६१)
चतुस्त्रिंशदहोरात्रं दानधर्मपरायणाः ।
उग्रसेनमुखाः सर्वे विजहुः कुकुरान्धकाः ॥ १-२४१-८८ (१०४६२)
विचित्रमाल्याभरणाश्चित्रगन्धानुलेपनाः ।
विहाराभिगताः सर्वे यादवा हर्षसंयुताः ॥ १-२४१-८९ (१०४६३)
सुनृत्तगीतवादित्रै रममाणास्तदाऽभवन् ।
प्रतियाते दशार्हाणामृषभे शार्ङ्गधन्वनि ।
सुभद्रोद्वाहनं पार्थः प्राप्तकालममन्यत ॥ ॥ १-२४१-९० (१०४६४)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
एकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥

आदिपर्व - अध्याय २४२
॥ श्रीः ॥
१.२४२. अध्यायः २४२

Mahabharata - Adi Parva - Chapter Topics
सुभद्राविवाहः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४२-० (१०४६५)
वैशम्पायन उवाच। १-२४२-०क्ष् (१२९९)
कुकुरान्धकवृष्णीनामपयानं च पाण्डवः ।
विनिश्चित्य ततः पार्थः सुभद्रामिदमब्रवीत् ॥ १-२४२-१ (१०४६६)
शृणु भद्रे यथाशास्त्रं हितार्थं मुनिभिः कृतम् ।
विवाहं बहुधा सत्सु वर्णानां धर्मसंयुतम् ॥ १-२४२-२ (१०४६७)
कन्यायास्तु पिता भ्राता माता मातुल एव वा ।
पितुः पिता पितुर्भ्राता दाने तु प्रभुतां गतः ॥ १-२४२-३ (१०४६८)
महोत्सवं पशुपतेर्द्रष्टुकामः पिता तव ।
अन्तर्द्वीपं गतो भद्रे पुत्रैः पौत्रैः सबान्धवैः ॥ १-२४२-४ (१०४६९)
मम चैव विशालाक्षि विदेशस्था हि बान्धवाः ।

तस्मात्सुभद्रे गान्धर्वो विवाहः पञ्चमः स्मृतः ॥१-२४२-५ (१०४७०)
समागमे तु कन्यायाः क्रियाः प्रोक्ताश्चतुर्विधाः ।
तेषां प्रवृत्तिं साधूनां शृणु माधवि तद्यथा ॥१-२४२-६ (१०४७१)
वरमाहूय विधिना पित्रा दत्ता तथार्थिने ।
सा पत्नी तु परैरुक्ता सा वश्या तु पतिव्रता ॥१-२४२-७ (१०४७२)
भृत्यानां भरणार्थाय आत्मनः पोषणाय च ।
दाने गृहीता या नारी सा भार्येति स्मृता बुधैः ॥१-२४२-८ (१०४७३)
धर्मतो वरयित्वा तु आनीय स्वं निवेशनम् ।
न्यायेन दत्तातारुण्ये दाराः पितृकृताः स्मृताः ॥१-२४२-९ (१०४७४)
गान्धर्वेण विवाहेन रागात्पुत्रार्थकारणात् ।
आत्मनाऽनुगृहीता या वश्या सा तु प्रजावती ॥१-२४२-१० (१०४७५)
जनयेद्या तु भर्तारं जाया इत्येव नामतः ।
पत्नी भार्या च दाराश्च जाया चेति चतुर्विधाः ॥१-२४२-११ (१०४७६)
चतस्र एवाग्निसाक्ष्याः क्रियायुक्ताश्च धर्मतः ।
गान्धर्वस्तु क्रियाहीनो रागादेव प्रवर्तते ॥१-२४२-१२ (१०४७७)
सकामायाः सकामेन निर्मन्त्रो रहसि स्मृतः ।
मयोक्तमक्रियं चापि कर्तव्यं माधवि त्वया ॥१-२४२-१३ (१०४७८)
अयनं चैव मासश्च ऋतुः पक्षस्तथा तिथिः ।
करणं च मुहूर्तं च लग्नसंपत्तथैव च ॥१-२४२-१४ (१०४७९)
विवाहस्य विशालाक्षि प्रशस्तं चोत्तरायणम् ।
वैशाखश्चैव मासानां पक्षाणां शुक्ल एव च ॥१-२४२-१५ (१०४८०)
नक्षत्राणां तथा हस्तस्तृतीया च तिथिष्वपि ।
लग्नो हि मकरः श्रेष्ठः करणानां बवस्तथा ॥१-२४२-१६ (१०४८१)
मैत्रो मुहूर्तो वैवाह्य आवयोः शुभकर्मणि ।
सर्वसंपदियं भद्रे अद्य रात्रौ भविष्यति ॥१-२४२-१७ (१०४८२)
भगवानस्तमभ्येति आदित्यस्तपतां वरः ।
रात्रौ विवाहकालोऽयं भविष्यति न संशयः ॥१-२४२-१८ (१०४८३)
नारायणोऽपि सर्वज्ञो नावबुध्येत विश्वकृत् ।
धर्मसङ्कटमापन्ने किं नु कृत्वा सुखं भवेत् ॥१-२४२-१९ (१०४८४)
मनोभवेन कामेन मोहितं मां प्रलापिनम् ।
प्रतिवाक्यं च मे देवि किं न वक्ष्यसि माधवि ॥१-२४२-२० (१०४८५)
वैशम्पायन उवाच। १-२४२-२१क्ष् (१३००)
अर्जुनस्य वचः श्रुत्वा चिन्तयन्ती जनार्दनम् ।
नोवाच किंचिद्वचनं बाष्पदूषितलोचना ॥१-२४२-२१ (१०४८६)
रागोन्मादप्रलापी सन्नर्जुनो जयतां वरः ।
चिन्तयामास पितरं प्रविश्य च लतागृहम् ॥१-२४२-२२ (१०४८७)

चिन्तयानं तु कौन्तेयं मत्वा शच्या शचीपतिः ।
सहितो नारदाद्यैश्च मुनिभिश्च महामनाः ॥ १-२४२-२३ (१०४८८)
गन्धर्वैरप्सरोभिश्च चारणैश्चापि गुह्यकैः ।
अरुन्धत्या वसिष्ठेन ह्याजगाम कुशस्थलीम् ॥ १-२४२-२४ (१०४८९)
चिन्तितं च सुभद्रायाश्चिन्तयित्वा जनार्दनः ।
निद्रयापहृतज्ञानं रौहिणेयं विना तदा ॥ १-२४२-२५ (१०४९०)
सहाक्रूरेण शिनिना सत्यकेन गदेन च ।
वसुदेवेन देवक्या आहूकेन च धीमता ॥ १-२४२-२६ (१०४९१)
आजगाम पुरीं रात्रौ द्वारकां स्वजनैर्वृतः ।
पूजयित्वा तु देवेशो नारदादीन्महायशाः ॥ १-२४२-२७ (१०४९२)
कुशलप्रश्नमुक्त्वा तु देवेन्द्रेणाभियाचितः ।
वैवाहिकीं क्रियां कृष्णः स तथेत्येवमुक्तवान् ॥ १-२४२-२८ (१०४९३)
आहुको वसुदेवश्च सहाक्रूरः ससात्यकिः ।
अभिप्रणम्य शिरसा पाकशासनमब्रुवन् ।
देवदेव नमस्तेस्तु लोकनाथ जगत्पते ॥ १-२४२-२९ (१०४९४)
वयं धन्याः स्म सहितैर्बान्धवैः सहिताः प्रभो ।
कृतप्रसादास्तु वयं तव वाक्येन विश्वजित् ॥ १-२४२-३० (१०४९५)
वैशम्पायन उवाच। १-२४२-३१क्ष् (१३०१)
एवमुक्त्वा प्रसाद्यैनं पूजयित्वा प्रयत्नतः ।
महेन्द्रशासनात्सर्वे सहिता ऋषिभिस्तदा ॥ १-२४२-३१ (१०४९६)
विवाहं कारयामासुः शक्रपुत्रस्य शास्त्रतः ।
अरुन्धती शची देवी रुग्मिणी देवकी तथा ॥ १-२४२-३२ (१०४९७)
दिव्यस्त्रीभिश्च सहिताः सुभद्रायाः शुभाः क्रियाः ।
अर्जुनेऽपि तथा सर्वाः क्रिया भद्राः प्रयोजयन् ॥ १-२४२-३३ (१०४९८)
महर्षिः काश्यपो होता सदस्या नारदादयः ।
पुण्याशिषः प्रयोक्तारः सर्वे ते हि तदार्जुने ॥ १-२४२-३४ (१०४९९)
अभिषेकं तदा कृत्वा महेन्द्रः पाकशासनिम् ।
लोकपालैस्तु सहितः सर्वदेवैरभिष्टुतः ॥ १-२४२-३५ (१०५००)
किरीटाङ्गदहाराद्यैर्हस्ताभरणकुण्डलैः ।
भूषयित्वा तदा पार्थं द्वितीयमिव वासवम् ॥ १-२४२-३६ (१०५०१)
पुत्रं परिष्वज्य तदा प्रीतिमाप पुरन्दरः ।
शच्छी देवी तदा भद्रामरुन्धत्यादिभिस्तथा ॥ १-२४२-३७ (१०५०२)
कारयामास वैवाह्यमङ्गलान्यादवस्त्रियः ।
सहाप्सरोभिर्मुदिता भूषयित्वा स्वभूषणैः ॥ १-२४२-३८ (१०५०३)
पौलोमीमिव मन्यन्ते सुभद्रां तत्र योषितः ।
ततो विवाहो ववृधे कृतः सर्वगुणान्वितः ॥ १-२४२-३९ (१०५०४)

तस्याः पाणिं गृहीत्वा तु मन्त्रैर्होमपुरस्कृतम् ।
सुभद्रया बभौ जिष्णुः शच्या इव शचीपतिः ॥ १-२४२-४० (१०५०५)
सा जिष्णुमधिकं भेजे सुभद्रा चारुदर्शना ।
पार्थस्य सदृशी भद्रा रूपेण वयसा तथा ॥ १-२४२-४१ (१०५०६)
सुभद्रायाश्च पार्थोऽपि सदृशो रूपलक्षणैः ।
इत्यूचुश्च तदा देवाः प्रीताः सेन्द्रपुरोगमाः ॥ १-२४२-४२ (१०५०७)
एवं निवेश्य देवास्ते गन्धर्वैः साप्सरोगणैः ।
आमन्त्र्य यादवाः सर्वे विप्रजग्मुर्यथागतम् ॥ १-२४२-४३ (१०५०८)
यादवाः पार्थमामन्त्र्य अन्तर्द्वीपं गतास्तदा ।
वासुदेवस्तदा पार्थमुवाच यदुनन्दनः ॥ १-२४२-४४ (१०५०९)
द्वाविंशद्दिवसान्पार्थ इहोष्य भरतर्षभ ।
मामकं रथमारुह्य शैब्यसुग्रीवयोजितम् ॥ १-२४२-४५ (१०५१०)
सुभद्रया सुखं पार्थ खाण्डवप्रस्थमाविश ।
यादवैः सहितः पश्चादागमिष्यामि भारत ।
यतिवेषेण नियतो वस त्वं रुक्मिणीगृहे ॥ १-२४२-४६ (१०५११)
वैशम्पायन उवाच। १-२४२-४७क्ष् (१३०२)
एवमुक्त्वा प्रचक्राम अन्तर्द्वीपं जनार्दनः ।
कृतोद्वाहस्ततः पार्थः कृतकार्योऽभवत्तदा ॥ १-२४२-४७ (१०५१२)
तस्यां चोपगतो भावः पार्थस्य सुमहात्मनः ।
तस्मिन्भावः सुभद्राया अन्योन्यं समवर्धत ॥ १-२४२-४८ (१०५१३)
स तथा युयुजे वीरो भद्रया भरतर्षभः ।
अभिनिष्पन्नया रामः सीतयेव समन्वितः ॥ १-२४२-४९ (१०५१४)
अपि जिष्णुर्विजज्ञे तां ह्रीं श्रियं सन्नतिक्रियाम् ।
देवतानां वरस्त्रीणां रूपेण सदृशीं सतीम् ॥ १-२४२-५० (१०५१५)
स प्रकृत्या श्रिया दीप्त्या संदिदीपे तयाऽधिकम् ।
उद्यत्सहस्रदीप्तांशुः शरदीव दिवाकरः ॥ १-२४२-५१ (१०५१६)
सा तु तं मनुजव्याघ्रमनुरक्ता यशस्विनी ।
कन्यापुरगता भूत्वा तत्परा समपद्यत ॥ ॥ १-२४२-५२ (१०५१७)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥

आदिपर्व - अध्याय २४३
॥ श्रीः ॥
१.२४३. अध्यायः २४३

कृष्णरथमास्थाय सुभद्रयासह अर्जुनस्य खाण्डवप्रस्थं गन्तुं यत्नः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४३-० (१०५१८)
वैशम्पायन उवाच। १-२४३-०क्ष् (१३०३)
वृष्ण्यन्धकपुरात्तस्मादपयातुं धनञ्जयः ।
विनिश्चित्य तया सार्धं सुभद्रामिदमब्रवीत् ॥ १-२४३-१ (१०५१९)
द्विजानां गुणमुख्यानां यथार्हं प्रतिपादय ।
भोज्यैर्भक्ष्यैश्च कामैश्च स्वपुरीं प्रतियास्यताम् ॥ १-२४३-२ (१०५२०)
आत्मनश्च समुद्दिश्य महाव्रतसमापनम् ।
गच्छ भद्रे स्वयं तूर्णं महाराजनिवेशनम् ॥ १-२४३-३ (१०५२१)
तेजोबलजवोपेतैः शुक्लैर्हयवरोत्तमैः ।
वाजिभिः शैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ १-२४३-४ (१०५२२)
युक्तं रथवरं तूर्णमिहानय सुसत्कृतम् ।
व्रतार्थमिति भाषित्वा सखीभिः सुभगे सह ॥ १-२४३-५ (१०५२३)
क्षिप्रमादाय पर्येहि सह सर्वायुधेन च ।
अनुकर्षान्तपताकाश्च तूणीरांश्च धनूंषि च ॥ १-२४३-६ (१०५२४)
सर्वान्रथवरे स्थाप्य सोत्सेधाश्च महागदाः ॥ १-२४३-७ (१०५२५)
वैशम्पायन उवाच। १-२४३-८क्ष् (१३०४)
अर्जुनेनैवमुक्ता सा सुभद्रा भद्रभाषिणी ।
जगाम नृपतेर्वेश्म सखीभिः सहिता तदा ॥ १-२४३-८ (१०५२६)
व्रतार्थमिति तत्रस्थान्रक्षिणो वाक्यमब्रवीत् ।
रथेनानेन यास्यामि महाव्रतसमापनम् ॥ १-२४३-९ (१०५२७)
शैब्यसुग्रीवयुक्तेन सायुधेनैव शार्ङ्गिणः ।
रथेन रमणीयेन प्रयास्यामि व्रतार्थिनी ॥ १-२४३-१० (१०५२८)
सुभध्रयैवमुक्ते तु जनाः प्राञ्जलयोऽभवन् ।
योजयित्वा रथवरं कल्याणैरभिभाष्य ताम् ॥ १-२४३-११ (१०५२९)
यथोक्तं सर्वमारोप्य आयुधानि च भामिनी ।
क्षिप्रमादाय कल्याणी सुभद्राऽर्जुनमब्रवीत् ॥ १-२४३-१२ (१०५३०)
रथोऽयं रथिनां श्रेष्ठ आनीतस्तव शासनात् ।
स त्वं याहि यथाकामं कुरून्कौरवनन्दन ॥ १-२४३-१३ (१०५३१)
वैशम्पायन उवाच। १-२४३-१४क्ष् (१३०५)
निवेद्य तु रथं भर्तुः सुभद्रा भद्रसंमता ।
ब्राह्मणानां तदा हृष्टा ददौ सा विविधं वसु ॥ १-२४३-१४ (१०५३२)

स्नेहवन्ति च भोज्यानि प्रददावीप्सितानि च ।
यथाकामं यथाश्रद्धं वस्त्राणि विविधानि च ॥ १-२४३-१५ (१०५३३)
तर्पिता विविधैर्भोज्यैस्तान्यवाप्य वसूनि च ।
ब्राह्मणाः स्वगृहं जग्मुः प्रयुज्य परमाशिषः ॥ १-२४३-१६ (१०५३४)
सुभद्रया तु विज्ञप्तः पूर्वमेव धनञ्जयः ।
अभीशुग्रहणे पार्थ न मेऽस्ति सदृशो भुवि ॥ १-२४३-१७ (१०५३५)
तस्मात्सा पूर्वमारुह्य रश्मीञ्जग्राह माधवी ।
सोदरा वासुदेवस्य कृतस्वस्त्ययना हयान् ॥ १-२४३-१८ (१०५३६)
व्यत्ययित्वा तु तल्लिङ्गं यतिवेषं धनञ्जयः ।
आमुच्य कवचं वीरः समुच्छ्रितमहद्धनुः ॥ १-२४३-१९ (१०५३७)
आरुरोह रथश्रेष्ठं शुक्लवासा धनञ्जयः ।
महेन्द्रदत्तं मुकुटं तथैवाभरणानि च ॥ १-२४३-२० (१०५३८)
अलङ्कृत्य तु कौन्तेयः प्रयातुमुपचक्रमे ।
ततः कन्यापुरे घोषस्तुमुलः समपद्यत ॥ १-२४३-२१ (१०५३९)
दृष्ट्वा नववरं पार्थं बाणखड्गधनुर्धरम् ।
अभीशुहस्तां सुश्रोणीमर्जुनेन रथे स्थिताम् ॥ १-२४३-२२ (१०५४०)
ऊचुः कन्यास्तदा यान्तीं वासुदेवसहोदराम् ।
सर्वकामसमृद्धा त्वं सुभद्रे भद्रभाषिणि ॥ १-२४३-२३ (१०५४१)
वासुदेवप्रियं लब्ध्वा भर्तारं वीरमर्जुनम् ।
सर्वसीमन्तिनीनां त्वां श्रेष्ठां कृष्णसहोदरीम् ॥ १-२४३-२४ (१०५४२)
मन्यामहे महाभागे सुभद्रे भद्रभाषिणि ।
यस्मात्सर्वमनुष्याणां श्रेष्ठो भर्ता तवार्जुनः ॥ १-२४३-२५ (१०५४३)
उपपन्नस्त्वया वीरः सर्वलोकमहारथः ।
हे प्रयाहि गृहान्भद्रे सुहृद्भिः संगमोऽस्तु ते ॥ १-२४३-२६ (१०५४४)
वैशम्पायन उवाच। १-२४३-२७क्ष् (१३०६)
एवमुक्ता प्रहृष्टाभिः सखीभिः प्रतिनन्दिता ।
भद्रा भद्रजवोपेतानश्वान्पुनरचोदयत् ॥ १-२४३-२७ (१०५४५)
पार्श्वे चामरहस्ता सा सखी तस्याङ्गनाऽभवत् ।
ततः कन्यापुरद्वारात्सघोषादभिनिःसृतम् ॥ १-२४३-२८ (१०५४६)
ददृशुस्तं रथश्रेष्ठं जना जीमूतनिस्वनम् ।
सुभद्रासङ्गृहीतस्य रथस्य महतः स्वनम् ॥ १-२४३-२९ (१०५४७)
मेघस्वनमिवाकाशे शुश्रुवुः पुरवासिनः ।
सुभद्रया तु संपन्ने तिष्ठन्रथवरेऽर्जुनः ॥ १-२४३-३० (१०५४८)
प्रबभौ च तयोपेतः कैलास इव गङ्गया ।
पार्थः सुभद्रासहितो विरराज महारथः ॥ १-२४३-३१ (१०५४९)
विराजते यथा शक्रो राजञ्शच्या समन्वितः ।

सुभद्रां प्रेक्ष्य पार्थेन ह्रियमाणां यशस्विनीम् ॥१-२४३-३२ (१०५५०)
चक्रुः किलकिलाशब्दानासाद्य बह्वो जनाः ।
दाशार्हाणां कुलस्य श्रीः सुभद्रा मद्रभाषिणी ॥१-२४३-३३ (१०५५१)
अभिकामा सकामेन पार्थेन सह गच्छति ।
अथापरे तु संक्रुद्धा गृह्णीत घ्नत माचिरम् ॥१-२४३-३४ (१०५५२)
इति संवार्य शस्त्राणि ववर्षुरभितो दिशम् ।
इति संभाषमाणानां स नादः सुमहानभूत् ॥१-२४३-३५ (१०५५३)
स तेन जनघोषेण वीरो गज इवार्दितः ।
ववर्ष शरवर्षाणि न तु कंचन रोषयत् ॥१-२४३-३६ (१०५५४)
मुमोच निशितान्बाणान्दीप्यमानान्स्वतेजसा ।
प्रासादवरसङ्घेषु हर्म्येषु भवनेषु च ॥१-२४३-३७ (१०५५५)
क्षोभयित्वा पुरश्रेष्ठं गरुत्मानिव सागरम् ।
प्रेक्षन्नैवकतद्वारं निर्ययौ भरतर्षभः ॥ ॥१-२४३-३८ (१०५५६)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥२४३ ॥

आदिपर्व - अध्याय २४४
॥ श्रीः ॥
१.२४४. अध्यायः २४४

Mahabharata - Adi Parva - Chapter Topics
द्वारकाया बहिर्निर्गच्छतोऽर्जुनस्य विपृथुना युद्धम् ॥१ ॥
विपृथुं जित्वाऽर्जुनस्य खाण्डवप्रस्थंप्रति गमनम् ॥२ ॥
युद्धोद्युक्तानां यादवानां बलरामवाक्यान्निवृत्तिः ॥३ ॥
बलस्य क्रोधः ॥४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४४-० (१०५५७)
वैशम्पायन उवाच। १-२४४-०क्ष् (१३०७)
शासनात्पुरुषेन्द्रस्य बलेन महता बली ।
गिरौ रैवतके नित्यं बभूव विपृथुश्रवाः ॥१-२४४-१ (१०५५८)
प्रवासे वासुदेवस्य तस्मिन्हलधरोपमः ।
संबभूव तदा गोप्ता पुरस्य पुरवर्धनः ॥१-२४४-२ (१०५५९)
प्राप्य पाण्डवनिर्याणं निर्ययौ विपृथुश्रवाः ।
निशम्य पुरनिर्घोषं स्वमनीकमचोदयत् ॥१-२४४-३ (१०५६०)

सोऽभिपत्य तदाध्वानं ददर्श पुरुषर्षभम् ।
निःसृतं द्वारकाद्वारादंशुमन्तमिवाम्बिरात् ॥ १-२४४-४ (१०५६१)
सविद्युतमिवाम्भोदं प्रेक्षतां तं धनुर्धरम् ।
पार्थमानर्तयोधानां विस्मयः समपद्यत ॥ १-२४४-५ (१०५६२)
उदीर्णरथनागाश्वमनीकमभिवीक्ष्य तत् ।
उवाच परमप्रीता सुभद्रा भद्रभाषिणी ॥ १-२४४-६ (१०५६३)
संग्रहीतुमभिप्रायो दीर्घकालकृतो मम ।
युध्यमानस्य सङ्ग्रामे रथं तव नरर्षभ ॥ १-२४४-७ (१०५६४)
ओजस्तेजोद्युतिबलैरन्वितस्य महात्मनः ।
पार्थ ते सारथित्वेन भविता शिक्षितास्म्यहम् ॥ १-२४४-८ (१०५६५)
एवमुक्तः प्रियां प्रीतः प्रत्युवाच नरर्षभः ।
चोदयाश्वानसंसक्तान्विशतु विपृथोर्बलम् ॥ १-२४४-९ (१०५६६)
बहुभिर्युध्यमानस्य तावकान्विजिघांसतः ।
पश्य बाहुबलं भद्रे शरान्विक्षिपतो मम ॥ १-२४४-१० (१०५६७)
वैशम्पायन उवाच। १-२४४-११क्ष् (१३०८)
एवमुक्ता तदा भद्रा पार्थेन भरतर्षभ ।
चुचोद साश्वान्संहृष्टा ते ततो विविशुर्बलम् ॥ १-२४४-११ (१०५६८)
तदाहतमहावाद्यं समुदग्रध्वजायुतम् ।
अनीकं विपृथोर्हृष्टं पार्थमेवान्ववर्तत ॥ १-२४४-१२ (१०५६९)
रथैर्बहुविधाकारैः सदश्वैश्च महाजवैः ।
किरन्तः शरवर्षाणि परिवव्रुर्धनञ्जयम् ॥ १-२४४-१३ (१०५७०)
तेषामस्त्राणि संवार्य दिव्यास्त्रेण महास्त्रवित् ।
आवृणोन्महदाकाशं शरैः परपुरञ्जयः ॥ १-२४४-१४ (१०५७१)
तेषां बाणान्महाबाहुर्मुकुटान्यङ्गदानि च ।
चिच्छेद निशितैर्बाणैः शरांश्चैव धनूंषि च ॥ १-२४४-१५ (१०५७२)
युगानीषान्वरूथानि यन्त्राणि विविधानि च ।
अजिघांसन्परान्पार्थश्चिच्छेद निशितैः शरैः ॥ १-२४४-१६ (१०५७३)
विधनुष्कान्विकवचान्विरथांश्च महारथान् ।
कृत्वा पार्थः प्रियां प्रीतः प्रेक्ष्यतामित्यदर्शयत् ॥ १-२४४-१७ (१०५७४)
सा दृष्ट्वा महदाश्चर्यं सुभद्रा पार्थमब्रवीत् ।
अवाप्तार्थाऽस्मि भद्रं ते याहि पार्थ यथासुखम् ॥ १-२४४-१८ (१०५७५)
स सक्तं पाण्डुपुत्रेण समीक्ष्य विपृथुर्बलम् ।
त्वरमाणोऽभिसंक्रम्य स्थीयतामित्यभाषत ॥ १-२४४-१९ (१०५७६)
ततः सेनापतेर्वाक्यं नात्यवर्तन्त यादवाः ।
सागरे मारुतोद्धूता वेलामिव महोर्मयः ॥ १-२४४-२० (१०५७७)
ततो रथवरात्तूर्णमवरुह्य नरर्षभः ।

अभिगम्य नरव्याघ्रं प्रहृष्टः परिषस्वजे ॥ १-२४४-२१ (१०५७८)
सोऽब्रवीत्पार्थमासाद्य दीर्घकालमिदं तव ।
निवासमभिजानामि शङ्खचक्रगदाधरात् ॥ १-२४४-२२ (१०५७९)
न मेऽस्त्यविदितं किंचिद्यद्यदाचितं त्वया ।
सुभद्रार्थं प्रलोभेन प्रीतस्तव जनार्दनः ॥ १-२४४-२३ (१०५८०)
प्राप्तस्य यतिलिङ्गेन वासितस्य धनञ्जय ।
बन्धुमानसि रामेण महेन्द्रावरजेन च ॥ १-२४४-२४ (१०५८१)
मामेव च सदाकाङ्क्षी मन्त्रिणं मधुसूदनः ।
अन्तरेण सुभद्रां च त्वां च तात धनञ्जय ॥ १-२४४-२५ (१०५८२)
इमं रथवरं दिव्यं सर्वशस्त्रसमन्वितम् ।
इदमेवानुयात्रं च निर्दिश्य गदपूर्वजः ॥ १-२४४-२६ (१०५८३)
अन्तर्द्वीपं तदा वीर गतो वृष्णिसुखावहः ।
दीर्घकालावरुद्धं त्वां संप्राप्तं प्रियया सह ॥ १-२४४-२७ (१०५८४)
पश्यन्तु भ्रातरः सर्वे वज्रपाणिमिवामराः ।
आयाते तु दशार्हाणामृषभे शार्ङ्गधन्वनि ॥ १-२४४-२८ (१०५८५)
भद्रामनुगमिष्यन्ति रत्नानि च वसूनि च ।
अरिष्टं याहि पन्थानं सुखी भव धनञ्जय ॥ १-२४४-२९ (१०५८६)
नष्टशोकैर्विशोकस्य सुहृद्भिः संगमोऽस्तु ते ॥ १-२४४-३० (१०५८७)
वैशम्पायन उवाच। १-२४४-३१क्ष् (१३०९)
ततो विपृथुमामन्त्र्य पार्थः प्रीतोऽभिवाद्य च ।
कृष्णस्य मतमास्थाय कृष्णस्य रथमास्थितः ॥ १-२४४-३१ (१०५८८)
पूर्वमेव तु पार्थाय कृष्णेन विनियोजितम् ।
सर्वरत्नसुसंपूर्णं सर्वभोगसमन्वितम् ॥ १-२४४-३२ (१०५८९)
रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि ।
शैब्यसुग्रीवयुक्तेन किङ्किणीजालमालिना ॥ १-२४४-३३ (१०५९०)
सर्वशस्त्रोपपन्नेन जीमूतरवनादिना ।
ज्वलनार्चिःप्रकाशेन द्विषतां हर्षनाशिना ॥ १-२४४-३४ (१०५९१)
सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान् ।
युक्तः सेनानुयात्रेण रथणारोप्य माधवीम् ।
रथेनाकाशगेनैव पययौ क़स्वपुरं प्रति ॥ १-२४४-३५ (१०५९२)
ह्रियमाणां तु तां दृष्ट्वा सुभद्रां सैनिका जनाः ।
विक्रोशन्तोऽद्रवन्सर्वे द्वारकामभितः पुरीम् ॥ १-२४४-३६ (१०५९३)
ते समासाद्य सहिताः सुधर्मामभितः सभाम् ।
सभापालस्य तत्सर्वमाचख्युः पार्थविक्रमम् ॥ १-२४४-३७ (१०५९४)
तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं ततः ।
समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥ १-२४४-३८ (१०५९५)

क्षुब्धास्तेनाथ शब्देन भोजवृष्ण्यन्धकास्तदा ।
ग्अन्तर्द्वीपात्समुत्पेतुः सहसा सहितास्तदा।'
अन्नपानमपास्याथ समापेतुः समन्ततः ॥ १-२४४-३९ (१०५९६)
तत्र जाम्बूनदाङ्गानि स्पर्ध्यास्तरणवन्ति च ।
मणिविद्रुमचित्राणि ज्वलिताग्निप्रभाणि च ॥१-२४४-४० (१०५९७)
भेजिरे पुरुषव्याघ्रा वृष्ण्यन्धकमहारथाः ।
सिंहासनानि शतशो धिष्ण्यानीव हुताशनाः ॥१-२४४-४१ (१०५९८)
तेषां समुपविष्टानां देवानामिव सन्नये ।
आचख्यौ चेष्टितं जिष्णोः सभापालः सहानुगः ॥१-२४४-४२ (१०५९९)
तच्छ्रुत्वा वृष्णिवीरास्ते मदसंरक्तलोचनाः ।
अमृष्यमाणाः पार्थस्य समुत्पेतुरहङ्कृताः ॥१-२४४-४३ (१०६००)
योजयध्वं रथानाशु प्रासानाहरतेति च ।
धनूंषि च महार्हाणि कवचानि बृहन्ति च ॥१-२४४-४४ (१०६०१)
सूतानुच्चुक्रुशुः केचिद्रथान्योजयतेति च ।
स्वयं च तुरगान्केचिदयुञ्जन्हेमभूषितान् ॥१-२४४-४५ (१०६०२)
रथेष्वानीयमानेषु कवचेषु ध्वजेषु च ।
अभिक्रन्दे नृवीराणां तदासीत्तुमुलं महत् ॥१-२४४-४६ (१०६०३)
वनमाली ततः क्षीबः कैलासशिखरोपमः ।
नीलवासा मदोत्सिक्त इदं वचनमब्रवीत् ॥१-२४४-४७ (१०६०४)
किमिदं कुरुथाप्रज्ञास्तूष्णींभूते जनार्दने ।
अस्य भावमविज्ञाय संक्रुद्धा मोघगर्जिताः ॥१-२४४-४८ (१०६०५)
एष तावदभिप्रायमाख्यातु स्वं महामतिः ।
यदस्य रुचिरं कर्तुं तत्कुरुध्वमतन्द्रिताः ॥१-२४४-४९ (१०६०६)
ततस्ते तद्वचः श्रुत्वा ग्राह्यरूपं हलायुधात् ।
तूष्णींभूतास्ततः सर्वे साधुसाध्विति चाब्रुवन् ॥१-२४४-५० (१०६०७)
समं वचो निशम्यैव बलदेवस्य धीमतः ।
पुनरेवसभामध्ये सर्वे ते समुपाविशन् ॥१-२४४-५१ (१०६०८)
ततोऽब्रवीद्वासुदेवं वचो रामः परन्तपः ।
ग्त्रैलोक्यनाथ हे कृष्ण भूतभव्यभविष्यकृत्।'
किमवागुपविष्टोऽसि प्रेक्षमाणो जनार्दन ॥ १-२४४-५२ (१०६०९)
सत्कृतस्त्वत्कृते पार्थः सर्वैरस्माभिरच्युत ।
न च सोऽर्हति तां पूजां दुर्बुद्धिः कुलपांसनः ॥१-२४४-५३ (१०६१०)
को हि तत्रैव भुक्तावान्नं भाजनं भेत्तुमर्हति ।
मन्यमानः कुले जातमात्मानं पुरुषः क्वचित् ॥१-२४४-५४ (१०६११)
इच्छन्नेव हि संबन्धं कृतं पूर्वं च मानयन् ।
को हि नाम भवेनार्थी साहसेन समाचरेत् ॥१-२४४-५५ (१०६१२)

सोऽवमन्य तथाऽस्माकमनादृत्य च केशवम् ।
प्रसह्य हृतवानद्य सुभद्रां मृत्युमात्मनः ॥ १-२४४-५६ (१०६१३)
कथं हि शिरसो मध्ये कृतं तेन पदं मम ।
मर्षयिष्यामि गोविन्द पादस्पर्शमिवोरगः ॥ १-२४४-५७ (१०६१४)
अद्य निष्कौरवामेकः करिष्यामि वसुन्धराम् ।
न हि मे मर्षणीयोऽयमर्जुनस्य व्यतिक्रमः ॥ १-२४४-५८ (१०६१५)
तं तथा गर्जमानं तु मेघदुन्दुभिनिःस्वनम् ।
अन्वपद्यन्त ते सर्वे भोजवृष्ण्यन्धकास्तदा ॥ ॥ १-२४४-५९ (१०६१६)

इति श्रीमन्महाभारते आदिपर्वणि सुभद्राहरणपर्वणि
चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ ॥ समाप्तं
च सुभद्राहरणपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२४४-४२ सन्नये समुदाये चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥
२४४ ॥
क २३९ तमाध्यायस्य २६ श्लोकादुपरि प्रकृतश्लोकपर्यन्तं विद्यमानानां
२४८ श्लोकानां स्थाने च, ज, झ, ञ, ड, पुस्तकेषु अधोलिखिता अष्टौ
श्लोका एव दृश्यन्ते। १-२४४अ-१क्ष् वैशम्पायन उवाच। १-२४४अ-१अ
ततः संवादिते तस्मिन्ननुज्ञातो धनञ्जयः। १-२४४अ-१ब् गतां रैवतके
कन्यां विदित्वा जनमेजय। ।
१-२४४अ-२अ वासुदेवाभ्यनुज्ञातः कथयित्वेतिकृत्यताम्। १-२४४अ-२ब्
कृष्णस्य मतमादाय प्रययौ भरतर्षभः। ।
१-२४४अ-३अ रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि। १-२४४अ-३ब्
शैब्यसुग्रीवयुक्तेन किङ्किणीजालमालिना। ।
१-२४४अ-४अ सर्वशस्त्रोपपन्नेन जीमूतरवनादिना। १-२४४अ-४ब्
ज्वलिताग्निप्रकाशेन द्विषतां हर्षघातिना। ।
१-२४४अ-५अ सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रवान्। १-२४४अ-५ब्
मृगयाव्यपदेशेन प्रययौ पुरुषर्षभः। ।
१-२४४अ-६अ सुभद्रा त्वथ शैलेन्द्रमभ्यर्च्यैव हि
रैवतम्। १-२४४अ-६ब् दैवतानि च सर्वाणि ब्राह्मणान्स्वस्तिवाच्य च। ।
१-२४४अ-७अ प्रदक्षिणं गिरेः कृत्वा प्रययौ
द्वारकां प्रति। १-२४४अ-७ब् तामभिद्रुत्य कौन्तेयः
प्रसह्यारोपयद्रथम्। १-२४४अ-७च् सुभद्रां चारुसर्वाङ्गीं
कामबाणप्रपीडितः। ।
१-२४४अ-८अ ततः स पुरुषव्याघ्रस्तामादाय शुचिस्मिताम्। १-२४४अ-८ब्

रथेन काञ्चनाङ्गन प्रययौ स्वपुरं प्रति। ।

आदिपर्व - अध्याय २४५
॥ श्रीः ॥
१.२४५. अध्यायः २४५

(अथ हरणाहरणपर्व ॥ १७ ॥)
Mahabharata - Adi Parva - Chapter Topics
कृष्णेन बलरामसान्त्वनम् ॥ १ ॥
अर्जुनंप्रत्यानेतुं यादवानां गमनम् ॥ २ ॥
विपृथुवाक्यादुर्जनं दूरगतं ज्ञात्वा तेषां प्रतिनिवर्तनम् ॥ ३ ॥
सुभद्रया सह अर्जुनस्य खाण्डवप्रस्थगमनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४५-० (१०६१७)
वैशम्पायन उवाच। १-२४५-०क्ष् (१३१०)
उक्तवन्तो यथावीर्यमसकृत्सर्ववृष्णयः ।
ततोऽब्रवीद्वासुदेवो वाक्यं धर्मार्थसंयुतम् ॥ १-२४५-१ (१०६१८)
ग्मयोक्तं न श्रुतं पूर्वं सहितैः सर्वयादवैः ।
अतिक्रान्तमतिक्रान्तं न निवर्तेत कर्हिचित् ।
शृणुध्वं सहिताः सर्वे मम वाक्यं सहेतुकम् ॥' १-२४५-२ (१०६१९)
नावमानं कुलस्यास्य गुडाकेशः प्रयुक्तवान् ।
संमानोऽभ्यधिकस्तेन प्रयुक्तोऽयं न संशयः ॥ १-२४५-३ (१०६२०)
अर्थलुब्धान्न वः पार्थो मन्यते सात्वतान्सदा ।
स्वयंवरमनाधृष्यं मन्यते चापि पाण्डवः ॥ १-२४५-४ (१०६२१)
प्रदानमपि कन्यायाः पशुवत्को नु मन्यते ।
विक्रयं चाप्यपत्यस्य कः कुर्यात्पुरुषो भुवि ॥ १-२४५-५ (१०६२२)
एतान्दोषांस्तु कौन्तेयो दृष्टवानिति मे मतिः ।
ग्क्षत्रियाणां तु वीर्येण प्रशस्तं हरणं बलात्।'
अतः प्रसह्य हृतवान्कन्यां धर्मेण पाण्डवः ॥ १-२४५-६ (१०६२३)
उचितश्चैव संबन्धः सुभद्रा च शयस्विनी ।
एष चापीदृशः पार्थः प्रसह्य हृतवानतः ॥ १-२४५-७ (१०६२४)
भरतस्यान्वये जातं शान्तनोश्च यशस्विनः ।
कुन्तिभोजात्माजापुत्रं का बुभूषेत नार्जुनम् ॥ १-२४५-८ (१०६२५)
न तं पश्यामि यः पार्थं विजयेत रणे बलात् ।

वर्जयित्वा विरूपाक्षं भगनेत्रहरं हरम् ॥ १-२४५-९ (१०६२६)
अपि सर्वेषु लोकेषु सेन्द्ररुद्रेषु मारिष ।
स च नाम रथस्तादृङ्मदीयास्ते च वाजिनः ॥ १-२४५-१० (१०६२७)
ममम शस्त्रं विशेषेण तूणौ चाक्षयसायकौ ।'
योद्धा पार्थश्च शीघ्रास्त्रः को नु तेन समो भवेत् ।
तमभिद्रुत्य सान्त्वेन परमेण धनञ्जयम् ॥ १-२४५-११ (१०६२८)
निवर्तयत संहृष्टा ममैषा परमा मतिः ।
यदि निर्जित्य वः पार्थो बलाद्गच्छेत्स्वकं पुरं ॥ १-२४५-१२ (१०६२९)
प्रणश्येद्वो यशः सद्यो न तु सान्त्वे पराजयः ।
मपितृष्वसायाः पुत्रो मे संबन्धं नार्हति द्विषाम् ।'
तच्छ्रुत्वा वासुदेवस्य तथा कर्तुं जनाधिप ॥ १-२४५-१३ (१०६३०)
मउद्योगं कृतवन्तस्ते भेरीं सन्नाद्य यादवाः ।
अर्जुनस्तु तदा श्रुत्वा भेरीसन्नादनं महत् ॥ १-२४५-१४ (१०६३१)
कौन्तेयस्त्वरमाणस्तु सुभद्रामभ्यभाषत ।
आयान्ति वृष्णयः सर्वे ससुहृज्जनबान्धवाः ॥ १-२४५-१५ (१०६३२)
त्वदर्थं योद्धुकामास्ते मदरक्तान्तलोचनाः ।
प्रमत्तानशुचीन्मूढान्सुरामत्तान्नराधमान् ॥ १-२४५-१६ (१०६३३)
वमनं पानशीलांस्तान्करिष्यामि शरोत्तमैः ।
उताहो वा मदोन्मत्तान्नयिष्यामि यमक्षयम् ॥ १-२४५-१७ (१०६३४)
एवमुक्त्वा प्रियां पार्थो न्यवर्तत महाबलः ।
निवर्तमानं दृष्ट्वैव सुभद्रा त्रस्ततां गता ॥ १-२४५-१८ (१०६३५)
एवं मा वद पार्थेति पादयोः पतिता तदा ।
सुभद्रा तु कलिर्जाता वृष्णीनां निधाय च ॥ १-२४५-१९ (१०६३६)
एवं ब्रुवन्तः पौरास्ते ह्यपवादरताः प्रभो ।
मम शोकं वर्धयन्ति तस्मान्नाशं न चिन्तये ।
परिवादभयान्मुक्ता त्वत्प्रसादाद्भवाम्यहम् ॥ १-२४५-२० (१०६३७)
वैशम्पायन उवाच । १-२४५-२१क्ष् (१३११)
एवमुक्तस्ततः पार्थः प्रियया भद्रया तदा ।
गमनाय मतिं चक्रे पार्थः सत्यपराक्रमः ॥ १-२४५-२१ (१०६३८)
स्मितपूर्वं तदाऽऽभाष्य परिष्वज्य प्रियां तदा ।
उत्थाप्य च पुनः पार्थो याहि याहीति चाब्रवीत् ॥ १-२४५-२२ (१०६३९)
ततः सुभद्रा त्वरिता रश्मीन्संगृह्य पाणिना ।
चोदयामास जवनाञ्शीघ्रमश्वान्कृतत्वरा ॥ १-२४५-२३ (१०६४०)
ततस्तु कृतसन्नाहा वृष्णिवीराः समाहिताः ।
प्रत्यानयार्थं पार्थस्य जवनैस्तुरगोत्तमैः ॥ १-२४५-२४ (१०६४१)
राजमार्गमनुप्राप्ता दृष्ट्वा पार्थस्य विक्रमम् ।

प्रासादपङ्क्तिस्तम्भेषु वेदिकासु ध्वजेषु च ॥ १-२४५-२५ (१०६४२)
अर्जुनस्य शरान्दृष्ट्वा विस्मयं परमं गताः ।
केशवस्य वचस्तथ्यं मन्यमानास्तु यादवाः ॥ १-२४५-२६ (१०६४३)
अतीत्य तं रैवतकं श्रुत्वा तु विपृथोर्वचः ।
अर्जुनेन कृतं श्रुत्वा गन्तुकामास्तु वृष्णयः ॥ १-२४५-२७ (१०६४४)
श्रुत्वा दीर्घं गतं पार्थं न्यवर्तन्त महारथाः ।
पुरोद्यानमतिक्रम्य विशालं च गिरिव्रजम् ॥ १-२४५-२८ (१०६४५)
सानुमुज्जयिनीं चैव वनान्युपवनानि च ।
पुण्येष्वानर्तराष्ट्रेषु वापीपद्मसरांसि च ॥ १-२४५-२९ (१०६४६)
प्राप्य धेनुमतीतीर्थमश्वरोधसरः प्रति ।
प्रेक्षावर्तं ततः शैलमम्बुदं च नगोत्तमम् ॥ १-२४५-३० (१०६४७)
आराच्छृङ्गमथासाद्य तीर्णः करवतीं नदीम् ।
प्राप्य साल्वेयराष्ट्राणि निषधानप्यतीत्य च ॥ १-२४५-३१ (१०६४८)
देवापृथुपुरं पश्यन् सर्वतः सुसमाहितः ।
तमतीत्य महाबाहुर्देवारण्यमपश्यत ॥ १-२४५-३२ (१०६४९)
पूजयामासुरायान्तं देवारण्ये महर्षयः ।
स वनानि नदीः शैलान् गिरिप्रस्रवणानि च ॥ १-२४५-३३ (१०६५०)
अतीत्य च तदा पार्थः सुभद्रासारथिस्तदा ।
कौरवं विषयं प्राप्य विशोकः समपद्यत ॥ १-२४५-३४ (१०६५१)
सोदर्याणां महाबाहुः सिंहाशयमिवाशयम् ।
दूरादुपवनोपेतं समन्तात्सलिलावृतम् ॥ १-२४५-३५ (१०६५२)
भद्रया मुदितो जिष्णुर्ददर्श वृजिनं पुरम् ॥ ॥ १-२४५-३६ (१०६५३)

इति श्रीमन्महाभारते आदिपर्वणि हरणाहरणपर्वणि
पञ्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२४५-२० तस्मात्पापं न चिन्तये ॥
पञ्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥
२४५ ॥

आदिपर्व - अध्याय २४६
॥ श्रीः ॥
१.२४६. अध्यायः २४६

Mahabharata - Adi Parva - Chapter Topics
अर्जुनेन सुभद्रायाः गोपीवेषेण द्रौपदीसमीपप्रेषणम् ॥ १ ॥

कृतनतिं सुभद्रांप्रति पृथाद्रौपदीभ्यां आशीर्वादः ॥ २ ॥
स्वपुरं प्रविष्टेनार्जुनेन भ्रातृश्यः
स्वकृततीर्थयात्रावृत्तान्तकथनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४६-० (१०६५४)
वैशम्पायन उवाच। १-२४६-०क्ष् (१३१२)
क्रोशणात्रे पुरस्यासीद्गोष्ठं पार्थस्य शोभनम् ।
तत्रापि यात्वा बीभत्सुर्निविष्टो यदुकन्यया ॥ १-२४६-१ (१०६५५)
ततः सुभद्रां सत्कृत्य पार्थो वचनमब्रवीत् ।
गोपिकानां तु वेषेण गच्छ त्वं वृजिनं पुरम् ॥ १-२४६-२ (१०६५६)
कामव्याहारिणी कृष्णा रोचतां ते वचो मम ।
दृष्ट्वा तु परुषं ब्रूयात्सह तत्र मयागताम् ॥ १-२४६-३ (१०६५७)
अन्यवेषेण तु गतां दृष्ट्वा सा त्वां प्रियं वदेत् ।
यत्तु सा प्रथमं ब्रूयान्न तस्यास्ति निवर्तनम् ॥ १-२४६-४ (१०६५८)
तस्मान्मानं च दर्पं च व्यपनीय स्वयं व्रज ।
तस्य तद्वचनं श्रुत्वा सुभद्रा प्रत्यभाषत ॥ १-२४६-५ (१०६५९)
एवमेतत्करिष्यामि यथा त्वं पार्थ भाषसे ।
सुभद्रावचनं श्रुत्वा सुप्रीतः पाकशासनिः ॥ १-२४६-६ (१०६६०)
गोपालान्स समानीय त्वरितो वाक्यमब्रवीत् ।
तरुम्यः सन्ति यावन्त्यस्ताः सर्वा व्रजयोषितः ॥ १-२४६-७ (१०६६१)
आगच्छन्तु गमिष्यन्त्या भद्रया सह सङ्गताः ।
इन्द्रप्रस्थं पुरवरं कृष्णां द्रष्टुं यशस्विनीम् ॥ १-२४६-८ (१०६६२)
एतच्छ्रुत्वा तु गोपालैरानीता व्रजयोषितः ।
ततस्ताभिः परिवृतां व्रजस्त्रीभिः समन्ततः ॥' १-२४६-९ (१०६६३)
सुभद्रां त्वरमाणश्च रक्तकौशेयवासिनीम् ।
पार्थः प्रस्थापयामास कृत्वा गोपालिकावपुः ॥ १-२४६-१० (१०६६४)
साऽधिकं तेन रूपेण शोभमाना यशस्विनी ।
ग्गोपालिकामध्यगता प्रययौ वृजिनं पुरम् ॥ १-२४६-११ (१०६६५)
त्वरिता खाण्डवप्रस्थमाससाद विवेश च।'
भवनं श्रेष्ठमासाद्य वीरपत्नी वराङ्गना ॥ १-२४६-१२ (१०६६६)
ववन्दे पृथुताम्राक्षी पृथां भद्रा पितृष्वसाम् ।
तां कुन्ती चारुसर्वाङ्गीमुपाजिघ्रत मूर्धनि ॥ १-२४६-१३ (१०६६७)
प्रीत्या परमया युक्ता आशीर्भिर्युञ्जताऽतुलाम् ।
ततोऽभिगम्य त्वरिता पूर्णेन्दुसदृशानना ॥ १-२४६-१४ (१०६६८)

ववन्दे द्रौपदीं भद्रा प्रेष्याऽहमिति चाब्रवीत् ।
प्रत्युत्थाय तदा कृष्णा स्वसारं माधवस्य च ॥ १-२४६-१५ (१०६६९)
परिष्वज्यावदत्प्रीत्या निःसपत्नोस्तु ते पतिः ।
ग्वीरसूर्भव भद्रे त्वं भव भर्तृप्रिया तथा ॥ १-२४६-१६ (१०६७०)
ओजसा निर्मिता बह्वीरुवाच परमाशिषः।'
तथैव मुदिता भद्रा तामुवाच तथास्त्विति ॥ १-२४६-१७ (१०६७१)
ग्ततः सुभद्रां वार्ष्णेयी परिष्वज्य शुभाननाम् ।
अङ्के निवेश्य मुदिता वसुदेवं प्रशस्य च ॥ १-२४६-१८ (१०६७२)
ततः किलकिलाशब्दः क्षणेन समपद्यत ।
हर्षादानर्तयोधानामासाद्य वृजिनं पुरम् ॥ १-२४६-१९ (१०६७३)
देवपुत्रप्रकाशास्ते जाम्बूनदमयध्वजाः ।
पृष्ठतोऽनुययुः पार्थं पुरुहूतमिवामराः ॥ १-२४६-२० (१०६७४)
गोभिरुष्ट्रैः सदश्वैश्च युक्तानि बहुला जनाः ।
ददृशुर्यानमुख्यानि दाशार्हपुरवासिनाम् ॥ १-२४६-२१ (१०६७५)
ततः पुरवरे यूनां पुंसां वाच उदीरिताः ।
अर्जुने प्रतियाति स्म अश्रूयन्त समन्ततः ॥ १-२४६-२२ (१०६७६)
प्रवासादागतं पार्थं दृष्ट्वा स्वमिव बान्धवम् ।
सोऽभिगम्य नरश्रेष्ठो दाशार्हशतसंवृतः। १-२४६-२३ (१०६७७)
पौरैः पुरवरं प्रीत्या परया चाभिनन्दितः ।
प्राप्य चान्तःपुरद्वारमवरुह्य नरर्षभः ॥ १-२४६-२४ (१०६७८)
ववन्दे धौम्यमासाद्य मातरं च धनञ्जयः ।
स्पृष्ट्वा च चरणौ राज्ञो भीमस्य च धनञ्जयः ॥ १-२४६-२५ (१०६७९)
यमाभ्यां वन्दितो हृष्टः सस्वजे तौ ननन्द च ।
ब्राह्मणप्रमुखान्सर्वान्भ्रातृभिः सह सङ्गतः ॥ १-२४६-२६ (१०६८०)
यथार्हं मानयामास पौरजानपदानपि ।
तत्रस्थान्यनुयातानि तीर्थान्यायतनानि च ॥ १-२४६-२७ (१०६८१)
निवेदयामास तदा राज्ञे सर्वं स्वनुष्ठितम् ।
भ्रातृभ्यश्चैव सर्वेभ्यः कथयामास भारत ॥ १-२४६-२८ (१०६८२)
श्रुत्वा सर्वं महाप्राज्ञो धर्मराजो युधिष्ठिरः ।
पुरस्तादेव तेषां तु पूजयामास चार्जुनम् ॥ १-२४६-२९ (१०६८३)
पाण्डवेन यथार्हं तु पूजार्हेण सुपूजितः ।
न्यविशच्चाभ्यनुज्ञातो राज्ञा तुष्टो यशस्विना ॥ १-२४६-३० (१०६८४)
तामदीनां सुपूजार्हां सुभद्रां प्रीतिवर्धिनीम् ।
साक्षाच्छ्रियममन्यन्त पार्थाः कृष्णसहोदराम् ॥ १-२४६-३१ (१०६८५)
गुरूणां श्वशुराणां च देवराणां तथैव च ।
सुभद्रा स्वेन वृत्तेन बभूव परमप्रिया ॥' १-२४६-३२ (१०६८६)

ततस्ते हृष्टमनसः पाण्डवेया महारथाः ।
कुन्ती च परमप्रीता कृष्णा च सततं तथा ॥ ॥१-२४६-३३ (१०६८७)

इति श्रीमन्महाभारते आदिपर्वणि हरणाहरणपर्वणि
षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥

आदिपर्व - अध्याय २४७
॥ श्रीः ॥
१.२४७. अध्यायः २४७

Mahabharata - Adi Parva - Chapter Topics
कृष्णानुमत्याऽर्जुनः सुभद्रां जहारेति पौराणामूहः ॥ १ ॥
अर्जुने इन्द्रप्रस्थं प्राप्तं ज्ञात्वा यादवैः सह श्रीकृष्णस्य
इन्द्रप्रस्थं प्रत्यागमनम् ॥ २ ॥
आगताञ्श्रीकृष्णादीञ्श्रुत्वा युधिष्ठिरस्य प्रत्युद्गमनं तेषां
सत्कारश्च ॥ ३ ॥
वैवाहिकमहोत्सवकरणम् ॥ ४ ॥
पारिबर्हदानम् ॥ ५ ॥
कंमचित्कालं तत्रोषितानां कुरुभिः पूजितानां बलरामादीनां
द्वारकांप्रति गमनम् ॥ ६ ॥
अभिमन्यूत्पत्तिः ॥ ७ ॥
द्रौपद्याः युधिष्ठिरादिभ्यः पञ्चपुत्रोत्पत्तिः तेषां विद्याभ्यासश्च
॥ ८ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४७-० (१०६८८)
वैशम्पायन उवाच। १-२४७-०क्ष् (१३१३)
अथ शुश्राव निर्वृत्ते वृष्णीनां परमोत्सवे ।
अर्जुनेन हृतां भद्रां शङ्खचक्रगदाधरः ॥ १-२४७-१ (१०६८९)
पुरस्तादेव पौराणां संशयः समजायत ।
जानता वासुदेवेन वासितो भरतर्षभः ॥ १-२४७-२ (१०६९०)
लोकस्य विदितं ह्यद्य पूर्वं विपृथुना यथा ।
सान्त्वयित्वाभ्यनुज्ञातो भद्रया सह सङ्गतः ॥ १-२४७-३ (१०६९१)
दित्सता सोदरां तस्मै पतत्त्रिवरकेतुना ।
अर्हते पार्थिवेन्द्राय पार्थायायतलोचनाम् ॥ १-२४७-४ (१०६९२)

सत्कृत्य पाण्डवश्रेष्ठं प्रेषयामास चार्जुनम् ।
भद्रया सह बीभत्सुः प्रापितो वृजिनं पुरम् ॥१-२४७-५ (१०६९३)
इति पौरजनाः सर्वे वदन्ति च समन्ततः।'
श्रुत्वा तु पुण्डरीकाक्षः संप्राप्तं स्वपुरोत्तमम् ॥ १-२४७-६ (१०६९४)
अर्जुनं पाण्डवश्रेष्ठमिन्द्रप्रस्थगतं तथा ।
गयियासुः खाण्डवप्रस्थममन्त्रयत केशवः ॥१-२४७-७ (१०६९५)
पूर्वं सत्कृत्य राजानमाहुकं मधुसूदनः ।
तथा विपृथुमक्रूरं संकर्षणविडूरथौ ॥१-२४७-८ (१०६९६)
मन्त्रयामास तैः सार्धं पुरस्तादभिमानितैः ।
संकर्षणेन संमन्त्र्य ह्यनुज्ञातो महामनाः ॥१-२४७-९ (१०६९७)
संप्रीतः प्रीयमाणेन वृष्णिराज्ञा जनार्दनः ।
अभिमन्त्र्याभ्यनुज्ञातो योजयामास वाहिनीम् ॥१-२४७-१० (१०६९८)
ततस्तु यानान्यासाद्य दाशार्हाणां यशस्विनाम् ।
सिंहनादः प्रहृष्टानां क्षणेन समपद्यत ॥१-२४७-११ (१०६९९)
योजयन्तः सदश्वांस्तु यानयुग्यं रथांस्तथा ।
गजांश्च परमप्रीतः समपद्यन्त वृष्णयः ॥' १-२४७-१२ (१०७००)
वृष्ण्यन्धकमहामात्रैः सह वीरैर्महारथैः ।
भ्रातृभिश्च कुमारैश्च योधैश्च शतशो वृतः ॥१-२४७-१३ (१०७०१)
सैन्येन महता शौरिरभिगुप्तः समन्ततः ।
तत्र दानपतिः श्रीमाञ्जगाम स महायशाः ॥१-२४७-१४ (१०७०२)
अक्रूरो वृष्णिवीराणां सेनापतिररिन्दमः ।
अनाधृष्टिर्महातेजा उद्धवश्च महायशाः ॥१-२४७-१५ (१०७०३)
साक्षाद्बृहस्पतेः शिष्यो महाबुद्धिर्महामनाः ।
सत्यकः सात्यकिश्चैव कृतवर्मा च सात्वतः ॥१-२४७-१६ (१०७०४)
प्रद्युम्नश्चैव साम्बश्च निशङ्कुः शङ्कुरेव च ।
चारुदेष्णश्च विक्रान्तो झिल्ली विपृथुरेव च ॥१-२४७-१७ (१०७०५)
सारणश्च महाबाहुर्गदश्च विदुषां वरः ।
एते चान्ये च बहवो वृष्णिभोजान्धकास्तथा ॥१-२४७-१८ (१०७०६)
आजग्मः खाण्डवप्रस्थमादाय हरणं बहु ।
ग्उपहारं समादाय पृथुवृष्णिपुरोगमाः ॥१-२४७-१९ (१०७०७)
प्रययुः सिंहनादेन सुभद्रामवलोककाः ।
ते त्वदीर्घेण कालेन कृष्णेन सह यादवाः ।
पुरमासाद्य पार्थानां परां प्रीतिमवाप्नुवन् ॥' १-२४७-२० (१०७०८)
ततो युधिष्ठिरो सजा श्रुत्वा माघवमागतम् ।
प्रतिग्रहार्थं कृष्णस्य यमौ प्रास्थापयत्तदा ॥१-२४७-२१ (१०७०९)
ताभ्यां प्रतिगृहीतं तु वृष्णिचक्रं महर्द्धिमत् ।

विवेश खाण्डवप्रस्थं पताकाध्वजशोभितम् ॥१-२४७-२२ (१०७१०)
संमृष्टसिक्तपन्थानं पुष्पप्रकरशोभितम् ।
चन्दनस्य रसैः शीतैः पुम्यगन्धैर्निषेवितम् ॥१-२४७-२३ (१०७११)
दह्यताऽगुरुणा चैव देशे देशे सुगन्धिना ।
हृष्टपुष्टजनाकीर्णं वणिग्भिरुपशोभितम् ॥१-२४७-२४ (१०७१२)
प्रतिपेदे महाबाहुः सह रामेण केशवः ।
वृष्ण्यन्धकैस्तथा भोजैः समेतः पुरुषोत्तमः ॥१-२४७-२५ (१०७१३)
संपूज्यमानः पौरैश्च ब्राह्मणैश्च सहस्रशः ।
विवेश भवनं राज्ञः पुरन्दरगृहोपमम् ॥१-२४७-२६ (१०७१४)
युधिष्ठिरस्तु रामेण समागच्छद्यथाविधि ।
मूर्ध्नि केशवमाघ्राय बाहुभ्यां परिषस्वजे ॥१-२४७-२७ (१०७१५)
तं प्रीयमाणो गोविन्दो विनयेनाभिपूजयन् ।
भीमं च पुरुषव्याघ्रं विधिवत्प्रत्यपूजयत् ॥१-२४७-२८ (१०७१६)
तांश्च वृष्ण्यन्धकश्रेष्ठान्कुन्तीपुत्रो युधिष्ठिरः ।
प्रतिजग्राह सत्कारैर्यथाविधि यथागतम् ॥१-२४७-२९ (१०७१७)
गुरुवत्पूजयामास कांश्चित्कांश्चिद्वयस्यवत् ।
कांश्चिदभ्यवदत्प्रेम्णा कैश्चिदप्यभिवादितः ॥१-२४७-३० (१०७१८)
ग्ततः पृथा च पार्थाश्च मुदिताः कृष्णया सह ।
पुण्डरीकाक्षमासाद्य बभूवुर्मुदितेन्द्रियाः ॥१-२४७-३१ (१०७१९)
हर्षादभिगतौ दृष्ट्वा संकर्षणजनार्दनौ ।
बन्धुमन्तं पृथा पार्थं युधिष्ठिरममन्यत ॥१-२४७-३२ (१०७२०)
ततः सङ्कर्षणाक्रूरावप्रमेयावदीनवत् ।
भद्रवत्यै सुभद्रायै धनौघमुपजह्रतुः ॥१-२४७-३३ (१०७२१)
प्रवालानि च हाराणि भूषणानि सहस्रशः ।
कुथास्तरपरिस्तोमान्व्याघ्राजिनपुरस्कृतान् ॥१-२४७-३४ (१०७२२)
विविधैश्चैव रत्नौगैर्दीप्तप्रभमजायत ।
शयनासनयानैश्च युधिष्ठिरनिवेशनम् ॥१-२४७-३५ (१०७२३)
ततः प्रीतिकरो यूनां विवाहपरमोत्सवः ।
भद्रवत्यै सुभद्रायै सप्तरात्रमवर्तत ॥' १-२४७-३६ (१०७२४)
तेषां ददौ हृषीकेशो जन्यार्थे धनमुत्तमम् ।
हरणं वै सुभद्राया ज्ञातिदेयं महायशाः ॥१-२४७-३७ (१०७२५)
रथानां काञ्चनाङ्गानां किङ्किणीजालमालिनाम् ।
चतुर्युजामुपेतानां सूतैः कुशलशिक्षितैः ॥१-२४७-३८ (१०७२६)
सहस्रं प्रददौ कृष्मो गवामयुतमेव च ।
श्रीमान्माथुरदेश्यानां दोग्ध्रीणां पुण्यवर्चसाम् ॥१-२४७-३९ (१०७२७)
बडवानां च शुद्धानां चन्द्रांशुसमवर्चसाम् ।

ददौ जनार्दनः प्रीत्या सहस्रं हेमभूषितम् ॥१-२४७-४० (१०७२८)
तथैवाश्वतरीणां च दान्तानां वातरंहसाम् ।
शतान्यञ्जनकेशीनां श्वेतानां पञ्चपञ्च च ॥१-२४७-४१ (१०७२९)
स्नानपानोत्सवे चैव प्रयुक्तं वयसान्वितम् ।
स्त्रीणां सहस्रं गौरीणां सुवेषाणां सुवर्चसाम् ॥१-२४७-४२ (१०७३०)
सुवर्णशतकण्ठीनामरोमाणां स्वलङ्कृताम् ।
परिचर्यासु दक्षाणां प्रददौ पुष्करेक्षणः ॥१-२४७-४३ (१०७३१)
पृष्ठ्यानामपि चाश्वानां बाह्लिकानां जनार्दनः ।
ददौ शतसहस्राख्यं कन्याधनमनुत्तमम् ॥१-२४७-४४ (१०७३२)
कृताकृतस्य मुख्यस्य कनकस्याग्निवर्चसः ।
मनुष्यभारान्दाशार्हो ददौ दश जनार्दनः ॥१-२४७-४५ (१०७३३)
गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम् ।
गिरिकूटनिकाशानां समरेष्वनिवर्तिनाम् ॥१-२४७-४६ (१०७३४)
क्लृप्तानां पटुघण्टानां चारूणां हेममालिनाम् ।
हस्त्यारोहैरुपेतानां सहस्रं साहसप्रियः ॥१-२४७-४७ (१०७३५)
रामः पाणिग्रहणिकं ददौ पार्थाय लाङ्गली ।
प्रीयमाणो हलधरः संबन्धं प्रति मानयन् ॥१-२४७-४८ (१०७३६)
स महाधनरत्नौघो वस्त्रकम्बलफेनवान् ।
महागजमहाग्राहः पताकाशैवलाकुलः ॥१-२४७-४९ (१०७३७)
पाण्डुसागरमाविद्धः प्रविवेश महाधनः ।
पूर्णमापूरयंस्तेषां द्विषच्छोकावहोऽभवत् ॥१-२४७-५० (१०७३८)
प्रतिजग्राह तत्सर्वं धर्मराजो युधिष्ठिरः ।
पूजयामास तांश्चैव वृष्ण्यन्धकमहारथान् ॥१-२४७-५१ (१०७३९)
ते समेता महात्मानः कुरुवृष्ण्यन्धकोत्तमाः ।
विजह्रुरमरावासे नराः सुकृतिनो यथा ॥१-२४७-५२ (१०७४०)
तत्रतत्र महानादैरुत्कृष्टतलनादितैः ।
यथायोगं यथाप्रीति विजह्रुः कुरुवृष्णयः ॥१-२४७-५३ (१०७४१)
एवमुत्तमवीर्यास्ते विहृत्य दिवसान्बहून् ।
पूजिताः कुरुभिर्जग्मुः पुनर्द्वारवतीं प्रति ॥१-२४७-५४ (१०७४२)
रामं पुरुस्कृत्य ययुर्वृष्म्यन्धकमहारथाः ।
रत्नान्यादाय शुभ्राणि दत्तानि कुरुसत्तमैः ॥१-२४७-५५ (१०७४३)
ग्रामः सुभद्रां संपूज्य परिष्वज्य स्वसां तदा ।
न्यासेति द्रौपदीमुक्त्वा परिधाय महाबलः ॥१-२४७-५६ (१०७४४)
पितृष्वसायाश्चरणावभिवाद्य ययौ तदा ।
तस्मिन्काले पृथा प्रीता पूजयामास तं तथा ॥१-२४७-५७ (१०७४५)
स वृष्णिवीरः पार्थैश्च पौरैश्च परमार्चितः ।

ययौ द्वारवतीं रामो वृष्णिभिः सह संयुतः ॥१-२४७-५८ (१०७४६)
वासुदेवस्तु पार्थेन तत्रैव सह भारत ।
ग्चतुस्त्रिंशदहोरात्रं रममाणो महाबलः।'
उवास नगरे रम्ये शक्रप्रस्थे महात्मना ॥ १-२४७-५९ (१०७४७)
व्यचरद्यमुनातीरे मृगयां स महायशाः ।
मृगान्विध्यन्वराहांश्च रेमे सार्धं किरीटिना ॥१-२४७-६० (१०७४८)
ततः सुभद्रा सौभद्रं केशवस्य प्रिया स्वसा ।
जयन्तमिव पौलोमी ख्यातिमन्तमजीजनत् ॥१-२४७-६१ (१०७४९)
दीर्घबाहुं महोरस्कं वृषभाक्षमरिन्दमम् ।
सुभद्रा सुषुवे वीरमभिमन्युं नरर्षभम् ॥१-२४७-६२ (१०७५०)
अभीश्च मन्युमांश्चैव ततस्तमरिमर्दनम् ।
अभिमन्युरिति प्राहुरार्जुनिं पुरुषर्षभम् ॥१-२४७-६३ (१०७५१)
स सात्वत्यामतिरथः संबभूव धनञ्जयात् ।
मखे निर्मथनेनेव शमीगर्भाद्धुताशनः ॥१-२४७-६४ (१०७५२)
यस्मिञ्जाते महातेजाः कुन्तीपुत्रो युधिष्ठिरः ।
अयुतं गा द्विजातिभ्यः प्रादान्निष्कांश्च भारत ॥१-२४७-६५ (१०७५३)
दयितो वासुदेवस्य वाल्यात्प्रभृति चाभवत् ।
पितॄणां चैव सर्वेषां प्रजानामिव चन्द्रमाः ॥१-२४७-६६ (१०७५४)
जन्मप्रभृति कृष्णश्च चक्रे तस्य क्रियाः शुभाः ।
स चापि ववृधे बालः शुक्लपक्षे यथा शशी ॥१-२४७-६७ (१०७५५)
चतुष्पादं दशविधं धनुर्वेदमरिन्दमः ।
अर्जुनाद्वेद वेदज्ञः सकलं दिव्यमानुषम् ॥१-२४७-६८ (१०७५६)
विज्ञानेष्वपि चास्त्राणां सौष्ठवे च महाबलः ।
क्रियास्वपि च सर्वासु विशेषानभ्यसिक्षयत् ॥१-२४७-६९ (१०७५७)
आगमे च प्रयोगे च चक्रे तुल्यमिवात्मना ।
तुतोष पुत्रं सौभद्रं प्रेक्षणाणो धनञ्जयः ॥१-२४७-७० (१०७५८)
सर्वसंहननोपेतं सर्वलक्षणलक्षितम् ।
दुर्धर्षमृषभस्कन्धं व्यात्ताननमिवोरगम् ॥१-२४७-७१ (१०७५९)
सिंहदर्पं महेष्वासं मत्तमातङ्गविक्रमम् ।
मेघदुन्दुभिनिर्घोषं पूर्णचन्द्रनिभाननम् ॥१-२४७-७२ (१०७६०)
कृष्णस्य सदृशं शौर्ये वीर्ये रूपे तथाऽऽकृतौ ।
ददर्श पुत्रं बीभत्सुर्मघवानिव तं यथा ॥१-२४७-७३ (१०७६१)
पाञ्चाल्यपि तु पञ्चभ्यः पतिभ्यः शुभलक्षणा ।
लेभे पञ्च सुतान्वीराञ्श्रेष्ठान्पञ्चाचलानिव ॥१-२४७-७४ (१०७६२)
युधिष्ठिरात्प्रतिविन्ध्यं सुतसोमं वृकोदरात् ।
अर्जुनाच्छ्रुतकर्माणं शतानीकं च नाकुलिम् ॥१-२४७-७५ (१०७६३)

सहदेवाच्छ्रुतसेनमेतान्पञ्च महारथान् ।
पाञ्चाली सुषुवे वीरानादित्यानदितिर्यथा ॥ १-२४७-७६ (१०७६४)
शास्त्रतः प्रतिविन्ध्यन्तमूचुर्विप्रायुधिष्ठिरम् ।
परप्रहरणज्ञाने प्रतिविन्ध्यो भत्वयम् ॥ १-२४७-७७ (१०७६५)
सुतेसोमसहस्रे तु सोमार्कसमतेजसम् ।
सुतसोमं महेष्वासं सुषुवे भीमसेनतः ॥ १-२४७-७८ (१०७६६)
श्रुतं कर्म महत्कृत्वा निवृत्तेन किरीटिना ।
जातः पुत्रस्तथेत्येवं श्रुतकर्मा ततोऽभवत् ॥ १-२४७-७९ (१०७६७)
शतानीकस्य राजर्षेः कौरव्यस्य महात्मनः ।
चक्रे पुत्रं सनामानं नकुलः कीर्तिवर्धनम् ॥ १-२४७-८० (१०७६८)
ततस्त्वजीजनत्कृष्णा नक्षत्रे वह्निदैवते ।
सहदेवात्सुतं तस्माच्छ्रुतसेनेति तं विदुः ॥ १-२४७-८१ (१०७६९)
एकवर्षान्तरास्त्वेते द्रौपदेया यशस्विनः ।
अन्वजायन्त राजेन्द्र परस्परहितैषिणः ॥ १-२४७-८२ (१०७७०)
जातकर्माण्यानुपूर्व्याच्चूडोपनयनानि च ।
चकार विधिवद्धौम्यस्तेषां भरतसत्तम ॥ १-२४७-८३ (१०७७१)
कृत्वा च वेदाध्ययनं ततः सुचरितव्रताः ।
जगृहुः सर्वमिष्वस्त्रमर्जुनाद्दिव्यमानुषम् ॥ १-२४७-८४ (१०७७२)
दिव्यगर्भोपमैः पुत्रैर्व्यूढोरस्कैर्महारथैः ।
अन्विता राजशार्दूल पाण्डवा मुदमाप्नुवन् ॥ ॥ १-२४७-८५ (१०७७३)

इति श्रीमन्महाभारते आदिपर्वणि हरणाहरणपर्वणि
सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ ॥ समाप्तं च
हरणाहरणपर्व ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२४७-४३ अरोगाणां स्वलङ्कृतां इति ख । पाठः ॥
१-२४७-७४ धरा पञ्च गणानिव । इति ङ पाठः ॥
१-२४७-७७ परप्रहरणज्ञाने शत्रुकृतप्रहारवेदनायां विध्य इव
निर्विज्ञान इति प्रतिविन्ध्यः ॥
सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥
२४७ ॥

आदिपर्व - अध्याय २४८
॥ श्रीः ॥
१.२४८. अध्यायः २४८

(अथ खाण्डवदाहपर्व ॥ १८ ॥)

Mahabharata - Adi Parva - Chapter Topics

युधिष्ठिरस्य राज्यपरिपालनप्रकारवर्णनम् ॥ १ ॥
तत्रैव निवसता श्रीकृष्णेन सहार्जुनस्य जलक्रीडार्थं यमुनां प्रति गमनम् ॥ २ ॥
सस्त्रीकयोस्तयोर्जलक्रीडावर्णनम् ॥ ३ ॥
ब्राह्मणरूपस्याग्नेस्तत्रागमनम् ॥ ४ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४८-० (१०७७४)
वैशम्पायन उवाच। १-२४८-०क्ष् (१३१४)
इन्द्रप्रस्थे वसन्तस्ते जघ्नुरन्यान्नराधिपान् ।
शासनाद्धृतराष्ट्रस्य राज्ञः शान्तनवस्य च ॥ १-२४८-१ (१०७७५)
आश्रित्य धर्मराजानं सर्वलोकोऽवसत्सुखम् ।
पुण्यलक्षणकर्माणं स्वदेहमिव देहिनः ॥ १-२४८-२ (१०७७६)
स समं धर्मकामार्थान्सिषेवे भरतर्षभ ।
त्रीनिवात्मसमान्बन्धून्नीतिमानिव मानयन् ॥ १-२४८-३ (१०७७७)
तेषां समविभक्तानां क्षितौ देहवतामिव ।
बभौ धर्मार्थकामानां चतुर्थ इव पार्थिवः ॥ १-२४८-४ (१०७७८)
अध्येतारं परं वेदान्प्रयोक्तारं महाध्वरे ।
रक्षितारं शुभाँल्लोकाँल्लोभिरे तं जनाधिपम् ॥ १-२४८-५ (१०७७९)
अधिष्ठानवती लक्ष्मीः परायणवती मतिः ।
वर्धमानोऽखिलो धर्मस्तेनासीत्पृथिवीक्षिताम् ॥ १-२४८-६ (१०७८०)
भ्रातृभिः सहितौ राजा चतुर्भिरधिकं बभौ ।
प्रयुज्यमानैर्विततो वेदैरिव महाध्वरः ॥ १-२४८-७ (१०७८१)
तं तु धौम्यादयो विप्राः परिवार्योपतस्थिरे ।
बृहस्पतिसमा मुख्याः प्रजापतिमिवामराः ॥ १-२४८-८ (१०७८२)
धर्मराजे ह्यतिप्रीत्या पूर्णचन्द्र इवामले ।
प्रजानां रेमिरे तुल्यं नेत्राणि हृदयानि च ॥ १-२४८-९ (१०७८३)
न तु केवलदैवेन प्रजा भावेन रेमिरे ।
यद्बभूव मनःकान्तं कर्मणा स चकार तत् ॥ १-२४८-१० (१०७८४)
न ह्ययुक्तं न चासत्यं नासह्यं न च वाऽप्रियम् ।
भाषितं चारुभाषस्य जज्ञे पार्थस्य धीमतः ॥ १-२४८-११ (१०७८५)
स हि सर्वस्य लोकस्य हितमात्मन एव च ।
चिकीर्षन्सुमहातेजा रेमे भरतसत्तम ॥ १-२४८-१२ (१०७८६)

तथा तु मुदिताः सर्वे पाण्डवा विगतज्वराः ।
अवसन्पृथिवीपालाँस्तापयन्तः स्वतेजसा ॥ १-२४८-१३ (१०७८७)
ततः कतिपयाहस्य बीभत्सुः कृष्णमब्रवीत् ।
उष्णानि कृष्ण वर्तन्ते गच्छावो यमुनां प्रति ॥ १-२४८-१४ (१०७८८)
सुहृज्जनवृतौ तत्र विहृत्य मधुसूदन ।
सायाह्ने पुनरेष्यावो रोचतां ते जनार्दन ॥ १-२४८-१५ (१०७८९)
वासुदेव उवाच। १-२४८-१६क्ष् (१३१५)
कुन्तीमातर्ममाप्येतद्रोचते यद्वयं जले ।
सुहृज्जनवृताः पार्थ विहरेम यथासुखम् ॥ १-२४८-१६ (१०७९०)
वैशम्पायन उवाच। १-२४८-१७क्ष् (१३१६)
आमन्त्र्य तौ धर्मराजमनुज्ञाप्य च भारत ।
जग्मतुः पार्थगोविन्दौ सुहृज्जनवृतौ ततः ॥ १-२४८-१७ (१०७९१)
गविहरन्खाण्डवप्रस्थे काननेषु च माधवः ।
पुष्पितोपवनां दिव्यां ददर्श यमुनां नदीम् ॥ १-२४८-१८ (१०७९२)
तस्यास्तीरे वनं दिव्यं सर्वर्तुसुमनोहरम् ।
आलयं सर्वभूतानां खाण्डवं खड्गचर्मभृत् ॥ १-२४८-१९ (१०७९३)
ददर्श कृत्स्नं तं देशं सहितः सव्यसाचिना ।
ऋक्षगोमायुशार्दूलवृककृष्णमृगान्वितम् ॥ १-२४८-२० (१०७९४)
शाखामृगगणैर्जुष्टं गजद्वीपिनिषेवितम् ।
शकबर्हिणदात्यूहहंससारसनादितम् ॥ १-२४८-२१ (१०७९५)
नानामृगसहस्रैश्च पक्षिभिश्च समावृतम् ।
मानार्हं तच्च सर्वेषां देवदानवरक्षसाम् ॥ १-२४८-२२ (१०७९६)
आलयं पन्नगेन्द्रस्य तक्षकस्य महात्मनः ।
वेणुशाल्मलिबिल्वातिमुक्तजंब्वाम्रचम्पकैः ॥ १-२४८-२३ (१०७९७)
अङ्कोलपनसाश्वत्थतालजम्बीरवञ्जुलैः ।
एकपद्मकतालैश्च शतशश्चैव रौहिणैः ॥ १-२४८-२४ (१०७९८)
नानावृक्षैः समायुक्तं नानागुल्मसमावृतम् ।
वेत्रकीचकसंयुक्तमाशीविषनिषेवितम् ॥ १-२४८-२५ (१०७९९)
विगतार्कं महाभोगविततद्रुमसङ्कटम् ।
व्यालदंष्ट्रिगणाकीर्णं वर्जितं सर्वमानुषैः ॥ १-२४८-२६ (१०८००)
रक्षसां भुजगेन्द्राणां पक्षिणां च महालयम् ।
खाण्डवं सुमहाप्राज्ञः सर्वलोकविभागवित् ॥ १-२४८-२७ (१०८०१)
दृष्टवान्सर्वलोकेश अर्जुनेन समन्वितः ।
पीताम्बरधरो देवस्तद्वनं बहुधा चरन् ॥ १-२४८-२८ (१०८०२)
सद्रुमस्य सयक्षस्य सभूतगणपक्षिणः ।
खाण्डवस्य विनाशं तं ददर्श मधुसूदनः ॥' १-२४८-२९ (१०८०३)

विहारदेशं संप्राप्य नानाद्रुममनुत्तमम् ।
गृहैरुच्चावचैर्युक्तं पुरन्दरपुरोपमम् ॥ १-२४८-३० (१०८०४)
भक्ष्यैर्भोज्यैश्च पेयैश्च रसवद्भिर्महाधनैः ।
माल्यैश्च विविधैर्गन्धैस्तथा वार्ष्णेयपाण्डवौ ॥ १-२४८-३१ (१०८०५)
तदा विविशतुः पूर्णं रत्नैरुच्चावचैः शुभैः ।
यथोपजोषं सर्वश्च जनश्चिक्रीड भारत ॥ १-२४८-३२ (१०८०६)
स्त्रियश्च विपुलश्रोण्यश्चारुपीनपयोधराः ।
मदस्खलितगामिन्यश्चिक्रीडुर्वामलोचनाः ॥ १-२४८-३३ (१०८०७)
वने काश्चिज्जले काश्चित्काश्चिद्वेश्मसु चाङ्गनाः ।
यथादेशं यथाप्रीति चिक्रीडुः पार्थकृष्णयोः ॥ १-२४८-३४ (१०८०८)
वासुदेवप्रिया नित्यं सत्यभामा च भामिनी ।
द्रौपदी च सुभद्रा च वासांस्याभरणानि च ।
प्रायच्छन्त महाराज स्त्रीणां ताः स्म मदोत्कटाः ॥ १-२४८-३५ (१०८०९)
काश्चित्प्रहृष्टा ननृतुश्चुक्रुशुश्च तथा पराः ।
जहसुश्च परा नार्यः पपुश्चान्या वरासवम् ॥ १-२४८-३६ (१०८१०)
रुरुधुश्चापरास्तत्र प्रजघ्नुश्च परस्परम् ।
मन्त्रयामासुरन्याश्च रहस्यानि परस्परम् ॥ १-२४८-३७ (१०८११)
वेणुवीणामृदङ्गानां मनोज्ञानां च सर्वशः ।
शब्देन पूर्यते हर्म्यं तद्वनं सुमहर्द्धिमत् ॥ १-२४८-३८ (१०८१२)
तस्मिंस्तदा वर्तमानो कुरुदाशार्हनन्दनौ ।
समीपं जग्मतुः कंचिदुद्देशं सुमनोहरम् ॥ १-२४८-३९ (१०८१३)
तत्र गत्वा महात्मानौ कृष्णौ परपुरञ्जयौ ।
महार्हासनयो राजंस्ततस्तौ सन्निषीदतुः ॥ १-२४८-४० (१०८१४)
तत्र पूर्वव्यतीतानि विक्रान्तानीतराणि च ।
बहूनि कथयित्वा तौ रेमाते पार्थमाधवौ ॥ १-२४८-४१ (१०८१५)
तत्रोपविष्टौ मुदितौ नाकपृष्ठेऽश्विनाविव ।
अभ्यागच्छत्तदा विप्रो वासुदेवधनञ्जयौ ॥ १-२४८-४२ (१०८१६)
बृहच्छालप्रतीकाशः प्रतप्तकनकप्रभः ।
हरिपिङ्गोज्ज्वलश्मश्रुः प्रमाणायामतः समः ॥ १-२४८-४३ (१०८१७)
तरुणादित्यसङ्काशश्चीरवासा जटाधरः ।
पद्मपत्राननः पिङ्गस्तेजसा प्रज्वलन्निव ॥ १-२४८-४४ (१०८१८)
जगाम तौ कृष्णपार्थौ दिधक्षुः खाण्डवं वनम् ।
उपसृष्टं तु तं कृष्णो भ्राजमानं द्विजोत्तमम् ।
अर्जनो वासुदेवश्च तूर्णमुत्पत्य तस्थतुः ॥ ॥ १-२४८-४५ (१०८१९)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि

अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२४८-१४ उष्णानि निधाधदिनानि ॥
१-२४८-१६ कुन्ती माता यस्येति नेकुन्तामातर्हेऽर्जुन ॥
१-२४८-३० गृहैः मध्येयमुनं निर्मितैः क्रीडावाप्यादियुक्तैः ॥
१-२४८-३९ उद्देशं प्रदेशम् ॥
१-२४८-४३ हरिपिङ्गः नीलपीताखिलाङ्गः । ज्वलश्मश्रुः ज्वालावत्पीतश्मश्रुः ॥
अष्टचत्वारिंशदधिकद्विशततमोऽध्यायः ॥
२४८ ॥

आदिपर्व - अध्याय २४९
॥ श्रीः ॥
१.२४९. अध्यायः २४९

Mahabharata - Adi Parva - Chapter Topics
खाण्डववनदहनार्थं कृष्णार्जुनौप्रति अग्नेः प्रार्थना ॥ १ ॥
जनमेजयस्य अग्निकृतखाण्डवदाहप्रार्थनाकारणप्रश्नानुरोधेनवैशम्पायनेन श्वेतकिराजोपाख्यानकथनम् ॥ २ ॥
बहूनि वर्षाण्यविच्छिन्नं यजतः श्वेतकेर्यागेन श्रान्तैर्ऋत्विग्भिः पुनर्याजना नङ्गीकरणम् ॥ ३ ॥
आराधितस्य शङ्करस्याज्ञया द्वादशवर्षपर्यन्तं संतताज्यधारयाऽग्नेस्तोषणम् ॥ ४ ॥
पुनराराधितस्य शङ्करस्याज्ञया दुर्वाससः साहाय्येन यजतो राज्ञो मखे बहुहविर्भोजनेनाग्नेर्ग्लानिः ॥ ५ ॥
तत्परिहारार्थं प्रार्थितेन ब्रह्मणा खाण्डवभक्षणविधानम् ॥ ६ ॥
खाण्डवं दग्धुं सप्तकृत्वो यतितवतोऽप्यग्नेः तत्रत्यैर्गजादिसत्वैर्जलसेकेन निर्वापणम् ॥ ७ ॥

Mahabharata - Adi Parva - Chapter Text

१-२४९-० (१०८२०)
वैशम्पायन उवाच। १-२४९-०क्ष् (१३१७)
सोऽब्रवीदर्जुनं चैव वासुदेवं च सात्वतम् ।
लोकप्रवीरौ तिष्ठन्तौ काण्डवस्य समीपतः ॥ १-२४९-१ (१०८२१)

ब्राह्मणो बहुभोक्ताऽस्मि बुञ्जेऽपरिमितं सदा ।
भिक्षे वार्ष्णेयपार्थौ वामेकां तृप्तिं प्रयच्छतम् ॥१-२४९-२ (१०८२२)
एवमुक्तो तमब्रूतां ततस्तौ कृष्णपाण्डवौ ।
केनान्नेन भवांस्तृप्येत्तस्यान्नस्य यतावहे ॥१-२४९-३ (१०८२३)
एवमुक्तः स भगवानब्रवीत्तावुभौ ततः ।
भाषमाणौ तदा वीरौ किमन्नं क्रियतामिति ॥१-२४९-४ (१०८२४)
ब्राह्मण उवाच।१-२४९-५क्ष् (१३१८)
नाहमन्नं बुभुक्षे वै पावकं मां निबोधतम् ।
यदन्नमनुरूपं मे तद्युवां संप्रयच्छतम् ॥१-२४९-५ (१०८२५)
इदमिन्द्रः सदा दावं खाण्डवं परिरक्षति ।
न च शक्नोम्यहं दग्धुं रक्ष्यमाणं महात्मना ॥१-२४९-६ (१०८२६)
वसत्यत्र सखा तस्य तक्षकः पन्नगः सदा ।
सगणस्तत्कृते दावं परिरक्षति वज्रभृत् ॥१-२४९-७ (१०८२७)
तत्र भूतान्यनेकानि रक्ष्यन्तेऽस्य प्रसङ्गतः ।
तं दिधक्षुर्न शक्नोमि दग्धुं शक्रस्य तेजसा ॥१-२४९-८ (१०८२८)
स मां प्रज्वलितं दृष्ट्वा मेघाम्भोभिः प्रवर्षति ।
ततो दग्धुं न शक्नोमि दिधक्षुर्दावमीप्सितम् ॥१-२४९-९ (१०८२९)
स युवाभ्यां सहायाभ्यामस्त्रविद्भ्यां समागतः ।
दहेयं खाण्डवं दावमेतदन्नं वृतं मया ॥१-२४९-१० (१०८३०)
युवां ह्युदकधारास्ता भूतानि च समन्ततः ।
उत्तमास्त्रविदौ सम्यक्सर्वतो वारयिष्यथः ॥१-२४९-११ (१०८३१)
जनमेजय उवाच।१-२४९-१२क्ष् (१३१९)
किमर्थं भगवानग्निः खाण्डवं दग्धुमिच्छति ।
रक्ष्यमाणं महेन्द्रेण नानासत्वसमायुतम् ॥१-२४९-१२ (१०८३२)
न ह्येतत्कारणं ब्रह्मन्नल्पं संप्रतिभाति मे ।
यद्ददाह सुसंक्रुद्धः खाण्डवं हव्यवाहनः ॥१-२४९-१३ (१०८३३)
एतद्विस्तरशो ब्रह्मन्श्रोतुमिच्छामि तत्त्वतः ।
खाण्डवस्य पुरा दाहो यथा समभवन्मुने ॥१-२४९-१४ (१०८३४)
वैशम्पायन उवाच।१-२४९-१५क्ष् (१३२०)
शृणु मे ब्रुवतो राजन्सर्वमेतद्यथातथम् ।
यन्निमित्तं ददाहाग्निः खाण्डवं पृथिवीपते ॥१-२४९-१५ (१०८३५)
हन्त ते कथयिष्यामि पौराणीमृषिसंस्तुताम् ।
कथामिमां नरश्रेष्ठ खाण्डवस्य विनाशिनीम् ॥१-२४९-१६ (१०८३६)
पौराणः श्रूयते राजन्राजा हरिहयोपमः ।
श्वेतकिर्नाम विख्यातो बलविक्रमसंयुतः ॥१-२४९-१७ (१०८३७)
यज्वा दानपतिर्धीमान्यथा नान्योऽस्ति कश्चन ।

ग्जग्राह दीक्षां स नृपः तदा द्वादशवार्षिकीम् ॥१-२४९-१८ (१०८३८)
तस्य सत्रे सदा तस्मिन्समागच्छन्महर्षयः ।
वेदवेदाङ्गविद्वांसो ब्राह्मणाश्च सहस्रशः ॥' १-२४९-१९ (१०८३९)
ईजे च स महायज्ञैः क्रतुभिश्चाप्तदक्षिणैः ॥ १-२४९-२० (१०८४०)
तस्य नान्याऽभवद्बुद्धिर्दिवसे दिवसे नृप ।
सत्रे क्रियासमारम्भे दानेषु विविधेषु च ॥१-२४९-२१ (१०८४१)
ऋत्विग्भिः सहितो धीमानेवमीजे स भूमिपः ।
ततस्तु ऋत्विजश्चास्य धूमव्याकुललोचनाः ॥१-२४९-२२ (१०८४२)
कालेन महता खिन्नास्तत्यजुस्ते नराधिपम् ।
ततः प्रसादयामास ऋत्विजस्तान्महीपतिः ॥१-२४९-२३ (१०८४३)
चक्षुर्विकलतां प्राप्ता न प्रपेदुश्च ते क्रतुम् ।
ततस्तेषामनुमते तद्विप्रैस्तु नराधिपः ॥१-२४९-२४ (१०८४४)
सत्रं समापयामास ऋत्विग्भिरपरैः सह ।
तस्यैवंवर्तमानस्य कदाचित्कालपर्यये ॥१-२४९-२५ (१०८४५)
सत्रमहार्तुकामस्य संवत्सरशतं किल ।
ऋत्विजो नाभ्यपद्यन्त समाहर्तुं महात्मनः ॥१-२४९-२६ (१०८४६)
स च राजाऽकरोद्यत्नं महान्तं ससुहृज्जनः ।
प्रणिपातेन सान्त्वेन दानेन च महायशाः ॥१-२४९-२७ (१०८४७)
ऋत्विजोऽनुनयामास भूयो भूयस्त्वतन्द्रितः ।
ते चास्य तमभिप्रायं न चक्रुरमितौजसः ॥१-२४९-२८ (१०८४८)
स चाश्रमस्थान्राजर्षिस्तानुवाच रुषान्वितः ।
यद्यहं पतितो विप्राः शुश्रूषायां न च स्थितः ॥१-२४९-२९ (१०८४९)
आशु त्याज्योऽस्मि युष्माभिर्ब्राह्मणैश्च जुगुप्सितः ।
तन्नार्हथ क्रतुश्रद्धां व्याघातयितुमद्य ताम् ॥१-२४९-३० (१०८५०)
अस्थाने वा परित्यागं कर्तुं मे द्विजसत्तमाः ।
प्रपन्न एव वो विप्राः प्रसादं कर्तुमर्हथ ॥१-२४९-३१ (१०८५१)
सान्त्वदानादिभिर्वाक्यैस्तत्त्वतः कार्यवत्तया ।
प्रसादयित्वा वक्ष्यामि यन्नः कार्यं द्विजोत्तमाः ॥१-२४९-३२ (१०८५२)
अथवाऽहं परित्यक्तो भवद्भिर्द्वेषकारणात् ।
ऋत्विजोऽन्यान्गमिष्यामि याजनार्थं द्विजोत्तमाः ॥१-२४९-३३ (१०८५३)
एतावदुक्त्वा वचनं विरराम स पार्थिवः ।
यदा न शेकू राजानं याजनार्थं परन्तप ॥१-२४९-३४ (१०८५४)
ततस्ते याजकाः क्रुद्धास्तमूचुर्नृपसत्तमम् ।
तव कर्माण्यजस्रं वै वर्तन्ते पार्थिवोत्तम ॥१-२४९-३५ (१०८५५)
ततो वयं परिश्रान्ताः सततं कर्मवाहिनः ।
श्रमादस्मात्परिश्रान्तान्स त्वं नस्त्यक्तुमर्हसि ॥१-२४९-३६ (१०८५६)

बुद्धिमोहं समास्थाय त्वरासंभावितोऽनघ ।
गच्छ रुद्रसकाशं त्वं सहि त्वां याजयिष्यति ॥ १-२४९-३७ (१०८५७)
साधिक्षेपं वचः श्रुत्वा संक्रुद्धः श्वेतकिर्नृपः ।
कैलासं पर्वतं गत्वा तप उग्रं समास्थितः ॥ १-२४९-३८ (१०८५८)
आराधयन्महादेवं नियतः संशितव्रतः ।
उपवासपरो राजन्दीर्घकालमतिष्ठत ॥ १-२४९-३९ (१०८५९)
कदाचिद्द्वादशे काले कदाचिदपि षोडशे ।
आहारमकरोद्राजा मूलानि च फलानि च ॥ १-२४९-४० (१०८६०)
ऊर्ध्वबाहुस्त्वनिमिषस्तिष्ठन्स्थाणुरिवाचलः ।
षण्मासानभवद्राजा श्वेतकिः सुसमाहितः ॥ १-२४९-४१ (१०८६१)
तं तथा नृपशार्दूलं तप्यमानं महत्तपः ।
शङ्करः परमप्रीत्या दर्शयामास भारत ॥ १-२४९-४२ (१०८६२)
उवाच चैनं भगवान्स्निग्धगम्भीरया गिरा ।
प्रीतोऽस्मि नरशार्दूल तपसा ते परन्तप ॥ १-२४९-४३ (१०८६३)
वरं वृणीष्व भद्रं ते यं त्वमिच्छसि पार्थिव ।
एतच्छ्रुत्वा तु वचनं रुद्रस्यामिततेजसः ॥ १-२४९-४४ (१०८६४)
प्रणिपत्य महात्मानं राजर्षिः प्रत्यभाषत ।
यदि मे भगवान्प्रीतः सर्वलोकनमस्कृतः ॥ १-२४९-४५ (१०८६५)
स्वयं मां देवदेवेश याजयस्व सुरेश्वर ।
एतच्छ्रुत्वा तु वचनं राज्ञा तेन प्रभाषितम् ॥ १-२४९-४६ (१०८६६)
उवाच भगवान्प्रीतः स्मितपूर्वमिदं वचः ।
नास्माकमेतद्विषये वर्तते याजनं प्रति ॥ १-२४९-४७ (१०८६७)
त्वया च सुमहत्तप्तं तपो राजन्वरार्थिना ।
याजयिष्यामि राजंस्त्वां समयेन परन्तप ॥ १-२४९-४८ (१०८६८)
समा द्वादश राजेन्द्र ब्रह्मचारी समाहितः ।
सततं त्वाज्यधाराभिर्यदि तर्पयसेऽनलम् ॥ १-२४९-४९ (१०८६९)
कामं प्रार्थयसे यं त्वं मत्तः प्राप्स्यसि तं नृप ।
एवमुक्तश्च रुद्रेण श्वेतकिर्मनुजाधिपः ॥ १-२४९-५० (१०८७०)
तथा चकार तत्सर्वं यथोक्तं शूलपाणिना ।
पूर्णे तु द्वादशे वर्षे पुनरायान्महेश्वरः ॥ १-२४९-५१ (१०८७१)
दृष्टैव च स राजानं शङ्करो लोकभावनः ।
उवाच परमप्रीतः श्वेतकिं नृपसत्तमम् ॥ १-२४९-५२ (१०८७२)
तोषितोऽहं नृपश्रेष्ठ त्वयेहाद्येन कर्मणा ॥
याजनं ब्राह्मणानां तु विधिदृष्टं परन्तप ॥ १-२४९-५३ (१०८७३)
अतोऽहं त्वां स्वयं नाद्य याजयामि परन्तप ।
ममांशस्तु क्षितितले महाभागो द्विजोत्तमः ॥ १-२४९-५४ (१०८७४)

दुर्वासा इति विख्यातः स हि त्वां याजयिष्यति ।
मन्नियोगान्महातेजाः संभाराः संभ्रियन्तु ते ॥ १-२४९-५५ (१०८७५)
एतच्छ्रुत्वा तु वचनं रुद्रेण समुदाहृतम् ।
स्वपुरं पुनरागम्य संभारान्पुनरार्जयत् ॥ १-२४९-५६ (१०८७६)
ततः संभृतसंभारो भूयो रुद्रमुपागमत् ।
ग्उवाच च महिपालः प्राञ्जलिः प्रणतः स्थितः।'
संभृता मम संभाराः सर्वोपकरणानि च ॥ १-२४९-५७ (१०८७७)
त्वत्प्रसादानमहादेव श्वो मे दीक्षा भवेदिति ।
एतच्छ्रुत्वा तु वचनं तस्य राज्ञो महात्मनः ॥ १-२४९-५८ (१०८७८)
दुर्वाससं समाहूय रुद्रो वचनमब्रवीत् ।
एष राजा महाभागः श्वेतकिर्द्विजसत्तम ॥ १-२४९-५९ (१०८७९)
एनं याजय विप्रेन्द्र मन्नियोगेन भूमिपम् ।
बाढमित्येव वचनं रुद्रं त्वृषिरुवाच ह ॥ १-२४९-६० (१०८८०)
ततः सत्रं समभवत्तस्य राज्ञो महात्मनः ।
यथाविधि यथाकालं यथोक्तं बहुदक्षिणम् ॥ १-२४९-६१ (१०८८१)
तस्मिन्परिसमाप्ते तु राज्ञः सत्रे महात्मनः ।
दुर्वाससाऽभ्यनुज्ञाता विप्रतस्थुः स्म याजकाः ॥ १-२४९-६२ (१०८८२)
ये तत्र दीक्षिताः सर्वे सदस्याश्च महौजसः ।
सोऽपि राजन्महाभागः स्वपुरं प्राविशत्तदा ॥ १-२४९-६३ (१०८८३)
पूज्यमानो महाभागैर्ब्राह्मणैर्वेदपारगैः ।
बन्दिभिः स्तूयमानश्च नागरैश्चाभिनन्दितः ॥ १-२४९-६४ (१०८८४)
एवंवृत्तः स राजर्षिः श्वेतकिर्नृपसत्तमः ।
कालेन महता चापि ययौ स्वर्गमभिष्टुतः ॥ १-२४९-६५ (१०८८५)
ऋत्विग्भिः सहितः सर्वैः सदस्यैश्च समन्वितः ।
तस्य सत्रे पपौ वह्निर्हविर्द्वादशवत्सरान् ॥ १-२४९-६६ (१०८८६)
सततं चाज्यधाराभिरैकात्म्ये तत्र कर्मणि ।
हविषा च ततो वह्निः परां तृप्तिमगच्छत ॥ १-२४९-६७ (१०८८७)
न चैच्छत्पुनरादातुं हविरन्यस्य कस्यचित् ।
पाण्डुवर्णो विवर्णश्च न यतावत्प्रकाशते ॥ १-२४९-६८ (१०८८८)
ततो भघवतो वह्नेर्विकारः समजायत ।
तेजसा विप्रहीणश्च ग्लानिश्चैनं समाविशत् ॥ १-२४९-६९ (१०८८९)
स लक्षयित्वा चात्मानं तेजोहीनं हुताशनः ।
जगाम सदनं पुण्यं ब्रह्मणो लोकपूजितम् ॥ १-२४९-७० (१०८९०)
तत्र ब्रह्माणमासीनमिदं वचनमब्रवीत् ।
भगवन्परमा प्रीतिः कृता श्वेतकिना मम ॥ १-२४९-७१ (१०८९१)
अरुचिश्चाभवत्तीव्रा तां न शक्नोम्यपोहितुम् ।

तेजसा विप्रहीणोऽस्मि बलेन च जगत्पते ॥१-२४९-७२ (१०८९२)
इच्छेयं त्वत्प्रसादेन स्वात्मनः प्रकृतिं स्थिराम् ।
एतच्छ्रुत्वा हुतवहाद्भगवान्सर्वलोककृत् ॥१-२४९-७३ (१०८९३)
हव्यवाहमिदं वाक्यमुवाच प्रहसन्निव ।
त्वया द्वादश वर्षाणि वसोर्धाराहुतं हविः ॥१-२४९-७४ (१०८९४)
उपयुक्तं महाभाग तेन त्वां ग्लानिराविशत् ।
तेजसा विप्रहीणत्वात्सहसा हव्यवाहन ॥१-२४९-७५ (१०८९५)
मागमस्त्वं व्यथां वह्ने प्रकृतिस्थो भविष्यसि ।
अरुचिं नाशयिष्येऽहं समयं प्रतिपद्य ते ॥१-२४९-७६ (१०८९६)
पुरा देवनियोगेन यत्त्वया भस्मसात्कृतम् ।
आलयं देवशत्रूणां सुघोरं खाण्डवं वनम् ॥१-२४९-७७ (१०८९७)
तत्र सर्वाणि सत्वानि निवसन्ति विभावसो ।
तेषां त्वं मेदसा तृप्तः प्रकृतिस्थो भविष्यसि ॥१-२४९-७८ (१०८९८)
गच्छ शीघ्रं प्रदग्धुं त्वं ततो मोक्ष्यसि किल्विषात् ।
एतच्छ्रुत्वा तु वचनं परमेष्ठिमुखाच्च्युतम् ॥१-२४९-७९ (१०८९९)
उत्तमं जवमास्थाय प्रदुद्राव हुताशनः ।
आगम्य खाण्डवं दावमुत्तमं वीर्यमास्थितः ।
सहसा प्राज्वलच्चाग्निः क्रुद्धो वायुसमीरितः ॥ १-२४९-८० (१०९००)
प्रदीप्तं खाण्डवं दृष्ट्वा ये स्युस्तत्र निवासिनः ।
परमं यत्नमातिष्ठन्पावकस्य प्रशान्तये ॥१-२४९-८१ (१०९०१)
करैस्तु करिणः शीघ्रं जलमादाय सत्वराः ।
सिषिचुः पावकं क्रुद्धाः शतशोऽथ सहस्रशः ॥१-२४९-८२ (१०९०२)
बहुशीर्षास्ततो नागाः शिरोभिर्जलसन्ततिम् ।
मुमुचुः पावकाभ्याशे सत्वराः क्रोधमूर्च्छिताः ॥१-२४९-८३ (१०९०३)
तथैवान्यानि सत्वानि नानाप्रहरणोद्यमैः ।
विलयं पावकं शीघ्रमनयन्भरतर्षभ ॥१-२४९-८४ (१०९०४)
अनेन तु प्रकारेण भूयोभूयश्च प्रज्वलन् ।
सप्तकृत्वः प्रशमितः खाण्डवे हव्यवाहनः ॥ ॥१-२४९-८५ (१०९०५)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि
ऊनपञ्चाशदधिकद्विशततमोऽध्यायः ॥२४९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२४९-२० इक्ष्वाकूणामधिरथो यज्वा विपुलदक्षिणः इति ङ । पाठः ॥
१-२४९-३७ त्वरासंभावितः त्वरायुक्तः ॥
१-२४९-७३ प्रकृतिं स्वभावम् ॥

१-२४९-७४ वसोर्धारा पात्रविशेषः । येन हूयमानं घृतद्रव्यं संततधारारूपेण क्षरति। तेन हुतं हविरर्थाद्धृतमेव वसोर्धारां जुहोतीत्युपक्रम्य घृतस्य वा एवमेषा धारेति वाक्यशेषात् ॥
१-२४९-७५ उपयुक्तं भुक्तम् ॥
ऊनपञ्चाशदधिकद्विशततमोऽध्यायः ॥
२४९ ॥

आदिपर्व - अध्याय २५०
॥ श्रीः ॥
१.२५०. अध्यायः २५०

Mahabharata - Adi Parva - Chapter Topics
पुनर्निवेदितविघ्नवृत्तान्तेन ब्रह्मणा आज्ञप्तस्याग्नेः कृष्णार्जुनौप्रति आगमनम् ॥ १ ॥
वैशम्पायनेन जनमेजयंप्रति खाण्डवदाहकारणकथनसमापनम् ॥ २ ॥
अर्जुनेन दिव्यानां रथाश्वधनुरादीनां याचनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५०-० (१०९०६)
वैशम्पायन उवाच। १-२५०-०क्ष् (१३२१)
स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत्संक्रुद्धो हव्यवाहनः ॥ १-२५०-१ (१०९०७)
तच्च सर्वं यथान्यायं ब्रह्मणे संन्यवेदयत् ।
उवाच चैवनं भगवान्मुहूर्तं स विचिन्त्य तु ॥ १-२५०-२ (१०९०८)
उपायः परिदृष्टो मे यथा त्वं धक्ष्यसेऽनघ ।
कालं च कंचित्क्षमतां ततस्तद्धक्ष्यते भवान् ॥ १-२५०-३ (१०९०९)
भविष्यतः सहायौ ते नरनारायणौ तदा ।
ताभ्यां त्वं सहितो दावं धक्ष्यसे हव्यवाहन ॥ १-२५०-४ (१०९१०)
एवमस्त्विति तं वह्निर्ब्रह्माणं प्रत्यभाषत ।
संभूतौ तौ विदित्वा तु नरनारायणावृषी ॥ १-२५०-५ (१०९११)
कालस्य महतो राजंस्तस्य वाक्यं स्वयंभुवः ।
अनुस्मृत्य जगामाथ पुनरेव पितामहम् ॥ १-२५०-६ (१०९१२)
अब्रवीच्च तदा ब्रह्मा यथा त्वं धक्ष्यसेऽनल ।
खाण्डवं दावमद्यैव मिषतोऽस्य शचीपतेः ॥ १-२५०-७ (१०९१३)
नरनारायणौ यौ तौ पूर्वदेवौ विभावसो ।
संप्राप्तौ मानुषे लोके कार्यार्थं हि दिवौकसाम् ॥ १-२५०-८ (१०९१४)

अर्जुनं वासुदेवं च यौ तौ लोकोऽभिमन्यते ।
तावेतौ सहितावेहि खाण्डवस्य समीपतः ॥ १-२५०-९ (१०९१५)
तौ त्वं याचस्व साहाय्ये दाहार्थं खाण्डवस्य च ।
ततो धक्ष्यसि तं दावं रक्षितं त्रिदशैरपि ॥ १-२५०-१० (१०९१६)
तौ तु सत्वानि सर्वाणि यत्नतो वारयिष्यतः ।
देवराजं च सहितौ तत्र मे नास्ति संशयः ॥ १-२५०-११ (१०९१७)
एतच्छ्रुत्वा तु वचनं त्वरितो हव्यवाहनः ।
कृष्णपार्थावुपागम्य यमर्थं त्वभ्यभाषत ॥ १-२५०-१२ (१०९१८)
तं ते कथितवानस्मि पूर्वमेव नृपोत्तम ।
तच्छ्रुत्वा वचनं त्वग्नेर्बीभत्सुर्जातवेदसम् ॥ १-२५०-१३ (१०९१९)
अब्रवीन्नृपशार्दूल तत्कालसदृशं वचः ।
दिधक्षुं खाण्डवं दावमकामस्य शतक्रतोः ॥ १-२५०-१४ (१०९२०)
अर्जुन उवाच। १-२५०-१५क्ष् (१३२२)
उत्तमास्त्राणि मे सन्ति दिव्यानि च बहूनि च ।
यैरहं शक्नुयां योद्धुमपि वज्रधरान्बहून् ॥ १-२५०-१५ (१०९२१)
धनुर्मे नास्ति भगवन्बाहुवीर्येण संमितम् ।
कुर्वतः समरे यत्नं वेगं यद्विषहेन्मम ॥ १-२५०-१६ (१०९२२)
शरैश्च मेऽर्थो बहुभिरक्षयैः क्षिप्रमस्यतः ।
न हि वोढुं रथः शक्तः शरान्मम यथेप्सितान् ॥ १-२५०-१७ (१०९२३)
अश्वांश्च दिव्यानिच्छेयं पाण्डुरान्वातरंहसः ।
रथं च मेघनिर्घोषं सूर्यप्रतिमतेजसम् ॥ १-२५०-१८ (१०९२४)
तथा कृष्णस्य वीर्येण नायुधं विद्यते समम् ।
येन नागान्पिशाचांश्च निहन्यान्माधवो रणे ॥ १-२५०-१९ (१०९२५)
उपायं कर्मसिद्धौ च भघवन्वक्तुमर्हसि ।
निवारयेयं येनेन्द्रं वर्षमाणं महावने ॥ १-२५०-२० (१०९२६)
पौरुषेण तु यत्कार्यं तत्कर्ताऽहं स्म पावक ।
करणानि समर्थानि भगवन्दातुमर्हसि ॥ ॥ १-२५०-२१ (१०९२७)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि
पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

आदिपर्व - अध्याय २५१
॥ श्रीः ॥
१.२५१. अध्यायः २५१

Mahabharata - Adi Parva - Chapter Topics
अग्निना वरुणात् आहृतानां रथादीनां अर्जुनाय दानम् ॥ १ ॥

अग्नेः खाण्डवदाहारम्भः ॥ २ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५१-० (१०९२८)
वैशम्पायन उवाच। १-२५१-०क्ष् (१३२३)
एवमुक्तः स भगवान्धूमकेतुर्हुताशनः ।
चिन्तयामास वरुणं लोकपालं दिदृक्षया ॥ १-२५१-१ (१०९२९)
आदित्यमुदके देवं निवसन्तं जलेश्वरम् ।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकम् ॥ १-२५१-२ (१०९३०)
तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम् ।
चतुर्थं लोकपालानां देवदेवं सनातनम् ॥ १-२५१-३ (१०९३१)
सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते ।
तत्प्रयच्छोभयं शीघ्रं रथं च कपिलक्षणम् ॥ १-२५१-४ (१०९३२)
कार्यं च सुमहत्पार्थो गाण्डीवेन करिष्यति ।
चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयताम् ॥ १-२५१-५ (१०९३३)
ददानीत्येव वरुणः पावकं प्रत्यभाषत ।
तदद्भुतं महावीर्यं यशःकीर्तिविवर्धनम् ॥ १-२५१-६ (१०९३४)
सर्वशस्त्रैरनाधृष्यं सर्वशस्त्रप्रमाथि च ।
सर्वायुधमहामात्रं परसैन्यप्रधर्षणम् ॥ १-२५१-७ (१०९३५)
एकं शतसहस्रेण संमितं राष्ट्रवर्धनम् ।
चित्रमुच्चावचैर्वर्णैः शोभितं श्लक्ष्णमव्रणम् ॥ १-२५१-८ (१०९३६)
देवदानवगन्धर्वैः पूजितं शाश्वतीः समाः ।
प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषुधी ॥ १-२५१-९ (१०९३७)
रथं च दिव्याश्वयुजं कपिप्रवरकेतनम् ।
उपेतं राजतैरश्वैर्गान्धर्वैर्हेममालिभिः ॥ १-२५१-१० (१०९३८)
पाण्डुराभ्रप्रतीकाशैर्मनोवायुसमैर्जवे ।
सर्वोपकरणैर्युक्तमजय्यं देवदानवैः ॥ १-२५१-११ (१०९३९)
भावुमन्तं महाघोषं सर्वरत्नमनोरमम् ।
ससर्ज यं सुतपसा भौमनो भुवनप्रभुः ॥ १-२५१-१२ (१०९४०)
प्रजापतिरनिर्देश्यं यस्य रूपं रवेरिव ।
यं स्म सोमः समारुह्य दानवानजयत्प्रभुः ॥ १-२५१-१३ (१०९४१)
नवमेघप्रतीकाशं ज्वलन्तमिव च श्रिया ।
आश्रितौ तं रथश्रेष्ठं शक्रायुधसमावुभौ ॥ १-२५१-१४ (१०९४२)
तापनीया सुरुचिरा ध्वजयष्टिरनुत्तमा ।
तस्यां तु वानरो दिव्यः सिंहशार्दूलकेतनः ॥ १-२५१-१५ (१०९४३)

ग्हनूमान्नाम तेजस्वी कामरूपी महाबलः।'
दिधक्षन्निव तत्र स्म संस्थितो मूर्ध्न्यशोभत ।
ध्वजे भूतानि तत्रासन्विविधानि महान्ति च ॥ १-२५१-१६ (१०९४४)
नादेन रिपुसैन्यानां येषां संज्ञा प्रणश्यति ।
स तं नानापताकाभिः शोभितं रथसत्तमम् ॥१-२५१-१७ (१०९४५)
प्रदक्षिणमुपावृत्य दैवतेभ्यः प्रणम्य च ।
सन्नद्धः कवची खड्गी बद्धगोधाङ्गुलित्रकः ॥१-२५१-१८ (१०९४६)
आरुरोह तदा पार्थो विमानं सुकृती यथा ।
तच्च दिव्यं धनुः श्रेष्ठं ब्रह्मणा निर्मितं पुरा ॥१-२५१-१९ (१०९४७)
गाण्डीवमुपसंगृह्य बभूव मुदितोऽर्जुनः ।
हुताशनं पुरस्कृत्य ततस्तदपि वीर्यवान् ॥१-२५१-२० (१०९४८)
जग्राह बलमास्थाय ज्यया च युयुजे धनुः ।
मौर्व्यां तु योज्यमानायां बलिना पाण्डवेन ह ॥१-२५१-२१ (१०९४९)
येऽशृष्वन्कूजितं यत्र तेषां वै व्यथितं मनः ।
लब्ध्वा रथं धनुश्चैव तथाऽक्षय्ये महेषुधी ॥१-२५१-२२ (१०९५०)
बभूव कल्यः कौन्तेयः प्रहृष्टः साह्यकर्मणि ।
वज्रनाभं ततश्चक्रं ददौ कृष्णाय पावकः ॥१-२५१-२३ (१०९५१)
आग्नेयमस्त्रं दयितं स च कल्योऽभवत्तदा ।
अब्रवीत्पावकश्चैवमेतेन मधुसूदन ॥१-२५१-२४ (१०९५२)
अमानुषानपि रणे जेष्यसि त्वमसंशयम् ।
अनेन तु मनुष्याणां देवानामपि चाहवे ॥१-२५१-२५ (१०९५३)
रक्षःपिशाचदैत्यानां नागानां चाधिकस्तथा ।
भविष्यसि न सन्देहः प्रवरोऽपि निबर्हणे ॥१-२५१-२६ (१०९५४)
क्षिप्तं क्षिप्तं रणे चैतत्त्वया माधव शत्रुषु ।
हत्वाऽप्रतिहतं सङ्ख्ये पाणिमेष्यति ते पुनः ॥१-२५१-२७ (१०९५५)
वैशम्पायन उवाच।१-२५१-२८क्ष् (१३२४)
वरुणश्च ददौ तस्मै गदामशनिनिःस्वनाम् ।
दैत्यान्तकरणीं घोरां नाम्ना कौमोदकीं प्रभुः ॥१-२५१-२८ (१०९५६)
ततः पावकमब्रूतां प्रहृष्टावर्जुनाच्युतौ ।
कृतास्त्रौ शस्त्रसंपन्नौ रथिनौ ध्वजिनावपि ॥१-२५१-२९ (१०९५७)
कल्यौ स्वो भगवन्योद्धुमपि सर्वैः सुरासुरैः ।
किं पुनर्वज्रिणैकेन पन्नगार्थे युयुत्सता ॥१-२५१-३० (१०९५८)
अर्जुन उवाच।१-२५१-३१क्ष् (१३२५)
चक्रपाणिर्हृषीकेशो विचरन्युधि वीर्यवान् ।
चक्रेण भस्मसात्सर्वं विसृष्टेन तु वीर्यवान् ।
त्रिषु लोकेषु तन्नास्ति यन्न कुर्याज्जनार्दनः ॥ १-२५१-३१ (१०९५९)

गाण्डीवं धनुरादाय तथाऽक्षय्ये महेषुधी ।
अहमप्युत्सहे लोकान्विजेतुं युधि पावक ॥१-२५१-३२ (१०९६०)
सर्वतः परिवार्यैवं दावमेतं महाप्रभो ।
कामं संप्रज्वलाद्यैव कल्यौ स्वः साह्यकर्मणि ॥१-२५१-३३ (१०९६१)
ग्यदि खाण्डवमेष्यति प्रमादा-
त्सगणो वा परिरक्षितुं महेन्द्रः ।
शरताडितगात्रकुण्डलानां
कदनं द्रक्ष्यति देववाहिनीनाम् ॥' १-२५१-३४ (१०९६२)
वैशम्पायन उवाच।१-२५१-३५क्ष् (१३२६)
एवमुक्तः स भगवान्दाशार्हेणार्जुनेन च ।
तैजसं रपमास्थाय दावं दग्धुं प्रचक्रमे ॥१-२५१-३५ (१०९६३)
सर्वतः परिवार्याथ सप्तार्चिर्ज्वलनस्तथा ।
ददाह खाण्डवं दावं युगान्तमिव दर्शयन् ॥१-२५१-३६ (१०९६४)
प्रतिगृह्य समाविश्य तद्वनं भरतर्षभ ।
मेघस्तनितनिर्घोषः सर्वभूतान्यकम्पयत् ॥१-२५१-३७ (१०९६५)
दह्यतस्तस्य च बभौ रूपं दावस्य भारत ।
मेरोरिव नगेन्द्रस्य कीर्णस्यांशुमतोंशुभिः ॥ ॥१-२५१-३८ (१०९६६)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि
एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२५१-२ आदित्यमदितेः पुत्रम् ॥
१-२५१-७ महामात्रं प्रधानम् ॥
१-२५१-१२ भौमनो विश्वकर्मा ॥
१-२५१-१५ सिंहशार्दूलवद्भयंकरः केतनः कायोयस्य सः ॥
१-२५१-२३ कल्यः समर्थः वज्रं वरत्रा सा नाभौ यस्य तत् ॥
१-२५१-२७ हत्वा हत्वा रिपून्सङ्ख्ये इति घ ।पात ॥
एकपञ्चाशदधिकद्विशततमोऽध्यायः ॥
२५१ ॥

आदिपर्व - अध्याय २५२
॥ श्रीः ॥
१.२५२. अध्यायः २५२

Mahabharata - Adi Parva - Chapter Topics
खाण्डवदाहं दृष्ट्वा त्रस्तैर्देवैः प्रार्थितेनेन्द्रेण जलवर्षणम् ॥ १ ॥

१-२५२-० (१०९६७)
वैशम्पायन उवाच। १-२५२-०क्ष् (१३२७)
तौ रथाभ्यां रथश्रेष्ठौ दावस्योभयतः स्थितौ ।
दिक्षु सर्वासु भूतानां चक्राते कदनं महत् ॥ १-२५२-१ (१०९६८)
यत्र यत्र च दृश्यन्ते प्राणिनः खाण्डवालयाः ।
पलायन्तः प्रवीरौ तौ तत्रतत्राभ्यधावताम् ॥ १-२५२-२ (१०९६९)
छिद्रं न स्म प्रपश्यन्ति रथयोराशुचारिणोः ।
आविद्धावेव दृश्येते रथिनौ तौ रथोत्तमौ ॥ १-२५२-३ (१०९७०)
खाण्डवे दह्यमाने तु भूतान्यथ सहस्रशः ।
उत्पेतुर्भैरवान्नादान्विनदन्तः समन्ततः ॥ १-२५२-४ (१०९७१)
दग्धैकदेशा बहवो निष्टप्ताश्च तथाऽपरे ।
स्फुटिताक्षा विशीर्णाश्च विप्लुताश्च तथाऽपरे ॥ १-२५२-५ (१०९७२)
समालिङ्ग्य सुतानन्ये पितॄन्भ्रातॄनथाऽपरे ।
त्यक्तुं न शेकुः स्नेहेन तत्रैव निधनं गताः ॥ १-२५२-६ (१०९७३)
सन्दष्टदशनाश्चान्ये समुत्पेतुरनेकशः ।
ततस्तेऽतीव घूर्णन्तः पुनरग्नौ प्रपेदिरे ॥ १-२५२-७ (१०९७४)
दग्धपक्षाक्षिचरणा विचेष्टन्तो महीतले ।
तत्रतत्र स्म दृश्यन्ते विनश्यन्तः शरीरिणः ॥ १-२५२-८ (१०९७५)
जलाशयेषु तप्तेषु क्वाथ्यमानेषु वह्निना ।
गतसत्वाः स्म दृश्यन्ते कूर्ममत्स्याः समन्ततः ॥ १-२५२-९ (१०९७६)
शरीरैरपरे दीप्तैर्देहवन्त इवाग्नयः ।
अदृश्यन्त वने तत्र प्राणिनः प्राणिसंक्षये ॥ १-२५२-१० (१०९७७)
कांश्चिदुत्पततः पार्थः शरैः संछिद्य खण्डशः ।
पातयामास विहगान्प्रदीप्ते वसुरेतसि ॥ १-२५२-११ (१०९७८)
ते शराचितसर्वाङ्गा निनदन्तो महारवान् ।
ऊर्ध्वमुत्पत्य वेगेन निपेतुः खाण्डवे पुनः ॥ १-२५२-१२ (१०९७९)
शरैरभ्याहतानां च सङ्घशः स्म वनौकसाम् ।
विरावः शुश्रुवे घोरः समुद्रस्येव मथ्यतः ॥ १-२५२-१३ (१०९८०)
वह्नेश्चापि प्रदीप्तस्य खमुत्पेतुर्महार्चिषः ।
जनयामासुरुद्वेगं सुमहान्तं दिवौकसाम् ॥ १-२५२-१४ (१०९८१)
तेनार्चिषा सुसन्तप्ता देवाः सर्षिपुरोगमाः ।
ततो जग्मुर्महात्मानः सर्व एव दिवौकसः ।
शतक्रतुं सहस्राक्षं देवेशमसुरार्दनम् ॥ १-२५२-१५ (१०९८२)

देवा ऊचुः। १-२५२-१६क्ष् (१३२८)
किं न्विमे मानवाः सर्वे दह्यन्ते चित्रभानुना ।
कच्चिन्न संक्षयः प्राप्तो लोकानाममरेश्वर ॥ १-२५२-१६ (१०९८३)
वैशम्पायन उवाच। १-२५२-१७क्ष् (१३२९)
तच्छ्रुत्वा वृत्रहा तेभ्यः स्वयमेवान्ववेक्ष्य च ।
खाण्डवस्य विमोक्षार्थं प्रययौ हरिवाहनः ॥ १-२५२-१७ (१०९८४)
महता रथबृन्देन नानारूपेण वासवः ।
आकाशं समवाकीर्य प्रववर्ष सुरेश्वरः ॥ १-२५२-१८ (१०९८५)
ततोऽक्षमात्रा व्यसृजन्धाराः शतसहस्रशः ।
चोदिता देवराजेन जलदाः खाण्डवं प्रति ॥ १-२५२-१९ (१०९८६)
असंप्राप्तास्तु ता धारास्तेजसा जातवेदसः ।
ख एव समुशुष्यन्त नकाश्चित्पावकं गताः ॥ १-२५२-२० (१०९८७)
ततो नमुचिहा क्रुद्धो भृशमर्चिष्मतस्तदा ।
पुनरेव महामेघैरम्भांसि व्यसृजद्बहु ॥ १-२५२-२१ (१०९८८)
अर्चिर्धाराभिसंबद्धं धूमविद्युत्समाकुलम् ।
बभूव तद्वनं घोरं स्तनयित्नुसमाकुलम् ॥ ॥ १-२५२-२२ (१०९८९)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि
द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२५२-३ आविद्धावेव अलातचक्रवद्भ्रामितावेव ॥
द्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥
२५२ ॥

आदिपर्व - अध्याय २५३
॥ श्रीः ॥
१.२५३. अध्यायः २५३

Mahabharata - Adi Parva - Chapter Topics

इन्द्राभिवृष्टस्य जलस्यार्जुनेन निवारणम् ॥ १ ॥
पुत्रं निगीर्याकाशमुत्पतन्त्याः तक्षकभार्यायाः अर्जुनेन शिरश्छेदः ॥ २ ॥
इन्द्रेण स्वकृतवायुवर्षमोहितादर्जुनात्तक्षकपुत्रस्याश्वसेनस्य
मोचनम् ॥ ३ ॥
पावकान्मुमुक्षूणां नागादीनां मारणम् ॥ ४ ॥
इन्द्रस्य कृष्णार्जुनाभ्यां युद्धम् ॥ ५ ॥

१-२५३-० (१०९९०)
वैशम्पायन उवाच। १-२५३-०क्ष् (१३३०)
तस्याथ वर्षतो वारि पाण्डवः प्रत्यवारयत् ।
शरवर्षेण बीभत्सुरुत्तमास्त्राणि दर्शयन् ॥ १-२५३-१ (१०९९१)
खाण्डवं च वनं सर्वं पाण्डवो बहुभिः शरैः ।
प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः ॥ १-२५३-२ (१०९९२)
न च स्म किंचिच्छक्नोति भूतं निश्चरितुं ततः ।
संछाद्यमाने खे बाणैरस्यता सव्यसाचिना ॥ १-२५३-३ (१०९९३)
तक्षकस्तु न तत्रासीन्नागराजो महाबलः ।
दह्यमाने वने तस्मिन्कुरुक्षेत्रं गतो हि सः ॥ १-२५३-४ (१०९९४)
अश्वसेनोऽभवत्तत्र तक्षकस्य सुतो बली ।
स यत्नमकरोत्तीव्रं मोक्षार्थं जातवेदसः ॥ १-२५३-५ (१०९९५)
न शशाक स निर्गन्तुं निरुद्धोऽर्जुनपत्रिभिः ।
मोक्षयामास तं माता निगीर्य भुजगात्मजा ॥ १-२५३-६ (१०९९६)
तस्य पूर्वं शिरो ग्रस्तं पुच्छमस्य निगीर्यते ।
निगीर्य सोर्ध्वमक्रामत्सुतं नागी मुमुक्षया ॥ १-२५३-७ (१०९९७)
तस्याः शरेण तीक्ष्णेन पृथुधारेण पाण्डवः ।
शिरश्चिच्छेद गच्छन्त्यास्तामपश्यच्छचीपतिः ॥ १-२५३-८ (१०९९८)
तं मुमोचयिषुर्वज्री वातवर्षेण पाण्डवम् ।
मोहयामास तत्कालमश्वसेनस्त्वमुच्यत ॥ १-२५३-९ (१०९९९)
तां च मायां तदा दृष्टा घोरां नागेन वञ्चितः ।
द्विधा त्रिधा च खगतान्प्राणिनः पाण्डवोच्छिनत् ॥ १-२५३-१० (११०००)
शशाप तं च संक्रुद्धो बीभत्सुर्जिह्मगामिनम् ।
पावको वासुदेवश्चाप्यप्रतिष्ठो भविष्यसि ॥ १-२५३-११ (११००१)
ततो जिष्णुः सहस्राक्षं खं वितत्याशुगैः शरैः ।
योधयामास संक्रुद्धो वञ्चनां तामनुस्मरन् ॥ १-२५३-१२ (११००२)
देवराजोऽपि तं दृष्ट्वा संरब्धं समरेऽर्जुनम् ।
स्वमस्त्रमसृजत्तीव्रं छादयित्वाऽखिलं नभः ॥ १-२५३-१३ (११००३)
ततो वायुर्महाघोषः क्षोभयन्सर्वसागरान् ।
वियत्स्थो जनयन्मेघाञ्जलधारासमाकुलान् ॥ १-२५३-१४ (११००४)
ततोऽशनिमुचो घोरांस्तडित्स्तनितनिःस्वनान् ।
तद्विघातार्थमसृजदर्जुनोऽप्यस्त्रमुत्तमम् ॥ १-२५३-१५ (११००५)
वायव्यमभिमन्त्र्याथ प्रतिपत्तिविशारदः ।
तेनेन्द्राशनिमेघानां वीर्यौजस्तद्विनाशितम् ॥ १-२५३-१६ (११००६)

जलधाराश्च ताः शोषं जग्मुर्नेशुश्च विद्युतः ।
क्षणेन चाभवद्व्योम संप्रशान्तरजस्तमः ॥ १-२५३-१७ (११००७)
सुखशीतानिलवहं प्रकृतिस्थार्कमण्डलम् ।
निष्प्रतीकारहृष्टश्च हुतभुग्विविधाकृतिः ॥ १-२५३-१८ (११००८)
सिच्यमानो वसौघैस्तैः प्राणिनां देहनिःसृतैः ।
प्रजज्वालाथ सोऽर्चिष्मान्स्वनादैः पूरयञ्जगत् ॥ १-२५३-१९ (११००९)
कृष्णाभ्यां रक्षितं दृष्ट्वा तं च दावमहङ्कृताः ।
खमुत्पेतुर्महाराज सुपर्णाद्याः पतत्त्रिणः ॥ १-२५३-२० (११०१०)
गरुत्मान्वज्रसदृशैः पक्षतुण्डनखैस्तथा ।
प्रहर्तुकामो न्यपतदाकाशात्कृष्णपाण्डवौ ॥ १-२५३-२१ (११०११)
तथैवोरगसङ्घाताः पाण्डवस्य समीपतः ।
उत्सृजन्तो विषं घोरं निपेतुर्ज्वलिताननाः ॥ १-२५३-२२ (११०१२)
तांश्चकर्त शरैः पार्थः सरोषाग्निसमुक्षितैः ।
विविशुश्चापि तं दीप्तं देहाभावाय पावकम् ॥ १-२५३-२३ (११०१३)
ततः सुराः सगन्धर्वा यक्षराक्षसपन्नगाः ।
उत्पेतुर्नादमतुलमुत्सृजन्तो रणार्थिनः ॥ १-२५३-२४ (११०१४)
अयःकणपचक्राश्मभुशुण्ड्युद्यतबाहवः ।
कृष्णपार्थौ जिघांसन्तः क्रोधसंमूर्च्छितौजसः ॥ १-२५३-२५ (११०१५)
तेषामतिव्याहरतां शस्त्रवर्षं प्रमुञ्चताम् ।
प्रममाथोत्तमाङ्गानि बीभत्सुर्निशितैः शरैः ॥ १-२५३-२६ (११०१६)
कृष्णश्च सुमहातेजाश्चक्रेणारिविनाशनः ।
दैत्यदानवसङ्घानां चकार कदनं महत् ॥ १-२५३-२७ (११०१७)
अथापरे शरैर्विद्धाश्चक्रवेगेरितास्तथा ।
वेलामिव समासाद्य व्यतिष्ठन्नमितौजसः ॥ १-२५३-२८ (११०१८)
ततः शक्रोऽतिसङ्क्रुद्धस्त्रिदशानां महेश्वरः ।
पाण्डुरं गजमास्थाय तावुभौ समुपाद्रवत् ॥ १-२५३-२९ (११०१९)
वेगेनाशनिमादाय वज्रमस्त्रं च सोऽसृजत् ।
हतावेताविति प्राह सुरानसुरसूदनः ॥ १-२५३-३० (११०२०)
ततः समुद्यतां दृष्ट्वा देवेन्द्रेण महाशनिम् ।
जगृहुः सर्वशस्त्राणि स्वानि स्वानि सुरास्तथा ॥ १-२५३-३१ (११०२१)
कालदण्डं यमो राजन् गदां चैव धनेश्वरः ।
पाशांश्च तत्र वरुणो विचित्रां च तथाऽशनिम् ॥ १-२५३-३२ (११०२२)
स्कन्दः शक्तिं समादाय तस्थौ मेरुरिवाचलः ।
ओषधीर्दीप्यमानाश्च जगृहातेऽस्विनावपि ॥ १-२५३-३३ (११०२३)
जगृहे च धनुर्धाता मुसलं तु जयस्तथा ।
पर्वतं चापि जग्राह क्रुद्धस्त्वष्टा महाबलः ॥ १-२५३-३४ (११०२४)

अंशस्तु शक्तिं जग्राह मृत्युर्देवः परश्वधम् ।
प्रगृह्य परिघं घोरं विचचारार्यमा अपि ॥ १-२५३-३५ (११०२५)
मित्रश्च क्षुरपर्यन्तं चक्रमादाय तस्थिवान् ।
पूषा भगश्च संक्रुद्धः सविता च विशांपते ॥ १-२५३-३६ (११०२६)
आत्तकार्मुकनिस्त्रिंशाः कृष्णापार्थौ प्रदुद्रुवुः ।
रुद्राश्च वसवश्चैव मरुतश्च महाबलाः ॥ १-२५३-३७ (११०२७)
विश्वेदेवास्तथा साध्या दीप्यमानाः स्वतेजसा ।
एते चान्ये च बहवो देवास्तौ पुरुषोत्तमौ ॥ १-२५३-३८ (११०२८)
कृष्णपार्थौ जिघांसन्तः प्रतीयुर्विविधायुधाः ।
तत्राद्भुतान्यदृश्यन्त निमित्तानि महाहवे ॥ १-२५३-३९ (११०२९)
युगान्तसमरूपाणि भूतसंमोहनानि च ।
तथा दृष्ट्वा सुसंरब्धं शक्रं देवैः सहाच्युतौ ॥ १-२५३-४० (११०३०)
अभीतौ युधि दुर्धर्षौ तस्थतुः सज्जकार्मुकौ ।
आगच्छतस्ततो देवानुभौ युद्धविशारदौ ॥ १-२५३-४१ (११०३१)
व्यताडयेतां संक्रुद्धौ शरैर्वज्रोपमैस्तदा ।
असकृद्भग्नसंकल्पाः सुराश्च बहुशः कृताः ॥ १-२५३-४२ (११०३२)
भयाद्रणं परित्यज्य शक्रमेवाभिशिश्रियुः ।
दृष्ट्वा निवारितान्देवान्माधवेनार्जुनेन च ॥ १-२५३-४३ (११०३३)
आश्चर्यमगमंस्तत्र मुनयो नभसि स्थिताः ।
शक्रश्चापि तयोर्वीर्यमुपलभ्यासकृद्रणे ॥ १-२५३-४४ (११०३४)
बभूव परमप्रीतो भूयश्चैतावयोधयत् ।
ततोऽश्मवर्षं सुमहद्व्यसृजत्पाकशासनः ॥ १-२५३-४५ (११०३५)
भूय एव तदा वीर्यं जिज्ञासुः सव्यसाचिनः ।
तच्छैरर्जुनो वर्षं प्रतिजघ्नेऽत्यमर्षितः ॥ १-२५३-४६ (११०३६)
विफलं क्रियमाणं तत्समवेक्ष्य शतक्रतुः ।
भूयः संवर्धयामास तद्वर्षं पाकशासनः ॥ १-२५३-४७ (११०३७)
सोश्मवर्षं महावेगैरिषुभिः पाकशासनिः ।
विलयं गमयामास हर्षयन्पितरं तथा ॥ १-२५३-४८ (११०३८)
तत उत्पाट्य पाणिभ्यां मन्दराच्छिखरं महत् ।
सद्रुमं व्यसृजच्छक्रो जिघांसुः पाण्डुनन्दनम् ॥ १-२५३-४९ (११०३९)
ततोऽर्जुनो वेगवद्भिर्ज्वलिताग्रैरजिह्मगैः ।
शरैर्विध्वंसयामास गिरेः शृङ्गं सहस्रधा ॥ १-२५३-५० (११०४०)
गिरेर्विशीर्यमाणस्य तस्य रूपं तदा बभौ ।
सार्कचन्द्रग्रहस्येव नभसः परिशीर्यतः ॥ १-२५३-५१ (११०४१)
तेनाभिपतता दावं शैलेन महता भृशम् ।
शृङ्गेण निहतास्तत्र प्राणिनः खाण्डवालयाः ॥ ॥ १-२५३-५२ (११०४२)

इति श्रीमन्महाभारते आदिपर्वणि खाण्डवदाहपर्वणि
त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥ ॥ समाप्तं च
खाण्डवदाहपर्व ॥

आदिपर्व - अध्याय २५४
॥ श्रीः ॥
१.२५४. अध्यायः २५४

(अथ मयदर्शनपर्व ॥ १९ ॥)
Mahabharata - Adi Parva - Chapter Topics
देवेषु पराजितेषु अशरीरवाणीश्रवणेन इन्द्रस्य निवृत्तिः ॥ १ ॥
पलायमानं मयं हन्तुमुद्युक्ते श्रीकृष्णे आत्मानं शरणागतस्य
मयस्य अर्जुनेनाभयदानम् ॥ २ ॥
खाण्डवदाहेऽपि अश्वसेनादीनामदाहस्य वैशम्पायनेन कथनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५४-० (११०४३)
वैशम्पायन उवाच। १-२५४-०क्ष् (१३३१)
तथा शैलनिपातेन भीषिताः खाण्डवालयाः ।
दानवा राक्षसा नागास्तरक्ष्वृक्षवनौकसः ॥ १-२५४-१ (११०४४)
द्विपाः प्रभिन्नाः शार्दूलाः सिंहाः केसरिणस्तथा ।
मृगाश्च महिषाश्चैव शतशः पक्षिणस्तथा ॥ १-२५४-२ (११०४५)
समुद्विग्ना विससृपुस्तथान्या भूतजातयः ।
तं दावं समुदैक्षन्त कृष्णौ चाभ्युद्यतायुधौ ॥ १-२५४-३ (११०४६)
उत्पातनादशब्देन त्रासिता इव चाभवन् ।
ते वनं प्रसमीक्ष्याथ दह्यमानमनेकधा ॥ १-२५४-४ (११०४७)
कृष्णमभ्युद्यतास्त्रं च नादं मुमुचुरुल्बणम् ।
तेन नादेन रौद्रेण नादेन च विभावसोः ॥ १-२५४-५ (११०४८)
ररास गगनं कृत्स्नमुत्पातजलदैरिव ।
ततः कृष्णो महाबाहुः स्वतेजोभास्वरं महत् ॥ १-२५४-६ (११०४९)
चक्रं व्यसृजदत्युग्रं तेषां नाशाय केशवः ।
तेनार्ता जातयः क्षुद्राः सदानवनिशाचराः ॥ १-२५४-७ (११०५०)
निकृत्ताः शतशः सर्वा निपेतुरनलं क्षणात् ।
तत्रादृश्यन्त ते दैत्याः कृष्णचक्रविदारिताः ॥ १-२५४-८ (११०५१)

वसारुधिरसंपृक्ताः सन्ध्यायामिव तोयदाः ।
पिशाचान्पक्षिणो नागान्पशूंश्चैव सहस्रशः ॥ १-२५४-९ (११०५२)
निघ्नंश्चरति वार्ष्णेयः कालवत्तत्र भारत ।
क्षिप्तं क्षिप्तं पुनश्चक्रं कृष्णस्यामित्रघातिनः ॥ १-२५४-१० (११०५३)
छित्त्वानेकानि सत्वानि पाणिमेति पुनः पुनः ।
तथा तु निघ्नतस्तस्य पिशाचोरगराक्षसान् ॥ १-२५४-११ (११०५४)
बभूव रूपमत्युग्रं सर्वभूतात्मनस्तदा ।
समेतानां च सर्वेषां दानवानां च सर्वशः ॥ १-२५४-१२ (११०५५)
विजेता नाभवत्कश्चित्कृष्णपाण्डवयोर्मृधे ।
तयोर्बलात्परित्रातुं तं च दावं यदा सुराः ॥ १-२५४-१३ (११०५६)
नाशक्नुवञ्शमयितुं तदाऽभूवन्पराङ्मुखाः ।
शतक्रतुस्तु संप्रेक्ष्य विमुखानमरांस्तथा ॥ १-२५४-१४ (११०५७)
बभूव मुदितो राजन्प्रशंसन्केशवार्जुनौ ।
निवृत्तेष्वथ देवेषु वागुवाचाशरीरिणी ॥ १-२५४-१५ (११०५८)
शतक्रतुं समाभाष्य महागम्भीरनिःस्वना ।
न ते सखा सन्निहितस्तक्षको भुजगोत्तमः ॥ १-२५४-१६ (११०५९)
दाहकाले खाण्डवस्य कुरुक्षेत्रं गतो ह्यसौ ।
न च शक्यौ युधा जेतुं कथंचिदपि वासव ॥ १-२५४-१७ (११०६०)
वासुदेवार्जुनावेतौ निबोध वचनान्मम ।
नरनारायणावेतौ पूर्वदेवौ दिवि श्रुतौ ॥ १-२५४-१८ (११०६१)
भवानप्यभिजानाति यद्वीर्यौ यत्पराक्रमौ ।
नैतौ शक्यौ दुराधर्षौ विजेतुमजितौ युधि ॥ १-२५४-१९ (११०६२)
अपि सर्वेषु लोकेषु पुराणावृषिसत्तमौ ।
पूजनीयतमावेतावपि सर्वैः सुरासुरैः ॥ १-२५४-२० (११०६३)
यक्षराक्षसगन्धर्वनरकिन्नरपन्नगैः ।
तस्मादितः सुरैः सार्धं गन्तुमर्हसि वासव ॥ १-२५४-२१ (११०६४)
दिष्टं चाप्यनुपश्यैतत्खाण्डवस्य विनाशनम् ।
इति वाक्यमुपश्रुत्य तथ्यमित्यमरेश्वरः ॥ १-२५४-२२ (११०६५)
क्रोधामर्षौ समुत्सृज्य संप्रतस्थे दिवं तदा ।
तं प्रस्थितं महात्मानं समवेक्ष्य दिवौकसः ॥ १-२५४-२३ (११०६६)
सहिताः सेनया राजन्ननुजग्मुः पुरन्दरम् ।
देवराजं तदा यान्तं सह देवैरवेक्ष्य तु ॥ १-२५४-२४ (११०६७)
वासुदेवार्जुनौ वीरौ सिंहनादं विनेदतुः ।
देवराजे गते राजन्प्रहृष्टौ केशवार्जुनौ ॥ १-२५४-२५ (११०६८)
निर्विशङ्कं वनं वीरौ दाहयामासतुस्तदा ।
स मारुत इवाभ्राणि नाशयित्वाऽर्जुनः सुरान् ॥ १-२५४-२६ (११०६९)

व्यधमच्छरसङ्घातैर्देहिनः खाण्डवालयान् ।
न च स्म किंचिच्छक्नोति भूतं निश्चरितुं ततः ॥१-२५४-२७ (११०७०)
संछिद्यमानमिषुभिरस्यता सव्यसाचिना ।
नाशक्नुवंश्च भूतानि महान्त्यपि रणेऽर्जुनम् ॥१-२५४-२८ (११०७१)
निरीक्षितुममोघास्त्रं योद्धुं चापि कुतो रणे ।
शतं चैकेन विव्याध शतेनैकं पतत्रिणाम् ॥१-२५४-२९ (११०७२)
व्यसवस्तेऽपतन्नग्नौ साक्षात्कालहता इव ।
न चालभन्त ते शर्म रोधःसु विषमेषु च ॥१-२५४-३० (११०७३)
पितृदेवनिवासेषु सन्तापश्चाप्यजायत ।
भूतसङ्घाश्च बहवो दीनाश्चक्रुर्महास्वनम् ॥१-२५४-३१ (११०७४)
रुरुदुर्वारणाश्चैव तथा मृगतरक्षवः ।
तेन शब्देन वित्रेसुर्गङ्गोदधिचरा झषाः ॥१-२५४-३२ (११०७५)
विद्याधरगणाश्चैव ये च तत्र वनौकसः ।
न त्वर्जुनं महाबाहो नापि कृष्णं जनार्दनम् ॥१-२५४-३३ (११०७६)
निरीक्षितुं वै शक्नोति कश्चिद्योद्धुं कुतः पुनः ।
एकायनगता येऽपि निष्पेतुस्तत्र केचन ॥१-२५४-३४ (११०७७)
राक्षसा दानवा नागा जघ्ने चक्रेण तान्हरिः ।
ते तु भिन्नशिरोदेहाश्चक्रवेगाद्गतासवः ॥१-२५४-३५ (११०७८)
पेतुरन्ये महाकायाः प्रदीप्ते वसुरेतसि ।
समांसरुधिरौघैश्च वसाभिश्चापि तर्पितः ॥१-२५४-३६ (११०७९)
उपर्याकाशगो भूत्वा विधूमः समपद्यत ।
दीप्ताक्षो दीप्तजिह्वश्च संप्रदीप्तमहाननः ॥१-२५४-३७ (११०८०)
दीप्तोर्ध्वकेशः पिङ्गाक्षः पिबन्प्राणभृतां वसाम् ।
तां स कृष्णार्जुनकृतां सुधां प्राप्य हुताशनः ॥१-२५४-३८ (११०८१)
बभूव मुदितस्तृप्तः परां निर्वृतिमागतः ।
तथाऽसुरं मयं नाम तक्षकस्य निवेशनात् ॥१-२५४-३९ (११०८२)
विप्रद्रवन्तं सहसा ददर्श मधुसूदनः ।
तमग्निः प्रार्थयामास दिधक्षुर्वातसारथिः ॥१-२५४-४० (११०८३)
शरीरवाञ्जटी भूत्वा नदन्निव बलाहकः ।
विज्ञाय दानवेन्द्राणां मयं वै शिल्पिनां वरम् ॥१-२५४-४१ (११०८४)
जिघांसुर्वासुदेवस्तं चक्रमुद्यम्य धिष्ठितः ।
स चक्रमुद्यतं दृष्ट्वा दिधक्षन्तं च पावकम् ॥१-२५४-४२ (११०८५)
अभिधावार्जुनेत्येवं मयस्त्राहीति चाब्रवीत् ।
तस्य भीतस्वनं श्रुत्वा मा भैरिति धनंजयः ॥१-२५४-४३ (११०८६)
प्रत्युवाच मयं पार्थो जीवयन्निव भारत ।
तं न भेतव्यमित्याह मयं पार्थो दयापरः ॥१-२५४-४४ (११०८७)

तं पार्थेनाभये दत्ते नमुचेर्भ्रातरं मयम् ।
न हन्तुमैच्छद्दाशार्हः पावको न ददाह च ॥ १-२५४-४५ (११०८८)
तद्वनं पावको धीमान्दिनानि दश पञ्च च ।
ददाह कृष्णपार्थाभ्यां रक्षितः पाकशासनात् ॥ १-२५४-४६ (११०८९)
तस्मिन्वने दह्यमाने षडग्निर्न ददाह च ।
अश्वसेनं मयं चैव चतुरः शार्ङ्गकांस्तथा ॥ ॥ १-२५४-४७ (११०९०)

इति श्रीमन्महाभारते आदिपर्वणि मयदर्शनपर्वणि
चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

आदिपर्व - अध्याय २५५
॥ श्रीः ॥
१.२५५. अध्यायः २५५

Mahabharata - Adi Parva - Chapter Topics
शार्ङ्गकाणां मोचनकारणे जनमेजयेन पृष्टे वैशम्पायनेन
मन्दपालोपाख्यानकथनारम्भः ॥ १ ॥
तपसा पितृलोकं गतस्याप्यनवाप्ततपःफळस्य मन्दपालस्य देवाज्ञया
प्रजोत्पादनार्थं पुनर्भूमावागमनम् ॥ २ ॥
तत्र शार्ङ्गर्यां जरितायां पुत्रचतुष्टयोत्पादनम् ॥ ३ ॥
सपुत्रां जरितां खाण्डवे विसृज्य लपितानाम्न्याऽन्यया शार्ङ्गर्या
संगतस्य मन्दपालस्य विप्ररूपाग्निदर्शनम् ॥ ४ ॥
तस्य खाण्डवदिधक्षां ज्ञात्वा पुत्ररक्षणार्थं स्तुतादग्नेर्वरलाभः
॥ ५ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५५-० (११०९१)
जनमेजय उवाच। १-२५५-०क्ष् (१३३२)
किमर्थं शार्ङ्गकानग्निर्न ददाह तथा गते ।
तस्मिन्वने दह्यमाने ब्रह्मन्नेतत्प्रचक्ष्व मे ॥ १-२५५-१ (११०९२)
अदाहे ह्यश्वसेनस्य दानवस्य मयस्य च ।
कारणं कीर्तितं ब्रह्मञ्शार्ङ्गकाणां न कीर्तितम् ॥ १-२५५-२ (११०९३)
तदेतदद्भुतं ब्रह्मञ्शार्ङ्गकाणामनामयम् ।
कीर्तयस्वाग्निसंमर्दे कथं ते न विनाशिताः ॥ १-२५५-३ (११०९४)
वैशम्पायन उवाच। १-२५५-४क्ष् (१३३३)
यदर्थं शार्ङ्गकानग्निर्न ददाह तथा गते ।

तत्ते सर्वं प्रवक्ष्यामि यथा भूतमरिन्दम ॥ १-२५५-४ (११०९५)
धर्मज्ञानां मुख्यतमस्तपस्वी संशितव्रतः ।
आसीन्महर्षिः श्रुतवान्मन्दपाल इति श्रुतः ॥ १-२५५-५ (११०९६)
स मार्गमाश्रितो राजन्नृषीणामूर्ध्वरेतसाम् ।
स्वाध्यायवान्धर्मरतस्तपस्वी विजितेन्द्रियः ॥ १-२५५-६ (११०९७)
स गत्वा तपसः पारं देहमुत्सृज्य भारत ।
जगाम पितृलोकाय न लेभे तत्र तत्फलम् ॥ १-२५५-७ (११०९८)
स लोकानफलान्दृष्ट्वा तपसा निर्जितानपि ।
पप्रच्छ धर्मराजस्य समीपस्थान्दिवौकसः ॥ १-२५५-८ (११०९९)
मन्दपाल उवाच। १-२५५-९क्ष् (१३३४)
किमर्थमावृता लोका ममैते तपसाऽर्जिताः ।
किं मया न कृतं तत्र यस्यैतत्कर्मणः फलम् ॥ १-२५५-९ (१११००)
तत्राहं तत्करिष्यामि यदर्थमिदमावृतम् ।
फलमेतस्य तपसः कथयध्वं दिवौकसः ॥ १-२५५-१० (१११०१)
देवा ऊचुः। १-२५५-११क्ष् (१३३५)
ऋणिनो मानवा ब्रह्मञ्जायन्ते येन तच्छृणु ।
क्रियाभिर्ब्रह्मचर्येण प्रजया च न संशयः ॥ १-२५५-११ (१११०२)
तदपाक्रियते सर्वं यज्ञेन तपसा सुतैः ।
तपस्वी यज्ञकृच्चासि न च ते विद्यते प्रजा ॥ १-२५५-१२ (१११०३)
त इमे प्रसवस्यार्थे तव लोकाः समावृताः ।
प्रजायस्व ततो लोकानुपभोक्ष्यसि पुष्कलान् ॥ १-२५५-१३ (१११०४)
पुन्नाम्नो नरकात्पुत्रस्त्रायते पितरं श्रुतिः ।
तस्मादपत्यसन्ताने यतस्व ब्रह्मसत्तम ॥ १-२५५-१४ (१११०५)
वैशम्पायन उवाच। १-२५५-१५क्ष् (१३३६)
तच्छ्रुत्वा मन्दपालस्तु वचस्तेषां दिवौकसाम् ।
क्व नु शीघ्रमपत्यं स्याद्बहुलं चेत्यचिन्तयत् ॥ १-२५५-१५ (१११०६)
स चिन्तयन्नभ्यगच्छत्सुबहुप्रसवान्खगान् ।
शार्ङ्गिकां शार्ङ्गको भूत्वा जरितां समुपेयिवान् ॥ १-२५५-१६ (१११०७)
तस्यां पुत्रानजनयच्चतुरो ब्रह्मवादिनः ।
तानपास्य स तत्रैव जगाम लपितां प्रति ॥ १-२५५-१७ (१११०८)
बालान्स तानण्डगतान्सह मात्रा मुनिर्वने ।
तस्मिन्गते महाभागे लपितां प्रति भारत ॥ १-२५५-१८ (१११०९)
अपत्यस्नेहसंयुक्ता जरिता बह्वचिन्तयत् ।
तेन त्यक्तानसंत्याज्यानृषीनण्डगतान्वने ॥ १-२५५-१९ (११११०)
न जहौ पुत्रशोकार्ता जरिता खाण्डवे सुतान् ।
बभार चैतान्संजातान्स्ववृत्त्या स्नेहविक्लवा ॥ १-२५५-२० (११११११)

ततोऽग्निं खाण्डवं दग्धुमायान्तं दृष्टवानृषिः ।
मन्दपालश्चरंस्तस्मिन्वने लपितया सह ॥१-२५५-२१ (११११२)
तं संकल्पं विदित्वाग्नेर्ज्ञात्वा पुत्रांश्च बालकान् ।
सोऽभितुष्टाव विप्रर्षिर्ब्राह्मणो जातवेदसम् ॥१-२५५-२२ (११११३)
पुत्रान्प्रतिवदन्भीतो लोकपालं महौजसम्। १-२५५-२३ (११११४)
मन्दपाल उवाच ।
त्वमग्ने सर्वलोकानां मुखं त्वमसि हव्यवाट् ॥ १-२५५-२३क्ष् (१३३७)
त्वमन्तः सर्वभूतानां गूढश्चरसि पावक ।
त्वामेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः ॥१-२५५-२४ (११११५)
त्वामष्टधा कल्पयित्वा यज्ञवाहमकल्पयन् ।
त्वया विश्वमिदं सृष्टं वदन्ति परमर्षयः ॥१-२५५-२५ (११११६)
त्वदृते हि जगत्कृत्स्नं सद्यो नश्येद्धुताशन ।
तुभ्यं कृत्वा नमो विप्राः स्वकर्मविजितां गतिम् ॥१-२५५-२६ (११११७)
गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ।
त्वामग्ने जलदानाहुः खेविषक्तान्सविद्युतः ॥१-२५५-२७ (११११८)
दहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हेतयः ।
जातवेदस्त्वयैवेदं विश्वं सृष्टं महाद्युते ॥१-२५५-२८ (११११९)
तवैव कर्मविहितं भूतं सर्वं चराचरम् ।
त्वयापो विहिताः पूर्वं त्वयि सर्वमिदं जगत् ॥१-२५५-२९ (१११२०)
त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितम् ।
त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः ॥१-२५५-३० (१११२१)
त्वमश्विनौ यमौ मित्रः सोमस्त्वमसि चानिलः। १-२५५-३१ (१११२२)
वैशम्पायन उवाच ।
एवं स्तुतस्तदा तेन मन्दपालेन पावकः ॥ १-२५५-३१क्ष् (१३३८)
तुतोष तस्य नृपते मुनेरमिततेजसः ।
उवाच चैनं प्रीतात्मा किमिष्टं करवाणि ते ॥१-२५५-३२ (१११२३)
तमब्रवीन्मन्दपालः प्राञ्जलिर्हव्यवाहनम् ।
प्रदहन्खाण्डवं दावं मम पुत्रान्विसर्जय ॥१-२५५-३३ (१११२४)
तथेति तत्प्रतिश्रुत्य भगवान्हव्यवाहनः ।
खाण्डवे तेन काले न प्रजज्वाल दिदक्षया ॥ ॥१-२५५-३४ (१११२५)

इति श्रीमन्महाभारते आदिपर्वणि मयदर्शनपर्वणि
पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२५५-२३ पुत्राणां दहनाद्भीतो इति ङ । पाठः ॥

पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥
२५५ ॥

आदिपर्व - अध्याय २५६
॥ श्रीः ॥
१.२५६. अध्यायः २५६

Mahabharata - Adi Parva - Chapter Topics
प्रज्वलदग्निदर्शनेन जरितायाः स्वपुत्रैः संवादः ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५६-० (१११२६)
वैशम्पायन उवाच। १-२५६-०क्ष् (१३३९)
ततः प्रज्वलिते वह्नौ शार्ङ्गकास्ते सुदुःखिताः ।
व्यथिताः परमोद्विग्ना नाधिजग्मुः परायणम् ॥ १-२५६-१ (१११२७)
निशाम्य पुत्रकान्बालान्माता तेषां तपस्विनी ।
जरिता शोकदुःखार्ता विललाप सुदुःखिता ॥ १-२५६-२ (१११२८)
जरितोवाच। १-२५६-३क्ष् (१३४०)
अयमग्निर्दहन्कक्षमित आयाति भीषणः ।
जगत्संदीपयन्भीमो मम दुःखविवर्धनः ॥ १-२५६-३ (१११२९)
इमे च मां कर्षयन्ति शिशवो मन्दचेतसः ।
अबर्हाश्चरणैर्हीनाः पूर्वेषां नः परायणाः ॥ १-२५६-४ (१११३०)
त्रासयंश्चायमायाति लेलिहानो महीरुहान् ।
अजातपक्षाश्च सुता न शक्ताः सरणे मम ॥ १-२५६-५ (१११३१)
आदाय च न शक्नोमि पुत्रांस्तरितुमात्मना ।
न च त्यक्तुमहं शक्ता हृदयं दूयतीव मे ॥ १-२५६-६ (१११३२)
कं तु जह्यामहं पुत्रं कमादाय व्रजाम्यहम् ।
किंनु मे स्यात्कृतं कृत्वा मन्यध्वं पुत्रकाः कथम् ॥ १-२५६-७ (१११३३)
चिन्तयाना विमोक्षं वो नाधिगच्छामि किंचन ।
छादयिष्यामि वो गात्रैः करिष्ये मरणं सह ॥ १-२५६-८ (१११३४)
जरितारौ कुलं ह्येतज्ज्येष्ठत्वेन प्रतिष्ठितम् ।
सारिसृक्कः प्रजायेत पितॄणां कुलवर्धनः ॥ १-२५६-९ (१११३५)
स्तम्बमित्रस्तपः कुर्याद्द्रोणो ब्रह्मविदां वरः ।
इत्येवमुक्त्वा प्रययौ पिता वो निर्घृणः पुरा ॥ १-२५६-१० (१११३६)
कमुपादाय शक्येयं गन्तुं कष्टाऽऽपदुत्तमा ।
किं नु कृत्वा कृतं कार्यं भवेदिति च विह्वला ।

नापश्यत्स्वधिया मोक्षं स्वसुतानां तदानलात् ॥ १-२५६-११ (१११३७)
वैशम्पायन उवाच। १-२५६-१२क्ष् (१३४१)
एवं ब्रुवाणां शार्ङ्गास्ते प्रत्यूचुरथ मातरम् ।
स्नेहमुत्सृज्य मातस्त्वं पत यत्र न हव्यवाट् ॥ १-२५६-१२ (१११३८)
अस्मास्विह विनष्टेषु भवितारः सुतास्तव ।
त्वयि मातर्विनष्टायां न नः स्यात्कुलसन्ततिः ॥ १-२५६-१३ (१११३९)
अन्ववेक्ष्यैतदुभयं क्षेमं स्याद्यत्कुलस्य नः ।
तद्वै कर्तुं परः कालो मातरेष भवेत्तव ॥ १-२५६-१४ (१११४०)
मा त्वं सर्वविनाशाय स्नेहं कार्षीः सुतेषु नः ।
न हीदं कर्म मोघं स्याल्लोककामस्य नः पितुः ॥ १-२५६-१५ (१११४१)
जरितोवाच। १-२५६-१६क्ष् (१३४२)
इदमाखोर्बिलं भूमौ वृक्षस्यास्य समीपतः ।
तदाविशध्वं त्वरिता वह्नेरत्र न वो भयम् ॥ १-२५६-१६ (१११४२)
ततोऽहं पांसुना छिद्रमपिधास्यामि पुत्रकाः ।
एवं प्रतिकृतं मन्ये ज्वलतः कृष्णवर्त्मनः ॥ १-२५६-१७ (१११४३)
तत एष्याम्यतीतेऽग्नौ विहन्तुं पांसुशंचयम् ।
रोचतामेष वो वादो मोक्षार्थं च हुताशनात् ॥ १-२५६-१८ (१११४४)
शार्ङ्गका ऊचुः। १-२५६-१९क्ष् (१३४३)
अबर्हान्मांसभूतान्नः क्रव्यादाखुर्विनाशयेत् ।
पश्यमाना भयमिदं प्रवेष्टुं नात्र शक्नुमः ॥ १-२५६-१९ (१११४५)
कथमग्निर्न नो धक्ष्येत्कथमाखुर्न नाशयेत् ।
कथं न स्यात्पिता मोघः कथं माता ध्रियेत नः ॥ १-२५६-२० (१११४६)
बिल आखोर्विनाशः स्यादग्नेराकाशचारिणाम् ।
अन्ववेक्ष्यैतदुभयं श्रेयान्दाहो न भक्षणम् ॥ १-२५६-२१ (१११४७)
गर्हितं मरणं नः स्यादाखुना भक्षिते बिले ।
शिष्टादिष्टः परित्यागः शरीरस्य हुताशनात् ॥ १-२५६-२२ (१११४८)
ग्अग्निदाहे तु नियतं ब्रह्मलोके ध्रुवा गतिः ॥' ॥ १-२५६-२३ (१११४९)

इति श्रीमन्महाभारते आदिपर्वणि मयदर्शनपर्वणि
षट्पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२५६-१५ नोऽस्माकं सर्वविनाशाय सर्वेषां विनाशाय सुतेषु स्नेहं
माकार्षीरिति संबन्धः ॥
१-२५६-१८ विहन्तुं दूरीकर्तुम् ।वादो वचनम् ॥
१-२५६-१९ क्रव्यादाखुर्मांसाद उन्दुरुः ।पश्यमानाः पश्यन्तः ॥

१-२५६-२० मोघो निष्फलाऽपत्योत्पत्तिः । ध्रियेत जीवेत ॥
१-२५६-२२ शिष्टादिष्टः शिष्टैरादिष्टः ॥
षट्पञ्चाशदधिकद्विशततमोऽध्यायः ॥
२५६ ॥

आदिपर्व - अध्याय २५७
॥ श्रीः ॥
१.२५७. अध्यायः २५७

Mahabharata - Adi Parva - Chapter Topics
पुत्रैः सह संवादानन्तरं जरितायाः स्थानान्तरगमनम् ॥ १ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५७-० (११९५०)
जरितोवाच। १-२५७-०क्ष् (१३४४)
अस्माद्बिलान्निष्पतितमाखुं श्येनो जहार तम् ।
क्षुद्रं पद्भयां गृहीत्वा च यातो नात्र भयं हि वः ॥ १-२५७-१ (११९५१)
शार्ङ्गका ऊचुः। १-२५७-२क्ष् (१३४५)
न हृतं तं वयं विद्मः श्येनेनाखुं कथंचन ।
अन्येऽपि भितारोऽत्र तेभ्योऽपि भमेव नः ॥ १-२५७-२ (११९५२)
संशयो वह्निरागच्छेद्दृष्टं वायोर्निवर्तनम् ।
मृत्युर्नो बिलवासिभ्यो बिले स्यान्नात्र संशयः ॥ १-२५७-३ (११९५३)
निःसंशयात्संशयितो मृत्युर्मातर्विशिष्यते ।
चर खे त्वं यथान्यायं पुत्रानाप्स्यसि शोभनान् ॥ १-२५७-४ (११९५४)
जरितोवाच। १-२५७-५क्ष् (१३४६)
अहं वेगेन तं यान्तमद्राक्षं पततां वरम् ।
बिलादाखुं समादाय श्येनं पुत्रा महाबलम् ॥ १-२५७-५ (११९५५)
तं पतन्तं महावेगा त्वरिता पृष्ठतोऽन्वगाम् ।
आशिषोऽस्य प्रयुञ्जाना हरतो मूषिकं बिलात् ॥ १-२५७-६ (११९५६)
यो नो द्वेष्टारमादाय श्येनराज प्रधावसि ।
भव त्वं दिवमास्थाय निरमित्रो हिरण्मयः ॥ १-२५७-७ (११९५७)
स यदा भक्षितस्तेन श्येनेनाखुः पतत्रिणा ।
तदाहं तमनुज्ञाप्य प्रत्युपायां पुनर्गृहम् ॥ १-२५७-८ (११९५८)
प्रविशध्वं बिलं पुत्रा विश्रब्धा नास्ति वो भयम् ।
श्येनेन मम पश्यन्त्या हृत आखुर्महात्मना ॥ १-२५७-९ (११९५९)
शार्ङ्गका ऊचुः। १-२५७-१०क्ष् (१३४७)

न विद्महे हृतं मातः श्येनैनाखुं कथंचन ।
अविज्ञाय न शक्यामः प्रवेष्टं विवरं भुवः ॥ १-२५७-१० (११११६०)
जरितोवाच। १-२५७-११क्ष् (१३४८)
अहं तमभिजानामि हृतं श्येनेन मूषिकम् ।
नास्ति वोऽत्र भयं पुत्राः क्रियतां वचनं मम ॥ १-२५७-११ (११११६१)
शार्ङ्गका ऊचुः। १-२५७-१२क्ष् (१३४९)
न त्वं मिथ्योपचारेण मोक्षयेथा भयाद्धि नः ।
समाकुलेषु ज्ञानेषु न बुद्धिकृतमेव तत् ॥ १-२५७-१२ (११११६२)
न चोपकृतमस्माभिर्न चास्मान्वेत्थ ये वयम् ।
पीड्यमाना बिभर्ष्यस्मान्का सती के वयं तव ॥ १-२५७-१३ (११११६३)
तरुणी दर्शीयाऽसि समर्था भर्तुरेषणे ।
अनुगच्छ पतिं मातुः पुत्रानाप्स्यसि शोभनान् ॥ १-२५७-१४ (११११६४)
वयमस्निं समाविश्य लोकानाप्स्याम शोभनान् ।
अथास्मान्न दहेदग्निरायास्त्वं पुनरेव नः ॥ १-२५७-१५ (११११६५)
वैशम्पायन उवाच। १-२५७-१६क्ष् (१३५०)
एवमुक्ता ततः शार्ङ्गी पुत्रानुत्सृज्य खाण्डवे ।
जगाम त्वरिता देशं क्षेममग्नेरनामयम् ॥ १-२५७-१६ (११११६६)
ततस्तीक्ष्णार्चिरभ्यागात्त्वरितो हव्यवाहनः ।
यत्र शार्ङ्गा वभूवुस्ते मन्दपालस्य पुत्रकाः ॥ १-२५७-१७ (११११६७)
ततस्तं ज्वलितं दृष्ट्वा ज्वलनं ते विहङ्गमाः ।
ग्व्यथिताः करुणा वाचः श्रावयामासुरन्तिकात्।'
जरितारिस्ततो वाक्यं श्रावयामास पावकम् ॥ ॥ १-२५७-१८ (११११६८)

इति श्रीमन्महाभारते आदिपर्वणि मयदर्शनपर्वणि
सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५७ ॥
Mahabharata - Adi Parva - Chapter Footnotes

१-२५७-३ वह्निरागच्छेदित्यत्र संशयो यतो वायोः सकाशाद्वह्नेति
वर्तनं दृष्टम् ॥
१-२५७-५ अहं वैश्येनमायान्तं इति ङ ।पाठः ॥
सप्तपञ्चाशदधिकद्विशततमोऽध्यायः ॥
२५७ ॥

आदिपर्व - अध्याय २५८
॥ श्रीः ॥
१.२५८. अध्यायः २५८

Mahabharata - Adi Parva - Chapter Topics
जरितार्यादीनां चतुर्णां शार्ङ्गकाणां परस्परं संवादः ॥ १ ॥
स्तुत्या प्रसन्नेनाग्निना तेभ्योऽभयदानम् ॥ २ ॥
शार्ङ्गकाणां प्रार्थनया अग्निना मार्जाराणां दाहः ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२५८-० (१११६९)
जरितारिरुवाच। १-२५८-०क्ष् (१३५१)
पुरतः कृच्छ्रकालस्य धीमाञ्जागर्ति पुरुषः ।
स कृच्छ्रकालं संप्राप्य व्यथां नैवैति कर्हिचित् ॥ १-२५८-१ (१११७०)
यस्तु कृच्छ्रमनुप्राप्तं विचेता नावबुध्यते ।
सकृच्छ्रकाले व्यथितो न श्रेयो विन्दते महत् ॥ १-२५८-२ (१११७१)
सारिसृक्व उवाच। १-२५८-३क्ष् (१३५२)
धीरस्त्वमसि मेधावी प्राणकृच्छ्रमिदं च नः ।
प्राज्ञः शूरो बहूनां हि भवत्येको न संशयः ॥ १-२५८-३ (१११७२)
स्तम्बमित्र उवाच। १-२५८-४क्ष् (१३५३)
ज्येष्ठस्तातो भवति वै ज्येष्ठो मुञ्चति कृच्छ्रतः ।
ज्येष्ठश्चेन्न प्रजानाति नीयान्किं करिष्यति ॥ १-२५८-४ (१११७३)
द्रोण उवाच। १-२५८-५क्ष् (१३५४)
हिरण्यरेतास्त्वरितो जलन्नायाति नः क्षयम् ।
सप्तजिह्वाननः क्रूरो लिहानो विसर्पति ॥ १-२५८-५ (१११७४)
वैशम्पायन उवाच। १-२५८-६क्ष् (१३५५)
एवं संभाष्य तेऽन्योन्यं मन्दपालस्य पुत्रकाः ।
तुष्टुवुः प्रयता भूत्वा यथाऽग्निं शृणु पार्थिव ॥ १-२५८-६ (१११७५)
जरितारिरुवाच। १-२५८-७क्ष् (१३५६)
आत्माऽसि वायोर्ज्वलन शरीरमसि वीरुधाम् ।
योनिरापश्च ते शुक्रं योनिस्त्वमसि चाम्भसः ॥ १-२५८-७ (१११७६)
ऊर्ध्वं चाधश्च सर्पन्ति पृष्ठतः पार्श्वतस्तथा ।
अर्चिषस्ते महावीर्य रश्यमः सवितुर्यथा ॥ १-२५८-८ (१११७७)
सारिसृक्क उवाच। १-२५८-९क्ष् (१३५७)
माता प्रणष्टा पितरं न विद्मः
पक्षा जाता नै नो धूमकेतो ।
न नस्त्राता विद्यते वै त्वदन्य-
स्तस्मादस्मांस्त्राहि बालांस्त्वमग्ने ॥ १-२५८-९ (१११७८)
यदग्ने ते शिवं रूपं ये च ते सप्त हेतयः ।

तेन नः परिपाहि त्वमार्तान्नः शरणैषिणः ॥ १-२५८-१० (१११७९)
त्वमेवैकस्तपसे जप्तवेदो
नान्यस्तप्ता विद्यते गोषु देव ।
ऋषीनस्मान्बालकान्पालयस्व
परेणास्मान्प्रेहि वै हव्यवाह ॥ १-२५८-११ (१११८०)
स्तम्बमित्र उवाच। १-२५८-१२क्ष् (१३५८)
सर्वमग्ने त्वमेवैकस्त्वयि सर्वमिदं जगत् ।
त्वं धारयसि भूतानि भुवनं त्वं बिभर्षि च ॥ १-२५८-१२ (१११८१)
त्वमग्निर्हव्यवाहस्त्वं त्वमेव परमं हविः ।
मनीषिणस्त्वां जानन्ति बहुधा चैकधापि च ॥ १-२५८-१३ (१११८२)
सृष्ट्वा लोकांस्त्रीनिमान्हव्यवाह
काले प्राप्ते पचसि पुनः समिद्धः ।
त्वं सर्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ॥ १-२५८-१४ (१११८३)
द्रोण उवाच। १-२५८-१५क्ष् (१३५९)
त्वमन्नं प्राणिभिर्भुक्तमन्तर्भूतो जगत्पते ।
नित्यप्रवृद्धः पचसि त्वयि सर्वं प्रतिष्ठितम् ॥ १-२५८-१५ (१११८४)
सूर्यो भूत्वा रश्मिभिर्जातवेदो
भूमेरम्भो भूमिजातान्रसांश्च ।
विश्वानादाय पुनरुत्सृज्य काले
दृष्ट्वा वृष्ट्या भावयसीह शुक्र ॥ १-२५८-१६ (१११८५)
त्वत्त एताः पुनः शुक्र वीरुधो हरितच्छदाः ।
जायन्ते पुष्करिण्यश्च सुभद्रश्च महोदधिः ॥ १-२५८-१७ (१११८६)
इदं वै सद्म तिग्मांशो वरुणस्य परायणम् ।
शिवस्त्राता भवास्माकं माऽस्मानद्य विनाशय ॥ १-२५८-१८ (१११८७)
पिङ्गाक्ष लोहितग्रीव कृष्णवर्त्मन्हुताशन ।
परेण प्रेहि मुञ्चास्मान्सागरस्य गृहानिव ॥ १-२५८-१९ (१११८८)
वैशम्पायन उवाच। १-२५८-२०क्ष् (१३६०)
एवमुक्तो जातवेदा द्रोणेन ब्रह्मवादिना ।
द्रोणमाह प्रतीतात्मा मन्दपालप्रतिज्ञया ॥ १-२५८-२० (१११८९)
अग्निरुवाच। १-२५८-२१क्ष् (१३६१)
ऋषिर्द्रोणस्त्वमसि वै ब्रह्मैतद्व्याहृतं
ईप्सितं ते करिष्यामि न च ते १-२५८-२१ (१११९०)
मन्दपालेन वै यूयं मम पूर्वं निवेदिताः ।
वर्जयेः पुत्रकान्मह्यं दहन्दावमिति स्म ह ॥ १-२५८-२२ (१११९१)
तस्य तद्वचनं द्रोण त्वया यच्चेह भाषितम् ।

उभयं मे गरीयस्तु ब्रूहि किं करवाणि ते ।
भृशं प्रीतोऽस्मि भद्रं ते ब्रह्मंस्तोत्रेण सत्तम ॥ १-२५८-२३ (१११९२)
द्रोण उवाच। १-२५८-२४क्ष् (१३६२)
इमे मार्जारकाः शुक्र नित्यमुद्विजयन्ति नः ।
एतान्कुरुष्व दग्धांस्त्वं हुताशन सबान्धवान् ॥ १-२५८-२४ (१११९३)
वैशम्पायन उवाच। १-२५८-२५क्ष् (१३६३)
तथा तत्कृतवानग्निरभ्यनुज्ञाय शार्ङ्गकान् ।
ददाह खाण्डवं दावं समिद्धो जनमेजय ॥ ॥ १-२५८-२५ (१११९४)

इति श्रीमन्महाभारते आदिपर्वणि मयदर्शनपर्वणि
अष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥

आदिपर्व - अध्याय २५९
॥ श्रीः ॥
१.२५९. अध्यायः २५९

Mahabharata - Adi Parva - Chapter Topics
पुत्रांश्चिन्तयन्तं मन्दपालं प्रति लपितायाः सासूयवचनम् ॥ १ ॥
अग्निशान्त्यनन्तरं आत्मदिदृक्षयाऽऽगतं मन्दपालं प्रति भार्यया
पुत्रैश्च उपालम्भः ॥ २ ॥
।
Mahabharata - Adi Parva - Chapter Text

१-२५९-० (१११९५)
वैशम्पायन उवाच। १-२५९-०क्ष् (१३६४)
मन्दपालोऽपि कौरव्यं चिन्तयामास पुत्रकान् ।
उक्त्वाऽपि च स तिग्मांशुं नैव शर्माधिगच्छति ॥ १-२५९-१ (१११९६)
स तप्यमानः पुत्रार्थे लपितामिदमब्रवीत् ।
कथं नु शक्ताः शरणे लपिते मम पुत्रकाः ॥ १-२५९-२ (१११९७)
वर्धमाने हुतवहे वाते चाशु प्रवायति ।
असमर्था विमोक्षाय भविष्यन्ति ममात्मजाः ॥ १-२५९-३ (१११९८)
कथं त्वशक्ता त्राणाय माता तेषां तपस्विनी ।
भविष्यति हि शोकार्ता पुत्रत्राणमपश्यती ॥ १-२५९-४ (१११९९)
कथमुड्डीयनेऽशक्तान्पतने च ममात्मजान् ।
सन्तप्यमाना बहुधा वाशमाना प्रधावती ॥ १-२५९-५ (११२००)
जरितारिः कथं पुत्रः सारिसृक्कः कथं च मे ।
स्तम्बमित्रः कथं द्रोणः कथं सा च तपस्विनी ॥ १-२५९-६ (११२०१)

लालप्यमानं तमृषइं मन्दपालं तथा वने ।
लपिता प्रत्युवाचेदं सासूयमिव भारत ॥ १-२५९-७ (११२०२)
न ते पुत्रेष्ववेक्षाऽस्ति यानृषीनुक्तवानसि ।
तेजस्विनो वीर्यवन्तो न तेषां ज्वलनाद्भयम् ॥ १-२५९-८ (११२०३)
त्वयाऽग्नौ ते परीताश्च स्वयं हि मम सन्निधौ ।
श्रुतं तथा चेति ज्वलनेन महात्मना ॥ १-२५९-९ (११२०४)
पलो न तां वाचमुक्त्वा मिथ्या करिष्यति ।
न्धुकृत्ये न तेन ते स्वस्थ मानसम् ॥ १-२५९-१० (११२०५)
तामेव तु ममामित्रां चिन्तयन्परितप्यसे ।
ध्रुवं मयि न ते स्नेहो यथा तपयं पुराऽभवत् ॥ १-२५९-११ (११२०६)
नहि पक्षवता न्याय्यं निः हेन सुहृज्जने ।
पीड्यमान उपद्रष्टुं शक्तेना मा कथंचन ॥ १-२५९-१२ (११२०७)
गच्छ त्वं जरितामेव यदर्थं परितप्यसे ।
चरिष्याम्यहमप्येका यथा पुरुषाश्रिता ॥ १-२५९-१३ (११२०८)
मन्दपाल उवाच। १-२५९-१४क्ष् (१३६५)
नाहमेवं चरे लोके यथा त्वमभिमन्यसे ।
अपत्यहेतोर्विचरे तच्च कृच्छ्रगतं मम ॥ १-२५९-१४ (११२०९)
भूतं हित्वा च भाव्यर्थे योऽवलम्बेत्स मन्दधीः ।
अवमन्येत तं लोको यथेच्छसि तथा कुरु ॥ १-२५९-१५ (११२१०)
एष हि प्रज्वलन्नग्निर्लेलिहानी महीरुहान् ।
आविग्ने हृदि सन्तापं जनयत्यशिवं मम ॥ १-२५९-१६ (११२११)
वैशम्पायन उवाच। १-२५९-१७क्ष् (१३६६)
ग्भर्तुर्हि वाक्यं सा श्रुत्वा लपिता दुःखिताऽभवत् ।
सान्त्वयामास च पुनः पति पतिपरायणा ॥' १-२५९-१७ (११२१२)
तस्माद्देशादतिक्रान्ते ज्वलने जरिता पुनः ।
जगाम पुत्रकानेन जरिता पुत्रगृद्धिनी ॥ १-२५९-१८ (११२१३)
सा तान्कुशलिनः सर्वान्विमुक्ताञ्जातवेदसः ।
रोरूयमाणान्ददृशे वने पुत्रान्निरामयान् ॥ १-२५९-१९ (११२१४)
अश्रूणि मुमुचे तेषां दर्शनात्सा पुनःपुनः ।
ग्न श्रद्धेयं ततस्तेषांर्शनं वै पुनःपुनः ॥ १-२५९-२० (११२१५)
इति मत्वाऽब्रवीद्बाकजरिता पुत्रगृद्धिनी।'
एकाकशश्च पुत्रांस्तन्त्र्शमानान्वपद्यत ॥ १-२५९-२१ (११२१६)
ग्जरिता तु परिष्वज्युत्रस्नेहाच्चुचुम्ब ह ॥' १-२५९-२२ (११२१७)
ततोऽभ्यगच्छत्सहसमन्दपालोऽपि भारत ।
अथ ते सर्व एवैनं भ्यनन्दंस्तदा सुताः ॥ १-२५९-२३ (११२१८)
ग्गुरुत्वान्मन्दपालस्तपसश्च विशेषतः ।

अभिवादामहे सर्वे तपक्षाः प्रसादतः ॥१-२५९-२४ (११२१९)
एवमुक्तवतां तेषां तनन्द्य महातपाः ।
परिष्वज्य ततो मू उपाघ्राय च बलकान् ।
पुत्रान्स्वयं समाहूयतः प्रोवाच गौतमः ॥' १-२५९-२५ (११२२०)
लालप्यमानमेकैकंरितां च पुनःपुनः ।
न चैवोचुस्तदा किंतमृषिं साध्वसाधु वा ॥१-२५९-२६ (११२२१)
मन्दपाल उवाच।१-२५९-२७क्ष् (१३६७)
ज्येष्ठः सुतस्ते कत कतमस्तस्य चानुजः ।
मध्यमः कतमश्चैव यान्कतमश्च ते ॥१-२५९-२७ (११२२२)
एवं ब्रुवन्तं दुःखाकं मा न प्रतिभाषसे ।
कृतवानस्मि हव्यानैव शान्तिमितो लभे ।
गएवमुक्त्वा तु तां मन्दपालस्तदाऽस्पृशत् ॥' १-२५९-२८ (११२२३)
जरितोवाच।१-२५९-२९क्ष् (१३६८)
किं नु ज्येष्ठेन ते किमनन्तरजेन ते ।
किं वा मध्यमजातेन किं कनिष्ठेन वा पुनः ॥१-२५९-२९ (११२२४)
यां त्वं मां सर्वतो हीनामुत्सृज्यासि गतः पुरा ।
तामेव लपितां गच्छ तरुणीं चारुहासिनीम् ॥१-२५९-३० (११२२५)
मन्दपाल उवाच।१-२५९-३१क्ष् (१३६९)
न स्त्रीणां विद्यते किंचिदमुत्र पुरुषान्तरात् ।
सापत्नकमृते लोके नान्यदर्थविनाशनम् ॥१-२५९-३१ (११२२६)
वैराग्निदीपनं चैव भृशुद्विगकारि च ।
सुव्रता चापि कल्याणी सर्वभूतेषु विश्रुता ॥१-२५९-३२ (११२२७)
अरुन्धती महात्मानं वसिष्ठं पर्यशङ्कत ।
विशुद्धभावमत्यन्तं सदा प्रियहिते रतम् ॥१-२५९-३३ (११२२८)
सप्तर्षिमध्यगं वीरमवमेने च तं मुनिम् ।
अपध्यानेन सा तेन धूमारुणसमप्रभा ।
लक्ष्याऽलक्ष्या नाभिरूपा निमित्तमिव पश्यति ॥ १-२५९-३४ (११२२९)
अपत्यहेतोः संप्राप्तं तथा त्वमपि मामिह ।
इष्टमेवं गते हि त्वं सा तथैवाद्य वर्तते ॥१-२५९-३५ (११२३०)
न हि भार्येति विश्वासः कार्यः पुंसा कथंचन ।
न हि कार्यमनुध्याति नारी पुत्रवती सती ॥१-२५९-३६ (११२३१)
वैशम्पायन उवाच।१-२५९-३७क्ष् (१३७०)
ततस्ते सर्व एवैनं पुत्राः सम्यगुपासते ।
स च तानात्मजान्सर्वानाश्वासयितुमुद्यतः ॥ ॥१-२५९-३७ (११२३२)

इति श्रीमन्महाभारते आदिप्रवणि मयदर्शनपर्वणि

ऊनषष्ट्यधिकद्विशततमोऽध्यायः ॥ २५९ ॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२५९- १-२५९-१० १-२५९-१२ मिति ङ । पाठः ॥
१-२५९-१३ ह्यपुरुषा तथा इति ङ । पाठः ॥
ऊनषष्ट्यधिकद्विशततमोऽध्यायः ॥
२५९ ॥

आदिपर्व - अध्याय २६०
॥ श्रीः ॥
१.२६०. अध्यायः २६०

Mahabharata - Adi Parva - Chapter Topics
मन्दपालस्य पुत्राश्वपूर्वकं सर्वैः सहान्यत्र गमनम् ॥ १ ॥
देवगणैः सहागतस्येन्द्रस्य कृष्णार्जुनवरदानपूर्वकं स्वलोकगमनम्
॥ २ ॥
अग्नेस्थानगमनानन्तरं कृष्णार्जुनमयानां नदीकूल उपवेशनम् ॥ ३ ॥

Mahabharata - Adi Parva - Chapter Text

१-२६०-० (११२३३)
मन्दपाल उवाच। १-२६०-०क्ष् (१३७१)
युष्माकमपवर्गार्थं ती ज्वलनो मया ।
अग्निना च तथेत्येतिज्ञातं महात्मना ॥ १-२६०-१ (११२३४)
अग्नेर्वचनमाज्ञाय धर्मज्ञतां च वः ।
भवतां च परं वीर्यं नाहमिहागतः ॥ १-२६०-२ (११२३५)
न सन्तापो हि वर्त्थः पुत्रका हृदि मां प्रति ।
ऋषीन्वेद हुताशो ब्रह्म तद्विदितं च वः ॥ १-२६०-३ (११२३६)
वैशम्पायन उवाच। १-२६०-४क्ष् (१३७२)
एवमाश्वासितान्पुत्रान्भार्यामादाय स द्विजः ।
मन्दपालस्ततो देशादन्यं देशं जगाम ह ॥ १-२६०-४ (११२३७)
भगवानापि तिग्मांशुः समिद्धः खाण्डवं ततः ।
ददाह सह कृष्णाभ्यां जनयञ्जगतो हितम् ॥ १-२६०-५ (११२३८)
वसामेदोवहाः कुल्यास्तत्र पीत्वा च पावकः ।
जगाम दर्शयामास चार्जुनम् ॥ १-२६०-६ (११२३९)
ततोऽन्तरिक्षाद्भगवानवतीर्य पुरन्दरः ।
मरुद्गणैर्वृतः पार्थं केशवं चेदमब्रवीत् ॥ १-२६०-७ (११२४०)

कृतं युवाभ्यां कर्मेदममरैरपि दुष्करम् ।
वरं वृणीतं तुष्टोऽस्मि दुर्लभं पुरुषेष्विह ॥ १-२६०-८ (११२४१)
पार्थस्तु वरयामास शक्रादस्त्राणि सर्वशः ।
प्रदातुं तच्च शक्रस्तु कालं चक्रे महाद्युतिः ॥ १-२६०-९ (११२४२)
यदा प्रसन्नो भगवान्महादेवो भविष्यति ।
तदातुभ्यं प्रदास्यामि पाण्डवास्त्राणि सर्वशः ॥ १-२६०-१० (११२४३)
अहमेव च तं कालं वेत्स्यामि कुरुनन्दन ।
तपसा महता चापि दास्यामि भवतोऽप्यहम् ॥ १-२६०-११ (११२४४)
आग्नेयानि च सर्वाणि वायव्यानि च सर्वशः ।
मदीयानि च सर्वाणि ग्रहीष्यसि धनञ्जय ॥ १-२६०-१२ (११२४५)
वासुदेवोऽपि जग्राह प्रीतिं पार्थेन शाश्वतीम् ।
ददौ सुरपतिश्चैव वरं कृष्णाय धीमते ॥ १-२६०-१३ (११२४६)
एवं दत्त्वा वरं ताभ्यां सह देवैर्मरुत्पतिः ।
हुताशनमनुज्ञाप्य जगामत्रिदिवं प्रभुः ॥ १-२६०-१४ (११२४७)
पावकश्च तदा दावं दग्ध्वसमृगपक्षिणम् ।
अहोभिरेकविंशद्भिर्विरराग्सुतर्पितः ॥ १-२६०-१५ (११२४८)
जग्ध्वा मांसानि पीत्वा चदांसि रुधिराणि च ।
युक्तः परमया प्रीत्या तावुत्वाच्युतार्जुनौ ॥ १-२६०-१६ (११२४९)
युवाभ्यां पुरुषाग्र्याभ्यां ततोऽस्मि यथासुखम् ।
अनुजानामि वां वीरौ चरतंत्र वाञ्छितम् ॥ १-२६०-१७ (११२५०)
ग्गाण्डिवं च धनुर्दिव्यमक्षौ च महेषुधी ।
कपिध्वजो रथश्चायं तव द महामते ॥ १-२६०-१८ (११२५१)
अनेन धनुषा चैव रथेनाने भारत ।
विजेष्यसि रणे शत्रून्सदेवामानुषान् ॥' १-२६०-१९ (११२५२)
एवं तौ समनुज्ञातौ पाववेमहात्मना ।
अर्जुनो वासुदेवश्च दानवश्चयस्तथा ॥ १-२६०-२० (११२५३)
परिक्रम्य ततः सर्वे त्रयोऽभरतर्षभ ।
रमणीये नदीकूले सहितामुपाविशंन् ॥ १-२६०-२१ (११२५४)

इति श्रीमन्महाभारते शतसाहस्त्र्यां संहितायां वैयासिक्यां आदिपर्वणि मयपर्वणि षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६० ॥ ॥ समाप्तं मयदर्शनपर्वादिपर्व च॥

Mahabharata - Adi Parva - Chapter Footnotes

१-२६०-१५ अहानि पञ्च चैकं च इति ख ।पाठः ॥
षष्ट्यधिकद्विशततमोऽध्यायः ॥

२६० ॥

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org